संस्कृतवर्षस्मृतिग्रन्थमाला
अप्रकाशितपाण्डुलिपिग्रन्थप्रकाशनम्-१८
प्रधानसम्पादकः - राधावल्लभत्रिपाठी

चन्द्रदत्तविरचितं

भगवद्भक्तिमाहात्म्यम्

सम्पादकः
बाबूरामशर्मा

राष्ट्रियसंस्कृतसंस्थानम्
(मानितविश्वविद्यालयः)
नवदेहली

प्रकाशकः
के.बी. सुब्बरायुडु
कुलसचिवः,
राष्ट्रियसंस्कृतसंस्थानम्
(मानितविश्वविद्यालयः)
56-57, इन्स्टीट्यूशनल् एरिया, जनकपुरी, नई दिल्ली-110058
ईपीएबीएक्स : (011) 28524993, 28521994, 28524995
ई मेल : rsks@nda.vsnl.net.in
वेबसाईट : www.sanskrit.nic.in

ग्रन्थमाला-संयोजकः - कू.वेङ्कटेशमूर्तिः

सह-संयोजकः - त. महेन्द्रः

संस्करणम् : 2012

ISBN : 978-93-82091-00-4

मूल्यम् : ₹ **440**

मुद्रकः
अमर प्रिंटिंग् प्रेस्
दिल्ली, ९८७१६९९५६५

आमुखम्

संस्कृतवाङ्मयमहोदधेः बहूनि ग्रन्थरत्नानि प्रकाशनाभावात् नाद्यावधि लोकलोचनगोचरीभूतानि अभवन्। हस्तलेखालयेषु/पाण्डुलिपिग्रन्थसङ्ग्रहालयेषु, प्राचीनगृहेषु वा विद्यमानान् तादृशग्रन्थान् प्रकाशयितुं बहुभिर्विद्वद्भिः विविधाभिः संस्थाभिश्च बहुविधप्रयासाः कृताः क्रियमाणाश्च वर्तन्ते। तादृशप्रयासेषु राष्ट्रियसंस्कृत-संस्थानस्य संस्कृतवर्षस्मृतिग्रन्थमालान्तर्गता अप्रकाशितपाण्डुलिपिग्रन्थप्रकाशनयोजना अन्यतमा।

बहुभिः स्वीयशोधोपाधिनिमित्तं सज्जीकृताः हस्तलिखित-ग्रन्थविशेष-सम्पादनात्मकशोधप्रबन्धाः तत्तद्विश्वविद्यालयेषु समर्पिताः। किन्तु तादृशेषु शोध-प्रबन्धेषु बहवः हस्तलिखिता (न टङ्किताः) अप्रकाशिता एव सन्ति। राष्ट्रियसंस्कृतसंस्थाने 2003 पर्यन्तम् अनुसन्धातृभिः आहत्य 169 हस्तलिखित-ग्रन्थविशेष-सम्पादनात्मक-शोधप्रबन्धाः (Critical editions of Manuscripts) विद्यावारिध्युपाधये समर्पिता आसन्। (तेषु अङ्गुलिगणनीया एव सम्पादकानां वैयक्तिकप्रयासेन प्रकाशं गताः।)

एतदतिरिच्य काश्चन प्राचीनकृतयः कैश्चिद्विद्वद्भिः सम्पादिताः (शोधप्रबन्धेतराः) अपि तेषां वैयक्तिकसौकर्याभावात् प्रवृत्त्यभावाद् वा अप्रकाशिताः सन्ति। एवम् उभयविधेषु (सम्पादनात्मकशोधप्रबन्धेषु, तदितर-सम्पादितग्रन्थेषु च) अत्युत्तमान्/योग्यान् चित्वा ते संस्कृतवर्षस्मृतिग्रन्थमालान्तर्गतायाम् (युगाब्दः 5101 तम-वर्षं संस्कृतवर्षत्वेन भारतशासनेन उद्घोषितमासीत्। तदाचरणस्मृतिं स्थिरयितुं कल्पितायां) अप्रकाशितपाण्डुलिपिग्रन्थप्रकाशनयोजनायां प्रकाशनीयाः इति कश्चन निर्णयः पूर्वं स्वीकृत आसीत्। तदनु अस्यां धारायाम् अद्य यावत् 17 ग्रन्थाः प्रकाशमुपनीताः। सम्प्रति अष्टादशं ग्रन्थपुष्पमेतद् विकसद्विलोक्य हर्षप्रकर्षमनुभवामि।

'भगवद्भक्तिमाहात्म्यम्' इत्येष सम्प्रति प्रकाश्यमानोऽयं ग्रन्थः मैथिलपण्डितेन चन्द्रदत्तेन विरचितः। भक्तचरितवर्णनप्रधानेऽस्मिन् 150 सर्गात्मके बृहत्काये ग्रन्थे षट् सहस्रं श्लोकाः सन्ति। रुचिरया सरलया पुराणशैल्या प्राचीनानां हनुमद्विभीषणादीनाम्, अर्वाचीनानां तुलसीदास-गदाधरादीनां च भक्तानां चरित्रमेतस्मिन् काव्ये वर्णितम्।

विंशशतकारम्भे जीवितेन चन्द्रदत्तेन विरचिते एतस्मिन् काव्ये (पुराणेषु आर्षप्रयोग इव) विरलतया क्वचित् क्वचित् तादृशाः शब्दाः प्रयुक्ताः येषां व्याकरणरीत्या साधुत्वं चिन्तनीयं भवेदिति सम्पादकः डा. बाबूरामशर्मा अभिप्रैति।

अप्रकाशितम् एनं ग्रन्थं डा. उमारमणझा-महोदयस्य मार्गदर्शने बाबूरामशर्मा सम्पाद्य राष्ट्रियसंस्कृतसंस्थानात् विद्यावारिधिरित्युपाधिं बहुवर्षेभ्यः प्राक् प्राप्नोत्। सम्प्रति ग्रन्थ एष प्रकाशनदृष्ट्या पुनः सम्पादितः सन् प्रकाशतामेतीति हर्षमनुभवामि।

अवसरेऽस्मिन् ग्रन्थसम्पादकाय सम्प्रति महाराष्ट्रे लोनावलस्थित-कैवल्य-धामनि निदेशकपदे कार्यरताय डा. बाबूरामशर्ममहोदयाय अभिनन्दनं समर्पयामि। प्रकाशनकर्मणि सहकृतवद्भ्यः सर्वेभ्यः साधुवादाः।

(राधावल्लभत्रिपाठी)

कुलपतिः

भूमिका

नमो योगीन्द्राय प्रमथपतिपादाप्तरतये,
स सम्भारीनाथः प्रथित इह यः शान्तिकलया।
विधत्ते श्रेयांसि प्रणतजनसाधारणतया,
दयामूर्तिः कीर्तिः प्रसरति यदीया हिमगिरौ।।1।।

जनः को जानीते मणिरिह भवेत्क्वावनितले,
विना तत्सम्पर्कान्नहि भवति लोहो मणिमयः
जनैरेभिः साकं समुषितमहो तैरवगतः,
अयं कीदृग्योगी प्रणतजनकल्याणनिपुणः।।2।।

मदीया येयं सा कृतिरति कृपावृष्टिवलिता,
अमीषामाशीर्भिः प्रतिविपदुल्लङ्घ्य भविता।
यदा काचिद्बाधा समजनि कृतौ सा निरसिता,
अमीभिर्दूरस्थैः, किमपरमहं वच्मि विभुताम्।।3।।

अतः परं पितृपादाब्जवन्दनं करोमि यो रोशनलालनामा।
आसीत्पुरा, श्रीजननीं च वन्दे यन्नाम देव्युत्तरचञ्चलेति।।

श्रीहंसराजं सहजं प्रणौमि श्रीकर्मचन्द्रं प्रणतोऽस्मि तद्वत्।
ययोः कृपा दृष्टिमुपेत्य नित्यं पठामि निर्विघ्नतया बहिःस्थः।।

श्रीमदुमारमणं वन्दे उमारमणरूपिणम्।
उमां च मातरं नौमि तत्सेवनपरां सतीम्।
गुरुं कुमुदनाथं च नौमि मिश्रोपनामकम्
यदसीमकृपापोतेनातरं भक्तिसागरम्।।

बाल्यकालादेव मम भक्तिरसं प्रत्याकर्षणमासीत्। आकर्षणमिदं वर्धितं यदा शास्त्रिकक्षायाम् एम.ए. कक्षायाञ्च साहित्यशास्त्रे रसविवेचनावसरे भक्तिरसस्य चर्चा गुरुभिः कृता। तदा भक्तिविषयमवलम्ब्य शोधकार्यं कर्तव्यमिति मे मनसि

महत्युत्कण्ठा जागृता। अस्मिन् विषये गुरुवर्यैः विद्यावाचस्पतिभिः डा. उमारमण–झा–महोदयैः मैथिलकविप्रवरस्य पं. चन्द्रदत्तझामहाभागस्य 'भगवद्भक्तिमाहात्म्यम्' इति मातृकाग्रन्थस्य उल्लेखः कृतः। एवञ्च गुरुभिः संसूचितं यत् ग्रन्थोऽयं न केनापि विदुषा अद्यावधि संशोधितम्। अतः गुरुवर्याणां सत्परामर्शेण 'भगवद्भक्तिमाहात्म्यस्य समीक्षात्मकं सम्पादनमध्ययनञ्च' इति विषयमधिकृत्य शोधकार्यं कर्तव्यमिति मया निश्चितम्।

सर्वप्रथमं श्रीरणवीर–अनुसन्धान–पुस्तकालये सुरक्षितां मूलमातृकाम् (सं. 3889) अवलम्ब्य प्रतिलिपिः कृता। तदनन्तरं इलाहबादस्थ–गङ्गानाथझा–केन्द्रीयसंस्कृतविद्यापीठस्य पुस्तकालये प्राप्तस्य मातृकाग्रन्थस्य (सं. 405–3456) साहाय्येन पाठशोधनं कृतम्। तथापि पाठेऽस्मिन् बह्व्यः त्रुटयः आसन्। अतः दरभङ्गानगरे बाबूश्रीमहिनन्दनसिंहस्य वैयक्तिकपुस्तकालये सुरक्षित–मातृकाग्रन्थ–साहाय्येन बहुत्र समुचितपाठोऽङ्गीकृतः। एका मातृका ग्रन्थकर्तुः वंशजस्य श्रीहरिमोहनझाशर्माणः पार्श्वेऽपि लब्धा किन्तु सा तु अतीव खण्डिता जीर्णा चासीत्। किन्तु तस्यापि मातृकायाः उपयोगोऽत्र विहिता। हस्तलिखितग्रन्थेऽस्मिन् लिपिकारस्याज्ञानवशात् बह्व्यः त्रुटयः आसन्। ग्रन्थस्यास्य जीर्णत्वात् बहुषु स्थलेषु पाठस्याध्ययनमतीव क्लेशकरमासीत्। तथापि विदुषां साहाय्येन मया अस्य ग्रन्थस्य सम्पादनं समासाधितम्।

ग्रन्थेऽस्मिन् बहुषु स्थलेषु एतादृशाः शब्दाः प्रयुक्ताः ते व्याकरणदृष्ट्या न साधुतां भजन्ते किन्तु भक्तानां कृते ग्रन्थोऽयम् अद्भुत एव नात्र संशयः।

भगवद्भक्तिमाहात्म्यस्य संक्षिप्तपरिचयः

पं. चन्द्रदत्तकृतं भगवद्भक्तिमाहात्म्यं भक्तमालायाः केषाञ्चिद् भक्तानामन्येषामपि भक्तानां संस्कृतपद्यमयं कथाकाव्यमस्ति। ग्रन्थेऽस्मिन् खण्डत्रयं वर्तते। विष्णुखण्डं शिवखण्डं तद्यथा शक्तिखण्डञ्च।

प्रथमं विष्णुखण्डञ्च शिवखण्डं ततः परम्।
तृतीयं शक्तिखण्डञ्चेत्येतत्खण्डत्रयं शुभम्॥

ग्रन्थस्य (150) पञ्चाशदुत्तरैकशततमे स्वानुभवकथनात्मके सर्गे कविना स्वजीवनपरिचयोऽपि संक्षेपेण प्रदत्तः।

षट्साहस्त्रमिताः श्लोकाः उक्ता सप्तशताधिकाः।
एवं पञ्चाशदधिकं सर्गाणाञ्च शतं शुभम्॥

ग्रन्थस्यादौ भक्तिमाहात्म्यमुक्तम्। पञ्चाशदधिकशतसर्गात्मकेऽस्मिन् ग्रन्थे शताधिकानां भक्तानां कथाः वर्तन्ते। यथा– नाभादास–हनुमत्–बिभीषण–शबरी–अजामिल–जटायु–अम्बरीष–विदुरस्त्री–सुदाम–चन्द्रहास–शिबि–द्रौपदी–वाल्मीकि–रुक्माङ्गद–प्रह्लाद–निम्बादित्य–रामानुज–श्रीरङ्ग–कृष्णदास–शङ्कराचार्य–उदयनाचार्य–पुण्डरीक–नामदेव–जयदेव–श्रीधर–बिल्वमङ्गल–विष्णुशर्म–वल्लभाचार्य–त्रिलोचन–कुलशेखर–पुरुषोत्तम–कपिध्वज–जयमल्ल–साक्षीगोपाल–रामदास–नन्ददास–रविदास–कबीर–पीपा–धन्ना–सुरसुरानन्द–नरहरि–पद्म–माधव–रघुनाथ–सूरदास–त्रिपुरादास–हरिराम–रूपसनातन–तुलसीदास–गदाधर–नारायण–रत्नवती–गोविन्ददास–रामप्रसाद–प्रभृतीनां विशिष्टभक्तानां कथाः सरलसंस्कृतभाषायां सन्ति। एतासां कथानां मूलं तु पुराणादिग्रन्थाः सन्ति। काश्चित्कथाः नूतना अपि सन्ति। ग्रन्थान्ते कविना स्वानुभवोऽपि उक्तः। अन्तिमे सर्गे कासाञ्चित् कथानां श्रवणफलान्यप्युक्तानि।

पं. चन्द्रदत्तझाशर्मणः जीवनपरिचयः

विनायकं नमस्कृत्य शारदां सर्वकामदाम्।
भगवद्भक्तिमाहात्म्यं कुर्वेऽहं मैथिलो द्विजः॥

भगवद्भक्तिमाहात्म्यस्य (149) ऊनपञ्चाशदधिकशततमे सर्गे चन्द्रदत्तः स्वविषयेऽप्यलिखत्। तत्र तेन अहं मैथिलोऽस्मि। मम पिता वेणीरामशर्मा आसीत्। तस्य माता तारादेवी आसीद् एवमहमेकमात्रशिशुस्तस्या अभवम्, इति भावः प्रकटितः। मिथिलायां भाद्रशुक्लचतुर्थ्यां चन्द्रस्य पूजा क्रियतेऽन्यत्र तु चन्द्रदर्शनं तद्दिने निषिद्धमस्ति। चन्द्रदत्तस्य जननी चन्द्रमसमाराध्य पुत्ररत्नं लेभे। एवञ्च सर्वसम्मत्या अस्य शिशोर्नाम चन्द्रदत्त इत्यभूत्।

मात्रा यं चन्द्रमाराध्य लब्धोऽहं तनयस्तया।
चन्द्रदत्तेति मे नाम कृतमात्मजनोदितम्॥ (149.12)

चन्द्रदत्तः यदा प्रथमे वर्षे आसीत्तदैव तस्य जननी दिवंगता। किन्तु तस्य पिता द्वितीयां पत्नीं न स्वीचकार।

अस्य कालः (1900) ऊनविशंतितमशतकस्य प्रारम्भे आसीत् (मिथिलाङ्क पृ. 58)

षोडशवर्षपर्यन्तमयं निजगृहे एव पितुः सकाशेऽध्ययनं कृतवान्। एकदा म्लेच्छभूभुजैः कश्चिद् दुर्जनः दूतरूपेण प्रेषितः। तं दूतमायान्तं दृष्ट्वा ग्रामात् सर्वे ब्राह्मणाः पलायिताः। अयं चन्द्रदत्तस्तेन दूतेन धृतः। तदा तस्य पितृव्यो वैयाकरणः राघवशर्मा तं मोचयितुं तत्र समागतः। उभावपि बध्वा कशाभिः स संताडयामास। तदा कश्चित् मस्तरामेति नामधेयः साधुरपि तथा ताडितः यत्तदैव सः साधुः प्राणांस्तत्याज।

चन्द्रदत्तस्तत्पितृव्यश्च कारागारे निबद्धौ। तस्मिन्कारागारे आपदुद्धारणं नाम मन्त्रं जपेति पितृव्येन राघवशर्मणोक्तम्। चन्द्रदत्तोऽपि तथाकरोत्, मन्त्रस्य प्रभावेण उभावपि कारागारात् विनिर्गतौ। एवञ्च तस्य दुष्टस्य भृत्यस्य पुत्रोऽग्निकोपात् मृत्युं प्राप्तः।

पण्डितप्रवरश्चद्रदत्तः स्वयमेव लिखति यत् – एकदा कश्चिज्ज्योतिर्विदस्य गृहं सम्प्राप्य जन्मपत्रिकां दृष्ट्वावोचत् – 'त्रिंशत्तमेऽब्दे ते मृत्युर्भविष्यतीति।' अन्येऽपि ज्योतिःशास्त्रमर्मज्ञास्तथैवावोचन्। किन्तु यदा स सप्तविंशतितमे वर्षे आसीत्तदानीं सिद्धस्तत्रोपस्थितः एवमकथयच्च 'त्रिंशत्तमेऽब्दे मृत्युतुल्यं कष्टं भविष्यतीति' एवं च यदि वैष्णवमन्त्रस्योच्चारणं करिष्यसि, तदा तव मृत्युर्न भविष्यति। तद्दिनादारभ्य चन्द्रदत्तेन वैष्णवमन्त्रस्योच्चारणं सर्वदा कृतम्।

तस्मिन्नेव संवत्सरे पितुराज्ञां प्राप्य चन्द्रसूर्ययोः ग्रहणसमये काश्यां स्नातुं समागतः। तत्र वर्षद्वयं यवदसावतिष्ठत्। सप्ततिवर्षकः जनकस्तं द्रष्टुं काशीं समागतः। पितरं दृष्ट्वायमतीव प्रसन्नोऽभूदेवञ्च काश्यां पित्रा सह सर्वत्र सर्वेषां देवानां दर्शनमकरोत्। जनकेन प्रश्नः कृतो यत् कियत्कालपर्यन्तं तवारिष्टदिनं वर्तते। तदा अनेनोक्तं यत् – वर्षाभ्यन्तरे एवारिष्टदिनस्य समाप्तिर्भविष्यति। तदा पित्रोक्तं यदा तव जननी दिवंगता, तदानीं विवाहार्थमहं बन्धुभिः प्रेरितः, किन्तु त्वं मम पुत्रः सर्वं मम करिष्यतीति विचार्य्य मया द्वितीयो विवाहो नाङ्गीकृतः। यदि विश्वेश्वरस्य कृपा स्यात्तदा मम मृत्युपर्यन्तं त्वमवश्यमेव स्थास्यसि। अहमद्य गच्छामि त्वमप्यरिष्टदिनमत्रैव व्यतीत्य गृहमागच्छ। तदानीं तस्य पिता गच्छन्पतित्वा मूर्छितोऽभूत्। पितुः शुश्रूषां कृत्वा धैर्यवचनमुक्त्वा तं स्वप्रदेशं प्रेषयामास।

एकस्मिन् दिवसे रात्रौ यदा चन्द्रदत्तः सुप्तः आसीत्तदा तेन स्वप्नो दृष्टः यदसौ मृतोऽस्ति। किन्तु पुनः केनापि मृत्योर्भयात् मुक्त इति। किञ्चित् कालान्तरं

तत्र चत्वार: वैष्णवा: समायाता:। तै: द्वारिकाधीशस्य महाप्रसादस्तस्मै प्रदत्त:। इमं प्रसादं भुक्त्वा चन्द्रदतो स्वस्थोऽभूत्। प्रात:काले कश्चिद्वैष्णव: आगत्य तमब्रवीत्– भक्तमालाया: संस्कृतभाषायां कथां लिखेति। अनन्तरमयं ग्रामं गतवान्। तत्र तं दृष्ट्वा सर्वे जना: प्रसन्ना: अभवन्। तस्मिन्नैव वर्षे तस्य पिता पञ्चत्वं प्राप्त:। अनेन चन्द्रदत्तेन पितुरौर्ध्वदैहिकं कर्म कृतम्। एवञ्च भगवद्भक्तिमाहात्म्यमपि तदनन्तरमेव लिखितम्।

अस्य पुत्रौ गोपाल–गोविन्दौ आस्ताम्। गोपालस्य पुत्र: वैयाकरण: हल्लीझा महातान्त्रिक: आसीत्। एवञ्च वैयाकरण: मुशलीझा गोपालशर्मण पौत्र: आसीत्। अधुनापि अस्मिन् वंशे बहुभिर्विद्वद्भि: स्वकीया: कीर्तिकेतव: समुद्ध्रियन्ते। चन्द्रदत्तस्य जीवनपरिचय: विस्तरेण नोपलभ्यते।

कृतार्थोऽस्मि पं. श्रीहरिनन्दनझामहोदयानां यत्ते पं. चन्द्रदत्तशर्मण: कुलवृक्षं विलिख्य दत्तवन्त:।

पण्डितचन्द्रदत्तेन केषुचित्स्थलेषु कथाया: अतिसंक्षेपो विहित:। अत: कथाया: सम्यक् प्रवाहज्ञानाय चेतै: पण्डितप्रवरै: मिश्रमहोदयै: कांश्चिच्छ्लोकोकान् विरच्य गन्थपूर्ति: कृता। केषुचित्स्थलेषु पाठ एव खण्डित: आसीत्। तत्रापि अनेन पूर्ति: विहिता। अत: तेऽपि धन्यवादार्हा: सन्ति।

श्रीरणवीरकेन्द्रिय–संस्कृत–विद्यापीठस्य दर्शनविभागस्य व्याख्यातृणां पं श्री वैद्यनाथझाशर्मणां साहाय्यं न कदापि विस्मर्तुं शक्यते, तेऽपि धन्यवादार्हा: सन्ति।

मम शोधकार्यावसरे श्रीरणवीर–केन्द्रिय–संस्कृत–विद्यापीठस्य प्राचार्या: डा. मुरलीधरपाण्डेयमहोदया: सर्वतोभावेन मामनुगृहीवन्त:, अतस्तेऽपि धन्यवादार्हा: सन्ति। गंगानाथझाकेन्द्रियसंस्कृतविद्यापीठस्य प्राचार्या: डॉ. गयाचरणत्रिपाठिन: मातृकाग्रन्थस्य प्रतिलिपिं (फोटोस्टेट) सम्पेष्यानुगृहीतवन्त: अतस्तेभ्योऽपि धन्यवादा: प्रदीयन्ते।

जम्बूनगरस्थ–श्रीरणवीरानुसन्धान–पुस्तकालयस्य डॉ. बालकृष्ण–शास्त्रिण:, डॉ. धनीरामशास्त्रिणश्चातीव धन्यवादार्हा: ये सर्वदा मूलपाठस्य प्रतिलिपिकरणसमये मार्गदर्शनं कृतवन्त:।

मम अनुसन्धानसमये अशोकबर्मभि: कृतम् आर्थिकसाहाय्यं नैव विस्मर्तुं शक्यते।

एतदतिरिक्ताः सहायकाः सुहृद्भूताश्च श्री अशोकशास्त्रि–मिलापचन्द्र शास्त्रि–ज्योतिप्रकाश–वीरेन्द्रभारद्वाज–राजेन्द्रडोगरा–स्वतन्त्रा भारद्वाजा–अनीता शास्त्रि–प्रभृतयोऽप्युपकृतवन्तः, ते सर्वेऽपि धन्यवादार्हाः।

अस्मिन् ग्रन्थसम्पादनकर्मणि अज्ञानवशात् टङ्कणदोषवशाच्च याः काश्चित् त्रुटयोऽभवन् ताः संशोध्य विद्वांसोऽनुग्रहीष्यन्तीति शम्।

मया राष्ट्रियसंस्कृतसंस्थानस्य विद्यावारिध्युपाधये समर्पितः एषः ग्रन्थः सम्प्रति प्रकाशनदृष्ट्या पुनः सम्पाद्य सज्जीकृतः। ग्रन्थस्यास्य प्रकाशनविषये निर्णयकरणे कारणीभूतेभ्यः राष्ट्रियसंस्कृतसंस्थानकुलपतिभ्यः, कार्यकर्तृभ्यः विद्वद्भ्यः, कुलसचिवप्रभृतिभ्यः, सहकृतवद्भ्यः सर्वेभ्यः कार्यालयसदस्येभ्यश्च धन्यवादानर्पयामि।

विदुषां वशम्वदः

बाबूरामशर्मा

विषयसूची

परिशिष्टम्

संस्कृतवर्षस्मृतिग्रन्थमाला
अप्रकाशितपाण्डुलिपिग्रन्थप्रकाशनम्-१८
प्रधानसम्पादकः - राधावल्लभत्रिपाठी

चन्द्रदत्तविरचितं

भगवद्भक्तिमाहात्म्यम्

सम्पादकः
बाबूरामशर्मा

राष्ट्रियसंस्कृतसंस्थानम्
(मानितविश्वविद्यालयः)
नवदेहली

चन्द्रदत्तविरचितं

भगवद्भक्तिमाहात्म्यम्

प्रथमस्सर्गः

॥ प्राचीनभक्तस्मरणम् ॥

।। ॐ श्रीगणेशाय नमः ॥

आकुञ्चितोऽहं बाहुभ्यां रिङ्गमाणं व्रजाङ्गणे।
श्रीनन्दनन्दनं[1] वन्दे प्राचां वाचामगोचरम् ॥ 1 ॥

विनायकं नमस्कृत्य शारदां[2] सर्वकामदाम्।
भक्तिमाहात्म्यचरितं कुर्वेऽहं मैथिलो द्विजः ॥ 2 ॥

यथा मे मतिरुत्पन्ना भक्तिमाहात्म्यवर्णने।
यथा मेऽनुभवो जातो वक्ष्याम्यग्रे सुविस्तरम् ॥ 3 ॥

खण्डत्रयं विधास्येऽहं ग्रन्थेऽस्मिन्नातिविस्तरम्[3]।
प्रथमं[4] विष्णुखण्डं च शिवखण्डं ततः परम् ॥ 4 ॥

तृतीयं शक्तिखण्डञ्चेत्येतत्खण्डत्रयं शुभम्।
भक्तिर्हि सर्वलोकानां मातेव हितकारिणी ॥ 5 ॥

वर्णाश्रमस्थितानां तु तपो [5]यागादिभिर्गतिः।
कलौ वर्णाश्रमरताः प्रायेण मनुजा न हि ॥ 6 ॥

तेषां भक्तिं विना नान्यां गतिं पश्यामि कामपि।
भक्तिस्तु द्विविधा पूर्वा वैधी रागादिजा परा ॥ 7 ॥

वर्णाश्रमरताः सन्तो भगवन्तं भजन्ति ये।
तेषां तु वैधी विज्ञेया भक्तिः संसारतारिणी ॥ 8 ॥

रागादिजा तु चान्येषां सातिशीघ्रफलप्रदा।
आर्तो जिज्ञासुरर्थार्थी ज्ञानी भक्तिं करोतु वै ॥ 9 ॥

---

1. 'नन्दनं वरं' - इति क पाठः।
2. सारदा - इति क पाठः।
3. ग्रन्थेऽस्मिन्नास्ति - इति ख पाठः।
4. प्रथमे - इति क पाठः।
5. योगादि- इति क पाठः।

सर्वेषां जायते सिद्धिः स्वार्थानां नात्र संशयः।
न भक्तेः सदृशं किञ्चित् प्रीणनं विद्यते हरेः॥ 10॥

भक्तस्य वशगो ब्रह्मा भक्तस्य वशगो हरिः।
भक्तस्य वशगः शम्भुः शक्तिर्भक्तवशानुगा॥ 11॥

देवा[1] दैत्याश्च गन्धर्वा यक्षराक्षसकिन्नराः।
पिशाचाः पितरो नागा व्याघ्रर्क्षप्रभवानराः॥ 12॥

मनुष्याः प्राणिनो ये वै सर्वे भक्तिवशानुगाः।
संसारे जन्म संप्राप्य भक्तिं कुर्वन्ति ये जनाः॥ 13॥

त एव[2] धन्यास्तैरेव जितमेतच्चराचरम्।
श्रुति-स्मृति-पुराणानां मतमेतत्सनातनम्॥ 14॥

सर्वेषां साधनानां तु भक्तिरेव गरीयसी।
कौन्तेय! प्रतिजानीहि न मे भक्तः प्रणश्यति॥ 15॥

इत्येतद्भगवद्वाक्याद्भक्तिरेव गरीयसी।
सर्व[3]धर्मान्परित्यज्य मामेकं शरणं व्रज॥ 16॥

अहं त्वां सर्वपापेभ्यो मोक्षयिष्यामि मा शुच।
इत्येतद्भगवद्वाक्याद्भक्तिरेव गरीयसी॥ 17॥

भक्त्या त्वनन्यया शक्त्या अहमेवं विधोऽर्जुन।
इत्येतद्भगवद्वाक्याद्भक्तिरेव गरीयसी॥ 18॥

श्रद्धधाना मत्परमा भक्तास्तेऽतीव मे प्रियाः।
इत्येतद्भगवद्वाक्याद्भक्तिरेव गरीयसी॥ 19॥

पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति।
इत्येतद्भगवद्वाक्याद्भक्तिरेव गरीयसी॥ 20॥

तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः।
इत्येद्भगवद्वाक्याद्भक्तिरेव गरीयसी॥ 21॥

अपि चेत्सुदुराचारो भजते मामनन्यभाक्।
साधुरेव स मन्तव्यः सम्यग्व्यवसितो हि सः॥ 22॥

---

1. देव – क पाठः।
2. तैरेव – क पाठः।
3. सर्वान् – क पाठः।

(क्षिप्रं भवति धर्मात्मा शश्वच्छान्तिं प्रगच्छति।
कौन्तेय प्रतिजानीहि न मे भक्तः प्रणश्यति॥

इत्येतद्भगवद्वाक्याद् भक्तिरेव गरीयसी।
बुध्द्वैवं भक्तिमाहात्म्ये यया विष्णुः प्रसीदति॥)[1]

सा भक्तिर्विद्यते येषां तेषां लक्षणमुच्यते।
शान्तो दान्तो दयायुक्तो देव–ब्राह्मण–पूजकः॥ 23॥

श्रद्धावाननसूयश्च स वै भक्तो द्विजोत्तमः।
स्वधर्मनिरता नित्यं ब्रह्मविष्णुमहेश्वरान्[2]॥ 24॥

एकबुद्ध्या प्रपश्यन्ति ते वै भक्ताः[3] स्मृता जनाः।
स्वधर्मपत्नीनिरता गृहस्था अतिथिप्रियाः॥ 25॥

यथाशक्त्यर्पयन्तो वै देवं भक्तास्तु ते स्मृताः।
एकादशीव्रतरता आमिषाहारवर्जिताः॥ 26॥

हरिनामपरा नित्यं ज्ञेयास्तेऽतीव वैष्णवाः[4]।
चतुर्दशीव्रतरता गणेशव्रतकारिणः॥ 27॥

विष्णुनामपरा नित्यं वैष्णवास्ते न संशयः।
एकपत्नीव्रतरता मिथ्याभाषणवर्जिताः॥ 28॥

न वार्च्यर्यन्तोऽपि हरिं ज्ञेयास्ते वैष्णवा जनाः।
तापयन्ति इमे वह्निं यच्छन्ति तूलिकानपि ॥ 29॥

शीतार्तेभ्यश्च दीनेभ्यो ज्ञेयास्ते वैष्णवा जनाः।
आरामवृक्षानारोप्य प्रयच्छन्त्युदकं तु ये॥ 30॥

ग्रीष्मर्तौ निर्जले देशे ज्ञेयास्ते वैष्णवा जनाः[5]।
युवतीं रूपसम्पन्नां दृष्ट्वा पत्नीं परस्य वै॥ 31॥

चलितं न मनो येषां ते ज्ञेया वैष्णवोत्तमाः।
दृष्ट्वा समृद्धिमन्येषां ये तुष्यन्ति नरोत्तमाः॥ 32॥

स्वकीयामिव मन्वाना ज्ञेयास्ते वैष्णवाः जनाः।
अन्यस्तुतिं समाकर्ण्यानसूयावशगाश्च ये॥ 33॥

---

1. ( )प्रक्षिप्ताः श्लोकाः – श्री कुमुदनाथेन पूरिताः। 2. त् – क पाठः।
3. भक्तान् – ग पाठः। 4. वैष्णवा जनाः – ग पाठः।
5. नराः – ख पाठः

शिरसा चाभिनन्दन्ति ज्ञेयास्ते वैष्णवा जनाः।
मातरं पितरं चैव लक्ष्मीनारायणाविव[1] ॥ 34 ॥
पूजयन्ति तदाज्ञां वै कुर्वन्तो वैष्णवा जनाः।
परोपकारनिरताः पररक्षणतत्पराः ॥ 35 ॥
परापवादमकुर्वन्तो ज्ञेयास्ते वैष्णवा जनाः।
पाखण्डसङ्गरहिता दम्भाचारविवर्जिताः ॥ 36 ॥
विश्वस्ता वेदशास्त्रेषु ज्ञेयास्ते वैष्णवा जनाः।
शास्त्राचारव्रतैश्चैव नानाधर्मप्रजल्पनैः ॥ 37 ॥
सम्मोह्य वित्तहर्तारः पाखण्डास्ते प्रकीर्तिताः।
यथाकथञ्चिच्चेद्विष्णौ बुद्धिर्यस्य दृढा भवेत् ॥ 38 ॥
रागतो द्वेषतो वापि सोऽपि भक्तो न संशयः।
अज्ञानाद्वा प्रमादाद्वा लोभान्मोहादथापि वा ॥ 39 ॥
चिन्तयन्तो हृषीकेशं गच्छन्ति परमां गतिम्।
ब्रह्मादि[2] तिर्यक्पर्यन्ता याः [3]काश्चिज्जीवजातयः ॥ 40 ॥
बभूवुः कृतकृत्यास्ते सम्पूज्य हरिमीश्वरम्।
दुर्वारवैरिदुर्नीतिः निजाङ्गक्षयशङ्कया ॥ 41 ॥
उपास्य कतिधा वृत्त्या हरिं सुखमवाप्नुयात्।
भस्मासुराय वरदः कष्टं सम्प्राप्य शङ्करः ॥ 42 ॥
स्मृत्वात्मानं हरिं सद्यो मुक्तस्तत्क्षणमेव हि।
एवमेवापरे[4] सर्वे भजन्ति हरिमीश्वरम् ॥ 43 ॥
स्वस्वकामार्थसिद्ध्यर्थं पुराणे परिकीर्त्तिताः।
नारदः पर्वतश्चैव सनकाद्यास्तथैव च ॥ 44 ॥
स्वायम्भुवो यमश्चैव[5] विष्वक्सेनो जयस्तथा।
विजयश्च सुनन्दश्च नन्दी भद्रः सुभद्रकः ॥ 45 ॥
चण्डः प्रचण्डः कुमुदः कुमुदाक्षस्तथैव च।
पुण्यशीलः सुशीलश्च वैवस्वतमनुस्तथा ॥ 46 ॥

---

1. णमिव – ख पाठः।
2. दिव्यान् – क।
3. केचन् – ग।
4. अपराः – क।
5. यतश् – ख।

महाभागवताश्चैते कीर्तिता विष्णुभक्तिदाः ।
अनन्तो वासुकिश्चैव शेषनागस्तथैव च ॥ 47 ॥

विष्णुभक्तिरता एते सर्वदा विष्णुवल्लभाः ।
प्रह्लादश्च बलिश्चैव विभीषणमुखाश्च ये ॥ 48 ॥

राक्षसास्तेऽतिभक्ता वै कृष्णार्थे त्यक्तजीविताः ।
दक्षश्च शरभङ्गश्च कविश्च हरिरेव च ॥ 49 ॥

करभाजनोऽन्तरिक्षश्च चमशश्च प्रबुद्धकः ।
आविर्होत्रः पिप्पलस्तु द्रविडश्च तथैव हि ॥ 50 ॥

ऋषभस्य सुता एते जयन्ती नन्दनाः स्मृताः ।
प्रजानां पतयो भक्ताः ख्याता नारायणांशतः ॥ 51 ॥

पृथुः प्रियव्रतश्चैव मुचकुन्दो निमिस्तथा ।
सुधन्वा शिबिरिक्ष्वाकुर्भृगुर्गाधिः[1] पुरुरवाः ॥ 52 ॥

प्राचीनबर्हिर्भगवान् शतधन्वा रघुर्मृगः ।
मान्धाता जनकश्चैव सत्यराहुगणौ स्मृतौ ॥ 53 ॥

रुक्माङ्गदोऽम्बरीषश्च सगरश्च भगीरथः ।
हरिश्चन्द्रो दधीचिश्च सुरथो भरतस्तथा ॥ 54 ॥

[2]यशोमूर्ती रन्तिदेव उत्तङ्को भूरिदेवकः ।
ययातिर्नहुषश्चैव दिलीपः पुरुरेव च ॥ 55 ॥

यदुरुत्तानपादश्च भीष्मो दशरथस्तथा ।
एते राजर्षयश्चान्ये विष्णुभक्तिरताः सदा ॥ 57 ॥

हनुमाञ्जाम्बवांश्चैव सुग्रीवो गरुडस्तथा ।
ग्राहो गजो जटायुश्च नीलः काकभुशुण्डकः ॥ 58 ॥

इत्येते वैष्णवाः श्रेष्ठा विष्णुलीलाप्रवर्त्तकाः ।
ध्रुवश्च चन्द्रहासश्च चित्रकेतुश्च पाण्डवाः ॥ 59 ॥

मयूरध्वजोऽथालर्कश्च रन्तिदेवश्च कौरवः ।
ताम्रध्वजः परीक्षिद्वै राजानो विष्णुवल्लभाः ॥ 60 ॥

---

1. ऋभुर्गायि – क। 2. रयोमूर्ति – क।

वाल्मीकिश्च शुकश्चैव सूतः शौनक एव च।
भरद्वाजः प्रचेताश्च समीको याज्ञवल्क्यकः॥ 61॥

अगस्त्यश्च पुलस्त्यश्च पुलहश्च्य[1]वनस्तथा।
वसिष्ठः सौभरिश्चैव कर्दमोऽत्रिस्तथैव च॥ 62॥

ऋचीको गौतमश्चैव गर्गो व्यासस्तथैव च।
अङ्गिरा भृगुदालम्यौ वैशम्पायनलोमशौ॥ 63॥

विश्वामित्रोऽथ दुर्वासा शृङ्गी माण्डव्य एव च।
जमदग्निः कश्यपश्च मायादर्शः पराशरः॥ 64॥

मार्कण्डेयश्चेति ऋषयो विष्णुभक्ताः प्रकीर्तिताः।
उद्धवो विदुरश्चैव सुदामाक्रूर एव च॥ 65॥

सञ्जयश्श्रुतिदेवश्च गुहोऽजामिल एव च।
एते चान्ये पुराणेषु मनुष्या वैष्णवोत्तमाः॥ 66॥

शवरीद्रौपदीकुन्ती तथा विन्ध्यावली सती।
सत्यरूपात्रेयसुता सती चैव मदालसा[2]॥ 67॥

मथुरायां च ब्राह्मण्यो याश्चान्नं हरये ददुः।
एताश्चान्याश्च गोप्यो वै या कृष्णार्पितमानसाः॥ 68॥

पतिं पुत्रं भ्रातृवर्यं परित्यज्य हरिं मुदा।
वीजयन्त्यो[3] हरिं प्रेम्णा तमेवापुर्न संशयः॥ 69॥

इति संक्षेपतो भक्ता येषां माहात्म्यमेव च।
कथितं विस्तरादग्रे वक्ष्यामि सर्वकामदम्॥ 70॥

पुराणोक्तेषु भक्तेषु कथा तत्रैव विस्तृता।
या लोके विद्यते तत्र नास्ति सा कल्प्यते[4] मया॥ 71॥

पुराणानुक्तभक्तानां कथा चैवात्र गीयते।
यथा मति च तां श्रुत्वा सन्तस्तुष्यन्तु मत्कृते॥ 72॥

इति श्रीभगवद्भक्तिमाहात्म्ये प्राचीनभक्तस्मरणं नाम प्रथमः सर्गः॥ 1॥

❊ ❊ ❊

---

1. श्चावनस – ख।
2. मंदालसा – ख।
3. यन्तो – क।
4. कल्पते – ख।

द्वितीयस्सर्गः

॥ नाभादासचरितम् ॥

अथेतिहासं वक्ष्यामि यथा भक्तावली कथा।
लोके प्रसिद्धा ये नाथ कृता यस्य प्रसादतः ॥ 1 ॥

पश्चिमे मानसिंहोऽभूद्राजा सर्वसमृद्धिमान्।
विजेता सर्वशत्रूणां दाता चैव द्विजन्मनाम् ॥ 2 ॥

गुरुस्तस्य महानासीत्कृष्णदास इति श्रुतः।
महात्मा विष्णुभक्तश्च सर्वभूतसुहृत्तमः ॥ 3 ॥

तत्रैव [1]गलतेत्येतत्स्थानं राज्ञा विनिर्मितम्।
गुर्वर्थं तत्र सगुरुरुवास विजितेन्द्रियः ॥ 4 ॥

तस्य शिष्यावतिख्यातौ कीलाग्रौ तु ततः परम्।
एकदा तौ महात्मानौ कीलाग्रौ निर्गतौ गृहात् ॥ 5 ॥

पूजोपकरणार्थाय वनं यातौ मुदान्वितौ।
गृहीत्वा कुशपुष्पादि परावृत्तौ[2] गृहं प्रति ॥ 6 ॥

पथि तिष्ठन्तमन्धं तं शिशुमेकमपश्यताम्।
दुर्भिक्षसमये त्यक्तं जनन्या निर्जने वने ॥ 7 ॥

कीलोऽग्रं प्राह[3] पश्येमं बालं मध्यवने स्थितम्।
नयेमं स्वाश्रमे वत्सं पालयैनं ममाज्ञया ॥ 8 ॥

इत्युक्त्वा जलमादाय ममार्ज तस्य चक्षुषी।
ततो नेत्रेऽतिविमले जातेऽपश्यत्ततस्तु सः ॥ 9 ॥

नीत्वा तं तावुपागत्य कृष्णदासाश्रमं प्रति।
तदाज्ञया तं प्रोवाच सोऽग्रदासः शिशुं प्रति ॥ 10 ॥

---

1. गलतानामकं स्थानं जयपुरेऽधुनापि वर्तते (द्रष्टव्यः – कल्याणभक्ताङ्कः, पृ० 616)
2. पुनरातौ – क, पुनरावृतौ – ग।
3. ग्राह्य – ख।

अरे मद्द्वारि निवस गृहाणेदं कटं शिशोः।
साधूच्छिष्टजले कुण्डे स्नात्वा[1] त्वमुदकं पिब॥ 11॥

सद्भिर्भुक्तावशिष्टान्नं पत्रे त्यक्तं बहिस्तु यत्।
तद्भुक्त्वा[2] साधुसेवायां[3] निरतो भव सर्वदा॥ 12॥

इति संशिक्ष्य तं बालमग्रदासो दयान्वितः।
अन्यानुवाच बालोऽयमागतो रक्ष्यतामिह॥ 13॥

एवं कतिपये काले याते बालस्त्वहर्निशम्।
रामनाम जपन् द्वारि निवसन् गुर्वनुज्ञया॥ 14॥

साधुसेवाप्रसादेन व्यवर्द्धत[4] स दीप्तिमान्[5]।
एकदा तं गुरुः प्राह नाभाख्यं कृपयान्वितः॥ 15॥

अथ मत्सन्निधाने त्वं वस कार्यकरो भव।
इत्युक्तस्सोऽपि सन्तुष्टो गुरुसन्निधिमावसत्॥ 16॥

एकदा सोऽग्रदासस्तु कृतासनपरिग्रहः।
नित्यं वै मानसीं पूजां चकार रहसि स्थितः॥ 17॥

तत्राप्ययं स्थितो नाभा चामरेण च वीजयन्।
श्रीरामं स्वापयित्वा स संस्थाप्य कनकासने॥ 18॥

परिधाप्य ततो वस्त्रमलङ्कारान् ददौ मुदा।
चन्दनेनापि सम्पूज्य माल्यं धृत्वा समुत्थितः॥ 19॥

एतस्मिन् समये कश्चिच्छिष्योऽग्रस्य वणिग्जनः।
संस्मार जलधौ नाथं गुरुमग्रं महापदि॥ 20॥

तस्य नौर्वित्तसम्पूर्णा क्वचिल्लग्ना महोदधौ।
न शशाक बहिर्गन्तुं यदा नौः स्सस्तदा वणिक्॥ 21॥

धनप्राणक्षयाद्भीतस्स्मारात्मगुरुं हृदा।
तदाग्रस्य तु हस्ते वै माल्यं तादृगवस्थितम्॥ 22॥

---

1. स्नाहि – ख।
2. तदृक्ता – ख।
3. सेवार्थं – क।
4. तां – ग।
5. वान्

मनस्तत्र गतं ज्ञात्वा रामो नावमतीतरत्।
ततोऽग्रदासस्य मनो यावदासक्तिपूजने ॥ 23 ॥

तावन्नाभा स्थितः पृष्ठेनाथदूरं गता हि नौः।
इत्यब्रवीत्ततोऽग्रस्तु पृष्ठस्थं वीक्ष्य संस्मितः ॥ 24 ॥

मनसा पूजयित्वाथ रामं सर्वोपचारकैः।
नमस्कृत्य समुत्तस्थौ तदा नाभमुवाच सः ॥ 25 ॥

अरे नाभाख्य मे शिष्य वैष्णवानां यशांसि भो।
वर्णय त्वं ममाज्ञैषा[1] तस्माच्छ्रेयो भविष्यति ॥ 26 ॥

ततः प्रणम्य नाभा तं प्राह जानाम्यहं कथम्।
गुरुस्तं[2] स यथा ज्ञाता दूरं नौका गतेति भो ॥ 27 ॥

किञ्च मद्वचनात्साधुसेवा महात्मनस्तव।
भूता ये वर्तमानाश्च भविष्यन्तश्च साधवः ॥ 28 ॥

तेषां यशांसि जानीहि न ते मिथ्या भवेद्वचः।
इत्याज्ञां शिरसा धृत्वा गुरोरग्रस्य यत्नतः ॥ 29 ॥

चकार भक्तिचरितं नाभादासस्तु भाषया।
तदुक्तमन्यत्कथितं श्रुत्वाऽहं तु यथामति ॥ 30 ॥

इति श्रीभगवद्भक्तिमाहात्म्ये नाभादासचरितं नाम द्वितीयः सर्गः ॥ 2 ॥

❊ ❊ ❊

तृतीयः सर्गः

॥ हनुमच्चरितम् ॥

अथ वक्ष्ये हनुमतो माहात्म्यं परमाद्भुतम्।
यस्य स्मरणमात्रेण रामे भक्तिर्दृढा भवेत् ॥ 1 ॥

एकदा जलधेस्तीरे सेतुबन्धसमुन्नये[3]।
राममिन्दीवरश्यामं परिवार्य्य स्थिता अमी ॥ 2 ॥

---

1. ममाज्ञया – ख।
2. सह – क, ख।
3. सेतुबन्धसमुधते – क, ग।

लक्ष्मणश्चैव सुग्रीवो हनुमानङ्गदस्तथा।
नीलो नलश्च राजा वै ऋक्षाणां [1]जाम्बवांस्तथा॥ 3॥

अस्मिन्नेव मुहूर्ते तु समायातो विभीषणः।
मालामादाय महतीं सर्वरत्नमयीं शुभाम्॥ 4॥

रत्नाकरस्य सर्वस्य मूलं भूमण्डलस्य च।
तां मालां रामपुरतो ददौ भक्तो विभीषणः॥ 5॥

प्रशशंस गृहीत्वा तां रामो मालामनिन्दिताम्।
निरीक्ष्य स हनूमन्तं प्राञ्जलिं पुरतः स्थितम्॥ 6॥

तस्य कण्ठे ददौ मालां मारुतेर्भक्तवत्सलः।
मारुतिस्तु समुत्थाय प्रणम्य जगृहे स्रजम्॥ 7॥

उपविश्य ततो मालां करे कृत्वा निरीक्ष्य च।
मणिमेकमुपादाय (दिदृक्षुः[2] स कपिः) स्फुटम्॥ 8॥

ततो मनसि सर्वे ते जहसुः सस्मिता जनाः।
रामं विना हनुमांस्तु पुनरेकमपि स्फुटम्॥ 9॥

स्फोटयित्वा मणिद्वन्द्वं निरीक्ष्य च पुनः पुनः।
चिक्षेप मालामेवाग्रे भूमौ सर्वस्य पश्यतः॥ 10॥

ततः किमिति ते सर्वे सम्प्रष्टुं तं समुद्यताः।
हनुमान् स्वयमेवाह निजभक्तिं प्रदर्शयन्॥ 11॥

यस्य रामो न च स्वामी रामनामाङ्कितं न यत्।
न तत्प्रियं ममास्तीह सत्यमेतन्न संशयः॥ 12॥

देहोऽयं सर्वभूतानां प्रियो भवति सर्वदा।
रामनाम विनाहं तु व्यर्थं पश्यामि सर्वथा॥ 13॥

इत्युक्त्वा स त्वचो देहान्निष्कास्यादर्शयज्जनान्[3]।
रामनामाभिलिखितमङ्गं सर्वं हनूमतः॥ 14॥

---

1. जावंवारं – ख।
2. सर्वत्र – क, ख, ग – लुप्तपाठः।
3. सर्वत्र – क, ख – ग लुप्तपाठः।

तं दृष्ट्वा साधु साध्वेतद् ऊचुः सर्वेऽतिविस्मिताः ।
भक्तराजममन्यन्त हनुमन्तं तदा जनाः ॥ 15 ॥

एवं हनुमतो भक्तिर्न भूतो न भविष्यति ।
तादृशी देवलोकेऽपि नृणामत्र तु का कथा[1] ॥ 16 ॥

सुग्रीवसख्यघटनं सीतान्वेषणमेव च ।
समुद्रलङ्घनं सीतासम्भाषणमतः परम् ॥ 17 ॥

आरामभञ्जनं चाक्षकुमारस्य वधस्तथा ।
लङ्कायाः दीपनं रामसान्निध्यागमनं पुनः ॥ 18 ॥

सेतुबन्धश्च जलधौ द्रोणाद्र्याजयनं तथा ।
लक्ष्मणप्राणरक्षा च रामशोकनिवारणम् ॥ 19 ॥

एवमादीनि कर्माणि प्रख्यातानि हनूमतः ।
पुराणेभ्युदयायैतन्मया किञ्चिदिहोदितम् ॥ 20 ॥

अपरं शृणु माहात्म्यं हनुमत्सम्भवं परम् ।
परमाश्चर्य्यजनकं सर्वाहङ्कारनाशनम् ॥ 21 ॥

एकदा द्वारकायां तु जित्वा कृष्णः शचीपतिम् ।
पारिजातं समानीय सत्यायै प्रददौ हरिः ॥ 22 ॥

सर्वाधिकाहमिति सा तदात्मानममन्यत ।
गरुडोपि तदात्मानं वेगेन च बलेन च ॥ 23 ॥

स[2]र्वाधिकं मन्यमानो हृदि गर्वं समावहत् ।
बाणासुरभुजच्छेदाद्यनेकाद्भुतकर्मभिः ॥ 24 ॥

चक्रस्यापि मनस्यासीन्न मे तुल्यपराक्रमः ।
इति त्रयाणां मानं तु खर्वीकुर्वन् जनार्दनः ॥ 25 ॥

दर्शयन्हनुमद्भक्तिं लीलामेकां चकार सः ।
सत्यभामासमीपे स तस्थावुत्साहवर्जितः ॥ 26 ॥

---

1. अधिकः पाठः क, ग –
   गोविन्दाय नमो नमः वासुदेवाय नमो नमः ।
   गोविन्दाय नमो नमो गोविन्दाय नमो नमः ॥
2. साधि – ख, ग ।

कुतस्तद्ब्रूहि मे दास्यै नोचेत्प्राणांस्त्यजाम्यहम्।
नाद्राक्षिषमनुत्साहं त्वां कदापि महाभुज: ॥ 27 ॥

अद्य त्वामीदृशं दृष्ट्वा नोत्सहे जीवितुं प्रिय।
इति सत्यवच: श्रुत्वा भगवान्वाक्यमब्रवीत्॥ 28 ॥

अनुत्साहस्य मे सत्यं नास्ति कारणमण्वपि।
एको भक्तस्य विरहो बाधते मां यदा तदा॥ 29 ॥

नैतादृशो [1]मे प्रद्युम्नो नेदृग्देहोऽपि मे सति।
तद्विश्लेषादहं खिन्न: कदा द्रक्ष्यामि तं हितम्॥ 30 ॥

इति श्रुत्वा वचस्तस्य सत्या प्राहातिविस्मिता।
किमेतद्भाषसे नाथ यस्तथैतादृश: प्रिय: ॥ 31 ॥

गच्छावस्तत्र तं वापि समानायितुमर्हसि।
तथापि खिद्यते व्यर्थमित्याश्चर्श्यं न वेद्म्यहम्॥ 32 ॥

कस्ते स भक्त: कुत्रास्ति किन्नाम ब्रूहि तन्मम।
इत्युक्त: प्रियया कृष्ण: प्राह तां मधुरं वच: ॥ 33 ॥

प्रिये यामि न संदेहस्तं चात्रैवानयाम्यहम्।
परन्तु शृणु तस्यैका निष्ठा मे कष्टदायिनी॥ 34 ॥

हनुमान्नाम भक्तो मे पर्वते गन्धमादने।
अस्ति मद्रूपमेवैकं हृदि ध्यायन्सदा कपि: ॥ 35 ॥

सीताया हरणे[2] पूर्वं मया रामशरीरिणा।
तमेकं बलमादाय जित्वा रावणमाहवे॥ 36 ॥

सीतालक्ष्मणसंयुक्त: कुशली गृहमागमम्।
लक्ष्मणे शक्तिनिहते मयि कर्तुं[3] व्यवस्थिते॥ 37 ॥

संरक्षितमनेनैव रघूणां कुलमुत्तमे।
तस्यैका परमा निष्ठा सीतारामौ विना पुन: ॥ 38 ॥

नान्यं पश्यति नो याति हृदि मामपि नैव स: ।
अतस्तत्र कथं यामि स आगत्य कथं पुन: ॥ 39 ॥

---

1. मे – क।
2. हरणम् – क, ग।
3. मर्तुं – क, ग।

प्रसन्नो यास्यतीत्येतच्चिन्ता मे हृदि जायते।
अहं रामस्वरूपं हि धर्तुं शक्नोमि जानकी ॥ 40 ॥

का भवेदिति मे चिन्ता त्वं वा सा रुक्मिणी किमु।
नान्यां हि तद्गतिज्ञानां जाने या जानकी भवेत् ॥ 41 ॥

इत्युक्ता सत्यभामा तु कृष्णं प्राहातिहर्षिता।
अहो चिन्ता त्यजाशु त्वमहं स्यां जनकात्मजा ॥ 42 ॥

आनय स्वप्रियं भक्तं न रुष्टः स भविष्यति।
इति श्रुत्वा वचस्तस्याः संस्मार गरुडं हरिः ॥ 43 ॥

आगत्य विनतापुत्रः किं करोमीति सोऽब्रवीत्।
तमाह कृष्णः संस्तुत्य गन्धमादन[1]पर्वते ॥ 44 ॥

हनुमान्मम भक्तोऽस्ति तमानय मदुक्तितः।
तत्र गत्वा ब्रूहि तस्मै द्वारकायां समागतः ॥ 45 ॥

सीतया सह रामस्तु द्रष्टुं त्वामिच्छति प्रभुः।
इत्युक्त्वा[2] तं तु शीघ्रं मां समागत्येति बोधय ॥ 46 ॥

इत्युक्त्वा तं पुनश्चक्रं प्राह त्वं द्वारि तिष्ठ भो।
आगते कपिराजे तु द्वारि संस्थाप्य तं पुनः ॥ 47 ॥

निवेद्य मां ततः पश्चादानयेन्मम सन्निधौ।
तथेत्युक्त्वा गरुत्मांस्तु ययौ तं गन्धमादनम् ॥ 48 ॥

हनुमन्तं ददर्शाथ नमस्कृत्वाऽब्रवीद्वचः।
यदुक्तं हरिणा सर्वं श्रुत्वा तन्मारुतिः पुनः ॥ 49 ॥

अर्घपाद्यादिकं कृत्वा कृत्वातिथ्यमुवाच ह।
गच्छ त्वमग्रतो ब्रूहि समागन्तास्मि तं प्रभुम् ॥ 50 ॥

(गरुडोऽप्यकथयत्सार्धमानयेति प्रभोर्वचः।
तस्मात् सहैव गन्तास्मि त्वया हीनो न यामि भोः ॥

हनुमानपि भावज्ञो चलेति पुप्लुवे द्रुतम्।
मनोवेगः समायातः पूर्वं तस्माद्गरुत्मतः ॥ (इति मम)
तच्छ्रुत्वा वचनं तस्य मारुतेर्भक्तवत्सलः।
बभूव रामस्वरूपः धनुर्बाणधरो हरिः ॥ 51 ॥

1. मर्दन – ख। 2. इत्युक्ता – क, ख।

सत्यापि गृहमध्ये तु चचारेतस्ततस्तु सा।
न सीता रूपमभजद्रुक्मिणीं प्राह केशवः ॥ 52 ॥
सीतारूपं समादाय शीघ्रमागच्छ मेऽन्तिकम्।
इत्युक्ता सा तु तत्रैव सीता जाता विदर्भजा ॥ 53 ॥
हनुमन्तं तदा चक्रः प्राह तत्र[1] न याम्यहम्।
त्वां निवेद्य गृहीत्वाज्ञां मा गच्छामि ततो व्रज ॥ 54 ॥
इति श्रुत्वा तु हनुमान् तच्चक्रं ज्वलनप्रभम्।
भ्राममाणं[2] भुजे दक्षे धृत्वा तु[3] कणवत्कपिः ॥ 55 ॥
जगामान्तःपुरे सद्यः क्व मे स्वामीति चासकृत्।
भाषमाणो ददर्शाग्रे नीलजीमूतसन्निभम् ॥ 56 ॥
द्विभुजं पुण्डरीकाक्षं धनुर्बाणधरं प्रभुम्।
स्मिताननं पीतवस्त्रं दिव्यालङ्कारभूषितम् ॥ 57 ॥
तद्वामपार्श्वगां देवीं जानकीं जननीमिव।
दृष्ट्वा मुहुर्निपत्योर्व्यां प्रणनाम महाकपिः ॥ 58 ॥
हर्षाश्रुपरिपूर्णाक्षः समुत्थाय कृताञ्जलिः।
हर्षगद्गदया वाचा किं करोमीति चाब्रवीत् ॥ 59 ॥
श्रुत्वा तद्भगवान्प्रीत्या प्राह ते कुशलं कपे।
इत्युक्त्वा पाणिना पाणिं गृहीत्वा स्व समीपतः ॥ 60 ॥
उपवेश्य करेणास्य[4] संस्पर्श चासकृत् ततः।
ददौ सा रुक्मिणी सीता, लड्डुकादिकमोदकान् ॥ 61 ॥
हनुमते ददौ प्रीत्या मारुतिर्बुभुजे मुदा।
भुक्तवन्तं ततस्तं तु मारुतिं भगवान्हरिः ॥ 62 ॥
प्राह त्वत्स्मरणाच्चेतो बभूवोत्कण्ठितं मम।
अतस्त्वां द्रष्टुकामेन गरुडः[5] प्रेषितो[6] मया ॥ 63 ॥
दृष्टोऽसि वत्स[3] भद्रं ते गच्छ तत्र सुखी भव।
एवं प्रभावो हनुमानवतारो महेशितुः ॥ 64 ॥

---

1. तत्र न – सर्वत्र लुप्तः पाठ।
2. ग्राम्यमाणं – क, ग।
3. कं – क, ख।
4. अग्रे पृष्ठकं – क।
5. गरुडं – ख, ग।
6. प्रेरितो – क, ग।

धर्मसंस्थापनार्थाय प्रादुर्भूतोऽस्ति भूतले।
स एव रामः कृष्णोऽसौ हनुमान् गरुडः स च ॥ 65 ॥

आत्मनोऽनेकमूर्त्तीश्च कृत्वा रक्षति मेदिनीम्।
सेव्यसेवकभावेन लोकं संमोह्य मायया ॥ 66 ॥

इति श्रीभगवद्भक्तिमाहात्म्ये हनुमच्चरितंकथनं नाम तृतीयस्सर्गः ॥ 3 ॥

❊ ❊ ❊

चतुर्थस्सर्गः

॥ विभीषणचरितम् ॥

विभीषणकथां वक्ष्ये महाश्चर्य्यमयीं शुभाम्।
यां श्रुत्वा मनुजः सद्यो रामे भक्तिं लभेद् ध्रुवम् ॥ 1 ॥

विभीषणस्तु पौलस्त्यो रावणस्यानुजो बली।
जातिधर्मं परित्यज्य बन्धुवर्गं तथैव च ॥ 2 ॥

श्री रामशरणं गत्वा युयुधे बन्धुभिः सह।
लङ्काविध्वंसनं ज्येष्ठबन्धुमारणमप्यहो ॥ 3 ॥

हितं मेने न रामस्य भक्तिं तत्याज राक्षसः।
ततो लङ्काधिपत्यं च चिरञ्जीवित्वमेव च ॥ 4 ॥

सम्प्राप्यान्ते हरेर्धाम गमिष्यति न संशयः।
एवं रामायणे तस्य भक्तिरुक्ता महर्षिणा ॥ 5 ॥

लोकप्रसिद्धां तद्भक्तिं वक्ष्येऽहं तु यथाश्रुतम्।
एकदा पानपात्रे तु कश्चित्सापात्रिको वणिक् ॥ 6 ॥

निधाय वित्तमम्भोधौ व्यवहर्तुं जगाम ह।
लग्ना नौः क्वचिदम्भोधौ न चचालातियत्नतः ॥ 7 ॥

ततो वैश्योऽतिसंदिग्धः किं करोमीत्यचिन्तयत्।
तदा केनचिदुक्तः स बलिरत्र प्रदीयताम् ॥ 8 ॥

1. त्वं तु – ख, ग।

एको मनुष्यो नो चेत्तु नौर्गमिष्यति संक्षयम्[1]।
इत्युक्तः स वणिक् प्राह कथं दास्यामि मानुषम्॥ 9॥

अहमेव [2]बलिर्भूत्वा पतिष्यामि महोदधौ।
तदैव तेषां कुशलं भविष्यति न संशयः॥ 10॥

मृते मयि धनं चैतन्मत्पुत्राय प्रदीयताम्।
एवं निश्चितबुद्धिं तु[3] वणिजं प्राह कश्चन॥ 11॥

कुष्ठरोगातुरो वृद्धो भृत्यो वैश्यसुहृत्तमः।
न त्वं पत बलिर्भूत्वा मृते त्वयि मृता वयम्॥ 12॥

अहं तुकुष्ठ रोगार्तो वृद्धो मर्तुमनाः स्वयम्।
बलिर्भूत्वा[4] पतिष्यामि जीव त्वं रक्ष बान्धवान्॥ 13॥

इत्युक्त्वा निपपाताब्धौ देवो गृह्णातु मां बलिम्।
अविघ्नमत्र नौरेषा गच्छत्वभिमतां[5] दिशम्॥ 14॥

एवं संकल्प्य पतिते वृद्धे रामेति भाषिणि।
तत्क्षणाच्चलिता नौका सर्वे कुशलिनोऽभवन्[6]॥ 15॥

स तु वृद्धो वीचिभिस्तु नीतो लङ्कासमीपतः।
तत्र रक्षोगणैर्दृष्टो गृहीत्वा भक्षणाय सः॥ 16॥

नीतो विभीषणस्याग्रे भक्ष्यमेतत्[7] प्रगृह्यताम्।
विभीषणस्तु तं दृष्ट्वा भृत्येभ्यः पारितोषिकम्॥ 17॥

दत्वा बहुधनं प्रीत्या तं वृद्धं तु स्वयं पुनः।
सिंहासनेषु संस्थाप्य पूजयामास भक्तितः॥ 18॥

अहो धन्योऽहमद्यैवैतन्मनुष्यनिरीक्षणात्।
रामचन्द्रस्य रूपं हृद्याविर्भवति विस्फुटम्॥ 19॥

अत्रैव तिष्ठति राज्यमिदं कुरु यथासुखम्।
विभीषणवचः श्रुत्वा वृद्धः प्राहातिभीतवत्॥ 20॥

---

1. संशयः – क, ग।
2. बली – ख।
3. तं – क, ग।
4. भूतः – ख, ग।
5. तं – ख, क।
6. अभवत् – ख, ग।
7. भक्ष्यामोतत् – ख, ग।

नाहं राज्यमिदं कांक्ष्ये न चान्यत् किञ्चिदप्यहो।
तस्यामेव तु नौकायां गन्तुमिच्छाम्यहं विभो ॥ 21 ॥

इत्युक्तः स तु दैत्येन्द्रो रत्नानि विविधानि सः।
तदङ्गे पट्टवस्त्रेण बध्वा भालेऽथ तस्य वै ॥ 22 ॥

रामनाम लिखित्वा तु प्रोवाच जलधिं स्वयम्।
अहोऽस्य भाले मुद्रेयं प्रभुनामाङ्किता मया ॥ 23 ॥

तत्प्रभावात्त्वया चैष नेयो यत्रायमिच्छति।
गन्तुं तत्रेति सम्प्रार्थ्य प्राक्षिपज्जलधौ स तम् ॥ 24 ॥

स तु वृद्धो विष्णुभक्तकरस्पर्शप्रभावतः।
तदाभाषणसंसर्गान्महारोगाद्विमुक्तवान् ॥ 25 ॥

लब्ध्वा दिव्यवपुः कुष्ठी समुद्रसलिलेऽपतत्।
वीचिभिः प्रेरितस्तस्या नौकायाः सन्निधिं गतः ॥ 26 ॥

तत्र नौकास्थितैर्दृष्टो मनुष्योऽयमुपागतः।
यः पोताज्जलधौ मग्नो नौस्तम्भे समुपस्थितः ॥ 27 ॥

परन्तु नास्य रोगोऽस्ति दिव्यरूपधरः कथम्।
इति संदिह्य ते सर्वे सम्प्रप्रच्छुस्तमादरात् ॥ 28 ॥

कोऽसि कस्मादिहायातः सत्यं कथय नः पुनः।
इति तेषां वचः श्रुत्वा स उवाच प्रहृष्टवत् ॥ 29 ॥

अहो भ्रान्ताः कथं यूयं स एवाहं न संशयः।
[1]यदा जले निपतितो लङ्कायाः सन्निधौ गतः ॥ 30 ॥

विभीषणाग्रे रक्षोभिर्नीतोऽहं भक्षणाय च।
ततो विभीषणो दृष्ट्वा मां सस्मार रघूत्तमम् ॥ 31 ॥

स्मारको यदहं जातस्तस्मान्मां सोऽप्यपूजयत्।
दत्त्वा रत्नानि मद्भाले रामनामान्यलीलिखत्[2] ॥ 32 ॥

---

1. इति, ख, ग।
2. लिषत् – क, ख।

ततः समुद्रे निक्षिप्य नयैनं तु यथेप्सितम्[1]।
इत्युक्तोऽहं तु संस्पर्शात्तदालापनयोगतः ॥ 33 ॥

कुष्ठरोगाद्विमुक्तः सन् इहायातोऽस्मि साम्प्रतम्।
धन्यो विभीषणो भक्तो धन्यं रामेति नाम तत् ॥ 34 ॥

यत्प्रसादान्महापापादहमेवं विमोचितः।
इति श्रुत्वा तु ते सर्वे विस्मयं परमं गताः ॥ 35 ॥

रामभक्तिं प्रशंसन्तो जग्मुस्ते स्वं स्वमालयम्।
एवं विभीषणे भक्तिः प्रसिद्धा लोकपाविनी ॥ 36 ॥

अद्यापि भक्तिमाहात्म्यमेवमेवास्त्यसंशयम् ॥ 37 ॥

इति श्री भगवद्भक्तिमाहात्म्ये विभीषणचरितं नाम चतुर्थः सर्गः ॥ 4 ॥

❊ ❊ ❊

पञ्चमः सर्गः

।। शवरीचरितम् ।।

[2]शवरी भक्तिमाहात्म्यं कथयामि यथाश्रुतम्।
परमाश्चर्य्यजनकं[3]रामभक्तिप्रवर्द्धनम् ॥ 1 ॥

दण्डकारण्यमध्ये तु मातङ्गाश्रम[4]सन्निधौ।
शबरस्य सुता काचित्पतिपुत्रविवर्जिता ॥ 2 ॥

अरण्ये निवसन्ती सा फलमूलाशना शुभा।
दैवान्मतङ्गं तमृषिमेकदा संददर्श ह ॥ 3 ॥

प्रातः स्नात्वा समायान्तं स्वाश्रमे[5] नियतेन्द्रियम्।
दृष्ट्वा पलायमानापि पश्यन्ती भक्तितो मुनिम् ॥ 4 ॥

द्रष्टुं हि नहि शक्नोमि नीचा तं कथमर्च्चये।
विचारयामास हृदि[6] सेवयामि कथं मुनिम् ॥ 5 ॥

---

1. प्रायद्येमं यथेक्षितम् – सर्वत्र – क, ख, ग।
2. सवरी – ख, ग।
3. विष्णु – क, ग।
4. मुनिः – क।
5. जियते – क, ग।
6. हृदये – ख।

यथाप्येतस्य मार्गोऽयं कर्कशाः[1] कण्टकान्वितः।
तं मार्जयाम्यहं नित्यं यावद् द्रक्ष्यति नैव माम्॥ 6॥

इन्धनानि गृहीत्वा च तदाश्रमसमीपतः।
संस्थापयिष्ये रात्रौ तु ततः सेवा भविष्यति॥ 7॥

एवं कृते कदाचित् स्यात् कृपा मयि मुनेरहो।
इति निश्चित्य मनसा रात्रिशेषेऽथ नित्यशः॥ 8॥

मार्गं सम्मार्ज्जयित्वा[2] सा धारयामास चैन्धनम्।
एवं गतेषु कालेषु मतङ्गः शिष्यमब्रवीत्॥ 9॥

कोऽयं मार्गं मार्जयित्वा ददात्यत्रेन्धनानि भोः।
रात्रावगत्य नो जाने ज्ञातव्यः कोऽस्ति कानने॥ 10॥

इत्युक्तो मुनिना शिष्यो रात्रौ मार्गे निलीय सः।
स्थितो ददर्श शवरीं दधानां शिरसेन्धनम्॥ 11॥

धृत्वेन्धनं मार्जयित्वा मार्गं चलितुमुत्सुकाम्।
तदा शिष्यः समुत्थाय शवरीं प्राह सत्वरम्[3]॥ 12॥

कासि त्वमिह मार्गं मे सम्मार्जयसि नित्यशः।
जिज्ञासते गुरुस्त्वां मे चल तस्य समीपतः॥ 13॥

इत्युक्ता वेपमाना सा शवरी भयविह्वला।
जगाम च मुनेरग्रे भीता भक्तिमती सती॥ 14॥

तां दृष्ट्वा स मुनिः प्राह किमर्थमिन्धनानि मे।
ददासि मम मार्गं च मार्जयन्ती दिने दिने॥ 15॥

इत्युक्ता शवरी[4] प्राह मतङ्गं प्रणिपत्य च।
नाथाहं शवरी[5] नीचयोनिजा भाग्यवर्जिता॥ 16॥

तिष्ठन्ती विपिने चाहमपश्यं[6] त्वां तपस्विनम्।
तदादि भवतः सेवां कर्त्तुं व्यवसिताऽभवम्॥ 17॥

---

1. मार्जयति – ख, ग।
2. सत्परः – क, सत्वरः – ख।
3. सवरी – ख, ग।
4. सवरी – ख, ग।
5. शवरजा – ख।
6. मार्जनीयम् – ख, ग।

3rd Proof/05-04-08/sansthan/babu

कथं सेवां करिष्यामि नीचेत्येवं विचार्य च।
त्वदीयस्नानमार्गं तु मार्जयन्ती[1] दिने दिने ॥ 18 ॥

इन्धनानि परिक्षिप्य त्वदाश्रमसमीपतः।
निक्षिप्य पर्णशालायामस्मीत्येवं व्रतं मम ॥ 19 ॥

न चान्यसेवायोग्याहं नाथै तत्क्षम्यतां मम।
इति श्रुत्वा वचस्तस्या मतङ्गस्तद्दयान्वितः ॥ 20 ॥

उवाच शिष्यमेषा तु संरक्ष्याश्रमतो बहिः।
नित्यमन्नं देयमस्यै कृपया सेवते हि नः ॥ 21 ॥

इति श्रुत्वा वचस्तस्य मतङ्गस्य महात्मनः।
भूमौ निपत्य शबरी बद्धाञ्जलिपुटाब्रवीत् ॥ 22 ॥

नाथैतत्क्षम्यतामेतन्नान्नमिच्छाम्यहं तव।
कदाचित्ते दया मे स्यात्कृतार्था स्यां न संशयः ॥ 23 ॥

न च मे विभवाकांक्षा न संसारोऽस्ति मे प्रियः।
यथा मे सद्गतिर्भूयात् तथा देहि शुभाशिषम् ॥ 24 ॥

इति श्रुत्वा वचस्तस्या मतङ्गो मुनिपुङ्गवः।
क्षणं ध्यात्वाब्रवीत्तां तु भद्रं तिष्ठात्र निर्भया ॥ 25 ॥

इत्युक्त्वा स मुनिर्गेहं जगाम शबरी तु सा।
जगाम स्वकुटीं नित्यं[2] चक्रे तत्र गतागतम् ॥ 26 ॥

एवं गतेषु कालेषु दण्डकारण्यवासिनः।
मतङ्गमाक्षिपन् सर्वे शबरी[3]सन्निधानतः ॥ 27 ॥

तत्यजुस्तस्य संभाषं भोजनादिषु का कथा।
ज्ञात्वापि तन्मतङ्गस्तु न चुक्रोध महामुनिः ॥ 28 ॥

अवदातं स्वचरितं निश्चित्य क्षमयान्वितः।
एवं गतेषु कालेषु मतङ्गो मुनिसत्तमः ॥ 29 ॥

ज्ञात्वा शरीरपातं च कुशासनमुपाविशत्।
ततः शिष्यगणाः सर्वे रुदन्तस्तमपूजयन् ॥ 30 ॥

---

1. कर्शरा – क, ग।
2. नित्यं – सर्वत्र – क, ख, ग–लुप्तपाठः।
3. सवरी – ख, ग।

रुदन्ती[1] शवरी चापि कृताञ्जलिपुटागता।
मुनेः सम्मुखं र्तृस्थौ तां दृष्ट्वा मुनिरब्रवीत्॥ 31॥

आगच्छ वत्से! शवरि[2] विषादं त्यज सुव्रते।
रामो दाशरथिः साक्षाद्विष्णुरेव सनातनः॥ 32॥

अवतीर्णोऽस्त्ययोध्यायामेष्यत्यत्र यदा तु सः।
तस्यातिथ्यं विधाय त्वं दिवि यास्यसि नान्यथा॥ 33॥

तावत्त्वं तस्य रामेति नामभाषणतत्परा।
वसात्र दण्डकारण्ये मत्सेवा फलमस्तु ते[3]॥ 34॥

इत्युक्त्वा तां ततः शिष्यानुक्त्वा चैव यथोचितम्।
जगाम दिव्यलोकं तु मतङ्गो मुनिपुङ्गवः॥ 35॥

तदारभ्य प्रतिपलं शवरी [4]रामभाषिणी।
फलमूलाशना नित्यं रामागमनकाङ्क्षिणी॥ 36॥

कदाऽगमिष्यति श्रीमान्रामो दाशरथिः प्रभुः।
इत्येवं चिन्तयन्ती सा मुहुः पश्यति तत्पथम्॥ 37॥

फलमूलादिकं पत्रबदरी तिंदुकादिकम्।
भुञ्जाना[5] मधुरं ज्ञात्वा रामातिथ्याय सात्वधात्॥ 38॥

प्रातरेव समागच्छेत् कदाचिदिह चेत्प्रभुः।
इति सञ्चित्य मनसा विलिलेप कुटीं निशि॥ 39॥

शयाना पुनरुत्थाय बहिरेत्य महानिशि।
पश्यन्ती सा दिशः सर्वा आगमिष्यति किं प्रभुः॥ 40॥

एवमुत्कण्ठितारण्ये शवरी रामतत्परा।
पलं नैवाविसस्मार रामं राजीवलोचनम्॥ 41॥

एकदा मुनिपुत्रं[6] तु शुश्राव रघुनन्दनम्।
समागतमरण्ये सा विदित्वैवं बभूव सा॥ 42॥

धावन्तीतस्ततो मूलफलान्यादाय मन्दिरे।
संरक्ष्य जलमाहर्तुं जलाशयमुपागमत्॥ 43॥

---

1. रुदन्ति – ख।
2. सवरी – ख, ग।
3. अश्नुते – क।
4. नाम – ग।
5. अति – क पाठः।
6. पात्रा – क।

अथ दृष्टो मुनिः कोऽपि स्नात्वा गच्छंस्तथा पथि।
प्रदक्षिणीकृत्य मुनिं भयाद् दुद्राव सा पुनः ॥ 44 ॥
अथ तस्याः शरीरस्य छाया मुनिपदाम्बुजे।
संलग्नातः सञ्चुकोप मुनिस्तां भर्त्सयन् रुषा ॥ 45 ॥
परावृत्य पुनः स्नातुं जलाशयमुपागमत्।
तत्र गत्वा ददर्शाम्भोऽसृङ्निभं कृमिसंयुतम् ॥ 46 ॥
चिन्तयामास स मुनिः किं जातमिदमम्भसि।
तथापि मार्जनं कृत्वा समायातो निकेतनम् ॥ 47 ॥
शवरी तु ततः पूर्वं जलं नीत्वा स्ववेश्मगा।
अथैतस्मिन्क्षणे रामो लक्ष्मणेन समन्वितः ॥ 48 ॥
शवर्याश्रममायातः क्व साऽस्ति शवरी मम।
इति ब्रुवाणस्तद्भक्त्या अङ्गणे समुपागतः ॥ 49 ॥
दृष्ट्वा रामं घनश्यामं शवरी पुष्करेक्षणम्।
जटामुकटशोभाढ्यं धनुर्बाणधरं तु सा ॥ 50 ॥
ननर्त्ताङ्गणमागत्य करतालपरा मुदा।
रामदर्शनहर्षेण नान्यत्किञ्चिद्बुबोध[1] सा ॥ 51 ॥
पतितं चोत्तरीयं तु परिधानीयमप्यहो।
तथापि न निवृत्ता सा निमग्नानन्दसागरे ॥ 52 ॥
अथ तां बोधयामास लक्ष्मणः सस्मिताननः।
अहो नृत्यान्निवर्त्तस्व रामोऽयं तव तिष्ठति ॥ 53 ॥
कुरुष्वातिथ्यमत्र [2]त्वं भव पूर्णमनोरथा।
इत्युक्ता शवरी[3] नृत्यं त्यक्त्वा भूमौ पपात ह ॥ 54 ॥
प्रणिपत्योत्थिता शीघ्रं कुशासनमुपाहरत्।
ततः पादौ तयोर्भक्त्या प्रक्षाल्य बदरीफलम् ॥ 55 ॥
तिन्दुकानि च मूलानि फलान्यन्यानि यानि तु।
रामार्थं[4] रक्षितान्यासन् दन्तैश्छित्वा[5] परीक्ष्य च ॥ 56 ॥

---

1. विवोध – ख।
2. अस्य – ग।
3. सवरी – ख, ग।
4. रामार्थे – क।
5. स्थित्वा – ख, ग।

अग्रे धृत्वा ददौ प्रीत्या रामपाणौ स्वपाणिना।
ततो रामः फलं तस्या बुभुजे प्रशशंस च॥ 57॥

ततो रामः फलं[1] प्रीत्या लक्ष्मणश्च महामनाः।
बुभुजे शवरीहस्तात्फलं भक्त्या[2] वशीकृतः॥ 58॥

अथ सर्वे समायाता दण्डकारण्यवासिनः।
मुनयः शवरीवेश्म द्रष्टुं रामं सलक्ष्मणम्॥ 60॥

नमस्कृत्य च तान् रामः पप्रच्छ कुशलं मुनीन्।
अथोचुर्मुनयः सर्वे सदा कुशलिनो वयम्॥ 61॥

त्वद्दर्शनाद्रघुश्रेष्ठ जाता स्मो निर्भया वयम्।
अथैकः प्राह रामं तु धन्येयं शवरी प्रभो[3]॥ 62॥

यत्सान्निध्यात्परित्यक्तो मतङ्गोऽस्माभिरेव तु।
तस्या एवाङ्गणे त्वां तु स्थितं वयमुपास्महे[4]॥ 63॥

पुनरेक उवाचाथ जलमस्मिन् जलाशये।
अकस्मात्कृमिभिर्दुष्टं शोणिताभमभूत्कुतः॥ 64॥

कथं सम्यक् प्रजायेत तमुपायं वद प्रभो।
इत्युक्तवन्तं तं प्राह लक्ष्मणः सस्मिताननः॥ 65॥

अहो धन्यतमा यूयं तपोव्रतपरायणाः।
त्यक्त्वा विषयजं सौख्यं वने वसथ निःस्पृहाः॥ 66॥

भवद्भिरेव लोकोऽयं धार्यते सचराचरः।
य आसीद्भवतामेको मतङ्गो नाम वै मुनिः॥ 67॥

तस्यानुग्रहतश्चैषा दृढभक्तिरताऽभवत्।
अत एषापि धन्याभूदद्य नास्त्यत्र संशयः॥ 68॥

जलं यत्कृमिभिर्दुष्टं तदस्या एव भर्त्सनात्।
अस्या छायापदे लग्ना मुनेस्तेन च भर्त्सिता॥ 69॥

पुनः स्नातुं गते विप्रे जलमेवं बभूव तत्।
मतङ्गमुनिविद्वेषाद्रामभक्तापमानतः॥ 70॥

---

1. हसन् – क, ग।
2. भक्ति – क।
3. विभो – क, ग।
4. विधि भवत् – क।

जलमेतादृशं जातं भवतामभिमानतः।
अतः परं मतङ्गस्य शिष्यान् सम्मानयन्तु तान्॥ 71॥

भवन्तः शवरी त्वेषा गत्वा स्पृशतु वारि तत्।
ततो जलं पूर्वतुल्यं स्यादेवात्र न संशयः॥ 72॥

इत्युक्त्वा मुनयः सर्वे लक्ष्मणेन महात्मना।
मतङ्गमुनिशिष्यांस्तु तोषयामासुरानताः॥ 73॥

शवरी चापि रामार्थमुदकं नेतुमागता।
जलाशयं प्रविष्टा सा जलं सम्यग्बभूव तत्॥ 74॥

अथ नीत्वा जलं सा तु शवरी जलसन्निधौ[1]।
समागत्य जलं दत्त्वा रामस्तामब्रवीत्पुनः॥ 75॥

त्वद्भक्तितः प्रसन्नोऽहं वरं ब्रूहि ददामि तत्।
इत्युक्ता शवरी प्राह नाथातःपरमस्ति किम्॥ 76॥

यत्त्वां[2] साक्षात्प्रपश्यामि नीचवंशे भवाम्यहम्।
तथापि याचे भगवन् त्वद्भक्तिः स्याद् दृढा मम॥ 77॥

नातःपरं निवत्स्यामि नाथ संसारसागरे।
इति श्रुत्वा वचस्तस्या एवमस्त्विति[3] सोऽब्रवीत्॥ 78॥

ततः सा शवरी रामं स्तुत्वा गद्गदभाषिणी।
त्यक्त्वा देहं ययौ स्वर्गं पश्यन्ती रघुनन्दनम्॥ 79॥

विमानवरमारुह्य जितेन्द्राणी[4] तु सा पुनः।
पश्यतां सर्वलोकानां मुनीनामेतदद्भुतम्॥ 80॥

ततो रामस्तु शवरीशरीरं काष्ठसञ्चयैः।
भस्मीकृत्वोदकं तस्यै ददौ भक्तिवशीकृतः॥ 81॥

तां दृष्ट्वा मुनयः सर्वे तुष्टवुस्तां सुविस्मिताः।
केयं महादुराचारा शवरी नीचसम्भवा॥ 82॥

क्व चैतद्गमनं स्वर्गे जलदानमिदं पुनः।
तस्माद्भक्तैर्न वै किञ्चिदसाध्यमिह विद्यते॥ 83॥

---

1. सन्निधिं – ख पाठः।
2. यं त्वां – क, ग।
3. एवमस्तीति – क।
4. जाता वाणीवशा – ख, ग।

इत्युक्तवन्तस्ते सर्वे स्तुत्वा रामं सलक्ष्मणम्।
जग्मुः स्वं स्वं च निलयं ययौ रामोऽपि चान्यतः ॥ 84 ॥

दृष्ट्वा तु परमाश्चर्य्यं विस्मितास्ते तपोधनाः।
इत्येतच्छबरी[1]भक्तिमाहात्म्यं कथितं मया ॥ 85 ॥

श्रुत्वैतत्परमां भक्तिं लभते रघुनन्दने ॥ 86 ॥

इति श्रीभगवद्भक्तिमाहात्म्ये शबरीचरितं नाम पञ्चमः सर्गः ॥ 5 ॥

❊ ❊ ❊

षष्ठः सर्गः

॥ अजामिलचरितम् ॥

अजामिलकथां वक्ष्ये परमाश्चर्यकारिणीम्।
यस्मिन्नाम च माहात्म्यं व्यक्तं चक्रे जनार्दनः ॥ 1 ॥

आसीत् कश्चित् द्विजः पूर्वमन्तर्वेधेति[2] विश्रुतः।
कान्यकुब्जोऽतिधनवान् सर्वधर्मविवर्जितः ॥ 2 ॥

दुःसङ्गतिवशाद्विप्रो वेश्यायां निरतोऽभवत्।
मद्यं चापि पपौ नित्यं मांसमश्नाति नित्यशः ॥ 3 ॥

विसस्मार निजज्ञातिं कर्मनाम तथा हरेः।
एवम्भूतो बन्धुवर्गैस्त्यक्तो ग्रामसमीपतः ॥ 4 ॥

निर्माय भवनं वेश्यां संरक्ष्य गृहिणीमिव।
उवास ग्रामाद्बाह्यो स चाण्डाल इव चापरः ॥ 5 ॥

परन्तु स्वगृहं द्वारमङ्गणं चापि सर्वदा।
ब्राह्मणाश्रमवत्स्फीतं ररक्षाजामिलः स तु ॥ 6 ॥

एवं निनाय कतिचित्समास्तत्र[3] द्विजाधमः।
गृहिण्या वेश्यया रेमे मद्यपानरतस्सदा ॥ 7 ॥

1. तन्स – ख। 2. वेदिति – ख।
3. मासास् – क।

एकदा तत्समीपेऽन्य[1]ग्रामात्तत्रागतोऽतिथिः।
सायंकाले विष्णुभक्तः शालिग्राम[2]शिलां वहन्॥ 8 ॥

किञ्चिदाहातिथिः प्रेम्णा निश्यत्र निवसाम्यहम्।
स्थलं दर्शय वासार्थं सोऽब्रवीच्चातिदुर्ज्जनः॥ 9 ॥

ग्रामाद्बाह्ये महानेको धर्मात्माजामिलो द्विजः।
शुश्रूषति स सर्वांस्तु भोजनास्तरणादिभिः॥ 10 ॥

इत्युक्त्वा स गतो दुष्टः सोऽतिथिस्तत्र चागतः।
द्वारदेशादाजुहाव नाम्ना चाजामिलस्य वै॥ 11 ॥

श्रुत्वा तद्गृहिणी वेश्या समागत्याब्रवीच्च तम्।
कोऽसि कस्मादिहायातः किमर्थं तमिहेच्छसि॥ 12 ॥

स उवाच ततः साधुः पथिको निवसाम्यहम्।
गतः पूर्वमहं ग्रामे तत्रत्यो मामुवाच ह॥ 13 ॥

ग्रामाद्बाह्योऽस्ति धर्मात्मा विप्रोऽजामिलसंज्ञकः।
तत्र गच्छ निवासाय स ते वासं प्रदास्यति॥ 14 ॥

इत्युक्तोऽहमिहायातः क्व चास्तेऽजामिलस्स तु।
इति श्रुत्वा तु सा वेश्या बहिर्वेश्मनि तं तदा॥ 15 ॥

निवासाय ददौ स्थानं स नास्ति भवनेऽधुना।
आगमिष्यति चेत्त्वां तु नमस्यति न संशयः॥ 16 ॥

अथ सा शीघ्रमागत्य ग्रामे कञ्चिद् वणिग्जनम्।
समानीयोत्तमान्नादिभोजनाद्यर्थमाहरत्॥ 17 ॥

ततः प्राञ्जलिश्चाहेदं [3]कूपोऽयमुदकं ततः।
गृहाण नाहमुदकं दातुं योग्या त्यजाद्य माम्॥ 18 ॥

इति श्रुत्वा द्विजः साधुस्तद्बहिर्मन्दिरे स्वयम्।
उपलिप्य शुचौ देशे पक्त्वा देवं समर्च्य च॥ 19 ॥

बुभुजे निशि सुष्वाप सुषुप्तेनान्तरात्मना।
अथार्धरात्रसमये वारुणीमदविह्वलः॥ 20 ॥

---

1. च – क।
2. शाल – क।
3. कूपो – ख, क मध्ये लुप्तपाठः।

अजामिलः समायातो निन्ये तं सा द्रुतं गृहे।
अथ रात्रौ[1] व्यतीतायां प्रभाते सोऽतिथिर्द्विजः॥ 21॥

गन्तुं प्रवृत्तो द्वारिस्थ आजुहाव पुनश्च तम्।
तदेवं रात्रिवृत्तान्तमुवाचाजामिलाय सा॥ 22॥

पुनराह व्रजाशु त्वं गत्वा तं च नमस्कुरु।
स दास्यति वरं चेत्त्वं पुत्रं वरय मे प्रियम्॥ 23॥

इति श्रुत्वा गतो द्वारि तं साधुं प्रणिपत्य[2] च।
तमाह साधुः सन्तुष्टस्त्वयि, दास्यामि ते वरम्॥ 24॥

ब्रूहीति श्रुत्वा प्रोवाच प्राञ्जलिः सोप्यजामिलः।
भगवन्ननपत्योऽहं पुत्रो मे जायतामिति॥ 25॥

प्रार्थयामि वरं त्वत्तो नान्यमिच्छाम्यहं वरम्।
इति श्रुत्वा वचस्तस्य सोऽतिथिः प्राह तं वचः॥ 26॥

अहो ते भविता पुत्रः सत्यमेतन्न संशयः।
परन्तु तस्य नामाहो नारायण इति त्वया॥ 27॥

[3]रक्षितव्यमिति स्वान्ते स्थापनीयं मदीरितम्।
इत्युक्त्वा स गतो विप्रोऽजामिलोऽप्यगमद्गृहम्॥ 28॥

वेश्यायै सर्वमाचष्टे श्रुत्वा सापि जहर्ष च।
ततः कतिपये काले याते[4] सा गर्भवत्यभूत्॥ 29॥

सुषुवे दशमे मासि पुत्रं सर्वाङ्गसुन्दरम्।
ततो नामास्य[5] सञ्चक्रे नारायण इति स्फुटम्॥ 30॥

सोऽप्यवर्द्धत कालेन युवावस्थामुपागतः।
अजामिलोऽतिवृद्धोऽभूज्जरया जर्जरीकृतः॥ 31॥

तथापि मदिरापानं मांसाहारं न त्यक्तवान्।
अथ सोऽजामिलो रोगान्म्रियमाणो गृहे स्थितः॥ 32॥

शय्यायां सेवितः प्रीत्या रुदत्या वेश्यया[6] स च।
अथ तं म्रियमाणं तु ज्ञात्वा वैवस्वतः प्रभुः॥ 33॥

---

1. रात्र्याम् – ख।
2. प्रणनाम ह – क, ख।
3. करितव्यमिति – क।
4. जाते – ख।
5. नामापि चक्रे स – ख, ग।
6. वेश्यया सह – ख।

प्राह दूतान् दण्डपाशहस्तानतिभयङ्करान्।
यान्तु यूयं कान्यकुब्जं म्रियमाणोऽतिपातकी॥ 34॥

जात्या द्विजः कर्मणासौ चाण्डालादधिकोऽभवत्।
तमानयित्वा पाशेन बध्वात्र नरकेषु च॥ 35॥

पातयध्वं न तं चाहं द्रष्टुमिच्छामि पापिनम्।
इत्याज्ञां शिरसा धृत्वा गतास्ते यमकिङ्कराः॥ 36॥

दण्डपाशधराः सर्वे दीर्घदंष्ट्रा भयङ्कराः।
आगत्याजामिलगृहे तं पाशैर्बद्धुमुद्यताः॥ 37॥

तान् दृष्ट्वाजामिलो भीत्या चाजुहाव सुतं निजम्।
अहो नारायणात्रैहि मां बध्नन्ति भयङ्कराः॥ 38॥

नारायण ततः पाहीत्येवं पुत्रमभाषत[1]।
मुहुरेवं[2] वदत्यस्मिन् विष्णुदूताः समागताः॥ 39॥

शङ्खचक्रधराः सर्वे तुलसीदामभूषिताः।
यमदूतान् भर्त्सयन्तस्त्यजैनमिति[3] वादिनः॥ 40॥

ततस्तु यमदूतास्तैरयुध्यन्त महात्मभिः।
ततो घोरतरं युद्धं कृत्वा ते विष्णुकिङ्कराः॥ 41॥

अजामिलं समादाय विमाने हरिमन्दिरम्।
वैकुण्ठं प्रापयामासुरित्याश्चर्यमभूदहो॥ 42॥

अथ ते यमदूतास्तु छिन्नहस्तोरुनासिकाः।
सम्प्राप्य धर्मराजाग्रे रुदन्तो वाक्यमब्रुवन्॥ 43॥

अविचार्यैव भवता प्रेष्यन्ते किङ्करा निजाः।
अथ वा चित्रगुप्तोऽयं सहसा संवदत्यहो॥ 44॥

वयं तत्र गतानेतुं विप्रं चाजामिलं तदा।
विष्णुदूताः समागत्य युद्धं कृत्वातिदारुणम्॥ 45॥

विनिर्जित्य च नः सर्वान्निन्युस्तं भवनं हरेः।
पश्यास्मदीयान्यङ्गानि चक्रछिन्नान्यनेकधा॥ 46॥

---

1. अभाषयत् – ख।
2. वहुरेवं – ख।
3. विजहीतेतिवादिनः – ख।

तमप्यानयितुं (?) चास्मान् श्रीमन्तः प्रेषयन्ति हि।
तस्मादियमवस्था नो यो नात्र गन्तुमर्हति ॥ 47 ॥

इति श्रुत्वा वचस्तेषां यमराजोऽतिविस्मितः।
आहूय चित्रगुप्तं तु पप्रच्छाजामिलस्य सः ॥ 48 ॥

चित्रगुप्तो निरीक्ष्याह [1]नाजन्ममरणावधि।
पुण्यलेशो न चास्त्यस्य निश्चित्येतद्ब्रवीम्यहम् ॥ 49 ॥

किन्तु प्राणान्तसमये दृष्ट्वा दूतान्भयङ्करान्।
नारायणेति नामानं तनयं स्वमुपाह्वयत् ॥ 50 ॥

तदाजुहाव पुत्रं स न तु तं जगदीश्वरम्।
इति श्रुत्वा वचस्तस्य चित्रगुप्तस्य भास्करिः ॥ 51 ॥

गृहीत्वा निजदूतान्वै वैकुण्ठं प्रययौ द्रुतम्।
तत्र गत्वा जगन्नाथं विष्णुं नारायणं हरिम् ॥ 52 ॥

प्रणम्य प्रार्थयामास बद्धाञ्जलिपुटो यमः।
भगवन्नधिकारो मे वृथा तव गणैः[2] कृतः ॥ 53 ॥

[3]महापातकिनां श्रेष्ठोऽजामिलोऽभूद्द्विजाधमः।
तमानेतुं मया दूताः प्रेषिता जगदीश्वरम् ॥ 54 ॥

अथान्तरे भवद्दासा मम दूतान्निहत्य तम्।
समानिन्युरिहायं ते राजते भवने द्विजः ॥ 55 ॥

[4]श्रुत्वैतद्धर्मराजस्य वचनं भगवान् हरिः।
सस्मितं सान्त्वयित्वा तं यमराजमभाषत ॥ 56 ॥

अहो सत्यं नास्य पुण्यमाजन्ममरणावधि।
परन्तु मृत्युसमये मन्नामोच्चारणादयम् ॥ 57 ॥

विमुक्तस्सर्वपापेभ्य आनीतो यमकिङ्करैः।
शृणुष्व समयं मत्तो निजचित्तेऽवधारय ॥ 58 ॥

पापिनोऽपि यथा दण्डं भवतो नाप्नुवन्ति हि।
तथाऽवधार्य चित्ते वै विहरस्व महीतले ॥ 59 ॥

---

1. राजन् – क।
2. गुणैः – ख।
3. महापातकिं ना – क, ग।
4. वैतंधम – क।

ये नाम सतमहो मम शङ्करस्य
देव्या जपन्ति मनुजा भुवि पापिनोऽपि।
तांस्त्वं जहीहि न च ते तव दण्डयोग्या
अस्मत्प्रिया इति न तच्चरितं विचार्यम्॥ 60॥

तत्रापि ये विजहति स्वकलेवराणि,
मन्नामभाषणपुरस्सररमप्यचित्ताः।
किञ्चामलत्रिपथगातटभाजिनो ये,
संसेविताद्धतनव खलु तेऽतिपूज्याः॥ 61॥

एवं शिक्षामुरीकृत्य नमस्कृत्य[1] यमो हरिम्।
निर्जगाम गणैस्सार्द्धं हृष्टः स्संयमनीं पुरीम्॥ 62॥

तत्रापि निजदूतेभ्यश्शिक्ष्यमाह हरेः कथाम्।
इत्याजामिलसम्बन्धाद्भक्तिमाहात्म्यमुत्तमम्॥ 63॥

परमाश्चर्यजनकं रामसामर्थ्यबृंहितम्।
श्रुत्वा भक्तिमवाप्नोति महापापात्प्रमुच्यते॥ 64॥

इति श्री भगवद्भक्तिमाहात्म्येऽजामिलचरितं नाम षष्ठस्सर्गः॥ 6॥

❊ ❊ ❊

सप्तमः सर्गः

॥ जटायुचरितम्॥

जटायुचरितं वक्ष्ये महानन्दप्रदायकम्।
अयोध्यायां रघुश्रेष्ठो राजा दशरथस्सुतम्॥ 1॥

ज्येष्ठरामं यौवराज्येऽभिषेक्तुमुपचक्रमे।
तदा वक्रावचो मत्वाह तं कैकयभूपजा॥ 2॥

निवारयामास नृपं रामराज्याभिषेचनात्।
किञ्च रामं सपत्नीकं चतुर्दश समा वने॥ 3॥

निर्वासयामास नृपाद्वरं प्राप्याथ कैकयी।
तदा रामः पितुर्धर्मसंरक्षणपरायणः॥ 4॥

---

1. ख मध्ये लुप्तपाठः।

सीतया लक्ष्मणेनाथ ययौ दण्डककाननम्।
वसन् रक्षोगणांस्तत्र निजघान सहस्रशः॥ 5॥

एकदा दण्डकारण्ये गोदावर्य्यास्समीपतः।
पञ्चवट्यां स्थितं रामं सीतया लक्ष्मणेन च॥ 6॥

धीरा शूर्पनखा नाम्ना खरदूषणयोः स्वसा।
ददर्श कोटिकन्दर्पसुन्दरं पुरुषोत्तमम्॥ 7॥

समागत्याब्रवीद्वाक्यं सकामाऽहं त्वया सह।
रन्तुमिच्छामि तच्छ्रुत्वा रामो वचनमब्रवीत्॥ 8॥

द्वारि तिष्ठति मे [1]भ्राता कनीयान् मम वल्लभः।
निस्त्रीकात्तं व्रजाहं तु सस्त्रीकः सीतयानया॥ 9॥

अथ सा लक्ष्मणं गत्वा प्रोवाचात्ममनोरथम्।
ततः प्रहस्य सौमित्रिराह शूर्पनखां वचः॥ 10॥

अहं तु तस्य रामस्य दासोऽस्मि दितिनन्दनि।
अतस्तमेव गच्छ त्वं माभूर्दासी मदाश्रयात्॥ 11॥

इति श्रुत्वा गता रामं पुनर्लक्ष्मणमभ्यगात्।
एवं गतागते क्रुद्धा भक्षितुं जनकात्मजाम्॥ 12॥

प्रवृत्ता[2] लक्ष्मणः शीघ्रं तस्याच्छिदनासिकाम्।
ततः संछिन्नासा सा रुदन्ती [3]खरदूषणम्॥ 13॥

गत्वोवाच वने दृष्टावुभौ तापसरूपिणौ।
तयोः सहायिनी रामा साक्षाच्छ्रीरिव सुन्दरी॥ 14॥

तां त्वदर्थमिहानेतुं प्रवृत्ताहं ततस्तु मे।
नासां छित्वाश्रमाद्दूरे तेन निष्कासितास्म्यहम्॥ 15॥

समागतेयं तौ हत्वा गृह्णतु तां युवां स्त्रियम्[4]।
इति तस्या वचः श्रुत्वा भ्रातरौ खरदूषणौ॥ 16॥

प्रकुप्य सेनया सार्द्धं युयुधतुः ध्रुवं क्रुधा।
युध्यमानौ ततस्तौ तु रामेण निहतौ रणे॥ 17॥

---

1. मद्भ्राता – क, ग पाठः।
2. प्रव्रजता –क।
3. दूषणैः – ख।
4. प्रियां – ख, ग।

ततः श्शूर्पनखा सा तु विनासा हतसोदरा।
रावणं समुपागत्य रुदन्ती प्राह राक्षसी॥ 18॥

नाथाद्य दण्डकारण्ये राजपुत्रौ यमावुभौ।
धनुर्बाणधरौ रामलक्ष्मणाख्यौ तपस्विनौ॥ 19॥

समागतं तयोस्साकं स्त्रीरत्नमतिसुन्दरम्।
विरुद्धयन्तौ त्वदर्थं तदा नेतुं कृतोद्यमौ[1]॥ 20॥

भ्रातरौ मे त्वहं द्रष्टुं गता यो लक्ष्मणोऽनुजः।
चिच्छेद मम नासाञ्च रामो मे भ्रातरौ च तौ॥ 21॥

खरदूषणौ जघानाथ सैन्यं चापि रुषाऽवधीत्।
इति श्रुत्वा रावणस्तु गत्वा[2] मारीचिसन्निधिम्॥ 22॥

गत्वा सहायं तं नीत्वा दण्डकारण्यमागमत्।
राज्ञा सन्धर्षितो मृत्युमैच्छद्रामान्न रावणात्॥ 23॥

[3]मारीचस्स स्वर्णमृगश्चरन् सीताक्षिगोचरः।
बभूव लुलुभे तस्मिन् सीता राममचोदयत्॥ 24॥

(तं मृगं च वशीकर्तुं रामोऽधावद्धनुर्धरः।
सीतां लक्ष्मणसङ्गुप्तां त्यक्त्वा रामो मृगानुगः॥

मारीचं तं छद्ममृगं शरेणैकेन चावधीत्।
पतन् हा लक्ष्मणेत्युच्चैराजुहाव स तत्स्वरैः॥[4]

श्रुत्वा तद्वचनं सीता दुर्वाक्येनाथ लक्ष्मणम्।
तत्रैव प्रेषयामास रामसाहाय्यकारणात्॥ 25॥

अत्रान्तरे समागत्य रावणो मुनिवेषधृक्।
जहार सीतां हा राम हा लक्ष्मण निनादिनीम्॥ 26॥

अथाकाशे जनकजावाक्यं श्रुत्वा व्यलोकयत्।
जटायुर्दृष्टवान् सीतां रावणेन हृतामिति॥ 27॥

---

1. विराजते त्वदर्थं तु – आनेतुमुद्यतावुभौ – क, ख।
2. क्रधो – क।
3. हिरण्मयमुखो भूत्वा रामाश्रमं गतो बहिः। नीत्वा लक्ष्मणनामासौ रामोक्तमिव वचाह्वयत्॥ क, ख।
4. (प्रक्षिप्ताः श्लोकाः श्री कुमुदनाथेन पूरिताः।

दृष्ट्वा दाशरथेर्भक्तः सखा दशरथस्य सः।
उड्डीयाकाशगो भूत्वा रावणस्याग्रतः स्थितः॥ 28॥

उवाच वचनं क्रोधाद् गर्हयन् रावणं मुहुः।
अहो ब्रह्मकुले जातः पुलस्त्यतनयो ह्यसि॥ 29॥

अधीत्य वेदशास्त्राणि करोष्येवं जुगुप्सितम्।
ताभ्यां विनाऽश्रमे शून्ये चोरयित्वा विदेहजाम्॥ 30॥

श्वेवापहसे यज्ञभाराद्धविरिवाधमः।
अद्य त्वां सरथं वाहं निहन्म्यत्रैव न संशयः॥ 31॥

अयोधयित्वा मैवातो[1] गन्तव्यं रावण त्वया।
यद्यप्यहं जराग्रस्तो विरथोऽनायुधः खगः॥ 32॥

तथापि गन्तुं शक्नोषि नैव त्वं मयि जीवति।
इत्युक्त्वोड्डीय गगने पादाभ्यां तस्य मूर्द्धनि॥ 33॥

प्रहृत्य पातयामास मुकुटं रावणस्य सः।
पतिते मुकुटे दैत्यो जहास प्रचुकोप च॥ 34॥

विव्याध [2]पञ्चत्रिर्बाणैर्जटायुं पक्षिसत्तमम्।
अमानयित्वा तान्बाणानुड्डीय स पुनः खगः॥ 35॥

पक्षाभ्यां चरणाभ्यां च चञ्चुभ्यां युयुधे रुषा।
भूमौ निपातयामास रावणस्य रथं खगः॥ 36॥

ततश्चुकोप पौलस्त्यो विव्याध बहुभिश्शरैः।
जटायुं स तु वृद्धोऽपि युद्धान्नैव न्यवर्तत॥ 37॥

तुण्डप्रहारतो बाहुं चिच्छेद रावणस्य सः।
महदाश्चर्य्यमेतत्तु पश्यतां लोमहर्षणम्॥ 38॥

ततश्चुकोप पौलस्त्यो बाहून् स्वान्परिकल्प्य सः।
आग्नेयास्त्रेण विव्याध गृध्रराजं स रावणः॥ 39॥

सदग्धपक्षो विद्धाङ्गः पपात धरणीतले।
अर्द्धप्राणो निर्निमेषो रामागमनकाङ्क्षया॥ 40॥

---

1. नैवं ते – क, ख।
2. पत्रिभिः – ख।

तद्भक्त्या तद्विचक्षुत्वान्न ममार खगोत्तमः।
सीतां गृहीत्वा लङ्कायां जगाम स तु राक्षसः॥ 41॥

अथ रामः सह भ्रात्रा लक्ष्मणेन महात्मना।
तत्राजगाम शनकैः विचिन्वन् जनकात्मजाम्॥ 42॥

ददर्श पतितं भूमौ विन्ध्यशृङ्गमिवाध्वनि।
लक्ष्मणश्शङ्कमानस्तु गच्छन् [1]राममुवाच ह॥ 43॥

कोऽयं कबन्धवद्दुष्टः पथमाक्रम्य तिष्ठति।
तावत्तन्मुखतो रामनाम सुश्राव लक्ष्मणः॥ 44॥

रामेण सहितस्तत्र गत्वा तं पर्य्यपृच्छत।
कोऽसि कस्मादिहायातो पक्षदाहकृतोऽधुना॥ 45॥

बाणैरतिसुतीक्ष्णैश्च विद्धं केनाङ्गमस्ति ते।
इत्युक्त पक्षिराजः स करत्त्वमित्यब्रवीच्च तम्॥ 46॥

तमाह लक्ष्मणः सर्वं वनवासादिकं निजम्।
सीतान्वेषणपर्यन्तं ततो रामं निरीक्ष्य सः॥ 47॥

उवाच राम वृद्धोऽहमाग्नेयास्त्रप्रहारतः।
[2]मुमुर्षुर्नाहं शक्नोमि बहुभाषितुमक्षमः॥ 48॥

तथापि वक्ष्ये संक्षेपाच्छ्रुत्वा कुरु यथोचितम्।
जटायुर्नाम गृध्रोऽहं ख्यातस्तव पितुस्सखा[3]॥ 49॥

श्रुत्वाहं समुपागत्य तमयुध्यं यथाबलम्।
निपात्य सरथं भूमौ छिन्नास्तस्य भुजा मया॥ 50॥

ततः स तु भुजानन्यान्परिकल्प्यानलास्त्रतः।
मां निपात्य गतो लङ्कां रावणो नाम राक्षसः॥ 51॥

सीता सापि च मां दृष्ट्वा पतन्तं[4] धरणीतले।
म्रियमाणं रुरोदाथ प्रार्थयन्ती तवागमम्[5]॥ 52॥

---

1. नाम – क, ग।
2. मृयमाणो खे – क।
3. व्यातस्यापि वातुरा – ख।
4. पातितम् – ख।
5. तवास्यहम् – ख।

इत्येतत्कथितं सर्वं राम त्वं सम्मुखो भव।
पश्यन् भवन्तं चक्षुर्भ्यां त्यजाम्येतत्कलेवरम्॥ 53 ॥

इत्युक्त्वा स रुदन् रामस्तं पस्पर्श स्वपाणिना।
गृध्रो गतव्यथो रामकरस्पर्शाज्जहावसून्॥ 54 ॥

अथ रामोऽपि विलपन् जटायुं काष्ठसञ्चयैः।
दग्ध्वा दत्त्वोदकं तस्मै हत्वा चैव मृगान्वने॥ 55 ॥

मांसमादाय पक्षिभ्यो ददौ तत्प्रीतये प्रभुः।
जटायुरपि दिव्येन विमानेन ययौ दिवम्॥ 56 ॥

तं दृष्ट्वा मुनयस्सर्वे दण्डकारण्यवासिनः।
साधु साध्विति जल्पन्तः प्रशशंसू[1] रघूत्तमम्॥ 57 ॥

स्तुवन्तोऽथ जटायुं ते वदन्त्येतत्परस्परम्।
अहो यद्योगिनां योगैर्दुष्प्राप्यं रामदर्शनम्॥ 58 ॥

प्राणव्यये त्वां साक्षात्पश्यन्प्राणान् जहार खगः।
नैवं दशरथस्यापि पितुर्भाग्यमभूदसौ॥ 59 ॥

यदभूद्गृध्रराजस्य मृत्युकाले महासुखम्।
तस्माद्भक्तिर्हि जन्तूनां सर्वसौख्यप्रदायिनी॥ 60 ॥

क्व रामः क्व गृध्रोऽसौ तथाप्यस्यौर्ध्वदेहिकम्।
चकार स्वयमेवात्र भक्तिरेव हि कारणम्॥ 61 ॥

इति ब्रुवन्तो मुनयः स्वं स्वमाश्रममाययुः॥ 62 ॥

इति श्रीभगवद्भक्तिमाहात्म्ये जटायुचरितं नाम सप्तमस्सर्गः॥ 7 ॥

❊ ❊ ❊

---

1. प्रससंसूं – क, ख।

अष्टमः सर्गः

॥ अम्बरीषचरितम् ॥

अम्बरीषकथां वक्ष्ये सद्यो भक्तिविवर्द्धिनीम्।
राजर्षिरम्बरीषोऽभूदयोध्यायां महायशाः ॥ 1 ॥

विष्णुभक्तो दयायुक्तो नीतिशास्त्र[1]प्रवर्त्तकः।
यस्य देशे जनास्सर्वे बालवृद्धातुरा अपि ॥ 2 ॥

एकादश्यां निराहारा विष्णुभक्तिपरायणाः।
आसन्नृपाज्ञया मिथ्याहिंसामानविवर्जिताः[2] ॥ 3 ॥

एकदा स तु राजर्षिरेकादश्यामुपोषितः।
रात्रौ जागरणं कृत्वा प्रातः स्नात्वाथ पूजितम् ॥ 4 ॥

विष्णुं पदोपविष्टस्सस्त तदा तत्र महातपाः।
दुर्वासा बहुभिश्शिष्यैरागतो नृपवेश्मनि ॥ 5 ॥

दृष्ट्वा राजा तमायान्तं पाद्यार्च्याद्यैस्समर्च्चयन्।
उवाच किङ्करोऽहं ते साधु किं करवाण्यहम्[3] ॥ 6 ॥

इति श्रुत्वाब्रवीरद्वाक्यं दुर्वासा मुनिसत्तमः।
एकादश्यां महाराज शिष्यैस्सार्द्धमुपोषितः ॥ 7 ॥

बुभुक्षितोऽन्नं याचे त्वामिति श्रुत्वाथ भूपतिः।
अहो भाग्यमिति प्रीत्या बद्धाञ्जलिपुटो मुनिम् ॥ 8 ॥

उवाच भगवन्स्नात्वा समागच्छात्र सत्वरम्।
इति श्रुत्वा गतस्स्नातुं दुर्वासा ऋषिसत्तमः ॥ 9 ॥

राजापि पाचयामास भोज्यं सर्वरसान्वितम्।
अथान्ते समुपायातः पुरोधा नृपसन्निधौ ॥ 10 ॥

राजानमाह भूपाद्य द्वादशी यास्यति[4] द्रुतम्।
पारणं कुरु नो चेद्वै व्रतमेव निरर्थकम् ॥ 11 ॥

---

1. जानीतिमदुत्तमः – ख।
2. निन्दा पराङ्मुखाः – ख।
3. करवारापह – क, ख।
4. लास्यती – ग।

उपोष्यैकादशीं यस्तु त्रयोदश्यां च पारणम्।
कुरुते निष्फलं तस्य व्रतं तन्नयाहस्स्पृशम्॥ 12॥

इत्युक्तो नृपतिः प्राह पुरोधसमुपस्थितम्।
कथं कुर्य्यामहं[1] ब्रह्मन् पारणं मुनिसत्तम॥ 13॥

दुर्वासा अतिथिश्शिष्यैस्सहितोऽस्ति निमन्त्रितः।
स्नातुं गतस्ततस्तस्मिन् अभुक्ते मम भोजनम्॥ 14॥

कथं स्यादत्र यच्छ्रेयस्तद्ब्रवीतु भवान्मम।
इति श्रुत्वा वचस्तस्य राजर्षेस्सुपुरोहितः॥ 15॥

उवाच राजन्सत्यं तेन तावद्भोजनं हितम्।
परन्तु व्रतरक्षार्थं विष्णोः पादोदकेन तु॥ 16॥

पारणं कुरु राजेन्द्र नैवं धर्मस्तु हीयते।
इति श्रुत्वा ततो राजा किञ्चित्पादोदकं हरेः॥ 17॥

ददौ मुखेऽत्र समये समायातो महामुनिः।
दुर्वासास्तु ददर्शाथ नृपतिं कृतपारणम्॥ 18॥

चुकोप[2] च मुनिस्तत्र कोपेन स्फुरिताधरः।
राजानं भर्त्सयामास बहुधा क्रोधितो मुनिः॥ 19॥

ततो राजाञ्जलिं बध्वा क्षमापयितुमुद्यतः।
दुर्वासा दण्डमुधम्य[3] राजानं हन्तुमुद्यतः॥ 20॥

ततः कोलाहलो जातो महांस्तत्र नृपालये।
राजा कृताञ्जलिपुटस्तूष्णीं तस्थौ निजासने॥ 21॥

अथ चक्रं हरेस्तत्र रथार्थं नृपतेस्स्थितम्।
तं तु दुर्वाससं हन्तुमिवायातं तदग्रतः॥ 22॥

तं दृष्ट्वा स मुनिर्भीत्या दुर्वासाः प्रपलायितः।
राजमन्दिरतो बाह्ये समागत्य ददर्श तत्॥ 23॥

चक्रं कालानलसमं ग्रसेदेतच्चराचरम्।
ततो मुनिर्महाभीत्या ब्रह्माणं शरणं ययौ॥ 24॥

---

1. कुध्यामहम् – ख।
2. ख मध्ये लुप्तः पाठः।
3. मुन्मम्य – ख।

ब्रह्मा ज्ञात्वा तु तच्चक्रमायातमिति सत्वरम्।
स्वस्याग्रे तं समादाय वैकुण्ठं प्रययौ तदा[1] ॥ 25 ॥

तत्रापि विष्णुर्विज्ञाय ब्रह्माणं तं मुनिं तथा।
प्रोवाच भगवान्पूर्वं ब्रह्माणं शरणागतम् ॥ 26 ॥

ममाप्येतदशक्यं त्वं जानीहि कमलासन।
मयैवाज्ञापितं चक्रं प्रतिज्ञाय पुरा विधे ॥ 27 ॥

यो मे भक्तोऽस्ति भुवने भजते मामनन्यभाक्।
तं रक्ष सततं चक्र जहि त्वं [2]तज्जिघांसुकम् ॥ 28 ॥

तथाप्युपायं कुर्वेऽहं त्वमागच्छ मया सह।
एषोऽप्यागच्छतु मुनिर्गच्छामो वयमन्तिकम् ॥ 29 ॥

अम्बरीषस्य राजर्षेः स चक्रं शमयिष्यति।
ततः समागतास्सर्वे ब्रह्मविष्णुमुनीश्वराः ॥ 30 ॥

चक्रं चापि नृपद्वारि राजा तावत्तथैव सः।
आसने निवसन्नासीज्जलपानमपि त्यजन् ॥ 31 ॥

दृष्ट्वा तानम्बरीषस्तु हर्षेण महतावृतः।
पूजयामास विधिवद् ब्रह्माणं केशवं मुनिम् ॥ 32 ॥

पूजितो भगवानाह राजन्मुनिरयं मुधा[3]।
त्वां हन्तुमुद्यतस्तस्माच्चक्रं मे तव रक्षकम् ॥ 33 ॥

मुनिं हन्तुमुपाधावत्स गतो ब्रह्मसन्निधिम्।
ब्रह्माणमागतं भीतं नीत्वाहं त्वामिहागतः ॥ 34 ॥

चक्रं निवर्त्यतां[4] शीघ्रं त्वं तु भोजय तं मुनिम्।
स्वयं भुक्त्वा यथा कामं कुरु राज्यमकण्टकम् ॥ 35 ॥

एष ब्रह्मा सुरश्रेष्ठो वरं दातुं तवागतः।
ब्रूहि कं ते वरं दद्यादम्बरीष प्रियोऽसि मे ॥ 36 ॥

इति श्रुत्वा वचस्तस्य विष्णु राजर्षिसत्तमः।
उवाच वचनं भक्त्या प्रणिपत्य कृताञ्जलिः ॥ 37 ॥

---

1. सह – ख।
2. तु जिज्ञासकं – क, ख।
3. क्षुधा – ख।
4. निवर्तिताम् – क, ख।

धन्योऽहमद्य देवेश कृतार्थोऽहं न संशय: ।
अत: पुरोवर: कोऽन्यो वर्त्तते जगतीतले ॥ 38 ॥

यत्पश्याम्यागतं गेहं ब्रह्माणं त्वां नृचक्षुषा ।
तथाप्येकं वरं याचे त्वयि भक्तिर्दृढास्तु मे ॥ 39 ॥

जग्मतु: स्वं स्वं भवनमम्बरीषोऽपि तं मुनिम् ।
दुर्वाससं भोजयित्वा विसृज्य बुभुजे स्वयम् ॥ 40 ॥

अहङ्कारं विनिर्धूय सर्वं विष्णुमयं जगत् ।
पश्यन् शशास [1]पृथिवीं विष्णुभक्तिपरायण: ॥ 41 ॥

इत्येतदेकमाख्यातमम्बरीषविचेष्टितम् ॥ 42 ॥

इति श्रीभगवद्भक्तिमाहात्म्येऽम्बरीषचरितं नामाष्टम: सर्ग: ॥ 8 ॥

❊ ❊ ❊

नवम: सर्ग:

॥ अम्बरीषचरितम् ॥

अथापरं प्रवक्ष्यामि तद्भक्तिचरितं पुन: ।
यथा प्रसिद्धं लोकेऽस्ति महदाश्चर्यमुत्तमम् ॥ 1 ॥

क्वचित्कतिपयग्रामस्वामी कश्चित् स्थितो नृप: ।
तस्यैका कन्यका जाता पुत्रतोऽप्यतिहर्षदा[2] ॥ 2 ॥

स काले तनयोद्वाहे कर्म कारयितुं नृप: ।
महोत्साहात्प्रवृत्तोऽभूत्तदा सा तनयाब्रवीत् ॥ 3 ॥

पितरं त्यक्तलज्जा सा नाहमन्यं पतिं वृणे ।
अम्बरीषमृते तात सत्यमेतन्न संशय: ॥ 4 ॥

यदान्यस्मै ददासि त्वं त्यक्ष्याम्येतत्कलेवरम् ।
इति श्रुत्वा वचस्तस्या: सुताया अतिविस्मित: ॥ 5 ॥

पत्नीं प्राह सुतायास्ते कोऽयं वै मतिविभ्रम: ।
अम्बरीषो महाराज: सप्तद्वीपाधिपो महान् ॥ 6 ॥

---

1. सशाश – क, ख।
2. हर्षणा – ख।

स कथं तनयामेनां मत्तः प्रतिग्रहीष्यति[1]।
इमां वार्तामपि शुभे तदग्रे को वदिष्यति॥ 7॥

तस्माद्बोधय पुत्रीं त्वं यथा सा दुर्मतिं त्यजेत्।
इत्युक्ता सा तदा राजपत्नी पत्या पतिव्रता॥ 8॥

तनयां बोधयामास राज्ञोर्भेदादिदर्शनैः[2]।
उवाच दृढसङ्कल्पा मातरं तनया तदा॥ 9॥

तदोद्बन्धनतो मातर्मरिष्यामि न संशयः।
सत्यमेतन्न सन्देहः श्रयामि चरणौ तव॥ 10॥

इति श्रुत्वा वचस्तस्याः पुत्र्या माताऽतिविस्मिता।
निवारयामास पतिं तस्या वैवाहिके विधौ॥ 11॥

राजापि विनिवृत्तोऽभूच्चिन्तयानो दिवानिशम्।
लेभे न शर्म कुत्रापि तां मेने हृदि शल्यवत्॥ 12॥

[3]कर्णाकर्णितया चैतद्वृत्तं पौरजनैश्रुतम्।
ततोऽप्यन्यत्र निर्गच्छद् ग्रामान्तरमुपागतम्॥ 13॥

एवं परम्पराप्राप्तमम्बरीषोऽपि शुश्रुवे।
तदाम्बरीषस्तं भूपममात्यलिखिताक्षरैः॥ 14॥

[4]आनाप्योवाच तनयां देहि मे नृप सुव्रताम्।
सन्ति यद्यपि मे पत्न्यः सुरूपाश्च पतिव्रताः॥ 15॥

तथापि तव पुत्री सा मनसान्यं[5] न काङ्क्षति।
अतस्तां प्रतिगृह्णामि रक्षार्थं स्वव्रतस्य वै॥ 16॥

व्रतमेतत्तु मे राजन् यो यो मत्तो [6]यदिच्छति।
तस्मै तस्मै प्रदास्यामि शक्त्या तत्तन्न संशयः॥ 17॥

तस्माद्गच्छ स्वभवनं मुहूर्त्तं यत्सुनिश्चितम्[7]।
लिखित्वा प्रेषयाशु त्वं[8] द्रुतमेष्यामि त्वद्गृहम्॥ 18॥

---

1. गृहीष्यति – ख।
2. पद्यमिदं पं. श्री कुमुदनाथमिश्रेण पूरितम्।
3. कर्णेकन्यकया क – ख।
4. ख मध्ये लुप्तः पाठः।
5. मनोऽन्यं नाभिकांक्षिनि – क, ख।
6–7. पद्यदा भीक्षति – क, ख।
8. निश्चिकापतत् – क, ख।

इति श्रुत्वा स नृपतिस्समुत्थाय कृताञ्जलिः ।
अहो न गन्तुं भवतां योग्योऽहं दासवत्तव ॥ 19 ॥

आनयाम्यहमेवात्र सुतां तां नात्र संशयः ।
महाराज न तत्र त्वं गन्तुमर्हसि मे गृहे ॥ 20 ॥

इति श्रुत्वा वचस्तस्य प्राह राजर्षिसत्तमः ।
अहो मानापमानौ तु स्यातां लौकिककर्मणि ॥ 21 ॥

भक्तिप्रसङ्गेन च तौ कुर्वाणो नहि दोषभाक् ।
भगवान् जगतां नाथो विधिवद्यो महत्तरः ॥ 22 ॥

गणिका-गोप-शवरी-कुब्जा[1]-सङ्गरतो ह्यभूत् ।
तथेयं मयि भक्ता ते पुत्री राजन्न संशयः ॥ 23 ॥

तत्रैवागत्य तत्पाणिं ग्रहीष्यामि विधानतः ।
किं धनेनासमोऽसि त्वं धनेनाहं सुपूजितः ॥ 24 ॥

तवैव चेदृशी संपत्स्याद्भवानेव मे समः ।
कस्येयं श्रीः स्थिरा लोके को वेत्ति हरचेष्टितम् ॥ 25 ॥

तस्मान्मच्छासनं चेदमङ्गीकृत्य व्रजाशु भोः ।
इत्युक्तः क्षुद्रनृपतिर्जगाम निजमन्दिरम् ॥ 26 ॥

हर्षेण महता युक्तः पत्नीं सर्वमुवाच ह ।
उक्त्वा तस्यै निजान्बन्धूनाहूयाथ पुरोहितम् ॥ 27 ॥

निश्चित्य[2] सुमुहूर्तं सः प्रेषयामास तं द्रुतम् ।
पुरोहितं चाम्बरीषसविधे नृपतिस्तदा ॥ 28 ॥

दृष्ट्वा पत्रं स राजर्षिरम्बरीषो महामतिः[3] ।
वैवाहिकं वस्तुजातं[4] गृहीत्वा बन्धुभिर्युतः ॥ 29 ॥

जगाम वारयोषिद्भिर्वाद्यैः संनर्तकैः सह ।
तत्र गत्वा महोत्साहात्प्रतिगृह्य च तां नृपः ॥ 30 ॥

समानीय गृहान्यं[5] तु तस्यै निर्माय दत्तवान् ।
दासी दासांश्च बहुशो ग्रामानन्यस्त्रिया इव ॥ 31 ॥

---

1. प्रेषयामास – ख।
2. निश्चिता – क।
3. महात्मना – क।
4. पतिं – ख।
5. गृहेऽन्यम् – ख।

ततः सा नूतनस्त्री वै राज्ञः पूजागृहागमे।
आज्ञां गृहीत्वाथागत्य दृष्ट्वा मूर्तिं हरेरिह ॥ 32 ॥

प्रणम्य मुमुदे साध्वी स्वकर्म प्रशशंस सा।
अथ सा रात्रिशेषे तु प्रत्यहं हरिमन्दिरे ॥ 33 ॥

समागत्य च सम्मार्ज्य पूजोपकरणादिकम्।
सम्पाद्य स्वगृहं गत्वा तस्थौ सेवापरायणा ॥ 34 ॥

गत्वाथ नृपतिः पूजां कर्तुं श्रीपतिमन्दिरे।
दृष्ट्वा पूजोपकरणं सर्वं सम्पादितं स्वयम् ॥ 35 ॥

दिनद्वयं ततो राजा प्राह कोऽयं गृहे हरेः।
समागत्योपकरणं सम्पाद्य व्रजति स्वयम् ॥ 36 ॥

ततः पूजागृहस्थस्तु विप्रः प्राह नृपं मुदा।
राजस्तवैव पत्नीयं कनिष्ठा या समागता ॥ 37 ॥

सा रात्रिशेषेऽनुदिनं समागत्यात्र[1] मन्दिरे।
सर्वपूजोपकरणं सम्पाद्य व्रजति स्वयम् ॥ 38 ॥

इति श्रुत्वाम्बरीषस्तु तुतोषास्यै[2] स्वमानसे।
तां पत्नीमात्मसदृशीं मेने राजर्षिसत्तमः ॥ 39 ॥

गत्वा तद्भवनं तस्यै ददावाज्ञां प्रसन्नधीः।
समर्चय हरिं भक्त्या त्वमप्यत्रैव वेश्मनि ॥ 40 ॥

निर्मायाज्ञया[3] वेश्म दीयतेऽत्रैव ते प्रिये।
अहमप्यागमिष्यामि नित्यमत्रैव तेऽन्तिके ॥ 41 ॥

इत्युक्ता सा मुदायुक्ता प्रणनाम पतिं सती।
राजापि सर्वमकरोत्तदा सा तत्र सर्वदा ॥ 42 ॥

हरिभक्तिपरा राज्ञी[4] पतिसेवापरायणा।
पूजयामास गोविन्दं रेमे तत्रैव भूपतिः ॥ 43 ॥

ज्ञात्वैतत्प्रेम भूपस्य पत्न्योऽन्याश्च महीपतेः।
ताभिः स्व-स्वगृहे विष्णोः पूजारब्धा प्रयत्नतः ॥ 44 ॥

---

1. समागत्वा च – ख।
2. तु तोष चस्य मानसे – क, ख।
3. निर्मायगमयद्वेश्म – क, ख।
4. राज्ञो – ख।

एवं गतेषु कालेषु सा क्षुद्रनृपतेः[1] सुता।
पत्नी राज्ञोऽतिशुभगा कन्यामेकामजीजनत्॥ 45॥

नृपतिः परमप्रीत्या नामकर्मादि पुत्रवत्।
कारयामास धर्मात्मा बहुदान[2]पुरस्सरम्॥ 46॥

श्रीमतीति च नाम्ना सा पित्रा प्रख्यापिता भुवि।
सा कन्या ववृधे काले रूपेणात्यन्तसुन्दरी॥ 47॥

शीलस्वभाव[3]गाम्भीर्ये भक्त्या श्रीरिव रूपिणी।
तां दृष्ट्वा सुन्दरीं कन्यां नारदः पर्वतस्तथा॥ 48॥

अयाचतां महाराजमम्बरीषुसतां तदा।
अम्बरीषोऽब्रवीद्वाक्यं विनयादतिनम्रधीः॥ 49॥

अहो भवन्तौ याचेते कन्यैकां मम वेश्मनि।
कथं द्वाभ्यां प्रदातव्या तस्मात्किञ्चिद्ब्रवीम्यहम्॥ 50॥

स्वयम्वरेण विधिना विवाहोऽस्या भविष्यति।
यमियं[4] वरयेदेषां तस्मै दास्याम्यसंशयम्॥ 51॥

इति श्रुत्वा ततो[5] द्वौ तु नारदः पर्वतस्तथा।
गतौ पृथक् पृथक् कृष्णमूचतुः स्वमनोरथम्॥ 52॥

कृष्णाहं पर्य्यटन्भूमावपश्यं कन्यकां शुभाम्।
अम्बरीषस्य राजर्षेस्तमयाचे[6] सुतां तदा॥ 53॥

सा मामुवाच राजर्षिः स्वयम्वरविधानतः।
दास्यामि तनयामेतां यस्मै मालां प्रदास्यति॥ 54॥

इति [7]श्रुत्वाहमायातो विचार्य हृदये पुनः।
इयं तु वैष्णवी कन्या ध्यायति त्वामहर्निशम्॥ 55॥

तव रूपधरो यः स्यात्तमेव वरयिष्यति।
ततो मम शरीरं तु कुरुष्व सदृशं विभो॥ 56॥

---

1. नृपति – क, ख।
2. बहुर्धीन पुरस्सरम् – ख।
3. कालस्यभाव – ख।
4. यदायं – ख, ग।
5. तु तौ – ख।
6. तां प्रयाचे – ख।
7. ज्ञात्वा – ख, ग।

इति प्रत्येकमेवोभौ भगवन्तं समूचतुः ।
भगवान् प्रददौ ताभ्यां शरीरं स्व–समं पुनः ॥ 57 ॥

मुखं वानरतुल्यं तु जातमद्भुतमेतयोः ।
अथ स्वयम्वरे तस्याः समायातावुभावपि ॥ 58 ॥

भगवानपि तद्भक्त्या भूत्वा च मनुजाकृतिः ।
कोटिकामप्रतीकाशः श्यामः कमललोचनः ॥ 59 ॥

युवा सर्वाङ्गसु[1]भगस्तत्रागत्य स्थितोऽभवत् ।
अथ सा नृपतेः कन्या श्रीमती विष्णुतत्परा ॥ 60 ॥

मालां गृहीत्वा सदसि समायातातिहर्षिता ।
दृष्ट्वा तं [2]भगवन्तञ्च साक्षाद्विष्णुं नराकृतिम् ॥ 61 ॥

प्रणम्य मनसा मालां तस्य कण्ठे न्यवेशयत् ।
ततो जयाशिषां नादस्तुमुलः समपद्यत ॥ 62 ॥

प्रतिगृह्य च तां कन्यामागतो भगवान्हरिः ।
ततस्तावपि तं ज्ञात्वा भगवन्तं सनातनम् ॥ 63 ॥

स्वमुखं वानरस्याभं ज्ञात्वा देवस्य मायया ।
तत्र गत्वाब्रवीत् क्रुद्धो नारदो विष्णुमप्रियम् ॥ 64 ॥

छलयित्वा तु मामेतां यथा त्वं हृतवानसि ।
तथा तवापि छलतः कान्तामपहरिष्यति ॥ 65 ॥

कोऽपि[3] दैत्यो न सन्देहः पुनश्शृणु वदाम्यहम् ।
यन्मे मुखं वानराभं कृतवानसि मे प्रभो ॥ 66 ॥

भवानपि सखा भूत्वा वानरस्य कियद्दिनम् ।
तत्साहाय्यं काङ्क्षमाणो निवसिष्यसि भूतले ॥ 67 ॥

इत्येवं वचनं तस्य श्रुत्वा स भगवान्हरिः ।
शान्तपूर्वमुवाचेदं नारदाय महात्मने ॥ 68 ॥

अहो नारद सत्यं ते भाषितं नात्र संशयः ।
भविष्यति ममाप्येतद्भाविकार्यस्य गौरवम् ॥ 69 ॥

---

1. शुभगः – ख ।
2. भगवद्भक्तम् – ख, ग ।
3. कश्चन – ख, ग ।

एषाम्बरीषतनया वव्रे मां पतिमुत्तमा।
मातृवक्त्राच्छ्रुतवती ध्यायन्ती मामहर्निशम्॥ 70॥

अतो न योग्या युवयोर्विचार्य्यैवं कृतं मया।
क्षन्तव्यं तद्युवाभ्यां मे पूर्ववद्वपुरस्तु वाम्॥ 71॥

इति श्रुत्वा तुष्टवतुः प्रसन्नौ मधुसूदनम्[1]।
अर्चतुर्नाथ ते मायां न वै ज्ञातुमिहेश्वरः॥ 72॥

कोऽप्यस्ति त्रिषु लोकेषु प्रसन्नो भव सर्वदा[2]।
समर्च्य तौ तदा देवं मुनी जग्मतुरालयम्॥ 73॥

भगवानपि वैकुण्ठे रेमे पत्न्या तया सह।
इत्येतत्कथितं सर्वमम्बरीषस्य चेष्टितम्॥ 74॥

महदाश्चर्यभूतं च हरिभक्तिप्रदायकम्।
श्रुत्वैतत्परमाख्यानं संकष्टान्मुच्यते नरः॥ 75॥

सर्वान्कामानवाप्नोति विष्णुभक्तिप्रसादतः[3]॥ 76॥

इति श्रीभगवद्भक्तिमाहात्म्येऽम्बरीषचरितं नाम नवमः सर्गः॥ 9॥

❊ ❊ ❊

दशमः सर्गः

॥ विदुरस्त्रीचरितम्॥

विदुरस्त्रीकृतां भक्तिं वक्ष्येऽहं शृणु भक्तितः।
एकदा विदुरे जाते क्वचिन्निजगृहादथ॥ 1॥

विदुरस्त्री गृहे नग्ना कुर्वती स्नानमादरात्।
अथान्तरे समायातः कृष्णो द्वारि समाह्वयत्॥ 2॥

विदुरोऽस्ति गृहे वेति श्रुत्वा सा विदुरप्रिया।
तथैवोत्थाय दुद्राव गता कृष्णस्य सन्निधौ[4]॥ 3॥

---

1. इति श्रुत्वा प्रसन्नो तुतुष्टर्वुमधुसूदनम् – ख।
2. ख मध्ये लुप्तपाठः।
3. प्रदायकः – ख।
4. सन्निधिः – ख।

आगच्छायाति सोऽप्यत्रेत्युक्त्वा धृत्वा करं हरेः।
निनाय भवने सा[1] तु विस्तृतात्मकलेवरा॥ 4॥

श्रीकृष्णदर्शनौत्सुक्यादुन्मत्तेवाभवत्सती।
ततः पीताम्बरं कृष्णो ददौ तदुपरि स्वकम्॥ 5॥

उवाच तां ततः कृष्णो भोज्यं चेदस्ति देहि मे।
ततोऽतिहर्षात्तद्वस्त्रवेष्टिता कदलीफलम्॥ 6॥

समादायोपविष्टाग्रे भोजयामास केशवम्।
रम्भाफलत्वचं नीत्वा भोजनाय ददौ करे॥ 7॥

फलं तत्याज भूमौ सा बुभुजे भगवान्स्वयम्।
अस्मिन्नेव मुहूर्ते तु विदुरः समुपागतः॥ 8॥

ददर्श तां प्रियां भार्यां कृष्णपीताम्बरावृताम्।
भोजयन्ती त्वचं कृष्णं त्यजन्ती तत्फलं पुनः॥ 9॥

उवाच तां महोद्विग्नः पत्नीं निर्भर्त्सयन्मुहुः।
अरे फलत्वचं कस्मात्कष्टं भोजयसि प्रभुम्॥ 10॥

इदं पीताम्बरं चास्य कुतः परिदधासि च।
इत्युक्त्वा तु बुबोधाथ जगर्हात्मानमात्मना[2]॥ 11॥

उत्थायान्तर्गृहे गत्वा परिधाय स्ववाससी।
पीताम्बरं ननामाथ शिरस्याधाय सा मुहुः॥ 12॥

अथ कृष्णाय विदुरो ददौ तत्फलमुत्तमम्।
दूरीकृत्य त्वचं पश्चात्पप्रच्छ मधुरन्नवा॥ 13॥

ततः कृष्णोऽब्रवीत्प्रेम्णा न त्वचा सदृशं फलम्।
इत्युक्त्वा तां जुहावाथ विदुरस्त्रीं हसन् प्रभुः॥ 14॥

नायाति लज्जिता गेहात्प्रार्थयन्ती हरिं मुहुः।
एकदा पाण्डवार्थं तु श्रीकृष्णो हस्तिनापुरे॥ 15॥

---

1. या – क. ख।
2. लमात्मना – क।

दुर्योधनगृहे नीतिं वक्तुं तं[1] समुपागतः ।
ततो न स्वीचकाराथ कृष्णोक्तं धृतराष्ट्रजः[2] ॥ 16 ॥

एवं कथाप्रसङ्गेन मध्याह्नः समुपागतः ।
दुर्योधनगृहे पाकशालायां भोजनाय वै[3] ॥ 17 ॥

श्रीकृष्णं प्रार्थयामासुः कुरवोऽविनयान्विताः ।
धृतराष्ट्रोऽपि बहुधा कृष्णं प्राहातिलज्जितः ॥ 18 ॥

भुक्त्वा गच्छ महाबाहो तव तुल्या वयं च ते ।
इत्युक्तो भगवानाह सत्यमुक्तं त्वया नृप ॥ 19 ॥

परन्तुं यो निसम्बन्धान्न च प्रीत्या न धर्मतः ।
प्रीतिभोज्यानि चान्नानि आपद्भोज्यानि[4] चापरम् ॥ 20 ॥

न च त्वं प्रीयसे राजन्नहि चापद्गता वयम् ।
इत्युक्तो धृतराष्ट्रस्तु सर्वेऽन्ये कुरवस्तथा ॥ 21 ॥

तूष्णीं स्थिता स्वकर्माणि स्मृत्वा किञ्चिन्न चाब्रुवन् ।
तत उत्थाय भगवान् विदुरस्य गृहं गतः ॥ 22 ॥

तमाह विदुरं भक्तं श्रीकृष्णो भक्तवत्सलः ।
बुभुक्षितोऽहं भोक्तुं मे देहि यद्यस्ति किञ्चन ॥ 23 ॥

इत्युक्तो विदुरो भक्त्या सपत्नीकोऽतिहर्षितः ।
स्वार्थं पक्वा शाकमात्रं दारिद्र्याद्भोक्तुमद्यतः ॥ 24 ॥

एतस्मिन्नन्तरे कृष्णः समागत्येदमब्रवीत् ।
ततोऽतिहर्षात्संस्कृत्य स्थलं तत्र पुरातनम् ॥ 25 ॥

काष्ठपीठं निधायाथ भगवन्तमुवाच ह ।
अद्य मे शाकमात्रं तु जातमस्ति जनार्दन ॥ 26 ॥

---

1. स – क।
2. राष्ट्रतः – क, ग।
3. ते – ख।
4. यावद् – ख, स्वापद् – क।

कथं तव च दास्यामि भोक्तुं तिष्ठ क्षणं ततः।
उत्तमान्नं साधयामि ततो भोक्ष्यसि[1] माधव ॥ 27 ॥

ततः स भगवाञ्शीघ्रमुत्थायेति वदन्हसन्।
अहो शाकप्रियं मां त्वं न जानासि विशेषतः ॥ 28 ॥

तव शाको भक्तिपूर्वं दत्तोऽयममृतायते।
न त्वभक्त्यान्नकूटः स्यात्कृतः सर्वरसः प्रियः ॥ 29 ॥

इत्युक्त्वा जलमादाय प्रक्षाल्य चरणौ हरिः।
गत्वा मन्दिरमध्ये तु पीठे समुपविष्टवान् ॥ 30 ॥

विदुरस्त्री तदा प्रेम्णा पत्रे शाकं निधाय सा।
कृष्णाग्रे स्थापयामास भक्त्या हर्षाश्रुमालिनी ॥ 31 ॥

तदा स बुभुजे शाकं भगवान्भक्तवत्सलः।
भुक्त्वा तृप्तिं गतोऽस्म्यद्य[2] महतीमिति चासकृत् ॥ 32 ॥

वदन्नुत्थाय हस्तौ च प्रक्षाल्य विदुरः स च।
पूगीफलस्य खण्डानि ददौ तन्मुखशुद्धये ॥ 33 ॥

विसृज्य भगवन्तं तं सस्त्रीको विदुरो महान्।
कृष्णभुक्तावशिष्टं यदुच्छिष्टं बुभुजे स्वयम् ॥ 34 ॥

एवं प्रभावो भक्तेस्तु दृश्यतेऽस्मिन्युगे युगे।
क्व च त्रैलोक्यनाथोऽसौ कृष्णो लक्ष्मीपतिः स्वयम् ॥ 35 ॥

क्व च शाकाशनं चात्र भक्तिरेव हि कारणम् ॥ 36 ॥

इति श्रीभगवद्भक्तिमाहात्म्ये विदुरस्त्रीचरितं नाम दशमः सर्गः ॥ 10 ॥

❊ ❊ ❊

---

1. भोक्षसि – क।
2. ख मध्ये लुप्तः पाठः।

एकादशः सर्गः

॥ सुदामाचरितम् ॥

सुदाम्नो भक्तिमाहात्म्यं वक्ष्ये सर्वमनोरमम्।
यच्छ्रुत्वा भक्तिमाप्नोति निर्धनो धनमाप्नुयात्॥ 1 ॥

द्वारिकायाः समीपे तु सुदामा नाम वै द्विजः।
सर्वशास्त्रस्य तत्वज्ञः सदा सत्कर्मतत्परः॥ 2 ॥

परन्तु कर्मदोषेण ब्राह्मणोऽति स निर्धनः।
प्रत्यहं भोजनमपि यस्य गेहेऽस्ति दुर्लभम्॥ 3 ॥

अयाचित व्रतेनैव तथापि विजयी द्विजः।
एकदा तस्य पत्नी तु कृशानाहारतः सती॥ 4 ॥

वासः परिदधाना तु जीर्णं च [1]शतखण्डितम्।
उवाच पतिमत्यर्थं पीडिता क्षुधया पुनः॥ 5 ॥

[2]नाथाकार्याण्यपि कृत्वा भर्तव्यानां तु पोषणम्।
कर्तव्यमिति शास्त्राज्ञा त्वत्तश्श्रुतवती ह्यहम्॥ 6 ॥

त्वमिदानीं शरीरं स्वं मां चैवातीव दुर्बलाम्।
अनाहारात्कथं नैव जानासीत्यद्भुतं महत्॥ 7 ॥

इति श्रुत्वा वचस्तस्याः प्रियायाः करुणान्वितम्।
उवाच सत्यमेतत्त्वं भाषसे नात्र संशयः॥ 8 ॥

जानाम्यवश्यं ते तन्वि स्वशरीरस्य चाप्यहम्।
परन्तु नैव पश्यामि तं यो दद्याद्धनं[3] हि नः॥ 9 ॥

अयाचित्वव्रतं चैव त्यक्तुं नोत्सहेते मनः।
इत्युक्ता सा पुनः प्राह पतिं प्रेमान्वितं हितम्॥ 10 ॥

एकस्मिन् दिवसे त्वं तु मामलोचत्कथान्तरे।
वसुदेव सुतः कृष्ण उज्जयिन्यां[4] गुरोर्गृहे॥ 11 ॥

यदापाठीत्तदा तेन सहापाठी मयाप्यहो।
स सर्वेभ्योऽधिको यातो विद्यया च बलेन च॥ 12 ॥

---

1. शतखण्डं च जरन्तरम् – ख।
2. नाथाकार्य्या शतं – ख, क।
3. सर्वत्र लुप्तः पाठः।
4. दीपिनेर्गुरो – ख।

आनीयाब्धौ मृतं पुत्रं गुरवे दक्षिणामदात्।
इदानीं द्वारकायां च राजा जातो महाधनः ॥ 13 ॥

दीनानाथगणेभ्यस्तु ददाति[1] धनमीप्सितम्।
इति त्वन्मुखतो नाथ श्रुतमस्ति मया पुरा ॥ 14 ॥

तस्मात्तत्रैव गच्छ त्वं स ते दास्यति पुष्कलम्।
इति तस्या वचश्श्रुत्वा सुदामा प्राह[2] तां प्रियाम् ॥ 15 ॥

सत्यमुक्तं त्वया भद्रे यामि तत्र न संशयः।
परन्तु स तथैश्वर्य्यं प्राप्य द्रक्ष्यति मां किमु ॥ 16 ॥

तथापि यामि किं तस्मै दास्यामि परितोषकम्।
विचार्य न तु गेहेऽस्ति किञ्चित्तद्वस्तु सम्प्रति ॥ 17 ॥

इत्युक्त्वा सा तदा छिन्नशालिक्षेत्रे गता सती।
उच्छवृत्त्याथ धान्यानां विचित्य[3] सेटकार्द्धकम् ॥ 18 ॥

आनीय पृथुकं तस्य निर्ममे स्वकरेण सा।
ततः कस्मिन् पटे बध्वा दास्याम्येतद्विचित्य सा ॥ 19 ॥

परीक्ष्य हस्तमात्रं तु यत्रासीत्स्वपटो दृढः।
तं गृहीत्वा तु तत्रैव बध्वा तान्पृथुकान्सती ॥ 20 ॥

ददौ पत्यै[4] गृहीत्वेदं गच्छ यत्रास्ति ते सखा।
इत्युक्तस्स गृहीत्वा तं सुदामा पृथुकं ययौ ॥ 21 ॥

गतो द्वारवतीं तत्र क्व गच्छामीति चिन्तयन्।
सर्वे समाना दृश्यन्ते प्रासादाः पर्वतोपमाः ॥ 22 ॥

द्वारि सर्वत्र तिष्ठन्ति द्वारपाला गृहे गृहे।
कथं गन्तु प्रदास्यन्तीत्येवं हृदि विचिन्तयत् ॥ 23 ॥

गच्छन्सम्प्राप्य श्रीकृष्णगृहद्वारिं सदैव तम्।
दृष्ट्वा तान् द्वारपालांस्तु तेजसा प्रष्टुमक्षमः ॥ 24 ॥

तूष्णीं स्थित्वा सुदामा तु पप्रच्छुस्ते तमादरात्।
दृष्ट्वा दरिद्रं विकलं वस्त्रखण्डावृतं कटौ ॥ 25 ॥

---

1. ददाविं धनमीक्षितम् – ख।
2. त्राह – ख।
3. विचिन्त्यसे ढकार्द्धकम् – क, ख।
4. ख मध्ये लुप्तपाठः।

विचारयन्तो नैवेदृक् कोऽप्यत्रास्ति नरः पुरे[1]।
किं पुनर्ब्राह्मणः कस्मादकस्मादेष आगतः ॥ 26 ॥

सञ्चिचन्त्य मनसा चैवं तमाहुर्द्वारपालकाः।
को भवान्कुत आयाति किं वात्रास्ति प्रयोजनम् ॥ 27 ॥

इति विज्ञाय भवता ध्रुवं विज्ञाप्यते प्रभुः[2]।
इति श्रुत्वा वचस्तेषां विनयेन समन्वितम् ॥ 28 ॥

[3]अन्तस्तुतोष श्रीकृष्णो नासौ धनमदान्वितः।
यस्य भृत्या द्वारपाला एवं विनयवादिनः ॥ 29 ॥

इत्युक्त्वा मनसा तेभ्य उवाचमुदितो द्विजः।
अहो सुदामा नाम्नाहं सखा कृष्णस्य वै द्विजः ॥ 30 ॥

द्रष्टुमिच्छामि तं मित्रमेवमत्र मनोरथः।
इति श्रुत्वाथ ते सर्वे मनसैतदसम्भवम् ॥ 31 ॥

मत्वामन्यन्त को वेद चेष्टितं जगतीपतेः[4]।
दीनानाथजने प्रेम तस्यात्यर्थं हि दृश्यते ॥ 32 ॥

वयं विज्ञापयामस्तं[5] तस्याज्ञैषा हि वर्तते।
दीनो वा दुःखितो वापि परसन्तापितोऽथवा ॥ 33 ॥

विज्ञाप्यस्तत्क्षणादेव नापेक्ष्यः [6]समयोऽत्र भोः।
इति निश्चित्य मनसा तेषां मध्ये जरन्तरः ॥ 34 ॥

गत्वान्तःपुरमध्ये तु गृहाद्बाह्ये स्थितोऽब्रवीत्।
जयशब्दं समुच्चार्य्य नमस्कृत्य कृताञ्जलिः ॥ 35 ॥

देव देवागतो द्वारि द्विजोऽतिनिर्धनः प्रभो।
उक्तवानस्ति मित्रं मे श्रीकृष्णस्तं प्रदर्श्य ॥ 36 ॥

नाम्ना सुदामेत्येत्तु श्रुत्वा वै तत्क्षणात्प्रभुः।
स्थितः पर्यङ्कशयने पद्मया लालिताङ्घ्रिकः[7] ॥ 37 ॥

---

1. विचारयं जानैदृग्वै कोऽप्यस्ति नरः – क, ख।
2. पद्यमिदं श्रीकुमुदनाथेन पूरितम्।
3. हृष्टः – ख।
4. जयतीपतेः – क, ख।
5. मणम् – ख।
6. नापेक्षः – ख।
7. पद्यया लालितः पदोः–ख।

अर्द्धे निमीलिताक्षस्तु तदा स सुखनिद्रया।
श्रुत्वा तस्य वचः शीघ्रं क्व सुदामा सखा मम॥ 38॥

वदन्नेवं मुर्हुद्वारि समायातो द्रुतं हरिः।
दृष्ट्वा तं स समाश्लिष्य गृहीत्वा पाणिना करम्॥ 39॥

निनायान्तःपुरे तत्र निवेश्य स्वासनोत्तमे।
पद्मे समानय जलं पादौ प्रक्षालयाम्यहम्॥ 40॥

इति श्रुत्वा महालक्ष्मी रुक्मिणी रूपधारिणी।
आनीय स्वर्णशृङ्गारं पादौ धृत्वा प्रणम्य सा॥ 41॥

लालयामास कृष्णस्तु भृङ्गारेण ददौ जलम्।
विपादिकाभिः खिद्याभ्यां कुञ्चिकाभ्यां च रुक्मिणी॥ 42॥

कोमलाभ्यां कराभ्यां सा पादौ प्रक्षाल्य यत्नतः।
स्वाञ्चलैः पादसंलग्नं जलं सम्प्रोक्ष्य मूर्द्धनि॥ 43॥

[1]सिषेच तत्पादजलं भक्त्या कृष्णस्तु तं द्विजम्।
उपवेश्य [2]स्वर्णपर्य्यङ्के सुदामानमुवाच ह॥ 44॥

अहो ददौ मदर्थं यन्मह्यं साथ प्रजावती।
तद्देहि मे सखे पूर्वं पश्चाद्वार्ता भविष्यति॥ 45॥

इत्युक्तः सोऽपि सङ्कोचात्पृथुकान्नं निगूह्य च।
स्थितस्तदा हरिर्हस्ताद्बलेन स्वयमाददे॥ 46॥

चीरे बद्धं तु निष्कास्य प्रशशंस मुहुर्मुहुः।
मुष्टिमेकं मुखे दत्वा बुभुजे भगवान्स्वयम्॥ 47॥

पुनर्गृहीतुमुद्युक्तो रुक्मिणी तं न्यवारयत्।
सुदामानमथोवाच वृत्तान्त गुरुवेश्मनः॥ 48॥

स्मरसि त्वं सखे तत्र चेन्धनार्थं गता वयम्।
इन्धनानि गृहीत्वा वामागतौ कुपथे [3]तदा॥ 49॥

समागतातिवृष्टिर्वै ज्ञात्वा वां वनगौ गुरुः।
कृपया स्वयमायातः [4]पश्यावां द्रष्टुकामुकः॥ 50॥

---

1. शिषे च।
2. स्व – ख।
3. सर्वत्र लुप्तपाठः।
4. सर्वत्र लुप्तपाठः।

समागत्य स्थितश्चावां दृष्ट्वाऽभूत्प्रीतिमान्गुरुः।
गृहीत्वावां ततो गत्वा गृहे स प्रत्यषेधत॥ 51॥

अद्यारभ्य न गन्तव्यं भवद्भ्यामिन्धनाय भोः।
इत्यादीनि विचित्राणि सुखान्यासन् गुरोः कुले॥ 52॥

एवं संस्मृत्य सम्भाष्य भोजयित्वा विसर्जितः।
सुदामा हरिणा चाथ द्वारावत्याः[1] स निर्गतः॥ 53॥

चिन्तयामास मार्गे स श्रीकृष्णचरितं सुधीः।
अहो एवं महाह्लादं कृत्वा यन्न ददौ धनम्॥ 54॥

तन्मे धनमदश्चेत्स्याद् ज्ञात्वोपकृतवान्हरिः।
एवं निश्चित्य मनसा समागत्य निजं पुरम्॥ 55॥

नापश्यत्स्वकुटीं तत्र प्रासादं गिरिसन्निभम्।
ददर्श राजवेश्माभं द्वारि द्वारस्थै[2] सुरक्षितम्॥ 56॥

सुवर्णयष्टिहस्तैश्च, भृत्यैश्चेतस्ततः पुनः।
शिक्ष्यन्तेऽन्ये च भृत्या वै दानमानकृतेऽतिथेः॥ 57॥

एवं दृष्ट्वा सुदामाथ प्रासादं दिक्षु[3] सर्वशः।
दिशो बभ्राम चिन्तार्तो न लेभे स्वकुटीं तदा॥ 58॥

अट्टालिकायां तत्पत्नी स्थिता तं सा ददर्श ह।
स्वर्णयष्टिधरान्प्राह तं द्विजं शीघ्रमानय॥ 59॥

इत्युक्तास्ते गतास्तूर्णं सुदामानं बभाषिरे।
समागच्छ द्विजश्रेष्ठ राज्ञी त्वां द्रष्टुमर्हति॥ 60॥

एवमुक्तः सुदामा तु चकम्पे भयविह्वलः[4]।
उवाच तानहो किं मे दर्शनेन करिष्यति॥ 61॥

राज्ञामन्तःपुरे नैव गन्तव्यं विदुषा सदा।
एवं वदन्तं तस्मात्तं निःसरन्तं शनैः शनैः॥ 62॥

गृहीत्वा विनयाद्दूतास्तत्पत्नी निकटे ययुः।
दृष्ट्वा तं सा समुत्थाय एहि कान्तेति भाषिणी॥ 63॥

---

1. द्वारावत्याः – क।
2. द्वास्थै – ख।
3. स्व च सर्वशः – क, ख।
4. विह्वलः – ख।

जग्राह तं करेणाथ स्वासने सन्निवेश्य तम्।
उवाच कृष्णचरितमेतत्सर्वं तवैव भो ॥ 64 ॥

श्रुत्वा तद्वचनं तस्या[1]स्स्वस्थचित्तोऽभवत्तदा।
उवाच द्वारकायां यत्कृष्णेनाह्लादितः स्वयम् ॥ 65 ॥

पादप्रक्षालनं देव्या रुक्मिण्या भक्तिपूर्वकम्।
पृथुकान्नस्य कृष्णेन भोजनं चान्यदप्यहो ॥ 66 ॥

उक्त्वा[2] स्नात्वा परीधाय पीताम्बरमनुत्तमम्।
पत्न्यालङ्करणैस्सर्वैर्भूषितश्श्रीहरं स्मरन् ॥ 67 ॥

संपूज्य तं महाभक्त्या भोजयित्वा द्विजातिथीन्।
दीनानाथगणानन्यान्संतर्प्य बुभुजे स्वयम् ॥ 68 ॥

यावज्जीवं तया पत्न्या कृष्णनाम जपन्द्विजः।
अवाप्य पुत्रपौत्रादीन्सर्वभोगसमन्वितः ॥ 69 ॥

अन्ते जगाम सान्निध्यं कृष्णस्य परमात्मनः।
इति संक्षेपतः प्रोक्तं सुदामचरितं मया ॥ 70 ॥

श्रुत्वैतद्भक्तिपूर्वं तु निर्धनो धनवान् भवेत्।
भक्तिं च लभते कृष्णे मृतो याति परं पदम् ॥ 71 ॥

इति श्रीभगवद्भक्तिमाहात्म्ये सुदामाचरितं नामैकादशः सर्गः ॥ 11 ॥

❊ ❊ ❊

द्वादशः सर्गः

॥ चन्द्रहासचरितम् ॥

चन्द्रहासकथां वक्ष्ये महाश्चर्य्यप्रदायिनीम्।
यां श्रुत्वा मनुजो भक्तिं श्रीकृष्णे लभते दृढाम् ॥ 1 ॥

आसीत्पुरा महीपालो धृष्टद्युम्न इति श्रुतः।
तस्य राज्यसमीपे तु ग्रामाधीशस्ततो नृपः ॥ 2 ॥

---

1. स्वस्यचिंतोऽभवत्तदा – क, ख।
2. सर्वत्र लुप्त पाठः।

तस्यैकस्तनयो जातश्चन्द्रहासेति नामतः।
तस्य वै पञ्चमे[1] वर्षे शत्रुणा निहतः पिता॥ 3॥

गृहीतं ग्रामनिचयं पत्नी तस्य शुचिव्रता।
चन्द्रहासं सुतं नीत्वा प्राणत्राणपरायणा॥ 4॥

धृष्टद्युम्नपुरं प्राप्ता गता सचिववेश्मनि।
सचिवस्तां तु सम्मान्य निवासार्थं ददौ गृहम्॥ 5॥

सा तस्मिन् भवने नित्यं चन्द्रहासेन संयुता।
वसन्तो पतिशोकार्ता सस्मार हरिमीश्वरम्॥ 6॥

चन्द्रहासः [2]सुतस्तस्याः पुत्रेण सचिवस्य तु।
चिक्रीडेऽहर्निशं तस्मै चन्द्रहासाय वैष्णवः॥ 7॥

कोऽप्यागत्य ददौ स्वल्पां शालग्रामशिलां शुभाम्।
तां शिलां स शिशुर्भक्त्या गृहीत्वा स्वमुखे न्यधात्॥ 8॥

अन्यत्र चोरशङ्कातो न विश्वस्तो बभूव ह।
भोजनेऽन्नं समर्प्याथ परिधानीय वाससी॥ 9॥

बध्वा संस्थाप्य बुभुजे सर्वदैव व्रतं शिशोः।
एकदा क्रीडयायुक्तश्चन्द्रहासश्शिशुर्मुदा॥ 10॥

मन्त्रिपुत्रेण साकं तु गतवान् राजसन्निधौ।
तत्र वेदविदो विप्रास्सामुद्रिकविचक्षणाः॥ 11॥

निमन्त्रिताः समायाता धृष्टद्युम्नेन वै तदा।
अब्रुवन्भूपतिं सर्वे चन्द्रहासं निरीक्ष्य ते॥ 12॥

अहोऽयं बालको राजन्भविष्यति पराक्रमी।
जामाता तु तवैवायं भविष्यति[3] न संशयः॥ 13॥

भाग्यवान्धनसम्पन्नो राजा भवितुमर्हति।
इति श्रुत्वा वचस्तेषां विप्राणां सर्वभूपतिः॥ 14॥

तूष्णीं स्थितो भोजयित्वा ब्राह्मणान् विससर्ज ह।
ततश्चिन्तापरो राजा विप्रवाक्यमनुस्मरन्॥ 15॥

---

1. लुप्तपाठः – ख।
2. लुप्तः क।
3. भविष्यति – ख।

मनसा तस्य हनने निश्चयं कृतवान्नृपः ।
चाण्डालं तु समाहूय प्राहैकान्तर्गतो नृपः ॥ 16 ॥

इत्युक्तो धृष्टद्युम्नेन चाण्डालस्तमथो द्रुतम् ।
प्रतार्य वनमध्ये तु निन्ये मारयितुं शिशुम् ॥ 17 ॥

चन्द्रहासं तु तं बालं नीत्वा वै काननान्तरे ।
जहि शीघ्रं प्रत्ययार्थं तस्य किञ्चित्प्रदर्शय ॥ 18 ॥

शालग्रामशिला भक्तेर्माहात्म्याद्भगवानन्हरिः ।
चाण्डालाय ददौ बुद्धिं सात्विकीं शिशुरक्षणे ॥ 19 ॥

अहोऽयं बालकोऽनाथो मातास्य शरणागता ।
मृते पत्यौ धृष्टद्युम्नः सः कथं हन्तुमिच्छति ॥ 20 ॥

अहं तु नैव हन्म्येनं बालकं शुभदर्शनम् ।
परन्त्वस्याङ्गुलीमेकां प्रत्ययाय नृपस्य[1] च ॥ 21 ॥

छित्वा नेष्यामि नगरे दर्शयिष्यामि तं नृपम् ।
इति सञ्चिन्त्य मनसा पाणौ षष्ठीं स्थिताङ्गुलिम् ॥ 22 ॥

छित्वा समागतो राज्ञे चाण्डालस्तामदर्शयत् ।
दृष्ट्वा राजाङ्गुलीं चित्ते मृतोऽयमित्यमन्यत ॥ 23 ॥

अथ तं बालकं दीनं रुदन्तं गहने वने ।
हरिण्यः पक्षिणश्चैव ररक्षुस्समुपेत्य[2] ते ॥ 24 ॥

अथान्तरे नृपः कश्चित्तत्रैव मृगयां चरन् ।
आगत्य दृष्ट्वा तं बालं रुदन्तं गहने वने ॥ 25 ॥

दृष्ट्वा पप्रच्छ कोऽसि त्वं कथमत्रागतश्शिशो[3] ।
श्रुत्वा तद्राजवचनं बालः प्रोवाच भूपतिम् ॥ 26 ॥

न जाने कस्य पुत्रोऽहं धृष्टद्युम्नस्य मन्त्रिणः ।
गृहे वसन्निहानीतः केनापि रिपुणा वने ॥ 27 ॥

षष्ठीं कराङ्गुलीं छित्वा स गतः कुत्रचिन्नृपः ।
जानाम्येतदहं राजन्नान्यज्जानामि कञ्चन ॥ 28 ॥

---

1. तु अस्य – क. ग।
2. समुद्येत्य तं – ख।
3. शिशुः – ख, ग।

इति श्रुत्वा[1] वचस्तस्य बालस्य स महीपतिः ।
मनसा प्राह बालोऽयं सम्यग्वदति निर्भयः ॥ 29 ॥

अतोऽयं कस्यचिद्राज्ञः[2] पुत्रो नास्त्यत्र संशयः ।
अहमेनं नयाम्यद्य पुत्रवत्पालयामि च ॥ 30 ॥

न मेऽस्ति पुत्रो बालोऽयं पुत्रो भवितुमर्हति ।
निश्चित्यैवं तु मनसा तं बालं लालयन्मुदा ॥ 31 ॥

आरोप्य शिबिकायां तु निनाय स्वगृहं नृपः ।
तत्र पत्न्यै ददौ बालं पुत्रोऽयं प्रतिपाल्यताम् ॥ 32 ॥

इति श्रुत्वा वचो राज्ञी दृष्ट्वा बालं मुमोद सा ।
पालयामास सततं भोजनाच्छादनादिभिः ॥ 33 ॥

अथ कालेन तत्रैव चन्द्रहासो युवाभवत् ।
सर्वाङ्गसुन्दरश्शूरस्साक्षात्काम इवापरः ॥ 34 ॥

धृष्टद्युम्नश्च श्रुत्वा तं तस्य राज्ञो निवेशने ।
सचिवं प्रेष्य तेनाथ कृत्वा सन्धिं च तत्सुतम् ॥ 35 ॥

चन्द्रहासं समानीय दृष्ट्वा राजातिचिन्तितः ।
अथैनं छलतो हन्मीत्येवं कृत्वा तु निश्चयम्[3] ॥ 36 ॥

चन्द्रहासाय पत्रं तु लिखित्वा प्रददौ स्वयम् ।
धृष्टद्युम्नः स्थितोऽन्यत्र स्वगृहाद्राज्यकार्यतः ॥ 37 ॥

मदनाय स्वपुत्राय पत्रं स्वयमलीलिखत् ।
स्वस्ति श्रीत्यादि संलिख्य वृत्तान्तं तदनन्तरम् ॥ 38 ॥

विषमस्मै प्रदातव्यं दर्शनादेव तत्क्षणात् ।
इत्येवमलिखद्राजा मुद्रयित्वा ततः पुनः ॥ 39 ॥

ददौ च चन्द्रहासाय त्वं गच्छ मम वेश्मनि ।
मदनाय सुतायै तत्पत्रं देहि रहस्यहो ॥ 40 ॥

पत्रं दृष्ट्वा स तेऽभीष्टं करिष्यत्यविचारयन् ।
इति श्रुत्वा वचस्तस्य धृष्टद्युम्नस्य स द्रुतम् ॥ 41 ॥

---

1. इति केनानेन – क।
2. दासः – क।
3. निश्चितम् – ख।

जगाम राजनगरे मध्याह्नात्परतो दिने।
तावत्तु मदनो भुक्त्वा सुष्वापान्तःपुरे गतः ॥ 42 ॥

चन्द्रहासो नृप द्वारि ज्ञात्वा स सुप्तवानिति।
[1]तावत्तत्पुष्पवाट्यां तु विशश्रामाश्रमातुरः ॥ 43 ॥

तत्र विश्रम्यतस्तस्य[2] निद्रासीदथवाटिकाम्।
द्रष्टुं समागता[3] राज्ञः कन्या सा विषयाभिधा ॥ 44 ॥

सखीभिः सहिता[4] चेषत्समाभासितयौवना।
सा ददर्श शयानं तं चन्द्रहासं तरोरध[5] ॥ 45 ॥

सशङ्का सा सखी मध्ये कोऽयं पुरुषभूषणः।
स्वपित्यत्र समागत्य ज्ञातव्य इति मे मतिः ॥ 46 ॥

परन्त्वस्य तु पत्रैकं दृश्यते शिरसि स्थितम्।
तदेव प्रथमं सख्यः समानयत यत्नतः ॥ 47 ॥

यथायं जागृयान्नैव तथागच्छत यत्नतः।
इति श्रुत्वा वचस्तस्यास्तासामेका ययौ शनैः ॥ 48 ॥

गत्वा तन्मस्तकात्पत्रं कौशलाज्जगृहे द्रुतम्।
आनीय विषयायै[6] सा ददौ पत्रं ततस्तु सा ॥ 49 ॥

उद्घाट्य पत्रं साऽपाठीत् पितुराज्ञां विचार्य[7] तु।
बुध्वा सा चिन्तिता बाला गर्हयन्ती पितुर्मनः ॥ 50 ॥

कथं कन्दर्पसङ्काशमिमं पुरुषभूषणम्।
हन्तुमिच्छति तातो मे तस्माद्दुष्टं हि तन्मनः ॥ 51 ॥

अहं तु पतिमेनं वै करिष्यामि न संशयः।
इति सञ्चिन्त्य मनसा गत्वैकान्ते मनस्विनी ॥ 52 ॥

विषमस्मै प्रदातव्यमित्यत्र कुशलालिखत्।
विषयास्मै प्रदातव्येत्येत्पूर्वाक्षरोपरि ॥ 53 ॥

---

1. ख – मध्ये लुप्तः।
2. तत्र ख, ग।
3. मयागता – ख, ग।
4. संहिता – क।
5. तरो थले – ख।
6. विषयै – ख।
7. विषार्य भोः।

ततः सम्मुह्य तत्पत्रं सखीनां निकटे गता।
किमत्रास्तीति ताभिः सा विषया सस्मितावदत्॥ 54॥

अहो कृत्यं किमप्यस्ति पिता मे मदनाय भोः।
आलिखद्देहि तस्यैव मस्तके पत्रमुत्तमम्॥ 55॥

इत्युक्ता तद्ददौ पत्रं विषया तत्सखीकरे।
सापि गत्वा शनैस्तत्र पत्रं तन्मस्तके न्यधात्॥ 56॥

अथ सा विषयाशीघ्रं निज वेश्म समागता।
चन्द्रहासोऽपि चोत्थाय ययौ नृपतिमन्दिरम्॥ 57॥

मदनाय ददौ पत्रं दृष्ट्वा तन्मदनो मुदा।
चन्द्रहासाय वेश्मादान्निवासायाति शोभनम्॥ 58॥

भृत्यानाज्ञापयामास चन्द्रहासस्य सेवने।
अङ्गरागं तथा वस्त्रं पानपात्रादिकं ददौ॥ 59॥

ततः पुरोहितं विप्रमानास्य मदनस्त्वरन्।
उद्योगं कारयामास श्वसुर्वैवाहिकस्य सः॥ 60॥

अलञ्चक्रुश्च[1] नगरं राजवेश्म द्रुतं नराः।
आगत्य स पुरोधास्तु सर्वं सम्पाद्य चाब्रवीत्॥ 61॥

सम्पन्ना सर्वसामग्री विवाहे या ह्यपेक्षिता।
श्रुत्वा तन्मदनस्तूर्णं महोत्सवविधानतः॥ 62॥

विषयां प्रददौ तस्मै चन्द्रहासाय हर्षितः।
अथ रात्रिर्गतोत्साहैर्मदनः प्रातरेव हि॥ 63॥

समुत्थाय लिलेखाय पत्रं पित्रेऽतिभक्तिमान्।
भवदाज्ञां पुरस्कृत्य स्वसारं विषयामहम्[2]॥ 64॥

तस्मिन्नेव दिने प्रादाच्चन्द्रहासाय भक्तितः।
महोत्साहविधानेन विवाहं समभूत्तयोः॥ 65॥

इति श्रुत्वा ततो राजा महाचिन्ताकुलोऽभवत्[3]।
किं[4] चिन्तितमभूत् किन्तु कथं तल्लिखितं मया॥ 66॥

---

1. ख मध्ये लुप्तः पाठः।
2. विषामहम् – क।
3. भवेत् – क, ग।
4. किं चितं किम् – ख।

इति सन्दिग्धहृदयः प्रतस्थे तत्क्षणान्नृपः ।
अथागत्य निजं वेश्म मदनं प्राह भूपतिः ॥ 67 ॥

विषयाया विवाहार्थं यत्पत्रं प्रेषितं मया ।
तदानयाहं पश्यामीत्युक्तस्स मदनो मुदा ॥ 68 ॥

दर्शयामास तत्पत्रं राजा दृष्ट्वातिविस्मितः ।
अहो ममाक्षराण्येव पत्रेऽस्मिन्नात्र संशयः ॥ 69 ॥

कथमेतन्मयालेखि[1] विषयास्मै प्रदीयताम् ।
इति सञ्चिन्त्य मनसा पुनश्च प्राप चिन्तनम् ॥ 70 ॥

निश्चित्य तूष्णीं तस्थौ स पापबुद्धिर्नृपाधमः ।
जातो विवाहः किं तेन छलात्तं विनिहन्म्यहम् ॥ 71 ॥

अन्यथा[2] राज्यमेवाहं हरिष्यामि न संशयः ।
विषया विषया भूत्वा निवत्स्यति[3] ममालये ॥ 72 ॥

तत्सोढव्यं न चान्यं तु यद्गृहीष्यति मेऽप्रियम् ।
इति सञ्चिन्त्य मनसा पुत्रादीन् स नृपोऽब्रवीत् ॥ 73 ॥

अहोऽत्र ग्रामे या देवो सा तु नः कुलदेवता ।
तां सम्पूज्य समायातु चन्द्रहासोऽत्र[4] वै निशि ॥ 74 ॥

इत्युक्ता [5]तानथैकां ते चाण्डालायाब्रवीन्नृपः ।
देवीं पूजयितुं गच्छेच्चन्द्रहासो यदा निशि ॥ 75 ॥

तदा त्वं मठमध्यस्थः खड्गेन जहि तं द्रुतम् ।
तावन्मठे न कोऽप्यन्यो गमिष्यति ममाज्ञया ॥ 76 ॥

इत्युक्त्वा तं तदान्येभ्य उवाच नृपतिस्स्वयम् ।
सायमारभ्य यावत्तां चन्द्रहासः प्रपूजयेत् ॥ 77 ॥

तावन्मठे न गन्तव्यं केनापीति ममाज्ञया ।
इत्युक्त्वा विररामाथ राजान्ये नागरा जनाः ॥ 78 ॥

---

1. लेखी – क।
2. अथ राज्यं मे – क।
3. निवत्स्यामि।
4. ख मध्ये लुप्तः पाठः।
5. ख मध्ये लुप्तपाठः।

चन्द्रहासं पुरस्कृत्य निशि पूजार्थमागताः।
अथान्तरे तु मदनश्चन्द्रहासेन संयुतः[1] ॥ 79 ॥

ततो विस्मृत्य राजाज्ञां प्रथमं गिरिजामठे।
जगाम देवीपूजार्थं स्नेहेन तद्वशङ्गतः ॥ 80 ॥

जगाम मदनस्स्नेहात्मठेऽस्मिन्दुर्जनो न चेत्।
अथो शीघ्रं तु चाण्डालो मदनस्य शिरोऽसिना ॥ 81 ॥

चिच्छेद चन्द्रहासोऽयमिति मत्वा निरीक्ष्य तम्।
चन्द्रहासो निववृते गन्तुं तत्र स्वयं सुधीः ॥ 82 ॥

बबन्ध तं तु चाण्डालं बध्वा कस्मैचिदर्प्यत्।
अथ कोलाहलो जातस्तुमुलो लोमहर्षणः ॥ 83 ॥

श्रुत्वा राजापि च निहतं मदनं दैवयोगतः।
रुरोदार्न्तस्वरेणाथ शिरः सन्ताडयन्मुहुः ॥ 84 ॥

स्वयं तत्र गतो राजा यत्र[2] श्रीमदनो हतः[3]।
विललापातिशोकेन दृष्ट्वा तं विनिपातितम् ॥ 85 ॥

अतिशोकेन स राजा पाषाणेन शिरः स्वयम्।
प्रस्फोट्य विजहौ प्राणां चन्द्रहासस्ततः परम् ॥ 86 ॥

चित्ते विचारयामास मद्विवाहादभूदिदम्।
राजा तु पुत्रशोकेन ममार जरसान्वितः ॥ 87 ॥

तत्पुत्रो मदनश्चासौ मदर्थे[4] त्यक्तजीवितः।
ततो मां धिक् यदि त्वेनं त्यक्त्वा यामि गृहं प्रति ॥ 88 ॥

तस्मादेनं हरिं प्रार्थ्य देवीमेतां कुलार्चिताम्।
आराध्य जीवयित्वा तु सह यास्यामि मन्दिरम् ॥ 89 ॥

नो चेच्छित्वा शिरः स्वं तु मरिष्ये नात्र संशयः।
इत्युक्ता मदनं तत्र मठे संयोज्य मस्तकम् ॥ 90 ॥

वपुषा तत्कपाटं तु दत्त्वा बहिरुपस्थितः।
स्थापयित्वा मठद्वारि शालग्रामशिलां निजाम् ॥ 91 ॥

---

1. सं पुनः – क।
2. पत्रीन् – क।
3. मृतः – क।
4. तदर्थे – ख।

निमीलिताक्षो मनसा तुष्टाव जगदीश्वरम्।
देवीं चैकचित्तेन मरणे कृतनिश्चयः ॥ 92 ॥

ततो रात्रिर्गता सर्वा प्रभाते समुपस्थिते।
[1]जीवोत्तिष्ठेति देवी सा मन्दिरादाजुहाव च ॥ 93 ॥

कोऽप्यस्ति द्वारिबाह्ये तु कपाटे दत्तं शृङ्खलः।
[2]उद्घाटयतामयं शीघ्रमागमिष्याम्यहं बहिः ॥ 94 ॥

इति श्रुत्वा चन्द्रहासस्समुद्घाट्य कपाटकम्।
दृष्ट्वा तु मदनं हृष्टः प्रणनाम हरिं शिवाम् ॥ 95 ॥

अथागतं बहिस्तं तु मदनं नागरा जनाः।
दृष्ट्वाति परमाश्चर्यमापुस्ते जीवनादहो ॥ 96 ॥

अथ तं मदनो दृष्ट्वा पितरं गतजीवितम्।
किं जातमिदामित्युक्त्वा तु चन्द्रहासोऽब्रवीद्वचः ॥ 97 ॥

अयं त्वां निहतं श्रुत्वा समागत्यात्र वै शिरः।
ममार स्वयमास्फोट्य पाषाणेन महाशुचा ॥ 98 ॥

श्रुत्वैतन्मदनः प्राह केनाहं निहतः कथम्।
श्रुत्वैतच्चन्द्रहासस्तु बद्धं चाण्डालमानयत् ॥ 99 ॥

आगत्य स तु चाण्डालस्सचिवस्याग्रतोऽब्रवीत्।
अहोऽयं चन्द्रहासस्तु शिशुर्मात्रा सह स्थितः ॥ 100 ॥

तदा मां नृपतिः प्राह चन्द्रहासं महावने।
जहि नीत्वा प्रत्ययार्थं तदङ्गं मे प्रदर्शय ॥ 101 ॥

इत्युक्तोऽहमिमं बालं प्रतार्य्य नीतवान्वने।
हन्तुं समुद्यतश्चाहं दयातीवाभवत्तदा ॥ 102 ॥

अस्यैकामङ्गुलीं षष्ठीं छित्वा राज्ञेऽप्यदर्शय।
उक्तवानथ भो राजन्निहतः स तु कानने ॥ 103 ॥

इति पूर्वं प्रजानामि पूर्वेद्युर्यदभूच्छृणु।
राजा मां प्राह रहसि चन्द्रहासो मठे यदा ॥ 104 ॥

---

1. जिजीवदमे – क, ख।
2. उद्घाप्रतामयं – क।

देवीं पूजयितुं गच्छेत्खड्गेन[1] जहि तं द्रुतम्।
तावदन्यो मठे नैव कोऽपि गच्छेन्ममाज्ञया॥ 105॥

त्वमेव मठमध्ये तु तावद्गत्वा स्थिरो भव।
इत्युक्तोऽहं समायातो गृहीत्वा खड्गमुत्तमम्॥ 106॥

देवी पूजार्थं मे तस्मिन्नागते प्रथमं तदा।
मदन: प्रविशन्नैव चन्द्रहास धिया हत:॥ 107॥

अहमेतत्प्रजानामि यथेच्छसि तथा कुरु।
श्रुत्वैतद्वचनं तस्य मदनं सचिवोऽब्रवीत्॥ 108॥

सत्यमेतन्न सन्देहो राज्ञो बुद्धिस्तु तादृशी।
विषया विधवा गेहे निहत्वेनं निहन्म्यहम्॥ 109॥

इति प्रतिज्ञा तस्यासीद् भाग्यान्नरपतेरहो[2]।
मृते त्वयि समागत्य राज्ञि चापि मृते सति॥ 110॥

प्रतिजज्ञे चन्द्रहासो न जीवामि विनाऽमुना।
ततो देवीं हरिं भक्त्या स्तुत्वा तां स त्वामजीवयत्॥ 111॥

एतावत्तेऽत्र कथितं ज्ञातं तेन नृपात्मज।
अद्यापि जननी त्वस्य चन्द्रहासस्य दुर्बला॥ 112॥

रुदन्ती पुत्रशोकार्त्ता वसन्ती च ममालये।
अत: परं राजपुत्र यथेच्छसि तथा कुरु॥ 113॥

इति श्रुत्वा तु मदन: प्राह[3] तं सचिवं वच:।
यदभूत्तदभून्मन्त्रिन्न तच्छक्यं निवर्तितुम्॥ 114॥

अत: परन्तु कोऽप्यन्यश्चन्द्रहास समो नहि।
राज्यार्द्धमस्य मे त्वर्द्धं सत्यमेतद्ब्रवीम्यहम्॥ 115॥

अत: परन्तु कर्तव्यं नृपतेरोद्ध्र्वदेहिकम्।
इत्युक्त्वा सचिवैस्सार्द्धं सञ्चकार पितु: क्रियाम्॥ 116॥

ततो वेश्म समागत्य दत्वा दानान्यनेकश:[4]।
अर्द्धं विभज्य बुभुजे राज्यं स मदनो नृप:॥ 117॥

---

1. गच्छत् वेगेन – ख।
2. नृपते: – क, ख।
3. प्रीतोऽहम् – ख।
4. अशेषत: – ख, ग।

अर्द्धं तु चन्द्रहासाय ददौ सोऽपि मुदान्वितः।
आनयित्वा स्वजननीमुवास भवने स्वके॥ 118॥

राजपुत्रोऽपि विषयया सह रेमे महामतिः।
अथान्तरे तु येनासौ वनान्नीतोऽथरक्षितः॥ 119॥

तं सस्त्रीकं पितृमातृतुल्यं मत्वा ह्यपूजयत्।
ददौ तदीयमकरं कृत्वा राज्यमकण्टकम्॥ 120॥

येनासौ लुण्ठितो बाल पिता येन च मारितः।
तं गत्वा सैन्यसंयुक्तो लुण्ठयित्वावधीद्द्रुतम्॥ 121॥

एवं स चन्द्रहासस्तु शालग्रामस्य भक्तितः।
घोरा महापदस्तीर्त्वा प्राप्य राज्यमकण्टकम्॥ 122॥

तस्माद्भक्तिसमं किञ्चिन्नैवापद्विनिवारकम्।
इति ज्ञात्वा सुखाकाङ्क्षी भक्तिं कुर्यान्निरन्तरम्॥ 123॥

यत्प्रसादादिहामुत्र मनस्सुखमवाप्नुयात्॥ 124॥

इति श्री भगवद्भक्तिमाहात्म्ये चन्द्रहासचरितं नाम द्वादशः सर्गः॥ 12॥

❊ ❊ ❊

त्रयोदशः सर्गः

॥ शिविदेवचरितम्॥

शिवेर्नृपस्य भक्तेस्तु माहात्म्यं कीर्त्यतेऽधुना।
सर्वपापहरं पुण्यं दृढभक्तिप्रदायकम्॥ 1॥

शिबिर्नाम्ना[1] महानासीद्राजा भूमण्डलेश्वरः।
दाता वदान्यो धर्मात्मा कृष्णभक्तिपरायणः॥ 2॥

श्रीकृष्णप्रीतये नित्यं ददाति कनकादिकम्।
यो मे वित्तादिकं लोके यत्किञ्चिदभिकाङ्क्षति॥ 3॥

श्रीकृष्णप्रीतये तत्तत्स्मै दास्याम्यसंशयम्।
इति प्रतिज्ञां चक्रे स राजा दानपरायणः॥ 4॥

---

1. नामा – क, ग।

शशास[1] राज्यं निर्वैरं श्रीकृष्णस्य प्रसादतः।
एकदा स महाराजः स्नात्वा सम्पूज्य केशवम्॥ 5॥
भोजयित्वातिथीन्सर्वान्स्वयं भोक्तुमथोत्थितः।
एतस्मिन्नन्तरे राज्ञो हस्ते चातिभयातुरः॥ 6॥
कपोतः समुपागत्य तस्थौ राजभयं त्यजन्।
त्राहि राजन्महाबाहो श्येनो मां[2] खादितुं बलात्॥ 7॥
पृष्ठतोऽयं समायाति तस्मात्त्वां शरणागतः।
इति श्रुत्वा वचस्तस्य कपोतस्य स भूपतिः॥ 8॥
तस्मिन्नेवासने भूप उपविष्टो बभूव ह।
तं कपोतं करस्थं तु वहन्[3] श्येनं ददर्श ह॥ 9॥
समायान्तं सवेगेन कपोतं भोक्तुमुद्यतम्।
दृष्ट्वा तं वारयामास शिबिर्नाम्ना महीपतिः॥ 10॥
अथ श्येनो निवृत्तस्तु राजाग्रे समुपाविशत्।
क्षुधितः प्राह राजानं श्येनो धृष्ट इव ब्रुवन्॥ 11॥
शिबे भूपमहाराज धर्मात्मा त्वं श्रुतो मया।
कथमेवमधर्मं भो कर्तुमिच्छसि भूपते॥ 12॥
अयं मे कल्पितो भक्ष्यो धात्रैवात्र न संशयः।
भोक्तुं तमहमायातो मां निवारयसि स्वयम्॥ 13॥
क्षुधितोऽहं बहुदिनाद्दैवदोषनिरीक्षितः।
स त्वया [4]रक्ष्यतेऽहं तु मरिष्यामि क्षुधातुरः॥ 14॥
इति श्रुत्वा वचस्तस्य राजा श्येनं वचोऽब्रवीत्।
सत्यं धात्रा कृतो भक्ष्यस्तथापि शरणागतः॥ 15॥
कथमेनं प्रदास्यामि जानन्धर्मं विशेषतः।
राज्यं जह्याच्छिरो जह्यात्पुत्रदारधनानि च॥ 16॥
आत्मानमपि धर्मात्मा न त्यजेच्छरणागतम्।
इमं धर्ममनुस्मृत्य [5]रक्षाम्येनं न संशयः॥ 17॥

---

1. सशाश – ख।
2. ताम् – ख।
3. वहून् – क, ग।
4. रक्षते – ख।
5. रक्षसि नात्र – ख।

त्वं तु सत्यं क्षुधार्तोऽसि तुभ्यं दास्यामि भोजनम्।
मृगयायां हतानां तु मृगाणां मांसमस्ति मे॥ 18॥

तत्स्यात्क्षुन्निवृत्त्यर्थं जहीमं[1] शरणागतम्।
इति श्रुत्वा वचस्तस्य श्येनः प्राहातिनिष्ठुरम्॥ 19॥

नाहं भोक्ष्येऽन्यमांसं तु त्वं चेदेतत्समं स्वयम्।
स्वशरीरस्य मांसं तु देहि तद्भक्षयाम्यहम्॥ 20॥

इति श्रुत्वा वचस्तस्य राजा चातीव हर्षितः।
अहो सम्यगिदं चोक्त्वा स्वशरीरं चकर्त ह॥ 21॥

कपोतादधिकं जातं तुलायां तं न्यवर्तयत्।
श्येनः पूर्णमिदं राजन्निवर्त्तस्व महामते॥ 22॥

आवां जानीहि चेन्द्राग्नी त्वत्परीक्षार्थमागतौ।
सत्यं त्वं दृढभक्तोऽसि ददावोऽभिमतं तव॥ 23॥

इत्युक्तस्सुरराट् श्येनः कपोतोऽग्निरभूत्क्षणात्।
राजानं प्राह सन्तुष्टो वरं ब्रूहि महामते॥ 24॥

इत्युक्तश्शिबिभूपस्तु तौ प्राह विहिताञ्जलिः।
अहो श्रीकृष्णभक्तिर्मे दृढा जन्मनि जन्मनि॥ 25॥

भूयादेतद्वरं याचे नान्यदिच्छामि किञ्चन।
इति श्रुत्वा तदेन्द्राग्नी तस्मै दत्वा वरं गतौ॥ 26॥

प्रशंसन्तो महाराजं जग्मतुः[2] स्वं स्वमालयम्।
इत्येतत्कथितं किञ्चिदौशीनरविचेष्टितम्॥ 27॥

विस्तरन्तु पुराणेषु प्रसिद्धं व्यासभाषितम्।
श्रुत्वैतत्परमाश्चर्यं शिबिभूपस्य चेष्टितम्॥ 28॥

श्रीकृष्णे लभते भक्तिं मृते यात्युत्तमां[3] गतिम्।
इह लोके सुखं प्राप्य धनपुत्रादिजं नरः॥ 29॥

इति श्रीभगवद्भक्तिमाहात्म्ये शिबिदेवचरितं नाम त्रयोदशः सर्गः॥ 13॥

❊ ❊ ❊

---

1. जहि मां – ख।
2. शिविमौशीनंस्तदा – क।
3. नमार्गं तम् – क।

चतुर्दशः सर्गः

॥ द्रौपदीचरितम् ॥

पाञ्चाल्या भक्तिमाहात्म्यं कथयामि यथाश्रुतम्।
महाभक्तिप्रदन्नृणां भारते यत्प्रकीर्तितम् ॥ 1 ॥

एकदा धर्मराजस्तु भाविनोऽर्थस्य गौरवात्।
द्यूतक्रीडासमासक्तश्चक्रे द्रुपदजां पणम् ॥ 2 ॥

अधर्मेणाजितस्सर्वैः कुरुभिः स युधिष्ठिरः।
तदादुःशासनो गत्वा पाञ्चाल्याः स कचग्रहम् ॥ 3 ॥

गृहीत्वा चानयामास सभायां पश्यतां नृणाम्।
एकवस्त्रां मुक्तकेशीं स्त्रीधर्माधिगतां सतीम् ॥ 4 ॥

इमामवस्थामापन्नां[1] दृष्ट्वा द्रुपदजां जनाः।
नेत्रे पिधाय तस्थुर्वै हा हा कृत्वा शनैः शनैः ॥ 5 ॥

सभासदः स्थितास्तत्र भीष्मद्रोणकृपास्तथा।
अश्वत्थामाविकर्णश्च तथान्ये वै महारथाः ॥ 6 ॥

धृतराष्ट्रश्च शकुनिः कर्णो दुर्योधनस्तथा।
युधिष्ठिरो भीमसेनाऽर्जुनो माद्रीसुतौ तथा ॥ 7 ॥

सर्वे दृष्ट्वा द्रुपदजामवस्थां [2]तादृशीं गताम्।
स्नेहात्क्रोधाद्धर्मतोऽपि नोचुः किञ्चिदधोमुखाः ॥ 8 ॥

तस्थुरेतन्महाश्चर्यं भाविनोऽर्थस्य वै बलात्।
अथ दुःशासनस्तस्याः क्रोधाद्धृत्वाञ्चलाम्बरम् ॥ 9 ॥

चकर्षाथ तदा देवी सस्मार गरुडध्वजम्।
शङ्खचक्रगदापद्मपाणिं पीताम्बरं हरिम् ॥ 10 ॥

अहो नारायणानन्त गोविन्द गरुडध्वज।
इमामवस्थामापन्नां त्राहि कृष्ण जनार्दन ॥ 11 ॥

दामोदर जगन्नाथ हृषीकेश गदाधर।
पाहि पाहि कृपासिन्धो मामत्र गरुडध्वज ॥ 12 ॥

---

1. ख लुप्तः पाठः।

2. ख मध्ये लुप्तः पाठः।

इमे भीष्मादयस्सर्वे तूष्णीं तिष्ठन्त्यधोमुखाः ।
अतः कं यामि शरणं त्रायस्व कमलेक्षण ॥ 13 ॥

इति शुश्राव भगवान्द्वारकायां जनार्दनः ।
पटोऽयं वर्धतामास्या अस्तु नोद्घाटितं[1] वपुः ॥ 14 ॥

एवमाहृततद्वस्त्रं शरीरस्थं न चाचलत् ।
दुःशासनकरस्थं तद्वरीवर्द्धति केवलम् ॥ 15 ॥

अथ दुःशासनो दुष्टः कर्षणान्न न्यवर्तत ।
तदग्रे समभूत्तत्र महान्वै वस्त्रपर्वतः ॥ 16 ॥

तथापि चासौ दुष्टात्मा न न्यवर्तत कर्षणात् ।
अमन्यत महालाभं वाससां सोऽपि दुर्जनः ॥ 17 ॥

उत्थायोत्थाय वासांसि कोशागारेषु सर्वशः ।
स्थापयामास भृत्यैः स्वैरसौ दुष्टचतुष्टयी ॥18 ॥

दुर्योधनश्च कर्णश्च शकुनिर्दुष्टशासनः ।
ततस्त्वन्यैर्धनैस्सार्द्धं तद्वस्त्रनिचयं[2] पुनः ॥ 19 ॥

तिरो[3] बभूव सहसा कोशोऽभूदतिनिर्धनः ।
अथ तत्रागतः कृष्णो भगवान्देवकीसुतः ॥ 20 ॥

तं दृष्ट्वा त्राहि पाञ्चाली गोविन्दागतवानसि ।
इत्युक्त्वा सुमुखी दीना रुरोदार्तस्वरेण सा ॥ 21 ॥

ततश्चुकोप भगवान् रुदन्तीं तां निरीक्ष्य सः ।
कुरु संहर्तुमुद्युक्त आरक्तकमलेक्षणः ॥ 22 ॥

ददौ पीताम्बरं स्वं तु पाञ्चाल्या उपरि प्रभुः ।
यदि पीताम्बरं चैतदाकर्षेन्ममपश्यतः ॥ 23 ॥

तदा सर्वान्हनिष्यामि कुरूनद्यैव नान्यथा ।
इति ज्ञात्वा तु कृष्णस्य मतं भीष्मादयस्तदा ॥ 24 ॥

न्यवारयन्त तद्वस्त्रकर्षणाद्दुष्टशासनम् ।
अहो किमुत्थितं वस्त्रं शरीरेऽस्यास्तु तादृशम् ॥ 25 ॥

---

1. ख मध्ये लुप्तः पाठः ।
2. निचयः – क ।
3. तलो – ख, ग ।

तदासीत्पुनरेतावान् जातो[1]ऽसौ वस्त्रपर्वतः ।
तथापि न त्वया ज्ञातं पीताम्बरमतः परम् ॥ 26 ॥

यदि कर्षसि[2] चेन्मोहादद्यैवैतत्कुलं महत् ।
विनङ्क्ष्यति कुरूणां वै[3] तस्मात्साधु ह्युपारम ॥ 27 ॥

इत्युक्तो विरामाथ कर्षणात्सोऽपि दुर्जनः ।
एवं दृष्ट्वा सुभक्तायाः पाञ्चाल्यास्तां गतिं हरिः ॥ 28 ॥

भस्मसादकरोद्वंशं कुरूणां भगवान्हरिः ।
एवं सङ्कष्टसमये स्मृतो रक्षति माधवः ॥ 29 ॥

पुराणे बहुधा गीतमिदमद्यापि वर्तते ।
तस्माद्भक्त्या स्मृतो देवः करुणामृतवारिधिः ॥ 30 ॥

तत्क्षणात्समुपागत्य भक्त्यानुग्रहविग्रहः ।
पालयत्येव सर्वांस्तु नात्र कार्या विचारणा ॥ 31 ॥

इति श्रीभगवद्भक्तिमाहात्म्ये द्रौपदीचरितं नाम चतुर्दशः सर्गः ॥ 14 ॥

❊ ❊ ❊

पञ्चदशः सर्गः

॥ द्रौपदीचरितम् ॥

अथापरं प्रवक्ष्यामि द्रौपद्याश्चरितं शुभम् ।
यस्य श्रवणमात्रेण मुच्यते सकलापदः ॥ 1 ॥

दुर्योधनस्य गेहे तु कदाचिदृषिसत्तमः ।
युक्तः शिष्यसहस्रेण दुर्वासाः समुपागतः ॥ 2 ॥

दृष्ट्वा तं मुनिशार्दूलं ज्वलन्तमिव पावकम् ।
दुर्योधनस्समुत्थाय पूजयामास भक्तितः ॥ 3 ॥

स्वगेहे वासयामास दिनानि स बहूनिशः ।
सम्मानभक्त्या नृपतेस्सन्तुतोष मुनीश्वरः ॥ 4 ॥

---

1. जातम् – ख
2. स्पृशसि – क, ग।
3. भो – क।

वरं दत्त्वा जिगमिषुराह दुर्योधनं मुनिः।
सन्तुष्टः सेवया तेऽहं वरं ब्रूहि नृपात्मज॥ 5॥

श्रुत्वा तद्वचनं तस्य विचार्य मनसा स तु।
दुर्योधनो मुनिं प्राह प्रतिजानीहि चेद्वरम्॥ 6॥

याचेऽहं तद्वचश्श्रुत्वा प्रतिज्ञामकरोन्मुनिः।
विहितं वाप्यविहितं यत्त्वं[1] मत्तोऽभिवाञ्छसि॥ 7॥

तद्ददामि न सन्देहः प्रतिज्ञैषा कृता मया।
ततो दुर्योधनः प्राह मुनिं ये पाण्डुनन्दनाः॥ 8॥

वने वसन्ति तत्र त्वमेकादश्यामुपोषितः।
वृतः शिष्यसहस्रेण [2]द्वादश्या समुपोषितः॥ 9॥

पाञ्चाल्यां भुक्तवत्यां तु भोक्तुं तत्र व्रजातिथिः।
इति श्रुत्वा मुनिस्तत्र चुक्रोध निजमानसे॥ 10॥

उवाच नीतिं पौराणीं निन्दनात्मानमात्मना।
न नीचवशगो भूयात्प्राणैः कण्ठगतैरपि॥ 11॥

वशीकृत्यात्ममार्गं ये यदधर्मे रमन्त्यमी[3]।
तथाप्युक्तं हि कर्तव्यं प्रतिज्ञा स्मरता मया॥ 12॥

विचार्य्यैवं मुनिः प्राह दुर्योधनमिदं वचः।
याम्येष तव भो वाक्यं करिष्यामि न संशयः॥ 13॥

इत्युवाच प्रययौ तत्र यत्र धर्मादयः स्थितः।
वनेऽपराह्ले द्रौपद्यां भुक्तवत्यां महामुनिः॥ 14॥

वृतः शिष्यसहस्रेण क्षुधार्तः समुपोषितः।
दृष्ट्वा तमागतं विप्रमतिथिं समयान्तरे॥ 15॥

दुर्वाससं क्रोधमूर्तिं ब्रह्माग्निमिव रूपिणम्।
युधिष्ठिरः समुत्थाय पाद्याचार्याद्यैरपूजयत्॥ 16॥

सर्वांस्तदनुशिष्यांश्च मुनिं भक्तिपरायणः।
पूजितः प्राह दुर्वासा धर्मराजातिथिस्तव[4]॥ 17॥

---

1. सत्वं सत्वो – ख।
2. ख मध्ये लुप्तपाठः।
3. मद्यन्यसौ।
4. स्रव – ख।

वृतः शिष्यसहस्रेण समायातो बुभुक्षितः।
भोजनं देहिनस्तावत्स्नात्वायामस्तवान्तिके ॥ 18 ॥

इति श्रुत्वा धर्मराजो भद्रमित्यब्रवीत्तदा।
द्रौपदीं परिपप्रच्छ किं भविष्यत्यतः परम् ॥ 19 ॥

साक्षादग्निर्हि दुर्वासा वृतश्शिष्यगणैर्यदि।
भोजनं न लभेद्वासौ[1] भस्मीकुर्यान्न संशयः ॥ 20 ॥

श्रुत्वैतद्द्रौपदी साध्वी धर्मराजमुवाच ह।
सत्यमेतन्न सन्देहः प्रकारोऽन्यो न वर्तते ॥ 21 ॥

श्रीकृष्णस्मरणात्स्वामिन्सब्रह्मा मे विमोक्ष्यति।
इत्युक्त्वा स द्रुपदजा सस्मार पुरुषोत्तमम् ॥ 22 ॥

चक्रायुध घनश्याम पुण्डरीकाक्ष माधव।
विप्रक्रोधानलत्त्वान्नस्त्रातुमर्हसि केशव ॥ 23 ॥

लाक्षागृहगतास्मान्यथा गौप्सीत्पुरा भवान्।
तथेदानीं द्विजक्रोधात्पाहि नश्शरणागतान्[2] ॥ 24 ॥

एवं वदन्ती सा दीना शुष्ककण्ठोष्ठतालुका।
ददर्शायान्तमग्रे तं श्रीकृष्णं पादचारिणम् ॥ 25 ॥

द्वारकायां तदा कृष्णश्शयानः पद्मया सह।
शुश्राव करुणं तस्या वचः पद्भ्यामुपाद्रवत् ॥ 26 ॥

व्यस्यार्षीद्गरुडं चक्रं स्खलत्पीताम्बरस्स्वयम्।
दृष्ट्वा तं निजनाथं सा हर्षेणाश्रुमुखी सती ॥ 27 ॥

आगतोऽस्येहि पीठेऽस्मिन्निवसाक्षालयाम्यहम्।
पादाविति वचश्श्रुत्वा श्रीकृष्णस्तामभाषत ॥ 28 ॥

बुभुक्षितोऽहमत्यर्थं नान्यत्रोपविशाम्यहम्।
अभुक्तोऽतः समुत्थाय देहि मे भोजनं द्रुतम् ॥ 29 ॥

इति श्रुत्वा द्रुपदजा कृष्णं प्राहातिविस्मिता।
अहोऽपराह्णे सञ्जाते भुक्तायां मयि भोजनम् ॥ 30 ॥

---

1. लभेतासौ – ख, ग। 2. तम् – ख।

नास्तीति जाननकिञ्चैतत्तदर्थयसि नः प्रभो।
इत्युक्तः प्राह कृष्णस्तामस्ति त्वं तु महानसम्॥ 31॥
गत्वा प्रदेहि मे भक्ष्यमतिक्षुत्पीडितो ह्यहम्।
इत्युक्ता द्रौपदी गत्वा महानसमनिन्दिता॥ 32॥
अधो मुखे[1] पाकपात्रे पश्यन्ती शाकमप्यथ[2]।
अत्यल्पं शाकमात्रं तु लब्ध्वा सा प्राह केशवम्॥ 33॥
इदमेतावदत्रास्ति शाकमात्रं जनार्दन।
कथं दास्यामि भवते किमनेन भविष्यति॥ 34॥
इत्युक्तः प्राह भगवान् पर्य्याप्तमिदमेव मे।
देहि शीघ्रं क्षुधार्तोऽहं मा विचारय किञ्चन॥ 35॥
इत्युक्ता द्रौपदी शाकं श्रीकृष्णस्य करे ददौ।
अनेन शाकमात्रेण विश्वात्मा तृप्यतां हरिः॥ 36॥
इति सङ्कल्प्य मनसा कृष्णस्तं बुभुजे मुदा।
सङ्कल्पसिद्धिस्ते भूयादित्युक्त्वोत्थाय वारिणा॥ 37॥
प्रक्षाल्यपाणिपादौ स उपविष्टः सुखासने।
उवाच धर्मराजं स प्रेषयैकं मुनिं प्रति॥ 38॥
आयातु किं विलम्बेन भोक्तुं स मुनिसत्तमः।
ततः सम्प्रेषयामास द्विजं दुर्वाससं प्रति॥ 39॥
दुर्वाससः सशिष्यस्य तदाजीर्णो महानभूत्।
त्यक्ताह्निकोऽक्षमो[3] गन्तुं तथापि चलितोऽन्यतः॥ 40॥
तत्र गत्वा द्विजः प्राह भुक्त्वा गच्छ महामते।
भवदागमनव्यग्रो धर्मराजः प्रतीक्षते॥ 41॥
श्रुत्वैतद्वचनं तस्य दुर्वासा प्राह तं द्विजम्[4]।
गच्छ विप्र न मे भोक्तुं क्षुधाजीर्णो ह्यभून्मम॥ 42॥

1. ख मध्ये लुप्त पाठः।
2. किमप्यथ – ख, ग।
3. क्षोभन्तुं – ख, क।
4. द्विजः – ख।

स्वस्त्यस्तु[1] धर्मराजायेत्येवं वद मदीरितम्।
यथाहमागतो दुष्टदुर्योधनवशीकृतः ॥ 43 ॥

तथाप्तवान्फलं[2] गच्छ त्वं यामो वयमप्यथ।
इत्युक्त्वा स गतस्तूर्णं दुर्वासा लज्जितो मुनिः ॥ 44 ॥

विप्रस्ततः समागत्य धर्मराजमुवाच तत्।
श्रुत्वा तद्धर्मराजोऽपि श्रीकृष्णानुग्रहो ह्ययम् ॥ 45 ॥

इति मत्वा भगवता चक्रे पौराणिकी कथा।
एवं पञ्चालजा भक्त्या श्रीकृष्णो भगवान्स्वयम् ॥ 46 ॥

द्वारकातः समागत्य पालयामास पाण्डवान्।
तस्मादेकाग्रमनसा[3] स्मृत्वा कृष्णं महापदि ॥ 47 ॥

मुच्यते सर्वसङ्कष्टात् सत्यं सत्यं न संशयः।
इत्येतद्द्रौपदीभक्तिमाहात्म्यं कथितं मया ॥ 48 ॥

यः शृणोति नरो भक्त्या सङ्कष्टैर्न स पीड्यते ॥ 49 ॥

इति श्रीभगवद्भक्तिमाहात्म्ये द्रौपदीचरितं नाम पञ्चदशः सर्गः ॥ 15 ॥

❊ ❊ ❊

षोडशः सर्गः

॥ वाल्मीकिचरितम् ॥

वाल्मीकिमुनिमाहात्म्यं कथयामि यथा श्रुतम्।
पुरा कश्चिद्द्विजो जातः कुटुम्बी निर्धनो महान् ॥ 1 ॥

कुटुम्बभरणार्थं तु भिक्षां पूर्वं चकार सः।
न तया लभतान्नानि[4] ततोऽधर्मरतोऽभवत् ॥ 2 ॥

वने वसत्प्राता रादिसायान्तं पथिकान् जनान्।
लुण्ठयित्वा धनैस्तान्सोऽपूपुषत्स्व[5] जनान् द्विजः ॥ 3 ॥

---

1. स्वरूपस्तु – ख।
2. अथ सर्वान् – ख, क।
3. देकेन – ख पाठः।
4. जानानि – क।
5. स्वजनान; पुषद्विजः – क, ख।

एवं लुण्ठाकवृत्तौ स निरतो निर्जने वने।
जघानापि बहूंस्तत्र पथिकान्धनलिप्सया[1] ॥ 4 ॥

एवं गतेषु कालेषु वसिष्ठश्चैकदा गतः।
तस्मिन्नरण्ये तं दृष्ट्वा वसिष्ठं स द्विजोऽब्रवीत् ॥ 5 ॥

अहो वस्त्रादिकं सर्वं शीघ्रं देहि न चेदहम्[2]।
घातयामि प्रयच्छाशु यदि जीवितुमिच्छसि ॥ 6 ॥

इत्युक्तः स वसिष्ठस्तु तं द्विजं प्राह सस्मितम्।
अहो यदर्थमेतत्त्वं घोरं कर्म करोषि भोः ॥ 7 ॥

तान् गच्छ पृच्छ यत्पापं कृत्वा धनमुपार्ज्यते।
तत्किं ममैव तत्पापं स्यादथो भवता मयि ॥ 8 ॥

ते यद्वक्ष्यन्ति तच्छ्रुत्वा त्वामाख्याहि[3] ममाग्रतः।
तावदत्रैव तिष्ठामि सत्यमेतन्न संशयः ॥ 9 ॥

इति श्रुत्वा द्विजः सोऽथ मुनेर्दर्शनतो हृदि।
जग्राह वचनं तस्य समायातो निजं गृहम् ॥ 10 ॥

आगत्य पृष्टवान्सर्वान्सर्वैरुत्तरितं समम्।
मम पापं न पुण्यं वा तत्सर्वं तु तवैव हि ॥ 11 ॥

भोक्तुं ददासि भुञ्जामि न जाने सुकृतं[4] त्वधम्।
सर्वान्सम्पृष्य भार्यां[5] स पप्रच्छातिप्रयत्नतः ॥ 12 ॥

सापि तद्वदुवाचाथ श्रुत्वा स पुनरागतः।
वसिष्ठ निकटे किं तु मनसा चाति दुःखितः ॥ 13 ॥

वसिष्ठं स उवाचाहो सर्वैरुत्तरितं समम्।
पुण्यपापं न जानीमस्तत्सर्वं तव केवलम् ॥ 14 ॥

त्वद्दत्तान्नानि भुञ्जाना विद्मो[6] नैव कृताकृतम्।
इति श्रुत्वा वसिष्ठस्तं प्रोवाच कृपया विभुः ॥ 15 ॥

---

1. लिक्षया – ख।
2. क, ख मध्ये लुप्तपाठः।
3. त्वायाहि – क, ख।
4. सूक्तकं स्वयम् – ख।
5. भार्यायै – ख।
6. विष्णो ख, विघ्नो – क।

अहो भवान्महामूर्खो भूत्वा ब्रह्मकुले तु यत्।
त्यक्त्वा धर्ममधर्मं तु यदर्थं कुरुषे द्विज॥ 16॥

तेषामुक्तिरियं त्वं तु वृथा पापं करोषि भोः।
एकाकी जन्म संप्राप्य भुञ्जानः कर्मणां फलम्॥ 17॥

आयुषोऽन्ते व्रजत्येको धर्माधर्मसहायवान्।
न कोप्युपकरोत्यस्य जन्तोरन्ते मुमूर्षतः[1]॥ 18॥

स्वकृतान्येव कर्माणि पालयन्त्यर्दयन्ति च।
यस्य जीवति या स्नेहात्स्वपित्यालिङ्ग्य यद्वपुः॥ 19॥

दृष्ट्वा तदेव सात्यर्थं बिभ्यती द्रष्टुमक्षमाः[2]।
य सुतो जनितः स्नेहाल्लालितो वर्द्धितः स तु॥ 20॥

मृते पितरि तं प्रेतं मन्यमानो बिभेति वै।
तस्मान्न पत्नी किञ्चित्सा कर्तुं [3]हर्तुमिहार्हति॥ 21॥

एवं सञ्चिन्त्य मनसा यथारुचि कुरु द्विज।
इति श्रुत्वा वचस्तस्या वसिष्ठस्य महात्मनः॥ 22॥

भाग्यात्तत्संगतो विप्रः प्रबोधमगमत्तदा।
उवाच प्राञ्जलिर्भूत्वा सत्यमेतन्महामुने॥ 23॥

त्यक्त्वा सर्वं प्रपन्नोऽस्मि त्वामहं शरणं मुने।
मह्यं प्रदेहि मन्त्रं भोः शिष्यस्तेऽहं गुरुर्भवान्॥ 24॥

इत्युक्तः स वसिष्ठस्तु ज्ञात्वा तं पापकारिणम्।
उवाचाहं तु गच्छामि त्वरितस्त्वं गृहं व्रज॥ 25॥

तत्रैवान्यस्य शिष्यस्त्वं ग्रामे भवितुमर्हसि।
इत्युक्तः स द्विजं प्राह न शिष्यं[4] कुरुषे यदि॥ 26॥

तदा त्वां घातयित्वाद्य करिष्येऽहं न संशयः।
इत्युक्त्वा जगृहे पादौ बलात्तस्य महामुनेः॥ 27॥

ततः स कृपयाविष्टो भीतो ब्रह्मवधादपि।
विचार्य मनसा मन्त्रं ददौ तस्य द्विजातये॥ 28॥

---

1. मुखतः – ख, ग।
2. दासुम् – ख।
3. सर्वत्र लुप्तपाठः।
4. निष्फलं – ख।

[1]मन्त्राणामधिकास्तु नास्यात: सर्वतारकम्।
रामेत्येतन्मरेत्येवं विपरीतं ददौ मुनि: ॥ 29 ॥

ततस्तच्चरणौ त्यक्त्वा प्रणनाम महामुनिम्।
वसिष्ठोऽपि द्विजं प्राह मन्त्रमत्र जपन्वस ॥ 30 ॥

भविष्यति महानेव सर्वेभ्यो नात्र संशय: ।
इत्युक्त्वा स जगामाथ द्विजस्तत्रैव तस्थिवान् ॥ 31 ॥

जपन्मरेति मन्त्रं स: त्यक्त्वान्नमुदकं द्विज: ।
एकासनोपविष्ठस्य तस्य कालो महानगात् ॥ 32 ॥

शरीरे तस्य वल्मीको महानासीद्द्विजन्मन: ।
अथैकदा समायातो वसिष्ठस्तत्र कानने ॥ 33 ॥

सस्मार तं द्विजं प्रेम्णा पश्यं श्वेतस्ततस्तु स: ।
ददर्श तत्र द्योतेते वाल्मीके[2] तस्य ते दृशौ ॥ 34 ॥

स एवायमिति ज्ञात्वा सस्मार स पुनर्विधिम्।
वासिष्ठस्मरणात्तूर्णं समायातो विधिस्तदा ॥ 35 ॥

तं वसिष्ठ: प्रणम्याह वरो[3] ह्यस्मै प्रदीयताम्।
अनेन सद्यो हि महत्तपस्तप्तं सुदुष्करम् ॥ 36 ॥

इत्युक्तस्सविधि: प्राह सत्यमेतन्न संशय: ।
दातुमिच्छाम्यहमपि वरमस्मै स्मृतस्त्वया ॥ 37 ॥

समागतोऽस्मि यस्याद्य ददामि वरमुत्तमम्।
इत्युक्त्वा मृत्तिकां भित्वा तं पस्पर्श करेण स: ॥ 38 ॥

विधे: करस्पर्शवशात्समुत्तस्थौ द्विजोत्तम: ।
दृष्ट्वा वसिष्ठं ब्रह्माणं दण्डवत्पतितो[4] भुवि ॥ 39 ॥

ददौ[5] ब्रह्मा तमुत्थाप्य ब्रह्मर्षि त्वं तदा[6] मुदा।
नाम तस्याकरोत्तत्र वाल्मीकिरिति विश्रुतम् ॥ 40 ॥

यतो वल्मीकतो अज्ञे पुन: स द्विजसत्तम: ।
साङ्गोपाङ्गास्तुते वेदा शास्त्राणि सकलान्यथ ॥ 41 ॥

---

1. मन्त्रानाम – ख, मन्त्रमत्रा – क।
2. वाल्मीके द्विजस्य द्योतक दृशौ – क, ख।
3. वंग – ख।
4. पतिनां – ख।
5. ततो – ख।
6. ददौ – ख, क।

आचारः क्रतवो धर्मश्श्रीर्ह्री कीर्तिर्यथा धृतिः।
लज्जा क्षमा दया शान्तिः श्रद्धा पुष्टिः स्मृतिर्मतिः ॥ 42 ॥
एतान्यन्यानि वाल्मीको मूर्त्तिं मत्वा गतानि वै।
विधेराज्ञावशात्तस्य तपो महात्म्यतोऽपि च ॥ 43 ॥
ऊचुर्वाल्मीकिमासाद्य सर्वे ब्रह्मर्षिनामतः[1]।
अथान्तरे गतो धाता वसिष्ठः स्वगृहं ययौ ॥ 44 ॥
वाल्मीकिरपि सम्प्राप्य वरं पूर्णमनोरथः।
ऋषिभिर्वन्द्यमानः सन् चचार तप उत्तमम् ॥ 45 ॥
एवम्प्रभावो [2]नाम्नो वै भक्तेश्चापि श्रुतो मया।
यथा तथात्र लिखितो माहात्म्यं तस्य कः पुनः ॥ 46 ॥
वक्तुं शक्नोति लोकेऽस्मिन् विशेषेण तु मादृशः।
रामावतारतः पूर्वं रामायणमनुत्तमम् ॥ 47 ॥
चक्रे विख्यापिता लोके छन्दोबद्धा सरस्वती।
अद्यापि यस्तु वाल्मीकेर्नाम सङ्कीर्तयेन्नरः[3] ॥ 48 ॥
महाजाड्यं विनिर्धूय शास्त्रज्ञो भवति द्विजः।
इति वाल्मीकिभक्तेस्तु माहात्म्यं कथितं मया ॥ 49 ॥
श्रुत्वैतत्सर्वपापेभ्यो मुच्यते नात्र संशयः ॥ 50 ॥

इति श्रीभगवद्भक्तिमाहात्म्ये वाल्मीकिचरितं नाम षोडशः सर्गः ॥ 16 ॥

❊ ❊ ❊

सप्तदशः सर्गः

॥ रुक्माङ्गदचरितम् ॥

रुक्माङ्गदकथां वक्ष्ये सद्यो भक्तिप्रदायिनीम्।
यां श्रुत्वा मनुजः कृष्णे दृढां भक्तिं लभेत वै ॥ 1 ॥
आसीद्रुक्माङ्गदो राजा चतुरङ्गबलान्वितः।
धर्माधर्म्मे विजानन्स प्रजापालनतत्परः ॥ 2 ॥

---

1. सत्तमः – क, ख।
2. नाम्नवि – ख।
3. तुयः – ख, द्वषः – क।

निष्कण्टकं राज्यभोगं बुभुजे[1] बहुवासरान्।
तस्यैका नगरोपान्ते पुण्यवाट्यति शोभना ॥ 3 ॥

नित्यं स वर्तुं कुसुमा मणिसोपानवाटिका।
नानापुष्पसमोपन्ता नानापालिभिरावृता ॥ 4 ॥

तस्याः पुष्पाणि रात्रौ तु समागत्यऽप्सरो [2]गणाः।
जुहुस्तदा नृपो क्रुधो मालाकारमुवाच ह ॥ 5 ॥

को गृहीत्वा निशायां वै पुष्पाणि प्रतिवासरम्।
प्रयाति वद नो चेत्त्वां[3] सकुटुम्बं निहन्म्यहम् ॥ 6 ॥

इति श्रुत्वा वचो राज्ञो मालाकारोऽति दुःखितः।
विचार्य मनसा स्वस्थः कथं नो रक्षणं भवेत् ॥ 7 ॥

न जाने कस्समायाति राज्ञामुल्लङ्घ्य शासनम्।
इति सञ्चिन्त्य तत्रैकस्स्थितः कश्चिद्द्विजोत्तमः ॥ 8 ॥

वृद्धश्शास्त्रपुराणज्ञो धर्मशास्त्ररतः सदा।
तमुक्त्वा सर्ववृत्तान्तं मालाकारोऽपतत्पदोः ॥ 9 ॥

त्रायस्व सकुटुम्बं मामुपदेशप्रदानतः।
जानीयां कथमेतद्वै कः समायाति वाटिकाम् ॥ 10 ॥

इति श्रुत्वा द्विजश्चित्ते चिन्तयामास बुद्धिमान्।
अहो मनुष्यो नायाति राजदण्डभयाद्ध्रुवम् ॥ 11 ॥

देवो वा राक्षसो वापि यक्षोगन्धर्वकिन्नराः।
समागत्य विचिन्वन्ति पुष्पाण्यस्यां न संशयः ॥ 12 ॥

तत्रोपायं वदिष्यामि यथा ज्ञास्यसि तस्करम्।
निर्माल्यं देवतानां तु वाटिकायां विकीर्य च ॥ 13 ॥

रात्रौ तिष्ठ ततः प्रातश्चौरः स्थास्यति बद्धवत्।
इति श्रुत्वा तथा[4] चक्रे मालाकारोऽतिहर्षितः ॥ 14 ॥

---

1. स चक्रे – क, ग।
2. अक्षुरो – ख।
3. तां – ख पाठः।
4. ततः – ख।

प्रातर्जगाम वाट्यां तु ददर्शैकां स्त्रियं शुभाम्।
तत्राप्सरोगणो[1] रात्रौ समायाति महानिशि[2] ॥ 15 ॥

सर्वे जग्मुर्दिवं प्रातरेका निर्माल्यलङ्घनात्।
तस्थौ तत्रैव तस्यास्तु गतिर्देव्या हताऽभवत्॥ 16 ॥

मालाकारस्ततः शीघ्रं गत्वा राजानमब्रवीत्।
राजंश्चौरो धृतो वाट्यां काचित्कमललोचना॥ 17 ॥

सर्वाङ्गसुन्दरी रामा वासयन्ती दिशो दश।
न मानुषीयं सत्यं ते कथयामीति मे मतिः ॥ 18 ॥

इति श्रुत्वा ततो राजा समुत्थाय समाययौ।
पुष्पवाट्यां ददर्शाथ सत्यं नेयं तु मानुषी॥ 19 ॥

इत्यमन्यत तां प्राह कासि कस्मादिहागता।
स्थिता किमर्थमत्रैव न गता यत आगता॥ 20 ॥

तत्सत्यं ब्रूहि सर्वं मे मा भयं[3] कुरु सुव्रते।
इत्युक्ता साप्युवाचाथ राजानं साप्सरोवरा[4] ॥ 21 ॥

राजन्नप्सरसां मध्ये काप्यहं स्वर्गवासिनी।
पुष्पवाट्यां तवात्राहं सखीभिः सहिता निशि॥ 22 ॥

विहारार्थं समायाता गता सख्यो दिवं मम।
अहं तु देव निर्माल्यलङ्घनाद्गन्तुमक्षमा॥ 23 ॥

स्वर्गतिर्विहता मेऽद्य निर्माल्यलङ्घनात्ततः ।
इति श्रुत्वा ततो राजा प्राह तामप्सरोवराम्[5] ॥ 24 ॥

उपायः कोऽपि चेदस्ति पुनर्येन गतिर्भवेत्।
तं ब्रूहि प्रकरोम्येष ततस्त्वं तु दिवं व्रज॥ 25 ॥

इत्युक्ता साथ राजानमुवाच मुदिता सती[6] ।
राजन्नेकादशीपुण्यं यदि कस्यापि वर्तते॥ 26 ॥

---

1. अक्षरो – ख।
2. नहानिक्षि – ख।
3. माशु चं – क।
4. अक्षरो – ख।
5. अक्षरो – ख।
6. मती – ख।

तद्दद्याद्यदि मे तस्माद्गतिस्स्वर्गे पुनर्भवेत्।
इति श्रुत्वा नृपो ग्रामे राज्ये सर्वानुवाच ह॥ 27॥

एकादशीव्रतं केन कृतमायातु स द्रुतम्।
तदा दूतगणा ग्रामे राज्ये तस्य ययुर्द्रुतम्॥ 28॥

राजन्ग्रामे न राज्ये वा कश्चिदेकादशीव्रती।
एकात्र वणिजा दासी व्यभिचारं चकार सा॥ 29॥

वणिक्सन्ताडयामास सा[1] तत्रैकादशीदिने।
अहो रात्रं निराहारा निर्जला शोकतः पुनः॥ 30॥

लेभे न निद्रां रात्रौ सा तस्या एवमभूद्व्रतम्।
इति श्रुत्वाप्सरा प्राह सैवागत्य ददातु मे॥ 31॥

एकादशीव्रतफलं तेन यास्याम्यहं दिवि।
इत्युक्तो नृपतिस्तां तु वैश्यदासीं समाह्वयत्॥ 32॥

दापयामास तत्पुण्यं तत्काले सा ययौ दिवम्।
दृष्ट्वा तत्परमाश्चर्यं राज्ञो भक्तिरभूद्दृढा॥ 33॥

चक्रे सपरिवारः स स्वयमेकादशी व्रतम्।
सम्पूर्णे निजराज्ये स सर्वाण्येवमजिज्ञपत्[2]॥ 34॥

एकादश्यां[3] न भोक्तव्यं जन्तुमात्रेण केनचित्।
भुञ्जीत यदि वा मोहात्स मे दण्ड्यो न संशयः॥ 35॥

इत्याज्ञां नृपतेः सर्वे गृहीत्वा शिरसा जनाः।
विज्ञायापि तदाश्चर्य्यं चक्रुरेकादशीव्रतम्॥ 36॥

एवं रुक्माङ्गदो राजा कुर्वन्नेकादशीव्रतम्।
शशास राज्यं धर्मेण जातः सर्वसमृद्धिवान्॥ 37॥

एकदा तस्य जामाता[4] एकादश्यां समागतः।
अन्यराजैकतनयो [5]वपुषाप्यतिकोमलः॥ 38॥

राजाज्ञयाथ राज्ञी तु न ददौ भोजनं सती।
राजपुत्री तु किं कुर्यात्पितृमातृवशंगता॥ 39॥

---

1. मा – ख, ग।
2. मसिक्षयत् – ख।
3. न भोक्तव्यं – ख, ग।
4. यामाता – ख।
5. वयसा – क, ग।

जामाता प्राह प्रत्येकं श्वसुरादीन्विनीतवान्।
अद्यावधि ममासीन्नो निशायामप्युपोषणम्॥ 40॥

अतो नैवोपवासं वा[1] कर्तुं शक्नोम्यहं नृपः।
श्रुत्वैतद्वचनं तस्य जामातुरपि भूपतिः॥ 41॥

न ददौ भोजनं तस्मै जामात्रेऽपि दृढव्रतः।
ततो रात्रेः परार्धे तु जामाता स क्षुधार्दितः॥ 42॥

ममार तं नृपो ज्ञात्वा राज्ञी वा तत्सुताथवा।
एतावदेव चायुष्यमित्युक्ता दग्धुमुद्यताः॥ 43॥

अथान्तरे सुता राज्ञः सह गन्तुं समुद्यता।
द्वादश्यां प्रातरेवाथ सम्भारान्प्रददौ नृपः॥ 44॥

सापि राजसुता गत्वा श्मशाने बन्धुभिस्सह।
चितायां पतिमारोप्य वह्निं दातुं समुद्यता॥ 45॥

अथान्तरे स भगवान् द्विजवेषधरो हरिः।
मालामुद्रां वहंस्तत्र समायातो निवारयत्॥ 46॥

मा [2]दहेयुर्मृतो नायं क्षुधया त्वतिमूर्च्छितः।
अहमेनं जीवयामि दत्त्वान्नं वदनेऽस्य भोः॥ 47॥

शीघ्रमन्नं किमप्यत्र समानय ममाग्रतः।
ततो दूता[3] द्रुतं गत्वा पृथुकान्नं समानयत्॥ 48॥

गृहीत्वा तज्जले सम्यक्समर्प्य तज्जलं द्विजः।
ददौ जामातृवदने निगीर्य स तदादृशौ॥ 49॥

उद्घाट्य तान्समालोक्य पप्रच्छ किमिदं त्विह।
ततः प्रोचुस्तदा[4] सर्वे तं तस्य स्मरणादिकम्॥ 50॥

श्रुत्वा सोप्याह सत्यं भोः क्षुधयैव मृतोह्यहम्।
अतः परमनेनाद्य जीवितोऽहं न संशयः॥ 51॥

इत्युक्तवन्तं तं सर्वे राजा च पुरवासिनः।
शिविकायामथारोप्य निन्युर्नृपतिमन्दिरम्॥ 52॥

---

1. च – ख।
2. देहेयं – ख।
3. दूश – क।
4. ख मध्ये लुप्त पाठः।

स वैष्णवो द्विजस्सर्वैस्सह गच्छन्महोत्सवे।
अन्तर्दधे न च ज्ञातं मायया तस्य केनचित्॥ 53॥

राजा गृहं समागत्य क्वास्ते स द्विजसत्तमः।
येनायं जीवितो बालस्तमानय समर्चये॥ 54॥

तदा सर्वे गृहे ग्रामे मार्गमाणा निरीक्ष्य[1] तम्।
नैवापश्यन्तदा राज्ञे प्रोचु राजन् गतः स तु॥ 55॥

सहैव तु समागच्छन् कदा वा नान्तर्दधे द्विज।
न जानामि जनः कोऽपि महोत्साहेन भूपते॥ 56॥

इति श्रुत्वा वचस्तेषां राजात्यर्थं शुशोच ह।
अहो न स द्विजः किन्तु भगवान्भक्तवत्सलः॥ 57॥

आगत्य जीवयामास तं बालं नात्र संशयः।
इत्युक्त्वा तान्पूजनादि कृत्वा दत्वा धनानि च॥ 58॥

भोजयित्वा द्विजान्सर्वान्बुभुजेऽन्नं स्वयं नृपः।
इत्येत्कथितं सर्वं रुक्माङ्गदविचेष्टितम्॥ 59॥

श्रुत्वैतत्सर्वपापेभ्यो मुच्यते मनुजो ध्रुवम्॥॥ 60॥

इति श्रीभगवद्भक्तिमाहात्म्ये रुक्माङ्गदचरितं नाम सप्तदशः सर्गः॥ 17॥

❊ ❊ ❊

अष्टादशः सर्गः

॥ मयूरध्वजचरितम्॥

मयूरध्वजभक्तिं च वक्ष्याम्याश्चर्यदायिनीम्।
श्रुत्वा यां मनुजः सद्यो मुच्यतेऽज्ञानबन्धनात्॥ 1॥

एकदार्जुनचित्ते तु महान्गर्वो बभूव ह।
न मे समोऽस्ति भक्तो वै श्रीकृष्णस्य चराचरे॥ 2॥

इति ज्ञात्वा तु भगवानर्जुनं प्राह विस्मितम्।
एह्यागच्छ[2] मया सार्द्धं गच्छामि क्वचिदर्जुन॥ 3॥

---

1. विन्चिन्त्यतम् – ख।
2. गत्वा – क।

इत्युक्त्वा द्वारकायास्तु निर्जगाम बहिर्यदा।
तदार्जुनं पुनः प्राह त्वं भूत्वा द्वादशाब्दिकः॥ 4॥

आगच्छ वृद्धो भूत्वाहं गच्छामि राजमन्दिरम्।
मयूरध्वज नामास्ति राजा सोऽतीव मे प्रियः॥ 5॥

तं द्रष्टुं याम्यहं त्वन्तु समागच्छ मया सह।
इत्युक्त्वा स व्रजन्मार्गे व्याघ्रमेकं ददर्श ह॥ 6॥

व्यादितास्यं महाघोरमत्तुमुद्यतमर्जुनम्।
तं दृष्ट्वा प्राह भगवानहो बालं विहाय माम्॥ 7॥

भोक्तुमर्हसि शार्दूल बालोऽतीव मम प्रियः।
[1]एवमुक्तोऽब्रवीद्व्याघ्रो न त्वां भोक्ष्ये जरातुरम्[2]॥ 8॥

उपायमेकं वक्ष्यामि बालस्यास्य तु रक्षणे।
मयूरध्वज नामासौ राजा चातिप्रियस्तव॥ 9॥

तस्य चार्द्धं दक्षिणाङ्ग(मा)रया मस्तकादितः।
द्विधा कृत्वाथ वा पत्नीपुत्राभ्यां दीयते[3]॥ 10॥

तत्रापि शोकेन स्याच्चेद्राज्ञः पत्न्याः सुतस्य वा।
तदाहं तदशिष्यामि त्यक्ष्याम्येनं तवार्भकम्॥ 11॥

नो चेद्द्यात्स नृपतिस्तदेमं मे प्रदास्यसि।
इति प्रतिज्ञां कृत्वा त्वं[4] गच्छ तत्र द्विजोत्तम॥ 12॥

श्रुत्वैतद्वचनं तस्य व्याघ्रस्य भगवान्द्विजः।
कृत्वा प्रतिज्ञां गतवान्मयूरध्वजसन्निधिम्॥ 13॥

मध्याह्नेऽतिथिवेलायां भोक्तुं राजा समुद्यतः।
अथ द्वारि समागत्य श्रावयामास तं नृपम्॥ 14॥

नृपश्श्रुत्वा समागत्य द्वारि तं प्रणिपत्य च।
प्राह तं नरशार्दूलः[5] किं करोमि वदात्र माम्॥ 15॥

---

1. एवमुक्त्वा – ख।
2. जरं नरम् – ख, ग।
3. दीयते यदि – ख, ग।
4. तु – ख।
5. सार्दुल – क, ग।

इत्युक्तः प्राह वृद्धस्तं श्रीकृष्णप्रीतये ह्यहम्।
याचे तद्वै प्रदद्याश्चेत्तदा सत्यं कुरुष्व भोः ॥ 16 ॥

तदाहं कथयिष्यामि वाञ्छितार्थं न संशयः।
इति श्रुत्वा वचस्तस्य राजोवाच प्रसन्नधीः ॥ 17 ॥

अहोऽन्यदर्थं यत्किञ्चिन्मत्तोऽभीप्सति तद्वद।
श्रीकृष्णप्रीतिकामस्तु दद्यामात्मानमप्यहम् ॥ 18 ॥

''पुत्रान्दारान्धनं सर्वमात्मानमपि च द्विज।
श्रीकृष्णप्रीतये दद्यां सत्यमेतत्करोमि भोः'' ॥ 19 ॥

इति श्रुत्वा वचस्तस्य राज्ञो वृद्धो द्विजोऽब्रवीत्।
राजंस्त्वद्दर्शनार्थाय समागच्छन्पथि त्वहम्[1] ॥ 20 ॥

अपश्यं व्याघ्रमेकं तु व्यादितास्यं भयङ्करम्।
सहसा खादितुं बालमिमं स तु [2]मयार्थितः ॥ 21 ॥

अहो मां भक्षय त्वं भोस्त्यज बालं मम प्रियम्।
इत्युक्तस्सोऽब्रवीद्व्याघ्रो न त्वां भोक्ष्ये जरातुरम् ॥ 22 ॥

उपायमेकं वक्ष्यामि बालकस्यास्य जीवने[3]।
मयूरध्वज नामास्ति राजा चेन्निजमस्तकात् ॥ 23 ॥

आरया सुतपत्नीभ्यां द्विधा कृत्वा ददाति चेत्।
न शोचति तदा कोऽपि राजपत्नी सुतोऽथवा ॥ 24 ॥

तद्देहि भोजनं मह्यं तदा बालं त्यजाम्यहम्।
नो चेदिमं समादाय समागत्य प्रदेहि मे ॥ 25 ॥

इति सत्यं प्रतिज्ञाय गच्छ तत्र[4] द्विजोत्तम।
तदा प्रतिज्ञां कृत्वाहं समायातस्तवान्तिकम् ॥ 26 ॥

अतः परं कुरुष्व त्वं यथारुचि महीपते।
श्रुत्वा तद्वचनं राजा मुदा ब्राह्मणमब्रवीत् ॥ 27 ॥

अहो भाग्यं महन्मेऽद्य श्रीकृष्णप्रीतये तु यत्।
शरीरं प्रतिगृह्णाति ब्राह्मणो वै भवादृशः ॥ 28 ॥

---

1. ह्यहम् – ख।
2. ममार्थितः – ख।
3. जीवनम् – ख।
4. तव – क, ख।

इत्युक्त्वा तनयं पत्नीमाजुहाव नृपोत्तमः।
आरामादाय ताभ्यां तु[1] दत्वा प्रोवाच भूपतिः[2] ॥ 29 ॥

अनया चारयामेऽत्र शिर आरभ्य वै मुदा।
द्विधा कृत्वा दक्षिणार्द्धं श्रीकृष्णप्रीतये द्रुतम् ॥ 30 ॥

द्विजायास्मै प्रमुदितौ युवामर्पयतां तदा।
पत्नी पुत्रश्च मुदितावूचतुस्तौ मुहुर्नृपम् ॥ 31 ॥

ममैवार्द्धं देहि राजन् विप्रायास्मै प्रतिग्रहम्।
त्वयि जीवति पुत्राश्च भविष्यन्ति तथा स्त्रियः ॥ 32 ॥

इति श्रुत्वा तयोर्वाक्यं विप्रस्तौ प्रत्यषेधत।
नाहं गृह्णामि युवयोश्शरीरार्द्धं न संशयः ॥ 33 ॥

राजैव चेद्ददात्यर्द्धं तदा गृह्णामि नान्यथा।
इति श्रुत्वा निवृत्तौ तु मातृपुत्रौ निजार्पणात् ॥ 34 ॥

राजाज्ञया गृहीत्वारां निधाय नृपमूर्द्धनि।
आचकर्षतुरन्योऽन्यं वामाथ तनयावुभौ ॥ 35 ॥

अशोकौ नृपतेर्नाशा मूलावधि यदा गतौ[3]।
आरात्तदा तु नृपतेर्वामाक्षादश्रु चापतत् ॥ 36 ॥

तं दृष्ट्वा ब्राह्मणः प्राह नाहं गृह्णामि ते वपुः।
त्वं रोदिषि महाराज वामाक्षादश्रु चापतत् ॥ 37 ॥

श्रुत्वैतद्विप्रवाक्यं तु नाहं रोदिमि भो द्विज।
इदं वामं शरीरार्द्धं रोदित्येतद्विचार्य भोः ॥ 38 ॥

सहैवावां समुद्भूतौ सह संवर्द्धितौ पुनः।
दक्षिणार्द्धस्य तद्भाग्यं यत्कृष्णार्थं व्रजत्यहो ॥ 39 ॥

ममैव जन्म सञ्जातं निरर्थकमिति द्विज।
एवं शोकवशादर्द्धं वामरौति[4] न संशयः ॥ 40 ॥

एवं ताभ्यां भिद्यमानः[5]सस्मितं प्राह भूपतिः।
दृष्ट्वैतन्महदाश्चर्यमाकाशात्पुष्पवृष्टयः ॥ 41 ॥

---

1. स – क, ख। 2. सुन्दरी – ख। 3. गता – ख।
4. थवा संरौति – ख। 5. ख मध्ये लुप्त पाठः।

अपतन्साधुसाध्विति [1]वागासीद्गगने तदा।
भगवानपि तत्कालं समुत्थायात्मरूपधृक् ॥ 42 ॥

पीताम्बरो घनश्यामः शङ्खचक्रगदादिभृत्।
हस्ताभ्यां मातृसुतयोर्धृत्वा हस्तौ न्यवारयत् ॥ 43 ॥

मयूरध्वजमूर्द्धानं पस्पर्श कृपया हरिः।
तत्करस्पर्शमात्रेण राजाभूदक्षतस्तथा ॥ 44 ॥

उवाच भगवान्भूपः प्रसन्नोऽस्मि महीपते।
वरं ब्रूहि प्रयच्छामि नादेयं किमपि त्वयि ॥ 45 ॥

इति श्रुत्वा वचस्तस्य राजा वचनमब्रवीत्।
अहो कृतार्थो धन्योऽहं कं वरं प्रार्थयाम्यहम् ॥ 46 ॥

योऽसौ साक्षाद्देवतानां न बभूव कदाचन।
भवन्तं चतुर्बाहुं तं पश्यामि नृचक्षुषा ॥ 47 ॥

तथापि चेद्वरं दातुं चिकीर्षसि कृपां मयि।
नैवं परीक्षा[2] कस्यापि कर्तव्येति च देहि मे ॥ 48 ॥

श्रुत्वा तद्राजवचनं संतुष्टो हरिरब्रवीत्।
एवमस्त्विति भूपाय पुनर्वरमदात्प्रभुः ॥ 49 ॥

स्वेच्छया गतशोकस्त्वं कुरु राज्यमकण्टकम्।
इच्छया च सपत्नीकः समेष्यसि ममान्तिकम् ॥ 50 ॥

यावन्मन्नाम लोकेऽस्मिन्तावत्ते सन्ततिर्नृप।
स्थास्यत्यवनिमध्ये तु दुःखशोकविवर्जिता ॥ 51 ॥

इत्येवं तु वरं दत्त्वा कृष्णो ब्राह्मणरूपधृक्।
निर्ययौ द्वारिकां रम्यामर्जुनेन समन्वितः ॥ 52 ॥

ततोऽर्जुनोऽपि मनसा दृष्ट्वा तत्परमाद्भुतम्।
अतिभक्तोऽहमित्येतां मुमोचाहंकृतिं निजाम् ॥ 53 ॥

एवं भक्तिवशाल्लोके [3]तृणीकृत्यात्मजीवनम्।
प्रीणयन्ति जनाः कृष्णं धन्याः सन्ति महीतले ॥ 54 ॥

---

1. तदासीद्गगनवाक् तदा – क, ख। 2. परीक्ष्य – ख।
3. तृर्ण – ख, ग।

तस्मादनित्यं धनपुत्रमित्रकलत्रराज्यादिसुखं विहाय।
तस्यात्मना स्वस्य हिताय विद्वान्कृष्णं शरण्ये[1] शरणं प्रयातु॥ 55॥

इति श्रीभगवद्भक्तिमाहात्म्ये मयूरध्वजचरितं नामाष्टादशः सर्गः॥ 18॥

❊ ❊ ❊

नवदशः सर्गः

॥ प्रह्लादचरितम्॥

प्रह्लादचरितं शास्त्रे लोके यद्यपि विश्रुतम्।
तथापि वक्ष्ये संक्षेपाच्छृणुतां पापनाशनम्॥ 1॥

आसीद्धिरण्यकशिपुः पुरा दैत्याधिपो बली।
स चोग्रं तप आस्थाय तोषयित्वासुरो विधिम्॥ 2॥

अजेयः स्यामिति वरं लब्ध्वाऽजेयो बभूव सः।
जित्वा लोकत्रयं दैत्यः पीडयामास देवताः॥ 3॥

एवं गतेषु कालेषु बभूवुस्तस्य वै सुताः।
प्रह्लादाद्या महावीर्याः पितृतुल्यपराक्रमाः॥ 4॥

तेषां प्रह्लादो ज्येष्ठस्तु जातः स वैष्णवोत्तमः।
हिरण्यकशिपुस्तं तु शुक्राचार्याय चार्पयत्॥ 5॥

इमं पाठ्यं बालं मे यथा स्यात्पण्डितो युधि।
इत्युक्त्वा तं गृहीत्वाथ शुक्राचार्यः स्ववेश्मनि॥ 6॥

पाठयामास स गुरुर्युद्धविद्यां प्रयत्नतः।
स तु कृष्णेति रामेति वैकुण्ठादीनि च प्रभोः॥ 7॥

नामानि प्रजपन्नित्यमन्यान्दैत्यसुतानपि।
पाठयामास धर्मात्मा तदा शङ्कां गतो गुरुः॥ 8॥

अहं तु पाठयाम्यन्यदयमन्यद्वदत्यहो।
इति सञ्चिन्त्य तं प्राह प्रह्लादं भार्गवो रुषा॥ 9॥

अरेऽहं पाठ्ये किं ते पठसि त्वं किमन्यथा।
ततस्त्वां दैत्यराज स ताडयिष्यत्यसंशयम्॥ 10॥

---

1. शरण्यं – क, ख।

इत्युक्तः सोऽब्रवीद्वाक्यं गुरुं तं भृगुनन्दनम्।
त्वं गुरुर्नात्र सन्देहः पाठयस्यथ[1] मां हितम्॥ 11॥

परन्तु सर्वशास्त्राणि कृष्णनाम्नि स्थितान्यहो।
इति नैव विजानाति राजा वाथ भवानपि[2]॥ 12॥

तस्माल्लाघवतोऽहं तु पठामि नामकेवलम्।
अत्र श्रमो महान्नेव सारभूतं परन्त्विदम्॥ 13॥

येनेदं सकलं विश्वं कृत्वा सम्पाल्य लीलया।
संह्रियते क्षणार्ध्देण तन्नाम्नोऽन्यत्किमस्ति भोः॥ 14॥

तस्मात्पिता भगवानहो यद्वा तद्वा करोतु वै।
नामसङ्कीर्तनं विष्णोर्न त्यक्ष्यामि कदाचन॥ 15॥

इति श्रुत्वा वचस्तस्य प्रह्लादस्य तदा गुरुः।
शङ्कितो दैत्यराजेन शत्रुपक्षाश्रितः शिशुः॥ 16॥

कृतोऽनेनैव गुरुणेत्येवं तस्य भवेद्यदि।
तदानर्थो महान्मे स्यात्ततो नाध्यापयाम्यहम्॥ 17॥

गृहीत्वा बालमेनं[3] तु यास्यामि राजसन्निधिम्।
कथयिष्यामि सर्वं तं स करिष्यति यद्धितम्[4]॥ 18॥

एवं विचारयत्यस्मिन्[5] राजा प्रह्लादमाह्वयत्।
श्रुत्वाह्वानं गतस्तत्र लालयित्वा पितापितम्॥ 19॥

आरोप्याङ्केऽथ पप्रच्छ किमपाठीरहो गुरोः।
श्रुत्वा [6]पितुर्वचस्तूर्णं प्रह्लादश्चातिहर्षितः॥ 20॥

ईश्वरार्पितबुद्धिः स विष्णोर्नामान्यजस्रशः।
पपाठ पितुरङ्कस्थस्सुस्वरं[7] मधुराक्षरम्॥ 21॥

श्रीराम नारायण वासुदेव गोपाल गोविन्द मुकुन्द कृष्ण।
पठामि चाहं किल सर्वसारं गुरुस्तु मामन्यदुवाच किञ्चित्॥ 22॥

---

1. स्वाथ – ख पाठः।
2. भगवानपि – ख, ग।
3. बालमेतः – ख।
4. द्विजम् – क, ख।
5. चित्ते – क।
6. पितृ – क, ग।
7. स्वसरं – क, ग।

इति श्रुत्वा ततो दैत्य: कर्णशूलमिव क्रुधा।
स्वाङ्कात्तं पातयामास प्रह्लादं बालकं ज्वलन्॥ 23॥

शत्रुनाम जपन्मूर्खो यशो गायसि तस्य वै।
यो मे सदा कुलद्वेषी हन्तुमिच्छति न: सदा॥ 24॥

तत्किं तस्माद्विभेषि त्वं किं ते स तु करिष्यति।
मयि जीवति का भीतिस्तस्य वान्यस्य पुत्रक॥ 25॥

तस्मात्त्यजारिपक्षं त्वं शास्त्रेषु निरतो भव।
इति श्रुत्वा पितुर्वाक्यं प्रह्लादस्तमुवाच ह॥ 26॥

पित: स्वशास्त्रमेतन्मे यत्पठामि तवाग्रत:।
स ते सदा कुलद्वेषीत्येवं यद्भाषते भवान्॥ 27॥

एतदप्यविचार्यैव न मे शत्रुर्नवा सुहृत्[1]।
अस्मान् जिघांसतीत्येतद्यदुक्तं तु तदप्यसत्॥ 28॥

स एव सर्वभूतेषु स्थित: सर्वमयी यत:[2]।
तत: क: कञ्जिघांसेद्वै भ्रम एव न संशय:॥ 29॥

भीतोऽहं सम्प्रपन्नोऽस्मीत्येतत्सत्यं वचस्तव।
परन्त्वपारसंसारपारावारगतो जनम्॥ 30॥

नहि तस्मात्समुद्धर्तुमन्यो वै भुवनत्रये।
तस्मात्त्वमपि दैत्येन्द्र विरोधं त्यक्तुमर्हसि॥ 31॥

इति ब्रुवन्तं प्रह्लादं हिरण्यकशिपुस्तदा[3]।
निरैक्षतातिक्रोधेन नेत्राभ्यान्निर्दहान्निव॥ 32॥

अथान्तरे समायातो भार्गवो[4] भयविह्वल:।
जयेति शब्दमुच्चार्य दत्त्वा शीर्षादमाह तम्॥ 33॥

दैत्यराज महानेष स्वतन्त्रो[5] नैव मामपि।
गणपत्यात्मनैवायं सिद्धान्तमधिगच्छति॥ 34॥

अन्यानपीह बालान्वै शिक्षयत्येष दुर्मति:।
इति श्रुत्वाथ दैत्येन्द्र: सन्तोष्य पुनरब्रवीत्॥ 35॥

---

1. वासुदेवहृत – क, ग।
2. तदा – क।
3. क्रुधा – ख, ग।
4. अद्यार्गवो – ख, क।
5. स्वतंयो – ख।

पुनस्तदेव सम्प्राह प्रह्लादो निर्भयः शिशुः।
एवं मुहुः[1] शिक्ष्यमाणो न स्वीचक्रे तदीरितम्॥ 36॥

दैत्यराजः सुतं तन्तु हन्तुं चक्रे मनस्तदा।
बध्वा तं दृढपाशेन चाण्डालाय समर्पयत्॥ 37॥

इमं वै भूधरान्छृङ्गान्निपातय महीतले।
पतितो म्रियतामेष इत्याज्ञां कुरु मे द्रुतम्॥ 38॥

ततस्तं स समानीय पर्वताग्रादपातयत्।
प्रह्लादस्तु तदा विष्णुं चिन्तयञ्जगतीपतिम्॥ 39॥

पतितोऽप्यथ पर्यङ्के शयान इव चाभवत्।
दृष्ट्वापि परमाश्चर्यं तमोगुणवशोऽसुरः॥ 40॥

नामन्यद्धरेरेतद्भक्तिमाहात्म्य[2]जम्फलम्।
तत आहूय सर्पांस्तु तक्षकादीन्विषोत्वणान्॥ 41॥

येषां फुत्कारमात्रेण भस्मसाद्वै भवेद्गिरिः।
उवाच यूयं प्रह्लादं सन्दंश्य[3] यमसादनम्॥ 42॥

प्रापयध्वं ममाज्ञैषा मा विचारयतात्र भोः।
इति श्रुत्वा वचस्तस्य दैत्येन्द्रस्य वशानुगाः॥ 43॥

गत्वा प्रह्लादमदशन् फुत्कृत्यं तं महाविषाः।
प्रह्लादस्तु सहन्कृष्णं सस्मार गरुडध्वजम्॥ 44॥

अथ कृष्णप्रसादेन[4] प्रह्लादः पूर्ववत्स्थितः।
सर्पाणामधरोष्ठानि चूर्णान्यासंस्त्वचोपि वा॥ 45॥

विदीर्णदंशनाभग्ना मूलादुत्पाटिताकृतिः।
ततः परावृत्य गतास्सर्प्पा दैत्येशसन्निधिम्॥ 46॥

दर्शयन्तो ह्यवस्थां स्वामूचुः प्राञ्जलयो भयात्[5]।
अहो दन्ताविशीर्णा नः फुटिता मणयोऽपि च॥ 47॥

---

1. प्राहुः – ख, ग।
2. क्षणाद् – ख।
3. संदस्य – ख।
4. प्रसीदेन – ख।
5. ऽभवत् – ख, ग।

त्वचो जीर्णा न यास्यामश्चूर्णितानि मुखानि नः ।
प्रह्लादं दशतां पश्य तस्माद्विज्ञापयामहे ॥ 48 ॥

शाधि[1] कार्यान्तरं नोऽद्य नास्मिन्कार्ये निजो जयः ।
इति श्रुत्वा ततस्तूष्णीं स्थित्वा दैत्यपतिः क्रुधा ॥ 49 ॥

आनाय्य हस्तिनं मत्तं तत्पादे तं न्यवेशयत् ।
अथान्तरे स सस्मार कृष्णस्य चरितं तु तत् ॥ 50 ॥

हस्ती कुवलयापीडो यथा तेन निपातितः ।
ततस्तस्योपरिष्ठात्तु हस्तीपादं दधार सः[2] ॥ 51 ॥

अथ कृष्णप्रसादेन प्रह्लादाङ्गसमुत्थितः ।
तेजोऽग्निर्भस्मसाच्चक्रे हस्तिपादमधस्तलात्[3] ॥ 52 ॥

ततः श्वित्कृत्य स गजः पपात धरणीतले ।
पतितो मूर्च्छितो हस्ती ममाराश्चर्यमित्यहो ॥ 53 ॥

दृष्ट्वा तं पतितं भूमौ हस्तिनं क्रोधमूर्च्छितः ।
पुनराज्ञापयामास बध्वागाधे महाह्रदे ॥ 54 ॥

निपातयैनं तत्रैव मग्नप्राणान्प्रहास्यति ।
दैत्येश्वर वचश्श्रुत्वा प्रह्लादं राक्षसा द्रुतम् ॥ 55 ॥

निन्युर्जले महागाधे बध्वा तत्राप्यसौ हरिम् ।
सस्मार कमलाकान्तं जलशायिनमच्युतम् ॥ 56 ॥

अथागत्य जहो विष्णुः संस्तभ्य सलिलं ततः ।
बन्धनान्मोचयामास सोऽप्यस्तौषीद्धरिं मुदा ॥ 57 ॥

ततः कालेन कियता प्रह्लादो शुष्कविग्रहः ।
निर्बन्धनः समायातो दृष्ट्वा तं दितिजेश्वरः ॥ 58 ॥

अहो समागतोऽयं भो न मृतोऽस्त्यतिपामरः[4] ।
तस्मादेनं महारिष्टं वह्नौ संस्थापयाम्यतः ॥ 59 ॥

वह्निना भस्माद्भूतो भविष्यति न संशयः ।
इति सञ्चिन्त्य मनसा कुम्भकारमथाह्वयत् ॥ 60 ॥

---

1. साधि – ख, ग।
2. यः – क।
3. स्थलात् – ख।
4. ख मध्ये लुप्तः पाठः।

आपाके सन्निवेश्यैनं पश्चाद्दीपय पावकम्[1]।
यथायं[2] तत्र प्रह्लादो भवेद्भस्म तथा कुरु॥ 61॥

इत्युक्तस्तं गृहीत्वाथ बध्वा चापाकमध्यतः।
निवेश्याच्छादयित्वा तं दीपयामास पावकम्॥ 62॥

अथ सस्मार कृष्णं स सृजन्तं मुखतोऽनलम्।
पञ्चभूतस्य कर्तारं सर्वसङ्कष्टनाशनम्॥ 63॥

तत समागत्य हरिरतिशीतोऽनलोऽस्तु ते।
इत्युक्त्वा मोचयित्वा तं जगाम निजधाम सः[3]॥ 64॥

ततः आपाकमध्ये तु स्थितः सोऽतीव हर्षितः।
तत्संसर्गात्समीपस्थो न पक्वः भाण्डसञ्चयः॥ 65॥

अथ प्रभाते दैत्यास्ते समाजग्मुर्नृपाज्ञया।
निर्वापितेऽग्नौ भाण्डानि कुम्भकारोऽग्रहीत्ततः॥ 66॥

मध्ये ददर्श प्रह्लादं मुदितं पूर्ववत्स्थितम्।
तत्संसर्गवशाद्भाण्डान्यपक्वान्येव कानिचित्॥ 67॥

इत्येतत्परमाश्चर्यं दर्शयामास कुम्भकृत्।
दृष्ट्वा तत्परमाश्चर्यं राक्षसराजसन्निधिम्॥ 68॥

गत्त्वाऽब्रुवन् महाराज प्रह्लादो निर्भयः सुखी।
निर्बन्धनः स्थितस्तत्र समायात्येष पश्य तम्॥ 69॥

इति श्रुत्वाथ तं दृष्ट्वा प्रह्लादं दितिजेश्वरः।
अहो नायं मृतः पापी बहुभिश्चाप्युपद्रवैः॥ 70॥

अरिष्टोऽयं महानेष मम जातो न संशयः।
इत्येव क्रोधतः सत्यं बभाषे दनुजेश्वरः॥ 71॥

कालपाशवशो मर्त्यो न जानाति हिताहितम्॥ 72॥

इति श्रीभगवद्भक्तिमाहात्म्ये प्रह्लादचरितं नामैकोनविंशः सर्गः॥ 19॥

❊ ❊ ❊

---

1. चालनम् – क, ग।
2. यथा तन्त्रे – ख, ग।
3. धर्म्मतः – ख।

विंशः सर्गः

॥ प्रह्लादचरितम् ॥

अथ कालवशो राजा तं हन्मि स्वयमेव हि।
इति निश्चित्य मनसा सभायामाययौ ज्वलन् ॥ 1 ॥

आनाप्य तं निजं बालं प्रह्लादं वैष्णवोत्तमम्[1]।
पप्रच्छ चित्ते किं तेऽस्ति न करोषि मदीरितम्[2] ॥ 2 ॥

इति श्रुत्वा ततः प्राह प्रह्लादः पितरं मुदा।
करोमि भवतामेव कथितं नात्र संशयः ॥ 3 ॥

अविचिन्त्यात्ममरणं भवदुक्तं करोम्यहम्।
सर्पाणां दंशनं मत्तगजपादतले स्थितिम् ॥ 4 ॥

धराधराग्रात्पतनमापाकाग्नौ निवेशनम्।
जलनिर्मज्जनादीनि प्राणहारीणि यद्यपि ॥ 5 ॥

कर्माणि तात भवतो वाक्यादेव कृतानि भोः।
किमथैवं महाराज किं वृथा मयि कुप्यसि ॥ 6 ॥

इति श्रुत्वा महाकोपाद्धिरण्यकशिपुस्सुतम्।
प्राह साक्षेपवचनं यद्बलात्प्रवदत्यहो[3] ॥ 7 ॥

तं पश्यामि कथं त्वां तु संरक्षति ममाग्रतः।
इत्युक्त्वा खड्गमादाय दुर्निरीक्ष्य सुरासुरेः ॥ 8 ॥

वामहस्तेन तं बालं गृहीत्वा प्राह कोपवान्।
हिरण्यकशिपुः प्राह कुत्रास्ते स हरिस्तव ॥ 9 ॥

दर्शयाद्य न चेत्त्वां तु घातयामि न संशयः।
इति श्रुत्वा वचस्तस्य दैत्येन्द्रस्य सभासदः ॥ 10 ॥

---

1. जनम् – क, ग।
2. प्रदीरितम् – ख।
3. प्राह को यवान् – ख।

भयात्तूष्णीं स्थितास्तत्र ददृशुश्च महाद्भुतम्।
प्रादुर्भवति यस्मिन्वै मृत्युमाप्नोति भूपतिः ॥ 11 ॥

चचाल वसुधा भीता सशैलवनकानना।
न बभावपि मध्याह्ने गगने रविमण्डलम् ॥ 12 ॥

हिरण्यकशिपोर्वेश्म शिवागृध्रैरथावृत्तम्।
एवं ज्ञात्वा महोत्पातं ततो वृद्धा ययुर्गृहम् ॥ 13 ॥

हिरण्यकशिपुस्तं तु प्रह्लादं प्राह कोपतः।
अरे दर्शय मे पश्य तस्मादस्ति बलं तव ॥ 14 ॥

न चेदनेन खड्गेन निहन्मि त्वां न संशयः।
इति श्रुत्वा पितुर्वाक्यं प्रह्लादो वाक्यमब्रवीत् ॥ 15 ॥

अहो यद्भगवानाह तं दर्शय ममाद्य भोः।
इति सङ्गच्छते नैव सर्वात्मनि हरौ स्थिते ॥ 16 ॥

यतश्चैकस्थितोऽन्यत्र न स्यात्तं तत्र[1] दर्शयेत्।
तदा सर्वत्र तिष्ठन्तं सदा सर्वस्वरूपिणम् ॥ 17 ॥

कथं तं दर्शयिष्यामि[2] सर्वं पश्य हरिं प्रभो।
ग्रामे गृहे सभायां च सभास्थेषु भवत्स्वयम्[3] ॥ 18 ॥

मयि स्तम्भेऽथ खड्गे च हरिः सर्वत्र तिष्ठति।
इति श्रुत्वा वचस्तस्य प्रह्लादस्य महात्मनः ॥ 19 ॥

उवाच प्रहसन्नद्य विक्षिप्तोऽभूर्न संशयः।
स्तम्भेऽस्मिन्नास्ति स हरिरित्येतद्यत्प्रजल्पसि ॥ 20 ॥

इत्युक्त्वा तं[4] पुनः प्राह हिरण्यकशिपुर्हसन्।
अरे स्तम्भे च स हरि ? स्तम्भं तिष्ठति सर्वदा ॥ 21 ॥

इत्युक्तः प्राह पितरं प्रह्लादश्चातिहर्षितः।
अहो सत्यं महाराज स्तम्भेऽस्मिन्नस्ति मे प्रभुः ॥ 22 ॥

---

1. तस्मात्तत्र दर्शयेत् – क, ग।
2. दर्शयिष्ये कथं हन्त – क, ख।
3. स्वथ – क, ग।
4. त्वम् – ख, ग।

इति श्रुत्वा वचस्तस्य त्यक्त्वा तं बालकं रुषा।
वामेन पाणिना स्तम्भं जघानेति वदन्नरे[1] ॥ 23 ॥

समायातु तमप्येष हन्मि नास्त्यत्र संशयः।
इत्युक्तवति दैत्येन्द्रे बालं हन्तुमथोद्यते ॥ 24 ॥

स्तम्भं भित्वा प्रादुरासीन्नरसिंहो महाबलः।
अर्द्धं कृत्वा तु वपुषस्सिंहस्यार्द्धं नरस्य तु ॥ 25 ॥

लेलिहानमहाजिह्वो वज्राधिक[2]महानखः।
दंष्ट्रा दुःप्रेक्ष्य पञ्चास्य सटानिर्भिन्नवारिदः ॥ 26 ॥

उत्पत्य नरसिंहस्तं हिरण्यकशिपुं रुषा।
निपात्य भूमौ हृत्कोष्टं नखैस्तस्य[3] व्यादारयत् ॥ 27 ॥

विदीर्णवपौ दैत्येन्द्रो नेत्रे जिह्वां प्रसार्य च।
ममारात्यद्भुतं दृष्ट्वा सर्वं हाहेति वादिनः ॥ 28 ॥

नरसिंहभयाद्दैत्या दिशो दशपलायिताः।
अथ जाज्वल्यमानः स नृसिंहस्तत्सभास्थितः ॥ 29 ॥

दुर्निरीक्ष्यस्तु जन्तूनां निदेहन्निव तेजसा।
ज्ञात्वावतारं नृहरेर्निहतं सुरकण्टकम् ॥ 30 ॥

ब्रह्माणं पुरतः कृत्वा जग्मुरिन्द्रादयस्सुराः।
तत्रागत्य न ते द्रष्टुं शेकुस्तं नृहरिं प्रभुम् ॥ 31 ॥

अति दुर्दर्शतेजोभिर्नतग्रीवा अथामराः।
प्रह्लादं तु पुरस्कृत्य तुष्टवुर्हृष्टमानसाः ॥ 32 ॥

नमो विष्णवे दुष्टदैत्यान्तकाय प्रपन्नार्तिहर्त्रे धराभारहर्त्रे।
जगद्भूतिरक्षाविरामैर्विहर्त्रे सदाभक्तकार्याय रूपाणि धत्रे ॥ 33 ॥

वरेण्याय विद्याविधात्रे विवस्वद्विधूद्भासिनेत्राय पीताम्बराय।
श्रियोवेदवेद्याय वेदान्तकर्त्रे विधात्रे विरूपाक्षरूपाय तुभ्यम् ॥ 34 ॥

---

1. कृते – क।
2. वज्ज – ख, ग।
3. तत्र – ख, ग।

नमो मत्स्यवाराहकूर्मस्वरूपैर्धरित्री सदा बिभ्रते वामनाय।
नमः कल्किने रामकृष्णात्मने ते नमो रामचन्द्राय रामाय तुभ्यम्॥35।

एवं स्तुत्वा सुरगणास्तस्थुस्तूष्णीं दिवौकसः।
नृसिंहोऽपि च प्रह्लादं जिघ्रन्सौम्योऽब्रवीत्सुरान्॥ 36 ॥

अहो देवा भवन्तो वै व्रजन्तु स्वं स्वं मन्दिरम्।
विधेराज्ञां पुरस्कृत्य स्वे स्वे वर्त्मनि संस्थिताः॥ 37 ॥

विहरध्वं यथाकामं मोदध्वं विगतज्वराः।
अयं त्वतीव मे भक्तः प्रह्लादो दैत्यसत्तमः॥ 38 ॥

एतदर्थमभूवं च सिद्धमिष्टं प्रयत्नतः।
एवमुक्त्वा स देवस्तु प्रह्लादाय वरं ददौ॥ 39 ॥

पुनर्देवानुवाचाथ भगवान्भक्तवत्सलः।
शृणुताहोऽमरगणाः स मे भक्तः स मे प्रियः॥ 40 ॥

आत्मापि च ततो यो मे भक्तं द्रुह्यात्स मे रिपुः।
इत्युक्त्वा नरसिंहस्तु जगाम चोत्तरां दिशम्॥ 41 ॥

देवा अपि हरिं नत्वा जग्मुस्ते स्वं स्वमालयम्।
प्रह्लादोऽपि ततश्चक्रे भक्त्या तस्योर्द्ध्वदेहिकम्॥ 42 ॥

एवं भक्तिवशः कृष्णो भक्तं रक्षति सर्वदा।
न वासुदेवभक्तानामशुभं विद्यते क्वचित्॥ 43 ॥

इत्यादिव्यासवचनात्प्रह्लादश्चिरजीवनात्।
सत्यमेव न सन्देहस्स्वानुभूतमिदं मम॥ 44 ॥

यदीदं शृणुयाद्भक्त्या प्रह्लादचरितं शुभम्।
सङ्कष्टा नैव जायन्ते श्रीकृष्णस्य प्रसादतः॥ 45 ॥

इति श्रीभगवद्भक्तिमाहात्म्ये प्रह्लादचरितं नाम विंशः सर्गः॥20॥

❊ ❊ ❊

एकविंशः सर्गः

॥ निम्बादित्यचरितम् ॥

अथ वक्ष्ये पुराणेषु यथोक्ता[1] भगवत्प्रियाः।
तेषां भक्तेषु माहात्म्यं पारम्पर्याद्यथाश्रुतम्[2] ॥ 1 ॥

कलेर्गतेषु कतिषु वत्सरेष्वभवंस्तु ये।
भविष्ये व्यासदेवेन नोक्ता विस्तारकारणात् ॥ 2 ॥

किञ्चानन्त्यादपि तथा इदानीमपि भूरिशः।
भवन्ति भगवद्भक्ता[3] भविष्यन्ति तथापरे ॥ 3 ॥

परन्तु भक्तिः सर्वेषां भवसागरतारिणी।
इत्याह भगवान्व्यासश्शवरी[4] गजकीर्त्तनात् ॥ 4 ॥

वर्णाश्रमाश्रितानां तु नराणां भक्तिमात्रतः।
उद्धारो जायते भक्तिमाहात्म्यान्नात्र संशयः ॥ 5 ॥

स्वधर्मनिरतानां तु स्वधर्मः कल्पपादपः।
न कदाचित्तु तं जह्यात्प्राणैः कण्ठगतैरपि ॥ 6 ॥

स्वधर्मे निधनं श्रेयः परधर्मे भयावहः।
श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात् ॥ 7 ॥

इत्यादि भगवद्वाक्यात्स्वधर्मं पालयेत्सदा।
स्वधर्मस्य च भक्तेश्च न विरोधोऽस्ति कश्चनः ॥ 8 ॥

नारदाद्यास्स्वधर्मेषु स्थिता भक्तिं प्रकुर्वते।
तथा राजर्षयोऽन्ये तु जनकाद्यास्स्थिता भुवि ॥ 9 ॥

राजानोऽन्येऽपि बहवश्चन्द्रहासादयस्तथा।
ये स्वधर्मच्युतास्तेषां भक्तितोऽन्यं न तारकम् ॥ 10 ॥

स्वधर्मनिरतानां तु भक्तिस्स्यादेव तद्बलात्।
यथा काशीपुरी नृणां सर्वेषां तारिणी भुवि ॥ 11 ॥

---

1. यनोक्ता – क, ख।
2. परम्पर्य्याद्यथाश्रुतम् – ख; परम्पर्य्याद्यथाश्रुतम् – क ।
3. भक्त्या – ख।
4. सवरी – ख, ग।

पुण्यात्मनां पापिनाञ्च[1] तथा भक्तिर्हि तारिणी।
बन्धनं पापपुण्याख्यं भित्वा जीवं विमुञ्चति॥ 12॥

तेषां भक्तिःस्स्ववतो नैव न लब्धो यैस्तथा गुरुः।
तेषां भक्तिकथैवेयं भक्तिदात्री न संशयः॥ 13॥

तस्माच्छास्त्रीयभक्तानां प्रथमं[2] कथिता कथा।
अतः परन्त्वनुक्तानां पुराणचरितं ब्रुवे[3]॥ 14॥

आसन्सिद्धान्तकर्त्तारश्चत्वारो वैष्णवा द्विजाः।
यैरियं पृथिवी मध्ये भक्तिमार्गे दृढीकृता॥ 15॥

विष्णुस्वामी प्रथमतो निम्बादित्यो द्वितीयकः।
मध्वाचार्यस्तृतीयस्तु तुर्यो रामानुजस्स्मृतः॥ 16॥

कृष्णदासेति नाम्नाभूच्छिष्यो वै विष्णुशर्मणः।
कृष्णदासस्य शिष्याणां नामानि कथयाम्यहम्॥ 17॥

कीलाग्रदेवं हेमाख्यं गङ्गा कल्याणकन्धराः।
विष्णुदासस्तथा रङ्गा वामनेत्यादयो मताः[4]॥ 18॥

अत्रैव वल्लभाचार्यो विष्णुस्वामिकुलेऽभवत्।
रामानुजस्य शिष्यस्तु देवाचार्यो महामतिः॥ 19॥

ह्य्यनिन्देति विख्यातो महामहिमकः परः।
राघवानन्द इत्येष शिष्यो वैष्णवसत्तमः॥ 20॥

राघवानन्दशिष्याणां नामानि कथयाम्यहम्।
अनन्तानन्द इत्येष भावानन्दस्ततःपरम्॥ 21॥

सुखासुरस्सुरा पद्मावती नरहरिस्तथा।
पीपाश्च रविदासश्च कबीरः सदनस्तथा॥ 22॥

धन्वासुरस्सुरश्चैव तथा धरहरिस्स्मृतः।
एते चान्ये च बहवो रामानुजकुलोद्भवाः॥ 23॥

वैष्णवास्तस्य शिष्योपशिष्यैर्व्याप्तमिदं जगत्।
एतेषां तु कथामग्रे कथयिष्यामि विस्तरात्[5]॥ 24॥

1. पाववर्त्ता – क।
2. मप्ययम् – क।
3. ब्रुवैः – क, ग।
4. स्मृता – ख।
5. द्विजस्तरात् – क, ग।

निम्बादित्यकथां वक्ष्ये महाश्चर्यप्रदायिनीम्।
निम्बादित्येति नाम्नाभूद्यथा तस्य वदामि तत्॥ 25 ॥

एकदा स महाभक्तः शुश्राव ग्राममागतम्।
दण्डिनं तं स्वयं नत्वा भोजनाय न्यमन्त्रयत्॥ 26 ॥

अथागत्याब्रवीत् कञ्चिच्छिष्यं पाकं कुरु द्रुतम्।
श्रुत्वा गुरोर्वचः शिष्यस्सामग्रीं कर्तुमुद्यतः॥ 27 ॥

कृत्वा कथञ्चित्सामग्रीं पपाचातिप्रयत्नतः।
तदा सायमभूद्दृष्ट्वा भिक्षुराचार्यमब्रवीत्॥ 28 ॥

अतः परं न भोक्तव्यं मया रात्रिरुपस्थिता[1]।
निशायां भोजनं नैव विहितं मम वर्तते॥ 29 ॥

इति श्रुत्वा वचस्तस्य निम्बादित्योऽतिचिन्तितः।
कृष्णं सस्मार मनसा चक्रायुधमनन्यधीः॥ 30 ॥

ततः स भगवांश्चक्रं प्राह तत्र व्रज द्रुतम्।
मद्भक्तवचनात्पश्चादादित्यमिव तिष्ठ भोः॥ 31 ॥

भुञ्जीत यावद्भिक्षुर्वै पुनरायाहि[2] सत्वरम्।
इति श्रुत्वा प्रभोर्वाक्यं चक्रं तदतिसत्वरम्॥ 32 ॥

आगत्याचार्यभवनात्पश्चिमायां स्थितं ह्यभूत्।
आचार्यस्तु ततो निम्बवृक्षसम्मुखितो रविम्॥ 33 ॥

दृष्ट्वा तं दर्शयमास भिक्षुकं परया[3] मुदा।
पश्यादित्यस्य बिम्बं[4] भोः त्यज शङ्कां निशः प्रभो॥ 34 ॥

इत्युक्तस्तेन भिक्षुस्स स्वयं दृष्ट्वार्कमण्डलम्।
बुभुजेऽथ समुत्थाय[5] हस्तप्रक्षालनोत्तरम्॥ 35 ॥

आचम्य मुखसंशुद्धिं गृहीत्वा पुनरैक्षत।
महान्धकारं मार्गे स गन्तुमप्यक्षमोऽभवत्॥ 36 ॥

---

1. एतत्किम् – क।
2. आयाति – ख, ग।
3. पस्या – ख, ग।
4. निम्बम् – क।
5. मुह्यायय – ख, ग।

भिक्षुः प्राह तदाचार्यं किमेतद्वद भो द्विज।
आचार्यः प्राह तं भिक्षुं भक्तिगद्गदया गिरा॥ 37॥

भवानेव[1] हि जानाति भवानेव ब्रवीतु नः।
इति श्रुत्वा वचस्तस्य भिक्षुः प्राहातिहर्षितः॥ 38॥

अहो रात्रिरभूत्सत्यं परन्तु भगवान् हरिः।
त्वद्धर्मरक्षणार्थाय चक्रं तत्र नियुक्तवान्॥ 39॥

तेन तावद्दिवमभूच्चक्रे तत्र स्थिते सति।
ममापि पापं नाभूद्वै रात्रिभोजनजन्त्विह॥ 40॥

मद्भोजनार्थमेतावान्प्रयासो[2] हरिणा कृतः।
तस्मिन्कृते पापानि यच्चिकीर्षति माधवः[3]॥ 41॥

इत्युक्त्वा स पुनः प्राह तमाचार्यं वचो यतिः।

यन्निम्बे दर्शयित्वाहमादित्यं भोजितो निशि॥ 42॥

निम्बादित्य इति ख्यातं तव नाम भविष्यति।
इत्युक्त्वा स गतो भिक्षुः क्वचित्कृष्णायतीं[4] निशम्॥ 43॥

निम्बादित्योऽपि बुभुजे सहशिष्यैर्हरिं स्मरन्।
एवं भक्तस्य[5] रक्षार्थं भगवान्भक्तवत्सलः॥ 44॥

उपायं कुरुतेऽत्यर्थं स्मृतमात्रस्तु तत्क्षणात्।
परन्तु कृत्वा विश्वासं यो[6] हितं शरणं व्रजेत्॥ 45॥

इति श्रीभगवद्भक्तिमाहात्म्ये निम्बादित्यचरितं नामैकविंशः सर्गः॥ 21॥

❊ ❊ ❊

द्वाविंशः सर्गः

॥ जामातचरितम् ॥

जामात इति विख्यातशिशष्यो रामानुजस्य हि।
सोऽतिभक्तो बभूवास्य कथां वच्मि मनोहराम्॥ 1॥

---

1. भवनेव – क।
2. पस्या – ख, ग।
3. माधयः – क।
4. सुधायतां – क, कृष्णपता – ख।
5. रक्ष्यार्थ – क।
6. यद्धितम् – ख।

स तु रामं भजन्प्रेम्णा वैष्णवानां तु दासवत्[1]।
चकार परिचर्यां वै कर्मणा मनसा गिरा॥ 2॥

एकदा स तु जामातः[2] पुष्पं नेतुं व्रजन्पथि।
ददर्श पतितं ग्रामाद्बाह्यो कञ्चिन्मृतं नरम्॥ 3॥

गोपीचन्दनलिप्ताङ्गं सर्वाङ्गे[3] तुलसीस्रजम्।
दृष्ट्वा तं वैष्णवं मोहात्हा[4] हा कृत्वा न्यवर्तत॥ 4॥

तमुत्थाय शवं मूर्ध्नि भारातुरोऽपि सन्।
गत्वा श्मशानभूमौ स तं ददाह सुतो यथा॥ 5॥

दृष्ट्वैतदन्ये ये तत्र स्थिता वै वैष्णवा जनाः।
ते सर्वे गर्हयाञ्चक्रुर्विक्षिप्तोऽयमभूत्किल॥ 6॥

कस्येदं मृतकं मूर्ध्नि नीत्वा यत्संस्करोति भोः।
अत एवं न स्प्रष्टव्यः पङ्क्तेस्तिष्ठतु बाह्यतः॥ 7॥

जामातस्तु ततश्शोकादागत्य निजमन्दिरम्।
त्यक्तोऽशनोदको रात्रौ सुष्वाप श्रीहरिं स्मरन्॥ 8॥

अथ प्रातः समुत्थाय स्नात्वा भुक्त्वा समुत्थितः।
चतुर्थे दिवसे साधु भोजनाय समुत्सुकः॥ 9॥

गृहे यत्किञ्चिदासीद्वै धनं तेनाकरोत्स्वयम्।
साधूनां भोज्यवस्तूनि तृतीये दिवसे निशि॥ 10॥

गत्वा सर्वस्य गेहे स वैष्णवस्य निमन्त्रणम्[5]।
ददौ ततः परं तत्तु वैष्णवास्तं कदक्षरम्॥ 11॥

ऊचुः कस्ते स्थितो जात्या चाण्डालोऽन्योऽपि वा पुनः।
दग्ध्वा तं पितृवद्यन्नो निमन्त्रयितुमागतः॥ 12॥

अतः परं त्वया साकं न भोक्ष्यन्तीह वैष्णवाः।
किं पुनस्त्वद्गृहेऽन्नानि तस्माद्गच्छ यथारुचि॥ 13॥

---

1. दान – ख।
2. जामातुः – ख।
3. विभ्रन्तम् – क, ख।
4. द्वाला – ख।
5. निमन्त्रिणम् – ख।

एवं सर्वैस्तु तत्रत्यै:[1] प्रत्याख्यात: स वैष्णव: ।
जामात: स समागत्य निजगेहे स्थितोऽभवत् ॥ 14 ॥

चिन्तया परमाविष्ट: सस्मार जगदीश्वरम् ।
भगवानथ तं स्वप्ने रात्रौ सर्वमुवाच ह ॥ 15 ॥

अहो शोकं त्यजाशु त्वं प्रात:काले तु वैष्णवा: ।
आगमिष्यन्ति त्वद्वेश्म भोक्तुं यत्प्रेरिता: शुभा: ॥ 16 ॥

भुक्त्वा यदा ते यास्यन्ति तदेमे ग्रामवासिन: ।
स्वयं त्वां प्रार्थयिष्यन्ति भोक्तुं देहीति वै मुहु: ॥ 17 ॥

एवं दृष्ट्वाति सुस्वप्नं जामातश्चारुणोदये ।
जाग्रदुत्थाय हर्षेण गृहं सम्मार्जनादिकम् ॥ 18 ॥

कृत्वा स्नानं हरिं भक्त्या पूजयित्वा समुत्थित: ।
पत्रावलीनां शतशो गृहे चैवाङ्गणे तथा ॥ 19 ॥

स्थापयित्वा ततो वारिपूर्णपात्राण्यनेकश: ।
तत्र संस्थापयामास पादप्रक्षालनस्थले ॥ 20 ॥

एवं दृष्ट्वा तु ते सर्वे अहोऽयं[2] किं करोति[3] वै ।
भोक्तुं न चागत: कोऽपि कथमेवं करोत्ययम् ॥ 21 ॥

कथयत्स्वथ तेष्वेवं शङ्खध्वनिरभून्महान् ।
श्रुत्वा जहर्ष जामातस्ते सर्वे विस्मयं गता: ॥ 22 ॥

तत आगत्य भक्तास्ते विष्णुना[4] प्रेषिता: स्वयम्[5] ।
जामातस्य गृहे गत्वा बुभुजुस्तेपि भक्तित: ॥ 23 ॥

ततस्तान्वैष्णवांस्ते तु ग्रामीणा: वैष्णवा नरा[6]: ।
पप्रच्छुस्ते भुक्तवन्त: क इमे वद मे हि न: ॥ 24 ॥

तेषां मध्ये ततश्चैक: प्राह तांस्तृणवत्तदा ।
अहो[7] वयं विष्णुभक्तद्वेषिण:[8] संवदाम भो: ॥ 25 ॥

---

1. तत्रत्य: ।
2. यत् – क, ग ।
3. करोतु – ख ।
4. विश्रुता – क ।
5. वयम् – ख ।
6. यरा: – ख ।
7. कृत्वा – ख ।
8. द्विषो – ख, ग ।

इत्युक्त्वा ते नभो मार्गे[1] गताः परमवैष्णवाः ।
तेऽपि ग्रामे स्थिताः सर्वे जामातं प्रणिपत्य तम् ॥ 26 ॥

भोजनं पाचयामास जामातस्तानथब्रवीत् ।
अहो तद्भुक्तशेषं तु गृहे यन्मम वर्तते ॥ 27 ॥
तत्सर्वं भवतामेव भक्षयध्वं न संशयः ।
इत्युक्त्वास्ते समायातास्सर्वे ते ग्रामवासिनः ॥ 28 ॥

पुनस्तान्भोजयामास तावन्नेव च वस्तुना ।
जामातस्संस्मरन् कृष्णं तत्प्रसादव्यवर्धतः ॥ 29 ॥

सर्वापि भोज्यसामग्री तैर्भुक्ता तु यथा पुरा ।
एवं भक्तेस्तु माहात्म्यं ज्ञात्वा ते ग्राम[2]वैष्णवाः ॥ 30 ॥

जामातभक्तिं कुर्वन्तो जातास्तेऽपि च वैष्णवाः ॥ 31 ॥

इति श्रीभगवद्भक्तिमाहात्म्ये जामातभक्तिचरितं नाम द्वाविंशस्सर्गः ॥ 22 ॥

❊ ❊ ❊

त्रयोविंशः सर्गः

॥ श्रीमार्गगुरुशिष्यचरितम् ॥

अथापरं प्रवक्ष्यामि माहात्म्यं परमाद्भुतम् ।
श्रीमार्गस्य सशिष्यस्य गुरुभक्तिप्रसङ्गतः ॥ 1 ॥

आसीद्भागीरथीतीरे श्रीमार्गो वैष्णवोत्तमः ।
धनपुत्रादिमोहं स त्यक्त्वा भक्तिपरायणः ॥ 2 ॥

श्रीकृष्णसेवानिरतो जपंस्तत्र स केवलम् ।
तस्यासीदति भक्तो वै शिष्यः पुत्रादपि प्रियः ॥ 3 ॥

एकदा तं समाहूय श्रीमार्गः समबोधयत् ।
अहो[3] वत्स मया नैव जगन्नाथे निरीक्षतः ॥ 4 ॥

तदर्थं यामि त्वं चात्र तावन्तिष्ठेह[4] वेश्मनि ।
अहं दृष्ट्वा जगन्नाथं शीघ्रमेष्याम्यसंशयम् ॥ 5 ॥

---

1. मार्ग ततः – ख ।
2. ग्राम्य – क. ग ।
3. ख मध्ये लुप्तपाठः ।
4. अत्र – ख, ग ।

इयं गङ्गा जगद्धात्री देवी भागीरथी परा।
तारिणी सर्वभूतानां पूज्यते त्रिदशैरपि ॥ 6 ॥

इयं त्वया भक्तिपूर्वं पूजनीया विशेषतः।
यथाहं पूजितो नित्यं तथेमामपि पूजयेत् ॥ 7 ॥

सुखं वसात्र मामेनां विद्धि गङ्गां न संशयः।
इत्युक्त्वा प्रययौ शिष्यं श्रीमार्गः साधुसत्तमः ॥ 8 ॥

जगन्नाथपुरीं शिष्यो भक्त्या वै तद्दिनादि नतः।
गङ्गायां न ददौ पादं गुरुरेवेति[1] निश्चितः ॥ 9 ॥

अन्यत्र गत्वा स्नात्वा च भक्षित्वान्नादिकं पुनः[2]।
कृत्वा नैवेद्यमन्नं च नीत्वा गङ्गातटे स्थितः ॥ 10 ॥

सम्पूज्य जाह्नवीं देवीं गुरुवत्प्रणिपत्य च।
अन्नं निवेद्य गङ्गायै स्वयं स बुभुजे तदा[3] ॥ 11 ॥

एवं सत्वाह्निकं कर्म नित्यं गुर्वागमावधि।
रात्रिभोजनमप्यस्मै गङ्गायै स न्यवेदयत् ॥ 12 ॥

गरुवत्तामहोरात्रं पश्यन्निन्ये तु वत्सरम्।
अथागतो गुरुः सायङ्काले श्रीमार्गवैष्णवः ॥ 13
दृष्ट्वा तमागतं शिष्यः प्रणिपत्य समर्चयत्।
सेवां चकार भक्त्या स पादसंवाहनादिभिः ॥ 14 ॥

अथ तत्र स्थिता ये च गङ्गातीरनिवासिनः ।
श्रीमार्गं तेऽब्रुवन् क्रोधादेष शिष्योऽतिमूढ[4]धीः ॥ 15 ॥

गते त्वयि तदारभ्य अद्यावधिनिरन्तरम्।
गङ्गायां नैव[5] च स्नानं कृतमेतेन पापिना ॥ 16 ॥

अस्माभिर्भर्त्सितोऽप्येष नोवाचोत्तरमप्यसौ।
इति श्रुत्वा गुरुः प्राह अहो स्नास्यत्यतः परम् ॥ 17 ॥

इत्युक्त्वा निशि सुस्वाप प्रातरुत्थाय यत्नतः।
श्रीमार्गशिष्यमाहूय वस्त्रं दत्त्वा तु तत्करे[6] ॥ 18 ॥

---

1. गुरुरेषचिन्तयत् – क।
2. स्नानादिभि – ख, क।
3. सदा – ख.
4. दुष्टधीः – ग।
5. मैवं – ख।
6. ख मध्ये लुप्तः पाठः।

उवाच गच्छ गच्छामि स्नातुं देवसरित्यहम्।
इत्युक्त्वा स जगामाथ गुरुस्तस्याप्यनुद्रुतम्॥ 19 ॥[1]

गत्वा तीरे तस्थिवान्[2] स गुरुस्तु गतवान् जले।
आकण्ठवारिणि स्थित्वा प्राह शिष्यं गुरुस्तदा॥ 20 ॥

अङ्गप्रोक्षणकं वस्त्रमत्रागत्य प्रदेहि मे।
इत्युक्तः स महाकष्टं प्राप शिष्योऽतिभक्तितः॥ 21 ॥

गतो दातुं च तद्वस्त्रमेतस्मिन्नन्तरे जले।
प्रादुर्बभूवुः [3]पद्मानि महान्ति सुदृढानि च॥ 22 ॥

जलाद्वितस्ति मात्रं तु प्रोत्थितानि तु तीरतः।
गुरोस्समीपपर्यन्तं दृष्ट्वा शिष्यस्तु तानि वै॥ 23 ॥

हर्षात्तत्रैव पादौ तु धृत्वा[4] तस्यान्तिके गुरोः।
समागत्य ददौ वस्त्रं दृष्ट्वा सर्वे च दुर्जनाः॥ 24 ॥

प्राहुराश्चर्यमेतद्धोरित्युक्त्वा तत्र चागताः।
स्नात्वा बहिरथागत्य गुरुश्शिष्यमुवाच ह॥ 25 ॥

किमेतन्महदाश्चर्यं त्वत्पादस्थानहेतवे।
पद्मपत्राणि चैतानि प्रादुर्भूतानि किन्नु तत्॥ 26 ॥

इत्युक्त्वा स गुरुं नत्वा शिष्यः प्राञ्जलिरब्रवीत्।
न जानाम्यहमन्यद्वै तव भक्तिं विना प्रभो॥ 27 ॥

त्वं गङ्गाहमिति प्रोच्य जगन्नाथं निरीक्षितुम्।
गतस्तदादिगङ्गायां स्नानं न कृतवानहम्॥ 28 ॥

गङ्गा त्वामेव जानन्वै[5] कथं पादतलेन ताम्।
स्पृशामीति विचार्याहं न पीतमपि तत्पयः॥ 29 ॥

परन्तु केवलं भक्त्या पूजां कृत्वा निरन्तरम्।
स्थितोऽद्यावधि[6] वस्त्राणि देहीत्येवं भवान्यदा॥ 30 ॥

---

1. ख मध्ये लुप्तः पाठः-।
2. समुत्तस्थौ - ख, ग।
3. यमानि - क।
4. गृहीत्वा - क, ख।
5. न्त्वै - क, ग।
6. अग्रावधिः - क, ख।

समवोचत्तदा कष्टं ममासीदतुलं विभो।
कथं दास्यामि गुरवे वस्त्रं तत्र गतोऽधुना॥ 31॥

गङ्गां स्पृशामि पादाभ्यां कथमेतद्विचारणात्।
तावदेतानि पद्मानि प्रादुर्भूतानि दृष्टवान्॥ 32॥

निधाय तत्र चरणौ वस्त्रं तुभ्यं ददाम्यहम्।
भवत्प्रसादान्मे[1] धर्मरक्षणायेह जाह्नवी॥ 33॥

पत्राण्युद्भावयामास भवतामपरा तनुः।
एतज्जानाम्यहं नाथ त्वत्प्रसादादतः परम्॥ 34॥

न जाने तद्भवानेव[2] सर्वं जानाति केवलम्।
इत्युक्त्वा संस्थितस्तूष्णीं गुरुस्तस्मै शुभाशिषम्॥ 35॥

दत्त्वा[3] मुमोद मनसा शतपत्रैश्च सा स्थिता।
न्यस्तेऽपि पद्मेषु पदे ये निनिन्दुश्च दुर्जनाः॥ 36॥

तेऽपि चक्रुर्महाभक्तिं शिष्यस्य च गुरोरपि।
इत्येतदुक्तं चरितं श्रीमार्गगुरुशिष्ययोः॥ 37॥

शृण्वन् भक्त्या [4]मानुषस्तु गुरुमाहात्म्यमुत्तमम्।
लभते महतीं भक्तिं मूर्खो विद्यामवाप्नुयात्॥ 38॥

इति श्रीभगवद्भक्तिमाहात्म्ये श्रीमार्गगुरुशिष्ययोश्चरितं नाम त्रयोविंशस्सर्गः॥ 23॥

❊ ❊ ❊

चतुर्विंशः सर्गः

॥ रामानुजचरितम्॥

रामानुजकथां वक्ष्ये महाश्चर्यप्रदायिनीम्।
यां श्रुत्वा निजधर्मेण भक्तिं प्राप्य हरिं व्रजेत्॥ 1॥

---

1. मद् – क।
2. अन्यद्– क, ग।
3. दत्वा मुमोद मनसा सत्युन्न सा यथा।
   गृहीतेऽपि तत्रस्थिता ये वे निन्दन्ति दुर्जनाः॥ – क, ख पाठः।
4. मनुष्यः – क, ग।

रामानुजो द्विजश्श्रेष्ठश्शास्त्रज्ञो वेदवित्तमः।
आसीत्स दाक्षिणात्येषु [1]सदाचाररतः सदा॥ 2॥

स एकदानुजग्राह मन्त्रं गुरुमुखाद्द्विजः।
गुरुणा चैव मुक्तस्तु मन्त्रोऽयं सिध्यता [2]द्रुतम्॥ 3॥

ततः स भगवद्रूपं[3] पश्यन्तत्क्षणाद्धृदि।
अथागत्य स्वगेहेषु सुप्ते लोके महानिशि॥ 4॥

उच्चैस्स्वरेण तन्मन्त्रमुच्चस्थानात्पपाठ ह।
अन्येऽपि श्रुत्वा गृह्णन्तु मन्त्रमेतत्ततो हरिम्॥ 5॥

प्राप्नुवन्त्विति बुध्या वै ततस्तद्ग्रामवासिनः।
ये प्रबुद्धस्स्थिता रात्रौ ते सर्वे जगृहुर्मनम्॥ 6॥

सर्वे ते ज्ञानसम्पन्नास्सिद्धा नारायणं ययुः।
ततो रामानुजस्वामी भक्ताचार्यो बभूव ह॥ 7॥

एकदा तु सहस्रेण शिष्याणां[4] सहितो ययौ।

नीलाचले जगन्नाथं द्रष्टुं श्रीपुरुषोत्तमम्॥ 8॥

गत्वा तत्र[5] नमस्कृत्य तं ददर्शाथ पूजकान्।
अनाचाररतानन्यान्सर्वानेकत्र भोजिनः॥ 9॥

अहो किमेतद्यत्सर्वे वर्णा एकत्र भुञ्जते।
तस्माद् व्यवस्थां कुर्वेऽहं यथाचारः प्रवर्तताम्॥ 10॥

इति सञ्चिन्त्य मनसा पूजकान्स्तान्बलेन सः।
वृतः शिष्यसहस्रेण बहिश्चक्रे स पूजनात्॥ 11॥

स्वयमेव जगन्नाथं पूजयामास भक्तितः।
[6]सदाचारेण नैवेद्यं सम्पाद्य हरये पुनः॥ 12॥

निवेद्य शिष्यैस्सार्द्धं स बुभुजे निजधर्मतः।
अथ ते पूजकास्सर्वे बलात्ते च बहिष्कृताः॥ 13॥

---

1. महा – ख, ग।
2. द्धूपं – ख, ग।
3. सिद्धिदम् – ख, ग।
4. शिष्येण – ख, ग।
5. तत्र – क।
6. महा – ख।

निरानन्दा निराहरा बभूवुस्ते दिनद्वयम्।
ततस्तृतीये दिवसे स्वप्ने रामानुजं हरिः ॥ 14 ॥[1]

उवाचाहोऽत्र नाचारस्याग्रहो[2] वर्तते मम।
आचारेण यथा भक्त्या यो मे यद्यत्प्रयच्छति ॥ 15 ॥

ततस्तुल्यमहं मन्ये किञ्चिद्भक्त्या विशिष्यते।
तस्मान्मे पूजका भक्तास्तानानय ममार्चने ॥ 16 ॥

नियोजय त्वमप्यत्र त्यजाचारकथामिमाम्।
इति दृष्ट्वा तदा स्वप्नं स्वामी रामानुजः प्रभुः ॥ 17 ॥

न तत्याज स्वमाचारं[3] स्मृतिवाक्यमनुस्मरन्।
अहो! अत्र हरेः कोऽयमनाचाराग्रहो महान् ॥ 18 ॥

आश्रमांश्चतुरो वर्णान्यत्सहैवाशयत्ययम्।
अहं तु न सदाचारं त्यक्ष्यामि जीवनावधि ॥ 19 ॥

इत्युक्त्वा न स तत्याज स्वामी स्वाचारमुत्तमम्।
ततस्तु भगवान्प्राह गरुडं भक्तवत्सलः ॥ 20 ॥

गच्छ रामानुजं ब्रूहि नात्राचारः प्रशस्यते।
अतस्ते पूजका एव कुर्वन्तु मम पूजनम् ॥ 21 ॥

भवानाचारभक्तिभ्यां प्रियोऽस्त्यत्र न संशयः।
परन्त्वन्यत्र वसतस्सुलभोऽहं सदा तव ॥ 22 ॥

पूजकानां तु चात्रैव मम भक्तिर्दृढास्ति भोः।
ममापि चैतत्कर्तव्यमनाचारोऽत्र साधनम् ॥ 23 ॥

तस्मात्स्वदेशे गत्वा त्वं सदाचारेण मां भज।
अहं तेऽभिमतं सर्वं स्मृतो दास्याम्यसंशयम् ॥ 24 ॥

इत्युक्तो नहि[4] मन्येत तदा तन्मोहयन्स्वयम्।
प्रापयाशु[5] निजं स्थानं सशिष्यं निद्रयान्वितम् ॥ 25 ॥

---

1. ख मध्ये लुप्तः।
2. रेवात्र – क।
3. त्व – क, ग।
4. यदि – क, ख।
5. प्रापयस्व – ख।

इत्युक्तो गरुडस्तेन जगन्नाथेन वै तदा।
रामानुजसमीपे स गत्वा स्वप्नेऽब्रवीद्वचः ॥ 26 ॥

सर्वं श्रीकृष्णकथितं श्रुत्वा स्वामी जहर्ष च।
अहो यदर्थमायातस्तत्सम्पन्नं ममाधुना ॥ 27 ॥

यदि प्रसन्नो भगवान्स्मृतो मे दास्यतीप्सितम्[1]।
तदेदं[2] वा गृहं वापि तुल्यमेव न संशयः ॥ 28 ॥

गच्छाम्यहमवश्यं भो इति ब्रह्मस्वरूपिणम्।
गरुडं प्राह च स्वामी सुष्वाप शिष्यसंवृतः ॥ 29 ॥

अथान्तरे तं गरुडः सशिष्यं यत्नमात्रतः।
निजदेशे स्थापयित्वा नीलाचलमथागमत् ॥ 30 ॥

ततः प्रातस्तु तत्रत्यैः ज्ञातः स्वामी गतो निशि।
ततः पूजाकरान्सर्वानानयित्वा नृपः स्वयम् ॥ 31 ॥

पूजयामास देवेशं जगन्नाथं मुदान्वितः।
स्वामी तु प्रातरुत्थाय दृष्ट्वा निजगृहं[3] स्मरन् ॥ 32 ॥

रात्रौ स्वप्नं यथा दृष्टं तत्सत्यमकरोद्धरिः।
अहो भक्तेस्तु माहात्म्यं सर्वाधिकतमं परम् ॥ 33 ॥

इत्युक्त्वा मनसा शिष्यैर्युतो भक्तिं समाचरन्।
स्थापयामास पन्थानं हरिभक्तेरनुत्तमम्[4] ॥ 34 ॥

इति श्रीभगवद्भक्तिमाहात्म्ये रामानुजचरितं नाम चतुर्विंशः सर्गः ॥ 24 ॥

❊ ❊ ❊

पञ्चविंशः सर्गः

॥ श्रीरङ्गचरितम् ॥

अथ श्रीरङ्गभक्तेस्तु माहात्म्यं कथयाम्यहम्।
मुष्करात्पश्चिमे ग्रामो धौसा नाम्नाति[5]विश्रुतः ॥ 1 ॥

---

1. दास्यन्तो क्षितम् – क, ख।
2. तदिदं – ख।
3. निगृहं – ख, ग।
4. भक्तिरनुत्तमम्
5. नाम्नेति – ख, ग।

तत्र श्रीरङ्गनामासीद्वैश्यो जैनपथे स्थितः ।
तस्य दासे मृते जातो यमदूतः स एकदा ॥ 2 ॥

वणिग्द्वारि समागत्य दर्शयित्वात्मनो वपुः ।
उवाच वणिजं पापाद्यमदूतो भवं[1] वणिक् ॥ 3 ॥

हरिभक्तिं विना सर्वे सदा नरकभागिनः ।
इदानीं पश्य प्रत्यक्षं योऽसौ वैश्यवृषो महान् ॥ 4 ॥

तस्य शृङ्गे गतश्चाहं स्वर्णकारमिमं पुनः ।
परदाररतं दुष्टं हत्वा नेष्ये[2] यमालयम् ॥ 5 ॥

इत्युक्त्वान्तर्दधे दूतस्तत्काले तत्र संस्थितम् ।
स्वर्णकारं स तु वृषश्शृङ्गाभ्यां निजघान ह ॥ 6 ॥

इति दृष्ट्वा महाश्चर्यं श्रीरङ्गस्स्वमतं तदा ।
त्यक्त्वा कस्यापि शिष्योऽभूद्वैष्णवस्यातिभक्तितः ॥ 7 ॥

हरिपूजारतो नित्यं हरिनामपरायणः ।
ददावन्नं च पानीयं क्षुत्पिपासातुराय सः ॥ 8 ॥

स्वर्णकारस्तु दूतेन नीतो गत्वा यमालयम् ।
पुनरागत्य स्वग्रामे जातः प्रेतोऽतिहिंसकः ॥ 9 ॥

बहून्सन्तापयामास हरिभक्तिविवर्जितान् ।
एकदा स्वर्णकारः सः प्रेतस्स्वतनयं रुषा ॥ 10 ॥

दर्शयामास चात्मानं ततो भीतस्तु तत्सुतः ।
न किञ्चिन्मन्यते साधु स्मरन्तं प्रेतमुत्कटम्[3] ॥ 11 ॥

प्रत्यहं चिन्तयामास राजन्शुष्को बभूव सः ।
एकदा निशि तं पुत्रं हन्तुं स पुनरागतः ॥ 12 ॥

तत उत्थाय तत्पत्नी प्रार्थयन्ती समागता ।
किमर्थं हिंसि भोः पुत्रं [4]यदाभीष्टं करोमि तत् ॥ 13 ॥

---

1. ब्रवं – खः ।
2. हरत्वा – क, ख ।
3. कचम् – ख, ग ।
4. वद – ख ।

इति श्रुत्वा वचस्तस्याः पत्न्याः सम्पश्यतो हरः।
प्रेतः प्रोवाच येन स्यात्सद्गतिस्तत्कुरुष्व मे[1] ॥ 14 ॥

इति श्रुत्वा तु सा प्राह कथं ते सद्गतिर्भवेत्।
तदाह प्रेतोऽहं त्वस्य शरीरे प्रविशाम्यथ ॥ 15 ॥

त्वं तु श्रीरङ्गपूजाया भगवच्चरणामृतम्।
आनीय देहि मे शीघ्रं तदा स्वर्गं व्रजाम्यहम् ॥ 16 ॥

इत्युक्त्वा साऽकरोत्सर्वं तदा स प्रेतबन्धनात्।
मुक्तो बभूव तत्पुत्रः स्वस्थो जातस्तदैव हि ॥ 17 ॥

एवं श्रीरङ्गभक्तेस्तु माहात्म्यं कथितं मया।
यः शृणोति नरो[2] भक्त्या लभते भक्तिमुत्तमाम् ॥ 18 ॥

इति श्रीभगवद्भक्तिमाहात्म्ये श्रीरङ्गचरितं नाम पञ्चविंशः सर्गः ॥ 25 ॥

❊ ❊ ❊

षड्विंशः सर्गः

॥ कृष्णदासचरितम् ॥

विष्णुस्वामिप्रियशिष्यः कृष्णदासो बभूव ह।
कथां तस्य प्रवक्ष्यामि भक्तिमाहात्म्यसूचिताम् ॥ 1 ॥

कृष्णदासस्य शिष्योऽभूदूर्ध्वरेता महामनाः।
यं यं तु कृपया शिष्यं चकार सोऽति भक्तिमान् ॥ 2 ॥

भुक्त्वेह विविधान् भोगान् ययावन्ते हरेः पदम्।
मानसिंहो महाराजस्तन्मन्त्रग्रहणादभूत् ॥ 3 ॥

यस्याश्ववाहा अश्वैस्तु[3] तीर्त्वा ब्रह्मनन्दं[4] पुनः।
परापरात्करं जहुः कृष्णदासप्रसादतः ॥ 4 ॥

मानसिंहो निवासार्थं ददौ स्थानं महोत्तमम्[5]।
गालवस्य ऋषेः पूर्वं स्थानमासीदनुत्तमम् ॥ 5 ॥

---

1. भो – क, ख।
2. जना – क, ग।
3. अथै – ख।
4. व्रह्मनन्द – ख।
5. मनुत्तम – ख।

तदेव गलतेत्येतद्विख्याता ह्यधुना भुवि।
बहुधा कृष्णदासस्तु राजभक्तिवशीकृत: ॥ 6 ॥

तत्रैव न्यवसद्भूप: स्वेच्छया पर्यटन्नपि।
एकदा कुल्हदेशस्य राजा पुत्रविवर्जित: ॥ 7 ॥

राजकार्येषूदासीनो दत्त्वा भारं तु मन्त्रिणे।
सपत्नीको गतो राजा कस्मिंश्चित्पर्वतोत्तमे ॥ 8 ॥

ददर्श कृष्णदासं तु क्वचित्तरुतले स्थितम्।
हृष्ट: प्रसादयामास कृष्णदासं नृपोत्तम: ॥ 9 ॥

प्रसन्न: कृष्णदासस्तु तस्मै मन्त्रं ददौ स्वयम्।
राजा तु कृतकृत्योऽभून्मन्त्रं प्राप्य गुरोस्तत: ॥ 10 ॥

एकदा तस्य भुक्त्यर्थं राज्ञीमेवाह भूपति:।
मिष्टान्नं वर्तते गेहे स्वामिनो भोजनाय तम्॥ 11 ॥

समानयेति श्रुत्वा सा ययौ गेहे स्वयं सती।
नीत्वा मिष्टान्नमायाति निम्नोन्नतपथि[1]श्रमात्॥ 12 ॥

पपात हस्तान्मिष्टान्नं स्वानीतं किञ्चिदल्पश:।
उत्थाय भुक्त्वा तद्राज्ञी नीत्वान्यत्सा ययौ पुन: ॥ 13 ॥

दृष्ट्वा तस्मात्तु भुञ्जानां राज्ञीं चुक्रोध भूपति:।
खड्गमादाय तां हन्तुमुद्यतो गुरुणा तत: ॥ 14 ॥[2]

निवारितो न चेयं भो: सापराध्यति सुव्रता।
इत्युक्त्वा तत्करान्नीत्वा मिष्टान्नं कृपया गुरु: ॥ 15 ॥

विभज्य भागमेकं तु ददौ राज्ञे स्वयं पुन:।
गृहीत्वा चैकमेवं तु राज्ञ्यै भागद्वयं ददौ ॥ 16 ॥

तं दृष्ट्वा नृपति: प्राह किमिमं कुरुषे प्रभो।
श्रुत्वैतद्वचनं राज्ञ: कृष्णदासोऽब्रवीद्गुरु: ॥ 17 ॥

एषा गर्भवती राजन्पुत्रस्ते भविता ध्रुवम्।
तस्मै द्वितीयभागं तु ददाम्युदरवर्त्तिने[3] ॥ 18 ॥

---

1. पथा – ख। 2. लुप्त – ख, ग।
3. तत्र सशंय: – ख, ग।

भविष्यति सुतो यस्ते महाभागवतोत्तमः।
इति लब्ध्वा वरं तु स्यात् कृष्णदासाद्गुरोर्नृपः ॥ 19 ॥
मेने कृतार्थमात्मानं सपत्नीको ननाम[1] तम्।
अथ राजा स गुरुणा कृष्णदासेन नोदितः ॥ 20 ॥
जगाम स्वगृहं राजा [2]कृष्णदासो निजाश्रमम्।
अथ सा सुषुवे राज्ञी सुमुहूर्त्ते सुतं सती ॥ 21 ॥
महाभागवतः सोऽभूच्चक्रे राज्यमकण्टकम्।
पूर्वं हि भगवद्भक्तिप्रसादात्किन्तु दुर्लभम् ॥ 22 ॥
पुत्रं दारा धनं लोके यद्यदीच्छेल्लभेत्तु तत्।
श्री कृष्णस्य प्रसादेन सत्यं सत्यं न संशयः ॥ 23 ॥

इति श्रीभगवद्भक्तिमाहात्म्ये कृष्णदासचरितं नाम षड्विंशः सर्गः ॥ 26 ॥

❊ ❊ ❊

सप्तविंशः सर्गः

॥ कील्हाग्रदासचरितम् ॥

अस्यैव शिष्यौ कील्हाग्रौ कथयामि तयोः कथाम्।
तयोर्ज्येष्ठस्तु कील्होऽभून्महायोगी जितेन्द्रियः ॥ 1 ॥
बहुधा मथुरायां स तस्थौ कृष्णमनुस्मरन्।
एकदा मानसिंहस्तु गतस्तं द्रष्टुमुत्सुकः ॥ 2 ॥
गत्वा ददर्श कील्हं तं प्रणम्योवास[3] सन्निधौ।
तृतीये प्रहरे याते दिवसस्य तदा तु सः ॥ 3 ॥
आकाशमवलोक्याह अहो सम्यगहो इति।
श्रुत्वैतन्मानसिंहस्तु पप्रच्छ विनयान्वितः ॥ 4 ॥
किमेतदब्रवीन्नाथ अहो सम्यगहो इति।
कील्होऽब्रवीत्तं श्रुत्वेति[4] गुर्जरस्याधिपो नृपः ॥ 5 ॥

---

1. अननातम् – ख।
2. दृष्टः – क, ग।
3. या विशंक्षितौ – क।
4. श्रुत्वा – ख, ग।

मृतस्त्विदानीं सः स्वर्गं विमानेन प्रयाति तत्।
दृष्ट्वा ब्रुवन्तमत्रत्यः सोऽतिभक्तो मम प्रियः[1] ॥ 6 ॥

नाम्ना सुमेरदेवेति विख्यातो यशसा नृपः।
इति श्रुत्वा तु तद्वाक्यं मानसिंहो नृपोत्तमः ॥ 7 ॥

दूताञ्शीघ्रगतिंस्तस्मात्स्थानादुत्थाय प्रैरयत्।
सत्यं वासत्यमित्येतज्ज्ञातुं तस्य महात्मनः ॥ 8 ॥

गत्वा गुर्जरं देशं तु नीत्वा पत्रं त्वरान्वितः।
प्रददुर्मानसिंहाय तस्मिन्पत्रे[2] तदैव सः ॥ 9 ॥

तस्मिन्दिनेऽपराह्ने तु मृतो राजा न संशयः।
इति दृष्ट्वा तु तत्पत्रं निश्चिकाय तदा नृपः ॥ 10 ॥

अथ कील्हेन तज्ज्ञातं राज्ञः सन्देहकर्म तत्।
न चुकोप तदा [3]दर्पात्पुनः कालान्तरे गुरुः ॥ 11 ॥

मञ्जूषायां धृता माला राज्ञि पश्यति चात्मनः।
तदैव घटिका द्वित्रिमध्ये कील्होऽब्रवीन्नृपम् ॥ 12 ॥

मञ्जूषायास्तु निष्कास्य मालां मे देहि भूपते।
इति श्रुत्वा ततो राज्ञा मञ्जूषोद्घाटिता स्वयम् ॥ 13 ॥

ददर्श तत्र सर्पन्तु स्फुरन्तमतिकोपनम्[4]।
ततो राजा भयात्तस्या मुखमाच्छाद्य तं गुरुम् ॥ 14 ॥

प्राहात्र सर्पोऽस्ति महान्न माला[5] दृश्यते गुरो।
ततस्तु स्वयं कील्हदासो राज्ञि पश्यति तत्क्षणात् ॥ 15 ॥

माला ततो विनिष्कास्य पुनस्तत्रैव तां न्यधात्।
पुनराह नृपं देहीत्युक्तः स पुनरेव हि ॥ 16 ॥

उद्घाटिते मुखे तस्याः सर्पमेव ददर्श सः।
एवं वारत्रये तस्मै[6] दर्शयित्वाद्भुतं महत् ॥ 17 ॥

---

1. स्थित – क।
2. मन्त्रे – ख।
3. पदार्पादत्वात् – ख, क।
4. कोपितत् – ख।
5. माना – ख।
6. तस्यै – ख, ग।

तूष्णीं तस्थौ गुरुः सोऽपि राजात्मानं विगर्हयन्।
तत्कथायां च संदेहं त्यक्त्वा तद्भक्तिमानभूत्॥ 18॥

अस्य भ्राता कनिष्ठोऽभूदग्रदास इति श्रुतः।
वक्ष्ये तद्भक्तिमाहात्म्यं परमाश्चर्यकारकम्॥ 19॥
एकदा चाग्रदासं तं द्रष्टुं राजा समागतः।
स्वसैन्यं द्वारतो बाह्ये धृत्वा राजा ततो गृहे॥ 20॥

अग्रदासस्तदा गेहात्पुष्पवाट्यां जगाम ह।
तत्र शुष्कानि पर्णानि सम्मार्ज्य बहिरत्यजत्॥ 21॥

राजा गत्वासनस्याग्रे स्वासनस्थं ददर्श तम्।
दर्शनीयं विधानाग्रे प्रणम्य क्वचिद्वासवत्[1]॥ 22॥

अथ पप्रच्छ कुशलमग्रदासो नृपं मुदा।
सोऽपि तं प्रणिपत्याह कथामन्यां निजेक्षिताम्॥ 23॥

अथाग्रदासः सम्मार्ज्य पुष्पवाटीमुपागतः।
गृहद्वारि न वै गन्तुं तस्मै ते राजकिङ्कराः॥ 24॥

ददुस्त्रैव तिष्ठ त्वं राजा तत्र गतोऽधुना।
इति ब्रुवन्तस्तद्वाक्यं श्रुत्वा तत्रैव संस्थितः॥ 25॥

द्वारि सञ्चिन्त्य तन्नाम हृदि दम्भविवर्जितः।
अथान्तरे समायातो नाभादासः क्वचिद्गतः॥ 26॥

ददर्श गुरुमासीनमग्रदासं[2] धरातले।
अहो किमेतदित्युक्त्वा प्राणनाम[3] ततस्तु तम्॥ 27॥

प्राहाग्रदासो राज्ञो वै भृत्यैरेतैर्निवारितः।
तिष्ठाम्यत्रैव किं तेन यथा तत्तादृशं त्विदम्॥ 28॥

इति श्रुत्वा स तान्भृत्यान्सन्तिवर्त्य गुरुं ततः।
पुरस्कृत्य गतस्तत्र यत्रासीन्नृपतिः[4] स्थितः॥ 29

तं दृष्ट्वा ते समुत्तस्थु राजापि परमादरात्।
दण्डवन्निपपाताथ राजा तस्मिन्क्षणे पुनः॥ 30॥

---

1. वसतु क, ग।
2. मासानम् – क, ग।
3. अग्रनाम – ख।
4. पत्राणि – क।

आसनस्थोऽग्रदासस्तु तत्रैवान्तर्दधे स्वयम्।
दृष्ट्वैतत्परमाश्चर्यं तत उत्थाय भूपतिः ॥ 31 ॥

नाभाख्यं पृष्टवान्सर्वे नाभादासस्तमब्रवीत्।
तव भक्त्या नृपगुरुः कार्यान्तरमकल्पयत्॥ 32 ॥

ततस्स्वयं समायातस्तत्तिरो भावयन्वपुः।
तवैवाश्चर्यं मे तन्न[1] राजन्नेषां महात्त्मनाम्॥ 33 ॥

न चात्र विस्मयः कार्यो महदाचरितेऽद्भुते।
तत आगत्य राजा तु मानसिंहोऽतिभक्तिमान्॥ 34 ॥

अग्रदासं तु तुष्टाव[2] स्वापराधं क्षमापयत्।
अग्रदासोऽपि तं प्राह सन्तुष्टोऽहं नराधिप॥ 35 ॥

अजानद्भिस्तु ते भृत्यै[3]र्द्वारेऽहं रोधितो नृप।
न ततस्तव दोषोऽस्ति न च तेषामपि ध्रुवम्॥ 36 ॥

इति श्रुत्वा ततो राजा तुतोष प्रणिपत्य तम्।
आजगाम स्वनगरं तद्भक्तिं हृदि चिन्तयन्॥ 37 ॥

इत्युक्तमग्रदासस्य भक्तिमाहात्म्यमुत्तमम्।
श्रुत्वैतत्परमाख्यानं विष्णुभक्तिं लभेन्नरः ॥ 38 ॥

इति श्रीभगवद्भक्तिमाहात्म्ये कील्हाग्रदासचरितं नाम सप्तविंशः सर्गः ॥ 27 ॥

※ ※ ※

अष्टाविंशः सर्गः

॥ शङ्कराचार्यचरितम्॥

शङ्कराचार्यमाहात्म्यं कथयामि महाद्भुतम्।
यस्य श्रवणमात्रेण सद्भक्तिं लभते नरः ॥ 1 ॥

देशे तु द्राविडे पुण्ये तुङ्गभद्रेति नामतः।
नद्यौ पापविनाशिन्यौ पुण्यदस्सङ्गमस्तयोः ॥ 2 ॥

---

1. तद्विराजन् – क, ख।
2. सुष्टाव – ख, ग।
3. भक्त्यैः – ख।

शृङ्गेरीति[1] च विख्यातस्तत्र ग्रामोऽतिपुण्यवान्।
तत्रासन्ब्राह्मणाः पुण्या वेदवेदाङ्गपारगाः ॥ 3 ॥

अध्यापयन्तो वेदांश्च सर्वे यज्ञविशारदाः।
दयाधर्मरताः सर्वे निजदाररताः सदा ॥ 4 ॥

ब्रह्मलोक इवाभाति पृथिव्यां नगरं तु तत्।
तत्र ब्रह्मकुले साक्षादवतीर्णो महेश्वरः ॥ 5 ॥

शङ्करश्शङ्करेत्येतन्नाम्ना सम्प्रार्थितस्सुरैः।
घोरे कलियुगे प्राप्ते लुप्ते यज्ञादिकर्मणि ॥ 6 ॥

सर्वे जैनमतैर्मुग्धा नास्तिका धर्मनिन्दकाः।
दानश्राद्धव्रतादीनां द्वेषिणो जातिवर्जिताः ॥ 7 ॥

वर्णाश्रमच्युताः सर्वे हव्यकव्यबहिष्कृताः[2]।
असच्छास्त्रप्रवक्तारस्सच्छात्रत्यागिनो[3] नराः ॥ 8 ॥

ततस्स्वभागमप्राप्य देवा इन्द्रपुरागमाः।
ब्रह्माणं शरणं सर्वे ययुस्तान्विधिरब्रवीत् ॥ 9 ॥

जानाम्यहं भवन्तस्तु यदर्थमिह चागताः।
तस्योपायं करिष्यामि यूयमायात पृष्ठतः ॥ 10 ॥

इत्युक्त्वा प्रययौ धाता[4] यत्रासौ गिरजापतिः।
तत्रासीनं ददर्शाथ विष्णुना सह शङ्करम् ॥ 11 ॥

नत्वोपविश्य धाता तावुवाच हरिशङ्करौ।
युवयोर्बलमाश्रित्य मया सृष्टमिदं जगत् ॥ 12 ॥

तदिदानीं कर्मभूमौ जैनाचाररता नराः[5]।
नाचारन्ति[6] त्रयो वर्णाः यज्ञदानतपःक्रियाः ॥ 13 ॥

ततोऽमी देवगन्धर्वयक्षकिन्नरपन्नगाः।
न प्राप्नुवन्ति[7] भागं ते दीनाः प्राणावशेषिताः ॥ 14 ॥

---

1. श्रृगे गिरिव – क।
2. दृव्यकव्यवाहिः कृताः
3. भागिनी – ख, ग।
4. छात्रा – ख।
5. जनाः – क, ग।
6. तत् यजुर्वेदशास्त्राणि – क, ख।
7. अप्राप्य वलि भागं – ख, क।

युवां शरणमायाताः कुरु तं तत्प्रतिक्रियाम्।
इत्युक्तौ प्राह भगवानेतदर्थमहं पुरा॥ 15॥

पुण्यदागमनं ज्ञात्वा समायातोऽत्र शङ्करः।
यद्वदिष्यति लोकानां हितं कुर्मो वयं हि तत्॥ 16॥

इति श्रुत्वा वचस्तस्य तदा प्रोवाच शङ्करः।
अहो यथा भवेत् स्वस्ति प्रजानां गरुडध्वज॥ 17॥

तद्विचार्य विधिस्त्वं च वद[1] तं करवाण्यहम्।
इति श्रुत्वा वचस्तस्य शङ्करस्य तथा विधिः॥ 18॥

प्रोवाचाहं प्रवक्ष्यामि यथा स्यात्स्वस्ति मे जगत्।
अहं भवांश्च विष्णुश्च सर्वे वयमतः परम्॥ 19॥

गत्वा पृथिव्यामंशेन प्रादुर्भूय द्विजालये।
वेदशास्त्राणि यज्ञादीन्संस्थाप्य जैनशासनम्॥ 20॥

तिरस्कृत्यागमिष्यामस्ततः क्षमो भविष्यति।
इत्युक्तौ वेधसा तौ तु स्वीचक्राते दृशच्युतौ॥ 21॥

ययौ स्वधाम सविधिर्विसृज्येन्द्रादिकान्सुरान्।
विचिन्त्य मिथिलायां स प्रजापतिरवातरत्॥ 22॥

श्रीमण्डनमिश्र इति नाम्ना द्विजकुले विधिः।
भगवानपि तत्रैव मिथिलायां जनार्दनः॥ 23॥

श्री मदुदयनाचार्यरूपेणावततार ह।
महादेवोऽपि द्रविडे देशे ब्रह्मकुले प्रभुः॥ 24॥

शङ्कराचार्य नाम्ना वै स जातो द्विजमन्दिरे।
कथामस्य प्रवक्ष्यामि पूर्वं पश्चात्तयोरपि॥ 25॥

स तु विप्रकुले जातः साक्षाद्देवः सदाशिवः।
अनायासेन वेदांश्च शास्त्राण्यध्यैष्ट सर्वशः॥ 26॥

कृत्वा स ब्रह्मचर्यं तु गृहस्थाश्रममात्रकम्[2]।
दण्डं जग्राह विधिना संन्यस्तोऽभून्महामतिः॥ 27॥

---

1. वदत्त्वं मे वचनम् – ख।
2. त्रयम् – क।

ततः सः पृथिवीं सर्वां बभ्राम शिष्यसंयुतः ।
यत्र ते नास्तिका मूर्खा मिथ्यावादपराः स्थिताः ॥ 28 ॥

तान् जित्वा वेदशास्त्राणि न्यायतः प्रत्यतिष्ठियत् ।
ततः सर्वत्र संस्थाप्य पश्चिमायां विशेषतः[1] ॥ 29 ॥

राजासीज्जैनशिष्यस्तु महामूर्खोऽतिनास्तिकः ।
तस्य राज्ये जनास्सर्वे नास्तिका एव केवलम् ॥ 30 ॥

न ते श्रद्धाधिरे मूर्खाश्शङ्कराचार्यभाषितम् ।
तथापि नास्तिकग्रन्थखण्डकं पुस्तकं निजम् ॥ 31 ॥

श्रावयामास राजानं स राजा दैवयोगतः ।
ममार श्रुत्वा तं स्वामी शिष्यान्प्राहात्र मे वपुः ॥ 32 ॥

रहस्संस्थाप्य रक्षन्तु तैलद्रोण्यां निरन्तरम् ।
षण्मासान्ते पुनरहमाया कामीव पुण्यथ ॥ 33 ॥

यथारुचिं करिष्यामि ततोऽहं दुष्टशासनम्[2] ।
अहं राजशरीरे[3] तु गत्वा तत्र निजं मतम् ॥ 34 ॥

निर्माय राज्ये संस्थाप्य वेदानायाम्यसंशयम् ।
इत्युक्त्वा[4] स गतस्स्वामी राज्ञो वपुषि तत्क्षणात् ॥ 35 ॥

परकायप्रवेशादिस्सिद्धिभिः सेवितो यतः ।
ततो राजगृहे राजा जिजीवेत्यब्रुवन्[5] जनाः ॥ 36 ॥

सर्वे मुमुदिरे तत्र महोत्साहं प्रचक्रिरे ।
अथ राजा समुत्थाय सचिवानिदमब्रवीत् ॥ 37 ॥

अहो मृतो गतोऽहं तु धर्मराजसमीपतः ।
तत्र दृष्ट्वा समाहूय यमो[6] दूतानिदं वचः ॥ 38 ॥

अरेऽस्य वर्तते चायुर्नेदानीं मम शासनम्[7] ।
अर्हत्ययं नतो यूयमेनं नयत स्वं वपुः ॥ 39 ॥

---

1. कश्चन – ख, क।
2. सासनम् – ख, ग।
3. राज्ञा शरीरे – क, ख।
4. इत्युक्तचाग्रतः – क।
5. जीवेत्य – ख, ग।
6. मोदतानिदं – ख।
7. प्रशासिनम् – ख।

इति शृण्वन्नहं[1] तैस्तु नीतोऽस्मि स्वशरीरके।
तत्र यावत्स्थितोऽहं तु दृष्टवान्परमाद्भुतम्॥ 40॥

सत्यं वेदश्च यज्ञाश्च धर्मशास्त्रव्रतं तपः।
एतन्मार्गरता ये वै वेदशास्त्रपरायणाः॥ 41॥

तान्दृष्ट्वा सौम्यरूपस्सश्चतुर्बाहुर्हसन्मुखः।
प्रणम्य पूजयित्वा तान्प्रस्थापयति वै दिवम्॥ 42॥

ये त्वभक्ता वेदशास्त्रे यज्ञकर्मविनिन्दकाः।
अनीश्वरं यथा रुढा नास्तिका [2]भ्रान्तचेतसः॥ 43॥

तान्दृष्ट्वा सहसोत्थाय वापीसदृशलोचनः।
महोऽग्रदीर्घद्रंष्ट्राभिर्भयङ्करमुखस्स्वयम्॥ 44॥

दण्डमादाय कोपेन महादीर्घवपुर्धरः।
हत्वा दण्डेन तान्सर्वान्स्थापयत्यतिदुःखदे॥ 45॥

कुण्डे-कुण्डे पूयकृमिविडागारा[3] स्वसङ्कुले।
एवं साक्षादहं दृष्ट्वा समायातोऽस्मि तत्क्षणात्॥ 46॥

तस्मान्मतमिदं सर्वं निर्मूलं नात्र संशयः।
अस्ति स्वर्गश्च नरकं वेदशास्त्राणि सन्ति भोः॥ 47॥

देवा यज्ञाश्च धर्मश्च सत्यं सर्वं न[4] संशयः।
अतो यातः तदेवाहं मतमङ्गीकरोमि च॥ 48॥

यूयमन्ये च ये केचिन्मम राज्यनिवासिनः।
वेदमार्गेण गच्छन्तु त्यक्त्वा सन्नास्तिकं मतम्[5]॥ 49॥

इमामाज्ञां[6] समुल्लङ्घ्य यः स्थास्यति नराधमः।
तान्निहन्मि न सन्देहः सत्यमेतद्ब्रवीम्यहम्॥ 50॥

आनयध्वं द्रुतं[7] गाश्च रत्नानि कनकानि च।
ब्राह्मणवेदशास्त्रज्ञास्तेभ्यो दास्याम्यहं धनम्॥ 51॥

---

1. श्रुत्वा त्वाहं - ख।
2. क्लान्त - ख।
3. विडंगारा - क, ग।
4. ते नात्र संशयः - ख, ग।
5. जनाः - क।
6. इमां प्रज्ञो - क, ग।
7. मुतंगा - ख।

पूजोपकरणं सर्वं देवताप्रतिमास्तथा।
शालग्रामशिला राज्ये स्थाप्यतां प्रतिमन्दिरम्॥ 52॥

इत्याज्ञां नृपतेः सर्वे पुरस्कृत्य यथोक्तवत्।
चक्रुस्ते सचिवा अन्ये कारयामासुरादरात्॥ 53॥

अथ राजापि सुस्नातस्सम्पूज्य मनसा हरिम्।
दत्त्वा धनानि विप्रेभ्यो राज्यकार्य परोऽभवत्॥ 54॥

इति श्रीभगवद्भक्तिमाहात्म्ये शङ्कराचार्यचरितं नामाष्टाविंशः सर्गः॥ 28॥

❊ ❊ ❊

एकोनत्रिंशः सर्गः

॥ शङ्कराचार्यचरितम्॥

अथ ते सचिवास्तं तु राजानं प्राहुरानताः।
राजन्वेदा न सन्त्यत्र शास्त्राण्यपि न कानिचित्॥ 1॥

यज्ञं तपो वा दानं वा न जानातीह कश्चन।
ततः किन्तु करिष्यामस्तद्वदात्र महीपते॥ 2॥

इति तेषां वचश्श्रुत्वा राजा प्राहाथ मन्त्रिणः[1]।
अत्रागतोऽभून्मे स्वामी शङ्कराचार्यनामतः॥ 3॥

स शिष्यो यदि सोऽत्र स्याच्छिष्या वा यदि सन्ति चेत्।
तद्[2]द्वारा वेदशास्त्रोक्तविप्रकर्म करोम्यहम्॥ 4॥

अत आनय तं चात्र शिष्यान्वा मम सन्निधिम्।
इत्युक्ताः सचिवास्ते तु शिष्यानन्विष्य[3] यत्नतः॥ 5॥

आनयित्वा ददौ राज्ञे राजा तानब्रवीत्स्वयम्।
भवन्तो वेदशास्त्राणि यज्ञव्रततपांसि च॥ 6॥

शिक्षयन्तु जनान्सर्वात्ममाग्रेऽपि च कश्चन।
समेत्य शास्त्रं गृह्णातु मया यद्यत्प्रदीयते॥ 7॥

---

1. म – मन्त्रिणम् – ख।
2. तद्द्वारावेदशास्त्राणि प्रकटानि करोम्यहम्–ख।
3. ज्ञात्वा नृपान्तिकम् ख, ग।

इत्युक्तात्मन्स्वशिष्यान्स राजा सर्वान्स्वयं पुनः ।
शास्त्रमध्यापयामास वेदान् यज्ञादिकाः क्रियाः ॥ 8 ॥

ततस्ते राज्यवासिभ्यो विद्यां शिष्या ददुर्मुदाः ।
एवं सम्पूर्णराज्ये तु वेदशास्त्रव्यवस्थितिः ॥ 9 ॥

सम्पन्नन्नृपतिः सोऽपि ददौ दानमनेकशः ।
तदा राज्ये स्थिता ये वै नास्तिकास्ते दिशो दश ॥ 10 ॥

प्रपलाप्य गतास्तूर्णमात्मरक्षणतत्पराः ।
अथ जाते तु षण्मासे स्वामी राजशरीरतः ॥ 11 ॥

नाजगाम निजे देहे शिष्यो गत्वा रहोऽब्रवीत् ।
स्वामिन्व्यतीता षण्मासास्तैले देहोऽस्ति यः पुनः ॥ 12 ॥

तस्य किन्नु करिष्यामि तदा ज्ञापय मां विभो ।
इति श्रुत्वा स शिष्यस्य वचनं प्राह तं पुनः ॥ 13 ॥

स्वामी राजाथ संरक्ष्यः[1] प्रातरेष्याम्यसंशयः ।
तत उत्थाय राजा तु सचिवानाजुहाव[2] ह ॥ 14 ॥

आगतांस्तानुवाचेदं स सचिवान्महीमतिः ।
अहो रात्रौ मया स्वप्नो दृष्टः प्राणहरो नृणाम् ॥ 15 ॥

इदानीमपि नासाग्रं[3] च पश्यामि तथा पुनः ।
न शृणोमि प्रयत्नेन प्राणघोषानपि[4] स्वयम् ॥ 16 ॥

अतोऽहं तनयं ज्येष्ठमभिषिञ्चामि सत्कृतम् ।
राज्ये यूयं मन्त्रिणश्च यथा तस्य हितं भवेत् ॥ 17 ॥

तथा तथा तु कर्त्तव्यं युष्माभिर्धर्मतत्परैः ।
इदानीमेव सामग्रीं सम्पादयतमचिरम् ॥ 18 ॥

इति श्रुत्वा वचस्तस्य राज्ञस्ते सचिवोद्धतम् ।
सम्पाद्य सर्वसामग्रीं शोकार्त्ता अब्रुवन्नृपम् ॥ 19 ॥

ततो राजा सुतं ज्येष्ठमभिषिञ्चत्स्वमन्त्रिभिः ।
धर्मकार्ये तथा राज्यकार्ये[5] सर्वानुवाच ह ॥ 20 ॥

---

1. संरक्षय – क।
2. सचिवानां जुहावह – ख, ग।
3. नाशाग्र – ख।
4. मानुषो – क।
5. राजकार्ये – ख।

यथायोग्यमथैवं तु निनाय तदहर्नृपः ।
प्रातःकाले समुत्थाय स्नात्वा सम्पूज्य केशवम् ॥ 21

दत्त्वा दानं द्विजातिभ्यस्संस्थाप्य नृषु वैष्णवीम् ।
भक्तिं ममार नृपतिर्नारायणपदं वदन् ॥ 22 ॥

अथागत्य निजे देहे तैलादुत्थाय च स्वयम् ।
पूर्ववत्सह शिष्यैस्तु शङ्कराचार्य आस्थितः ॥ 23 ॥

ततश्श्रुत्वा तु तान्स्वामी नास्तिकान्मरुदेशगान् ।
तत्रापि बौद्धस्य शिष्यस्सर्वेऽतिनास्तिकाः ॥ 24 ॥

तैस्साकं बहुधा तस्य विवादः समजायत ।
पराजिता अपि तथा नामन्यन्त पराजयम् ॥ 25 ॥

अथैकदा तु[1] नृपति रेमे[2] ग्रामस्य बाह्यतः ।
पञ्चभूमौ च प्रासादे स्थितस्तत्र गतावुभौ ॥ 26 ॥

शङ्कराचार्यस्वामी तु जैनाचार्यस्तथापरः ।
तत्रैव वादं कुर्वन्तौ न एकोऽपि पराजितः[3] ॥ 27 ॥

ततो जैनमताचार्यो राजानमिदमब्रवीत् ।
राजन्निदानीमत्रैव महाश्चर्यं भविष्यति ॥ 28 ॥

तत्पश्य पूर्वमेवाहं जानामि निजशक्तितः ।
अत्राकस्माद्धरां भित्वा जलं प्रादुर्भविष्यति ॥ 29 ॥

तज्जलं वर्द्धमानं तु सर्वमेतद्गृहं तव ।
मज्जयिष्यति नौरेका तस्मिन्नायास्यति स्वयम् ॥ 30 ॥

तत्रारूढस्तरे द्वारि नो चेन्मग्नो[4] भविष्यति ।
इत्युक्त्वा मायया सर्वं चकार नास्तिकोत्तमः ॥ 31 ॥

स्वामी ज्ञात्वा तु तत्सर्वं तन्मायां प्रविलाप्य[5] सः ।
श्वसन्[6] तथाऽकरोत्सर्वं तान्नावं नास्तिकः स तु ॥ 32 ॥

---

1. तस्य – क।
2. रामे – ख, राण्ये – क।
3. पराजयम् – ख, ग।
4. मग्नो – ख, ग।
5. विललाप्य – ख, ग।
6. स्वसन् – ख, ग।

विश्वस्तो निजमायायामगते वारि सञ्चये।
राजानमाह पश्येदं वारि राजन्समागतम्॥ 33॥

अतः परं कथं त्वत्र तिष्ठामो वारिराशिषु।
नौरेषा या समायाता तस्यां स्थित्वा जलं वयम्॥ 34॥

तरिष्यामो न सन्देहश्श्रुत्वैतद्वचनं द्रुतम्।
अब्रवीच्छङ्कराचार्यो राजन्गच्छत्वयं पुरा॥ 35॥

ततो भवान् ततोऽहं तु नावं यास्याम्यहं स्वयम्।
इति श्रुत्वा ततो राजा तं नास्तिकमुवाच ह॥ 36॥

गच्छ त्वं प्रथमं शीघ्रं नौकायां तदनन्तरम्।
अहं याम्येव[1] स्वामी तु पश्चात्तत्र गमिष्यति॥ 37॥

इत्युक्तो जैनसिद्धान्ती स्वामीमायेति विश्वसन्।
आरुरोह च तां नौकां नृपोऽपि चलितोऽभवत्॥ 38॥

हस्तं गृहीत्वा तं स्वामी न्यवारयत वै बलात्।
अथासौ नावमारूढो[2] राज्ञ एवमभून्मतिः॥ 39॥

स तु तत्र गतोऽत्युच्चैराकाशात्पतितो भुवि।
हस्तौ पादौ तदैकत्र शिरश्चैकत्र तस्य ह॥ 40॥

पपात तत्क्षणान्नौका जलं चादृश्यतां ययौ।
इति दृष्ट्वाद्भुतं राजा शङ्कारचार्यमब्रवीत्॥ 41॥

किमिदं कथय स्वामिन्महाश्चर्यमभूदिदम्।
श्रुत्वैतद्वचनं राज्ञः स्वामी वचनमब्रवीत्॥ 42॥

राजन्नेष महादुष्टो नास्तिको निजमायया।
मिथ्याजलं तथा नौकां दर्शयित्वातिदुर्जनः॥ 43॥

मां निहन्तुं समुद्यक्तस्तत्र संस्थाप्य वां[3] सह।
ज्ञात्वा मायां निजां कृत्वा तन्माया नाशिता मया॥ 44॥

तन्नौ न च स दुष्टात्मा स्वमायायां च विश्वसन्।
भवद्वाक्याच्च नौकायां गतो निपतितो भुवि॥ 45॥

---

1. परस्येष – ख, ग।
2. नौकयारुढो – ख, नौ कामरुढौ – क।
3. चेत्यहम – ख।

सर्वं मिथ्येति[1] ज्ञात्वाहं भवन्तं[2] प्रत्यषेद्ययम्।
एनं पश्य मृतं भूमौ स्वकर्मवशतः खलम्॥ 46॥

त्वं तु त्यक्त्वा[3] स्वधर्मं च कौलीनं राजसत्तम।
न नास्तिकपथे घोरे गन्तुमर्हसि भूपते॥ 47॥

इत्युक्तो भूपतिः प्राह शङ्कराचार्यमानतः।
अहो स्वामिन् मयाप्येतद्ज्ञातं सर्वं न संशयः॥ 48॥

मिथ्यैव नास्तिकमतं त्यक्तं मे तन्मयापि भोः।
अतः परं भवानेव मन्त्रं मे दातुमर्हति॥ 49॥

ततः स्वामी हरेर्मन्त्रं ददौ राज्ञेऽपि भक्तिदम्।
राजा गृहीत्वा मन्त्रं तु स्वराज्ये सचिवादिकान्॥ 50॥

आज्ञापयामास ततः त्यज्यतां[4] जैनशासनम्।
वेदशास्त्ररताः सर्वे भवन्तः प्रभवन्तु भोः॥ 51॥

एवमाज्ञां पुरस्कृत्य सचिवाद्यास्ततः परम्।
वेदशास्त्रोक्तमार्गेण बभूवुरति वैष्णवाः॥ 52॥

एवं तत्रापि संस्थाप्य वेदशास्त्राणि स प्रभुः।
पर्यटन्पृथिवीमेवं मिथिलायामुपागतः॥ 53॥

ददर्श मिथिलां रम्यां ब्राह्मणैरति सङ्कुलाम्।
मीमांसान्यायवेदान्तसांख्यसिद्धान्तमण्डिताम्॥ 54॥

साङ्गोपाङ्गं यजुर्वेदं[5] पठद्भिर्ब्राह्मणैर्वृताम्।
प्रतिग्रामद्विजगणैर्नमस्कृत्य सुपूजितः॥ 55॥

एवं दृष्ट्वा स मिथिलां स्वामी सम्यक् तुतोष ह॥ 56॥

इति श्रीभगवद्भक्तिमाहात्म्ये शङ्कराचार्यचरितं नाम एकोनत्रिंशः सर्गः॥ 29॥

❊ ❊ ❊

---

1. मिथ्योऽति – ख, ग।
2. भयात्तं – ख।
3. इत्युक्त्वा – क।
4. त्यक्त्वा – ख, त्यक्ता – क।
5. चतुर्वेद – क, ग।

त्रिंश: सर्ग:

॥ शङ्कराचार्यमण्डनमिश्रचरितम् ॥

मिथिलायां तत: स्वामी जनकस्य गृहस्थलम्।
गत्वाद्भुतं तत्र[1] पूर्वं धनु:खण्डं ददर्श ह ॥ 1 ॥

यद्बभञ्ज[2] रघुश्रेष्ठस्सीतापाणिग्रहोद्यमे[3] ।
ततो विदूरे गिरिजां विदेहकुलदेवताम् ॥ 2 ॥

ददर्शाथ ततो गत्वाश्रमं[4] तीर्थमनुत्तमम्।
शरबिन्दुह्रदे तत्र स्नात्वा[5] दृष्ट्वा महेश्वरम् ॥ 3 ॥

शिलानाथं ततो गत्वा श्रीमन्मण्डनशर्मण: ।
गृहे जगाम मध्याह्ने शिष्यैस्सर्वैस्समन्वित: ॥ 4 ॥

तं दृष्ट्वा दण्डिनं मिश्र: समुत्थायाग्रतो ययौ।
नमस्कृत्य स्वयं तं तु पाद्यार्घ्याद्यैरपूजयत् ॥ 5 ॥

ततोऽन्नं भोजयामास स्वामिनं बहुभक्तित: ।
तत: स्वयं सशिष्यस्तु भुक्त्वा मण्डनमिश्रक: ॥ 6 ॥

आगत्याचार्यनिकटे ददौ तस्मै सुखासनम्।
तस्मिन्स्वामी विसश्राम तं मिथ: पुनरब्रवीत् ॥ 7 ॥

स्वामिन्विज्ञातुमिच्छामि यदि कोपो न ते भवेत्।
त्वं हि नारायण: साक्षात्क्षमया अत्र का कथा ॥ 8 ॥

इत्युक्ता शङ्कराचार्यस्तमुवाचाथ सस्मितम्।
मा भयं कुरु मत्तस्त्वं नाहं क्रोधवशङ्गत: ॥ 9 ॥

अध: पतति सत्यं हि क्रोधलोभवशो यति: ।
तस्मात्त्वं निर्भयं पृच्छ यद्यद्योग्यं वदाम्यहम् ॥ 10 ॥

एवं मण्डनमिश्रस्तु श्रुत्वा स्वामिनमब्रवीत्।
अहो कलौ निषिद्धोऽपि संन्यासो यद्यपि प्रभो ॥ 11 ॥

---

1. प्रथममुतस्तत्र – ख, क।
2. यदुभन्जते – क।
3. ग्रहोषमे – क, ख।
4. व्याघ्रतार्थ – ख।
5. श्रुत्वा – क, ग।

बलात्त्वया गृहीतश्चेल्लाभोऽस्माकं महानयम्।
यत्पुस्तके भिक्षुधर्मस्वरूपं च श्रुतं मुहुः ॥ 12 ॥

दृष्ट्वेदानीं भवन्तं तत्साक्षात्पश्यामि चक्षुषा।
अद्यावधि न केनापि [1]धृतः कुत्रापि वै प्रभो ॥ 13 ॥

इति मिश्रवचश्श्रुत्वा स्वामी प्राहाति हृष्टवत्।
अहो भवान्कथमिदं ब्रूते चित्रं ममाग्रतः ॥ 14 ॥

विज्ञाय सर्वशास्त्राणि संन्यासो वर्जितः कलौ।
कलावपि विधिं मत्तः संन्यासस्य निशामया ॥ 15 ॥

इत्युक्त्वा धर्मशास्त्राणां [2]वचनान्यब्रवीद्यतिः।
ततो मिश्रोऽपि तत्पक्षखण्डनायाब्रवीद्वचः ॥ 16 ॥

एवं तयोरभूत्तत्र विचारः कति वासरान्।
न कोप्याप्नोति विजयं न कोपि च पराजयम् ॥ 17 ॥

तत एकदिने स्वामी प्राह मण्डनमिश्रकम्।
अहो भवानपि ब्रूते तथाहमपि वच्मि[3] भोः ॥ 18 ॥

मध्यस्थेन विना चेत्थं न सिद्धान्तो भविष्यति।
तस्मात्तवेयं या पत्नी सैव देवी सरस्वती ॥ 19 ॥

तामाभाष्यावयोर्जाने विचारे सा पुनस्तु यत्।
कथयिष्यति मां त्वां तु स सिद्धान्तो न संशयः ॥ 20 ॥

इति श्रुत्वा वचस्तस्य मिश्रोऽप्यङ्गीचकार तत्।
ततो मिश्रस्त्रियं स्वामी प्राह त्वमसि भारती ॥ 21 ॥

आवयोश्शास्त्रकलहे सिद्धान्तं वद नौ हितम्।
इत्युक्ता सा मिश्रपत्नी प्राहाहं युवयोर्वचः ॥ 22 ॥

श्रुतवत्यस्मि चाद्यापि शृण्वन्ती गृहकर्म च।
कुर्वाणा नौ वदिष्यामि सिद्धान्तं नात्र संशयः ॥ 23 ॥

इत्युक्त्वा सा तु सम्पाद्य स्वयं पाकं शुचिव्रता।
तयोरन्तिकमागत्य वाग्भिर्विवदमानयोः ॥ 24 ॥

---

1. कृम – क, ख।
2. पदो – ख।
3. तद्वयम् – ख

पतिं प्राहाति विनयात्पश्यतां विदुषां नृणाम्।
विवादातुरो [1]जातस्स्वामिन् भिक्षां चराधुना॥ 25॥

इति तस्य वचश्श्रुत्वा मिश्रस्तूष्णीं बभूव ह।
स्वामी तु तां मिश्रपत्नीमाशीर्भिरभ्यवर्द्धयत्॥ 26॥

तदान्ये पण्डितास्सर्वे स्थिता ये तु सभासदः।
अबुध्यन्तश्लेषवाक्यमाचार्यमतमुत्तमम्॥ 27॥

परन्त्वातुरसंन्यासो न सर्वेषामिति स्फुटम्।
इति ज्ञात्वा पुनर्मिश्रस्स्वामिनं प्राह सस्मितम्॥ 28॥

अहोऽनया यदुक्तं ते आतुरो जात इत्यपि।
तस्मादातुरसंन्यासं स्वीकरोमि कलावपि॥ 29॥

नत्वाश्रमश्चतुर्थोयं सिद्ध्यत्यस्मिन्युगे नृणाम्।
त्वादृशः पुरुषश्चास्या विद्याया नियमेन च॥ 30॥

जितारिवर्गो निर्द्वन्द्वस्तदा न्यस्तो [2]भवेद्द्विजः।
इति मण्डनमिश्रस्य श्रुत्वा स्वामी वचोऽब्रवीत्॥ 31॥

अहो सत्यमिदं ब्रूषे सर्वं सिद्धान्तसस्मितम्[3]।
मतमेतन्न सन्देहः सिद्धान्तोऽयं सनातनः[4]॥ 32॥

अतः परं समुत्तिष्ठ जातः पाकोऽस्ति मन्दिरे।
दत्त्वास्मभ्यं स्वयं भुङ्क्ष्व कथा पश्चाद्भविष्यति॥ 33॥

इत्युक्तः सोत्थितो मिश्रो दत्त्वा तेभ्यस्तु भोजनम्।
स्वयं तु बुभुजे शिष्यैरागतः पण्डितैस्सह॥ 34॥

उत्थाय च ततः स्वामी प्रहृष्टेनान्तरात्मना।
न्यायमीमांसयोर्व्याख्यां मिश्रेण च कृतां पुनः॥ 35॥

गृहीत्वा शिष्यसहितः प्रतस्थे मिथिलापुरीम्[5]।
एवं श्रीशङ्कराचार्यश्रीमन्मण्डनमिश्रयोः॥ 36॥

---

1. जातुः स्वामि – क, ख।
2. ख मध्ये लुप्तः पाठः।
3. सुमतम् – क।
4. न संशयः – क।
5. मिथिलापुरीम् – ख।

प्रतापो[1] वर्णितो भक्तेः प्रसिद्धो धरणीतले ॥ 37 ॥

इति श्रीभगवद्भक्तिमाहात्म्ये श्रीशंकराचार्यमण्डनमिश्रचरितं नाम त्रिंशः सर्गः ॥ 30 ॥

❊ ❊ ❊

एकत्रिंशः सर्गः

॥ उदयनाचार्यचरितम् ॥

अथ वक्ष्ये तृतीयस्य हरेरंशस्य धीमतः ।
उदयनाचार्य नाम्नस्तु माहात्म्यं लोमहर्षणम् ॥ 1 ॥

भूत्वा स मिथिलायां तु शास्त्रण्यध्यैष्ट सर्वशः ।
विशेषतो न्यायशास्त्रे साक्षाद्वै गौतमो मुनिः ॥ 2 ॥

बौद्धसिद्धान्तमुन्मद्य सुखाय हितकारिणी ।
वितेने विदुषां प्रीत्यै विमलां किरणावलीम् ॥ 3 ॥

एकदा बौद्धसिद्धान्तान्प्रकटीकर्तुमागतः ।
बौद्धाचार्योऽतीव मत्तो[2] नृपग्रामं समागतः ॥ 4 ॥

स्वशिष्यैस्स्वीयशास्त्रस्य पुस्तकैर्बहुभिर्वृतः ।
राजानं प्रेषयामास दूतं दर्पवशादसौ[3] ॥ 5 ॥

कञ्चिच्छिष्यं गच्छ शिष्य मिथिलेशं वदाधुना[4] ।
मद्वाक्याद्वेदशास्त्रैश्च मुधा[5] भ्रान्तोऽसि भूपते ॥ 6 ॥

निरीक्ष्य मम शास्त्राणि मत्पथानुगतो भव ।
अस्तिचेत्तव देशेऽस्मिन् वेदस्थापनकृत्पुमान् ॥ 7 ॥

तमानय मया सार्द्धं विचारं प्रकरोतु सः ।
तदा राजा तु श्रुत्वैतद्वचनं [6]शिष्यभाषितम् ॥ 8 ॥

उवाच दूतं गच्छ त्वं स्वगुरुं ब्रूहि मे वचः ।
अहं भ्रान्तस्स चेद्भ्रान्त इत्येवं निश्चयो महान् ॥ 9 ॥

आगच्छ सदसि प्रातः स ते व्यक्तो भविष्यति ।
इत्युक्तस्स गतो दूतः प्राह सर्वं नृपोदितम् ॥ 10 ॥

---

1. प्रताप – ख, ग।
2. भक्तो – ख, क।
3. हतं दर्प्प वशादसा – ख।
4. वंशाधुना – ख।
5. सुधा – क।
6. वेद – ख, ग।

गुरवे स तु शृण्वन्वै जहासाति मुदान्वितः।
अथ राजा तत्क्षणाद्वै देशस्थान्पण्डितान्बहून्॥ 11 ॥

श्रीमदुदयनाचार्यमुख्यानानाय्य[1] चोक्तवान्।
अहोऽयं नास्तिको ग्रामे समायातोऽस्ति पण्डितः॥ 12 ॥

अनेन विवदध्वं वै यूयं[2] यदि स चेज्जयेत्।
तदाहं च भवन्तश्च सर्वे तन्मतगामिनः॥ 13 ॥

भविष्यामो न सन्देहो भवता चेज्जयो भवेत्।
तदाहं भवतां दास्यं करिष्यामि न संशयः॥ 14 ॥

इत्युक्तास्ते तु विद्वांसस्सर्वे तूष्णीं तदा स्थिताः।
श्रीमदुदयनाचार्यस्तेषां मध्येऽब्रवीन्नृपम्॥ 15 ॥

सत्यमाह[3] महाराजा शृणु[4] किञ्चिन्मयोदितम्।
जयः पराजयो वापि श्रीहरेरिच्छया नृणाम्॥ 16 ॥

यथाशक्ति विवादं तु करिष्यामि न संशयः।
त्वं तु चिन्तां परित्यज्य पश्यास्माकं पराक्रमम्॥ 17 ॥

इत्युक्त्वा नृपतिग्रामे तस्थुस्सर्वेऽथ पण्डिताः।
द्वितीयदिवसे प्राप्ते राजा सपदि चाग्रतः॥ 18 ॥

आहूय पण्डितान्सर्वान्तं चापि [5]बौद्धशास्त्रिणम्।
उवाच उभयोस्तु[6] विचारः पश्यतो मम॥ 19 ॥

इति राजवचश्श्रुत्वा नास्तिकः पूर्वमब्रवीत्।
अहो विचार उभयोस्सतोर्भवितुमर्हति॥ 20 ॥

इमे[7] चासत्यथारुढाः किं वदिष्यन्ति मामिह।
इति श्रुत्वा वचस्तस्य नास्तिकस्य दुरात्मनः॥ 21 ॥

उवाचोदयनाचार्यो मतं तन्मतखण्डनम्।
एवं बहुदिनान्यासीद्विचार[8]स्सुमहांस्तयोः॥ 22 ॥

---

1. ता नाथ – ख।
2. रुपं – ख, ग।
3. मास्य – ख।
4. शिष्य – ख।
5. जिन – ख, ग।
6. युवयोरस्तु – ख।
7. ते सर्वे – ख।
8. विवादः – ख, ग।

तदा बौद्धो हृदा मत्वाचार्यान्निजपराजयम्।
मायां विस्तारयामास महाश्चर्यप्रदायिनीम्॥ 23॥

उवाच नृपतिं राजन्सर्वेऽमी मद्विरोधिनः।
न कोऽपि मद्धितं ब्रूते तस्मादेकं[1] वदाम्यहम्॥ 24॥

शालग्रामशिलायां तु सत्यमेषां[2] स्थितो हरिः।
तामानयात्र स्वमतैः खण्डयामि शिलामहम्॥ 25॥

यदि सा जलवद्भूत्वा यदि[3] स्याच्च शिला पुनः।
तदा मदुक्तं[4] सत्यं स्यादद्य चैतां पुनः स तु॥ 26॥

आचार्यो जलवत्कृत्वा शिलां व्यक्तीकरिष्यति।
तदास्यापि मतं सत्यं मन्येऽहं नात्र संशयः॥ 27॥

इत्युक्तस्स नृपस्तेन बौद्धेनाथ महीपतिः।
ददर्शोदयनाचार्यं किं वदत्येष नास्तिकः॥ 28॥

इत्युक्तो भूमिपतिना प्राहाचार्योऽति हृष्टवत्।
इदं तु मायाचरितं तथापि स्वीकरोम्यहम्॥ 29॥

मायामपि च जानामि परन्त्वेकं ब्रवीम्यहम्।
जातायां च पुनस्तस्यां शिलायां तत्मतद्वयम्॥ 30॥

सत्यं चेति वदिष्यन्ति भ्रान्त्या सर्वे सभासदः।
तस्मादेदमहं वक्ष्ये सत्यमिथ्याविचारणे॥ 31॥

तत्करिष्यत्ययं चेद्वै करिष्याम्युक्तमप्यहम्।
इति श्रुत्वा ततो राजा जैनाचार्यं ददर्श ह॥ 32॥

ततो जैनो नृपं प्राह करिष्याम्यस्य भाषितम्।
इति श्रुत्वा ततो राजा शालग्रामशिलां दृढाम्॥ 33॥

आनीय स्थापयामास स्वर्णस्थाल्यां शुचौ भुवि।
ततो बौद्धोऽब्रवीत्स्वीयं मतं दृष्ट्वा तु तां शिलाम्॥ 34॥

अथ क्षणेन सा सर्वा शिला जलमभूत्तदा।
ततोऽर्द्धक्षणतस्तद्वै जलं मूर्त्तं बभूव ह॥ 35॥

---

1. तदादेकं – ख, ग।
2. स समेषां – ख।
3. तस्मादयां – ख, क।
4. ख – मध्ये लुप्तः पाठः।

पश्यतां सर्वलोकानां महाश्चर्यमभूदिदम्।
ततस्तूदयनाचार्यो बौद्धसिद्धान्तखण्डनम्॥ 36॥

स्वमतं प्राह शीघ्रं तज्जलं प्रादुर्बभूव ह।
ततः क्षणेन तद्वारि सा शिला समपद्यत॥ 37॥

ततो राजादयः सर्वे साधुसाध्वितिवादिनः।
प्रशशंसुश्च[1] तं भक्त्योदयनाचार्यमादरात्॥ 38॥

आचार्यस्तु ततः प्राह कथमेषा स्तुतिर्मम।
स्थित एव मते ह्यस्य तस्मात्कुरु मदीरितम्॥ 39॥

इत्युक्त्वा नास्तिकं प्राह मयाकारि तवेरितम्[2]।
अतः परं मतं कस्य सत्यं [3]मिथ्येत्यनिश्चितम्॥ 40॥

मया यदुच्यते तेन प्रकारेण नृपाग्रतः।
एषस्तालद्रुमो द्वारि तिष्ठत्यति महानहो॥ 41॥

तमारुह्य पतिष्यावो यः स्थास्यति स सत्यभाक्।
वेदाः प्रमाणमित्युक्त्वा निपतिष्याम्यहं भुवि॥ 42॥

त्वं तु वेदा अप्रमाणमित्युक्त्वा निपताधुना।
[4]युगपत्पतितर्वृक्षाज्जीविष्यति य आवयोः॥ 43॥

स सत्यवाङ्मतं तस्य सत्यं लोकस्तु तं भजेत्।
एवमाचार्य्यवचनं श्रुत्वा सोऽपि जहर्ष च॥ 44॥

स्वीचकार ततो राजा तावुभावब्रवीद्वचः।
अहो प्राणोत्कचेयं[5] वै परीक्षा नैव शोभना॥ 45॥

तस्माद्विरमतमत्र युवामेतद्विचारतः।
इति राजवचश्श्रुत्वा उदयनाचार्य आह तम्॥ 46॥

तव नास्त्यत्र किञ्चिद्धो दूषणं[6] नैव पातकम्।
स्वशास्त्रभक्तिश्चावां करिष्यावो यथारुचि॥ 47॥

त्वमेकस्मिन्मृते चास्मिन्मयि वा नृपसत्तम।
तन्मतं च परित्यज्य जीवन्मतपरो भव॥ 48॥

---

1. प्रशसंसु श्रुतं – ख, ग।
2. कारत वेरितम् – ख।
3. मिथ्येति – ख, ग।
4. पतितयो – क।
5. कीचेयं – ख, ग।
6. भूषणं – क।

किञ्च यावन्ति ते राज्ये पुस्तकानि च तानि वै।
जले प्रक्षेपयेश्चैतच्छास्त्रोपस्करणानि[1] हि ॥ 49 ॥

तान्दण्डयित्वा यो जीवेदावयोस्तन्मतानुगान्।
कुरुवेत्यस्य युक्त्या वै प्रतिज्ञां कुरु भूपते ॥ 50 ॥

इत्युक्तो नृपति बौद्धाचार्यस्य मुखमैक्षत।
एवमेवा[2]ब्रवीत्सोऽपि प्रतिजरो[3] नृपस्तदा ॥ 51 ॥

तत उत्थाय ते सर्वे आगतास्तालसन्निधौ।
वंशादिनाथ तौ द्वौ तमारुह्योच्चैर्महातरुम् ॥ 52 ॥

वेदाः प्रमाणमित्युक्त्वा आचार्यो न्यपतद्भुवि।
बौद्धो वेदा अप्रमाणमित्युक्त्वा निपपात ह ॥ 53 ॥

आचार्यो निपतन्भूमौ वेदैस्संरक्षितस्सुखम्।
मन्दं मन्दं समागत्य तस्थौ चायं[4] हरिं स्मरन् ॥ 54 ॥

बौद्धाचार्यः पतन्मार्गे भ्राम्यमाणमुपर्यधः।
परिवर्तितशीर्षाधो पपात धरणीतले ॥ 55 ॥

[5]व्यस्तमस्तकबाह्वङ्घ्रिर्निष्प्राणो न्यपतत्खलः।
इति दृष्ट्वा महाश्चर्यं सर्वे राजादयो जनाः ॥ 56 ॥

आचार्यं प्रशशंसुस्ते नमस्कृत्य मुहुर्मुहुः।
ततो राजा वेदशास्त्रं सत्यं मत्वातिभक्तितः ॥ 57 ॥

स्वराज्ये स्थापयामास सदाचारपरः स्वयम्।
भूत्वा चकार राज्यं स सर्वधर्मसमन्वितः ॥ 58 ॥

नास्तिकस्य तु यान्यासन् शास्त्राणि पृथिवीतले।
तानि सर्वाणि चिक्षेप जले ये तदुपासकाः ॥ 59 ॥

तान्नृपो दण्डयित्वा स चकारास्तिकसम्मतान्।
श्रीमदुदयनाचार्यं चक्रे राजगुरुं नृपः ॥ 60 ॥

जीविकायै ददौ ग्रामान्स्वयमाज्ञापरोऽभवत्।
एकदोदयनाचार्यो जगन्नाथं दिदृक्षया ॥ 61 ॥

---

1. पासनकारकाः – ख, क।
2. एवमेषो – ख।
3. प्रतिज्ञाय – ख, ग।
4. वायं – ख।
5. ख, ग मध्ये लुप्तः पाठः।

पुरुषोत्तमपुरे गत्वा स्नात्वा तत्तीर्थवारिणा।
[1]मार्तण्डोदयात्पूर्वं मन्दिरद्वारमागतः ॥ 62 ॥
देवं द्रष्टुं[2] मन्दिरान्तःप्रवेष्टुं जलतोऽस्य वै।
तदा कपाटस्संलग्नस्स्वयमेव निरीक्ष्य सः ॥ 63 ॥
द्वारान्तरमुपायातस्तत्राप्येवं बभूव ह।
अथ तृतीयद्वारे तु सम्प्राप्तः स यदा द्विजः ॥ 64 ॥
[3]तत्रापि स कपाटस्तु स्वयं लग्नः पुनश्च सः।
चतुर्थं द्वारमागत्य मन्दिरं गन्तुमुद्यतः ॥ 65 ॥
तमप्यपश्यत्संलग्नं कपाटं स्वयमेव हि।
इति कौतुकमेतत्तु पश्यन्तस्ते जनाः स्थिताः ॥ 66 ॥
तदा तूदयनाचार्यः सस्मितं वाक्यमब्रवीत्।
जगन्नाथं सुरश्रेष्ठं भक्त्यहङ्कारपूर्वकम् ॥ 67 ॥
ऐश्वर्यमदमत्तोऽसि मामवज्ञाय वर्तसे।
उपस्थितेषु बौद्धेषु मदधीना तव स्थितिः ॥ 68 ॥
इत्येवमुक्ते श्लोके तु सहसोद्घाटितस्स्वयम्।
कपाटस्तत्क्षणादेव नृणां चित्रं तु पश्यताम् ॥ 69 ॥
[4]ततस्तत्र स्थिता ये तु जगन्नाथस्य पूजकाः।
ते सर्वे विनयात्तं तु गृहीत्वाचार्यमादृताः ॥ 70 ॥
नीत्वाथ मन्दिरे देवं दर्शयन्ति स्म हर्षिताः।
सोऽपि दृष्ट्वा जगन्नाथं सम्पूज्य स्तुतिभिर्मुहुः ॥ 71 ॥
स्तुत्वा नत्वा समभ्येत्य[5] बहिर्दत्त्वा धनानि च।
उषित्वा कतिचिद्रात्रीः समायातुमथोद्यतः ॥ 72 ॥
अथ स्वप्ने जगन्नाथः पूजकान्ब्राह्मणान्स्वयम्।
उवाच मम यश्चास्ति पीताम्बरमनुत्तमम् ॥ 73 ॥
तद्देयमस्मै[6] विदुषे विद्वान्सोऽति मे प्रियः।
ममैवांशो न सन्देहः तेनैव स्थापितोऽस्म्यहम् ॥ 74 ॥

1. मार्कण्डेयोदयानेन – ख।
2. दृष्ट्वा – ख, क।
3. तत्रासौ – ख, ग।
4. तत्र – ख, ग।
5. स्म चाम्येत्य – ख।
6. उदयनाचार्यं – ख।

तिरस्कृत्य महामूढान् बौद्धसिद्धान्तवादिनः ।
इति दृष्ट्वा तु ते स्वप्नं पूजकाः प्रातरुत्थिताः ॥ 75 ॥

परस्परं स्वप्नमध्ये मन्त्रयित्वा तु भक्तितः ।
पीताम्बरं समानीय जगन्नाथाज्ञया ददौ ॥ 76 ॥

आचार्याय ततः सोऽपि धृत्वा[1] तं निजमस्तके ।
प्रणनाम मुहुर्देवं जगन्नाथं मुदा द्विजः ॥ 77 ॥

एवं ततो जगन्नाथप्रसादं प्राप्य स द्विजः ।
मिथिलामाजगामाशु निजमन्दिरमुत्तमम् ॥ 78 ॥

अत्र शिष्योपशिष्यैश्च सेवितः परमादरात् ।
अध्यापयामास मुहुः सर्वशास्त्राणि यत्नतः ॥ 79 ॥

अधीत्य तस्मादाचार्याद्वेदशास्त्राणि सर्वशः ।
धर्मं संस्थापयामास देशे देशेऽति पण्डिताः ॥ 80 ॥

अद्यापि मिथिलायां तु तदन्वयभवा द्विजाः ।
विद्वांसः शास्त्रसम्पन्नाः पाठयन्ति गृहे गृहे ॥ 81 ॥

स तु कालेन महता वृद्धो भूत्वा जरातुरः ।
काशीमागत्य कतिचित् स्थित्वा तत्र दिनानि च ॥ 82 ॥

मणिकर्ण्यां ब्रह्मनाले प्राणांस्तत्याज लीलया ।
प्राप्तः[2] पुरातनं देहं वैष्णवं सुदुर्लभम् ॥ 83 ॥

एवं [3]तूदयनाचार्यो बभूव पृथिवीतले ।
धर्मसंस्थापनार्थाय नास्तिकानां निवृत्तये ॥ 84 ॥

शृण्वन् चरितमेतस्य [4]नरो बुद्ध्या न हीयते ॥ 85 ॥

इति श्रीभगवद्भक्तिमाहात्म्ये उदयनाचार्यचरितं नामैकत्रिंशः सर्गः ॥ 31 ॥

❊ ❊ ❊

---

1. मासः – क ।
2. सो – क ।
3. वदन् मतं मे – ख ।
4. नदी तीरे – क, ग ।

द्वात्रिंशः सर्गः

॥ पुण्डरीकचरितम् ॥

दक्षिणस्यां दिशि ख्याता भीमा नाम नदी शुभा।
तत्तीरे ग्राम आसीद्वै वेदविद्विप्रसङ्कुलः ॥ 1 ॥

तत्रैकः पुण्डरीकेति नाम्नासीद्ब्राह्मणश्शुचिः ।
दाक्षिणात्यकुले जातो महाराष्ट्रेऽतिविश्रुतः ॥ 2 ॥

नातिविद्यो न धर्मज्ञो विप्रो नाति बहुश्रुतः ।
मातृपितृभ्यां[1] सहितः पत्नीप्रेमवशः सदा ॥ 3 ॥

भिक्षान्न जीविकाः सर्वे निर्धनाः लोभवर्जिताः ।
एकदा पुण्डरीकस्य पत्नी भिक्षायै गता ॥ 4 ॥

शुश्राव काशीमाहात्म्यं पुराणे द्विजचक्रतः[2] ।
जहर्ष श्रुत्वा सा तत्र निश्चयं मनसाकरोत् ॥ 5 ॥

काशीमवश्यं यास्यामि यदि देवकृपा भवेत्।
इति सङ्कल्प्य मनसा समागत्य निजं गृहम् ॥ 6 ॥

भर्तारं प्राह सा दीना नाथैकं याचयाम्यहम्।
यदि दास्यसि चेत्सत्यं कुरु वक्ष्याम्यहं वचः[3] ॥ 7 ॥

पुण्डरीक उवाचाथ किं जातमद्य ते प्रिये।
त्वद्याचितं न दास्यामीत्येवं मनसि ते कथम् ॥ 8 ॥

शपेऽहं देवि सत्येन दास्यामि तव याचितम्।
इत्युक्ता सा पतिं प्राह काशिकाया अहं द्विज ॥ 9 ॥

श्रुत्वा माहात्म्यमतुलं मनस्तत्रैव तिष्ठति।
त्वया सह गमिष्यामि काशीं ह्येतद्द्रुतं कुरु ॥ 10 ॥

वृद्धावेतौ च पितरौ तयोर्यात्रा भविष्यति।
इति श्रुत्वा वचस्तस्याः प्रियायाः स द्विजोत्तमः ॥ 11 ॥

अहोऽवश्यं गमिष्यामि ममाप्येष मनोरथः ।
परन्तु कतिचिद्ग्रामाद्गन्तारस्सन्ति वै द्विजाः ॥ 12 ॥

---

1. किरभ्यां – क।
2. वत्कृतः – ख, ग।
3. तव – क।

तैरेव साकं यास्यामि तावद्याचे धनं जनात्।
पथि निर्वाहसिध्यर्थमेतावन्निश्चयो मम॥ 13॥

इत्युक्त्वा स गतो विप्रो याचितुं धनिनो धनम्।
याचित्वाथ ततो विप्रः विक्रीयान्नं च वै द्विजः॥ 14॥

पत्नीं प्रेम्णाश्वमारोप्य पितृभ्यां सहितस्स्वयम्।
चलितः पादचारेण ग्रामीणैस्सह काशिकाम्॥ 15॥

भृत्यवत्तां परिचरन् पत्नीं स्नेहेन स द्विजः।
वृद्धावपि च पितरौ पादचारश्रमाकुलौ॥ 16॥

शुश्रूषति [1]ततः किञ्चिदन्नमात्रं ददौ तयोः।
एवमेव गतः काशीं भीमचण्डीसमीपतः॥ 17॥

तत्र स्नात्वा ददर्शाथ देवीं सम्पूज्य भक्तितः[2]।
पुराणं तत्र शुश्राव वाच्यमानं द्विजेन वै॥ 18॥

पितृसेवनमाहात्म्यं मातृसेवनजं तथा।
पिता ब्रह्मा पिता विष्णुः पिता साक्षात्सदाशिवः॥ 19॥

पिता वै तोषितो येन तेन देवाः सुतोषिताः।
रुष्टे पितरि देवाश्च न तुष्यन्ति कदाचन[3]॥ 20॥

स्नानं सन्ध्या जपो होमो दानं यागो व्रतानि च।
पितुः क्रोधान्नृणां सर्वं निष्फलं जायते ध्रुवम्॥ 21॥

पितरं पूजयित्वा तु तत्पादस्नानवारिणा।
अभिषिञ्चति मूर्द्धानं तेषां तीर्थफलं ध्रुवम्॥ 22॥

जीवतो वाक्यकरणात्क्षयाहे भूरिभोजनात्[4]।
गयायां पिण्डदानेन त्रिभिः पुत्रस्य पुत्रता॥ 23॥

पितुराज्ञाकराः पुत्राः प्रवर्द्धन्ते दिने दिने।
उल्लङ्घन्ति तेषां न सुखं न सुखसन्ततिः[5]॥ 24॥

---

1. तव – क।
2. भक्तिः – ख, ग।
3. कदार्चन – ख, ग।
4. जीवतो वाचाकरण क्षेमाहे भूरि योजनात्– क।
5. संस्तुति – ख।

यस्यान्तसमये माता पिता वा भाषते वचः ।
तत्सर्वं सत्यमेव स्यादाशीर्वादाय[1] एव वा ॥ 25 ॥

पितुर्दशगुणा माता साक्षान्नारायणी[2] परा ।
या धृत्वा दशमासांस्तु गर्भे बालं प्रसूय च ॥ 26 ॥

पुष्णाति स्तनपानाद्यैः प्राणापेक्षं निरन्तरम् ।
मरणे कृतसङ्कल्पा पुत्रे रोगार्दिते सति ॥ 27 ॥

एवं [3]मातृसमा लोके नान्या वै विद्यते गतिः ।
सर्वेषामुपकाराणामस्ति लोके प्रतिक्रिया ॥ 28 ॥

मात्रा कृतोपकारस्य सा नैवास्ति कथञ्चन ।
एवं विप्रमुखात्तत्र भीमचण्डीसमीपतः ॥ 29 ॥

श्रुत्वा पुराणं विप्रस्तु पुण्डरीकोऽतिदुःखितः ।
मनसा च तदात्मानं जगर्ह निजकर्मणा ॥ 30 ॥

निवृत्तायां कथायां तु समुत्थाय वै द्विजः ।
पित्रोः समीपमागत्य तावुभावातिविस्मितः ॥ 31 ॥

पितरावित एवाहं युवां नीत्वा तु भक्तितः ।
स्वग्रामं प्रति यास्यामि न काश्यां मे प्रयोजनम् ॥ 32 ॥

युवयोः सेवनादेव काशीवासफलं भवेत् ।
अद्यावधि कृतं नैव युवयोः सेवनं मया ॥ 33 ॥

अजानतातिमूढेन तत्क्षन्तव्यं सुतस्य मे ।
न मे काशी न मे गङ्गा न मे विष्णुर्न मे शिवः ॥ 34 ॥

युवामेव हि जानामि युवां सर्वं[4] न संशयः ।
इति पुत्रवचश्श्रुत्वा पितरावाहतुः सुतम् ॥ 35 ॥

वत्स क्षमावहे सर्वमावां नैवात्र संशयः ।
वृद्धयो रोगिणोः पित्रोः पुत्र एव सदा गतिः ॥ 36 ॥

न पुत्र सदृशं मित्रं त्रिषु लोकेषु विद्यते ।
न[5] यावो या तवाङ्क्षा किन्तु मद्वचनं शृणु ॥ 37 ॥

---

1. परावरा ।
2. नारायणपराः – ख ।
3. मात्रं – क ।
4. सर्वत्र – क, ग ।
5. नपाव पत्र वा वाक्षते – ख, न यायां यत्र वा वाक्षते – क ।

काशीमागत्य विश्वेशमदृष्ट्वा मणिकर्णिकाम्।
अस्नात्वा तत्र गन्तुं स्वगृहं नो जायते मनः ॥ 38 ॥

अत एतैः समं तत्र गत्वा स्नात्वा यथाविधि।
विश्वेश्वरं नमस्कृत्य गच्छाव इति मे मतिः ॥ 39 ॥

ततः पितृभ्यां युक्तः स पुण्डरीको द्विजोत्तमः।
तदाज्ञां शिरसा धृत्वा गत्वा तद्गृहमध्यतः ॥ 40 ॥

स्नानदानादिकं पित्रोः कारयित्वा यथाविधि।
उषित्वाहानि कतिचित्पित्रोस्सेवापरायणः ॥ 41 ॥

स्वयं ययौ न विश्वेशं द्रष्टुं ताभ्यां विना द्विजः।
एव पित्रोश्च[1] सेवायां निरतोऽभूद्द्विजोत्तमः ॥ 42 ॥

अथ सम्पाद्य पित्रोस्तु काश्यां तैर्ब्राह्मणैस्सह।
आजगाम द्विजस्सोऽपि पितृभ्यां सहितो गृहम् ॥ 43 ॥

समागत्य गृहे प्रातरुत्थाय पितरं स्वयम्।
दन्तधावनमारभ्य भोजनान्तं च यत्नतः ॥ 44 ॥

कारयित्वा ततोऽन्यद्वै चकार तदनुज्ञया।
एवं गतेषु कालेषु भगवानेकदा हरिः ॥ 45 ॥

तद्भक्त्या परितुष्टोऽभूदायातो द्विजरूपधृक्।
द्विभुजश्श्यामलो नातिह्रस्व[2] कमललोचनः ॥ 46 ॥

पादचारी समायातः पुण्डरीकनिवेशनम्[3]।
यत्रासीत्पुण्डरीकस्तु पितुरभ्यङ्गकृद्द्विजः ॥ 47 ॥

पितृसेवासमासक्तमना नान्यद्ददर्श सः[4]।
ततः प्राह द्विजं कृष्णः पुण्डरीकद्विजोत्तम ॥ 48 ॥

समागतोऽहमतिथिर्न मां सम्भाषसे कुतः।
इति श्रुत्वा वचोमात्रं न ददर्श च तं पुनः ॥ 49 ॥

इष्टिकैका स्थिता तस्य पुण्डरीकस्य सन्निधौ।
तां गृहीत्वातिथेरग्रे चिक्षेप त्वरयान्वितः ॥ 50 ॥

---

1. स्व – ख, ग।
2. ह्रष्ठः – ख
3. द्विजोत्तमः – ख।
4. क – मध्ये लुप्तपाठः।

उवाच चात्र तिष्ठ त्वं यावत्सेवां करोम्यहम्।
इत्युक्त्वा स्वपितुस्सेवामचरद् द्विजपुङ्गवः ॥ 51 ॥

भगवानपि तद्भक्तिं दृष्ट्वा तस्य वशङ्गतः[1]।
तस्थौ तदिष्टिकायां तु द्वौ पादौ विनिवेश्य च ॥ 52 ॥

पुण्डरीकस्तु पितरं भोजयित्वा यथाविधि।
श्वापपित्वा[2] तु शय्यायां दत्त्वा ताम्बूलमम्बु च ॥ 53 ॥

बहिरागत्य पाद्यं तु गृहीत्वातिथिसन्निधिम्।
अहो गृहाण पाद्यं भोः स्नानमाचर सुव्रत[3] ॥ 54 ॥

इत्युक्तवान्मुहुर्विप्रो नोवाच सोऽतिथिर्यदा।
तदासौ पुण्डीकस्तु प्रार्थयामास भूरिशः ॥ 55 ॥

अहो क्षमस्व मे सर्वमपराधं द्विजोत्तम।
पितृसेवावशादेव[4] मया पूर्वं न सत्कृतः[5] ॥ 56 ॥

एष मे निश्चयो ब्रह्मन् जह्यां प्राणानपि ध्रुवम्।
पितृसेवां जातु नैव तस्मादेतत्क्षमस्व भोः ॥ 57 ॥

इत्युक्त्वा पादयोस्तस्य पतित्वा पुनरुत्थितः[6]।
हस्तेन हस्तं जगृहे समागच्छेत्यकर्षयत् ॥ 58 ॥

ततः शिलामयो[7] मूर्त्तिरभूत्तत्रातिथिर्हरिः।
न चचाल ततस्तत्र महाश्चर्य्यमभूदहो ॥ 59 ॥

श्रुत्वा सर्वे समायाताः शिष्टा विद्वांस एव च।
अन्येऽपि बालवृद्धाश्च महाश्चर्य्यं दिदृक्षवः ॥ 60 ॥

कोऽयं कस्मादिहायतः कथमेवं बभूव ह।
विद्वद्भिरेवं पृष्टस्तु पुण्डरीक उवाच तान् ॥ 61 ॥

पितृशुश्रूषणं स्वीयं तदागमनमेव च।
अतिथेर्वचनं पश्चादिष्टकादानमेव च ॥ 62 ॥

---

1. च सङ्गत – क, ग।
2. शाययित्वा – क।
3. सुवृत्तम् – क।
4. त्वाहम् – ख।
5. तत्सुतः – ख।
6. संः स्थितः – क।
7. समो – क।

उवाच पुण्डरीकस्तान् श्रुत्वा तेऽप्यतिविस्मिताः।
किमिदं वेति विज्ञातुं न शशाक महानपि॥ 63॥

किञ्चित्कालं चिन्तयन्तः स्थित्वा जग्मुः स्वमालयम्।
तस्थुस्तत्रैव केचित्तु पुण्डरीकालये द्विजाः॥ 64॥

पुण्डरीकस्तु कृत्वा वै नित्यकार्याखिलं पुनः।
पपौ वार्यपि नो विप्रो भोजनस्य तु का कथा॥ 65॥

अतिथावागते तस्मिन्न भुक्ते भोजनं कथम्।
कुर्यामिति विनिश्चित्य सोपवासपरोऽभवत्॥ 66॥

तत्पत्नी चापि पितरौ सर्वे चिन्तासमन्विताः।
अन्येऽपि तद्गृहे केचिदात्मीयास्तस्य चागताः॥ 67॥

तेऽपि नैवाददुः किञ्चिदुदकं चान्नमेव च।
इत्थं दिनं गतं सर्वं सन्ध्याकाले उपागते॥ 68॥

आगता[1] वृद्धविद्वांसः पुण्डरीकनिकेतनम्।
ऊचुः सर्वे मन्त्रयित्वा पुण्डरीक शृणुष्व नः॥ 69॥

यं कञ्चिदतिथिं धायन्[2] स्नापयित्वाम्भसा पुनः।
अभ्यर्च्य गन्धमालाद्यैरन्नमग्रे[3] निवेद्य च॥ 70॥

भक्षयन्तु भवन्तोऽपि नैव धर्मस्तु हीयते[4]।
इत्युक्तः पुण्डीरकस्तु स्वीकृत्योक्तं[5] चकार तत्॥ 71॥

सर्वैः परन्तु बुभुजे स्वयं नैव तु किञ्चन।
यावदेषोऽतिथिर्नैव भुञ्ज्यादन्नमिहाश्रमे[6]॥ 72॥

तावन्नाहं तु भोक्ष्यामि सत्यमेतन्न सशंयः।
तावत्प्राणास्तु तिष्ठन्तु यान्तु किं वा करोम्यहम्॥ 73॥

इति कृत्वा पुण्डरीको निश्चयं निजमानसे।
न किञ्चिद्बुभुजे रात्रौ पितृसेवापरायणः॥ 74॥

---

1. आगत्य – ख।
2. चेन्मां – ख।
3. गन्धमालाद्यैरन्नैर्पद्यैः – क।
4. ह्रीयते – क,
5. त्वां कृत्योक्तम् – क, ग।
6. भुक्षदन्नम् – ख।

सुष्वाप[1] पितरं सम्यक् स्वापयित्वा सुखास्तरे।
अथ रात्रौ हरिस्साक्षात्सर्वेषां पुरवासिनाम्॥ 75॥

पुण्डरीकस्य च स्वप्नं ददौ तद्भक्ति[2]यन्त्रितः।
पुण्डरीक द्विजश्रेष्ठ तुष्टोऽहं तव भक्तितः॥ 76॥

अनेनैव च रूपेण वसाम्यत्रैव सर्वदा।
त्वां पश्यन्नहि तृप्यामि पितृसेवापरायणम्॥ 77॥

द्वारकायाः समानीय रुक्मिणीमपि यत्नतः।
अत्रांशेन स्थितो भूत्वा भक्ताभीष्टं ददाम्यहम्॥ 78॥

ये मां प्रेम्णात्र पश्यन्ति समश्लिष्यन्ति मानवाः।
तुलसीपत्रमात्रेण पूजयन्ति प्रयत्नतः॥ 79॥

तेऽतीव वल्लभा लोके भविष्यन्ति न संशयः।
अत्र मां [3]पूजयन्तस्तु कलावपि नरा ध्रुवम्॥ 80॥

भविष्यन्ति च मे भक्ता मत्प्रसादान्न संशयः।
तस्मात्त्वं द्विजशार्दूल न चिन्तां कर्तुमर्हसि॥ 81॥

प्रातरुत्थाय पितरौ[4] परिचर्य यथाविधि।
भुंक्ष्वान्नमहमत्रैव निवसामि भवद्गृहे॥ 82॥

इति स्वप्नं ददौ तस्मै पुण्डरीकाय वै हरिः।
अन्येभ्यो ग्रामवासिभ्यः [5]पश्चात्तद्देशभूपतिः॥ 83॥

तस्मै स्वप्ने हरिस्साक्षात्कथामेतामुवाच ह।
अथ प्रभाते ते सर्वे ग्रामीणाः स च भूपतिः॥ 84॥

उत्थाय पुण्डरीकस्य वेश्म जग्मुर्मुदान्विताः।
ऊचुः परस्परं सर्वे पुण्डरीकस्तु मूकवत्॥ 85॥

अर्चयित्वा[6] तु पितरौ तस्थौ तेषां पुरः [7]स्थितः।
तमाहुः पुण्डरीकं तु राजाथ पुरवासिनः॥ 86॥

---

1. सुखाय – ख
2. मन्त्रितः
3. पृजयिष्यन्ति – ख।
4. ख मध्ये लुप्तपाठः।
5. यश्च – क।
6. सेवयित्वा – क।
7. पुरस्सरम् – ख।

धन्योऽसि त्वं द्विजश्रेष्ठ धन्यं ते पितृसेवनम्।
यत्प्रसादाद्धरिस्साक्षात्समागत्यात्र तिष्ठति ॥ 87 ॥

इत्युक्त्वा तं पुरस्कृत्य पुण्डरीकं द्विजोत्तमम्।
पूजां चक्रुर्महाभक्त्या तस्य श्रीरुक्मिणीपतेः[1] ॥ 88 ॥

विशस्थलेऽस्मिन्नित्युक्तः पुण्डरीकेन यत्प्रभुः।
ततो विट्ठलनामासौ विख्यातोऽस्ति हरिस्स्वयम् ॥ 89 ॥

पुण्डरीकपुरं साक्षात्सिद्धिक्षेत्रं कलौ युगे।
विशेषेण नृणां भुक्तिर्मुक्तिस्तद्दर्शनादपि ॥ 90 ॥

महाविष्णोर्निवासेन सर्वे सेन्द्रादयः सुराः।
समागत्य च तत्रैव क्षेत्रे तिष्ठन्ति सर्वदा ॥ 91 ॥

शिवोऽपि स्वगणैस्सार्द्धं गणेशेन समं पुनः।
तिष्ठत्यहर्निशं[2] भक्तरक्षणाय निजांशतः ॥ 92 ॥

देव्योऽपि विष्णुभक्तानां पालनाय निरन्तरम्।
तिष्ठन्ति पुण्डरीकस्य पुरे पुण्यतमे शुभे ॥ 93 ॥

पुण्डरीकपुरस्यास्य माहात्म्यं चातिविस्तरम्।
नाहं जानामि संक्षेपाद्यथा श्रुतमुदाहृतम् ॥ 94 ॥

अद्यापि[3] दृश्यते तत्र नामसङ्कीर्तनादपि।
महापातकसङ्घातैर्मुच्यते नात्र संशयः ॥ 95 ॥

तत्रैवागत्य निवसन्[4] विट्ठलेशमहर्निशम्।
स्मरन्नवाप्य सकलान्भोगानन्ते गतो दिवम् ॥ 96 ॥

इति श्रीभगवद्भक्तिमाहात्म्ये विट्ठले पुण्डरीकचरितं नाम द्वात्रिंशः सर्गः ॥ 32 ॥

❊ ❊ ❊

---

1. गीयते – क।
2. तिष्ठन्ति – ख, ग।
3. अथापि – क, ग।
4. निवसन्ति – ख।

त्रयस्त्रिंशः सर्गः

॥ नामदेवोत्पत्तिचरितम् ॥

पुण्डरीकपुरेत्येतन्नाम्ना ग्रामो बभूव यः[1]।
स एव पण्डर[2]पुरमिति [3]ख्यातोऽस्ति साम्प्रतम् ॥ 1 ॥

अत्रैव नामदेवोऽभून्महाभागवतस्सुतः।
तस्योत्पत्तिं च कीर्तिं च वक्ष्याम्याश्चर्य्यमुत्तमम् ॥ 2 ॥

बभूव पठरपुरे वामदेवेति नामतः।
जात्या शिल्पीति विख्यातश्शूद्रस्सत्कर्मवर्ज्जितः ॥ 3 ॥

धनवान् ज्ञातिसम्पन्नो भ्रातृभिः परिवारितः।
सोऽनपत्यो बभूवाथ वयसा वृद्धतां गतः ॥ 4 ॥

तथापि निजकर्मासौ न तत्त्याज धनाशयः।
एकदा तत्प्रिया प्राह किमर्थं खिद्यसे वृथा ॥ 5 ॥

अनपत्योऽसि नाथ त्वं को भोक्तास्य धनस्य[4] मे।
इमे ते भ्रातरस्सर्वे मनसा चिन्तयन्ति हि ॥ 6 ॥

इमावपत्यरहितौ मृतयोरेतयोर्धनम्।
भोक्ष्यामो वयमेवेति कथयन्ति मुहुर्मुहुः ॥ 7 ॥

इति श्रुत्वा वचस्तस्या वामदेवो महामुनिः[5]।
उवाच वचनं तस्याः परितोषकरं हितम् ॥ 8 ॥

शृणु प्रिये प्रवक्ष्यामि निश्चयेन मतं मम।
न त्यक्ष्यामि निजं कर्म यथाशक्तिर्न संशयः ॥ 9 ॥

कस्य चित्तस्य को भोक्ता नैवं जानाति कश्चन।
इमे सम्वर्द्धिता वित्तैर्मयैवं[6] कथयन्ति माम् ॥ 10 ॥

अतः कृतघ्ना एवैते भ्रातरो मम वल्लभाः।
तमुपायं प्रवक्ष्यामि येनैषां निष्फलं वचः ॥ 11 ॥

---

1. सः – ख
2. परादृश – ख
3. ज्ञातो – ख
4. ख मध्ये लुप्तः पाठः
5. महायति – ख
6. समैवं – क

भविष्यति न सन्देहो विधे हि मम शासनम्।
कुरुष्व सुकृतं नित्यं येन सन्ततिमाप्नुयाम्[1] ॥ 12 ॥

जातायां सन्ततावेते चिन्तयिष्यन्ति नेदृशम्।
इति श्रुत्वा प्रिया प्राह सुकृतं केन कर्मणा ॥ 13 ॥

कर्त्तव्यमिति मे ब्रूहि यत्करोम्यहमादरात्।
प्रियाया वचनं श्रुत्वा वामदेवोऽब्रवीत्पुनः ॥ 14 ॥

न जानामि किमप्यन्यत्सुकृतं साधुवादिनि।
गुरुणा चोपदिष्टोऽहं[1] साधुसेवापरो भव ॥ 15 ॥

मन्त्रं दत्त्वोक्तवानेवं तन्मन्त्रो विस्मृतो मया।
उपदेशस्स्मृतो मेऽद्य तस्मात्सेवैव केवलम् ॥ 16 ॥

जानीहि सुकृतं तन्वि तेन साधय वाञ्छितम्।
अतोऽद्यारभ्य यः कश्चित्सांयकाले गृहे मम ॥ 17 ॥

आगमिष्यति वा ग्रामे भीमातीरेऽथवा पुनः।
तत्र गत्वा धनैः कायैस्तेषां[2] सेवा विधीयताम् ॥ 18 ॥

अहमाज्ञापयामि त्वां व्ययशङ्कां त्यज शुभे[3]।
अहं तु प्रत्यहं भीमातीरे सायं समागतान् ॥ 19 ॥

[4]प्रणयधनवस्त्राद्यैस्तोषयिष्याम्यसंशयम्।
एवं सत्सेवने सक्तावशक्तौ वृद्धदम्पती ॥ 20 ॥

लेभाते सन्ततिं कन्यां साधुसेवाप्रभावतः।
जातायां कन्याकायां तौ मुमुदाते तु दम्पती ॥ 21 ॥

[5]ऊचतुर्हृष्टमनसौ फलितं साधुसेवनम्।
सुमतिश्चेति नाम्ना सा पित्रा प्रख्यापिता शुभा ॥ 22 ॥

तदारभ्यातिभक्त्या तौ पूजयाञ्चक्रतुस्सतः।
सापि कन्याचिरेणैव ववृधे पितृलालिता ॥ 23 ॥

---

1. मुयात् – ख
2. कामैः – ख
3. स्वप्रे – ख
4. प्रणाम – ख
5. द्रवतु – क, ग

कदाचित्सुदिनं ज्ञात्वा कञ्चिदानाय्य बालकम्।
विवाहं कारयामास महोत्सवविधानतः ॥ 24 ॥

पुत्रवद्वामदेवस्य जामाता न्यवसद्गृहे।
मुमुदाते सुतां वीक्ष्य जामातरमथापि वा ॥ 25 ॥

हर्षेण महताविष्टौ तदा तौ वृद्धदम्पती।
एवं गतेषु कालेषु जामाता ज्वरपीडितः ॥ 26 ॥

षोडशाब्दे ममारास्य वामदेवस्य पश्यतः।
तदातिकष्टं[1] तौ दृष्ट्वा हाहाकारं प्रचक्रतुः ॥ 27 ॥

दृष्ट्वा पुरजनैस्सर्वैश्शान्तितौ वृद्धदम्पती।
कष्टमेवं समाप्यापि[2] साधुसेवां न तत्यजुः ॥ 28 ॥

वामदेवस्सुता चैषा तत्पत्नी चेति ते त्रयः।
एकदा तनयायास्तु पुनर्वैवाहिकं विधिम् ॥ 29 ॥

वामदेवोऽब्रवीत् पत्नीं तमेषाप्यन्वमोदयत्[3]।
तच्छ्रुत्वा सुमतिः कन्या रुरोद भृशदुःखिता ॥ 30 ॥

नाहमिच्छामि भर्त्तारं मृते पत्यौ तपस्विनी।
कुलदूष्या[4] न चैवाहं भविष्यामि कदाचन ॥ 31 ॥

युवयोः सेवने सक्ता साधुसेवापरायणा।
दासीव नित्यं ते मातर्गृहे वत्स्यामि सुव्रता ॥ 32 ॥

इति तस्या वचश्श्रुत्वा जननी प्राह तां सुताम्।
यदि न स्वीकरोषि त्वमेवं मे वचनं सुते ॥ 33 ॥

बलेन ते पिता पुत्रि विवाहं कारयिष्यति।
श्रुत्वैवं सुमतिः प्राह मातरं निष्ठुरं वचः ॥ 34 ॥

यद्येवं तर्हि भीमायां निमज्याद्यैव जीवितम्।
त्यक्ष्याम्यहं न सन्देहः शपामि[5] तव पादयोः ॥ 35 ॥

इति श्रुत्वा सुतावाक्यं भीता स्नेहेन विह्वला।
न्यषेधत[6] पतिं सोऽपि सुतापाणिग्रहं प्रति ॥ 36 ॥

---

1. कष्टि – ख।
2. गतावापि – ख।
3. सेवैव – ख, ग।
4. इष्यति – ख।
5. पश्यामि – ख।
6. सत्यषेधात्वतिं – क, प्रत्यषेधात्वाति – ख।

निवृत्तो वामदेवोऽपि प्रियावचनयन्त्रित: ।
तत: सा तनया दीना पितृमातृपरायणा ॥ 37 ॥
साधुसेवारता नित्यं ब्राह्मणीव वशे स्थिता ।
एकदा माघमासे तु पर्य्यन्योऽप्यति वर्षति ॥ 38 ॥
रात्रौ जलार्थिनी कुम्भं गृहीत्वा सुमतिर्गता ।
भीमायां जलमाहर्तुं [1]तत्रापश्यत्पथि स्थितम् ॥ 39 ॥
इतस्ततो भ्राम्यमाणं दीनं वर्षाम्बुताडितम् ।
अन्धं दण्डधरं विप्रं विष्णुभक्तिपरायणम् ॥ 40 ॥
त्राहि कृष्णेति भाषन्तमर्द्धप्राणं तपस्विनम् ।
तत्र गत्वाथ सुमति: प्राह प्राञ्जलिरानता ॥ 41 ॥
एहि व्रिप समागच्छ मम गेहे मया सह ।
शूद्री चाहं मम पिता तव भक्तो धृतव्रत: ॥ 42 ॥
पूजयिष्यति सोऽपि त्वामाज्ञापय नमोस्तु ते ।
इति श्रुत्वाति शीतार्तो द्विज: प्रोवाच वेपित: ॥ 43 ॥
नय मां जीवदानं मे कुरु भद्रे प्रियं मम ।
इत्युक्तवन्तं तं विप्रं स्थापयित्वा शिरस्यथ ॥ 44 ॥
निनाय स्वगृहं तन्वी तत्र वह्निं प्रदीप्य च ।
तापयित्वाथ तं विप्रं फलमूलादिना पुन: ॥ 45 ॥
भोजयित्वा सुखस्तीर्णे स्थापयित्वा शुचिव्रता ।
सुमतिर्मातृभवनं गत्वा सुष्वाप तां निशाम् ॥ 46 ॥
अथ प्रभाते विमले निवृत्ते[2]जलवर्षयो: ।
उत्थाय विप्रस्सुमतिं पुत्रीमिव आह्वयत् ॥ 47 ॥
अये वत्से समागच्छ वामदेव: पिता क्क[3] ते ।
आयातु[4] तं समाभाष्य गमिष्यामि यदृच्छया ॥ 48 ॥
इति श्रुत्वाथ सुमति: पित्रा सह समागता ।
नमस्कृत्वाब्रवीद्वाक्यं किं करोमि प्रसीद मे ॥ 49 ॥

---

1. तत्र सा ददृशो पथि – ख।
2. लवर्षणे – ख।
3. कृते – ख।
4. आपाततं – ख।

तच्छ्रुत्वा वचनं तस्या विप्रस्तद्भक्तिविह्वलः।
उवाच वचनं वत्से त्वयाहं रक्षितो निशि॥ 50॥

अतः प्रसन्नस्तेऽनिवरं त्वं पुत्रिणी भव।
इति विप्रवचश्श्रुत्वा वामदेवोऽतिदुःखितः॥ 51॥

प्रणम्याह वचो विप्रं नाथ युक्तं न ते वचः।
इयं हि विधवा नैव स्वीचकार पतिं पुनः॥ 52॥

अतोऽस्याः पुत्रिणीत्वे तु वाक्यं तव कथं भवेत्।
इति श्रुत्वा दत्तदृष्टिः[1] स विप्रो बहुदुःखितः॥ 53॥

वामदेवमुवाचाथ नाशीर्वादो वृथा मम।
अद्यावधि श्रीगोविन्दप्रसादादभवत् क्वचित्॥ 54॥

अतोऽहं भीमातीरेऽत्र गत्वास्याः पुत्रकारणात्।
पूजयिष्यामि गोविन्दं मदुक्तं स करिष्यति॥ 55॥

इत्युक्त्वा स गतो विप्रो भीमातीरे [2]दृढासनः।
अहोरात्रैश्च बहुभिस्तुष्टाव जगदीश्वरम्॥ 56॥

निराहारोदको विप्रः क्षुत्पिपासार्दितोऽभवत्।
मरणे कृतसङ्कल्पः कामसिद्धिमृते द्विजः॥ 57॥

एकदातिकृशो दीनो निद्रामिव समागतः।
तत्र पश्यति वै विप्रस्स्वप्ने शुक्लाम्बरस्रजम्॥ 58॥

तुलसीदामजामोदैस्तर्प्ययन्तं दिशो दश[3]।
स्वप्ने तं प्राह विप्रं स किमर्थं खिद्यसे द्विज॥ 59॥

इति श्रुत्वा द्विजः प्राह निजकाममशेषतः।
श्रुत्वा तद्वचनं विप्रश्शुक्लाम्बरधरोऽब्रवीत्॥ 60॥

उत्तिष्ठ विप्र भद्रं ते भविष्यति तवेप्सितम्[4]।
अचिरेणैव कालेन प्रत्ययो दर्श्यते मया॥ 61॥

यदि प्रभाते एवैते चक्षुषी तव सुव्रत।
भविष्यतस्तदा तस्याः पुत्रे मा कुरु संशयम्॥ 62॥

---

1. सन्विप्रो – क।
2. इवासनः – क।
3. ख मध्ये लुप्तपाठः।
4. तवेक्षितम् – ख।

स्वप्ने स्वपतिरूपेण कृष्णेन सह सङ्गता।
सती जनयिष्यति सुतं विष्णुभक्तं न संशयः ॥ 63 ॥

जाते सुते तां पापिष्टां कथयिष्यन्ति[1] ये वृथा।
अन्धास्ते कुष्ठरोगार्ता भविष्यन्ति न संशयः ॥ 64 ॥

इत्युक्त्वा स गतो [2]विष्णुस्सोऽपि स्वप्नात्प्रबोधितः ।
चिन्तयन् हृदि हर्षेण विस्मयेन समाकुलः ॥ 65 ॥

निन्ये तां शेषरजिनीं प्रातःकालं समर्थयन्[3] ।
अथ प्रभाते पश्यन् स गृहवस्तूनि सर्वशः ॥ 66 ॥

मुमुदे क्षुत्पिपसार्तिं जहौ विप्रोऽति हर्षितः ।
जगाम त्वरितं वामदेवस्य भवनं प्रति ॥ 67 ॥

आहूय तं समाचष्टे स्वप्ने दृष्टमशेषतः ।
प्रादुर्भावश्चक्षुषोश्च प्रत्ययो दर्शितस्तथा ॥ 68 ॥

समाश्वास्य गतो विप्रः स्वैरचारी यदृच्छया।
वामदेवोऽपि तच्छ्रुत्वा हृष्टो भीतश्च लोकतः ॥ 69 ॥

गोविन्दं प्रति मां गेहे संस्थाप्यर्च्चनतत्परः ।
पयोमात्रं नियमितो निवेद्य बुभुजे स्वयम् ॥ 70 ॥

एवं गतेषु कालेषु स्वप्ने सा सुमतिः पतिम्।
ददर्श तेन गर्भं सा धारयामास सुव्रता ॥ 71 ॥

उत्थिता सा निशान्ते तु शोकेन महताकुला।
किं जातमिति चित्तेन भाषमाणा नतानना[4] ॥ 72 ॥

तां दृष्ट्वा सुमतिं माता प्राहोतिष्ठ किमित्यहो।
निष्कारणो मनस्तापो दृश्यते कथमद्य[5] ते ॥ 73 ॥

इति मातृवचश्श्रुत्वा स्वप्नं प्राह मनस्विनी।
तच्छ्रुत्वा वचनं पुत्र्या हृष्टा माता सुवाचताम् ॥ 74 ॥

विप्रस्य वरदानादिश्रुतं यत्प्रति[6] चक्षुषः ।
श्रुत्वैतत्सापि विश्वस्ता गृहकर्मपराभवत् ॥ 75 ॥

---

1. कथयति – क।
2. विप्रः – ख।
3. समर्च्चयत् – ख।
4. जानता – क।
5. कथमुद्यते – ख।
6. यत्पति वहुतः – ख।

गोविन्दार्चापरा सर्वे साधुसेवापरायणाः।
निन्युस्ते[1] दशमासान्वै वामदेवादयस्त्रयः॥ 76॥

अथैकदा निशाभोग सुमुहूर्त्ते मनस्विनी।
असूत तनयं गेहे सुखेनैव शुचिव्रता॥ 77॥

श्रुत्वैतद्वामदेवोऽपि वरदानमनुस्मरन्।
दृष्टः प्राह प्रियां नाम्नां वामदेवोऽभवत्स्वयम्॥ 78॥

पुत्रिकातनयो लोके पुत्र एव न संशयः।
इति श्रुतं विप्रमुखादावयोरप्ययं सुतः॥ 79॥

इत्युक्ता प्रातरासाद्य ययौ ब्राह्मणमन्दिरम्।
पुरोहितं समाहूय दानं दातुं कृतोद्यमः॥ 80॥

पुरोहितं जगर्हाथ वामदेवं [2]सभास्थितः।
ये स्थितास्तेऽपि जहसुर्याहि याहीति चापरे॥ 81॥

ऊचुर्मित्रगणस्तत्र मत्वा तां व्यभिचारिणीम्।
अथ तत्क्षणमेवान्धो जातो वै स पुरोहितः॥ 82॥

कुष्ठिनश्च बभूवुस्ते आसन् ये वैरिणो जनाः।
अतः कोलाहलो जातो मत्वा तां साधुचारिणीम्॥ 83॥

समेत्य भवनं सर्वे वामदेवस्य तस्य वै।
उत्सवं परमं चक्रुः दानभावादिभिर्जनैः॥ 84॥

वामदेवोऽपि विप्रेभ्यो ज्ञातिभ्योऽपि यथार्हणः।
दत्त्वा धनं च गोविन्दं सम्पूज्याभ्यर्च्य सज्जनान्॥ 85॥

मेने[3] कृतार्थमात्मानं पत्न्या सह महामतिः।
तदारभ्य दृढां भक्तिं गोविन्दे स[4] चकार ह॥ 86॥

इति श्रीभगवद्भक्तिमाहात्म्ये वामदेवोत्पत्तिचरितं नाम त्रयस्त्रिंशः सर्गः॥ 33॥

❊ ❊ ❊

---

1. विन्यस्ते – ख।
2. सभासद – ख, ग।
3. मन्ये – क।
4. म – ख।

चतुस्त्रिंशः सर्गः

॥ प्रतिमादुग्धपानं नामदेवचरितम् ॥

स जातो वर्द्धमानस्तु धलिकेलिपरोऽभवत्।
तत्रापि बालकैस्सार्द्धं निर्माय रजसा हरिम् ॥ 1 ॥

पूजयन्प्रत्यहं [1]पूजामनुकुर्वन्निवार्भकः।
एवं गतेषु कालेषु स [2]जातस्सप्तहायनः ॥ 2 ॥

मातामहेन सार्द्धं स विचिक्रीडाहर्निशं सुखी।
एकदा कार्ययोगेन वामदेवः क्वचिद्गतः ॥ 3 ॥

उक्त्वेदं नामदेवाय वत्स! यामि दिनत्रयम्।
कार्यमस्ति ततस्त्वं तु प्रातरुत्थाय नित्यशः ॥ 4 ॥

गां दुग्ध्वाथ शुचिर्भूत्वा गोविन्दं पाययिष्यसि।
पयस्तदान्नं भुञ्जीथा इत्येवं तु व्रतं मम ॥ 5 ॥

स्वीचकारार्भको वामदेवो ग्रामान्तरं [3]गतः।
नामदेवोऽपि गां दुग्ध्वा पुटके तद्विधाय[4] च ॥ 6 ॥

नीत्वा गोविन्दभवने [5]गतः प्राञ्जलिरब्रवीत्।
पिब दुग्धं महाराज मातामहनिदेशतः ॥ 7 ॥

मयैवोपाहृतं चाद्य स तु ग्रामान्तरं गतः।
जल्पन्नेवं नामदेवो गोविन्दप्रतिमाग्रतः ॥ 8 ॥

पिबति स्म यदा नैव तदा स पुनरेवहि।
उत्थायोत्थाय दुग्धं तु गृहीत्वा प्रणिपत्य च ॥ 9 ॥

चिन्तयामास मनसा सिता नास्मिन् समाहृता।
अतो नैव पिबस्येत्ततोऽन्यद्दद्मि ते [6]पयः ॥ 10 ॥

इत्युक्त्वा सितया युक्तं कृत्वा दुग्धं करेण[7] च।
गृहीत्वा पुनरुत्थाय प्रार्थयामास भूरिशः ॥ 11 ॥

---

1. पूजायं – क।
2. सनातनः सहायनः – क, ग।
3. तदा – ख, ग।
4. पाठपूजा विधाय च – क।
5. प्रातः – ख, ग।
6. ख मध्ये लुप्तः पाठः।
7. करोति – ख।

न पपौ प्रतिमा दुग्धं तदा तां पुनरब्रवीत्[1] ।
मां न जानास्यतो नैव पिबस्येतत्पयो मम ॥ 12 ॥

अहं तु वामदेवस्य सुतापुत्रो न संशयः ।
तिष्ठाम्यत्रैव भवने जाने त्वां त्वन्न वेत्सि माम् ॥ 13 ॥

इत्युक्त्वा दुग्धमादाय पुनरुत्थाय यत्नतः ।
प्रसीद मे पिब पयो मुहुर्मुहुरुवाच[2] ताम् ॥ 14 ॥

एवं प्रार्थमानस्य सम्पूर्णं दिनमत्यगात् ।
न पपौ प्रतिमा दुग्धं ततश्चिन्तापरोऽभवत् ॥ 15 ॥

किञ्चाहमशुचिः किं वा पात्रमेतत्पयोऽशुचि ।
अतः प्रातस्समुत्थाय स्नात्वा प्रक्षाल्य भाजनम् ॥ 16 ॥

दास्यामि ससितं देवं ततो यास्यामि निश्चितम् ।
कथमन्नमहं भोक्ष्ये गोविन्देऽस्मिन् बुभुक्षिते ॥ 17 ॥

इति निश्चित्य शिष्ये स रात्रौ त्यक्त्वाशनोदके ।
मात्रा शिशुं प्रार्थयन्ती[3] बुभुजे नैव किञ्चन ॥ 18 ॥

अथ प्रभाते चोत्थाय स्नात्वा सम्मार्ज्य मन्दिरम् ।
पयो दुग्ध्वा प्रतिष्ठाप्य पुनस्स्नात्वा समाहितः ॥ 19 ॥

ससितं दुग्धमादाय पिबेति मुहुरब्रवीत् ।
न पपौ प्रतिमा तत्र मनस्येवमचिन्तयत् ॥ 20 ॥

न स्नानं कृतमेतेन न कृतं दन्तधावनम् ।
अतो नैव पिबत्येव तस्मात् तत्कारयाम्यहम् ॥ 21 ॥

इत्युक्त्वा जलमादाय दत्त्वास्मै दन्तधावनम् ।
स्नापयित्वाप्यसौ वस्त्रं परिधाप्याग्रतः स्थितः ॥ 22 ॥

पयो गृहीत्वा पाणिभ्यामुवाच प्रणयान्वितः ।
मयापि नैव भुक्तं तं भो दिनमेकं ममात्यगात्[4] ॥ 23 ॥

---

1. न पपौ प्रतिदुग्धं तु मनस्येवमचिन्तयत्- ख।
2. मुहुरेवमुवाच - ख, ग।
3. प्रार्थयमानो - ख।
4. समात्ययगत् - ख।

अतः पिब महाराज पय इत्यब्रवीन्मुहुः।
न पपौ प्रतिमा दुग्धं ज्ञात्वैतत्संरुरोद ह॥ 24॥

(उवाच वचनं बालो रुदन्नति सुदुःखितः।
अहो मातामहकरात्प्रत्यहं पीतवानसि॥ 25॥

आगमिष्यति स प्रातस्तदा वक्ष्याम्यति स्फुटम्।
बुभुक्षितं त्वां मत्वा स किं मां वक्ष्यति कोपतः॥ 26॥

अहो नैव पिबसीदं भोस्ततस्त्यक्षामि जीवितम्।
सत्यमेतन्न सन्देह इत्युक्त्वा प्ररुरोद ह॥ 27॥)[1]

अथ तत्र तु गोविन्दप्रतिमानेत्रयुग्मतः।
अपतच्चाश्रुधारा[2] वै दृष्ट्वा बालोऽप्यभाषत॥ 28॥

किं रोदिषि पिबस्येतन्नो चेदत्रैव जीवितम्।
त्यक्ष्यामि पश्यतस्तेऽद्य सत्यमेतन्न संशयः॥ 29॥

इत्युक्त्वा तन्मुखे दुग्धं भोजयामासहृष्टवत्।
प्रतिमाप्यपिबद्दुग्धं इत्याश्चर्य्यतरं महत्॥ 30॥

पिबन्ती तां पुनः प्राह नामदेवोऽति हर्षितः।
सर्वं पिबसि गोविन्द मदर्थं[3] नैव रक्षसि॥ 31॥

तव पीतावशिष्टं तु मातामहसमर्पितम्।
बहुधा पीतमस्माभिरतो विज्ञापयाम्यहम्॥ 32॥

इति श्रुत्वाथ सा मूर्तिः सस्मिता दुग्धमत्यजत्।
गृहीत्वा तत्करे हृष्टो नामदेवो बुभुक्षितः॥ 33॥

बुभुजे मातृदत्तं यद्गृहे भोज्यादिकं च तत्[4]।
केचिदाश्चर्य्यमेवं हि श्रुत्वा श्रद्धधिरे नहि॥ 34॥

केचिद्वदन्ति[5] सत्यं स्याद्भगवान्भक्तवत्सलः।
केचिदागत्य सुमतिं पप्रच्छुरिदमादरात्॥ 35॥

इत्येतद्वदन्ति[6] सत्यं स्याद्भगवान्भक्तवत्सलः।
केचिदागत्य सुमतिं पप्रच्छुरिदमारात्॥ 36॥

---

1. क-मध्ये लुप्तः पाठः
2. अपश्यच्चाश्रुधारा – ख, क।
3. मदर्शं – ख।
4. स्थितम् – ख, ग।
5. वदन्तु – क।

इत्येतद्भक्तिमाहात्म्यं नामदेवस्य कीर्तितम्।
भूय एव प्रवक्ष्यामि तस्य माहात्म्यमद्भुतम्॥ 37॥

इति श्रीभगवद्भक्तिमाहात्म्ये प्रतिमादुग्धपानं नामदेवचरितं नाम चतुस्त्रिंशः सर्गः[1] ॥ 34॥

⁂

पञ्चत्रिंशः सर्गः

॥ नामदेवचरितम्॥

अथ कालेन कियता वामदेवो ममार ह।
भीमातीरेऽथ तत्पत्नी बभूव सहगामिनी ॥ 1॥

वह्निं चितायां प्रज्वाल्य प्रविवेशातिहर्षिता।
नामदेवोऽपि[2] दुःखार्तः तस्थौ कृत्वौर्द्ध्वदेहिकम्॥ 2॥

ब्राह्मणेभ्यो धनं दत्त्वा भोजयित्वात्मबान्धवान्।
साधून्सन्तर्प्य विविधैरन्नैश्च बभुजे स्वयम्॥ 3॥

ततः साधु समार्चाया तेने गोविन्दपूजने।
समासोक्तो नामदेवो निजवृत्तिर्न चास्मरत्॥ 4॥

मातामहार्जितं वित्तं साधुभ्यः प्रत्यहं ददन्।
स्वयं तु बुभुजे किञ्चिज्जनन्या[3] सह वेश्मनि॥ 5॥

निवसन् विष्णुरेवैते इति साधूनमन्यत।
एकदा महदाश्चर्य्यमेकादश्यामभूदहो॥ 6॥

तत्र भीमानदीतीरे विष्णुमन्दिरमुत्तमम्।
वैष्णवास्तत्र तिष्ठन्ति विष्णुसेवापरायणाः॥ 7॥

उपोषणपरास्तत्र कदाचिद्धरिवासरम्[4]।
कुर्वन्तो जागरं[5] रात्रौ नृत्यगीतादिना जनाः॥ 8॥

तोषयन्ति जगन्नाथं मन्दिरं विष्णुतत्पराः।
श्रुत्वा तेषां गीतनादं[6] नामदेवोऽति हर्षितः॥ 9॥

---

1. चतुस्त्रिंशोध्यायः – ख।
2. वामदेवोऽति – ख मातृकायां नामदेव स्थाने सर्वत्र वामदेव।
3. ख मध्ये लुप्तः पाठः।
4. दिवासरम् – ख।
5. ख मध्ये लुप्तः पाठः।
6. लुप्तः पाठः – ख।

अर्द्धरात्रे गते काले जगाम हरिमन्दिरम्।
उपवासरतश्शान्तो विष्णुभक्तिपरायण: ॥ 10 ॥

द्वार एव स्थितो देवं प्रणम्योपानहौ पुन:[1]।
निबध्य वस्त्रैश्चौरस्य शङ्कया नात्यजद्बहि:[2] ॥ 11 ॥

ततोऽन्त: प्रविवेशासौ गीतनृत्यपरायण: ।
वस्त्रेणाच्छादिते तत्र इष्टे केनाप्युपानहौ ॥ 12 ॥

अरे मूर्ख किमेतत्ते यद्बद्ध्वोपानहौ पुन: ।
मठं प्रविष्टो देवस्य धिग्धिग्गच्छेति ताडित: ॥ 13 ॥

केनचित्तु गते हस्तं दत्त्वा निष्कासितो बहि: ।
बहिरागत्य स तदा नामदेवोऽतिहर्षित: ॥ 14 ॥

अहो सम्यक्कृतश्चैतैस्साधुभिर्मम शासनम्।
यदहं सुदुराचारो लोभादेव मठे गत: ॥ 15 ॥

इत्येवमुक्त्वा मनसा मठस्य पश्चात्प्रदशे किल[3] नामदेव: ।
गत्वार्चयामास हरिं स्वभक्त्या हर्षाश्रुणा गद्गदनादगीतै: ॥ 16 ॥

ततश्चकम्पे मठभूमिरुच्चैर्जुधूर्णं तन्मन्दिरमेव सर्वे।
भूकम्प इत्यूचुरथाशु मन्दिरात्पलयिता मन्दिरपातभीत्या ॥ 17 ॥

[4]तत: क्षणेन स्थिरतामुपागतो मठस्तु सर्वे विपरीतवक्त्रा: ।
दृष्टोऽथ तत्सम्मुख एव नामदेवस्स्थित: प्राञ्जलिरत्युदार: ॥ 18 ॥

दृष्ट्वैतत्परमाश्चर्यं सर्वे विस्मयमागता: ।
नामदेवं समासाद्य प्रशंसुश्च ते जना: ॥ 19 ॥

महाश्चर्यमिति प्रोचुर्भक्तिमाचारतोऽपि ते।
गरीयसीं मन्यमानास्तथावस्थां[5] प्रचक्रिरे ॥ 20 ॥

इति श्रीभगवद्भक्तिमाहात्म्ये नामदेवभक्तिमन्दिरप्रचलनं नाम पञ्चत्रिंश: सर्ग: ॥ 35 ॥

❊ ❊ ❊

---

1. लुप्त: पाठ: – ख।
2. नां – क, ग।
3. किन्तु।
4. क – मध्ये लुप्त: पाठ:।
5. तथैवाचां – ख

षट्त्रिंशः सर्गः

॥ नामदेवचरितम् ॥

पुनर्भूयः प्रवक्ष्यामि नामदेवस्य चेष्टितम् ।
महदाश्चर्यभूतं हि विष्णुभक्तिप्रवर्द्धनम् ॥ 1 ॥

तत्रासीन्म्लेच्छनृपतिस्तत्र गत्वातिदुर्जनाः ।
ऊचुरीर्ष्यापराः सर्वे राजानं [1]दुष्टमानसाः ॥ 2 ॥

दम्भाचाररतो नित्यं नामदेवोऽति दुर्जनः ।
आत्मानं पूजयत्येष ग्रामेऽस्माकं तु पश्यताम् ॥ 3 ॥

अतस्त्वं शासनै[2]रुग्रैस्तत्परीक्षां कुरु[3] प्रभो ।
तथा वयं पतिष्यामस्त्वत्सहायेन भूपते ॥ 4 ॥

यथा पराभवं प्राप्य स भविष्यति दुःखितः ।
किं करिष्यत्ययं पश्चादिति ज्ञात्वास्य पूजनम् ॥ 5 ॥

शासनं[4] वा करिष्यामस्त्वया सह न संशयः ।
इत्युक्तो नृपतिर्दुष्टैर्यथारुचि कुरुष्विति ॥ 6 ॥

साहाय्यं वः करिष्यामि यथा वक्ष्यथ मां पुनः ।
इत्युक्तास्ते नृपतिना त्वैकत्र समागताः[5] ॥ 7 ॥

तत्र ते चिन्तयामासुः कथं कुर्मोऽस्य शासनम् ।
एवं चिन्तयमानास्ते गामेकां ददृशुर्मृताम् ॥ 8 ॥

तेषां एकोऽब्रवीदेनां मृतां गां द्वारि तस्य वै ।
कपाटे स्थापयामो वै लोके सुप्ते महानिशि ॥ 9 ॥

[6]उषस्येव वयं तत्रोपस्थास्यामः पुनर्गृहात् ।
कपाटं बहिरागन्तुमुत्थायोद्घाटयिष्यति ॥ 10 ॥

पतिष्यति मृतैवेयं[7] तदा कोलाहलं वयम् ।
करिष्यामः महान्तं वै अहो गौर्निहितामुना[8] ॥ 11 ॥

---

1. दुर्जनाः – ख।
2. शशनै – ख।
3. कुरुष – ख, ग।
4. शामनं – ख, पृष्णासनं – क।
5. कृताः – ख।
6. दृष्ट्वास्येव – क।
7. नैवं – क।
8. निहन्त्यमुना – ख।

धिगित्येवं गर्हयित्वा गत्वा राजसमीपतः।
उक्त्वा गौर्निहतास्माकमनेनाति दुरात्मना॥ 12॥

जीवयत्वद्य गामेतां नो चेन्म्लेच्छो भवत्वयम्।
इत्येवं शासनं राज्ञो गृहीत्वा तस्य दुर्दशाम्[1] ॥ 13॥

पदातीनपि संगृह्य गमिष्यामो वयं पुनः।
किं वदिष्यति नस्तत्र तदायं[3] नष्टचेतनः॥ 14॥

इत्येवं कल्पानां श्रुत्वा प्रशशंसुः परस्परम्।
सर्वे ते मुदिता रात्रौ तथा चक्रुर्महानिशि॥ 15॥

प्रातरुत्थाय सर्वे ते [4]निरीक्षणपरायणाः।
तस्थुरस्मिन्मुहूर्ते तु गोविन्दं मनसा स्मरन्॥ 16॥

गोविन्दप्रतिमां नत्वा द्वारदेशे समागतः।
नामदेवः कपाटं तु समुद्घाटितवान्स्वयम्॥ 17॥

उद्घाटिते कपाटे तु गोः शवः पतितो भुवि।
तां दृष्ट्वा महदाश्चर्यं नामदेवोऽति [4]विस्मितः॥ 18॥

किं जातमिति शोकेन तस्थौ स्थाणुरिवाचलः।
ततस्ते दुर्जनास्सर्वे दृष्ट्वा तं निश्चलं स्थितम्॥ 19॥

ऊचुराक्रोशवचनैर्निन्दन्तस्ते परस्परम्।
धिक्त्वामहो वृथा धूर्त मालामुद्रादिधारणम्[5] ॥ 20॥

प्रातस्स्नायिनमेवं ते सर्वं क्रोधविचेष्टितम्।
किं भुक्तमनया तेऽद्य यदियं घातिता त्वया॥ 21॥

तिष्ठन्ती द्वारि शीतार्ता रात्रौ त्वां शरणैषिणी।
अथैकस्तत्र तन्मध्ये गौर्मदीयेति चासकृत्॥ 22॥

उक्त्वा[6] रुरोद हाहेति कुर्वन्क्रोधाज्जगर्ह तम्।
ततस्तं चाग्रतः कृत्वा येनोक्तं गौर्ममेति च॥ 23॥

राजवेश्मगतास्सर्वे तं पुरस्कृत्य चाब्रुवन्।
राजन् गौर्नामदेवेन दण्डेनाद्यैव घातिता॥ 24॥

---

1. दर्दशात – क।
2. ययां–ग. ख.
3. निरिक्षण – क, ग।
4. चिन्तितः – क।
5. धूर्तोमाला चन्द्रादिकं इह – ख।
6. इत्युक्त्वा – ख, क।

पश्यतां सर्वलोकानां मृता तद्वारि तिष्ठति।
तस्मादेष दुराचारो दण्डनीयो न संशयः ॥ 25 ॥

इति श्रुत्वा वचस्तेषां राजा क्रोधसमन्वितः।
उवाच वचनं भृत्यानत्युग्रान्वै तुरुष्ककान्[1] ॥ 26 ॥

भवन्तो गृहमायान्तु नामदेवस्य दुर्मतेः।
हतवानसि ग्रामस्य कस्मादित्याह भूपतिः ॥ 27 ॥

अतः परं प्रयच्छास्मै जीवयित्वाथ मामिमाम्।
तदन्ते[2] कुशलं नो चेन्म्लेच्छो भव मया सह ॥ 28 ॥

नाङ्गीकरोषि म्लेच्छत्वं तदा त्वां घातयिष्यति।
इत्याज्ञा नृपतेरत्र यथारुचि कुरुष्व भोः ॥ 29 ॥

तावत्त्वया न गन्तव्यं इतो वै मम शासनात्।
इति तेषां वचश्श्रुत्वा सुमतिर्भयविह्वला ॥ 30 ॥

नामदेवस्य जननी शोकगद्गदया गिरा।
मोहेनाश्रुमुखी दीना नामदेवमुवाच तम् ॥ 31 ॥

पुत्रोऽग्रदण्डो राजायं घातयिष्यत्यसंशयम्।
अतस्त्वं शरणं गच्छ राजानं चान्यभृत्यवत् ॥ 32 ॥

विहाय जातिधर्मं च प्राणान् संत्रातुमर्हसि।
इति मातृवचः श्रुत्वा नामदेवोऽपि दुःखितः ॥ 33 ॥

मातुर्दुःखेन महता मातरं प्राह हृष्टवत्।
मातर्न निहता चैषा मया गौर्नात्र संशयः ॥ 34 ॥

वृथा मां[3] प्रवदन्त्येते त्यज शोकं ममाधुना[4]।
गोविन्दं शरणं यामि स कल्याणं करिष्यति ॥ 35 ॥

महाभये महोत्पाते दुष्टव्यघ्रादिजे भये।
भक्तानुग्रहकर्ताऽसौ गोविन्दश्शरणं मम ॥ 36 ॥

एवं विश्वासमासाद्य त्यज चिन्तां भजस्व तम्।
इत्युक्त्वा तत्र ये रात्रौ स्थिता वेश्मनि साधवः ॥ 37 ॥

---

1. भूप तत्पुमान वै तु स्कृकान् – क।
2. तदा ते – ख।
3. प्राप्तं – क।
4. त्वयाधुना – ख, ग।

तैस्सहाच्छाद्य गां तत्र मृदङ्गतु[1]तुरादिभिः ।
श्रीकृष्णमनसा ध्यायन् जगौ गीतमनन्यधीः ॥ 38 ॥

इति श्री जय जय माधव मङ्गलकारकशरणागतः ।
जनविपदुद्धारक मीनवराहकमठरघुनायक राम राम यदुवर सुखदायक ॥39 ॥

नर–मृग–राजनिग–युदवामन सदयहृदय निर्दय अतिपावन ।
साधु शरण अतिदीन कृपामयामय पाहि पाहि मामिह दरमपनय[2] ॥ 40 ॥

नमो नमो नारायण भवतो केशव कृष्ण केशिकंसारे निजजन–
वैरिकपट वनदवके जालजवनभूसुरभूपति वपुसदपविद यद एषाजगदवते ॥41 ॥

अशरणशरण चरणायं जपुग चिन्तनरपर जन भयमयहरते ।
चक्रायुध गोपाल चतुर्भुज वितरकृपादृशमिहपदनिरतै ॥ 42 ॥

गायत्येवं नामदेवे मध्याह्नः समुपागतः ।
तदा गां जीवयामास कृष्णो भक्तानुकम्पनः ॥ 43 ॥

पश्यतां सर्वलोकानां गौरुत्थाय निरैक्षत ।
नामदेवोप्युवाचाथ हर्षेणाश्रुपरिप्लुतः ॥ 44 ॥

अहो गृहाण गामेतां प्रसीद त्वां नमाम्यहम् ।
इति श्रुत्वा वचो धेनुस्तं दुष्टमहनद्रूषा[3] ॥ 45 ॥

शृङ्गाभ्यामिति तीक्ष्णाभ्यां मूर्च्छितः पतितो भुवि ।
तं दृष्ट्वा पतितं भूमौ मम गौरिति वादिनम् ॥ 46 ॥

अन्ये दुष्टगणास्सर्वे दिशोदशपलायिताः ।
नामदेवस्तु तं दुष्टं पतितं मूर्च्छितं भुवि ॥ 47 ॥

हा हा कृत्वान्तिके गत्वा स्वाङ्के[4] तं विनिवेश्य च ।
पाया यित्वा जलं तां तु गां पुनः प्राह किं कृतम् ॥ 48 ॥

निजवत्सं विचिन्वती महारावेण[5] गां तदा ।
वत्सस्तस्यास्समायातो मे शब्दविनदन्मुहुः ॥ 49 ॥

---

1. हस्तस्स्वरादिभिः – क, ग ।
2. ममदुःख दनसपन – क ।
3. ते दुषा – क ।
4. स्याङ्के – क, ग ।
५. हम्भारावेण – क ।

हुंकृत्य पाययन्ती तु जिह्वपाले हितस्तु सः ।
एवं दृष्ट्वा महाश्चर्य्यं राजभृत्या द्रुतं ययुः ॥ 50 ॥

राजानं प्राहुराश्चर्य्यं श्रुत्वा राजापि सत्वरम् ।
तत्रागत्य तथा दृष्ट्वा हृष्टस्तं समुवाच ह ॥ 51 ॥

अहो सत्यं साधुरसि नामदेव न संशयः ।
गृहाण मत्तो[1] यत्किञ्चिदभिवाञ्छसि सुव्रत ॥ 52 ॥

इति श्रुत्वा वचस्तस्य नामदेवः कृताञ्जलिः ।
किं मे धनेन राजेन्द्र गोविन्दो मम भोजनम् ॥ 53 ॥

ददात्येतावतैवाहं कृतार्थोऽस्मि नमोस्तु ते ।
तच्छ्रुत्वा नामदेवस्य वाक्यं राजातियत्नतः ॥ 54 ॥

शय्यां ददौ गृहाणेमामवश्यं प्रीतये[2] मम ।
इत्युक्तो जगृहे शय्यां राजापि स्वगृहं गतः ॥ 55 ॥

नामदेवस्तु तां शय्यां प्राक्षिपद्वारिणी क्वचिद् ।
साधून्सम्भोज्य बुभुजे सन्ध्यायामतिहर्षितः ॥ 56 ॥

ततः कतिपये काले गते राजा सुश्रुवे ।
सा शय्या वारिणि क्षिप्ता तेनैतत्कस्यचिन्मुखात् ॥ 57 ॥

अयाचत समानाप्य नामदेवं स भूपतिः ।
तां मे चिरन्तनीं शय्यां देहि मेऽहं तु ते पुनः ॥ 58 ॥

ददामि नूतनां साधो नात्र कार्याविचारणा ।
इति श्रुत्वा वचो राज्ञो राजानं प्रत्युवाच ह ॥ 59 ॥

आगच्छ राजन् का तेऽस्ति निश्चित्य प्रतिगृह्यताम् ।
इत्युक्त्वा तन्नदीतीरे गत्वा राजा महात्मना ॥ 60 ॥

जलान्निष्काश्य[3] राजाग्रे नाना शय्याधृतास्तथा ।
का सा ममेति सन्दिह्य राजा दृष्ट्वा कृताञ्जलिः ॥ 61 ॥

नामदेवं नमस्कृत्य क्षमस्वेत्यब्रवीन्मुहुः ।
दर्शयित्वा तदाश्चर्यं नामदेवो गृहं गतः ॥ 62 ॥

1. ख – मध्ये लुप्तः पाठः ।
2. प्रीतयं – क, ग ।
3. जलान्तिकास्य – क ।

राजापि स्वगृहं गत्वा ग्रामे सर्वानविजिज्ञपत्[1]।
अद्यारभ्य ममाज्ञैषा नामदेवो मम प्रियः ॥ 63 ॥

यस्तं द्वेष्टि समे शत्रुस्तं हनिष्याम्यसंशयम्[2]।
तथाज्ञां शिरसा सर्वे स्वीचक्रुः पुरवासिनः ॥ 64 ॥

एवं हि भगवान्नितत्यं [3]भक्तरक्षापरायणः।
अद्यापि वर्तते लोके प्रत्यक्षो नात्र संशयः ॥ 65 ॥

इति श्रीभगवद्भक्तिमाहात्म्ये नामदेवचरिते गौरुज्जीवनं शय्याप्रत्यक्षकरणं नाम षट्त्रिंशः सर्गः ॥ 36 ॥

❊ ❊ ❊

सप्तत्रिंशः सर्गः

॥ नामदेवचरितम् ॥

अपरं नामदेवस्य माहात्म्यं कीर्त्यतेऽधुना।
यदाकर्ण्य भवेद्भक्तिश्श्रीकृष्णे परमात्मनि ॥ 1 ॥

एकदा नामदेवस्य गृहे लग्नो महानलः।
कस्यचिद्देशमसंलग्नो वायुना तत्र[4] सङ्गतः ॥ 2 ॥

निर्वापयितुमायाता जनास्तान्प्रतिषिध्य सः।
नामदेवोऽथ गोविन्द गृहीत्वा बहिरागतः ॥ 3 ॥

हर्षेण महता सर्वमिदं ते गृह्यतां प्रभो।
गोविन्दाय महाभाग्यमित्युक्त्वा प्रतिमाग्रतः ॥ 4 ॥

स्थित्वा वाद्यं समादाय गायन्भक्त्या ननर्त ह।
अथ सर्वं गृहं वह्निर्भस्मसादकरोत्क्षणात् ॥ 5 ॥

निर्वापितः स्वयं तत्र भस्म प्रोत्सार्य्य चावसत्।
मात्रा सह च गोविन्दं पुनस्संस्थाप्य भक्तितः ॥ 6 ॥

---

1. जिज्ञपता – क, ख।
2. संहनिष्याम्यहं पुनः – ख, ग।
3. भक्तिरक्षा – क।
4. तत्र संशयः।

एवं तत्रैव वसतो दिनानि कतिचिद्ययुः ।
अथ मातुर्निदेशेन गृहकार्यं समारभत् ॥ 7 ॥

कुतश्चित्काष्ठरज्वादि समानीयाकरोद्गृहम् ।
छादनार्थं तृणान्वेषी पर्यटन्नाप्तवान्स्तृणम्[1] ॥ 8 ॥

ततो माताब्रवीद्वाक्यं वत्स नाच्छादितुं गृहम् ।

कथमस्मिन्निवत्स्यामि शीतातपस[2]हाकुला ॥ 9 ॥

इति मातृवचश्श्रुत्वा दूरं ग्रामान्तरं ययौ ।
तृणपुञ्जं समाबध्य धृत्वा शिरसि यत्नतः ॥ 10 ॥

आनयन्पथि भारार्तो विशश्राम[3] तरोस्तले ।
सुष्वाप[4] तत्र भारार्तो भगवान्भक्तवत्सलः ॥ 11 ॥

आगत्य नामदेवस्य रूपं कृत्वा निजं हरिः ।
गृहीत्वा तृणपुञ्जं तु शिरसा भगवान्प्रभुः ॥ 12 ॥

नामदेवस्य भवने समायातोऽतिहर्षितः ।
तदैवाच्छादयामास मात्रा स पुनरर्थितः ॥ 13 ॥

भुक्त्वाच्छादय वेश्मेदं क्षुत्पिपासाकुलोऽसि यत् ।
इति तस्या वचश्श्रुत्वा भक्तरूपधरो हरिः ॥ 14 ॥

[5]मातः क्षणेन वेश्मेदं छादयाम्यविलम्बितम् ।
ततस्स्नानं करिष्यामि तावत्त्वं पाकमाचर ॥ 15 ॥

इत्युक्त्वा तद्गृहं शीघ्रं छादयामास केशवः ।
सञ्छाद्य तद्गृहं तूर्णं रज्जुदात्रादिकं[6] पुनः ॥ 16 ॥

गृहाणेदं गृहे रक्ष मातस्स्नातुं व्रजाम्यहम् ।
इत्युक्त्वा स गतो देवो भगवान्भक्तवत्सलः ॥ 17 ॥

---

1. छादनार्थी तृणान्वेषो तप्यतां न्नासवांस्तृणम् – क, ख।
2. तपसाकुला – क। समाकुला – ख।
3. विसस्त्रमे – ख।
4. सुस्वाद्य – ख।
5. प्रातः – ख।
6. रज्जुमात्रादिकं – ख, क।

नामदेवस्ततो निद्रां जहौ मायाविमोहितः।
अदृष्ट्वा तृणपुञ्जं स नीतं केनाप्यमन्यत॥ 18॥

तत उत्थाय शीघ्रं स आजगाम स्वमन्दिरम्।
उवाच मातरं मार्गे गृहीत्वा तृणमस्वयम्॥ 19॥

गृहीतं तत्तु केनापि एवमेवाहमागतः।
नामदेववचश्श्रुत्वा माता प्राहातिविस्मिता॥ 20॥

किमिदं भाषसे पुत्र कोऽयं ते मतिविभ्रमः।
इदानीं छादयित्वा त्वं रज्जुदात्रादिकं पुनः॥ 21॥

मह्यं दत्त्वा गतः स्नातुं पुनरेवं ब्रवीषि किम्।
इति मातृवचश्श्रुत्वा नामदेवोऽतिविस्मितः॥ 22॥

प्रणम्य मातरं भूयो जगर्हात्मानमात्मना।
धिङ् मां यदर्थं भगवान्परिशश्राम[1] केशवः॥ 23॥

इत्येवं विलपन्भूयो मात्रा भोक्तुं समर्थितः।
स्नात्वा सम्पूज्य गोविन्दं बुभुजेऽन्नं हरिं स्मरन्॥ 24॥

इत्येवं नामदेवस्य माहात्म्यं वर्णितं मया।
पुनर्वक्ष्यामि तस्यैव भक्तिमाहात्म्यमुत्तमम्॥ 25॥

एकदातिथिवेलायां मालामुद्राविभूषितः।
साधुः समागतस्तस्य नामदेवस्य मन्दिरे॥ 26॥

उवाच नामदेवं स साधोऽहं तु बुभुक्षितः।
शीघ्रं भोजय मामन्नं क्षुधा मां परिबाधते॥ 27॥

इति श्रुत्वा वचस्तस्य नामदेव उवाच तम्।
एकादशीव्रतं त्वद्य कथमन्नं बुभुक्षसि॥ 28॥

आमान्नं गृह्यतां मत्तः पक्त्वा भुंक्ष्व यथारुचि।
इत्येवं वचनं श्रुत्वा अतिथिः प्राह तं पुनः॥ 29॥

पक्वाहं नैव भोक्ष्यामि ममायं नियमो महान्।
यद्गृहं[2] यामि तस्यैव पक्वेनान्नेन[3] संयुतः॥ 30॥

1. पथि शुश्राव – ख।
2. यदहं – क।
3. समे पुनः – क।

तेन भोक्ष्याम्यतस्त्वं तु पक्का भुंक्ष्व मया सह।
दिनत्रयमहोरात्रं निराहारतया गतम्॥ 31॥

अतस्त्वां प्रार्थयाम्येष प्रयच्छान्नं प्रसीद मे।
इति तस्य वचश्श्रुत्वा नामदेवोऽपि विस्मितः॥ 32॥

उवाच शान्त्वयन्भिक्षुं क्षमस्व भगवन्निति।
हरिवासरव्रतं त्वेतत्प्राणेभ्योऽपि प्रियं मम॥ 33॥

त्यक्ष्यामि जीवनं चाहं न तु चैकादशीव्रतम्।
अतस्त्वां प्रार्थयाम्येतत्त्यजैवं नियमं मयि॥ 34॥

एवं मुहुः प्रार्थ्यमानो न स्वीचक्रेऽथ[2] सोऽतिथिः।
चिन्तया परया विष्टो नामदेवो न्यवर्तत॥ 35॥

अतिथिस्तद्गृहद्वारि[3] सुष्वापातिक्षुधार्दितः।
एवं[4] दिनं गतं तस्य सन्ध्याकाले उपस्थिते॥ 36॥

पुनस्तं[5] प्रार्थयामास नामदेवः कृताञ्जलिः।
न स्वीचकार तद्वाक्यमतिथिर्हठमाश्रितः॥ 37॥

सन्निवर्त्य ततो गेहे रात्रिं जागरणादिना।
निनाय[6] प्रातरेवासावागतो भिक्षुमन्दिरे॥ 38॥

उत्तिष्ठ भिक्षो भद्रं ते प्रातःकालोऽयमागतः।
स्नात्वा भुंक्ष्व मया सार्द्धं प्रतिज्ञा सफलास्तुते॥ 39॥

मुहुरेवं समाभाष्य तत्समीपमुपागतः।
मुखाद्वस्त्रं समाकृष्य गातासुं तममन्यत॥ 40॥

उत्थाय यत्स्वहस्ताभ्यां चोत्तस्थो स मृतो यतः।
ततो रुरोद दुःखार्ता नामदेवोऽतिविह्वलः॥ 41॥

श्रुत्वा तद्रुदितं सर्वे आयातः पुरवसिनः।
सर्वे विस्मयमापन्नाः किं कुर्म इति वादिनः॥ 42॥

---

1. ह्येतत् – ख।
2. त्वां चक्रे – क।
3. मद्गुरु – क।
4. सर्वं – क।
5. पुनस्त्वं – क।
6. नियता – ख, ग।

तानाह नामदेवोऽथ शृणुध्वं वचनं मम।
अयं मृतोऽतिथिर्गेहे क्षुधया नात्र संशयः ॥ 43 ॥

न दत्तमन्नं भोक्तुं यत्क्षुधार्तायापि[1] वै मया।
अतोऽस्य हत्या सम्प्राप्ता मम नास्त्यत्र संशयः ॥ 44 ॥

तस्मादस्य चितायां तु सहानेनाहमप्यहो।
प्रविश्य वह्नौ त्यक्ष्यामि जीवनं नात्र संशयः ॥ 45 ॥

अन्यथा नापि वक्तव्यं भवतां शपथो हरेः।
इति तस्य वचश्श्रुत्वा सर्वे चिन्तापरा ययुः ॥ 46 ॥

नामदेवस्य जननी रुदन्ती भृशं दुःखिता।
निवारयामास मुहुः पुत्रं नासौ न्यवर्तत ॥ 47 ॥

ततः सर्वे मृतं भिक्षुमुत्थाय[2] पुरवासिनः।
श्मशाने प्रापयामासुर्नामदेवस्तमन्वगात् ॥ 48 ॥

अथ तत्र चितां कृत्वा शवं संस्थाप्य तत्र च।
स्वयं प्रविश्य वह्निं तं[3] गृहीत्वा तन्मुखे ददौ ॥ 49 ॥

दातुं व्यवस्थितस्तत्र स्मितं कृत्वाब्रवीन्मृतः।
मा मा दीपय भो वह्निं मुखे मे न मृतो ह्यहम्[4] ॥ 50 ॥

तव सत्यपरीक्षार्थमेवमेवं कृतं मया[5]।
तुष्टोऽहं वरदो ब्रूहि यदीच्छसि ददामि तत् ॥ 51 ॥

इति श्रुत्वा वचस्तस्य नामदेवोऽब्रवीत्पुनः।
कस्त्वं कुतः समायात इति सत्यं ब्रवीहि मे ॥ 52 ॥

तच्छ्रुत्वा भिक्षुराहाहमनिकेतो त्वनायकः।
वर्णाश्रमबहि[6]र्भूतः पर्यटामि यदृच्छया ॥ 53 ॥

तव सत्येन सन्तुष्टो ब्रूहि किं करवाणि ते।
नामदेव उवाचाथ योऽसि सोऽसि नमोऽस्तु ते ॥ 54 ॥

---

1. क्षुधार्तास्यापि – ख।
2. मुत्थाप्य – क।
3. तु – ख।
4. त्वहम् – क, ग।
5. वपुर्मया – क।
6. भूत्वा – ख, ग।

हरिभक्तिर्दृढा[1] मेऽस्तु त्वं भुक्त्वा व्रज मे गृहात्।
एवमस्त्विति चोक्त्वा स नामदेवगृहं ययौ ॥ 55 ॥

तमन्वयुर्नष्टचिन्ता नामदेवपुरस्सराः ।
नामदेवस्त्वतस्स्नात्वा गोविन्दं परिपूज्य च ॥ 56 ॥

भिक्षुं सम्भोज्य बुभुजे जनन्या सह सुव्रतः ।
प्रशसंन्नामदेवं स च भिक्षुस्स्वैरगतिर्ययौ[2] ॥ 57 ॥

एतद्दृष्ट्वा तु चरितं नामदेवस्य वै जनाः ।
लेभिरे परमाश्चर्यं प्रशशंसुः परस्परम् ॥ 58 ॥

एवं हरिस्समागत्य भक्तानुग्रहविग्रहः ।
कौतुकं कुरुतेऽद्यापि भक्तभक्तिवशीकृतः ॥ 59 ॥

न जातिर्नैव वाचारो न मन्त्रो यन्त्र एव[3] वा।
प्रसादयति गोविन्दं यथाभक्ति कलौ युगे ॥ 60 ॥

दुर्लभा सा नृणां यस्य वर्तते धन्य एव सः ।
भगवानपि तद्भक्तिं कुरुते भक्तियन्त्रितः ॥ 61 ॥

इति श्रीभगवद्भक्तिमाहात्म्ये नामदेवचरितं नाम सप्तत्रिंशः सर्गः ॥ 37 ॥

❊ ❊ ❊

अष्टत्रिंशः सर्गः

॥ नामदेवचरितम् ॥

एकदा नाममाहात्म्यं नामदेवेन भक्तितः ।
यथा व्यक्तीकृतं लोके तदाश्चर्यं निशामय ॥ 1 ॥

महाधनो वणिक्कश्चिद्दिदृक्षुर्विट्ठलप्रभुम्।
समायातोऽतिभक्त्या वै धनान्यादाय भूरिशः ॥ 2 ॥

स्नात्वा भीमासरित्तोये दृष्ट्वा तं विट्ठलं हरिम्।
सम्पूज्य विधिवद्भक्त्या रत्नालङ्कारणादिभिः ॥ 3 ॥

---

1. दत्वा – क।
2. स्वर्गं पुनर्ययौ – ख, ग।
3. पूजनम् – क, ख।

तुलादानं चकारासौ हिरण्यस्य यथाविधिः।
तैर्द्रव्यैस्तोषयामास यथायोग्यं द्विजान्मुदा ॥ 4 ॥

अन्यैरपि धनैस्तत्र विट्ठलप्रीतये[1] वणिक्।
दीनाननाथान्सन्तोष्य प्राह कोऽप्यत्र नागतः ॥ 5 ॥

तमानय[2] धनं तस्मै दास्याम्यहमभीप्सितम्।
इति तस्य वचश्श्रुत्वा सर्वे ते ग्रामवासिनः ॥ 6 ॥

ऊचुस्सादरमास्ते वै नामदेवोऽतिवैष्णवः।
अयाची नियताहारी सदा गोविन्दपूजकः ॥ 7 ॥

न याति स क्वचिद्भक्तस्सन्तुष्टो येन केनचित्।
इति श्रुत्वा वचस्तेषां वणिगाहात्मजं[3] निजम् ॥ 8 ॥

गच्छ त्वं तत्र यत्रास्ते नामदेवो हरिप्रियः।
प्रणिपत्य विनीतात्मा तं प्रसाद्यानयेह[4] भोः ॥ 9 ॥

इति पितृवचस्श्रुत्वा गतः पुत्रोऽतिहर्षितः।
प्रणम्य नामदेवं तं प्राह मे जनकः प्रभो ॥ 10 ॥

त्वां दिदृक्षति धर्मात्मा तत्र त्वं कृपया चल।
श्रुत्वैतद्वचनं तस्य नामदेवोऽब्रवीद्वचः ॥ 11 ॥

प्रायो न यामि कुत्रापि कोऽहं यन्मां दिदृक्षति।
स दाता धर्मशीलो मे किञ्चिद्दातुमिहेच्छसि ॥ 12 ॥

तज्जानामि न मे वाञ्छा धने वान्यत्र कुत्रचित्।
प्राणधारणमाहारं ददाति विट्ठलः प्रभु ॥ 13 ॥

इति पित्रे प्रवक्तव्यं गच्छ वत्स विचारयन्।
ततः स वैश्यपुत्रस्तु पितुरन्तिकमागतः ॥ 14 ॥

उवाच नामदेवस्य वचः स च पुनर्वणिक्।
प्राह पुत्रं पुनर्गच्छ प्रसाद्यानय तं सुत ॥ 15 ॥

---

1. प्ररणये – क।
2. नयमानं – ख, ग।
3. निजात्मजम् – क, ख।
4. प्राहाद्यानपेह – ख, ग।

ततः स ग्रामवृद्धैस्तु साकं तत्र पुनर्गतः।
उवाच प्राञ्जलिर्भूत्वा नाथाहं[1] पुनरागतः॥ 16॥

शृणु मे पितृवचनं यावत्त्वं नैषि मे गृहम्।
तावदन्नं च पानीयं न ग्रहीष्याम्यहं ध्रुवम्॥ 17॥

इति प्रतिज्ञां कृत्वा[2] स मरणे [3]कृतनिश्चयः।
उत्कण्ठितो भवन्तं वै द्रष्टुं नास्त्यत्र संशयः॥ 18॥

भगवन्तं भगवद्भक्तं जानाति भक्तवत्सलम्।
नायातः स्वयमेवात्र त्वदागमननिश्चयात्॥ 19॥

अथैवं वचनं तेषां वृद्धानां तत्सुतस्य च।
श्रुत्वा स नामदेवोऽपि समुत्तस्थो प्रहृष्टवत्॥ 20॥

जगाम वणिजो गेहे यत्र दानं करोति सः।
वैश्यो दृष्ट्वा नामदेवं समुत्थायातिहर्षितः॥ 21॥

पाद्याद्यैः पूजयित्वा तं प्रोवाच विहिताञ्जलिः।
प्रसीदतु भवानद्य यद्ददामि गृहाण तत्[4]॥ 22॥

तद्वैश्यवचनं श्रुत्वा नामदेवोऽप्यभाषत।
अहो तदर्थं नायातो न मे वाञ्छा धनादिषु॥ 23॥

इति जानन्त्यमी सर्वे तस्मादेतत्क्षमस्व भोः।
इति श्रुत्वा तु य वणिक्ततत्पादौ प्रतिगृह्य[5] च॥ 24॥

न तत्याज स तत्पादौ नामदेवोऽब्रवीत्तदा।
देहि मेऽभिमतं[6] द्रव्यं त्वत्प्रीत्या स्वीकरोम्यहम्॥ 25॥

इत्युक्त्वा तुलसीपत्रमेकमादाय तत्र ह।
रामेत्यस्यार्द्धमलिखित्[7] प्राह तं वणिजं पुनः॥ 26॥

एतत्परिमितं द्रव्यं देहि मे यदि दास्यसि।
इति श्रुत्वा वचस्तस्य प्राह तं स वणिक्पुनः॥ 27॥

---

1. तथाहं – ख।
2. गत्वा – ख।
3. नित्य – क, ग।
4. तम् – ख, ग।
5. प्रतिष्ठत्य च – क।
6. अभिहितं – ख, ग।
7. अलिखत् – ख – ग।

उपहासो न योग्यस्ते मम भक्तस्य सुव्रत।
गृहाण यद्ददामीह स्वेच्छया तत्प्रसीद भोः ॥ 28 ॥

श्रुत्वैतद्वचनं तस्य नामदेवोऽब्रवीत्पुनः।
नोपहासं करोम्यद्य तावत्सर्वाधिकं भवेत् ॥ 29 ॥

सत्यमेतन्न सन्देहो न किञ्चित्तत्समं भुवि।
इति श्रुत्वा स वैश्यस्तु सुवर्णतोलिकां तुलाम् ॥ 30 ॥

समादाय तु तत्पत्रं रामनामार्द्धसंयुतम्।
एकतः स्थापयामास हिरण्यमपि चैकतः ॥ 31 ॥

न समं तुलसीपत्रेणासीत्तत्कनकं पुनः।
सुवर्णानि समादाय पूरयामास यत्नतः ॥ 32 ॥

न ययौ पत्रसाम्यं तत्पुनरन्यां तुलां दधे।
तत्रापि न ययौ[1] साम्यं नामार्द्धस्य तु तद्धनम् ॥ 33 ॥

पुनर्निर्माय महतीं तुलां संस्थाप्य सर्वशः।
धनानि तोलयामास न ययुः समतां पुनः ॥ 34 ॥

ततस्तं वणिजं प्राह नामदेवोऽतिविस्मितम्।
अहो यावन्ति दानानि व्रतानि च महीतले ॥ 35 ॥

तीर्थानि चोपवासाश्च तेषां यत्फलमस्ति वै।
सङ्कल्प्य तज्जलं तत्र दत्त्वा तोलय पश्य भोः ॥ 36 ॥

इति श्रुत्वा वणिक्तीर्थव्रतादीनां फलानि तु।
संकल्प्य प्रददौ तत्र न साम्यं जग्मुरण्वपि ॥ 37 ॥

ततस्तु परमाश्चर्यं दृष्ट्वा सर्वेऽतिविस्मिताः।
उवाच नामदेवस्तानेतन्नो परमं धनम् ॥ 38 ॥

नैतादृशं धनं लोके कस्याप्यस्तीत्यतो मया।
न याच्यते जनः कोऽपि मत्तस्सर्वे हि निर्धनाः ॥ 39 ॥

इति तस्य वचश्श्रुत्वा साधु साध्विति वादिनः।
दृष्ट्वा तं प्रत्ययं चित्ते जगृहुर्नामचिन्तनम् ॥ 40 ॥

---

1. पपौ – ख।

एवं वै नाममाहात्म्यं पुराणे परिकीर्तितम्।
नामोच्चारणमात्रेण[1] गजो मुक्तो बभूव ह॥ 41॥
गणिका च दिवं याता रामनामप्रभावतः।
अजामिलोऽपि पापिष्ठो नारायणसुत[2]स्मृते॥ 42॥
जगाम परमं धाम तस्मान्नामैव तारकम्।
कृष्णेति मङ्गलनाम यस्य वाचि[3] प्रवर्तते॥ 43॥
भस्मीभवन्ति[4] राजेन्द्र महापातककोटयः।
इति स्मृतिरभिव्यक्ता मन्यते[5] ऋषिभिस्सदा॥ 44॥
तस्मान्नामसमो नास्ति तपो योगो व्रतं च वा।
अन्यानि पुण्यकर्माणि नाशुचिः कर्तुमर्हति॥ 45॥
तत्र नाम स्मृतं विष्णोस्सर्वशोचोत्तमोत्तमम्।
काम्यानां कर्मणां सिद्धौ यदन्यत्साधनं स्मृतम्॥ 46॥
तत्राङ्गवैगुण्य[6]कृतो दोषोऽनर्थं करोति[7] वै।
नामस्मृतौ न चाङ्गानि न च वैगुण्यमस्ति वै॥ 47॥
तस्मान्नामस्मृतिर्लोके सर्वेभ्योऽपि गरीयसी।
नामैव देवता वेदे निर्णीता मुनिभिः पुरा॥ 48॥
गृहीता वितरन्तीष्टमथाप्येतन्न संशयः।
वेदे ऋगर्थे त्वन्यत्र यन्नामाक्षरमत्स्यहो॥ 49॥
तद्देवता का ऋक्सामप्रोक्ता नास्त्यत्र संशयः।[8]
तस्मान्नाम्नस्तु माहात्म्यं न कोऽपि वक्तुमर्हति॥ 50॥
यस्य नाम स्मृतौ भक्तिस्तस्य भक्तिर्हरौ दृढा।
ममैव[9] नाम माहात्म्यमनुभूतं यथा पुरा॥ 51॥
तथाग्रे कथयिष्यामि ग्रन्थान्ते विस्तरादहम्[10]॥ 52॥

इति श्रीभगवद्भक्तिमाहात्म्ये नामदेवचरिते नाममाहात्म्यं नामाष्टत्रिंशः सर्गः॥ 38॥

❊ ❊ ❊

1. मन्त्रेण – ख।
2. सुतस्य ते – ख, ग।
3. वचः – क।
4. भवति – ख।
5. ममते – क।
6. दुःखैर्गुण्य – क।
7. करोतु – क।
8. पद्यमिदं श्रीकुमुदनाथमिश्रेण पूरितम्।
9. यमैव – ख।
10. विस्तरादम्यहम् – क, ग।

नवत्रिंशः सर्गः

॥ जयदेवचरितम् ॥

पुनर्भूयः प्रवक्ष्यामि भक्तेर्माहात्म्यमुत्तमम्।
यच्छ्रुत्वा जायते भक्तिर्वासुदेवे महात्मनि ॥ 1 ॥

जगन्नाथपुरीप्रान्ते देशे चैवोत्कलाभिधे।
'किन्दुबिल्व'[1] इति ख्यातो ग्रामो ब्राह्मणसङ्कुलः ॥ 2 ॥

तत्रोत्कलो द्विजो जातो जयदेव इति श्रुतः।
विद्याभ्यासरतश्शान्तः पुरुषोत्तमपूजकः ॥ 3 ॥

अथ तत्रैव विप्रोऽन्यो देवशर्मेति विश्रुतः।
अनपत्यो बभूवासौ जगन्नथमुपागतः ॥ 4 ॥

नमस्कृत्य हरिं मूर्ध्ना स्वीचकार कृताञ्जलिः।
यदि मे सन्ततिर्नाथ त्वत्प्रसादाद्भविष्यति ॥ 5 ॥

अपत्यं प्रथमं तुभ्यमर्पयिष्याम्यसंशयम्[2]।
प्रतिश्रुत्यमनस्येवं[3] स यातो निजमन्दिरम् ॥ 6 ॥

तत्र कालेन कियता कन्यैका प्रथमाजनि।
ततः पुत्रानलभत साधुवृत्तान्मनोहरान् ॥ 7 ॥

ततः स मनसा स्मृत्वा सपत्नीको द्विजोत्तमः।
कन्यां गृहीत्वा हर्षेण जगन्नाथमुपागतः ॥ 8 ॥

नमस्कृत्य जगन्नाथं देवशर्माब्रवीद्वचः।
देवदेव जगन्नाथ प्रसादः फलितो मम ॥ 9 ॥

प्रथमा तनया जाता पुत्रास्तु तदनन्तरम्।
अतः प्रतिश्रुतां कन्यां ददामि प्रतिगृह्यताम् ॥ 10 ॥

इत्युक्त्वा तु करेणासौ[4] गृहीत्वा तां प्रदर्श्य च।
पूजकेभ्योऽथ वृतान्तमादितो व्याजहार सः ॥ 11 ॥

ततो बहिः समागत्य सो वै तस्थौ क्वचिद्द्विजः।
रात्रौ तस्य च विप्रस्य पूजकस्य जगत्प्रभुः ॥ 12 ॥

---

1. विन्दुविल्व – ख।
2. मर्च्चयिष्याम्यसंशयम् – ख, ग।
3. श्रुत्वमनसेवं – क।
4. करेनासौ – ख।

स्वप्ने स कथयामास जगन्नाथोऽद्भुतं वचः ।
देवशर्मन्प्रसन्नोऽस्मि स्वीकृता ते सुता मया ॥ 13 ॥

परन्तु जयदेवाय दीयतां मत्प्रियो[1] ह्यसौ ।
अहमेव स विज्ञेयो नात्र कार्या विचारणा ॥ 14 ॥

पूजकोऽप्येवमेवाथ स्वप्नं दृष्ट्वा प्रबोधितः ।
देवशर्मा समागत्य स्वप्नं प्रोवाच हर्षितः ॥ 15 ॥

श्रुत्वैवं देवशर्मापि स्वप्नं सत्यममन्यत ।
पूजकं तं नमस्कृत्य गृहीत्वा तनयां निजाम् ॥ 16 ॥

जगाम जयदेवस्य सन्निधौ हृष्टमानसः ।
तं तु पर्णकुटीमध्ये ग्रामाद्बहिरवैक्षतः ॥ 17 ॥

दरिद्रं निरपेक्षं च शास्त्रं पश्यन्तमादरात् ।
मनसा तु जगन्नाथं ध्यायन्तं मुदिताननम् ॥ 18 ॥

प्रणम्य जयदेवं तं देवशर्माब्रवीद्वचः ।
इयं मे तनया ब्रह्मन् जगन्नाथाऽज्ञया मया ॥ 19 ॥

नाम्ना पद्मावती तुभ्यं दीयतेऽनुगृहाण ताम् ।
इत्युक्तो जयदेवस्तमुवाच मधुरं वचः ॥ 20 ॥

अहं न कन्या दानस्य पात्रं दीनोऽनिकेतनः ।
ममापि न जिघृक्षास्ति[2] किमिदं भाषसे वृथा ॥ 21 ॥

जगन्नथाऽज्ञयेत्युक्त्वा यन्मां वञ्चयसि स्फुटम् ।
कुत एवं मतिभ्रंशो गच्छ यथासुखम् ॥ 22 ॥

आनीय पूजकं तं तु देवशर्माति[3]यत्नतः ।
निवेदयामास मुहुस्तां तथा स्वीचकार सः ॥ 23 ॥

ततः स्वतनयां तत्र स्थापयित्वा द्विजोऽब्रवीत् ।
अयं तु ते पतिः पुत्रि त्वया पूज्यश्च सर्वदा ॥ 24 ॥

पतिसेवापरा नारी सुखमक्षय्यमश्नुते ।
इत्युक्त्वा तां देवशर्मा ययौ पत्न्या सहाश्रमम् ॥ 25 ॥

---

1. मत्प्रियो ह्यसौ – ख, ग ।
2. ख, ग मध्ये लुप्तः पाठः
3. शम्मेति – क ।

सापि कन्या स्थिता तत्र जयदेवस्य सन्निधौ।
जयदेवस्तु तां प्राह गतौ तौ पितरौ तव[1] ॥ 26 ॥

त्वां विहाय त्वमप्येका कथं स्थास्यसि कानने।
अथ पद्मावती प्राह भगवन् किं ब्रवीषि भोः ॥ 27 ॥

सुता तु पितृदेया वै स मां तुभ्यं ददौ पिता।
अतस्तवाहं त्वं चेन्मामतिभक्ता मनागसम्[2] ॥ 28 ॥

त्यक्ष्यसीत्यत्र किं कुर्यां नाहमेका त्वयि स्थिते।
पद्मावतीवचः श्रुत्वा जयदेवोऽप्यचिन्तयत् ॥ 29 ॥

अनया सत्यमुक्तं हि त्यागे दोषो महान्मम।
तस्मादस्याः पितुर्गेहे गत्वाहमनया सह ॥ 30 ॥

इमां प्रति गृहीष्यामि विधिना नात्र सशयः।
इति निश्चित्य मनसा जयदेव उवाच ताम् ॥ 31 ॥

एह्यागच्छ मया सार्धं गच्छामि त्वत्पितुर्गृहम्।
विधिना तत्र ते पाणिं ग्रहीष्यामि न संशयः ॥ 32 ॥

इत्येवं वचनं श्रुत्वा प्राह पद्मावती पुनः।
त्वदाज्ञाकरणं धर्म इत्येवं मां पिताब्रवीत् ॥ 33 ॥

अतो महाप्रसादोऽयमित्युक्त्वाग्रे स्थिताभवत्।
जयदेवस्तया सार्द्धं देवशर्मगृहं गतः ॥ 34 ॥

तमुक्त्वा गद्गदं सर्वं प्रतिगृह्य यथाविधि।
पद्मावती तेन सार्द्धमाजगाम निजं गृहम् ॥ 35 ॥

उभौ तौ दम्पती तत्र एकप्राणौ बभूवतुः।
नृत्यन्तौ चापि गायन्तौ श्रीकृष्णार्चनतत्परौ ॥ 36 ॥

एकदा जयदेवस्तु मनस्यैवमचिन्तयत्।
स्वयं कृतेन गीतेन तोषयिष्याम्यहं हरिम् ॥ 37 ॥

इति निश्चित्य निर्माय गीतगोविन्दनामकम्।
गायंस्तदेव देवाग्रे[3] पत्न्या सह ननर्त्त ह ॥ 38 ॥

---

1. मम – क।
2. ख – मध्ये लुप्तः पाठः
3. देवा मे – ख।

एवं नित्यव्रतं तस्य तत्रैकस्मिन्दिने पुनः।
निबबन्ध [1]रासचरितं कृष्णोक्तिं राधिकां प्रति॥ 39॥

शिरस्याधेहि मे पादमित्यर्थकं पदं[2] हृदि।
ममायातं न तद्दातुं शशाकेति[3] तत्स्मरन्॥ 40॥

अन्यदन्वेषमाणोऽपि न लेभे तादृशं पदम्।
संस्थाप्य पुस्तकं स्नातुं जगामान्यद्विचिन्तयन्॥ 41॥

तावज्जयदेवरूपेण कृष्णस्तत्र समागतः।
पद्मावतीमुवाचाथ पुस्तकं देहि मे प्रिये॥ 42॥

पद्मावती समानीय ददौ तत्पुस्तकं द्रुतम्।
गृहीत्वा पुस्तकं तत्र जयदेवेन यत्कृतम्॥ 43॥

मनसा तल्लिलेखासौ जयदेवस्वरूपधृक्।
पुनरुत्थाय स स्नातुं जगामातित्वरान्वितः॥ 44॥

कञ्चित्कालमतीत्याथ जयदेवः समागतः।
देवानमभ्यर्च्य भुक्त्वा च गृहीत्वा पुस्तकं निजम्॥

मनसा कल्पितं पद्यं लिखितुं समुद्यतः।
ददर्श तत्र तत्पद्यं नालिखं यदिदं पुरा॥ 46॥

अन्येन लिखितं ज्ञात्वा प्राह पद्मावतीं प्रियाम्।
अये! केनेदमालेखि[4] त्वं जानासि शुचिस्मिते[5]॥ 47॥

नाहमेतत्पदं पूर्वमलिखं नाक्षरं मम।
इति श्रुत्वा वचस्तस्य प्राह पद्मावती प्रियाम्॥ 48॥

नाथ कोऽयं भ्रमस्तेऽद्य यदेवं[6] भाषसे वचः।
स्नातुं गतस्तु तत्काले पुनरागत्य सत्वरम्[7]॥ 49॥

गृहीत्वा पुस्तकं मत्तो[8] लिखित्वा त्वं पुनर्गतः।
स्नातुमेव[9] तु जानामि कोऽन्यस्त्वत्तोऽत्र लेखकः॥ 50॥

---

1. राम – ख, ग।
2. करं – ख।
3. शशाकेश्वरताम् – ख, ग।
4. अलिखितं – ख।
5. सुविस्मिते – क।
6. पद्चयेवं – ख, ग।
7. सत्वरात् – ख।
8. यतो – क।
9. एतास्तुमेवं – क।

इति श्रुत्वा प्रियावाक्यं जयदेवोऽतिविस्मितः ।
अहर्निशं तमेवार्थं चिन्तयन्नालभत्सुखम् ॥ 51 ॥

तस्मिन्दिने रात्रिशेषे स्वप्ने श्रीपुरुषोत्तमः ।
उवाच जयदेवं तु किमर्थं[1] खिद्यसे वृथा ॥ 52 ॥

अहमेवालिखं तत्र तत्पदं नात्र संशयः ।
ममातिप्रीतिदं त्वं तु संदेहेनालिखो यतः ॥ 53 ॥

एवं दृष्ट्वाति सुस्वप्नं प्रबुद्धो मुमुदे भृशम् ।
स्वपत्नीं सुभागां मेने श्रीपुरुषोत्तमदर्शनात् ॥ 54 ॥

तदारभ्यातिभक्त्या वै पत्न्या सह हरिं भजन् ।
गायन्वै गीतगोविन्दं तोषयामास केशवम् ॥ 55 ॥

निर्माय गीतगोविन्दं पुस्तकं पुरुषोत्तमे ।
निवेद्य कृतकृत्योऽभूज्जयदेवो महामनाः ॥ 56 ॥

इति श्रीभगवद्भक्तिमाहात्म्ये जयदेवचरितं नामैकोनचत्वारिंशः सर्गः ॥ 39 ॥

❊ ❊ ❊

चत्वारिंशः सर्गः

॥ जयदेवचरितम् ॥

पुनर्वक्ष्यामि तस्यैव चरितं परमाद्भुतम् ।
जयदेवस्य विप्रस्य गीतगोविन्दसंभवम् ॥ 1 ॥

एकदा गीतगोविन्दं श्रुत्वा राजातिहर्षितः ।
निष्काश्य[2] स्थापयित्वा तत्काव्यं तादृशमेव च ॥ 2 ॥

स्वयं निर्माय विद्वद्भ्यो ददावाज्ञां नृपः पुनः ।
अद्यारभ्य ममैतद्वै गीतगोविन्दनामकम् ॥ 3 ॥

प्रपठ्य[3] गीयतां सर्वैरन्यथा दण्डभाग्भवेत् ।
इत्याज्ञाप्याद्वितीयं तद्गीतगोविन्दनामकम् ॥ 4 ॥

---

1. सुस्वप्नं मुमदे भृशम् – ख, ग
2. लिखाप्य – ख, ग
3. पद्यातां – ख

प्रख्यापयामास नृपः काव्यं स्वकृतमेव तु।
जयदेवकृतं कोऽपि न जगौ नृपशासनात्॥ 5॥

अथैकस्मिन्दिने राजा द्रष्टुं श्रीपुरुषोत्तमम्।
आगतस्तत्र देवाग्रे जयदेवं ददर्श ह॥ 6॥

नृत्यन्तं स्वकृतं काव्यं गायन्तं नृप आह तम्।
अहो मदीयं काव्यं त्वं कुतो न स्वीकरोषि भोः॥ 7॥

श्रुत्वैवं जयदेवस्तु राजानं प्राह भीतवत्[1]।
स्वीकृतं भवदीयं तु काव्यं राजन्नसंशयः॥ 8॥

परन्तु मत्कृतेनायं यथा तुष्यति केशवः।
न तथा त्वत्कृतेनेति[2] परीक्षां क्रियतामिह॥ 9॥

एतच्छ्रुत्वा तु वचनं जयदेवकृतं स्वकम्।
उभयं स्थापयामास जगन्नाथाग्रतः[3] स्वयम्॥ 10॥

उवाच देवं भोः स्वामिन् किं तवातिप्रियं द्वयोः।
तत्स्थापयोपरिष्टात्तु यामः सर्वे बहिर्गृहात्॥ 11॥

इत्युक्त्वा ते बहिर्याताः द्वारे दत्त्वा कपाटकम्।
राजा च जयदेवश्च ये चान्ये तत्र वै द्विजाः॥ 12॥

अग्रे[4] स्थित्वा क्षणं तत्र प्रोद्घाट्य[5] स्वयमेव हि।
कपाटं मन्दिरे याताः सर्वे राजपुरस्सराः॥ 13॥

ददृशुस्तत्र ते सर्वे जयदेवेन निर्मितम्।
उपरिष्टात्स्थापितं तु तदधोराजनिर्मितम्॥ 14॥

दृष्ट्वा तत्परमाश्चर्यं राजा शोकसमन्वितः।
तत्याजान्नं च पानीयं रात्रौ तत्रैव स्थितवान्॥ 15॥

नृपः स्वप्ने ददर्शाथ पुरुषोत्तमरूपधृक्।
कश्चित्समागतो ब्रूते[6] किमर्थं शोचसे वृथा॥ 16॥

गीतगोविन्दसदृशं नान्यत्काव्यं प्रियं मम।
त्वत्कृतेनापि तुष्यामि भक्तस्त्वं नात्र संशयः॥ 17॥

---

1. गीतवत् – क
2. कृत – क
3. जगामाथाग्रतः – ख
4. अथ – क
5. तद्वाक्य – ख
6. कृते – क, ग

परन्तु गीतगोविन्दं स्वीकरोतु भवानपि।
प्रख्यापयतु[1] लोकेऽस्मिन् मम प्रीतिविवर्द्धनम्॥ 18॥

एवं पश्यन्नृपः स्वप्ने जहौ निद्रां मुदान्वितः।
कृष्णं ननाम मनसा स्वापराधं क्षमापयन्॥ 19॥

तदारभ्य नृपो जातो जयदेवेऽतिभक्तिमान्।
स्वयं तु गीतगोविन्दमपठद्भक्तिपूर्वकम्[2]॥ 20॥

प्रख्यापयामास च पुनर्देशे देशे नृपोत्तमः।
अथापरं प्रवक्ष्यामि जयदेवचरितं शुभम्॥ 21॥

एकदा तूत्कले देशे पुरुषोत्तमसन्निधौ।
कस्मिंश्चिन्नगरे काचिच्छाब्दविक्रयिणी मुदा॥ 22॥

शरत्काले निशीथिन्यां चन्द्रिकार्चित[3]दिङ्मुखे।
गायन्ती गीतगोविन्दं वृन्ताकवनमध्यगा॥ 23॥
वृन्ताकानि विचिन्वती विक्रयार्थमितस्ततः।
गायन्ती कृष्णचरितं जयदेवविनिर्म्मितम्॥ 24॥

श्रुत्वा गानं तु भगवाँस्तस्याः पश्चादितस्ततः।
शृण्वन् गीतं स बभ्राम व्रजन्ती सा यतो यतः॥ 25॥

एवं भक्तिवशस्तस्या[4] वृन्ताकविपिने हरेः।
वृन्ताककण्टकैश्छिन्ने परिधानीयोतरीयके[5]॥ 26॥

वृन्ताकानि गृहीत्वा सा मन्दिरं स्वं ययौ तदा।
तदा स्वधाम सम्प्राप्तो निशि श्रीपुरुषोत्तमः॥ 27॥

प्रभाते तत्र पूजार्थमायातः पूजको हरेः।
पूजा सम्भारमादाय द्रष्टुं राजाप्युपागतः॥ 28॥

प्रोद्घाट्य च कपाटं तु गत्वा[6] देवस्य सन्निधौ।
स्नापयन् परिधनीयमपश्यत् [7]खण्डशः कृतम्॥ 29॥

---

1. प्रख्यापयितु – ख।
2. प्रपठन् – ख, ग।
3. चन्द्रकां वितदिश्रुते – ख।
2. कृष्णः – ख।
5. नीयोत्तरीयके – क।
6. गता – ख, ग।
7. वणुशः – ख।

वृन्ताककण्टकैर्विद्धं किमेतदित्यचिन्तयत्।
आहूय स तु राजानं दर्शयामास चाम्बरम्॥ 30॥

कथमेतदभूद्राजन् परमाश्चर्यमित्यहो।
मयैवागत्य च पुनः कपाटोद्घाटनं कृतम्॥ 31॥

न बालो नापि चोन्मत्तः कश्चिदत्रागतो निशि।
कथमेतद्विजानीयां केनेदं कृतमीदृशम्॥ 32॥

इत्युक्त्वा पूजयित्वा तं सह[1] राज्ञा सपूजकः।
विस्मितो बहिरागत्य परां चिन्तामुपागतः॥ 33॥

मुहुर्मुहुश्चिन्तयानो न लेभेऽद्भुतकारणम्।
तदा राजापि तत्रैव पूजकब्राह्मणेन च॥ 34॥

उवास रात्रौ श्रीकृष्णं प्रार्थयन्मनसा मुहुः।
केनेदमासीद्वस्त्रस्य खण्डशः करणं विभोः॥ 35॥

एवं चिन्तापरौ तौ तु त्यक्ताशनजलावुभौ।
[2]रात्रौ सुषुपतुस्तत्र लेभाते नैव तौ सुखम्॥ 36॥

तदा निशावशेषे तु स्वप्ने श्रीपुरुषोत्तमः।
दर्शयामास[3] स्वं रूपं तत्तद्रूपेण चागतम्॥ 37॥

राजानं ब्राह्मणं चापि वदन्तं मधुराक्षरम्।
विषीदसि किमर्थं भो मद्वस्त्रच्छेदनादिना॥ 38॥

शृणुष्व कारणं वासो येन च्छिन्नमनेकधा।
दूती विदूरे वृन्ताकवाट्यां काचिज्जगौ मुदा॥ 39॥

फलविक्रयिणी[4] गीतगोविन्दं मम वल्लभम्।
तच्छ्रोतुमगमं चाहं वाट्यां[5] सार्द्धं तया पुनः॥ 40॥

इतस्ततः पर्य्यधवन्ततो[6] वृन्ताककण्टकैः।
[7]खण्डशः स्फुटितं वस्त्रं सत्यमेतन्न संशयः॥ 41॥

---

1. महराजा – ख।
2. रात्रौ सुषुपतुस्तत्र लेभे तेनैव तौ सुखम् – क,ग।
3. ददर्शतुरुभौ देवं – ख।
4. विरुपिणी – ख।
5. वासं – क, ग।
6. क्षर्प्यधावत्तो – ख।
7. शनसः – क।

मा विषादं कुरुष्वात्र नैव दोषोऽस्ति कस्यचित्।
इति श्रुत्वा वचः स्वप्ने भूपतिः स च पूजकः ॥ 42 ॥

उत्थाय च ततो विप्रो राजसन्निधिमागतः।
राजानमुक्तवान्सर्वं स्वप्ने यद्यदवैक्षत ॥ 43 ॥

श्रुत्वा राजाथ तत्सर्वं सत्यमेतदिति ब्रुवन्।
उवाच स्वप्ने यद्दृष्टं राज्ञापि स्वयमेव हि ॥ 44 ॥
परस्परं प्रशंसन्तौ शाकविक्रयिणीमुभौ[1]।
जयदेवकविश्चैव राजा च ब्राह्मणः स[2] च ॥ 45 ॥

अथ राजा तु तां शूद्रीं शाकविक्रयिणीं तदा।
आनाप्य[3] जीविकां दत्त्वा वसात्रैव पुरे सदा ॥ 46 ॥

गायन्ती गीतगोविन्दं नित्यं श्रीपुरुषोत्तमम्।
तोषयति नृपः स्वाज्ञां दत्त्वा[4] सम्पूज्य केशवम् ॥ 47 ॥

भुक्त्वा प्रसादं देवस्य जगाम भवनं निजम्।
जयदेवं ततो राजा भक्तराजममन्यत ॥ 48 ॥

मुहुस्तद्दर्शनाकाङ्क्षी कविवेश्माययौ नृपः।
एवं भक्तिवशः कृष्णः किं किं न कुरुते [5]प्रभुः ॥ 49 ॥

तस्माद्द्यापि भक्तिर्हि नृणां सर्वार्थसाधिनी।
अथापरं प्रवक्ष्यामि पद्मवत्या विचेष्टितम् ॥ 50 ॥

जयदेवस्य चरितं महदाश्चर्यमुत्तमम्।
एकदा तत्र नृपतेर्भ्राता कश्चित्सगोत्रजः ॥ 51 ॥

ममार कालधर्मेण तत्पत्नी सुव्रता सती।
अनुगन्तुं मनश्चक्रे निश्चितं पतिदेवता ॥ 52 ॥

ततो राजा ददौ सर्वं सम्भारमौद्ध्र्वदेहिकम्।
स्वयं तत्र गतो राजा [6]पुरवासिजनैर्वृतः ॥ 53 ॥

तस्मिन्नेव क्षणे राज्ञी द्रष्टुं पद्मावती ययौ।
राज्ञी प्रणम्य तां प्राह सतीं दृष्ट्वा किमेषि भोः ॥ 54 ॥

---

1. विरूपिणीम् – ख।
2. शुचं – क, ग।
3. अनाथ – क।
4. दृष्ट्वा – ख।
5. भुवि – क, ग।
6. जनैस्सहः – क।

इति श्रुत्वा वचो राज्ञः प्राह पद्मावती सती।
अहो पाखण्ड इत्येष मृते पत्यौ[1] मनस्विनी ॥ 55 ॥

एवं मर्तुमुपायं यत्प्रसादयति सुव्रता।
अहं तु मन्ये भो राज्ञि पत्युर्मरणसंश्रवात्[2] ॥ 56 ॥

तत्क्षणाद्देहजे वह्नौ भस्मीभूता तु[3] साभवत्।
का मुक्तिः का च तत्प्रीतिः व्रतं तस्याश्च किं पुनः ॥ 57 ॥

इति श्रुत्वा वचस्तस्या राज्ञी विस्मयमागता।
किमिदं भाषसे साध्वि कथमेवं भविष्यति ॥ 58 ॥

परीक्षां कारयिष्यामि किञ्चित्कालं प्रतीक्ष्य च।
इति सञ्चित्य मनसा तूष्णीं तस्थौ नृपाङ्गना[4] ॥ 59 ॥

पद्मावत्यपि तां राज्ञीं समाभाष्य गृहं ययौ।
अथैकस्मिन्दिने राजा द्रष्टुं श्रीपुरुषोत्तमम् ॥ 60 ॥

जगाम जयदेवं च पुरस्कृत्यातिभक्तितः।
उवाच[5] तत्र तां रात्रिं जयदेवेन सङ्गतः ॥ 61 ॥

अथ प्रभाते सञ्जाते यावद्राजा न चागतः।
तावदेव तु सा राज्ञी कविपत्नीमुपाह्वयत् ॥ 62 ॥

पद्मावती समायाता राज्ञीं प्राह करोषि किम्।
तां दृष्ट्वा राजपत्नी सा रुरोदाह च विह्वला ॥ 63 ॥

राज्ञा[6] सह कविस्तत्र देवं द्रष्टुं गतः किल।
तत्राकस्माद्विना दुःखं पतिस्ते देहमत्यजत् ॥ 64 ॥

तद्दुःखवशगो राजा नायाति स्वगृहं पुनः।
अमी समागता भृत्याः कथयन्तीदमप्रियम् ॥ 65 ॥

इति श्रुत्वा वचस्तस्या राज्ञाः पद्मावती सती।
अहो किमिदमित्युक्त्वा तूष्णीं तस्थौ क्षणार्द्धतः ॥ 66 ॥

---

1. पत्न्यौ – क
2. संश्रुतम् – ख
3. भूतानया – ख
4. इति श्रुत्वा वचस्तस्या राज्ञी विस्मयमागता – ख, ग
5. उवाच – ख, ग
6. राजा – ख

निपपात पृथिव्यां सा गतासुरभवत्तदा।
अथ राज्ञी समागत्य हाहाकारं मुहुर्मुहुः॥ 67॥

कुर्वन्ती स्वयमेवार्ता तामुत्थापयति स्म सा।
नोत्तस्थौ तां मृतां ज्ञात्वा राज्ञी शोकसमाकुला॥ 68॥

भयार्ता विललापाथ गर्हयन्ती निजक्रियाम्।
अथ तत्र गताः सर्वा राजदाराः समन्ततः॥ 69॥

चुक्रुशुः शोकसंतप्ताः किं जातमिति चाब्रुवन्।
अथ राजापि कविना समायातोऽतिविस्मितः॥ 70॥

श्रुत्वा कोलाहलं शीघ्रं [1]ययावन्तःपुरं स्वयम्।
जयदेवेन सार्द्धं च तत्र गत्वा ददर्श ह॥ 71॥

पद्मावतीं मृतां भूमौ राजामाह प्रियां प्रति।
किं यातमस्या[2] येनेयं मृताऽकस्मात्कविप्रिया॥ 72॥

श्रुत्वा राज्ञी नृपवचो भीता प्राह कृताञ्जलिः।
मम दुश्चरितं नाथ क्षम्यतां कथयामि ते॥ 73॥

तव भ्राता मृतः पूर्वं तत्पत्नी सा तमन्वगात्।
तां दृष्ट्वा प्राह मामेषा कोऽयं पाखण्ड इत्यहो॥ 74॥

मे ते पत्यौ[3] तत्क्षणात्तु भस्मसादभवन्नया।
तस्या वृथा व्रतं प्रीतिरित्येवं मम निश्चयः॥ 75॥

इति श्रुत्वा वचस्तस्याश्चिकीर्षन्ती परीक्षणम्।
अवदं[4] ते पतिः साध्वि मृतोऽकस्मादिति श्रुतम्॥ 76॥

तच्छ्रुत्वैव पपातोर्व्यां मृता तत्क्षणमेव हि।
इदानीं त्वमिहायातः कविना सह सङ्गतः॥ 77॥

अतः परं यत्कर्त्तव्यं तत्कुरुष्व ममापि[5] भोः।
इति श्रुत्वा वचस्तस्या राजा प्राहातिविस्मितः॥ 78॥

---

1. पद्मावन्तः – क।
2. यातमस्य सानेयं – क, ग।
3. पत्यौ – क।
4. अवदन्ते – ख।
5. मम प्रभोः – ख।

वृथेयं घातिता देवि त्वया पद्मावती सती।
निवत्स्यति कथं गेहे जयदेवोऽनया विना॥ 79॥

अतस्त्यक्ष्याम्यहमपि त्वां यथेच्छं व्रजाधुना।
घातने स्त्रीवधो मे स्यादवध्या हि स्त्रियो नृणाम्॥ 80॥

इति राजवचः श्रुत्वा जयदेवोऽब्रवीद्वचः।
राजन्ननपराद्धेयं महिषी तव सुव्रता॥ 81॥

न त्यागमर्हत्येषा च नैवं ब्रूहि ममाग्रतः।
कौतुके तु मृषा वाक्यं भवत्येव न संशयः॥ 82॥

वाङ्मात्रेण न तत्रास्ति पातकं कस्यचिन्नृप।
किञ्च क्षणं जगन्नाथं स्मर त्वं सुमना भव॥ 83॥

भजेऽहमपि तं देवं कल्याणं स करिष्यति।
इत्युक्त्वा जयदेवस्तु वाद्यमादाय सर्वशः॥ 84॥

प्रिया[1]चर्चितयत्स्वोक्तं गीतं तत्परमानसः।
जगौ ततः क्षणादेव पद्मावत्याः कलेवरम्॥ 85॥

सञ्चार ततः सर्वे [2]विस्मयोत्फुल्ललोचनाः।
साधु साध्विति च प्रोचुः कञ्चित्कालं व्यतीत्य सा॥ 86॥

समुत्थाय जगौ पत्या सार्द्धं नृणां तु पश्यताम्।
ततो राजा जहर्षाथ राज्ञी चापि पुनः सतीम्॥ 87॥

प्रणनाम मुहुर्भक्त्या क्षम्यतामिति भाषिणी।
ततः प्रसन्नः स कविः स्नात्वा भुक्त्वा नृपाज्ञया॥ 88॥

स्वगृहं प्रययौ हृष्टः पद्मावत्या सहोत्सुकः।
एवं भगवतो भक्तिर्मृतसञ्जीविनी नृणाम्॥ 89॥

अद्यापि वर्तते लोके निश्चयोऽपेक्षितः किल॥ 90॥

इति श्रीभगवद्भक्तिमाहात्म्ये जयदेवचरितं नाम चत्वारिंशः सर्गः॥ 40॥

❊ ❊ ❊

---

1. प्रिये चार्पित यत्स्वोक्तम् – क, ख।
2. विष्णयो – ख।

एकचत्वारिंशः सर्गः

॥ जयदेवचरितम् ॥

अपरं श्रृणु वक्ष्यामि कवेः सुचरितं महत्।
जयदेवसमः साधुर्न भूतो न भविष्यति ॥ 1 ॥

सर्वभूत[1]सुहृल्लोके सर्वमात्मसमं पुनः।
पश्यन्प्रारब्धभोगांस्तमश्नुते कर्मबन्धनम् ॥ 2 ॥

एकदा स क्वचिद्ग्राम [2]निमन्त्रणवशाद्गतः।
तत्र संमानितः शिष्यैर्वस्त्रालङ्करणादिभिः ॥ 3 ॥

भोजयित्वा सुवर्णानि दत्त्वा प्रात[3]र्विसर्जितः।
आगच्छन्विपिने मार्गे चिन्तयन्पुरुषोत्तमम् ॥ 4 ॥

ततः खड्गधरास्तत्र[4] लुण्ठकाः समुपागताः।
चत्वारो निर्दयास्तीव्राः कालान्तकयमोपमाः ॥ 5 ॥

तान् दृष्ट्वा जयदेवस्तु धनलोभाज्जिघांसुकान्।
उपायमकरोत्तत्र प्राणत्राणाय केवलम् ॥ 6 ॥

तानुवाच कविः प्रेम्णा वत्सा भूयं क्व गच्छथ।
पुरुषोत्तमपुरीं याम इत्युक्तस्तैः पुनः स तु ॥ 7 ॥

उवाच तान्मधुरया वाचा भद्रमभूदिह।
मयापि तत्र गन्तव्यं भवद्भिः साकमेव हि ॥ 8 ॥

परन्तु वृद्ध एकाकी गृहीत्वैतद्धनानि भोः।
गन्तुं न शक्तो यूयं चेद्धनमेतत्प्रगृह्य च ॥ 9 ॥

गच्छताद्य मया सार्द्धं तदा मे गमनं भवेत्।
इत्युक्त्वा तानि वस्त्राणि सुवर्णानि च सर्वशः ॥ 10 ॥

तेभ्यो दत्त्वा सुखं मेने प्राणत्राणं मुदान्वितः।
शनैः शनैस्ततः पश्चात्तेषां[5] सोऽप्यगमत्कविः ॥ 11 ॥

---

1. सर्वभूमहल्लोके – ख, ग।
2. निमन्त्रिणवशाद्गुतः – ख।
3. प्रातर्षिमर्ज्जितः – ख।
4. खड्गधराः – क।
5. त्ततः – ख, ग।

गृहीत्वैतानि वस्तूनि सुखं गच्छन्त्यमी पुनः।
यास्यामि स्वगृहं दैवान्महारिष्टाद्विमोचितः॥ 12॥

अन्यथा माममी लोभाद्घातयेयुर्न संशयः।
इत्येवं चिन्तयन्तं तं जयदेवं शनैः शनैः॥ 13॥

गच्छन्तः पुरतश्चौरा दीर्घनादैः समाह्वयन्।
अहो शीघ्रं समागच्छ गृहाणेदं निजं धनम्॥ 14॥

त्वं तु गन्तुं न शक्नोषि दूरं [1]गन्तव्यमस्ति नः।
इति श्रुत्वा वचस्तेषां जयदेवोऽतिशङ्कितः॥ 15॥

किं करिष्यन्त्यमीत्येवं चिन्तयानोऽपि तान्पथि[2]।
तावत्ते मन्त्रयामासुरयं धूर्तोऽस्ति वै [3]द्विजः॥ 16॥

अस्माभिरेव वस्तूनि प्रापयिष्यति[4] नः पुनः।
घातयिष्यति गत्वाऽयं स्वग्रामे[5] नात्र संशयः॥ 17॥

तस्मादेनं निहत्यात्र गमिष्यामो न चान्यथा।
एवं केनचिदुक्ते तु तन्मध्ये कोऽप्यभाषत॥ 18॥

अहो किं मारणेनास्य बध्वा संस्थाप्यतां क्वचित्।
इत्युक्त्वा जयदेवं तु गृहीत्वा तेऽतिनिर्दयाः॥ 19॥

हस्तौ पादौ तथैकत्र बध्वा चिक्षिपुरन्यतः।
पुनस्तन्मध्यतः कोऽपि महादुष्टोऽतिनिर्दयः॥ 20॥

खड्गेन पाणिपादं तत् बद्धं चिच्छेद यत्नतः।
ततस्ते स्वैरगमनाश्चौरा जग्मुर्यदृच्छया॥ 21॥

जयदेवोऽपि प्रारब्धभोगोऽयमित्यमन्यत[6]।
चिन्तयानो जगन्नाथं तत्रारण्ये क्षतार्दिताः॥ 22॥

---

1. वास्थितः – क।
2. चिन्ता करिष्यं समीत्येव चिन्तयानोपितान् पथि – क।
3. तां त्रयामासुरपरं एतद्धूर्तोऽसि वै द्विज – क।
4. प्रापयप्यति नः – क।
5. तद् – ख, ग।
6. भोगोयसिति म – णतः – ख, ग।

अथ तत्रैत्य नृपतिर्मृगायां पर्यटन् वने।
एकाकी हयमारूढो धावन्तं मृगमन्वगात् ॥ 23 ॥

राजा तत्राजगामाथ जयदेवसमीपगः।
मृगं दृष्ट्वा न विव्याध जयदेवेन शङ्कितः ॥ 24 ॥

अवतीर्य्य हयात्तत्र जयदेवस्य सन्निधिम्।
गत्वा पप्रच्छ किमिदं कुत एवं दशा तव ॥ 25 ॥

इत्युक्तो जयदेवस्तु राजानं प्राह पूर्वतः।
वृत्तान्तं च ततो राजा जयदेवं कृपान्वितः ॥ 26 ॥

आरोप्य शिविकायां तमानिनाय निजं पुरम्।
तत्र पद्मावतीं साध्वीमानाय्य नृपतिस्तदा[1] ॥ 27 ॥

सेवायामास वैद्यैश्च जयदेवं नृपोत्तमः।
ततो राजा प्रतिदिनं जयदेवं दिदृक्षया[2] ॥ 28 ॥

जगाम तद्गृहं तेन यदाज्ञप्तं चकार सः।
एवं गतेषु कालेषु चिकित्सा[3]स्ततः कविम् ॥ 29 ॥

समाजग्मुस्ततश्चौरा मुद्रा माला विभूषिताः।
साधुवेषधरास्ते तमपकारं दिदृक्षवः ॥ 30 ॥

राजमान्यो महानेष मदर्थं रागवान्नवा[4]।
इति निश्चित्य मनसा कविवेश्मसमागतः ॥ 31 ॥

दृष्ट्वा तान्जयदेवस्तु हर्षणोत्फुल्ललोचनः।
आगच्छतेदं भवतां गृहमायात [5]निर्भयाः ॥ 32 ॥

पद्मावतीं समाहूय पाद्याद्यैस्तानपूजयत्।
ततस्तान्भोजयित्वा तमाजुहाव नृपं कविः ॥ 33 ॥

राजा तत्रागतस्तं च जयदेवोऽभ्यभाषत।
पुरस्कृत्य च तान्दुष्टानदुष्टेनान्तरात्मना[6] ॥ 34 ॥

राजन्नेते गुरुसमा महान्तः शास्त्रपारगाः।
एतेभ्यो देहि वित्तानि पात्रमेते न संशयः ॥ 35 ॥

---

1. तृषः – ख।
2. यदृच्छया – ग, ख।
3. यत्सुव ततः कविम् – क।
4. रागतिवक्ष्यति – क, ख।
5. सशयः – क, ख।
6. तां दुष्टो आदरवनारात्मवान् – क।

इति श्रुत्वा ततो राजा रत्नानि विविधानि च।
वस्त्राण्याभरणादीनि ददौ परमभक्तितः ॥ 36 ॥

गृहीत्वा तद्धनं ते वै यथेष्टं गन्तुमुद्यताः।
तदा प्राह नृपं भूयो जयदेवोऽतिहर्षितः ॥ 37 ॥

अहो मार्गे कियद्दूरं वनमत्यन्तभीषणम्।
तस्य संतरणार्थाय भृत्यं तेभ्यो नियोजय ॥ 38 ॥

वनाद्बहिरिमान्कृत्वा पुनरायान्तु तेऽन्तिकम्।
इति श्रुत्वा ततो राजा पदातीन् कति[1] तान्प्रति ॥ 39 ॥

नियोजयामास तदा ते जग्मुस्तैः सहाद्भुतम्।
ततोऽन्तर्वनगास्ते तु तरुच्छायामुपाश्रिताः ॥ 40 ॥

राजभृत्यः कथाशेषे तानुवाच विनीतवत्।
अहो कवेर्भवन्तः के तद्ब्रूत कृपया मुदा[2] ॥ 41 ॥

युष्मदर्थेऽति[3]भक्त्या यद्राजानं प्रार्थयत्कविः।
दापयामास रत्नानि विविधानि धनानि च ॥ 42 ॥

नैतादृशं कस्यचिद्वै सत्कारमकरोत्कविः।
इति श्रुत्वा वचस्तस्य राजभृत्यस्य ते खलाः ॥ 43 ॥

ऊचुः प्रणम्य ते सर्वे शृणु कारणमत्र भोः।
कर्णाट[4]राज्यनिकटे वयं भिक्षाशिनः स्थिताः ॥ 44 ॥

तत्रायमपि चायातो धनार्थी काव्यकृद्द्विजः।
तत्रैकस्य[5] गृहे चौर्यं चकारायं द्विजाधमः ॥ 45 ॥
धनिकेन गृहीत्वाथ प्रापितो राजसन्निधौ।
राजानं प्राह धनिको नायं विप्रकुलोद्भवः ॥ 46 ॥

चौरोऽयं नित्यचौर्येण कदर्थं[6] पतितः प्रभोः।
इदानीं मद्गृहे भृत्यैर्धृत्वा नीतस्तवान्तिके ॥ 47 ॥

इति श्रुत्वा ततो राजा चाण्डालाय समर्पयत्।
गृहीत्वेमं दुरात्मानं मद्राज्यस्तु बहिः कुरु ॥ 48 ॥

---

1. यदाति नृपं च – क, ख।
2. मम – क, ग।
3. ख मध्ये लुप्तः पाठः
4. करणराज – क।
5. तथैकस्य – ख।
6. कदापि – ख, ग।

अन्यराज्ये प्रापयित्वा जहि खड्गेन पापिनम्।
इत्याज्ञां शिरसा कृत्वा चाण्डालास्तं प्रगृह्य च॥ 49॥

गच्छन्तः प्रार्थिता भूयो द्रव्येणापि वशीकृताः।
अस्माभिरुक्ता नायं भो वध्यो युष्माभिरेव च॥ 50॥

देशान्तरमवश्यं तु प्रापयित्वाङ्गुलिद्वयम्।
छित्वा यान्तु नृपद्वारं प्रत्ययार्थं प्रदर्श्यताम्॥ 51॥

इत्येतदुक्तं स्वीकृत्य नीत्वा तं राज्यतो बहिः।
अत्र राज्ये वने क्वापि छित्वा च तत्पाणिपादकम्॥ 52॥

राज्ञे प्रदर्शयामासुरिति जातं पुरास्य भोः।
ततोऽस्मानर्चयामास राज्ञा स्मृत्वात्मरक्षणम्॥ 53॥

इति तेषां कथयतां तुमुलः खेऽभवद् ध्वनिः।
संपपाता[1] निर्घोरस्तेषां मूर्धसु तत्क्षणात्॥ 54॥

ततस्ते राज्यभृत्यास्तु दृष्ट्वा तन्महदद्भुतम्।
क्षणात्तूष्णीं स्थिताः सर्वे गृहीत्वा धनसञ्चयम्[2]॥ 55॥

तत्र श्रुत्वा नृपं यातं जयदेवस्य मन्दिरे।
तत्रैव ते जनाः सर्वे गृहीत्वा धनसञ्चयम्॥ 56॥

राजानं प्रणिपत्योचुस्ते [3]बद्धकरसम्पुटाः।
राजंस्ते साधवोऽरण्ये मृता [4]वज्रावघाततः॥ 57॥

वस्त्रादिकं गृहीत्वा तु वयमेते समागताः।
इति श्रुत्वा ततो राजा किं जातमिति चाब्रवीत्॥ 58॥

ततस्ते निजप्रेष्यैस्तु वज्रपातं तमब्रुवन्।
श्रुत्वा तज्जयदेवस्तु हाहाकृत्वा मुहुर्महुः॥ 59॥

रुरोद पद्भ्यां[5] हस्ताभ्यां छिन्नाभ्यां ताडयन्महीम्।
तत्क्षणाज्जयदेवस्य पाणिपादं तु पूर्ववत्॥ 60॥

---

1. शनि – ख।
2. संज्ञां प्राप्यते पुनः – क।
3. ययुः – क।
4. वज्रामिधा ततः
5. भृशम् – क, ग।

प्रादुर्बभूव सर्वेषां पश्यतां नात्र संशयः।
असतां तादृशानां तु मृत्युं श्रुत्वाऽतिदुःखितः॥ 61॥

रुरोद दुः[1]खतस्तस्मात्तुतोष पुरुषोत्तमः।
ददौ हस्तौ च पादौ च किमाश्चर्य्यमिदं हरेः॥ 62॥

अथ राजातिचिन्तार्तो जयदेवं प्रणम्य च।
पप्रच्छ किमिदं चित्रं ब्रूहि मत्कृपया द्विज॥ 63॥

उवाच जयदेवस्तं वृत्तान्तं पूर्वतः स्वकम्।
चौराणां च यथा तत्त्वं ततो राजा मुमोद ह॥ 64॥

तुष्टाव जयदेवं तं धन्योऽसि त्वत्समो न वै।
दृष्टः श्रुतो वा लोकेऽस्मिन्मित्रशत्रुसमः पुमान्॥ 65॥

धन्योऽहमिति नीचोऽपि त्वत्संसर्गान्न संशयः।
इत्यादिवचसा राजा स्तुत्वागत्य स्वमन्दिरम्॥ 66॥

आश्चर्य्यं पुत्रदारेभ्यो मन्त्रिभ्यः प्रोक्तवान्स्वयम्।
अथ कालेन कियता जयदेवो जरांगतः॥ 67॥

तथापि नित्यकर्मादि न तत्याज कदाचन।
गङ्गास्नानव्रतं तस्य नित्यं सङ्कल्पितं पुरा॥ 68॥

एकदा कृतशोचादिश्चलितो जाह्नवीतटम्।
स्नातुं मार्गे जराक्रान्तो विशश्राम क्वचित्क्वचित्॥ 69॥

गत्वा कथञ्चिद्गङ्गायां स्नात्वा पीत्वा जलं पुनः।
आगच्छन्पथि बभ्राम निपपात मुमूर्च्छ च॥ 70॥

ततस्ते पथिकास्सर्वे सिषिचुस्तं च वाससा।
छायां चक्रुस्ततो राजा स्नात्वा तत्राजगाम ह॥ 71॥

दृष्ट्वा तं जयदेवं तु तामवस्थामुपागतम्।
आरोप्य शिविकायां तु प्रापयामास मन्दिरम्॥ 72॥

स्वयमागत्य च पुनः कृताञ्जलिरुवाच तम्।
अहो जीर्णतरं चेदं शरीरं ते महामते॥ 73॥

---

1. छद्मना – ख, ग।

मा याहि पादचारेण स्नातुं गङ्गातटं[1] पुनः।
ददामि शिविकां तुभ्यं कुरुष्व मम भाषितम्॥ 74॥

इति श्रुत्वा तु राजानं जयदेव उवाच सः।
मा मैव शिविकां राजन्संरक्ष भवनेऽधुना॥ 75॥

पादाभ्यामेव गत्वाहं स्नास्यामीति[2] व्रतं मम।
यथाशक्ति ततो यामि मा कुरुष्वाग्रहं पुनः॥ 76॥

अथ तस्यां तु रात्र्यां वै राजमान्यः पुरोहितः।
राजोदारा महान्तो ये तत्र ग्रामे द्विजाः स्थिताः॥ 78॥

ते सर्वे ददृशुः स्वप्ने जयदेवोऽपि चाद्भुतम्।
शुक्लाम्बरधरा काचिच्छुक्ला मकरवाहना॥ 79॥

पद्महस्तारविंदाक्षी समागत्याब्रवीदिदम्।
अहं भागीरथी देवी प्रातरादि निरन्तरम्॥ 80॥

जयदेवस्य वाप्यां वै निवसिष्याम्यसंशयम्।
जानीहि प्रत्ययं तत्र पद्ममेतन्मया सह॥ 81॥

आविर्भविष्यति जले द्रष्टव्यं भवता पुनः।
अयं तु जयदेवो मे भक्तोऽतीव प्रियः सदा॥ 82॥

नैतस्य व्रतभङ्गोऽस्ति वाप्यां स्नानं करोत्वयम्।
त्वयापि बोधनीयः स नान्यथा मम भाषितम्॥ 83॥

किञ्चान्यं प्रत्ययं तत्र प्रोच्यते तन्निशामय।
जयदेवेन सार्द्धं तु गलत्कुण्ठोऽपि तत्र चेत्॥ 84॥

कुष्टरोगात्प्रमुच्येत [3]स्नातः सप्तदिनान्यपि।
एवं स्वप्नं प्रपश्यन्तः प्रबुद्धास्ते समागताः॥ 85॥

राजाग्रे[4] स्वप्नमूचुर्वै कथां कृत्वा परस्परम्।
नृपोऽमात्यैर्ग्रामवृद्धैः जयदेवस्य मन्दिरम्॥ 86॥

समागत्याब्रवीत्सर्वं जयदेवाय भूपतिः।
श्रुत्वा तज्जयदेवस्तु निजस्वप्नं स्मरन्हृदि॥ 87॥

---

1. मद्यागतं – ख।
2. यास्यामीति – ख, ग।
3. उपसमारादिनादपि – क।
4. एकोग्रे – ख, ग।

नृपादीन्प्राह धन्या वै भवन्तो नात्र संशयः।
यैर्दृष्टा जाह्नवीदेवी स्वप्ने श्रीरिव रूपिणी ॥ 88 ॥

किमाश्चर्य्यं भवद्भिर्यद्दृष्टा स्वप्नेऽतिदुर्लभा।
जगन्मान्या जगन्माता जगदुद्धारकारिणी ॥ 89 ॥

आगमिष्यति वाप्यां सा सत्यमेतन्न संशयः।
इत्युक्त्वा नृपतिस्तूष्णीं सामात्यः च पुरोहितः ॥ 90 ॥

सदारस्तत्रस्नानीयं गृहीत्वा समुपाययौ।
जयदेवोऽपि पूजार्थमर्घ्यादीन्परिकल्प्य च ॥ 91 ॥

जगाम तत्र वाप्यां तु स्नातुं पद्मावती [1]पुनः।
तत्र वापीसमीपे तु गत्वा ते तु नृपादयः ॥ 92 ॥

जयदेवं पुरस्कृत्य सर्वे तत्रावतस्थिरे।
जयदेवोऽथ स्नानीयं मन्त्रं भक्त्या पठन् जले ॥ 93 ॥

प्रविवेश तदा गङ्गा तत्र प्रादुर्बभूव ह।
ऊर्मिभिस्तज्जलं जातं दुग्धकुन्देन्दुनिर्मलम् ॥ 94 ॥

तादृश्यः सिकता जाताः यथा गङ्गासरित्स्थिताः।
प्रादुर्बभूव पद्मं तज्जले दृष्ट्वातिहर्षिताः ॥ 95 ॥

राजा च जयदेवश्च तथान्ये ये समागताः।
तुष्टुस्तां जनास्तत्र गङ्गां त्रिपथगामिनीम् ॥ 96 ॥

जयदेवोऽपि हर्षाश्रु[2]परिक्लिन्नदृगम्बुजः।
स्नात्वा पाद्यादिभिर्गङ्गां पूजयामास भक्तितः ॥ 97 ॥

तस्यां स्नात्वा दिनत्रयं दिव्यदेहो बभूव सः।
एवमन्येऽपि ये तत्र यं यं कृत्वा मनोरथम् ॥ 98 ॥

स्नानपूजादिकं चक्रुरापुस्ते फलमीप्सितम्[3]।
इत्येतज्जयदेवस्य माहात्म्यं कथितं मया ॥ 99 ॥

यः पठेच्छृणयादेतत्तस्य भक्तिर्दृढा भवेत्।
कामी कामानवाप्नोति जगन्नाथप्रसादतः ॥ 100 ॥

---

1. युतः – क।
2. हर्ष्यश्रु – ख।
3. भीक्षितम् – ख।

उत्तमां गतिमाप्नोति दुर्ल्लभामपि योगिनाम् ॥ 101 ॥

इति श्रीभगवद्भक्तिमाहात्म्ये जयदेवचरितं नामैकचत्वारिंशः सर्गः ॥ 41 ॥

❊ ❊ ❊

द्विचत्वारिंशः सर्गः

॥ श्रीधरस्वामिचरितम् ॥

अथातः श्रीधरस्वामिभक्तिमाहात्म्यमुत्तमम् ।
विष्णुभक्तिप्रदं नृणां कथयामि यथाश्रुतम् ॥ 1 ॥

आसीद्विप्रो महातेजा वेदवेदाङ्गपारगः ।
शान्तो दान्तो दयायुक्तः सर्वशास्त्रार्थकोविदः ॥ 2 ॥

विधिना स द्विजः श्रेष्ठः कृत्वा दारपरिग्रहम् ।
अग्निमादाय विधिवदग्निहोत्रपरायणः ॥ 3 ॥

उत्पादयामास सुतानात्मतुल्यगुणानथ ।
बभूव भोगाद्विरतो वृद्धः काशीमवाप्य सः ॥ 4 ॥

संन्यस्तो विधिवद्दण्डं[1] दीक्षां जग्राह स द्विजः ।
स एव श्रीधरस्वामीत्येवं लोकेऽतिविश्रुतः ॥ 5 ॥

तत्राप्यध्यापनरतो विष्णुभक्तिपरायणः ।
अयाचिताशी सन्तुष्टः पश्य विष्णुजगन्मयम् ॥ 6 ॥

श्रीमद्भागवतं स्वामी ददर्शैकदिने शुभम् ।
दृष्ट्वा तद्विष्णुमाहात्म्यमद्भुतं व्यासभाषितम् ॥ 7 ॥

सर्वशास्त्रमयं क्लिष्टं दुर्बोधं पण्डितैरपि ।
संसारसागरोद्धारे पोतोऽयं[2] मन्यते किल ॥ 8 ॥

दुर्बोधत्वाच्च विद्वद्भिः सेव्यं तेन यदृच्छया ।
अस्य व्याख्यां करष्येिऽस्मात्प्रसीदेच्चेज्जनार्दनः ॥ 9 ॥

इत्येवं चिन्तयानः स नान्यत्किञ्चित्स्म पश्यति ।
तन्मनास्तद्गतप्राणो[3] न लेभे तु सुखं क्वचित् ॥ 10 ॥

---

1. द्परीक्षां – ख, ग।
2. योतोऽयदृश्यते – ख।
3. तं नानास्तद्भतप्राणो – क।

एकदा रात्रिशेषे तु स्वप्ने श्रीबिन्दुमाधवम्।
ददर्श भाषमाणं तु कुरु व्याख्यानमस्य मे ॥ 11 ॥

माहात्म्यमस्ति तत्सत्यं प्रकटीकुरु यत्नतः।
त्वदुक्तं नानृतं किञ्चिद्भविष्यति कदाचन ॥ 12 ॥

यावन्मन्नाम लोकेऽस्मिन्तावत्स्थास्यति[1] ते यशः।
दृष्ट्वैवं[2] श्रीधरस्वामी प्रबुद्धोऽति जहर्ष च ॥ 13 ॥

तस्मिन्नेव क्षणे स्वामी निबबन्ध च मङ्गलम्।
तदादि प्रातरारभ्य कृत्वा निजविधिं पुनः ॥ 14 ॥

अहर्निशं निर्ममैतां[3] व्याख्यां भागवतीं शुभाम्।
निर्विघ्नमभवत्पूर्णं व्याख्यानं चास्य वै यदा ॥ 15 ॥

तदा काशीनिवासिभ्यो विद्वद्भ्योऽपि विलिख्य[4] सः।
पुस्तकं प्रेषयामास कीदृग्जातमिति ब्रुवन् ॥ 16 ॥

ते प्रशशंसुः कतिचिद्दृष्ट्वा तत्पुस्तकं जनाः।
केचिदीर्ष्यापरास्तत्र निनिन्दुर्दुर्जनाः पुनः ॥ 17 ॥

स्वयमारेभिरे टीकां कर्तुं भागवतस्य च।
निर्माय सकुलां टीकां ते सर्वे दुष्टमानसाः ॥ 18 ॥

प्रख्यापयन्तो निन्दन्तः श्रीधरस्वामिनिर्मिताम्।
एकस्मिन्दिवसे तत्र बिन्दुमाधवसन्निधौ ॥ 19 ॥

सभायां पण्डिताः सर्वे गृहीत्वा स्वं स्वं पुस्तकम्।
संस्थाप्योचुरहो सर्वे स्वं स्वं निर्मितपुस्तकम् ॥ 20 ॥

बिन्दुमाधवपादाभ्यामधस्तात्स्थाप्यतां किल।
बहिरेत्य क्षणं स्थित्वा प्रार्थयित्वा च माधवम् ॥ 21 ॥

पुनर्गत्वा च पश्यामो मां टीकां तत्पदाम्बुजे।
संस्थापितां प्रपश्यामस्तां[5] स्वीकुर्मो न संशयः ॥ 22 ॥

इत्येवं मन्त्रयाणास्ते[6] श्रीधरस्वामिसन्निधौ।
जगामैकश्च तन्मध्यात्प्राह तस्मै चिकीर्षितम् ॥ 23 ॥

---

1. ख – मध्ये लुप्तः पाठः।
2. दृष्ट्वा तं – ख, ग।
3. निर्ममौ त्वां – क।
4. लिखाप्य – ख, क।
5. मोऽस्तं – क।
6. मन्त्रमानास्ते – ख, तस्त्रयाना – क।

तच्छ्रुत्वा श्रीधरस्वामी ददौ स्वकृतपुस्तकम्।
गृहाणेदं मम कृतं न गन्तव्यं मया द्विज ॥ 24 ॥

भवतां कृतिरेवास्तु समीचीनेति मे मतिः।
ममैव सम्यगित्येवं नाग्रहो मम वर्तते ॥ 25 ॥

इति श्रुत्वा तदा विप्रो गृहीत्वा स्वामिनिर्मिताम्।
टीकां सभायामायातः प्राह स्वामिवचश्च तान्[1] ॥ 26 ॥

ततस्ते[2] पुस्तकं सर्वं बिन्दुमाधवपादयोः।
अधस्तात्स्थापयामासुः सम्प्रार्थ्यैवं परस्परम् ॥ 27 ॥

बिन्दुमाधव देवेश भक्तानुग्रहविग्रह।
एतेषां पुस्तकानां तु मध्ये यत्ते प्रियं विभो ॥ 28 ॥

[3]सद्व्याख्यानमभूत्तत्त्वं स्वपादे स्थापय प्रभो।
सर्वेषामुपरिष्टात्तु स्थापितं स्यान्न संशयः ॥ 29 ॥

एवं सम्प्रार्थ्य पादाधः संस्थाप्य सर्वपुस्तकम्।
बहिरेत्य क्षणं स्थित्वा पुनर्गत्वाथ मन्दिरम् ॥ 30 ॥

ददृशुः श्रीधरस्वामिनिर्मितां तत्पदाब्जयोः।
उपरि स्थापितां सर्वे प्रशशंसुः परस्परम् ॥ 31 ॥

शिरसा स्वामिरचितां टीकां नत्वाथ ते जनाः।
स्तुवन्तः स्वामिभवनं गत्वोचुः सर्वमादितः ॥ 32 ॥

श्रुत्वा स्वामी तु तद्वाक्यं मात्सर्य्यरहितोऽब्रवीत्।
यथेष्टं भवतामस्तु नाग्रहो मेऽत्र वर्तते ॥ 33 ॥

इति श्रुत्वा तु ते सर्वे गत्वा स्वं स्वं च मन्दिरम्।
श्रीधरस्वामिभक्तिं ते चक्रुर्वै[4] मनसा गिरा ॥ 34 ॥

एवं भक्तवशोऽद्यापि भगवान्भक्तवत्सलः।
प्रख्यापयति लोकेऽस्मिन्भक्तिमाहात्म्ययन्त्रितः ॥ 35 ॥

अथापरं तु तस्यैवं श्रीधरस्वामिनः शुभम्।
माहात्म्यं शृणु वक्ष्यामि महाश्चर्यं तदुत्तमम् ॥ 36 ॥

---

1. श्रुतान् – क।
2. तातास्ति – ग।
3. सद्याख्यानम् – ख, ग।
4. चक्रुत्वं – क।

एकदा श्रीधरस्वामी ज्वररोगेण पीडितः।
उपवासपरो[1] भूत्वा क्षुत्पिपासाविवर्जितः॥ 37॥

विद्याशिष्यस्तु तस्यैको ब्राह्मणो माधवा[2]ह्वयः।
परिचर्यापरो नित्यं गुरुभक्तिपरायणः॥ 38॥

सम्यक्सेवां चकारास्य पादसंवाहनादिभिः।
अहोरात्रं तु तत्रैव निवसन् गुरुसन्निधौ॥ 39॥

तदाज्ञां शिरसा कृत्वा चकार स महात्मनः।
पञ्चरात्रं गतं तस्य निराहारस्य स्वामिनः॥ 40॥

षष्ठेऽहनि निशाभागे माधवस्य पिता द्विजः।
वृद्धो ज्वरातुरः सोऽपि निराहारः कृशस्तदा॥ 41॥

मूर्च्छामवाप महतीं ज्वरदाहेन दारुणाम्।
तं दृष्ट्वा मूर्च्छितं माता माधवस्य तपस्विनी॥ 42॥

रुरोदोच्चैर्जुहावाथ पुत्रं तं माधवं सती।
श्रुत्वा तज्जननीवाक्यं माधवोऽतीवदुःखितः॥ 43॥

श्रीधरस्वामिनं भक्त्या प्रणिपत्यैवमब्रवीत्।
स्वामिन् पिता मे रोगार्तो मूर्च्छां प्राप्नोति साम्प्रतम्[3]॥ 44॥

माता मे रुदन्ती दीना मामाह्वयति दुःखिता।
त्वामप्यस्वस्थहृदयं पश्याम्यन्योऽथ चात्र वै[4]॥ 45॥

स्थातुं गन्तुं न शक्नोमि तदाज्ञापय मां प्रभो।
इति श्रुत्वा वचस्तस्य माधवस्यातिदुःखितः॥ 46॥

उवाच श्रीधरास्वामी वत्स गच्छाधुनैव भोः।
मदपेक्षयाति [5]विकलः पिता ते मूर्च्छितो गृहे॥ 47॥

रुदन्ती तव माता सा त्वामाह्वयति सुव्रत।
गच्छेति बहुधा तेन प्रेरितो माधवो ययौ॥ 48॥

---

1. तपवासपरो 5 – क।
2. कृपा – ख, ग।
3. प्राप्तो निशाप्रदम् – क।
4. न वात्रवै – क।
5. विह्वलः – ख, ग।

दृष्ट्वा तु पितरं गेहे मूर्च्छितं गतचेतनम्।
रुदन्नुपचचाराथ तत्र सामाजिका जनाः ॥ 49 ॥

समागत्योपविष्टास्ते जहौ मूर्च्छां ततो द्विजः।
अथ तत्रैव समये गतः स्वामि ज्वरो महान्॥ 50 ॥

बुभुक्षातीव संलग्ना बलहानिकरी परा।
शशाक गन्तुं नोत्थाय क्षुधयातीव पीडितः ॥ 51 ॥

मनसा चिन्तयामास लभेयान्नं कथं त्वहम्।
एवं चिन्तयमानस्य स्वामिनो मन्दिरे तदा ॥ 52 ॥

माधवस्यैव रूपेण बिन्दुमाधव आययौ।
तं दृष्ट्वा श्रीधरस्वामी प्राह कोऽसीति चासकृत्॥ 53 ॥

तच्छ्रुत्वा स्वामिनो वाक्यं प्राह माधवरूपधृक्।
शिष्यस्ते माधवोऽहं भो अहो ते कुशली पिता ॥ 54 ॥

इत्युवाच तदा स्वामी ततः स माधवोऽब्रवीत्।
कुशली मे पिता स्वामिन् त्वत्प्रसादान्न संशयः ॥ 55 ॥

भवान्ब्रवीतु किञ्चात्र कर्तव्यं प्रकरोम्यहम्।
श्रुत्वैवं श्रीधरस्वामी प्रोवाचाहं क्षुधातुरः ॥ 56 ॥

वत्सान्नं[1] देहि मे नोचेत्प्राणांस्त्यक्ष्याम्यसंशयम्।
श्रुत्वैतत्स्वामिवचनं शीघ्रं कृत्रिममाधवः ॥ 57 ॥

इच्छयान्नं सुधातुल्यं संपाद्यामलभाजने[2]।
स्वामिसन्निधिमागत्य भोजयामास यत्नतः ॥ 58 ॥

यथेष्टं भोजयित्वा तं ततोच्छिष्टादिकं पुनः।
संमार्ज्य स्वामिनिकटे तस्थौ कृत्रिममाधवः ॥ 59 ॥

अथ प्रभातसमये सुष्वाप निर्भरं गुरु।
माधवाख्यो हरिस्तत्र तूष्णीमन्तर्दधे प्रभुः ॥ 60 ॥

अथ तस्मिन् क्षणे शिष्यो माधवः समुपाययौ।
जजागार तदा स्वामी नमस्कृत्य स माधवः ॥ 61 ॥

---

1. वत्मात्रम् – ख।
2. मन्नं भाजने – क।

उवाच स्वामिनं रात्रौ शरीरं कीदृशं स्थितम्।
तच्छ्रुत्वा श्रीधरस्वामी प्राहेदं भाषसे किमु॥ 62॥
रात्रावन्नादिदानेन[1] जीवितोऽहं त्वया पुनः।
किमिदं प्रोच्यते सर्वमज्ञातमिव सर्वथा॥ 63॥
इत्युक्तो माधवः प्राह स्वामिन्नाहं त्वदन्तिके।
रात्रावगतवानत्र सत्यमेतन्न संशयः॥ 64॥
इति श्रुत्वा ततः स्वामी निश्चिकाय[2] स्वमानसे।
बिन्दुमाधव एवासौ मम रक्षार्थमागतः॥ 65॥
अन्यथा मृतिरेवस्याद्रात्रावन्नं भवेन्न चेत्[3]।
तदारभ्य ततः स्वामी शरीरेण बलेन च॥ 66॥
सम्पुष्टो रोगनिर्मुक्तो विना पथ्यौषधैरपि।
साधवो रात्रिवृत्तान्तं काशीवासिजनाश्च[4] ये॥ 67॥
श्रुत्वा[5] ते स्वामिसेवायां बभूवुर्निरता[6] मुदा।
इत्येवं विदितं लोके श्रीधरस्वामिचेष्टितम्॥ 68॥
श्रुत्वैतत्परमाख्यानं[7] कृष्णे भक्तिं लभेन्नरः॥ 69॥

इति श्रीभगवद्भक्तिमाहात्म्ये श्रीधरस्वामिचरितं नाम द्विचत्वारिंशः सर्गः॥ 42॥

❊ ❊ ❊

1. हावेन – क।
2. निश्चकाय – ख, ग।
3. अन्यथा मतिरेवस्याद्रवन्नं भवेन्न चेत् – ख।
4. काशीवाशी जने शुच – क, ख।
5. संश्रावि – ख, शुश्राव्य – क।
6. निरतो भृदहर्निशम् – क, ख।
7. परमाश्चर्य्यम् – क।

त्रयश्चत्वारिंशः सर्गः

॥ बिल्वमङ्गलचरितम् ॥

अथापरं प्रवक्ष्यामि भक्तमाहात्म्यमुत्तमम्।
यच्छ्रुत्वा सर्वपापेभ्यो मुक्तो भक्तिं लभेन्नरः ॥ 1 ॥

कृष्णवेला[1]नदीतीरे दाक्षिणात्यकुलोद्भवः।
धनवान् रूपसम्पन्नो पित्रा बाल्येऽतिलालितः ॥ 2 ॥

अतोऽसौ वेदविद्यायां शास्त्रे नातिकृतश्रमः।
पितर्य्यपरते[2] विप्रो यथेष्टं तद्धनं स्वयम् ॥ 3 ॥

नर्तकीभ्यो ददौ नित्यं गीतनृत्यरतोऽभवत्।
अथाचिरेण कालेन शुश्राव[3] कस्यचिन्मुखात् ॥ 4 ॥

चिन्तामणिरिति ख्यातां वेश्यां सर्वगुणान्विताम्।
कृष्णायास्तु परेपारे निवसन्तीं कलावतीम् ॥ 5 ॥

जगाम तद्गृहं विप्रो मर्यादां परिहाय सः।
निवारितोऽपि बहुधा बन्धुभिर्ज्ञातिभिस्तथा ॥ 6 ॥

न निवृत्तो बभुवासौ कामी तस्य वंशगतः।
चोरयित्वा प्रतिनिशं नदीमुत्तीर्य सर्वदा ॥ 7 ॥

जगाम तद्गृहं विप्रो रेमे साकं तया पुनः।
एवं गतेषु कालेषु बिल्वमङ्गलशर्मणः ॥ 8 ॥

पितुः क्षयाहः सम्प्राप्तः स्मृत्वा तामब्रवीद्द्विजः।
अये[4] प्राणप्रियेऽद्यैव पितुः श्राद्धदिनं मम ॥ 9 ॥

अतो यामि न चाद्याहमागमिष्यामि तेऽन्तिकम्
इति मे[5] सुमहद्दुःखं मरणादतिरिच्यते ॥ 10 ॥

गच्छेत्युक्तस्तया विप्रो जगाम निजमन्दिरम्।
आमन्त्र्य ब्राह्मणान् विप्रांश्चकार श्राद्धकर्म सः ॥ 11 ॥

भोजयित्वा द्विजान्सम्यक् शेषान्नं बुभुजे स्वयम्।
चिन्तामणिं स्मरन्नित्यं कथञ्चित्तद्दिने द्विजः ॥ 12 ॥

---

1. कृष्णवेता – ख।
2. पितु – ख, ग।
3. शिशुवे – ख।
4. अयं – ख, क।
5. ते – क।
6. स दिनं – ख।

सन्ध्यामतीत्य[1] वै कृष्णातीरे गेहात्समागतः।
दृष्ट्वा तद्वेश्म सस्मार वेश्यां चिन्तामणिं द्विजः॥ 13॥

हा प्रिये! क्वासि? नाद्याहं सस्मितं वीक्षितस्त्वया।
कथमेतां तरिष्यामि रात्रिं वर्षशतोपमाम्॥ 14॥

इत्येवं विलपन्भूयो मनसा बिल्वमङ्गलः।
प्रवृद्धां च नदीं दृष्ट्वा लोकाद्भीतो गृहं ययौ॥ 15॥

गत्वा वै शयनागारे शय्यामुपविश्य सः।
चिन्तयानो न लेभेऽसौ निद्रां ब्राह्मणपुङ्गवः॥ 16॥

चिन्तया जाग्रतस्तस्य निशार्द्धमगमत्तदा।
न शशाक मनो रोद्धुं चिन्तामणिगृहं प्रति॥ 17॥

ततः उत्थाय कामार्तो नदीतीरमुपागतः।
महानिशायां घोरायां पर्य्यन्येऽप्यतिवर्षति[2]॥ 18॥

पश्यन्प्रवृद्धां कृष्णां तां चिन्तयानस्तटे स्थितः।
ददर्श विद्युदुद्योतैः शवमेकं जलेऽन्तिके॥ 19॥

तरन्तं वीचिभिस्तं तु पोतोऽयमित्यमन्यत[3]।
मूढः कामेन तं धृत्वा समारुह्य कथञ्चन॥ 20॥

जगामापरपारं स चिन्तामणिगृहान्तिकम्।
तत्र द्वारं ददर्शासौ कपाटं पिहितं दृढम्॥ 21॥

दृष्ट्वा विस्मयमापन्नः कथमन्तर्व्रजाम्यहम्।
एतस्मिन्नन्तरे तत्र सर्पमेकं तु रज्जुवत्॥ 22॥

बिले मुखं समादाय भित्तौ लम्बं तमैक्षत[4]।
तं दृष्ट्वा लम्बमानं तु सर्पं बन्धधिया[5] द्विजः॥ 23॥

गृहीत्वा भित्ति[6]मारुह्य विवेशान्तर्गृहं [7]द्विजः।
तत्र चिन्तामणिं दृष्ट्वा चिन्तामणिरिवाधमः॥ 24॥

---

1. मुपासितं – ख, क।
2. श्चाति – क।
3. योतोऽयम् – क।
4. ददर्शह – ख, ग।
5. सर्प्पबन्धीधियाद्विज – ख।
6. प्रीति – क।
7. द्रुतम् – ख।

जहर्ष चागतोऽहं भो इत्युवाचान्तिकं गतः।
दृष्ट्वा साहसिकं तं तु चिन्तामणिरुवाच ह॥ 25॥

अहो महानिशायां वै पर्यन्नऽप्यति वर्षति।
प्रवृद्धायां[1] महानद्यां कथमुत्तीर्य्य चागतः॥ 26॥

कपाटपिहितं द्वारं केनोपायेन चागतः।
इति श्रुत्वा वचस्तस्या विल्वमङ्गल आह ताम्॥ 27॥

प्रिये द्वारि महारज्जुर्भित्तौ लग्नास्ति तामहम्।
गृहीत्वात्र समायातो नद्यां पोतो धृतो मया॥ 28॥

तमारुह्येह पारं तु समायातः क्षणेन वै।
इति श्रुत्वा वचस्तस्य प्राह चिन्तामणिर्द्विजम्॥ 29॥

अहो दर्शय मेऽभीतपोतं येन त्वमागतः।
इत्युक्तः स तया सार्द्धं द्वारदेशे समागतः॥ 30॥

दर्शयामास तं सर्पं प्रिये सैषा तु वह्निका।
ततश्चिन्तामणिः प्राह मूर्ख सर्पो न वह्निका॥ 31॥

करतालादिभिः सर्पं[2] बहिर्निष्काश्य तं पुनः।
प्राह क्व ते स पोतोऽस्ति तं दर्शय मामधुना॥ 32॥

ततो गृहीत्वा तां कृष्णातीरेऽसौ बिल्वमङ्गलः।
तं शवं दर्शयामास पोतोऽयं येन चागतः॥ 33॥

तं दृष्ट्वा तु शवं वेश्या विप्रं प्राहातिकोपना।
नायं पोतः शवः किन्तु त्वं च कामेन मोहितः॥ 34॥

हिताहितं न जानासि दिष्ट्या जीवसि केवलम्।
अहो ब्रह्मकुलीनस्त्वं ब्राह्मणैः संस्कृतः पुनः॥ 35॥

साक्षरोऽसि[3] न मूर्खस्त्वं महामूर्ख इवाधुना[4]।
पितृश्राद्धदिनेऽप्येवं यत्करोषि जुगुप्सितम्॥ 36॥

क्वाहं वेश्या दुराचारा क्व त्वं ब्रह्मकुलोद्भवः।
अहो दैवगतिश्चात्र यन्मामेवमुपागतः॥ 37॥

---

1. प्रविदायां – ख।
2. सा च – ख।
3. शास्त्रज्ञसि – क।
4. भूखैरिवाधुना – ख, ग।

धिक् त्वां द्विजाधमं[1] लोके निन्दितं साधुबन्धुभिः ।
परित्यज्य निजं धर्मं यत्कुमार्गरतोऽस्यलम्[2] ॥ 38 ॥

अहो यथा मयि प्रीतिस्तवेयं निश्चला द्विज ।
एवं चेद्भाग्यतः कृष्णे परमात्मनि केशवे ॥ 39 ॥

मतिस्ते यदि संलग्ना तदा धन्यो[3] भविष्यसि ।
किं वृथा मम भोगार्थी प्राणोपेक्षां समाचरन् ॥ 40 ॥

किमद्यापि समायातो मद्गृहं श्राद्धवासरे ।
पितृश्राद्धदिने पत्न्या यो द्विजो मैथुनी भवेत् ॥ 41 ॥

रौरवं नरकं भुक्त्वा जायते ग्रामशूकरः ।
इत्येवं विप्रवदनाच्छ्रुतं मे द्विजपुङ्गव ॥ 42 ॥

त्वं तु सर्वं परित्यज्य मया रन्तुमिहेच्छसि ।
धिक् त्वामतो द्विजातीनां कलङ्कोऽसि न संशयः ॥ 43 ॥

त्वया पुत्रेण ते माता पिता वा न च पुत्रिणौ ।
इत्येवं भर्त्सितो विप्रः कृष्णातीरे महानिशि ॥ 44 ॥

प्रबुबोध तदा विप्रोऽसौ न्यवर्तत दुर्नयात्[4] ॥ 45 ॥

अहं तु रजनीमेतामुषित्वा प्रातरेव हि ।
यथारुचि गमिष्यामि परित्यज्य गृहं धनम् ॥ 46 ॥

इति श्रुत्वा वचस्तस्य वेश्या चिन्तामणिः पुनः ।
बिल्वमङ्गलमाहेदं तव साहसदर्शनात् ॥ 47 ॥

मोहादुक्तवती चास्मि क्षमस्वागच्छ मे गृहम् ।
श्रुत्वैवं वचनं तस्या उवाच बिल्वमङ्गलः ॥ 48 ॥

अतः परं न वक्तव्यं किञ्चिदेवमपि त्वया ।
मम सद्बुद्धिदानेन श्रीकृष्णस्योपदेशतः ॥ 49 ॥

गुरुरेवास्ति भवती मातृतुल्या न संशयः ।
प्रणमाम्येव[5] चरणौ न किञ्चिद्वक्तुमर्हसि ॥। 50 ॥

1. त्वादृशधमम् – क।
2. स्थलम् – क, ख।
3. सत्यो – क।
4. कर्माद्यापि – ख।
5. दुर्जयात् – ख।

3rd Proof/05-04-08/sansthan/babu

इत्युक्त्वा तां परित्यज्य ययौ स्वैरगतिर्द्विजः।
अनुवव्राज तं वेश्या तिष्ठ तिष्ठेति चाब्रवीत्॥ 51॥

न तस्थौ च यदा[1] विप्रः तदा वेश्या न्यवर्तत।
आजगाम गृहं रात्रौ चिन्तयन्ती द्विजं मुहुः॥ 52॥

ब्रह्मणोऽपि ततो दूरं गत्वा तरुतले क्वचित्।
नीत्वा रात्रिं पुनः प्रातर्ययौ स्वैरगतिर्द्विजः॥ 53॥

इति श्रीभगवद्भक्तिमाहात्म्ये बिल्वमङ्गलचरितं नाम त्रयश्चत्वारिंशः सर्गः॥ 43॥

❊ ❊ ❊

चतुश्चत्वारिंशः सर्गः

॥ बिल्वमङ्गलचरितम्॥

चिन्तयामास चैकाकी पथि गच्छन् द्विजः स तु।
कं यामि शरणं चाहं कथं यास्यामि सङ्गतिम्[2]॥ 1॥

जन्मारभ्य[3] शुभं कर्म नाकार्षं क्वचिदप्यहम्।
कथं भजामि श्रीकृष्णं सर्वपापहरं हरिम्॥ 2॥

एवं चिन्तापरो विप्रः पश्चात्तापेन दुःखितः।
वृक्षमूलेऽपि विश्रान्तः क्षुत्क्षामः श्रमपीडितः॥ 3॥

ददर्श तत्र चायातं[4] पथिकं ब्राह्मणं द्विजम्।
सोऽपि तत्र समागत्य तस्थौ विश्रामकाङ्क्षया॥ 4॥

स्थित्वा मुहूर्तं प्रयच्छ[5] पथिको बिल्वमङ्गलम्।
कस्त्वं चिन्तापरो विप्र कस्मादिह समागतः॥ 5॥

ब्रह्महत्यामिव[6] पुनः कृत्वा चिन्तयसीव किम्।
इत्युक्तवन्तं पथिकं प्राह श्रीबिल्वमङ्गलः॥ 6॥

जन्मतः सकलं वृत्तं[7] वेश्यावाक्यावधि स्वकम्।
पुनः प्राह गुरुं तन्तु कञ्चिदन्वेषयाम्यहम्॥ 7॥

---

1. परगमाम्योप – क।
2. सद्गतिम् – क।
3. जन्मशून्यशुभं – ख, ग।
4. स्वपतं – ख।
5. पप्रक्ष।
6. त्यागस्व च पुनः – क।
7. वृजं – क।

यो हि मन्त्रोपदेशेन ममार्थिं शमयिष्यति।
इति श्रुत्वा वचस्तस्य पथिकः प्राह तं द्विजम्॥ 8॥

बिल्वमङ्गल मामैषीः कृष्णातीरेऽविदूरतः।
नाम्ना सोमगिरिश्चास्ति तपस्वीब्राह्मणान्वयः[1]॥ 9॥

वानप्रस्थेन विधिना वने तिष्ठति संयमी।
शान्तो दान्तो दयायुक्तः सर्वभूतसुहृत्तमः॥ 10॥

तमेव शरणं गच्छ स ते मन्त्रं प्रदास्यति।
तन्मन्त्रमात्रदानेन कृतार्थस्त्वं भविष्यसि॥ 11॥

इति श्रुत्वा वचस्तस्य पथिकस्य महात्मनः।
नमस्कृत्य च तां विप्रं प्रययौ बिल्वमङ्गलः॥ 12॥

यत्र सोमगिरिर्नाम तपस्वी तत्र आस्थितः।
तत्र सोमगिरिं दृष्ट्वा दण्डवत्प्रणिपत्य सः॥ 13॥

कृताञ्जलिस्तस्थौ स्थाणुवद्बिल्वमङ्गलः।
दृष्ट्वाग्रे तं तु तिष्ठन्तं प्राह सोमगिरिः स्वयम्॥ 14॥

कोऽसि कस्मादिहायातः किमर्थं चात्र तिष्ठसि।
कथमाशु न चेन्मां त्वं मुहूर्तं स्थातुमर्हसि॥ 15॥

इत्युक्तः प्रणिपत्याह भक्त्या श्रीबिल्वमङ्गलः।
जन्मादिवेश्यावाक्यान्तं पुनः स्वोद्धारणाय च॥ 16॥

प्रार्थयित्वा बभूवाथ तूष्णीं स बिल्वमङ्गलः।
ततः सोमगिरिः प्राह निवसात्र गृहे सुखम्॥ 17॥

इदानीमेव ते मन्त्रं दास्यामि हितकारकम्।
इत्युक्त्वा मनसा सोमगिरिश्चिन्तापरोऽभवत्॥ 18॥

अस्मै किमुपदेक्ष्यामि येनायं सुकृती भवेत्।
आजन्मपातकी चायं विप्रधर्मबहिर्गतः॥ 19॥

इति चिन्तयामानस्य हृदि सोमगिरेस्तदा।
प्रादुर्बभूवतुः श्लोकौ[2] केनाप्युक्तावति स्फुटम्॥ 20॥

---

1. ह्वयः – क।
2. लौकौ – ख।

कृष्णेति मङ्गलं नाम यस्य वाचि[1] प्रवर्तते।
भस्मीभूतास्तु तस्याशु[2] महापातककोटयः ॥ 21 ॥

दरिद्रो वा रुजार्तो[3] वा ग्रहार्तो वापि यो नरः।
श्रीकृष्णेति जपन्नाम सुखी भवति निश्चितम् ॥ 22 ॥

इति सोमगिरिर्लब्ध्वा मनसा चिन्तितं परम्।
सद्यो जगाम तेजस्वी बिल्वमङ्गलसन्निधौ ॥ 23 ॥

प्राहागच्छ मया सार्द्धं कृष्णातीरे द्विजार्भक।
तत्राहं ते प्रदास्यामि मन्त्रं सर्वार्थसाधकम् ॥ 24 ॥

तत्र गत्वा नदीतीरं स्नात्वा स बिल्वमङ्गलः।
गुरुसन्निधिमागत्य तस्थौ तत्र कृताञ्जलिः ॥ 25 ॥

विधिनास्मै ददौ मन्त्रं श्रीकृष्णेत्यक्षरत्रयम्।
मूर्ध्नि दत्त्वा करं दक्षे कर्णे[4] मन्त्रमुवाच ह ॥ 26 ॥

तत्करस्पर्शतो मन्त्रमाहात्म्याद्बिल्वमङ्गलः।
विधूतपापस्तत्काले जज्वालाग्निरिव द्विजः ॥ 27 ॥

दण्डवत्प्रणिपत्याह गुरुसोमगिरिं वचः।
कृतार्थोऽहं कृतार्थोऽहं किं करोमिति शाधि माम् ॥ 28 ॥

ततः सोमगिरिः प्राह सम्यगाचारवान्भव।
वसात्रान्यत्र वा क्वापि जपन्मन्त्रं विमोक्षसे ॥ 29 ॥

इत्युक्तो गुरुणा बिल्वमङ्गलोऽतीव हर्षितः[5]।
गुरुसेवापरो नित्यमुषित्वा गुरुसन्निधौ ॥ 30 ॥

षण्मासाभ्यन्तरे चित्रं महाकविरभूद्द्विजः।
सर्वशास्त्रार्थतत्त्वज्ञो विरक्तो विषयेषु[6] वै ॥ 31 ॥

ततो गुरुमनुज्ञाप्य श्रीकृष्णदर्शनेच्छया।
वृन्दावनं जिगमिषुः प्रतस्थे बिल्वमङ्गलः ॥ 32 ॥

अथागच्छन्ततो विप्रो नर्मदातीरमागतः।
माहिष्मन्तीपुरीं तत्र ददर्शातिमनोहराम्। ॥ 33 ॥

---

1. वाचा – क।
2. भवति राजेद्र – क।
3. वाहूर्जातो – क।
4. रक्षकेर्णे – ख, ग।
5. मङ्गलः – ख, ग।
6. विरक्तो विषमेषु –क।

उवास कतिचिन्मासांस्तत्र कृष्णमनुस्मरन्।
एकस्मिन् दिवसे तत्र महाश्चर्य्यमभूदहो ॥ 34 ॥

बिल्वमङ्गलभक्तेस्तु माहात्म्यं कथयाम्यहम्।
एकदा नर्मदातीरे ययौ स्नातुं द्विजोत्तमः ॥ 35 ॥

ददर्श तत्र रुदन्तीं ब्राह्मणीं विधवां सतीम्।
क्रोडे बालकमादाय मृतं कर्मविपाकतः ॥ 36 ॥

तां तथा रुदन्तीं दृष्ट्वा दयालुर्बिल्वमङ्गलः।
उवाचास्यै च किं जातं कस्तवायं मृतः शिशुः ॥ 37 ॥

इति श्रुत्वा वचस्तस्य प्रोवाच रुदन्ती सती।
नाथ ब्रह्मकुले जाता ब्राह्मणेन विवाहिता ॥ 38 ॥

बालमेकं समुत्पाद्य कर्मणा मे मृतः पतिः।
तदारभ्य शिशुं चैनं पश्यन्ती धैर्यमास्थिता ॥ 39 ॥

व्यतीयाय[1] कियन्तं तु कालमस्मिन्मृते शिशौ[2]।
किं करोमि क्व गच्छामि पितृमातृविवर्जिता ॥ 40 ॥

साहानेनाथ बालेन प्रवेक्ष्यामि[3] च नर्मदाम्।
नान्यां गतिं प्रपश्यामि[4] त्वां नमामि पितुः समम् ॥ 41 ॥

इति श्रुत्वा वचस्तस्याः कृपया बिल्वमङ्गलः।
समागत्य समीपे तं बालं कृत्वा निजाग्रतः ॥ 42 ॥

सस्मार भगवन्तं स श्रीकृष्णं बिल्वमङ्गलः।
तुष्यत्वस्याः कृते स्तोत्रैर्श्रीकृष्णकरुणार्द्रधीः ॥ 43 ॥

प्रार्थ्ययामास मनसा जीवयाशु शिशुं विभो।
न चेदहं साहनेन मरिष्यामि न संशयः ॥ 44 ॥[5]

एवं निश्चितचित्तं तं ज्ञात्वा भक्तं जनार्दनः।
भक्तिभाववशीभूतो जीवयामास बालकम् ॥ 45 ॥

जीवन्तं बालकं दृष्ट्वा ब्राह्मणी हर्षसंयुता।
नमश्चकार बहुधा द्विजं पितृसमं सती ॥ 46 ॥

---

1. व्यतीताय – ख, ग।
2. पतिः – क।
3. प्रविश्यामि – ख।
4. प्रवक्ष्यामि – ख, ग।
5. क मध्ये लुप्तः पाठः।

सुतमादाय विप्रोऽपि ददौ तस्यै प्रहृष्टवान्।
पश्यतां सर्वलोकानां तदा श्रीबिल्वमङ्गलः ॥ 47 ॥

स्नात्वा गत्वा स्वभवनं पूजयामास केशवम्।
तदारभ्य द्विजस्तत्र देववद्वन्दितो [1]जनैः ॥ 48 ॥

उवास कतिचित्तत्र दिनानि बिल्वमङ्गलः ॥ 49 ॥

इति श्रीभगवद्भक्तिमाहात्म्ये बिल्वमङ्गलचरितं नाम चतुश्चत्वारिंशः सर्गः ॥ 44 ॥

❊ ❊ ❊

पञ्चचत्वारिंशः सर्गः

॥ बिल्वमङ्गलचरितम् ॥

विरक्तो निरपेक्षोऽसौ पौरैरावेष्टितो जनैः ।
निजकामाप्तये मत्वा महाविघ्नमिव [2]द्विजः ॥ 1 ॥

उत्थाय चलितो द्रष्टुं कृष्णं वृन्दावनं द्विजः ।
पथि गच्छन् ददर्शाथ वेश्यां पत्नीं मनोहराम् ॥ 2 ॥

नर्मदायां कृतस्नानां गच्छन्तीं निजमन्दिरम्।
सर्वाङ्गसुन्दरीं रामां पूर्णचन्द्रनिभाननाम् ॥ 3 ॥

खेलत्खञ्जनयुग्माभनेत्रद्वन्दमनोहराम्।
नातिपीनस्तनद्वन्द्वां[3] तन्वीं तां तनुमध्यमाम् ॥ 4 ॥

दृष्ट्वा तां चपलापाङ्गीं मोहितां बिल्वमङ्गलः ।
तत्पृष्ठतोऽतिचपलः श्लिष्यान्निव जगाम ह ॥ 5 ॥

आयान्तं तं द्विजं दृष्ट्वा कामुकं पृष्टतः सती।
द्रुतं गत्या ययौ गेहं भर्त्तारमिदमब्रवीत् ॥ 6 ॥

भर्ता[4] तां प्राह धन्यासि तिष्ठात्रैव ममाज्ञया।
आगमिष्यति चेत्स्वामी तस्मै देहि यदीप्सितम्[5] ॥ 7 ॥

---

1. नरैः – क।
2. निकामाशं मत्वा महोद्विग्रो भवद्विजः – ख।
3. युग्मां – ख, ग।
4. भर्तृणां – क।
5 यदीक्षितम् – ख।

पतिव्रताव्रतत्यागो मास्तु ते मदनुज्ञया।
एवं कथयतस्तत्र दम्पत्यो द्वारि देशतः ॥ 8 ॥

बिल्वमङ्गल आगत्य तूष्णीं तस्थौ ततो वणिक्।
दण्डवत्प्रणिपत्याह भगवन्नेहि ते गृहम् ॥ 9 ॥

इयं दासी च दासोऽहं यथेच्छसि कुरु प्रभो।
अद्य[1] मे सफलं जन्म भवदागमनेन च ॥ 10 ॥

इति श्रुत्वा वचस्तस्य वणिजं बिल्वमङ्गलः।
प्रशशंस तदायं[2] तत्पत्नीं प्राह हर्षितः ॥ 11 ॥

आगच्छात्रगृहे सौम्ये किञ्चिद्वक्तव्यमस्ति मे।
इत्युक्ता साथ भर्त्रापि निर्युक्ता तद्गृहे ययौ ॥ 12 ॥

एकान्ते तां प्रणम्याह भक्त्या श्रीबिल्वमङ्गलः।
सूचीद्वयं समादाय शीघ्रं मे देहि सुव्रते ॥ 13 ॥

इत्युक्ता सातिशीघ्रं तु ददौ सूचीद्वयं[3] सती।
नीत्वा कराभ्यां ते शून्ये[4] स्फोटयामास चक्षुषी[5] ॥ 14 ॥

स्वकीये द्विजशार्दूलो जगाम तद्गृहाद्बहिः।
स्फोटिताक्षं वहियान्तं रुधिराप्लुतवक्षसम् ॥ 15 ॥

दृष्ट्वा तौ विललापार्तौ हाहेति वैश्यदम्पती।
पृष्ठतो जग्मतुस्तौ तु स तौ प्राहात्र तिष्ठ तम् ॥ 16 ॥

न युवामपराधोऽस्ति प्रसन्नो युवयोरहम्।
नेत्रदुर्जयदोषाच्चावशोऽहं काममोहितः ॥ 17 ॥

स्प्रष्टुं धावन्निमां साध्वीं तस्मात्ते स्फोटिते मया।
यथेष्टं यामि चातोऽहं भवतां[6] सुखिनौ युवाम् ॥ 18 ॥

इत्युक्त्वा प्रययौ विप्रस्ताभ्यां रुद्धोऽपि यत्नतः।
एवं कतिपयैर्वर्षैर्जगाम मथुरापुरीम् ॥ 19 ॥

तत्र गत्वाथ कालिन्द्यां स्नात्वा स्पृष्ट्वाथ केशवम्।
कालिन्दीतीरमागत्य तस्थौ क्षुत्परिपीडितः ॥ 20 ॥

---

1. अयं – क।
2. इदानीं – क।
3. शुचीद्वयम् – ख।
4. शून्यौ – ख।
5. चाक्षिणी – ख, ग।
6. भवन्तं – ख।

को दास्यति कथं यामि जीवने नाथ किं फलम्।
इयं हि मथुरा मोक्षप्रदा श्रीकृष्ण[1]जन्मभूः ॥ 21 ॥

अस्यां यदि पतेद्देह[2] किञ्चातः परमुत्तमम्।
इति सञ्चिन्त्य मनसा क्षुधार्तः स च[3] तस्थिवान्॥ 22 ॥

एवं तत्रोपविष्टस्य यमुनातीरमन्दिरे।
अहोरात्रद्वयं जातं पिबतो[4] यमुनोदकम्॥ 23 ॥

तृतीयेऽह्नि निशीथिन्यां [5]भगवान्भक्तवत्सलः।
द्विजवेषं समादाय गृहीत्वान्नं सुदुर्लभम्॥ 24 ॥

बिल्वमङ्गलविप्राय प्राहोत्तिष्ठ द्विजोत्तम।
बुभुक्षितं त्वां ज्ञात्वाहमन्नं[6] नीत्वा समागतः ॥ 25 ॥

उत्तिष्ठ भुंक्ष्व पानीयमिदं पिब सुखी भव।
बिल्वमङ्गल इत्युक्तः कृष्णेन द्विजरूपिणा॥ 26 ॥

प्राहान्धोऽहं न पश्यामि समागच्छ ममान्तिकम्।
हस्ते गृहीत्वा देह्यन्नं कृपां कुरु मम प्रभो॥ 27 ॥

इत्युक्तो द्विजरूपः स बिल्वमङ्गलसन्निधिम्।
समागत्य ददावन्नं हस्तं धृत्वा स्वपाणिना॥ 28 ॥

स्पर्शवैशिष्ट्यमालक्ष्य गाढं जग्राह तं कविः।
कोऽसि सत्यं कथय मे नो चेत्त्वां न त्यजाम्यहम्॥ 29 ॥

इत्युक्तः स्वकरं देवो बलेनाच्छिद्य तत्करात्।
तस्थौ समीपतस्तूष्णीं ततः स बिल्वमङ्गलः ॥ 30 ॥

प्राह ज्ञातोऽसि बलतो जित्वा मां [7]यद्बहिर्गतः।
हृदयाद्वा यदि गच्छेत्ततो जेतासि मे प्रभो॥ 31 ॥

इत्युक्तः पुण्डरीकाक्षः प्रसन्नो बिल्वमङ्गलम्।
प्राह ज्ञातस्त्वया व्रिपं त्वं मे प्रियतरो ह्यसि[8] ॥ 32 ॥

---

1. श्रीकृष्णय नमः – क।
2. यद्दियते देह – क।
3. तोंऽतिमनस्थिवान् – क।
4. पितत्वो – क।
5. भक्तिवत्सलः – ख।
6. ज्ञात्वान्नं – ख, ग।
7. मापवहिर्गतः – क।
8. प्रियतमात्यसि – क।

पुत्रं मित्रं कलत्रं च धनं गेहादिकं च यत्।
त्वं परित्यज्य लोकेऽस्मिन्मामेकं शरणं गतः ॥ 33 ॥

अतस्त्वत्सदृशो नास्ति जगत्यां मम कश्चन।
बिल्वमङ्गल सत्यं ते प्रतिजाने शृणुष्व तत् ॥ 34 ॥

न मे भक्तसमः कश्चिन्न श्रीरपि तथा प्रिया।
नाकर्तव्यं किमप्यस्ति भक्तार्थं बिल्वमङ्गल ॥ 35 ॥

पश्य गोपकुले जन्म गोपोच्छिष्टादि[1]भोजनम्।
कुब्जादास्यं सखित्वं च फाल्गुनस्य[2] च भृत्यता ॥ 36 ॥

गणिका[3] गजगृध्रादिम्लेच्छाजामिलमित्रता।
एवमादीनि कर्माणि ममेहत्वं[4] विचारय ॥ 37 ॥

अतस्त्वं मे प्रियो ब्रह्मन्नेत्रे प्राप्नुहि सुन्दरे।
इदं विप्रस्य रूपं मे पश्यात्रैव मम[5] द्विज ॥ 38 ॥

आवयोः सख्यमेतेन रूपेणास्तु निरन्तरम्।
अन्ते[6] दिव्यं तु ते चक्षुर्दास्याम्यहमनुत्तमम् ॥ 39 ॥

ततो द्रक्ष्यसि मद्रूपं[7] योगिध्येयं न संशयः।
इत्युक्तश्चक्षुषीं प्राप्य प्रहृष्टो बिल्वमङ्गलः ॥ 40 ॥

ददर्श द्विजवेशं तं श्रीकृष्णं परमेश्वरम्।
आनन्दाश्रुपरिक्लिन्नो[8] पपात हरिपादयोः ॥ 41 ॥

उत्थापितो मूर्ध्नि करं दत्त्वा कृष्णेन स द्विजः।
पुनः प्राहात्र निवस सुखी त्वं बिल्वमङ्गल ॥ 42 ॥

स्मृतोऽहं तव सान्निध्यमागमिष्यामि तत्क्षणात्।
अन्नं पानीयमेव त्वं प्रत्यहं प्राप्यसि द्विज ॥ 43 ॥

इत्युक्त्वान्तर्दधे कृष्णो द्विजरूपधरो हरिः।
बुभुजेऽन्नं क्षुधाप्रासं तत्काले बिल्वमङ्गलः ॥ 44 ॥

---

1. यो यो – क।
2. फणिणस्त्वं – क।
3. गणका – ख।
4. मम हेतु – ख, ग।
5. वस – ख, ग।
6. अतो – ख।
7. मे रूपं – ख।
8. परित्यक्तन्नो – ख।

भुक्त्वान्नमुदकं पीत्वा तद्रूपं हृदि चिन्तयन्।
शिश्ये स यमुनातीरे सुखेन[1] बिल्वमङ्गलः ॥ 45 ॥

प्रभाते पुनरुत्थाय चिन्तयामास स द्विजः।
किमयं स्वप्न अहोस्विद्भ्रमोऽयं नात्र संशयः ॥ 46 ॥

यत्कृष्णेन[2] च सम्वादो मनुष्येणैव मेऽभवत्[3]।
एवं चिन्तापरो [4]विप्रः आश्चर्याद् भ्रान्तिमानिव ॥ 47 ॥

अन्तमर्माः शौचकर्मस्नानादिकमथाचरत्[5]।
अथैकान्ते कुटीमध्ये सस्मारोक्तं वचो हरेः ॥ 48 ॥

स्मृतोऽहमागमिष्यामीत्युक्तमस्ति करोमि तत्।
आगमिष्यति चेत्सर्वं सत्यमेव न संशयः ॥ 49 ॥

उपविश्य ततो नेत्रे निमील्य द्विजरूपिणम्।
रात्रौ दृष्टं यथा[6] कृष्णं दध्यौ स बिल्वमङ्गलः ॥ 50 ॥

तत्काले भगवन्कृष्णस्तद्रूपेणाजगाम ह।
उवाचाहमिहायातः किमर्थं चिन्तितस्त्वया ॥ 51 ॥

इत्युक्तो विजहौ ध्यानं दृष्ट्वा तं रात्रिवत्स्थितम्।
प्रणनामातिहृष्टात्मा क्षमस्वेति कृताञ्जलिः ॥ 52 ॥

उक्त्वा हृदयसन्देहं विज्ञाप्याधोमुखः स्थितः।
उवाच तं पुनः कृष्णः सन्देहं मा वृथा मयि ॥ 53 ॥

सर्वदैवं तव स्नेहात्त्वत्सन्निधिकरोम्यहम्।
इत्युक्त्वा स गतः कृष्णः चिन्तां तत्याज स द्विजः ॥ 54 ॥

वसन्वृन्दावने कृष्णं चिन्तयानो दिवानिशम्।
मेने कृतार्थमात्मानं सर्वभूतेषु कृष्णधीः ॥ 55 ॥

इति श्रीभगवद्भक्तिमाहात्म्ये बिल्वमङ्गलचरितं नाम पञ्चचत्वारिंशः सर्गः ॥ 45 ॥

❊ ❊ ❊

---

1. मन्दिरे – ख, ग।
2. यं – क।
3. नवमेरुत्वभूत् – क।
4. भूत्वा – क।
5. चरेत् – क।
6. यथा – क।

षट्चत्वारिंशः सर्गः

॥ बिल्वमङ्गलचिन्तामणिचरितम् ॥

अथैकस्मिन् दिने कृष्णसन्निधौ बिल्वमङ्गलः ।
स्मृत्वा चिन्तामणिं वेश्यामात्मवृत्तानि सर्वशः ॥ 1 ॥

कथयामास कृष्णाय वेश्यावाक्योपदेशतः ।
फलमेतादृशं लब्धं दुर्लभं देवदानवैः ॥ 2 ॥

इत्युक्तः कविना कृष्णः स्मित्वोवाच द्विजं प्रति ।
आगमिष्यति साप्यत्रेत्युक्त्वान्यत्र जगाम ह ॥ 3 ॥

अथ चिन्तामणिर्वेश्या विरक्ते बिल्वमङ्गले ।
तत्याज निजवृत्तिं सा विप्रवैराग्यदुःखिता ॥ 4 ॥

अहो मद्वाक्यतो विप्रः सर्वं त्यक्त्वा धनादिकम् ।
श्रीकृष्णं शरणं यातोऽहन्तु लोकानुरागिणी ॥ 5 ॥

अहो वेश्या पुरा काचित्पाठयन्ती शुकं स्वकम् ।
रामनाम ततो याता विष्णोर्लोकमिति स्थितिः ॥ 6 ॥

ततोऽहमपि कृष्णेति नाम्नैव[1] व्यभिचारिणी ।
विमोक्ष्यामि न सन्देहो नाम वै तारकं कलौ ॥ 7 ॥

एवं सञ्चिचन्त्य मनसा वेश्या सा निजमन्दिरम् ।
समागत्य विरक्तेव तस्थौ श्रीकृष्णतत्परा ॥ 8 ॥

स्वजनैः प्रार्थ्यमानापि नानुरक्ता ह्युवाच तान् ।
भवद्भिः क्रियतां सर्वं[2] गृहकृत्यं न संशयः ॥ 9 ॥

अद्यारभ्य मया त्यक्ता निजवृत्तिर्न संशयः ।
वेश्याहं वासुदेवस्य दासी तस्यैव नान्यथा ॥ 10 ॥

प्रीणयन्ती तमेवाहं तरिष्यामि भवार्णवम् ।
इत्युक्त्वा निजबन्धुभ्यश्चिन्तामणिरुदारधीः[3] ॥ 11 ॥

विसस्मार गृहं मित्रं धनपुत्रादिकं तथा ।
गायन्ती कृष्णचरितं श्रीकृष्णप्रतिमाग्रतः ॥ 12 ॥

---

1. नाषैदाप्य चकारिणी – क, ख ।
2. सर्वे – क ।
3. रुदारुधीः – ख, ग ।

नृत्यन्ती तन्मना भूत्वा कदाचित्किञ्चिदश्रुणी[1]।
एवं गतेषु कालेषु कृष्णातीरनिवासिनः ॥ 13 ॥
जना निजगृहात्सर्वे निर्गत्यैकत्रसङ्गताः।
मथुरां [2]गन्तुमुद्युक्ताः कृष्णदर्शनमानसाः ॥ 14 ॥
तेषां समीपमागत्य चिन्तामणिरुवाच तान्।
अहोऽहमपि गच्छामि भवद्भिः साकमेव हि ॥ 15 ॥
मथुरां यदि कृष्णो मे प्रसन्नो भगवान्भवेत्।
आगच्छेति च तैरुक्ता समागत्य ततस्तु सा ॥ 16 ॥
गायन्ती कृष्णचरितं तैः साकं मथुरां ययौ।
तत्र स्नात्वाथ कालिन्द्यां वीणामङ्के निधाय सा ॥ 17 ॥
प्रणम्य केशवं देवं गायन्ती प्रणनर्त[3] ह।
आनन्दजाश्रुसंसिक्तस्तनयुग्मां कलावतीम् ॥ 18 ॥
नृत्यन्तीं ददृशुः सर्वे साधु साध्विति वादिनः।
अथ केशवनैवेद्यं प्रसादं कोऽपि पूजकः ॥ 19 ॥
चिरकालोत्तरं तस्यै ददौ सा शिरसाग्रहीत्।
गृहीत्वापि ननर्त्तासौ न ततो विरराम सा ॥ 20 ॥
अथ मध्याह्नसमयं कपाटं केशवालये।
दत्त्वा स्वमालयं सर्वे जग्मुस्ते[4] पूजका जनाः ॥ 21 ॥
ततश्चिन्तामणिरपि निवृत्ता गीतनृत्यतः।
यमुनातीरमागत्य बुभुजे पूजार्पितम्[5] ॥ 22 ॥
तावन्मात्रं तु भुक्त्वा सा पीत्वा च यमुनोदकम्।
आगच्छन्ती ददर्शाथ बिल्वमङ्गलमन्दिरम् ॥ 23 ॥
तत्रोपविष्टं ध्यायन्तं ददर्श बिल्वमङ्गलम्।
तप्तहाटकवर्णाभं साक्षात्सूर्यमिवोदितम् ॥ 24 ॥
तं दृष्ट्वा तादृशं वेश्या द्वारसम्मुखतो बहिः।
तस्थौ क्षणान्तरे तां तु ददर्श बिल्वमङ्गलः ॥ 25 ॥
उत्थाय बहिरागत्य प्रणनाम च तां द्विजः।
तवोपदेशादेवाहं[6] जीवन्मुक्तोऽभवं पुनः ॥ 26 ॥

---

1. कश्चिदाश्रमी – ख।
2. स मुक्ताः – क।
3. प्रननर्त्त – क।
4. ख मध्ये लुप्तः पाठः।
5. पृजकार्चितम्
6. त्वतोपदेशद् – ख, ग।

दण्डवत्प्रणिपत्याह चिन्तामणिरपि द्विजम्।
त्वत्संसर्गवशाद्ब्रह्मन् गणिकावृत्तिकारिणी[1] ॥ 27 ॥
विमुक्ता सर्वदोषेभ्यः श्रीकृष्णं शरणं गता।
एवं परस्परं तौ तु स्तुवन्तो भक्तिसंयुतौ ॥ 28 ॥
तस्थतुश्चाङ्गणे[2] हृष्टौ वेश्या च बिल्वमङ्गलः।
बिल्वमङ्गल उत्थाय निजभोजनमागतम् ॥ 29 ॥
गृहादानीय पानीयं ददौ तस्यै द्विजोत्तमः।
भुक्त्वा तदन्नं[3] भक्त्या सा पीत्वा पानीयमुत्तमम् ॥ 30 ॥
तस्थौ विवक्षुं तां वेश्यामुवाच बिल्वमङ्गलः।
अहो धन्यासि यस्यास्ते श्रीकृष्णे प्रीतिरीदृशी ॥ 31 ॥
अतः परं क्वचिद्देशे निवसान्यत्र[4] वेश्मनि।
इति श्रुत्वाथ तां भक्त्या प्राह चिन्तामणिर्द्विजम् ॥ 32 ॥
एवमेव विवक्षुस्त्वामस्मि नात्र[5] वसाम्यहम्।
आज्ञापय क्वचिद्यामि कालिन्दीतीरवेश्मनि ॥ 33 ॥
इत्युक्ता प्रययौ वेश्या गृहे क्वापि स्थिताभवत्।
ध्यायन्ती हृदि गोविन्दुं गायन्ती तद्गुणं मुहुः ॥ 34 ॥
एवमुत्साहतो नीतं दिनद्वयमभोजनम्।
तृतीयदिवसे तस्यै अन्नदानाय केशवः ॥ 35 ॥
स्वप्ने नियुक्तवान्कञ्चिन्माधुरं पूजकं द्विजम्।
तदाप्यामृतप्रायमन्नं साप्यलभत्सुखम् ॥ 36 ॥
एवं तौ मथुरायां वै कृतार्थौ मरणावधि।
अन्ते[6] गोविन्दसायुज्यं गत्वा सुखमवापतुः ॥ 37 ॥
इत्येतत्कथितं[7] सर्वं बिल्वमङ्गलचेष्टितम्।
चिन्तामणेस्तु वेश्याया भक्तिमाहात्म्यमुत्तमम् ॥ 38 ॥
किमसाध्यं नृणां भक्त्या नित्यतुष्टे जनार्दने।
तस्माद्भक्तिः सदा कार्या विद्वद्भिः सर्वसाधिनी ॥ 39 ॥

1. गणिकाऽप्यद्य – ख, क।
2. तुवांगणै – क।
3. तमन्नं भुक्त्वा – ख, ग।
4. अप्यत्र।
5. स्मात – ख।
6. अन्त्ये – ख।
7. स्थितं – क।

न जातिधर्मो न च वर्णधर्मो न यज्ञधर्मो न च योगधर्मः ।
हरेः प्रसादाय न कारणं तथा यथेह लोके हरिभक्तिरस्ति[1] ॥ 40 ॥

इति श्रीभगवद्भक्तिमाहात्म्ये बिल्वमङ्गलचिन्तामाणिचरितं नाम
षट्चत्वारिंशः सर्गः ॥ 46 ॥

❊ ❊ ❊

सप्तचत्वारिंशः सर्गः

॥ विष्णुशर्माचरितम् ॥

अथापरं प्रवक्ष्यामि भक्तिर्माहात्म्यमुत्तमम् ।
यच्छ्रुत्वा सर्वपापेभ्यो मुक्तो भक्तिं लभेन्नरः ॥ 1 ॥

मिथिलायामभूद्विप्रो विष्णुशर्मेति विश्रुतः ।
तरौनीग्रामवासी च वंशे करमहाह्वये ॥ 2 ॥

वेदशास्त्रार्थतत्त्वज्ञः कुलीनः कर्मतत्परः ।
कृत्वा पाणिग्रहं काले पुत्रानुत्पाद्य चैकदा ॥ 3 ॥

पत्न्याः कटुवचः श्रुत्वा [2]विरक्तः सः क्रुधा द्विजः ।
गत्वा शिवसमीपं स ग्रामोपान्तेऽतिनिर्मले[3] ॥ 4 ॥

गैरिकं परिधानीयमुत्तरीयं च गैरिकम् ।
विधाय भस्माभरणं[4] दधौ चित्तेन शङ्करम् ॥ 5 ॥

शिखां सूत्रं[5] च बिभ्राणः संन्यासी स द्विजः स्थितः ।
अत्रान्तरे ग्रामवासी कुलवृद्धाश्च ये जनाः ॥ 6 ॥

ते सर्वे तत्र गत्वा तं वारयामासुरार्तवत्[6] ।
पत्नी चापि ययौ तत्र गृहीत्वा तनयान्निजान् ॥ 7 ॥

प्रार्थयामास बहुधा न निवृत्तो द्विजोत्तमः ।
अत्यावेशे[7] कृते [8]पौरैरुत्थाय चलितोऽभवत् ॥ 8 ॥

---

1. परिहाय किर्ति – ख।
2. विरराम – ख, ग।
3. समो ग्रामोपत्त्नेन निर्मले – क।
4. भक्ताभरणं – ख।
5. शिखां सत्रं विभ्राष्ठः – क।
6. एतावत् – क।
7. अत्यारोषे – क।
8. च्यौरै – क।

पत्नी चानुजगामार्ता तामनाहृत्य च क्रुधा।
जगामैवं विरक्तः सन् न निवृत्तो बभूव ह ॥ 9 ॥

ततस्ते ग्रामवृद्धास्तां पत्नीं तत्तनयानपि।
गृहीत्वा ग्राममागत्य स्वं स्वमालयमाययुः ॥ 10 ॥

विष्णुशर्मा तदारभ्य लोके निन्दामवाप सः।
अयथाविधिसंन्यासाल्लोके विष्णुपुरीति सः ॥ 11 ॥

प्रख्यापितो द्विजैः कैश्चित्तरौनीग्रामवासिभिः।
स तु विप्रो महाप्रज्ञः शिखासूत्रादिमानपि ॥ 12 ॥

तत्याज कर्मजालं स संन्यासीव न संशयः।
स जगाम शिलानाथो यत्र तिष्ठति शङ्करः ॥ 13 ॥

कमलातीरमासाद्य व्याघ्रतीर्थेऽतिपुण्यदे।
वने व्याघ्रादिसङ्कीर्णे नानाहस्तिभिरावृते ॥ 14 ॥

सतीदेहपरित्यागे शवं नीत्वाथ शङ्करः।
परिबभ्राम पृथिवीं सकलां विरहातुरः ॥ 15 ॥

तस्या यदङ्गं यद्देशे पतति स्म तदा हरः।
स्वस्यापि च तदङ्गं संस्थापयामास शङ्करः ॥ 16 ॥

एवं भ्रमन्पृथिव्यां तु मिथिलामागतः प्रभुः।
जनकस्य च राजर्षेर्गृहाद्वै योजनद्वये ॥ 17 ॥

[1]शरविन्दुर्ह्रदो नाम तीर्थं पापहरं परम्।
तत्पश्चात्कमलानद्या दक्षिणे धरिणीतले ॥ 18 ॥

[2]सत्याः प्रपतितं देव्या उदरं नाभिसंयुतम्।
शिवोऽप्यपातयत्तत्र स्वस्योदरं[3] नाभिसंयुतम् ॥ 19 ॥

ततो ब्रह्मा च विष्णुश्च समागत्य कृताञ्जली।
प्रसाद्य शङ्करं देवमूचतुः परमेश्वरौ ॥ 20 ॥

किमिदं क्रियते नाथ देहपातनमद्भुतम्।
वस्तुतस्ते न देहोऽस्ति पातनं तस्य वै कुतः ॥ 21 ॥

---

1. सरविन्दुः – क।
2. सत्यायाः – क।
3. स्वस्योदरं – क।

तथापि जगतां भूत्यै[1] देहवानसि शङ्कर।
इति श्रुत्वा तयोर्वाक्यं विहस्य परमेश्वरः॥ 22॥

उवाच विष्णुं ब्रह्माणं गुह्यं लोकानुकम्पया।
शुणु ब्रह्मन्नथो विष्णु गुह्यं लोके हितं परम्॥ 23॥

लोकोपकाराय मया देहोऽयं पात्यते[2] भुवि।
पूर्वं विन्दुसरो नाम तीर्थमेतत्सनातनम्॥ 24॥

अत्रावयोर्देहपाताद्विशिष्टमभवत्पुनः।
शरविन्दुह्रदे स्नात्वा कमलायां तथा नरः॥ 25॥

आवयोरुदरं दृष्ट्वा ब्रह्महत्यां व्यपोहति[3]।
यो यत्कामयते लोकः पुत्रदारधनादिकम्॥ 26॥

मासमेकामिहासीनो ममारधनतत्परः।
तत्र[4] तस्मै प्रयच्छामि सत्यमेतन्न संशयः॥ 27॥

युवां जानीतमेतद्धि मणिकर्णसमं सरः।
अहं विश्वेश्वरः साक्षान्मुक्तिदोऽत्र निरन्तरम्॥ 28॥

वसाम्यत्र मृतानां तु मुक्तिं दातुं न संशयः।
सिद्धिक्षेत्रमिदं देवो जानीतमावयोः प्रियम्॥ 29॥

अचिराल्लभते सिद्धिं पुरश्चर्यापरो नरः।
इत्युक्त्वा स्वोदरे शम्भुः प्रविवेशाथ [5]पश्यतोः॥ 30॥
[6]तयो प्रस्तुवन्तोर्भक्त्या ब्रह्मकेशवयोरथ।
ब्रह्मापि केशवश्चापि निजनाम्नातिसुन्दरम्॥ 31॥

शिवलिङ्गं प्रतिष्ठाप्य जग्मतुः स्वं स्वमालयम्।
एवं भूतः शिलानाथः शङ्करो भक्तवत्सलः॥ 32॥

तत्र गत्वा विष्णुशर्मा शिवाराधनतत्परः।
तत्रैकं वत्सरं विप्र उवास ब्रह्मचर्य्यवान्॥ 33॥

वत्सरान्ते शिलानाथो रात्रौ स्वप्नेऽब्रवीद्वचः।
परितुष्टोऽस्मि हे भद्र! तवारधानतो द्विज॥ 34॥

---

1. मूल्यै – क।
2. पाल्यते – क।
3. विपोहति – ख।
4. ततस्ते – क, ख।
5. पप्रयतोः – क।
6. तयोः – ख, ग।

वैष्णवं मन्त्रराजं ते ददामि सर्वसिद्धये।
तन्मन्त्रं जपतो नित्यं तदाराधनतत्परः॥ 35॥
भुक्त्वा भोगानशेषांस्तु मृतो मोक्षमवाप्स्यसि।
[1]तवास्ति दीर्घमायुष्यं पुनर्दारपरिग्रहः॥ 36॥
भविष्यति शुभा तत्र सन्ततिर्वंशवर्द्धिनी।
इत्युक्त्वा द्वादशार्णं तु दत्त्वा मन्त्रं सदाशिवः॥ 37॥
तापसो द्विजरूपेण तत्रैवान्तरधीयत।
विष्णुशर्मा समुत्थाय स्वप्नं संस्मृत्य विस्मितः॥ 38॥
भविष्यति कथं चैतदिति चिन्तापरोऽभवत्।
द्वदशार्णं जपन्नित्यं तुलसीदामभूषितः॥ 39॥
अयाचिताशी तत्रासीदेकदा शिवरात्रिके।
ग्रामेभ्यश्च[2] समायाताः शिवदर्शनमानसाः॥ 40॥
तद्ग्रामीणराग[3] अपि जनाः समायाता दिदृक्षवः।
पूजयित्वा शिलानाथं विष्णुशर्मणमेत्य ते ॥ 41॥
परितोष्य[4] वचोभिस्तं [5]निन्युः स्वग्राममेव हि।
तत्र पूर्वं गृहं त्यक्त्वा तस्थावन्यत्र स द्विजः॥ 42॥
पुनः पाणिग्रहं कृत्वा पुत्रमुत्पाद्य कालतः।
वैष्णवप्रवरो भूत्वा गृहस्थोऽपि द्विजर्षभः॥ 43॥
सर्वानामन्त्र्य बन्धून्स जगाम पुरुषोत्तमम्।
भक्तिरत्नावलीं कृत्वा ग्रन्थं भागवतोत्तमम्॥ 44॥
श्रावयित्वा जगन्नाथं तं समर्प्य ततोऽभ्यगात्।
आगत्य काशीं तस्थौ स बिन्दुमाधवसन्निधौ॥ 45॥
जगन्नाथं हृदि ध्यात्वा मन्त्रं वै द्वादशाक्षरम्।
जपन्नानन्दपूर्वं स तस्थावानन्दकानने॥ 46॥
एकदा श्रीजगन्नाथः पूजकेभ्यो निजालये।
भक्तिरत्नावली यास्ति देहि मह्यमिति स्वयम्॥ 47॥

---

1. तवास्ती – क।
2. सर्वेग्रामात् – ख, ग।
3. राया: – क।
4. यदि – ख।
5. विन्धुः – ख।

उवाच स्वप्ने सातीव प्रिया मम न संशयः।
विष्णुशर्मकृता सा तु काश्यां तिष्ठति स द्विजः॥ 48॥

मन्नाम्ना यातु पत्रं[1] वै भक्तिरत्नावलीं ततः।
गृहीत्वा पुनरायातु मत्कण्ठे तां नियोजय॥ 49॥

तावन्मणिमयीमेतां मालां त्यक्ष्याम्यसंशयम्।
एवमुक्ता स्तुते स्वप्ने[2] निद्रां त्यक्त्वा समुत्थिता॥ 50॥

आश्चर्यं परमं मत्वा राज्ञे प्रोचुर्यथार्थतः।
राजापि स्वप्ने तत्सर्वं दृष्टवानब्रवीच्च तान्॥ 51॥

एते वयं[3] गमिष्यामः श्रीजगन्नाथमन्दिरम्।
तत्रोपायं करिष्यामः भक्तिरात्नावली यथा॥ 52॥

शीघ्रमायात्तथेत्युक्त्वा सर्वराजपुरस्सराः।
आगत्य मन्दिरेऽपश्य[4]न्मालां रत्नमयीं पुरः॥ 53॥

पतितां भुवि केनापि निक्षिप्तामिव तद्गलात्।
तां दृष्ट्वा महदाश्चर्य्यं राजा पत्रं लिलेख तत्। 54॥

दूतान्द्रुतगतीन्काश्यां प्राहिणोद्विष्णु[5]शर्मणे।
ते गत्वा तत्र तत्पत्रं ददुः श्रीविष्णुशर्मणे॥ 55॥

विष्णुशर्मापि तत्पत्रं जग्राह शिरसा द्विजः।
आनन्दाम्भोधिसम्मानस्तान्परिष्वज्य [6]प्रयत्नतः॥ 56॥

पाद्यासनार्घदानेन तेषां सत्कारमाचरत्।
तेऽप्यूचुर्न वयं ब्रह्मन्निवसामोऽत्र वै निशि॥ 57॥

आज्ञा राज्ञः शिरोधार्या द्रुतमेतन्न संशयः।
इत्युक्तो विष्णुशर्माथ स्वहस्तलिखितं ततः॥ 58॥

भक्तिरत्नावलीं तेभ्यो ददौ हर्षसमन्वितः।
नमस्कृत्य च तान्सर्वान्विससर्ज कृताञ्जलिः॥ 59॥

---

1. यत्रैव – क।
2. सर्वे – ख।
3. यूयं – ख, ग।
4. दृश्यं – ख, ग।
5. राजा श्री – ख।
6. यस्ततः – क।

भक्तिरत्नावलीं नीत्वा द्रुतं राज्ञे ददुश्च[1] ते।
राजापि तां समादाय विद्वद्ब्राह्मणचक्रतः॥ 60॥

श्रावयामास गोविन्द भक्तिरत्नावालीं मुहुः।
पुनः स्वप्ने[2] ददर्शाथ राजा श्रीपुरुषोत्तमम्॥ 61॥

भक्तिरत्नावलीश्लोकैरङ्गुलीका विद्याय भोः।
मालां कृत्वा प्रयच्छाशु ततः प्रीतो भवाम्यहम्॥ 62॥

इत्युक्तः प्रातरुत्थाय तथैव कृतवान्नृपः।
भक्तिरत्नावलीं मालां ददौ कृष्णाय वै [3]पुनः॥ 63॥

ततः प्रसन्नो भगवान्मालामन्यां दधार[4] सः।
एवं प्रभावः सुव्यक्तो भक्तेर्वै विष्णुशर्मणः॥ 64॥

य इदं शृणुयाल्लोके भक्तिमाहात्म्यमुत्तमम्।
सर्वपापविनिर्मुक्तो भक्तिमान्स्यान्न संशयः॥ 65॥

इति श्रीभगवद्भक्तिमाहात्म्ये विष्णुशर्माचरितं नाम सप्तचत्वारिंशः सर्गः॥ 47॥

❊ ❊ ❊

अष्टचत्वारिंशः सर्गः

॥ वल्लभाचार्य-ज्ञानदेवचरितम्॥

अथ वक्ष्ये विष्णुभक्तान्सम्प्रदायप्रवर्तकान्।
चतुराँलोकविख्यातान् कीर्त्तनाद्भक्तिमुक्तिदान्[5]॥ 1॥

विष्णुस्वामी प्रथमतो निम्बादित्यस्ततः परम्।
माध्वाचार्यस्तृतीयस्तु तुर्यो रामानुजः स्मृतः॥ 2॥

एते वैष्णवमुख्या वै सम्प्रदायप्रवर्तकाः।
शिष्यप्रशिष्या एतेषां माहात्म्यात्पूज्यतां गताः॥ 3॥

अद्यापि पृथिवीमेतामलङ्कुर्वन्ति भक्तितः।
विष्णुस्वामिकुले तत्र वल्लभाचार्य सम्भवः॥ 4॥

---

1. न्यर्वदयत् – ख।
2. युवयोर्मे दर्शयामास रामश्री – क।
3. नृपः – क।
4. दद्यौ हरिः – ख, ग।
5. किर्तिमान्मुक्तिमान् – ख।

दाक्षिणात्येषु तैलङ्गो[1] जात्या विप्रोऽतिभक्तिमान्।
परित्यज्य निजं देशं सस्त्रीको[2] गोकुलेऽवसत्॥ 5 ॥

अयाचिताशी सन्तुष्टः श्रीकृष्णार्चनतत्परः।
माहात्म्यात्तस्य विप्रस्य शिष्याः सर्वे नृपादयः॥ 6 ॥

प्रतीक्षन्तस्तदाज्ञां[3] वै चक्रुः सर्वे समीहितम्[4]।
एकदा तस्य गेहे तु साधुरेकः समागतः॥ 7 ॥

शालग्रमशिलां बध्वा गले कौशेयवाससा।
आचार्यद्वारदेशे तु क्षेमं करतरौ स तु॥ 8 ॥

शालग्रामं निधायाथ वल्लभाचार्यसन्निधौ।
गत्वा[5] प्रणम्य द्रक्ष्यामि मन्दिरं तव केशवम्॥ 9 ॥

आज्ञापयेति श्रुत्वा वै गच्छेत्युक्तो महात्मना।
गत्वा तन्मन्दिरे दृष्ट्वा[6] शालग्रामशिला चायम्॥ 10 ॥

तुलसीदामभिश्छिन्नैश्चन्दनैश्च यवैस्तिलैः।
नानासुगन्धिकुसुमैः सुरभीकृतमन्दिरे॥ 11 ॥

पूजितं[7] परमप्रीत्या प्रणम्य द्वारमागतः।
क्षेमं करतलं[8] गत्वा शालग्रामशिलां निजाम्॥ 12 ॥

नापश्यद्विललापार्तो[9] वल्लभाचार्यसन्निधौ।
समागत्याब्रवीद्वाक्यं शालग्रामशिला मम॥ 13 ॥

क्षेमं करतरौ बवन्धा केनाप्यहृता शुभा।
अतः परं न जीवामि शालग्रामशिलां विना॥ 14 ॥

इति श्रुत्वा वचस्तस्य साधोराचार्य आह तम्।
मा विषादं कुरु त्वं भो गच्छ मे देवमन्दिरम्॥ 15 ॥

यामिच्छसि शिलां तां त्वं गृहाणात्र न संशयः।
इत्युक्तः प्रत्युवाचाथ[10] नास्ति ते तादृशी शिला॥ 16 ॥

---

1. तै त्वंगो – क।
2. ख – मध्ये लुप्तः पाठः।
3. प्रतिज्ञतः – ख, ग।
4. सतीहितम – क।
5. गता – ख।
6. ख मध्ये लुप्तपाठः।
7. पूरितं – क।
8. तरुं।
9. अपश्यं द्विललापार्तो।
10. स उवाच – क।

किं करोम्यन्यया नाथ शिलया तां विना विभो।
श्रुत्वेदं वल्लभाचार्यः पुनराह व्रजेति तम्॥ 17॥

ततो गत्वा पुनः साधुर्भगवन्मन्दिरं शुभम्।
दृष्ट्वा तत्र शिलाः सर्वाः स्वशिलासदृशी[1]शुभाः॥ 18॥

आश्चर्याद्बहिरागत्य तमाचार्यमुवाच तत्।
पुनराचार्य वचनात्क्षेमं करतरोस्तले॥ 19॥

गत्वा तद्वृक्षवृद्धां स्वां शालग्रामशिलां पुनः।
संप्राप्य कृतकृत्योऽभूदाचार्य निलयेऽवसत्॥ 20॥

एवमादीनि चित्राणि बहून्यत्र[2] महात्मनः।
कर्माणि पृथिवीमध्ये सन्ति व्यक्ततराणि च॥ 21॥

अत्रैव वंशे विख्याता ज्ञानदेव इति श्रुतः।
कथामस्य[3] प्रवक्ष्यामि शृण्वतां पापनाशिनीम्॥ 22॥

दक्षिणस्यामन्येन्द्राणी नदी पुण्यजला शुभा।
तत्तीरे क्वचिदानन्दक्षेत्रं द्विजगणाकुलम्॥ 23॥

तत्रैको ब्राह्मणः कश्चित्पत्न्या कलहतो रुषा।
वञ्चयित्वाथ तां पत्नी संन्यासं जगृहे स्वयम्॥ 24॥

अथ काले कतिपये जाते ज्ञातस्तया स तु।
सा समागत्य भर्त्तारं मां गृहाणेऽति चाब्रवीत्॥ 25॥

सोऽब्रवीद्गच्छ भद्रं ते न च भर्त्ताहमस्मि भोः।
इत्युक्ता सा तु तत्पत्नी तद्गुरुं प्रणिपत्य च॥ 26॥

प्राह नाथानपत्याहं पितृमातृविवर्जिता।
कं यामि शरणं ब्रूहि परितस्ते शिष्यतां गतः॥ 27॥

इति[4] श्रुत्वा वचस्तस्य गुरुस्वाम्यतिदुःखितः।
आहूय विप्रं तं शिष्यं गाह्येयं सुव्रता सती॥ 28॥

नैमां त्यज गृहाणेमां मद्वाक्यान्मास्तु ते भयम्।
अकर्त्तव्यं कृतं चैतन्मयाप्यज्ञानतो महत्॥ 29॥

---

1. पुनः – क।
2. यस्य – क।
3. कथास्तस्य – ख,
4. श्री – ख।

भविष्यन्ति सुताश्चास्यां तव वंशविवर्द्धना: ।
माहात्म्याद्देवता: सर्वे भविष्यन्ति द्विजोत्तमा: ॥ 30 ॥

इत्याज्ञया गुरो: सोऽथ पत्नीमादाय सुव्रताम् ।
उवास क्वचिदेकान्ते भिक्षुधर्मं समाचरन् ॥ 31 ॥

मनसा न कदाचित्तां सोऽकामयत सुव्रत: ।
ऋतावेव सकामां[1] तां जगामाकामत: [2]पति: ॥ 32 ॥

एवं पुत्रास्त्रयो जाता: काले तस्य[3] महात्मन: ।
तेषां ज्येष्ठो ज्ञानदेवो जातस्तु [4]सप्तहायन: ॥ 33 ॥

तं गृहीत्वा यती ग्रामे गतो ब्राह्मणमन्दिरम् ।
एष मे तनयो ब्रह्मन् भवद्भिरुपनीयताम् ॥ 34 ॥

अध्याप्यतां श्रुतिं विप्रं युष्माकं शरणं गत: ।
इति श्रुत्वा वचस्तस्य जहसुस्ते परस्परम् ॥ 35 ॥

एष संन्यस्तवान्पत्नीं संजग्राह तत: सुतम् ।
समुत्पाद्याध्यापयितुमायातश्चात्र मन्दधी: ॥ 36 ॥

इति सञ्चिन्त्य महिषं ददृशस्तेऽति सन्निधौ ।
तमालं व्याब्रुवन्सर्वे विद्यामदविमोहिता: ॥ 37 ॥

अहो वयं पाठयामो यद्येष महिषोऽधुना ।
पठेद्वेदं तदेत्येतत्प्रतिज्ञैषा न सशंय: ॥ 38 ॥

इत्युक्त: स तु तूष्णीं वै तस्थौ यतिरधोमुख: ।
ज्ञानदेव उवाचाथ तान् विप्रान्मधुराक्षरम् ॥ 39 ॥

[5]असम्भावितमेतत्प्रतिजानीत किं द्विजा: ।
तथापि सत्यं चेद्विप्रा: को वेद हरिचेष्टितम् ॥ 40 ॥

इत्युक्तास्ते पुनर्विप्रास्तथैव जहसुस्तदा ।
ज्ञानदेवस्ततो दृष्ट्वा[6] महिषं प्राह सस्मित: ॥ 41 ॥

---

1. सा कामार्त्रीं तां – ख, ग।
2. तौ यती – क।
3. यस्त – ख।
4. सहायन: – क।
5. असंभवितु से ततु प्रतियानीत – ख, ग।
6. नाम्ना – क।

अहो[1] महिषरूपेण भवानपि हरिः स्वयम्।
स्वभक्तमनसः सिद्धौ मग्नं संश्रखमाधवः ॥ 42 ॥

भक्तसङ्कल्पसिद्ध्यर्थमाविर्भवति भूरिशः।
इति श्रुत्वा वचस्तस्य ज्ञानदेवस्य तत्क्षणात् ॥ 43 ॥

महिषः सस्वरं वेदानपठत्पश्यतां[2] नृणाम्।
ततस्ते[3] ब्राह्मणाः सर्वे महाश्चर्येण विस्मिताः ॥ 44 ॥

श्रुत्वान्येप्यागता वृद्धा ग्रामे ये वैदिका द्विजाः।
ते सर्वे तं यतिं प्राहुर्ज्ञानदेवं च सादरम् ॥ 45 ॥

अहो धन्योऽसि धन्योऽयं तव पुत्रो न संशयः।
मत्कृते[4] महिषोप्येत्य विष्णुर्वेदं पठत्यथ ॥ 46 ॥

युवामतः क्षमेयाथां पाठयामो वयं श्रुतिम्।
इत्युक्तो ज्ञानदेवस्तु महिषं प्रणिपत्य तम् ॥ 47 ॥

कृताञ्जलिपुटः प्राह क्षमस्वातः परं विभो।
इत्युक्तो विररामासौ महिषः श्रुतिपाठतः ॥ 48 ॥

ब्राह्मणा अपि तं बालमाज्ञाप्य यतिमादरात्[5]।
निन्युर्निजगृहं सर्वे व्रतबन्धमकारयत् ॥ 49 ॥

ततः कतिपयैरेव मासैर्वेदत्रयीं पठन्।
शास्त्राणि च ततस्तं तु पाठयामासुराप्तवत् ॥ 50 ॥

इत्याश्चर्य्यमभूत्तत्र सिद्ध [6]एकः समागतः।
अद्यापि महिषस्तत्र पूज्यते नृभिरादारात् ॥ 51 ॥

एवमन्यैर्महाश्चर्य्यैः कर्मभिस्तस्य वै यशः।
प्रसिद्धमभवत्तत्र भक्तिरेका प्रसिद्ध्यति ॥ 52 ॥

ज्ञानदेवपरीक्षार्थे स्वसिद्धिं सम्प्रदर्शयन्।
सर्पं कृत्वा नियोक्तुं[7] वै व्याघ्रमारुह्य निर्भयः ॥ 53 ॥

---

1. अतो – ख।
2. सः स्वरं वेदपपाठीत् – ख, ग।
3. ततस्तेषां – क।
4. कृते ते – क।
5. सादरात् – ख, ग।
6. ज्ञानदेवस्य भक्तितः – क।
7. तु योल्की वै व्याघ्रमाहत्य – क।

कुत्रास्ति ज्ञानदेवः स यतिः पृच्छञ्जनान्प्रति।
इति श्रुत्वा ज्ञानदेवो भित्तिमारुह्य तस्थिवान्॥ 54॥

भित्तिं प्राह महाभागे सिद्धश्चायाति मां प्रति।
तदग्रे यामि मां तत्र नय त्वं प्रणतोस्म्यहम्॥ 55॥

इत्युक्ता चलिता भित्तिः सर्पीति सिद्धसम्मुखम्।
दृष्ट्वा तौ व्याघ्रभित्तिस्थौ लोका विस्मयमागताः॥ 56॥

अहो खलु महाश्चर्य्यमित्यूचुस्ते[1] परस्परम्।
ततः सिद्धस्तु तं दृष्ट्वा भित्तिस्थं ज्ञानदेवकम्॥ 57॥

साधुसाध्विति सम्पूज्य सस्नेहं हृदये न्यधात्।
ज्ञानदेवोऽपि तं प्राह भवतां कृपया त्विदम्॥ 58॥

एवं परस्परालापं कृत्वा सिद्धो यथारुचि।
जगाम ज्ञानदेवोऽपि [2]पद्भ्यामेवाययौ गृहम्॥ 59॥

एवं प्रभावो लोकेऽस्मिन् ज्ञानदेवस्य विश्रुतः।
न साध्यं विद्यते किञ्चित् भक्तिमाहात्म्यं नो नृणाम्॥ 60॥

य इदं शृणुयाद्भक्त्या ज्ञानदेवस्य चेष्टितम्।
अभीष्टं लभते लोके परत्र सुखमश्नुते॥ 61॥

इति श्रीभगवद्भक्तिमाहात्म्ये वल्लभाचार्य-ज्ञानदेवचरितं नाम अष्टचत्वारिंशः सर्गः॥ 48॥

❊ ❊ ❊

नवचत्वारिंशः सर्गः

॥ त्रिलोचनचरितम्॥

ज्ञानदेवस्य शिष्यौ द्वौ नामदेवत्रिलोचनौ।
नामेदवकथा चोक्ता कथ्यतेऽत्र[3] त्रिलोचनी॥ 1॥

त्रिलोचनः सपत्नीको दरिद्रो वै द्विजोत्तमः।
भिक्षार्थी नित्यसन्तुष्टो विष्णुभक्तिपरायणः॥ 2॥

---

1. तैः – क।
2. पक्ष्यामो वा यौ गृहम् – क।
3. चात्र क वै समासतः – ख, ग।

आमध्याह्नं याचयित्वा नित्यं विप्रेषु भोजनम्।
दत्त्वा स्वयं तु बुभुजे व्रतमेतद्द्विजन्मनः ॥ 3 ॥
परन्तु [1]हरिरित्येतदक्षरद्वयसंयुतम्।
पलमेकं न तत्याज जाग्रद्विप्रः कथञ्चन[2] ॥ 4 ॥
तद्भक्त्या पुण्डरीकाक्षः समागत्याथ तद्गृहे।
समाययौ[3] विप्ररूपो वृद्धोऽन्तर्यामिसंज्ञकः ॥ 5 ॥
त्रिलोचनेन साकं तु बहुधा भिक्षितुं ययौ।
दृष्ट्वा भारपरिश्रान्तं भिक्षान्नेन त्रिलोचनम् ॥ 6 ॥
अन्तर्यामी स्वयं नीत्वा[4] ययौ तेन समं गृहे।
मासाधिकं गतं तस्य चैकं संवत्सरं गृहे ॥ 7 ॥
विप्राणां भोजनान्ते तु भोक्तव्यमिति निश्चयः।
यावदन्नं मिलत्यस्य भुङ्क्ते तावन्न संशयः ॥ 8 ॥
अन्तर्यामी जातुतैव [5]भोजयेत्यब्रवीद्वचः।
त्रिलोचनस्य महिषी भोजयित्वा द्विजानथ ॥ 9 ॥
शिष्टमन्नं ददौ नित्यमन्तर्यामिद्विजाय सा।
स्वयं बुभुक्षितैवासीत्तृषितास्मीति न साऽब्रवीत् ॥ 10 ॥
एवं दुःखपरा नित्यं तत्पत्नी[6] सुव्रता।
एकस्मिन्दिवसे जातमनश्नन्त्या दिनत्रयम् ॥ 11 ॥
सामाजिका सखी काचिदाजगाम गृहं प्रति।
कथमेषा दशा याता विना रोगेण ते सखि ॥ 12 ॥
किं वा रोगोऽस्ति मे ब्रूहि प्रतीकारं करोम्यहम्।
इत्युक्ता साप्युवाचाथ न रोगो मम वर्तते ॥ 13 ॥
भिक्षा तु प्रमिता याति सर्वेषां भोजनान्तरम्।
अन्तर्यामी भुनक्त्येष तृप्तोऽस्मीति न भाषते ॥ 14 ॥
अतो दिनत्रयं मेऽथ जातमन्नं विना सखि।
इत्युक्ता तत्सखी प्राह कोऽसौ कस्मादिहागतः ॥ 15 ॥

---

1. हरित्येतद् – क।
2. कदाचन – क।
3. पयौ – ख।
4. स्व पत्नी त्वा – क।
5. पातमैव भुजन्नित्य ब्रवीद्वचः – ख।
6. न सुखी चाति – क।

कथमेष प्रियो नित्यं तव भर्तुर्वरानने।
त्रिलोचनप्रियेत्युक्त्वा सखीमाह तु तां पुनः ॥ 16 ॥

अहो तस्य प्रियो नैव कश्चिद्दृष्टो मया सखि।
को वेद [1]कुत आयातः किमर्थमिह तिष्ठति ॥ 17 ॥

श्रुत्वैवं भाषितं तस्या अन्तर्यामी तु तत्क्षणात्।
अन्तर्दधे जगामाथ निजधाम ततो हरिः ॥ 18 ॥

अथ त्रिलोचनः सायं प्राह पत्नीं पतिव्रताम्।
अन्तर्यामी न दृष्टोऽद्य गतः क्वापि वा वेत्सि किम् ॥ 19 ॥

इत्युक्त्वा प्राह पत्नी तं नाहं जानामि कुत्र सः।
भुक्त्वा जगाम नायातः पुनरत्र गृहे मम ॥ 20 ॥

अथ त्रिलोचनः सन्ध्यामुपास्येतस्ततः पुनः।
अन्तर्यामिणमुच्चैस्तु जुहाव स्नेहयन्त्रितः ॥ 21 ॥

अनागते तु विलापन्तस्थौ शोकेन दुःखितः।
बुभुजे नैव रात्रौ स तस्य चिन्तापरायणः ॥ 22 ॥

अथ त्रिलोचनं स्वप्ने प्रोवाच [2]भगवान्हरिः।
मा शुचस्त्वं महाभागत्रिलोचन मम प्रिय ॥ 23 ॥

त्वद्भक्त्याहं तव गृहे त्ववसं विप्ररूपधृक्।
अद्यारभ्यान्तरिक्षे तु तव वेश्मनि सन्ततम् ॥ 24 ॥

निवसामि न संदेहस्त्वमिदं कुरु मद्वचः।
प्रातरारभ्य भिक्षायां मागच्छ त्वं क्वचिद्द्विज ॥ 25 ॥

जरया दुर्बलोऽसि त्वं त्वद्दुःखाद्दुःखितोऽस्म्यहम्।
गृहे ते यानि भाण्डानि सदा पूर्णानि सन्तु वै ॥ 26 ॥

तैलं घृतं तथान्नं[3] च ह्यौषध्यो द्रव्यमेव च।
अक्षयं ते गृहे विप्र भविष्यति न संशयः ॥ 27 ॥

तेनैव शतशो विप्रान् भोजयित्वा स्वयं पुनः।
भुङ्क्ष्व त्वं किञ्च सर्वेभ्यो देह्यन्नानि सदा व्रती ॥ 28 ॥

---

1. कस्मादायातः – क।
2. भवान् हरिः – ख।
3. ख – मध्ये लुप्तः पाठः।

यावज्जीवं प्रसादान्मे सर्वं पूर्णं भविष्यति।
इति लब्ध्वा वरं स्वप्ने प्रभाते स त्रिलोचनः ॥ 29 ॥
ददर्शोत्थाय[1] संभारान् गृहे सर्वान्सुसंस्थितान्[2]।
जहर्ष पत्नीमाभाष्य विप्रानाहूय नित्यशः ॥ 30 ॥
भोजयामास बुभुजे स्वयं पत्न्या सह द्विजः।
एवं भक्त्या भगवतो द्विजः सर्वसमृद्धिमान् ॥ 31 ॥
इहलोके सुखं प्राप्य मृतो मोक्षमवाप्तवान्[3]।
य इदं शृणुयाल्लोके भक्तिमाहात्म्यमुत्तमम् ॥ 32 ॥
दरिद्रो लभते वित्तं नामोच्चारणतत्परः ॥ 33 ॥

इति श्रीभगवद्भक्तिमाहात्म्ये त्रिलोचनचरितं नामैकोनपञ्चाशत्तमः सर्गः ॥ 49 ॥

※ ※ ※

पञ्चाशत्तमः सर्गः

॥ कुलशेखरचरितम् ॥

अथान्यत्संप्रवक्ष्यामि भक्तिमाहात्म्यमुत्तमम्।
नीलाचले महात्माभूद्राजा वै कुलभूषणः[4] ॥ 1 ॥
सीतारामजपासक्तः सीतारामप्रपूजकः।
सीतारामपदद्वन्द्वे षट्पदीकृतमानसः ॥ 2 ॥
दयाधर्मरतो नित्यं सदा व्रतपरायणः।
आमध्याह्नं [5]राजकर्म कृत्वा रामं हृदि स्मरन् ॥ 3 ॥
ततोऽपराह्णे शुश्राव रामायणमनन्यधीः।
तस्य पौराणिकस्तन्तु रामार्थे त्यक्तजीवितम् ॥ 4 ॥

---

1. ददृशे स्वप्ने – ख।
2. संस्कृतान् – ख।
3. मोक्षमवाभुद्यात – ख।
4. शेषः – ख।
5. राज्य – क।

ज्ञात्वा रामस्य दुःखादि सीताया हरणादिकम्।
जातु न [1]श्रावयामास जानन्वै राजनिश्चयम्॥ 5॥

पौराणिकस्त्वेकदा तु क्लिष्टोऽभूज्ज्वररोगतः।
तत्पुत्रः श्रावयामास राज्ञे[2] रामायणं तदा॥ 6॥

रावणेन कृतं सर्वं श्रावयामास पुत्रकः।
श्रुत्वा तु दुःखदं वाक्यं सीताया हरणादिकम्॥ 7॥

गृहीत्वा खड्गमुत्थाय शीघ्रमश्वं समानय।
अद्याहं रावणं हत्वानयिष्यामि च जानकीम्॥ 8॥

मयि जीवति मे माता सीता रक्षोहृता भवेत्।
अहो धिगस्तु मामद्येत्युक्त्वाश्वं स समारुहत्॥ 9॥

धावयित्वाश्वमुख्यं तं पयोनिधिसमीपगः।
पुनरश्वं कशाद्यातैः समुद्रेऽपात यद्रुषा॥ 10॥

अश्वेनैव च पयोधिं तीर्त्वा हत्वा च रावणम्।
सीतामद्यानयिक्ष्यामीत्येवं निश्चितमानसः॥ 11॥

अथैवं निश्चयं तस्य ज्ञात्वा श्रीरघुनन्दनः।
लक्ष्मणेन सह भ्रात्रा सीतया सह नौस्थितः[3]॥ 12॥

आविर्बभूव सहसा कर्णधारेण संयुतः।
आविर्भूय समुद्रे तं कर्णधारोऽब्रवीन्नृपम्[4]॥ 13॥

किमर्थं यासि लङ्कां त्वं[5] हत्वा रावणमाहवे।
सीतां नीत्वा सह भ्रात्रा याम्ययोध्यापुरीं स्वयम्॥ 14॥

निवर्तस्व पुरीं गच्छ तद्वाक्यात्कुलशेखरः[6]।
ततो विमानमायातं समारुढो ददर्श तान्॥ 15॥

---

1. स्रावयामास – ख।
2. राज्ञं – ख, राज्ञो – क।
3. तौस्थितः – क
4. नृपः – ख, ग
5. स्वं – ख
6. कुशलीवरः – क

एवं निरीक्ष्य तान्सर्वान् श्रुत्वा च तस्य भाषितम्।
परावृत्तः च नृपो पयोधेरन्तरात्स्वयम्[1] ॥ 16 ॥

जलाद्बहिः समागत्य ददर्श निजवाहिनीम्।
भक्त्या नमस्कृत्य राजा[2] कृष्णीं भवनमाययौ ॥ 17 ॥

पौराणिकं समभ्येत्य दृष्टं चित्रं न्यवेदयत्।
श्रुत्वा चित्रं द्विजः सोऽपि राजानमभ्यनन्दयत् ॥ 18 ॥

सोऽति[3]भक्त्या महाराज सत्यं सत्यं न संशयः।
समुद्रे प्रविशन्तं त्वां ज्ञात्वा स भक्तवत्सलः ॥ 19 ॥

स्वयं निवारयामास दर्शयित्वात्मविग्रहम्।
धन्योऽसि त्वं महाराज धन्येयं धरणी त्वया ॥ 20 ॥

त्वद्भक्त्या योगिदुर्लक्ष्यो रामस्त्वद्दृक्पथं गतः।
इति श्रुत्वाथ वचनं पौराणिकसमीरितम् ॥ 21 ॥

तदा बुबोध नृपतिः शौर्यावेशाच्च[4] निर्गतः।
पश्चात्तापमकरोदुच्चैस्तदा ज्ञानेन च प्रभुः ॥ 22 ॥

शौर्यदुर्मददुष्टेन चित्तेनाथ धिगस्तु माम्।
इति चिन्तापरो राजा तद्रूपं हृद्यचिन्तयत् ॥ 23 ॥

नियमं पूर्वपदास्थाय स्थितो वेश्मनि भक्तितः।
एवं स राजा धर्मात्मा भक्तिमान्कुलशेखरः ॥ 24 ॥

कलावपि हरिं साक्षादपश्यद्भक्तियोगतः ॥ 25 ॥

इति श्रीभगवद्भक्तिमाहात्म्ये कुलशेखरचरितं नाम पञ्चाशत्तमः सर्गः ॥ 50 ॥

❊ ❊ ❊

1. पयोधितरणाद्वयम् – क
2. नसस्कृतो ततो राजनमाययौ – क
3. तव – ख, ग
4. क, ख – मध्येलुप्तपाठः।

एकपञ्चाशत्तमः सर्गः

॥ कुलशेखरचरितम् ॥

कुलशेखरमाहात्म्यमपरं पापनाशनम्।
वक्ष्याम्याश्चर्य्यजननं सद्यो भक्तिविवर्द्धनम् ॥ 1 ॥

एकदा माधवे मासि शुक्लपक्षे नृपोत्तमः।
चतुर्दश्यां नृसिंहस्य प्रादुर्भावादिचेष्टितम् ॥ 2 ॥

भक्त्यानुकारयामास राजा श्रीकुलशेखरः।
कश्चिद् हिरण्यकशिपुः कश्चित्प्रह्लादरूपधृक् ॥ 3 ॥

विप्रः कश्चिदुपाध्यायः सभा[1] चैव तु तादृशी।
प्रह्लादशासनं तादृक् प्रह्लादोक्तिस्तु तादृशी ॥ 4 ॥

सभास्तंभे निलीयैकः स्थितो नृहरिरूपधृक्।
हस्तिपादतले दानमग्नौ निक्षेपणं पुनः ॥ 5 ॥

सर्पदंशनकर्मादि कारयित्वा ततः स्वयम्।
हिरण्यकशिपुः सायं गृहीत्वा खड्गमुत्तमम् ॥ 6 ॥

प्रह्लादं तु करे धृत्वा वामेनैव तु पाणिना।
दक्षिणेनासिमुद्यम्य प्रह्लादं प्राह मन्दधीः[2] ॥ 7 ॥

क्व ते रामः क्व ते कृष्णो यद्बलान्न शृणोषि[3] मे।
दर्शयाद्य न चेन्मूढ घातयामि न संशयः ॥ 8 ॥

इत्युक्तः पितरं प्राह प्रह्लादो भक्तिमान् वचः।
तात क्वास्ते अतिपदं तव नो युज्यते हृदि ॥ 9 ॥

सर्वदा सर्वशक्तिः स रामः सर्वमयो महान्।
तत्रायं युज्यते नैव प्रश्नस्ते इति मे मतिः ॥ 10 ॥

इत्युक्तः प्राह यद्येवं स्तम्भेऽस्मिन्वर्तते न किम्[4]।
वर्तते सत्यमेवैतदुक्तः पुत्रेण दैत्यराट् ॥ 11 ॥

हस्तेन स्तम्भं सन्ताड्य क्वास्ते सन्दर्शयाधुना।
एवं ब्रुवन्तं दैत्येन्द्रं निर्गतस्तम्भतो बली ॥ 12 ॥

---

1. प्रभावैव तु – क।
2. संदधीः – ख।
3. श्रवणेपि मे – क।
4. पर्वं च तवोऽस्मिन्वर्त्तते न किम् – क।

नृसिंहरूपो जग्राह कराभ्यां लीलया पुनः।
भूमौ निपात्य हृदयं दारयामास वै नखैः ॥ 13 ॥

ममार च ततः साधुर्हिरण्यकशिपुश्च यः।
नृसिंहरूपी जज्वालक्रोधेन महतावृतः ॥ 14 ॥

हा हा शब्दो महानासीत्तस्मिन्नद्भुतकर्मणि।
ततो राजा समुत्थाय धूपनीराजनादिभिः ॥ 15 ॥

संपूज्य नरसिंहं तं भक्तियुक्तेन चेतसा।
प्रह्लादं दर्शयामास ततः शान्तो बभूव सः ॥ 16 ॥

ऊचुः केचिदहो द्वेषादनेन पातित[1]स्त्वयम्।
कर्णे कर्णे[2] वदन्ति स्म कतिचित्तत्र वै जनाः ॥ 17 ॥

राजापि श्रुत्वा तां वार्तां मेने तानल्पचेतनात्।
तस्मिन्नेव क्षणे मासि रामकीर्त्तनमद्भुतम् ॥ 18 ॥

राजा तु कारयामास यथाविधि महाधनैः।
नृसिंहचरिते यस्तु नृसिंहोऽभूद्द्विजोत्तमः ॥ 19 ॥

दशरथः स एवात्र जातोऽन्योऽन्यनामकाः।
कौशल्या कैकयी वाथ सुमित्रा चापरा तथा ॥ 20 ॥

जानकी लक्ष्मणश्चैव भरतश्च तथाविधः।
शत्रुघ्नश्च सुमन्त्रश्च वसिष्ठाद्या महर्षयः ॥ 21 ॥

एते चान्ये च रामस्य लीलायां तत्स्वरूपिणः।
जन्मादियौवराज्यान्तं कथां ते वनवासतः[3] ॥ 22 ॥

रामप्रस्थानसमये मिथ्यादशरथस्य च।
प्राणत्यागो बभूवाथ[4] महाश्चर्यं प्रपश्यताम् ॥ 23 ॥

तेषामपि नृणां चित्ते विश्वासः [5]सुमहानभूत्।
अहो सत्यं व्रजगोप्यः पूतनारिष्टधेनुकान् ॥ 24 ॥

---

1. घातितो स्वयम् – ख।
2. कर्णा कर्णि वदन्नित्य – क, ग।
3. वन वोशिने – क।
4. विलयतो – क।
5. समुहानभूत् – ख, ग।

दृष्टानप्यनुकुर्वन्तो जग्मुः श्रीकृष्णसन्निधिम्।
अहो माहात्म्यमेतत्तु भक्तेरेव न संशयः ॥ 25 ॥

अनुकुर्वंस्तदात्मत्वं प्राप्य मुक्तिं प्रयान्ति[1] यत्।
नास्ति भक्तेरसाध्यं तु किञ्चापि भुवि वै नृणाम् ॥ 26 ॥

य इदं शृणुयाल्लोके माहात्म्यं श्रद्धयान्वितः।
सर्वान्कामानवाप्नोति भक्तिं च पुरुषोत्तमे ॥ 27 ॥

इति श्रीभगवद्भक्तिमाहात्म्ये कुलशेखरचरितं नामैकपञ्चाशत्तमः सर्गः ॥ 51 ॥

❊ ❊ ❊

द्विपञ्चाशत्तमः सर्गः

॥ रतिमतीचरितम् ॥

अथान्यं तत्प्रवक्ष्यामि [2]भक्तेर्माहात्म्यमुत्तमम्।
शृण्वतां प्रीतिजननं कृष्णभक्तिप्रदायकम् ॥ 1 ॥

एका रतिमती नाम्ना ब्राह्मणी दाक्षिणात्यजा।
पतिपुत्रविहीना सा धनिनी धर्मवत्सला ॥ 2 ॥

कदाचिद्भवने तस्याः सायंकाले समागतः।
साधुः श्रीकृष्णभक्तश्च बालगोविन्दपूजकः ॥ 3 ॥

तं दृष्ट्वा सा समुत्थाय प्रणम्य हर्षिता सती[3]।
पाद्यमाचमनीयं च पानीयमुदकं शुचि ॥ 4 ॥

अन्नं स्वादु ददौ तस्मै द्विजायातिथये मुदा।
गृहीत्वा सर्वमातिथ्यं विप्रः सन्ध्यामुपास्य ताम् ॥ 5 ॥

बालगोविन्दप्रतिमां बहिः संस्थाप्य तत्पुरः।
निवेद्य सर्वं तुष्टाव क्षणं नेत्रे निमील्य च ॥ 6 ॥

भोजयित्वाथ संस्थाप्य स्वयं हि बुभुजे पुनः।
रतिमती ददर्शाथ बालगोविन्दमद्भुतम् ॥ 7 ॥

---

1. व्रजन्तु – ख, ग। 2. भक्ति – क।
3. प्रणनाम तम् – ख, ग।

विप्रं प्राहातिभक्त्या सा कृताञ्जलिपुटा सती।
अहो ब्रह्मकुले जाता पतिपुत्रविवर्जिता॥ 8॥

कां गतिं [1]यामि नो जाने कथं स्यात्सद्गतिर्मम।
अद्यावधि च पापानि जानन्त्या न कृतानि भोः॥ 9॥

धर्मं चापि न वा कार्यं पतिपुत्रशुचार्दिता।
अद्यैवं बालं गोविन्दं दृष्ट्वा मे मतिरुत्थिता॥ 10॥

एतादृशममुं देवं कारयित्वा स्ववेश्मनि।
संस्थाप्य पूजयिष्यामीत्ययाज्ञया[2] चेद्भवादृशाम्॥ 11॥

तन्मन्त्रं देहि मे विप्र पूजोपकरणं वद।
शिल्पिनं च समाहूय कारयामि गृहोत्तमम्॥ 12॥

तावत्त्वयात्र वस्तव्यं प्रसन्नो भव सुव्रत।
इत्युक्तो ब्राह्मणः सोऽथ प्राह तां ब्राह्मणस्त्रियम्॥ 13॥

पूर्वकर्मविपाकेन विधवा त्वमपुत्रिणी।
इदानीं त्वं तु धन्यासि यस्यास्ते मतिरीदृशी॥ 14॥

दृष्ट्वेमं बालगोविन्दं जाता[3] ते भक्तिरुत्तमा।
न मन्त्रो नैव सामग्री भक्तिमार्गेण[4] केशवः॥ 15॥

सुप्रसन्नो ददातीष्टं प्रेमरज्जुनियन्त्रितः।
श्रीकृष्णाय नमश्चेति[5] गृहाण मन्त्रमुत्तमम्॥ 16॥

पत्यौ[6] पुत्रे यथा प्रेम तथा स्याद्यदि केशवे।
तदा शीघ्रं स गोविन्दो ददात्यभिमतं फलम्॥ 17॥

तावत्तिष्ठामि त्वद्भक्त्या शीघ्रमानय शिल्पिनम्।
एवमुक्ता रतिमती शीघ्रमाहूय शिल्पिनम्॥ 18॥

दर्शयामास[7] गोविन्दं प्रतिमामीदृशीं कुरु।
इत्याज्ञाप्य द्विजं सा तु तर्प्पयित्वा धनाम्बरैः[8]॥ 19॥

---

1. ख मध्ये लुप्तः पाठः।
2. इत्याज्ञां देहि सुव्रत – ख, ग।
3. जाता – क, ग।
4. भक्त्या – क।
5. नर्मैस्त्वे – ख।
6. पति – ख।
7. दर्शायित्वाथ – क, ग।
8. धना स्वरैः – क।

विससर्ज शुभाचारा[1] गोविन्दहृदया[2] सती।
गते विप्रे रतिमती गोविन्दप्रतिमां शुभाम्॥ 20॥

स्थापयामास सद्भक्त्या[3] महोत्सवपुरःसरम्[4]।
एकपुत्रैव जननी तं बालमिव सर्वदा॥ 21॥

कर्मणा मनसा वाचा मुदा परिचचार सा।
विभीतकफलैः सार्द्धमरिष्टफलमालया॥ 22॥

अलञ्चकार गोविन्दं दृष्टिदोषभयेन सा।
सर्वालङ्करणैर्युक्तं मुखं कज्जललाञ्छितम्॥ 23॥

दृष्टिदोषोपशान्त्यर्थं मातेव पुत्रवत्सला।
चकार शीतसमये[5] ददावुष्णं तथौषधम्॥ 24॥

रात्रौ सायं तु गोविन्दं संस्थाप्य हृदये[6] पुनः।
आच्छाद्याञ्चलवस्त्रेण ततः सुष्वाप सुव्रता॥ 25॥

कृत्काष्ठनिर्मितं चैव बालक्रीडनकं तु सा।
तस्याग्रे स्थापयित्वाथ क्रीडयन्ती जहर्ष च॥ 26॥

प्रातःकालौदनं चैव तैलाभ्यङ्गादिकं तदा।
आह्लादभाषणं वापि कुर्वन्ती सा मुमोद ह॥ 27॥

एवं तु पुत्रबुध्या सा पूजयन्ती जगत्पतिम्।
गते कतिपये काले शृण्वन्ती चरितं हरेः॥ 28॥

श्रीमद्भागवतं नाम पुराणं द्विज[7]वक्त्रतः।
नवनीतस्य चौर्यं तु यशोदाया विभीषिका॥ 29॥

पलायनं भगवतो मातुश्चाप्यनुधावनम्।
श्रीकृष्णग्रहणं चैव मात्रा ताडनमेव च॥ 30॥

श्रुत्वैतानि रुरोदार्ता पुत्रस्नेहेन तत्र सा।
ततो यशोदया दाम्ना बद्धः कृष्णो दृढं रुषा॥ 31॥

---

1. तदा विप्रे – ख।
2. हृदि संस्मरन् – ख, ग।
3. भक्त्या सा – क।
4. विधानतः – क।
5. सप्तये – ख।
6. बाल वद्हृदि – ख।
7. विप्र वन्ततः – क।

शृण्वन्त्येवं रतिमती हा हा कृष्णेति भाषिणी।
मूर्च्छिता[1] पतिता भूमौ प्राणांस्तत्याज तत्क्षणात्॥ 32॥

हा हा कृत्वा ततः सर्वे जनास्तत्र समागताः।
कश्चिदुत्थापयामास नोत्तस्थौ सा मृता यतः॥ 33॥

कृष्णप्रेमवशादेषा मृता रतिमती पुनः।
जगाम कृष्णसान्निध्यं यशोदेव न संशयः॥ 34॥

न योगो न तपो ध्यानं न ज्ञानं नापि सत्क्रियाः।
प्रेम्णैव रतिमती मुक्ता भक्तेर्माहात्म्यतो ध्रुवम्॥ 35॥

बलिगेहे गतो विष्णुर्हन्तुं वामनरूपधृक्।
तं दृष्ट्वा बलिपुत्री सा मनसैवमचिन्तयत्॥ 36॥

अहोऽतिसुन्दरो बालो धन्या माता न संशयः।
यद्येवं तनयो मे स्यात्पाययित्वा[2] स्तनं पुनः॥ 37॥

कृतार्था स्यामिति मुदा सङ्कल्पं मनसा[3]करोत्।
सैवागत्य व्रजे जाता पूतना बालघातिनी॥ 38॥

पाययित्वा स्तनं द्वेषाद्यशोदागतिमाप सा।
एवं द्वेषादपि गता मुक्तिं राक्षसकन्यका॥ 39॥

किं पुनर्ब्राह्मणी[4] पुण्या कृष्णप्रेमपरायणा॥ 40॥

इति श्रीभगवद्भक्तिमाहात्म्ये रतिमतीचरितं नाम द्विपञ्चाशत्तमः सर्गः॥ 52॥

❊ ❊ ❊

त्रिपञ्चाशत्तमः सर्गः

॥ पुरुषोत्तमपुरराजचरितम्॥

पुरुषोत्तमपुरे राजा बभूव वैष्णवोत्तमः।
शान्तो दान्तो दयायुक्तो भक्तिमान्पुरुषोत्तमे॥ 1॥

---

1. मुमुर्च्छ – क।
2. पापयिष्यामि स्तनम् – ख।
3. कृतम् – ख।
4. र्ज्जास्तनी – क।

एकदा स नृपो गेहे चिक्रीडा[1]क्षैश्चतुष्पदीम्।
अस्मिन्नेव क्षणे श्रीमज्जगन्नाथस्य पूजकः॥ 2॥

पूजां कृत्वा तत्प्रसादभूतां मालां करेण च।
समादायागतो राज्ञे दातुं तस्थौ ततो नृपः॥ 3॥

क्रीडासक्तेन मनसा वामं हस्तं प्रसारयन्[2]।
मालां गृहीतुमुद्युक्तः स तदा पूजको द्विजः॥ 4॥

निवृत्तो न ददौ मालां तदा तस्मै महीभुजे।
अयं राज्यमदाविष्टो यद्वामेनेह पाणिना॥ 5॥

मालां गृहीतुमुद्युक्तस्तस्मान्नास्मै ददाम्यहम्।
इति निश्चित्य स गतः पूजको निजमन्दिरम्॥ 6॥

राजापि स्मृत्वा तं विप्रं निवृत्तद्यूतमानसः।
पश्चात्तापेन महता खिन्नोऽभूदतिचिन्तया॥ 7॥

तत्याज द्यूतमक्षं च महाशोकपरोऽभवत्।
गर्हयन्नात्मनात्मानं न लेभे स रतिं क्वचित्॥ 8॥

जगन्नाथप्रसादस्य मालाया अवमाननात्[3]।
दण्डः समुचितो मेऽद्य इति सञ्चित्य भूपतिः॥ 9॥

स्वहस्तं दक्षिणं छेतुं मनश्चक्रे नृपोत्तमः।
पिशाचव्याजतो हस्तं स्वयं वै ह्रदेयाम्यहम्॥ 10॥

इति निश्चित्य मनसा[4] महाशोकाकुलोऽभवत्।
तं दृष्ट्वातिकृशं दीनं भृत्यो राज्ञोऽतिवल्लभः॥ 11॥

बद्धाञ्जलिपुटो भूपं पप्रच्छ रहसि स्थितः।
महाराज कृतश्चिन्ता तवेयं कार्श्य[5]कारिणी॥ 12॥

ब्रूहि मे यदि योग्यं स्यात्तस्योपायं[6] करोम्यहम्।
इति श्रुत्वा स नृपतिस्तं प्राह कपटाद्वचः॥ 13॥

---

1. अज्ञैश्चतुः – ख।
2. प्रसारय च – क, ग।
3. अवमानतः – ख।
4. राजा – क।
5. कार्श्यकारिकी – ख।
6. तदुपायम – क।

अहो रात्रौ समागत्य पिशाचोऽतिभयङ्करः।
शयानं दण्डहस्तो मां बिभीषयति नित्यशः॥ 14॥

तस्मान्मे चिन्तयानैव निद्रा नापि सुखं क्वचित्।
अद्य[1] त्वं शयनागारे तिष्ठ तावत्स्वपिम्यहम्॥ 15॥

तदा द्रक्षसि तं प्रेतं येनेयं मम दुर्दशा।
इत्युक्तः स तु भृत्यो वै राजपर्यङ्कसन्निधौ॥ 16॥

निशि [2]खड्गमुपादाय तस्थौ तत्परमानसः।
अथार्द्धरात्रिसमये स भृत्यो निद्रयाकुलः॥ 17॥

किञ्चिदुपविशन्नेव सुष्वापाथ नृपस्तदा।
स्वशय्यायां निजाकारं वस्त्रं संस्थाप्य यत्नतः॥ 18॥

बहिरागत्य भित्तेस्तु गवाक्षद्वारमार्गतः।
दक्षहस्तेन दण्डेन ताडयामास चांशुकम्॥ 19॥

राजाकारं स्वशय्यायां वीक्ष्य तस्थौ स पुरुषः।
ददर्श हस्तदण्डेन ताडयन्तं नृपासनम्॥ 20॥

खड्गमुद्यम्य भृत्योऽपि करं[3] चिच्छेद सत्वरम्।
ततश्छिन्नत्वे[4] स्वहस्ते तु राजा गृहमुपागतः॥ 21॥

दृष्ट्वा तं छिन्नहस्तं तु स भृत्यो [5]भूपतेर्भयात्।
वेपमानोऽब्रवीन्नैव बद्धाञ्जलिपुटः स्थितः॥ 22॥

तमाह भूपतिस्तत्र नापराधोऽस्ति कश्चन।
मयैवैतत्कृतं सर्वं स्वहस्तच्छेदनाय भोः॥ 23॥

जगन्नाथप्रसादस्तु मोहाद्वामेन पाणिना।
याचितोऽतस्तु दण्डोऽयं हस्तच्छेदो मया कृतः॥ 24॥

मा भैस्त्वं मम भृत्योऽसि प्रियः प्राणसमः सखा।
इत्युक्त्वा सोऽवशिष्टं तु निनाय[6] तां निशां नृपः॥ 25॥

---

1. अथ – क, ग।
2. निष्काशखड्गहस्तस्तु – क।
3. हस्तं – क।
4. चित्रे – ख।
5. भूपतिं – क।
6. निन्ये – ख, क।

अथ तस्मिन्क्षणे स्वप्नं[1] ददर्श पूजको द्विजः।
जगन्नाथं कृपासिन्धुं भाषमाणमिदं वचः॥ 26॥

अहो स नृपतिस्तस्मिन्दिने यदवमानकृत्।
मालाया[2] मम तस्यास्य पश्चात्तापो महानभूत्॥ 27॥

प्रमादात्तस्य तज्जातं वामहस्तप्रसारणम्।
इदानीं स तु तद्दोषाच्छेदयामास दक्षिणम्॥ 28॥

करं स्वकीयं[3] नृपतिर्मद्भक्तोऽतीव मत्प्रियः।
अतस्त्वं प्रातरेवाशु प्रसादं च स्रजं मम॥ 29॥

गृहीत्वा देहि भूपाय ततः स्वस्थो भविष्यति।
यदा छिन्नेन हस्तेन मत्प्रसादं ग्रहीष्यति॥ 30॥

तदा तस्मिन् क्षणे तस्य हस्तः सम्यग्भविष्यति।
तस्य यद्धस्तखण्डं तु वर्तते खलु तद्गृहे॥ 31॥

तदानयित्वा वाट्यां[4] मे रोपयाशु ततः पुनः।
दमनो मे प्रियो[5] वृक्षो भविष्यति न संशयः॥ 32॥

एवमुक्तस्ततो देवपूजकोऽपि समुत्थितः।
प्रातः प्रसादमादाय ययौ राजनिकेतनम्॥ 33॥

राजापि तं द्विजं दृष्ट्वा समुत्थायातिभक्तितः।
प्रणनाम ततः सोऽपि स्वप्नमुक्त्वाथ पूजकः॥ 34॥

मालाप्रसादं प्रददौ कराभ्यां नृपतिस्तदा।
गृहीतुमुत्थितो नत्वा हस्ताभ्यां दक्षिणस्तदा॥ 35॥

करः प्राग्वदभूत्तस्य जगृहे तेन तां स्रजम्।
ततः सर्वे प्रमुदिता दृष्ट्वा तत्परमाद्भुतम्॥ 36॥

पूजको नृपतेः पाणिं छिन्नं नीत्वा ययौ गृहम्।
वाट्यां स रोपयामास ततोऽभूद्दमनस्तरुः॥ 37॥

---

1. रात्रौ – ख।
2. मम माला कृतः – ख, क।
3. त्वं कार्य – क।
4. वाह्यां – ख।
5. प्रज्ञो – ख।

तत्पत्रेण च पुष्पेण पूजितः पुरुषोत्तमः।
अद्यापि वरदो भूत्वा ददात्यभिमतं नृषु॥ 38॥

तस्माद्भक्ते समं नैव किञ्चिदन्यत्प्रसादनम्।
विद्यते श्रीहरेरेतज्ज्ञात्वा[1] भक्तिं समाचरेत्॥ 39॥

इत्येतत्कथितं भक्तेर्माहात्म्यं परमाद्भुतम्।
[2]श्रद्धयेदं नरः श्रुत्वा भक्तिं प्रापप्नोत्यनुत्तमाम्॥ 40॥

इति श्रीभगवद्भक्तिमाहात्म्ये पुरुषोत्तमपुरराजचरितं नाम त्रयःपञ्चाशत्तमः सर्गः॥ 53॥

* * *

चतुःपञ्चाशत्तमः सर्गः

॥ कर्माचरितम्॥

अथान्यत्संप्रवक्ष्यामि भक्ते[3]र्माहात्म्यमुत्तमम्।
महदाश्चर्यजननं महाभक्तिप्रवर्द्धनम्॥ 1॥

पश्चिमे पुष्करप्रान्ते कर्मा नाम्नीतिविश्रुता।
ब्राह्मणी पतिपुत्राभ्यां रहिता बन्धुवर्जिता॥ 2॥

निर्द्धनापि शुभाचारा भिक्षामात्रपरायणा।
एकदा पर्यटन्ती सा भिक्षार्थं ब्राह्मणी सती॥ 3॥

श्रीजगन्नाथमाहात्म्यं पुराणं शुश्रुवे क्वचित्।
तत्र गत्वा जगन्नाथं दृष्ट्वा सर्वेऽतिपापिनः॥ 4॥

[4]मुच्यन्ते पापराशिभ्यः सत्यं सत्यं न संशयः।
किञ्चित्तत्र तु यः कश्चिदन्नं तस्मै न्यवेदयेत्॥ 5॥

भुक्त्वान्नं परमप्रीत्या तस्मै तुष्यति वै हरिः।
इह भुक्त्वाखिलान्भोगानन्ते प्राप्नोति सद्गतिम्॥ 6॥

इति श्रुत्वा पुराणं सा माहात्म्यं भगवद्विभोः।
तत्रैव गत्वा स्थास्यामि यावज्जीवं न संशयः॥ 7॥

---

1. तद्ज्ञात्वा – ख।
2. यद्वच्छेदं – क।
3. भक्ति – क।
4. नश्यन्ति – क, ग।

तावदद्यादि यत्किंचिल्लक्ष्यामि भिक्षया त्वहम्।
सर्वं निवेद्य भोक्ष्यामि व्रतमेतत्कृतं मया ॥ 8 ॥

एवं निश्चित्य मनसा भिक्षाटनपरायणा।
प्राप्तमात्रं तदारभ्य निवेद्य हरये[1] मुदा ॥ 9 ॥

स्वयं सा बुभुजे नित्यं भक्तिभावपरायणा।
अथैकस्मिन्दिने श्रीमज्जगन्नाथं दिदृक्षवः ॥ 10 ॥

आगता वैष्णवास्तत्र मार्गक्रमवशादथ।
तद्ग्रामीणा अपि जनास्तैस्साकं गन्तुमुद्यताः ॥ 11 ॥

सापि कर्मेति विख्याता ब्राह्मणी वैष्णवैः सह।
जगाम श्रीजगन्नाथं द्रष्टुं भक्तिपरायणा ॥ 12 ॥

तत्र गत्वा जगन्नाथं दृष्ट्वा हृष्टा बभूव सा[2]।
भुक्त्वामृतसमं तत्र प्रसादान्नं मुमोद ह ॥ 13 ॥

एवं दिनद्वये जाते न स्वार्थं सा पपाच वै।
अतोऽन्नं हरये नैव ददौ भुक्तं स्वयं पुनः ॥ 14 ॥

तृतीये दिवसे सा तु सस्मार निजकर्म तत्।
ततोऽतिचिन्तयाविष्टा महाशोकपराभवत् ॥ 15 ॥

आह स्वमानसे धिङ्मां यददत्त्वा तु विष्णवे।
भुक्तं दिनद्वयं चान्नं[3] तस्मादद्य करोमि किम् ॥ 16 ॥

इति सञ्चिन्त्य मनसा कश्चित्पप्रच्छ वैष्णवम्।
किमद्याहं करिष्यामि तद्ब्रूहि भगवन्मम ॥ 17 ॥

निवेद्य हरये चान्नं भोक्तव्यमिति मे व्रतम्।
तदन्नं दिनयुग्मं तु भुक्तं नैवेद्यभोजनात् ॥ 18 ॥

अतः परं दत्त्वान्नं जगन्नाथाय विष्णवे।
न भोक्तुमुत्सहे तस्माद्यथायोग्यं वदस्व भोः ॥ 19 ॥

इति श्रुत्वा वचस्तस्या वैष्णवो वाक्यमब्रवीत्।
यद्येवं ते दृढा भक्तिस्तदा नैवास्ति दूषणम् ॥ 20 ॥

---

1. पुनः – ख।
2. ह – क।
3. नामम्नेति – ख, ग।

कुरुष्व निजहस्तेन पाकं संभोज्य केशवम्।
स्वयं भुङ्क्ष्व न सन्देहो भक्त्या तुष्यति वै हरिः ॥ 21 ॥

इति श्रुत्वा वचस्तस्या कर्मा साति[1]प्रहर्षिता।
भिक्षया तण्डुलादीनि समादाय निजस्थले ॥ 22 ॥

पक्त्वा नित्यं निवेद्यास्मै बुभुजे भक्तितत्परा।
एकस्मिन्दिवसे सा तु महाभोगं ददर्श ह ॥ 23 ॥

दृष्ट्वा सर्वरसोपेतं परमान्नमनल्पकम्।
मनसा चिन्तयामास सा विचारपरायणा ॥ 24 ॥

अहो सर्वं रसोपेतमन्नं भुङ्क्ते[2] च स पुनः।
ददाम्यहं कदन्नं वै कथं भोक्ष्यत्ययं प्रभुः ॥ 25 ॥

अतोऽहं प्रातरुत्थाय कृत्वान्नं कृशरं द्रुतम्।
भोजयामि तदा प्रातः क्षुधया भोक्ष्यति प्रभुः ॥ 26 ॥

विचार्यैवं हृदा नित्यं प्रातरुत्थाय सा पुनः।
अकृत्वा शौचमस्नात्वा सम्ममार्ज स्थलं पुनः ॥ 27 ॥

मृत्प्राात्रे कृशरान्नं वै दत्त्वा सम्पाद्य भक्तितः।
निवेद्य हरये पश्चात्स्वयं स्नानं चकार सा ॥ 28 ॥

स्नात्वा दृष्ट्वा जगन्नाथं पश्चात्तद्बुभुजे स्वयम्।
एवं भक्तिपरा सा तु कृशरान्नं ददौ मुदा ॥ 29 ॥

तद्भक्तिवशगो नित्यं जगन्नाथः कृपामयः।
बुभुजे कृशरान्नं तु तस्याः अन्तरिक्षगः ॥ 30 ॥

एवं गतेषु कालेषु कदाचित्कोऽपि वैष्णवः।
कर्मागृहे समायातः कृशरान्नार्पणक्षणे ॥ 31 ॥

अनाचारेण तं दृष्ट्वा हरेरन्नार्पणं स तु।
जगर्ह कर्मां साधुः स आचारं चाप्यशिक्षयत् ॥ 32 ॥

किमिदं कुरुषे मूढे त्वनाचारनिवेदनम्।
नेदं भोक्ष्यति देवेशस्तस्मादाचारिणी[3] भव ॥ 33 ॥

---

1. नाम्नेति – ख, ग।
2. भुक्त्वानत पुनः – ख।
3. आचारतोर्ष्य्य – ख, ग।

उषस्युत्थाय सम्मार्ज्य गोमयेनोपलिप्य च।
गृहं तत्र शुचिः स्नात्वा पक्त्वा भक्ष्यं समर्प्य च॥ 34॥

इत्युक्त्वा स गतः साधुः कर्मा चिन्तामवाप सा।
अहोऽद्यावधि यद्दत्तं हरयेऽन्नं मुदा मया॥ 35॥

न भुक्तं तत्तु हरिणा ममानाचारदूषितम्।
धिगस्तु मां ततो मूढां क्षम्यतां मे हरिः प्रभुः॥ 36॥

इति निर्भर्त्स्य चात्मानमन्यस्मिन्दिवसे तु सा।
स्नात्वा चैवार्द्रवस्त्रेण संपाद्यान्नं शुचौ शुचिः॥ 37॥

बहुप्रकारं तद्भक्त्या जगन्नाथाय चार्पयत्।
अथागत्य हरिस्तस्या बुभुजे भक्तियन्त्रितः॥ 38॥

परन्तु तस्या आचारकरणे कष्टदर्शनात्।
स्वयमुद्विग्नचित्तोऽभूज्जगन्नाथः कृपामयः॥ 39॥

स्वमठे पूजकैर्दत्तमन्नं नैवाददे प्रभुः।
यतो मठात्प्रणालीतो [1]जलं नैवागमद्बहिः॥ 40॥

किञ्चोच्छिष्टं मुखे लग्नं दर्शयामास पूजकान्।
जगन्नाथस्ततः सर्वे दृष्ट्वा तत्परमाद्भुतम्॥ 41॥

तत्र ते पूजकाश्चिन्तां सम्प्राप्यातिमहत्तराम्।
बुभुक्षिताः स्थिता रात्रौ ददृशुः स्वप्नमुत्तमम्॥ 42॥

जगन्नाथः समागत्य भाषतेऽस्मानिदं वचः।
अहोऽद्यान्नं न भुक्तं यच्छृणु तस्य तु कारणम्॥ 43॥

[2]इहास्ति कर्मानाम्नी वै ब्राह्मणी मम वल्लभा।
तया निवेदितं नित्यं कृशरान्नमुषस्यहम्॥ 44॥

भुञ्जानोऽतीव संतुष्टस्तद्भक्त्या नात्र संशयः।
तां तु कश्चिन्नुवाचाथ मूढेऽनाचारतः कथम्॥ 45॥

कृशरान्नं ददसि तन्न भोक्ष्यति हरिस्त्विदम्।
तस्मादाचारपूर्वं हि कृत्वान्नं हरयेऽर्पय॥ 46॥

---

1. वारि – ख।
2. सायमस्ति कर्मानाम्नेति मद्भक्त्या ब्राह्मणी मत्परायणा – ख।

इति तस्य वचः श्रुत्वा कर्मा चातीव दुःखिता।
महाकष्टेन सम्पाद्य नैवेद्यं मे समर्पयत्॥ 47॥

तन्नैवेद्यमहं भुक्त्वा तद्दुःखेनातिदुःखितः।
युष्माभिर्दत्तमप्यन्नं न स्पृष्टं पाणिना मया॥ 48॥

मम चोद्विग्नमनसा विस्मृतं [1]सुखमार्जनम्।
तत उच्छिष्टमन्नं मे लग्नमेतद्धि वर्तते॥ 49॥

तस्माद्भवन्तः शृण्वन्तु संभोक्ष्यामि निजेप्सितम्[2]।
सा कर्मातीव मे भक्त्या यथापूर्वं यदृच्छया॥ 50॥

कृशरान्नं ददात्येषा न तु क्लिश्यतु मत्कृते।
अद्यारभ्यैष नियमो मम सर्वे निशम्यताम्[3]॥ 51॥

कर्मायाः कृशरान्नं तु पूर्वं भोक्ष्याम्यहं मुदा।
ततः परं भवद्दत्तमन्येषां तु निवेदितम्॥ 52॥

भोक्ष्याम्यत्र न सन्देहस्तस्मात्कुरु मदीरितम्[4]।
उक्तवान्यः सदाचारं तस्मै तेन समं पुनः॥ 53॥

भवन्तो यान्तु तद्गेहे कर्मा सम्बोधयन्तु वै।
कृशरान्नं यथापूर्वं कृत्वा मह्यं ददातु सा॥ 54॥

ततोऽहं परितुष्टः स्यां भोक्ष्यामि भवदर्पितम्।
एवं दृष्ट्वा तु ते स्वप्नं वदन्तं पुरुषोत्तमम्॥ 55॥

प्रातरुत्थाय चैकत्र भूत्वा[5] गत्वा तदालयम्।
तं वैष्णवं समादाय सदाचारप्रवादिनम्[6]॥ 56॥

कृत्वाग्रतस्तु ते सर्वे कर्मां प्राहुर्विनीतवत्।
कर्मादेवि नमस्तुभ्यं धन्यासि त्वं शुचिव्रते॥ 57॥

त्वदर्थं खिद्यते देवः श्रीमान्वै पुरुषोत्तमः।
नैवेद्यं त्वं यथापूर्वं[7] दत्तवत्यसि सुव्रते॥ 58॥

---

1. मुख।
2. निजेक्षितम् – ख।
3. विनश्यताम् – ख।
4. मुदीरितम् – ख।
5. भुक्त्वा – ख।
6. प्रवादिनाम्।
7. सर्वं – ख, ग।

तथैव देहि देवाय माचारं कुरु कष्टदम्।
त्वत्क्लेशात्कष्टमाप्नोति जगन्नाथो महाप्रभुः ॥ 59 ॥

तस्मात्त्यज श्रमं भद्रे निवेदय यथारुचि।
अनेनोक्तं तु यत्पूर्वमाचारादन्नमर्पय ॥ 60 ॥

तदभक्तस्य जानीहि भक्तौ नाचारचिन्तनम्।
तवान्नं प्रथमं भुक्त्वा कृशरान्नं ततः परम् ॥ 61 ॥

अन्यार्पितं प्रसादं तु ग्रहीष्यति तदा हरिः।
अद्यारभ्य ततस्त्वं तु स्वेच्छयान्नं विधाय वै ॥ 62 ॥

समर्पय यथापूर्वं जगन्नाथाय भक्तितः।
इत्येतदर्थमायाता वयं सर्वे तवाश्रमम् ॥ 63 ॥

अद्यारभ्य कुरुष्वैतत्प्रार्थयामो वयं मुहुः।
इति श्रुत्वा वचस्तेषां कर्मादेव्यतिहर्षिता ॥ 64 ॥

उवाच वचनं तांस्तु प्रणम्य विहिताञ्जलिः।
अहो न जानेऽहं किञ्चिदाचारं वा तथापरम् ॥ 65 ॥

भवादृशोक्तमेवाहं श्रुत्वाकारिषमर्चनम्।
अतः परं भवन्तस्तु यद्वदन्ति करोमि तत् ॥ 66 ॥

इत्युक्त्वा सा समुत्थाय नैवेद्यस्य च साधनम्।
कर्त्तुं व्यवसिता साध्वी कर्मादेव्यतिभक्तितः ॥ 67 ॥

पूर्ववत्कृशरान्नं सा सम्पाद्य हरयेऽर्पयत्।
तेऽपि वै पूजका विप्राः समागत्य स्वमन्दिरम् ॥ 68 ॥

कृताह्निका[1] सर्वरसमन्नं सम्पाद्य भक्तितः।
निवेदयामास मुदा जगन्नथाय हृष्टवत् ॥ 69 ॥

यथापूर्वं स जग्राह तत्सर्वं पुरुषोत्तमः।
मठप्राणालिकाद्वाराद्बाहिर्यातं[2] जलं तदा ॥ 70 ॥

दृष्ट्वा मुमुदिरे सर्वे यथापूर्वं च पूजकाः।
एवं प्रभावः कर्माया भक्तेर्वै वर्णितो मया ॥ 71 ॥

---

1. कृताद्रिका – क।
2. जातं – ख, ग।

अद्यापि तस्या कृशरमत्ति पूर्वं जनार्दनः।
तस्माद्भक्तिर्हि सर्वेषां कर्मणां वै गरीयसी ॥ 72 ॥

तया सन्तोष्य बहुशस्तेरुः संसारसागरम् ॥ 73 ॥

इति श्रीभगवद्भक्तिमाहात्म्ये कर्माचरितं नाम चतुःपञ्चाशत्तमः सर्गः ॥ 54 ॥

❊ ❊ ❊

पञ्चपञ्चाशत्तमः सर्गः

॥ कन्याद्वयचरितम् ॥

अथान्ययोः प्रवक्ष्यामि कन्ययोर्भक्तिचेष्टितम्।
यदाकर्ण्य नरो भक्तिं लभते नात्र संशयः ॥ 1 ॥

एका ग्रामे तु कन्यासीदपरा राजपुत्रिका[1]।
उभयोः परमाप्रीतिर्नृपजा सेविकापरा[2] ॥ 2 ॥

एकदा तत्र कोऽप्यासीद्वैष्णवोऽतीव भक्तिमान्।
तं द्रष्टुं राजमाता तु कन्याभ्यां सहिता ययौ ॥ 3 ॥

तत्र गत्वाथ सम्पूज्य वैष्णवं भक्तितत्परा।
प्रणम्य चलिता गेहं राज्ञी कन्याद्वयं तथा ॥ 4 ॥

वैष्णवं[3] तं तु विज्ञान प्रार्थयामास भूरिशः।
पूजार्थं देहि मे देवं गुरो साधो नमोस्तुते ॥ 5 ॥

इति श्रुत्वा तयोर्वाक्यं [4]वैष्णवः सस्मितं मुदा।
शिलाखण्डद्वयं ताभ्यां कन्याभ्यां प्रददौ हसन् ॥ 6 ॥

आह नाम तयोः सुाधश्शिल्लपिल्लेति [5]हास्यतः।
ते उभे भक्तितस्ते द्वे शिलाखण्डे प्रगृह्य च ॥ 7 ॥

प्रणम्य तं गुरुं साधुं [6]समागत्य निजालये।
पूजयामासतुस्ते द्वे कन्ये भक्त्या शिलाद्वयम् ॥ 8 ॥

---

1. कन्यका – क।
2. सेवनी – ख, ग।
3. एवं चैतं तु विनयात् – क।
4. स एव वैष्णवोत्तमः – ख।
5. हासितः – ख।
6. सम्मा – क।

तद्भक्त्या भगवांस्तत्र सर्वव्यापी निरन्तरम्[1]।
प्रति जग्राह पूजां तां ताभ्यां निष्कामतः कृताम्॥ 9॥

अत्रेतिहासमुभयोः प्रत्येकं कथयाम्यहम्।
ग्रामाधीशस्य कन्याया राजपुत्र्यास्तथैव च॥ 10॥

ग्रामाधीशस्य दायादः शत्रुभूतस्तु चैकदा।
बलेन महता युक्तः समागत्याथ तद्गृहम्॥ 11॥

सर्वं लुण्ठितवांस्तत्र कन्याया अपि सा शिला।
मन्जूषायां स्थिता यत्र सापि तेन च लुण्ठिता॥ 12॥

ग्राम्याधीशादयः सर्वे धनशोकेन दुःखिताः।
राजद्वारं ययौ तस्मै निवेदयितुमातुराः॥ 13॥

सा कन्या गृहमध्ये तु तामदृष्ट्वा निजां शिलाम्।
शोकार्ता प्ररुरोदाथ त्यक्त्वाहारादिकाञ्छुचा॥ 14॥

पित्रा मात्रा बन्धुवर्गैर्बोधितापि दृढव्रता।
न स्वीचकार[2] पानीयमपि चान्नस्य का कथा॥ 15॥

ततस्तु बान्धवाः सर्वे तामुचुः कन्यकां पुनः।
गच्छ तस्य गृहं त्वं तु तामानय शिलां निजाम्॥ 16॥

नोचेदन्यो नास्ति यत्नः कश्चित्तव शिलां प्रति।
इति श्रुत्वा वचस्तेषां सा कन्याऽतीव हर्षिता॥ 17॥

शूद्रीं काञ्चित्समादाय ययौ दायादमन्दिरम्।
दायादश्चापि तां द्वारि न्यवारयत यत्नतः॥ 18॥

किमर्थमागता चात्र[3] वद मा गच्छ मन्दिरे।
इति श्रुत्वा वचस्तस्य दायादस्यातिनिष्ठुरम्॥ 19॥

उवाच वचनं कन्या देवं मे नीतवानसि।
तं देहि मे तदर्थं ते हारोऽहे समुपागता॥ 20॥

इति श्रुत्वा वचस्तस्या दायादः पुनरब्रवीत्।
मिथ्यापाखण्डमेतत्ते गच्छ मूढे गृहं स्वकम्[4]॥ 21॥

---

1. निरन्जरः – क।
2. त्वां चकार – क।
3. चात्रैव – क।
4. स्वभवने प्रति – क।

नोचेद्देवोऽस्ति सत्यस्ते तं समाहूय तेऽन्तिकम्।
आगमिष्यति तं नीत्वा गमिष्यसि निजं गृहम्॥ 22॥

इति श्रुत्वा वचस्तस्य कन्याऽनाहारतः कृशा।
रुरोदार्तस्वरेणैवं व्याजहार पुनः पुनः॥ 23॥

ततः स भगवांस्त्वत्र मञ्जूषायां स्थितः प्रभुः।
मञ्जूषया सहोत्प्लुत्य कन्याग्रे समुपागतः॥ 24॥

तां दृष्ट्वा निजमञ्जूषां सा मुमोद दृढव्रता।
गृहीत्वा चलिता गेहमथ तत्रातिपामरः॥ 25॥

दायादः प्रत्युवाचाथ[1] किमत्रास्तीति दर्शय।
तदाकर्ण्य तु सा शीघ्रं दर्शयामास तां शिलाम्॥ 26॥

दृष्ट्वा शिलां तु दायादो निवृत्तः स्वगृहं गतः।
सा कन्यापि शिलां नीत्वा समायाता पितुर्गृहम्॥ 27॥

सम्पूज्य शिल्लपिल्लन्तु निवेद्यान्नं ततः स्वयम्।
उपोषिता हि सा कन्या[2] बुभुजे प्रीतमानसा॥ 28॥

एवं प्रभावः कन्यायाः वक्ष्ये राजसुताकथाम्।
राजकन्यापि तां यत्नाच्छिलां संपूजयन्त्यहो॥ 29॥

तस्थौ पितृगृहे काले विवाहं[3] तत्पिता मुदा।
कारयामास नृपतेः पुत्रेण परमादरात्॥ 30॥

विवाहानन्तरं पत्नीं राजपुत्रो[4] निजं गृहम्।
निन्ये तत्रापि सा कन्या शिल्लपिल्लं जहौ न च॥ 31॥

मञ्जूषायां तु संस्थाप्य धृत्वा स्वशिविकोपरि।
आगता पतिगेहेऽपि राजपुत्र्यतिभक्तितः॥ 32॥

शिल्लपिल्लेति नाम्ना वै पूजयन्ती[5] सदा हरिम्।
एवं गतेषु कालेषु कदाचिद्दैवयोगतः॥ 33॥

---

1. समुणगत्य – क।
2. अहं कन्या सुभुजेऽन्नं तदर्प्पिम् – क।
3. समये पिता – क।
4. समादाय गृहं ययौ – क।
5. देवं पृजयतीस्पदे – क।

तृतीयदिवसे प्राप्ते पतिस्तस्याः समागतः।
निष्कास्य खड्गं मूढात्मा[1] त्रासयामास निष्ठुरम्॥ 45॥

किमेवं[2] खिद्यसे मूढे यद्येवं न करिष्यसि।
मदुक्तं[3] पश्य मे खड्गं हन्मि त्वां नात्र संशयः॥ 46॥

इति भर्तृवचः श्रुत्वा प्रहस्य सहसैव[4] सा।
अहोऽस्माकं तु कर्त्तव्यं यत्तदेव कृतं त्वया॥ 47॥

मर्तव्यमेव तं देवं विना नास्त्यत्र संशयः।
तद्भवद्भिर्विना यत्नं मम सम्पादितं स्वयम्॥ 48॥

इति श्रुत्वा वचस्तस्याः पत्न्याः स राजपुत्रकः।
चिन्तयामास मनसा किं करोमि ततः परम्॥ 49॥

मरणे कृतसङ्कल्पा शिलाखण्डे विना कुधीः।
[5]कथमस्याः शिलाप्राप्तिर्भविष्यति करोमि तत्॥ 50॥

इति निश्चित्य तां स्नेहात्पुनराह नृपात्मजः।
शिलाऽगाधे जले क्षिप्ता कथं प्राप्स्यसि तां शुभे॥ 51॥

गृहाणान्यां शिलां मत्तः प्रसादं कुरु मत्कृते।
इति भर्तृवचः श्रुत्वा सा राजतनयाऽब्रवीत्॥ 52॥

निर्भया गतशोका वै मरणे कृतनिश्चया।
स्वामिन्प्रसीद मेऽद्य त्वं यद्ब्रवीमि कुरुष्व तत्॥ 53॥

स्वयं घातय मां त्वं वा नय तत्र जलाशये।
निमज्याहं[6] मरिष्यामि न जीवामि शिलां विना॥ 54॥

कथञ्चिदपि ते गेहे नावस्थानं ममाधुना।
श्रुत्वैतद्वचनं सोऽपि तामुवाच व्रजाधुना॥ 55॥

नाहं त्वां घातयिष्यामि कुरु तत्र यथारुचि।
ततः सा राजकन्या वै जनैः कतिपयैर्वृता॥ 56॥

---

1. वामे हस्ततः त्रासयाम – क।
2. किमिदं – ख, ग।
3. यदुक्तं – क, ग।
4. प्राह सा वधः – क।
5. कथमेवं – ख, ग।
6. ख, ग मध्ये लुप्तपाठः।

स्नानव्याजेन वव्राज नदीतीरेति गोपिता।
वाहनान्निर्गता सद्यो[1] जगामागाधवारिणि॥ 57॥

स्मरन्ती तं निजं देवं[2] शिल्लपिल्लं हरिं मुदा।
अथान्तरे तु भगवान् ज्ञात्वा तस्या दृढां मतिम्॥ 58॥

मञ्जूषां शिल्लपिल्लस्य पादलग्नां चकार सः।
ततः पादे तु संलग्नां मञ्जूषा किमिदं त्विति॥ 59॥

गृहीत्वा पाणिना तोयान्निष्कास्यैक्षत सुव्रता।
ददर्श तां मञ्जूषां जहर्ष साश्रुलोचना॥ 60॥

संस्थाप्य शिविकायां तां मञ्जूषां सा पुनर्द्रुतम्।
स्नात्वा हर्षाश्रुनयना समायाता स्वमन्दिरम्॥ 61॥

दृष्ट्वा तत्परमाश्चर्यं सर्वे विस्मयमागताः।
सा तु समागत्य पतिं प्रणम्य प्राह सुव्रता॥ 62॥

मर्तुं वारि प्रविष्टाहं[3] तदा मे मिलितो हरिः।
पश्य नाथ कृतार्थास्मि शिल्लपिल्लप्रसादतः॥ 63॥

इत्युक्त्वा दर्शयित्वा तं सम्पूज्य बुभुजे स्वयम्।
दृष्ट्वा तत्परमाश्चर्यं राजपुत्रोऽतिविस्मितः॥ 64॥

तस्यां प्रेमाधिकं दृष्ट्वा प्रसन्नः प्रददौ धनम्।
स्वयं सोऽपि दुराचारन्निवृत्तो हरिकीर्तने॥ 65॥

कृत्वा भक्तिं राजपुत्रो पुत्रपौत्रैर्मुमोद[4] ह।
एवं तद्भक्तिसंसर्गाद्राष्ट्रं सम्पूर्णमेव[5] हि॥ 66॥

विष्णुभक्तिप्रभावेण जग्मुस्ते भवनं हरेः।
तस्माद्यथा तथा चित्तमेकाग्रं वै हरौ भवेत्॥ 67॥

स न शोचेत कुत्रापि सत्यमेतन्न संशयः॥ 68॥

इति श्रीभगवद्भक्तिमाहात्म्ये कन्याद्वयचरितं नाम पञ्चपञ्चाशत्तमः सर्गः॥ 55॥

❊ ❊ ❊

1. तत्र चलिता – क।
2. देहे – ख, ग।
3. ख – मध्ये लुप्तः पाठ।
4. र्बुभुजे मेदिनीमिमाम् – क।
5. भक्तिमुक्तोऽभवत् – ख, ग।

षट्पञ्चाशत्तमः सर्गः

॥ पाञ्चालराजचरितम् ॥

अथान्यत्सम्प्रवक्ष्यामि भक्तेर्माहात्म्यमुत्तमम्।
परमाश्चर्यजनकं शृण्वतां लोमहर्षणम्।। 1।।

आसीत्पाञ्चालदेशे तु राजा वैष्णवपूजकः।
सर्वदाऽतिथिपूजायां निरतः सत्यवाक् शुचिः ॥ 2 ॥

पतिव्रता प्रिया तस्य प्राणेभ्योऽपि गरीयसी।
पत्युः प्रियकरी नित्यं धनैः प्राणैरपीप्सितैः ॥ 3 ॥

एकदा तद्गृहे कोऽपि विष्णुभक्तः समागतः।
शिष्यैश्च बहुभिः सार्द्धं निवासायाम्बुदागमे[1] ॥ 4 ॥

दृष्ट्वा तं वैष्णवं राजा भक्तिपूर्वं प्रणम्य च।
वासायाश्च ममेकं तु बहुभोज्ययुतं ददौ ॥ 5 ॥

तत्र गत्वा स भक्तस्तु प्रत्यहं सुखमास्थितः।
राज्ञा सम्मानितो नित्यमुत्तरोत्तरवृद्धितः ॥ 6 ॥

निवृत्तेऽम्बुदकाले तु भक्त्या शिष्यगणोऽब्रवीत्।
स्वामिन् प्रावृड्गतात्रैव स्थास्यामो नु वयं किमु ॥ 7 ॥

तदस्मान्वद दृष्ट्वा तं जगन्नाथं तवान्तिकम्।
आयास्यामो वयं पश्चाद्यथारुचि करिष्यसि ॥ 8 ॥

इति श्रुत्वा वचस्तेषां शिष्याणां वैष्णवोत्तमः।
राजानं प्राह यास्यामि देह्याज्ञां नृपसत्तम ॥ 9 ॥

श्रुत्वा राजापि तद्वाक्यं कर्णशूलमिव स्वयम्।
अमन्यत परं त्वस्मै भक्ततोषाय चाब्रवीत् ॥ 10 ॥

परं प्रयास्यसि विभो श्वः परश्वो न संशयः।
परन्तु निवसन्त्वत्र भवन्त इति मे मतिः ॥ 11 ॥

इति श्रुत्वा वचो राज्ञो भक्त्या प्राह नृपं मुदा[2]।
आगमिष्याम्यहं राजन् तव गेहे पुनः पुनः ॥ 12 ॥

---

1. वासापम्बुदागमे – ख।
2. तदा क।

इति श्रुत्वा ततो राजा परश्वो गन्तुमर्हसि।
इत्युक्त्वा गृहमागत्य विमना समुपाविशत्॥ 13॥

दृष्ट्वा तं विमनस्कं तु तत्पत्नी पतिमब्रवीत्।
कुतोऽद्य विमना स्वामिन् यदि योग्यं वद प्रभो॥ 14॥

इति श्रुत्वा वचस्तस्या राजोवाच प्रियां प्रति।
अद्योक्तं तेन भक्तेन गमिष्यामीत्यनन्तरम्॥ 15॥

गमिष्यसि परश्वश्चेत्युक्तं[1] न तुष्टये मम।
अतः परश्वो गन्ता स हरिभक्तो न संशयः॥ 16॥

तस्मिन् गते हरेर्नामकीर्तनं तत्कथापि वा।
न भविष्यति चात्रागतो विषण्णं[2] मे मनो[3] महत्॥ 17॥

इति भर्तृवचः श्रुत्वा सापि दीना पतिव्रता।
चिन्तयामास मनसा भक्तावस्थानकारणम्॥ 18॥

एवं तयोश्चिन्तयतो दिनद्वयमथात्यगात्।
तृतीये दिवसे प्राप्ते[4] भक्तः शिष्यैः [5]सहागतः॥ 19॥

ययाचे नृपतिं राजन्त्वमाज्ञापय याम्यहम्।
इति श्रुत्वा ततो राजा प्रातर्गन्तासि निश्चितम्॥ 20॥

अद्येह निवस स्वामिन् क्षमस्वाविनयं मम॥
इति श्रुत्वा निववृते भक्तो भक्तिवशीकृतः॥ 21॥

अथ राजान्नपानादि तत्याज विरहातुरः।
पत्न्यादि परितोषाय भुक्तवान् वै यथा तथा॥ 22॥

तदा राज्ञी निश्चिकाय गते भक्ते पतिर्मम।
हरिकीर्तनविश्लेषात्तद्भक्तविरहादपि॥ 23॥

न जीविष्यति केनापि प्रकारेणेति मे मतिः।
मृते पत्यौ वरस्त्रीणां धिक्सुतं जीवनं धनम्॥ 24॥

तस्मादुपायं किञ्चिद्वै करिष्यामि निवर्तने।
भक्ते निवृत्ते राजापि स्थास्यत्यत्र न संशयः॥ 25॥

---

1. परश्वैतत्त्युकुं – क।
2. विष्णयो – ख, ग।
3. महानभुत् – ख, ग।
4. जातो – क।
5. समार्पितः – क।

इति निश्चित्य मनसा रात्रौ सा राजवल्लभा।
[1]बालाय आत्मैकपुत्राय महानिशि विषं ददौ ॥ 26 ॥

[2]किं मे सुतेन चान्येन मरिष्यति यदा पतिः।
अत एवं मृतं ज्ञात्वा गमिष्यति वैष्णवः ॥ 27 ॥

ततो राजापि निर्विघ्नं निवत्स्यति निजालये।
विचार्य्यैवं तु तत्कर्म चकार परमाद्भुतम् ॥ 28 ॥

अथ दण्डद्वये रात्रिशेषे सा राजवल्लभा।
रुरोदोच्चैः स्वरेणान्तःपुरे हाहेति वादिनी ॥ 29 ॥

श्रुत्वा तद्रुदितं सर्वे यथास्थानमुपागताः।
किमिदं किमिदं चेति वदन्तोऽतित्वरान्विताः ॥ 30 ॥

राजापि समुपायातो भक्तस्तत्राप्युपाययौ।
ददर्श तं मृतं बालं निमग्नः शोकसागरे ॥ 31 ॥

पत्नीं पप्रच्छ राजा तु प्रिये जानासि कारणम्।
इति श्रुत्वाब्रवीद्राज्ञी चेत्क्षमस्व ब्रवीम्यहम् ॥ 32 ॥

वद नैवापराधं ते पश्यामि वरवर्णिनि।
इत्युक्ता [3]साप्युवाचाथ शिशोर्मरणकारणम् ॥ 33 ॥

भक्ते गते तु भवतो दुर्लभं तव जीवनम्।
मृते त्वयि सुते बालं जीवितेन धनेन वा ॥ 34 ॥

इति विज्ञाय शिशवे विषं दत्तं मया प्रभो।
[4]मृतेऽस्य वैष्णवः स्वामी प्रातः स्थास्यति निश्चितम् ॥ 35 ॥

भवानप्येकदिवसं जीवेदिति मनोरथम्।
कृत्वा घातितवत्यस्मि स्वसुतं नात्र संशयः ॥ 36 ॥

इति तस्या वचः श्रुत्वा राजापि मुमुदे हृदा[5]।
प्रशशंस च तां पत्नीं भक्तावस्थानलाभतः ॥ 37 ॥

---

1. ख-ग-मध्ये लुप्तपाठः।
2. ख-मध्ये लुप्तपाठः।
3. सा शुवाचाथ - ख, ग।
4. मृतेऽस्मिन् - क।
5. हृदि - ख, ग।

एवं दृष्ट्वा तयोर्भक्तिं स साधुर्वैष्णवोत्तमः।
गर्हयित्वात्मनात्मानं तौ देवेशावमन्यत॥ 38॥

अथाहूय स्वशिष्यांस्तु प्राह राज्ञी विचेष्टितम्।
तेऽपि श्रुत्वा महाश्चर्यं दृष्ट्वा बालं शुचार्दिताः॥ 39॥

भक्ते गुरुस्तदाशिष्यैः प्रतिजज्ञे महाद्भुतम्।
शृण्वतां सर्वलोकानां तदद्भुतमिवाभवत्॥ 40॥

अहो तया मदर्थं यत्स्वयं [1]पुत्रोऽपि घातितः।
तस्मादस्या इमं पुत्रं जीवयिष्यति चेद्धरिः॥ 41॥

तदा तु वयमप्यद्य जीविष्यामोऽन्यथा[2] नहि।
हुताशनं प्रवेक्ष्यामः सत्यं सत्यं न संशयः॥ 42॥

इत्येवं ते प्रतिज्ञाय विचिन्त्य मनसा हरिम्।
मन्त्रैः स्तोत्रैस्तथा गीतैस्तुष्टवुर्गरुडध्वजम्॥ 43॥

एवं गतेऽर्द्धदिवसे बालो नेत्रे प्रचालयन्।
उत्तानशयनात्पार्श्वं सञ्चाल्यैवं[3] निरैक्षत॥ 44॥

दृष्ट्वा तत्परमाश्चर्य्यं सर्वे तत्रैत्यमानवाः।
हर्षाश्रुनयनाः सर्वे चित्रवत्संस्थिताः भुवि॥ 45॥

अहो क्षणेन चोत्तस्थौ स बालः पश्यतां नृणाम्।
दृष्ट्वा तमुत्थितं बालं भक्तस्तत्र[4] समीपगः॥ 46॥

क्रोडे कृत्वा मुखं तस्य मार्जयामास पाणिना।
ततो राजानमाहूय तस्य क्रोडे शिशुं ददौ॥ 47॥

दृष्ट्वा रुदन्तं[5] तं बालं भक्तं प्राह महीपतिः।
न मे पुत्रेण मित्रेण धनेनास्ति प्रयोजनम्॥ 48॥

तव सन्तोष एवैकः सततं त्वर्थ्यते मया।
इति श्रुत्वा वचस्तस्य राज्ञः स विष्णुवल्लभः॥ 49॥

---

1. निपातितः – ख।
2. मिथा धर्म्मोन्यथा यदि – क।
3. सवालं व्यतिनैच्छत – क, ख।
4. तत् – क।
5. ख मध्ये लुप्तपाठः।

उवाच शिष्यानाहूय राजभक्तिवशीकृतः।
यावज्जीवाम्यहं शिष्यान्न त्यक्ष्यामि[1] शृणु स्फुटम्॥ 50॥

एतादृशमहाभक्तदारत्यागेऽस्ति दूषणम्।
तस्मान्नाहमितः शिष्या गन्तुमिच्छामि कुत्रचित्॥ 51॥

इत्येवं ते गुरोर्वाक्यं श्रुत्वा शिष्यास्ततः परम्।
गन्तुमभ्युद्यतास्सर्वे ततो राजाब्रवीच्च तान्॥ 52॥

कृताञ्जलिपुटो भूत्वा प्रणम्य विनयान्वितः।
स्नात्वा भुक्त्वा प्रगन्तव्यं कर्तव्यो मय्यनुग्रहः॥ 53॥

श्रुत्वा तद्वचनं राज्ञः शिष्याः सर्वे ततः परम्।
स्नात्वा समागता राजमन्दिरं गन्तुमुद्यताः॥ 54॥

राजापि भोजयामास तान्सर्वान् भक्तितः स्वयम्।
कम्बलाजिनवासोभिः सम्पूज्य विससर्ज ह॥ 55॥

ततस्तेषां गुरुं भक्तिं राजा तु स्वयमेव हि।
दासवत्परिचर्य्याथ भोजयामास भक्तितः॥ 56॥

परिचर्य्यापरो नित्यं हरिकीर्त्तनतत्परः।
भुक्त्वा निष्कण्टकं राज्यं जगाम हरिमन्दिरम्॥ 57॥

एवं स राजा राज्ञी च[2] स एव वैष्णवोत्तमः।
कृत्वा तु विविधां भक्तिं जगाम हरिमन्दिरम्॥ 58॥

पत्नी तु तस्य राज्ञः सा बभूव सहगामिनी।
ततो भक्तोऽपि तत्पुत्रं राज्यं संस्थाप्य च स्वयम्॥ 59॥

ययौ स्वैरगतिर्विष्णुं चिन्त्यमानोऽतिभक्तिमान्[3]।
एवं भक्तेषु माहात्म्यं यत्किञ्चित्कथितं मया॥ 60॥

शृण्वन्नेतन्नरो भक्तिं श्रीकृष्णे लभते पराम्॥ 61॥

इति श्रीभगवद्भक्तिमाहात्म्ये पाञ्चालराजचरितं नाम षट्पञ्चाशत्तमः सर्गः॥ 56॥

❊ ❊ ❊

---

1. यक्षामीति नृपं नहि – क।
2. तं भक्तं यावज्जीवेच्चेदासवत् – क।
3. भक्तितः – ख, ग।

सप्तपञ्चाशत्तमः सर्गः

॥ राजपुत्रीभक्तिचरितम् ॥

[1]अथान्यत्सम्प्रवक्ष्यामि भक्तेर्माहात्म्यमुत्तमम्।
महाश्चर्यकरं[2] नृणां शृण्वतां रोमहर्षणम् ॥ 1 ॥

देशे वै पुष्करप्रान्ते राजा कोप्यतिभक्तिमान्।
प्रजापालनसंसक्तो दाता वैष्णवपूजकः ॥ 2 ॥

तस्यासीत्तनया चैका कुमारी पुत्रवद्धि सा।
निरीक्ष्य ताता[3]चरितं सातिभक्ता बभूव ह ॥ 3 ॥

प्रत्यहं वैष्णवानां तु पादप्रक्षालितं जलम्।
धृत्वा शिरसि पीत्वा तु बुभुजेऽन्नादिकं शुभम्[4] ॥ 4 ॥

एवं भक्तिपरायास्तु तस्याः पाणिग्रहं पिता।
कारयामास धनिना राजपुत्रेण हर्षितः ॥ 5 ॥

सा गता पतिवेश्माथ तत्र सर्वानवैष्णवान्।
दृष्ट्वा शोकाकुला दीना राजपुत्र्यतिदुःखिता ॥ 6 ॥

पतिं सा प्रार्थयामास विष्णुपूजार्थमादरात्।
स राजपुत्रो नामापि विष्णोर्जानाति नैव हि[5] ॥ 7 ॥

ततोऽब्रवीत्पतिस्तां तु को विष्णुः किञ्च पूजनम्।
कोऽपि नैवात्र जानाति प्रिये किं भाषसे वृथा ॥ 8 ॥

श्रुत्वैतद्वचनं पत्युर्नृपकन्यातिचिन्तया।
तूष्णीं तस्थौ ददर्शाथ पत्युः कुलविचेष्टितम् ॥ 9 ॥

कस्यापि मुखतो नैव विष्णुनामानुकीर्तनम्।
न दया नापि धर्मोऽन्यः सर्वे हिंसापरायणाः ॥ 10 ॥

कस्मै किं कथयाम्यद्य न श्रोष्यति मतं मम।
एवं निश्चित्य मनसा तूष्णीं तस्थौ नृपात्मजा ॥ 11 ॥

---

1. अथान्यं – ख, ग।
2. प्रदं – ख।
3. ज्ञाता – ख, ग।
4. शुभा – क।
5. विष्णो र्हि नाम मात्रं नवास्मरत् – ख।

महाचिन्तापरा नित्यं दृष्ट्वा भक्तिपराङ्मुखात्।
तथापि साध्वीभावात्तु गृहे तस्थौ मनस्विनी ॥ 12 ॥

एवं गतेषु कालेषु पुत्रमेकमसूत सा।
सुमुहूर्तेऽथ तं दृष्ट्वा सर्वे हर्षसमन्विताः ॥ 13 ॥

राजा च राजपुत्रश्च ये चान्ये राजसेवकाः।
पुत्रं तं प्राणभूतं च सर्वेऽमन्यन्त नित्यशः ॥ 14 ॥

अथ द्वित्राद्विके बाले याते सर्वमनोहरे।
सा राजतनया दासीं शिक्षयामास यत्नतः ॥ 15 ॥

अस्मिन् ग्रामे यदा साधुरेकोप्यायाति वैष्णवः।
तदा मां कथय त्वं तु तव दास्याम्यभीप्सितम्[1] ॥16 ॥

सा दासी शिरसा नत्वा स्वीचकार तदीरितम्।
पश्यन्ती वैष्णवं नित्यं सायंकाले समागतम् ॥ 17 ॥

एकदा द्वारिकायास्ते [2]समागत्य च वैष्णवाः।
सम्पूर्णे राजनगरे निवासार्थं ययाचिरे ॥ 18 ॥

न कोऽपि स्वीचकाराथ तेषां वासं नरस्तदा।
ते सर्वे वैष्णवा ग्रामाद्बाह्ये वापीसमीपतः ॥ 19 ॥

तरोरधस्तादाच्छाद्य तृणानि तत्र भूरिशः[3]।
प्रक्षाल्य हस्तौ पादौ च क्षुधार्ता अपि शिश्यिरे[4] ॥ 20 ॥

तान्दृष्ट्वा वैष्णवान् दासी पृष्ट्वा कस्मादिहागताः।
क्व गमिष्यथ चेत्येवं पप्रच्छ विनयान्विता ॥ 21 ॥

श्रुत्वा तस्या वचस्ते तु वैष्णवाः शान्तचेतसः[5]।
ऊचुस्तां दासपत्नीं ते द्वारावत्याः समागताः ॥ 22 ॥

जगन्नाथं प्रयास्यामो दर्शनार्थं शुभे वयम्।
इति तेषां [6]वचः श्रुत्वा ययौ राज्ञीसमीपतः ॥ 23 ॥

---

1. भीक्षितम् – ख।
2. समायाताः – ख, ग।
3. वैष्णवाः – क।
4. दीनचेतसः – ख।
5. मानसाः – ख, ग।
6. श्रुत्वा ततो दासी – क।

उवाच राज्ञां सा नत्वा देविभक्ता:[1] समागता:।
सम्पूर्णे नगरे भ्रान्त्वा लेभिरे नैव ते स्थलम्॥ 24॥

[2]तदा वापीसमीपे तु तरोस्तलमुपागता:।
तृणमाच्छाद्य सुषुपु: क्षुधया पीडिता अपि॥ 25॥

श्रुत्वैतद्राजपत्नी सा भक्तराजसुता सती।
दृष्ट्वा ददौ स्वपुत्राय विषं हालाहलं स्वयम्॥ 26॥

भुञ्जन्नेव विषं बालो ममार क्षणमध्यत:।
ततस्तज्जननी भक्तराजपुत्री रुरोद ह॥ 27॥

श्रुत्वा तद्रुदितं शब्दं पतिस्तत्र समागत:।
किं जातमिति तां पत्नीं पप्रच्छातिशुचा रुदन्॥ 28॥

सोवाच जाने नैवाहं कस्मादेष सुतो मृत:।
तत: सर्वे समायाता अन्त:पुरचरा जना:॥ 29॥

दृष्ट्वा बालं मृतं तत्र रुरुदुश्चातिदु:खिता:।
हाहाकारं प्रकुर्वन्तो मूर्च्छामायुश्च ते यदा[3]॥ 30॥

तदा तज्जनी [4]भक्तराजपुत्री रुदन्त्यपि।
मम मातृगृहे चेत्थं मम भ्राता मृत: शिशु:[5]॥ 31॥

तदा मे जनको भक्तान्वैष्णवान्प्रणिपत्य च।
आनीय स्वगृहेऽभ्यर्च्य तत्पादोदकवारिणा॥ 32॥

स्नापयित्वा मृतं बालं जीवयामास वैष्णवै:।
वैष्णवा: पूजिता: सर्वे मृतबालस्य सन्निधौ॥ 33॥

स्तुत्वा नारायणं देवं जीवयामासुराशु वै।
एवं दृष्टं मया सत्यं निजं मातृगृहे पुन:॥ 34॥

बहुधान्यत्र नगरे पितुरेवं बभूव ह।
तस्मादिहापि चेत्कोऽपि भक्तो ग्रामे समागत:॥ 35॥

---

1. देवि भक्त्या: – ख, ग।
2. ततो – क।
3. तद्यथा – क।
4. राजकन्या प्रोवाच तान्प्रति – ख।
5. मृतस्तथा – ख, ग।

स्यात्तदा तं समानीय भवन्तो जीवयन्त्वमुम्।
इति तस्या वचः श्रुत्वा पप्रच्छुस्तां पुनस्तु[1] ते॥ 36॥

कथं हि भक्तो ज्ञातव्यः कीदृशः स च तद्वद।
नाद्यावधि हरेर्भक्तो दृष्टोऽस्माभिः श्रुतोऽथवा॥ 37॥

श्रुत्वा तेषां वचो हृष्टा राजपुत्री जगाद ह।
इयं दासी विजानाति मन्मातुः किल मन्दिरे॥ 38॥

गता दृष्टवती भक्तान् पितृपूज्या गृहे स्थिता।
इति तस्या वचः श्रुत्वा श्वशुरस्तां समाह्वयत्॥ 39॥

आगतां तामुवाचाथ राजा दासीं त्वरान्वितः।
त्वं विजानासि भक्तान्वै ग्रामेऽस्मिन्नद्य कोऽपि चेत्॥ 40॥

[2]समायातस्तु तं भक्तं द्रुतं मां दर्शयाधुना।
इति श्रुत्वा वचो राज्ञो[3] दासी प्राह कृताञ्जलिः॥ 41॥

महाराजाद्य दृष्टास्ते सायं भक्ताः [4]समागताः।
वापीसमीपे वृक्षस्य च्छायामाश्रित्य संस्थिताः॥ 42॥

द्वारकायाः समायाता जगन्नाथं व्रजन्ति ते।
इति तस्या वचः श्रुत्वा राजा चातीवहर्षितः॥ 43॥

तत्क्षणं तत्र गत्वा तान्वैष्णवान् प्रणिपत्य च।
महाभक्त्या समानीय संपूज्य विधिवत्स्वयम्॥ 44॥

तत्पादोदकतो येन स्नापयामास तं शिशुम्।
ततस्ते वैष्णवास्तं तु राजानं प्राहुरद्भुतम्॥ 45॥

(किमिदं भवतास्माकं पूजां कृत्वा मनोरमाम्।
अस्मत्पादोदकेनाथ स्नापितोऽयं मृतः शिशुः॥ 46॥

नूनं हि कारणं राजन् किं तेऽत्रास्ति चिकीर्षितम्।
इति श्रुत्वा ततो राजा भक्ताग्र इदमब्रवीत्॥ 47॥

शृण्वन्तु कारणं भक्ताः कथयामि यथार्थतः।)[5]
अयं पौत्रो मृतो मेऽद्य विना रोगेण बालकः॥ 48॥

---

1. पुनश्चते – क।
2. समायातं स्तं द्रुतं – ख।
3. राजानं – ख, ग।
4. न संशयः – क।
5. क–मध्येऽधिक: पाठः।

ततोऽस्य माता मां प्राह यदि कोऽप्यत्र वैष्णवः।
तमानयित्वा सम्पूज्य तत्पादोदकवारिणा॥ 49॥
स्नापयित्वा मृतं बालं वैष्णवं प्रार्थयाधुना।
ततस्ते जीवयिष्यन्ति बालमेतं न संशयः॥ 50॥
स्वपितुर्भवने दृष्टं कतिधा तत्प्रयत्नतः।
इति सा मे स्नुषा सत्यं कृत्वाऽस्मानब्रवीद्वचः॥ 51॥
ततोऽहमद्य भवतः समानीयात्र भक्तितः।
पूजयित्वा भवत्पादवारिणा तं मृतं शिशुम्॥ 52॥
स्नापयित्वाथ भवतां समीपे स्थापितो मया।
अतः परन्तु भवतामिच्छयास्य शुभाशुभम्॥ 53॥
भविष्यति न सन्देहो साधवः समदर्शनाः।
श्रुत्वैतद्वचनं राज्ञो वैष्णवास्ते व्यचिन्तयन्॥ 54॥
परस्परं निरीक्षन्तस्तूष्णीं तस्थुः क्षणं तदा।
तेषां मध्ये वृद्ध एको हरौ विश्वासतोऽब्रवीत्॥ 55॥
अहो पश्यन्तु नृपतेः स्नुषाया भक्तिमुत्तमाम्।
एवं वदति यद्भक्तानतः किञ्चिद्ब्रवीम्यहम्॥ 56॥
इतोऽस्माभिर्न गन्तव्यं जीवेद्यावन्न चेदयम्।
जीवयिष्यति वै बालं कृष्णो हि भक्तवत्सलः॥ 57॥
नो चेत्सर्वे मरिष्यामो वयमत्र न संशयः।
इति श्रुत्वा वचस्तस्य वृद्धस्यान्येऽपि वैष्णवाः॥ 58॥
स्वीचक्रुर्दृष्टमनसो वस्त्रेणाच्छाद्य तं मृतम्।
तुष्टुवुः स्तोत्रगीताद्यैः श्रीकृष्णं भक्तवत्सलम्॥ 59॥
स्तुवतां भक्तिपूर्वं तु तेषां मध्यगतो रविः।
सर्वे राजादयस्तत्र जनास्तस्थुर्मृता इव॥ 60॥
एवं दिने व्यतीते तु [1]सायाह्नेऽस्तं गते रवौ।
सञ्चचार शिशोरङ्गं हस्तपादादिकं तथा॥ 61॥

1. मध्यामस्तं – ख।

दृष्ट्वाङ्गस्य च सञ्चारं सर्वे मुमुदिरे जनाः।
वैष्णवा अपि देवेशं श्रीकृष्णं परितुष्टुवुः ॥ 62 ॥

ततो मुहूर्ताद्बालस्तु समुत्थाय निरैक्षत।
उत्थिते बालके राजा हर्षेण[1] महतावृतः ॥ 63 ॥

पपात वैष्णवानां तु चरणेष्वतिभक्तितः।
उवाच क्षम्यतां भक्ता जीवितोऽयं मृतः शिशुः ॥ 64 ॥

श्रुत्वा तद्राजवचनं वैष्णवा अपि हर्षिताः।
समुन्मील्याक्षिणी सर्वे ददृशुर्जीवितं शिशुम् ॥ 65 ॥

न्यवर्तन्त ततस्तेऽपि राज्ञा सम्प्रार्थितास्तदा।
आगत्य राज्ञी भक्तानां पादौ[2] जग्राह भक्तितः ॥ 66 ॥

ततो राजाथ तान्भक्तान्स्नापयित्वाथ भक्तितः।
भोजयित्वा तु विविधैरन्नैश्च बुभुजे स्वयम् ॥ 67 ॥

ततः सर्वे महानन्दमग्नाः सर्वे नृपादयः।
वैष्णवान्प्रार्थयामासुरवस्थानाय ते मुहुः ॥ 68 ॥

ततस्ते वैष्णवाः सर्वे राजानमिदमब्रुवन्।
जगन्नाथं [3]निरीक्ष्यात्रागमिष्यामो वयं पुनः ॥ 69 ॥

तावत्त्वं [4]साधुसेवायां निरतो भव सुव्रत।
हिंसां त्यक्त्वा हरिं नित्यं पूजयन्भक्तिमाचर ॥ 70 ॥

ग्रामे राज्ये च सर्वत्र देह्याज्ञां नृपसत्तम।
तेषां वाक्यं तु शिरसा दधार नृपसत्तमः ॥ 71 ॥

पूजयन्तु हरिं सर्वे तद्भक्तान् प्रणमन्तु[5] च।
इत्युक्त्वा ते गताः सर्वे वैष्णवा राजपूजिताः ॥ 72 ॥

नीलाचले जगन्नाथं द्रष्टुं श्रीपुरुषोत्तमम्।
तेषां वाचं तु शिरसा गृहीत्वा नृपसत्तमः ॥ 73 ॥

---

1. हर्षास्तैरा विलक्षणाः – क।
2. प्रणम्य जगृहे शिशुम् – क।
3. निरीक्ष्यामो – ख।
4. राज – ख।
5. हरौ – ख, ग।

हरेरर्चां निजे देशे ग्रामेऽथ विषयेष्वपि ।
कारयामास सर्वत्र ग्रामे ग्रामे गृहे गृहे ॥ 74 ॥

विष्णुपूजां हरेर्भक्तिं वैष्णवानां समर्चनम् ।
स्थापयामास हिंसादींस्तत्याजातिदयान्वितः ॥ 75 ॥

एवं स राजा वध्वास्तु नृपपुत्र्याः प्रसादतः ।
प्राप्य विष्णौ सुभक्तिं तु भुक्त्वा राज्यमकण्टकम् ॥ 76 ॥

मृते वैकुण्ठमगमत्परलोके सुदुर्लभम् ॥ 77 ॥

इति श्रीभगवद्भक्तिमाहात्म्ये राजपुत्रीभक्तिचरितं नाम सप्तपञ्चाशत्तमः सर्गः ॥ 57 ॥

❊ ❊ ❊

अष्टपञ्चाशत्तमः सर्गः

॥ स्वर्णकारचरितम् ॥

अथापरं प्रवक्ष्यामि [1]भक्तेर्माहात्म्यमुत्तमम् ।
आश्चर्यकारकं[2] विष्णोर्दृढभक्तिप्रदायकम् ॥ 1 ॥

दक्षिणे द्रविडे देशे ग्रामः श्रीरङ्गपत्तनः ।
तत्र श्रीरङ्गनाम्नास्ति विष्णुर्भक्तिसुरद्रुमः ॥ 2 ॥

तत्र वेदैश्च शास्त्रैश्च ब्राह्मणास्तं यजन्ति हि ।
अन्येऽपि ये वसन्ति स्म तेऽपि भक्तिं प्रकुर्वते ॥ 3 ॥

तत्रास्तां स्वर्णकारौ द्वौ मातुलो भागिनेयकः ।
केनापि वैष्णवेनाथ तावुभावुपदेशितौ ॥ 4 ॥

ततस्ते स्वर्णकारौ तु महाभक्तौ बभूवतुः ।
अथैकदा तयोश्चित्ते बभूवाकस्मिकं त्विदम् ॥ 5 ॥

श्रीरङ्गमठनिर्माणमावां कुर्याव यत्नतः ।
परन्तु नो धनं नास्ति कथमेतद्भविष्यति ॥ 6 ॥

इति चिन्तापरौ तौ द्वौ परस्परमभाषिताम् ।
अहोऽयं नास्तिको ग्रामे महाधनसमृद्धिमान् ॥ 7 ॥

---

1. भक्ति, ख, ग।
2. प्रदं लोक – क।

तत्रैतद्भृत्यभावेन आवां तद्गृहं गतौ पुनः ।
चोरयित्वापि तद्द्रव्यं करिष्यावस्तु[1] तन्मठम् ॥ 8 ॥

इति निश्चित्य मनसा गतौ तौ नास्तिकालयम् ।
तमुक्त्वावां भवत्सेवां[2] कृत्वा तद्वेतनेन च ॥ 9 ॥

जीविकां प्रकरिष्यावो यदि तेऽभिमतं विभो ।
इति श्रुत्वा तयोर्वाक्यं तिष्ठतामिति सोऽब्रवीत् ॥ 10 ॥

ततस्तौ स्वर्णकारौ तु तद्गृहे भृत्यवत्स्थितौ ।
परस्परं चिन्तयन्तौ चोरयावो धनं किमु ॥ 11 ॥

नापश्यतां त्ववश्यं तु धनं तद्देवतामृते ।
देवता तु तदीयासीत्स्वर्णस्य[3] प्रतिमामयी ॥ 12 ॥

महार्थरत्नखचिता[4] बहुमूल्यातिसुन्दरी ।
दृष्ट्वा तां सुप्रतिमां तु चक्राते हरणे मनः ॥ 13 ॥

अथैकदा निशायां तु सुप्ते लोके ततस्तु तौ ।
प्रतिमां मठमारुह्य गवाक्षं ददृशे बृहत्[5] ॥ 14 ॥

द्वारे कपाटं संरोधात्तेन मार्गेण मातुलः ।
कष्टात्कष्टतरेणाथ ययौ मन्दिरमध्यतः ॥ 15 ॥

उत्थाप्य प्रतिमां तां तु भागिनेयाय चार्पयत् ।
ततः स्वयं तु तेनैव मार्गेणागन्तुमुद्यतः ॥ 16 ॥

न शशाक बहिर्गन्तुं द्वारात्पत्ववशादसौ ।
ततोऽब्रवीद्भागिनेयं मातुलो मठमध्यगः ॥ 17 ॥

अतः परं यद्वक्ष्यामि तत्कुरुष्वाविचारितम् ।
उपायोऽस्ति न चान्योऽत्र कुरु शीघ्रं मदीरितम् ॥ 18 ॥

छित्वा मे मस्तकं पाहि गृहीत्वा प्रतिमामिमाम् ।
नो चेज्ज्ञास्यन्ति मां प्रातरुभयोर्मरणं ध्रुवम् ॥ 19 ॥

---

1. करिष्येते च तन्मठः – ख।
2. सर्वम् – ख, ग।
3. रक्तवर्ण – ख।
4. घटिता – ख, ग।
5. बहून् – क।

इत्थं मयि मृते त्वं तु गृहीत्वा धनमुत्तमम्[1]।
श्रीरङ्गमठनिर्माणं कुरुष्व मम शासनात्॥ 20॥

मठे जाते मृते नेह किं मया वा त्वयापि वा[2]।
एतावदेव कर्तव्यमासीद्बहु दिनावधि॥ 21॥

मातुलस्येति वचनं श्रुत्वा तद्भागिनेयकः।
छित्वा शिरो मातुलस्य नीत्वा तां प्रतिमां द्रुतम्॥ 22॥

ययौ स्वभवनं रात्रौ संस्थाप्य प्रतिमां तु ताम्।
प्रययौ स पुनस्तस्य नास्तिकस्य निवेशनम्॥ 23॥

सुष्वाप पूर्णवत्स्वर्णकारः शय्यातले निजे।
अथ स मातुलोऽप्यस्य यदभूच्छिन्नमस्तकः॥ 24॥

तदैव पुनरेवास्य शिरः प्रादुर्बभूव ह।
उद्घाटितः कपाटोऽपि स्वयं श्रीरङ्गभक्तितः॥ 25॥

मातुलोऽपि मठद्वारमार्गेणागत्य तद्बहिः।
भागिनेयस्य निकटे सुष्वापातिमुदान्वितः॥ 26॥

उभौ[3] प्रातः समुत्थाय निरैक्षेतां[4] परस्परम्।
किमिदं चेति पप्रच्छ भागिनेयः स्वमातुलम्॥ 27॥

मातुलोऽपि तदा प्राह श्रीरङ्गकृपया त्वहम्[5]।
भूत्वा वै पूर्ववच्चात्र समायातोऽस्मि तेऽन्तिकम्॥ 28॥

इत्येवमुक्त्वा वचनं प्रातरारभ्य[6] तौ पुनः।
स्वकार्य्यनिरतौ भूत्वा चक्राते भृत्यतामुभौ॥ 29॥

अथोत्थाय[7] ततो जैनो दृष्ट्वा देवस्य मन्दिरे।
उद्घाटितं कपाटं च महच्छङ्कामुपागतः॥ 30॥

द्रुतं गत्वा मठे नैव ददर्श प्रतिमां च ताम्।
मुमोह शोकाज्जैनः स चिन्तामाप दुरत्ययाम्॥ 31॥

---

1. मयि विना धनम् – ख।
2. क मध्ये लुप्तः पाठः।
3. ततः – ख।
4. निरीक्षेतां – ख, ग।
5. ह्यहम् – ख।
6. प्रातरुत्थाय – क।
7. अद्योस्याय ततो – ख।

रुदित्वा बहुदुःखार्तस्तौ भृत्यावाह कोपतः।
अहो भवद्भ्यां गन्तव्यं इदानीमेव मे गृहात्[1] ॥ 32 ॥

स्थितयोर्युवयोरेवं गृहे चौर्यभून्मम।
ततो नैवास्ति मे किञ्चित्फलं संरक्ष्य वै युवाम् ॥ 33 ॥

इति जैनेन तावुक्तौ जहर्षतुरुभाविमौ[2]।
महाप्रसाद इत्युक्त्वा चलितौ तु तद्गृहात् ॥ 34 ॥

आगत्य स्वगृहं तौ तु किञ्चित्कालं व्यतीत्य च।
प्रतिमाभूषणै रत्नैश्चकार[3] मठमुत्तमम् ॥ 35 ॥

एवं भक्तेस्तु माहात्म्यं शिरच्छेदोऽपि यत्पुनः।
शिरो बभूव लग्नस्तु कपाटः स्फुटितः स्वयम् ॥ 36 ॥

श्रीरङ्गेऽद्यापि जल्पन्ति [4]कृत्यमेतत्पुरातनम्।
तस्मान्नाश्चर्यभूतं हि किञ्चिद्भक्तेर्हि विद्यते ॥ 37 ॥

इति श्रीभगवद्भक्तिमाहात्म्ये स्वर्णकारचरितं नामाष्टपञ्चाशत्तमः सर्गः ॥ 58 ॥

❊ ❊ ❊

एकोनषष्टितमः सर्गः

॥ हंसव्याधचरितम् ॥

अथान्यत्सम्प्रवक्ष्यामि [5]भक्तेर्माहात्म्यमुत्तमम्।
यस्य श्रवणमात्रेण सन्दिहानोऽपि मुच्यते ॥ 1 ॥

आसीद्वै मथुराप्रान्ते राजा वै कोऽपि धार्मिकः।
पूर्वकर्मविपाकेन स तु कुष्ठी[6] बभूव ह ॥ 2 ॥

औषधानि[7] बहून्यस्य जातानि पृथिवीपतेः[8]।
न शान्तिमगमद्रोगो राजा चातीव दुःखितः ॥ 3 ॥

---

1. गृहम् – क।
2. स्वर्णकारकौ – ख, ग।
3. स्वर्णैश्चक्रतुर्म – क।
4. प्रत्य – ख।
5. भक्ति – क, ग।
6. कुष्टो – क।
7. ख – मध्येलुप्तः पाठः।
8. पृथिवीतलेः – ख।

मरणे कृतसङ्कल्पः प्रयोगे गन्तुमुद्यतः ।
अथैतस्मिन्क्षणे कोऽपि वैद्यस्तत्र समागतः ॥ 4 ॥

राजानमाह भो भूप मर्तुं[1] मागच्छ साम्प्रतम् ।
इमं ते कुष्ठरोगं तु त्रिदिनान्नाशयाम्यहम् ॥ 5 ॥

सत्यमेतन्न सन्देहः प्रतिजानामि ते पुरः ।
परन्तु हंसमेकं मे ह्यौषधार्थं समर्पय ॥ 6 ॥

त्वं जीवन्तमेव चेत्येतद्वैद्यस्य वचनं नृपः ।
श्रुत्वा जहर्ष तत्कालं व्याधानाहूय चाब्रवीत् ॥ 7 ॥

अरे जीवं तमेकं वै हंसमानय यत्नतः ।
औषधार्थं त्वरायुक्तो गच्छेदानीं ममाज्ञया ॥ 8 ॥

इति राजवचः श्रुत्वा व्याधास्तत्कालमेव हि ।
चतुर्दिक्षु गता धर्तुं हंसं जीवन्तमेव हि ॥ 9 ॥

अथ ते सरसीतीरे दृष्ट्वा हंसयुगं तदा ।
उपायं धर्तुकामस्तु चकार तदनन्तरम् ॥ 10 ॥

उड्डीय प्रगतौ तस्मात्सरोवरतटादुभौ ।
एवं बहुदिनं यातं न तं धर्तुं शशाक[2] ह ॥ 11 ॥

ततो राजातिकोपने व्याधानाहूय चाब्रवीत् ।
दिनत्रयेण चेद्धंसं न प्रदास्यति चेदिह ॥ 12 ॥

तदा त्वां सकुटुम्बं तु हनिष्यामि न संशयः ।
इति राज्ञो वचः श्रुत्वा सर्वे व्याधाः पलायिताः ॥ 13 ॥

एक एवास्थितस्तत्र राजसेवापरायणः ।
स ययौ सरसस्तीरे धर्तुं हंसं प्रयत्नतः ॥ 14 ॥

तत्र गत्वा ददर्शाथ हंसयुग्मं सरस्तटे ।
तत्रैकं वैष्णवं स्नात्वा पूजयन्तं हरिं स्थितम् ॥ 15 ॥

तदग्रे हंसमिथुनं विचचार कुतो भयम् ।
दृष्ट्वा तत्परमाश्चर्यं व्याधोऽपि निश्चिकाय तत् ॥ 16 ॥

---

1. ख मध्ये लुप्तः पाठः ।
2. सशाक – ख ।

अहो वैष्णवरूपात्तु[1] बहुधा न बिभेत्ययम्।
अतोऽहमपि तद्रूपं कृत्वा प्रातर्निजेच्छया[2] ॥ 17 ॥

धरिष्यामि न सन्देहो राजकार्यं भविष्यति।
इति निश्चित्य मनसा सायमागतवान्गृहम् ॥ 18 ॥

निधाय मालां मुद्रां च कृत्वा तिलकमुज्ज्वलम्।
तुलसीमाल्यकण्ठस्तु रामेत्युच्चैर्वदन्मुहुः ॥ 19 ॥

ययौ स सरसीतीरे धर्तुं हंसं प्रयत्नतः।
दृष्ट्वा तं व्याधमायातं धर्तुं हंसोऽब्रवीद्वचः ॥ 20 ॥

[3]हंसीं भयातुरां पत्नीं पश्येमं दुष्टचारिणम्।
विधाय वैष्णवं रूपं धर्तुमायात्यसौ खलः ॥ 21 ॥

इति भर्तृवचः श्रुत्वा हंसी प्राहाद्भुतं वचः।
अहो सत्यं समायाति धर्तुमेव न संशयः ॥ 22 ॥

तथापि नैव भेत्तव्यमावाभ्यामिति मे मतिः।
नूनं व्याधः स एवायं यः पूर्वं दिवसत्रये ॥ 23 ॥

धर्तुमागतवान् दृष्ट्वायमावाभ्यां पलायितम्।
पूर्वं तु दृष्टमेवात्र दृष्ट्वासौ वैष्णवान्तिके ॥ 24 ॥

निर्भयं विचरन्तौ च ततो वैष्णववेषधृक्।
धर्तुमायाति धूर्तोऽसौ सत्यमेव न संशयः ॥ 25 ॥

तस्माद्वैष्णवरूपं तु यदस्मद्धरणाय वै।
कृतवान् यद्भवत्वस्य न वेषोऽसौ[4] मृषा भवेत् ॥ 26 ॥

भगवद्भक्तवेषस्य तन्नामोच्चारणस्य[5] च।
छलेनापि कृतस्यास्य भविता वाञ्छितं फलम् ॥ 27 ॥

यद्यप्ययं गृहीत्वा वां मारयिष्यत्यसंशयम्।
तथापि नैव भेतव्यं धर्म एष मतिर्मम[6] ॥ 28 ॥

---

1. रूपेण – ख, क।
2. कृपा – क।
3. हंसौ – ख, ग।
4. ऽस्य – ख, ग।
5. साफल्येन तु तद्वयं – ख।
6. मतो मम – ख।

अवश्यमेव मर्त्तव्यं प्राप्य जन्म न संशयः ।
भगवद्भक्तवेषस्य साफल्येन तु तद्वरम् ॥ 29 ॥

इति हंसी वचः श्रुत्वाहं सोऽपि स्वीचकार ह ।
न चेलतुस्ततस्तस्मात्स्थानद्दिव्यौ च पक्षिणौ ॥ 30 ॥

अथागत्य तु स व्याधो हंसं धृत्वा चचाल ह ।
ततो हंसी न तत्याज हंसं स्नेहवशीकृता ॥ 31 ॥

बलादागत्य व्याधस्य करोपरि विवेश[1] ह ।
तामप्यथ दधाराशु व्याधो हिंसापरायणः ॥ 32 ॥

आगत्य स्वगृहं व्याधः कृत्वा तौ पिञ्जरे तु तौ[2] ।
राज्ञः सन्निधिमागत्य ददौ हंसद्वयं मुदा ॥ 33 ॥

ततो राजातिसन्तुष्टो दापयित्वा च वेतनम् ।
आनिन्ये भिषजं[3] तस्मै दर्शयामास पक्षिणौ ॥ 34 ॥

दृष्ट्वा तद्धंसमिथुनं वैद्योऽपि मुमुदे भृशम् ।
कर्तुमुद्युक्तवान् राज्ञो रोगशान्त्यर्थमौषधम् ॥ 35 ॥

उवाच राज्ञे भूपस्त्वं स्नात्वा भुक्त्वा विशान्तिके ।
शोणितेनास्य हंसस्य स्नापयित्वा क्षतस्थले ॥ 36 ॥

लेपनं तु प्रदास्यामि मुहुर्यामचतुष्टये ।
एवं दिनत्रये जाते रोगः शान्तो भविष्यति ॥ 37 ॥

इत्युक्तवति वैद्ये तु राज्ञि तत्कर्तुमुद्यते ।
द्विजरूपेण भगवान् आययौ भक्तवत्सलः ॥ 38 ॥

मद्भक्तवेषं मिथ्यापि कृतवान् स तु हिंसकः ।
ज्ञात्वा वेषं फलं प्राप्तुं[4] मरणे कृतनिश्चयौ ॥ 39 ॥

नोड्डीय प्रययौ[5] क्वापि स्वयमेव तु धारितौ ।
तस्मादेतौ महाभक्तौ रक्षिष्यामि न संशयः ॥ 40 ॥

---

1. पपात – ख।
2. दुजौ – ख।
3. द्योभिषजे – ख।
4. दातुं – क, ख।
5. प्रगतौ – क।

इति निश्चित्य भगवान्नीत्वा तैलं समागतः।
भूत्वा वैद्योऽतिकुशलः प्रोवाच राजसन्निधौ ॥ 41 ॥

राजन् वृथा किमर्थं त्वं पक्षिणौ हन्तुमिच्छसि।
ममास्त्यपूर्वं[1] तैलं हि कुष्ठरोगविनाशनम् ॥ 42 ॥

एकदा स्पर्शमात्रेण कुष्ठरोगः प्रणश्यति।
पश्याद्यैव महाराज वृथा हिंसां परित्यज ॥ 43 ॥

इत्युक्तस्तेन हरिणा वैद्यरूपधरेण च।
नृपतिः स्वीचकाराथ ददौ तैलं भिषग्वरः ॥ 44 ॥

तत्तैलं हस्तपादे तु दापयामास भूपतिः।
[2]तत्क्षणान्निर्व्रणं जातं स्फुटितं गलितं च यत् ॥ 45 ॥

सर्वं पूर्ववदासीत्तन्नृपाङ्गमतिसुन्दरम्।
दृष्ट्वा सर्वे मुमुदिरे महाश्चर्यं तदा जनाः ॥ 46 ॥

असाध्यः खलु संसारे रोगोऽयं [3]संक्षयं गतः।
अथ राजा स्वयं गत्वा दृष्ट्वा तं वैद्यमब्रवीत् ॥ 47 ॥

वैद्यराज नमस्तुभ्यं फलितो मे मनोरथः।
महारोगार्णवे मग्नं त्वं माम् हृतवानसि ॥ 48 ॥

अतो वरय वैद्येन्द्र [4]यत्स्यादभिमतं धनम्।
इति श्रुत्वा वचस्तस्य राज्ञः स वैद्यरूपधृक् ॥ 49 ॥

उवाच सस्मितं वाक्यं राजानमतिहर्षितः।
राजन् हंसाविमौ देहि यदि तुष्टोऽसि मां प्रति ॥ 50 ॥

किञ्चान्यद्यत्तु दातव्यं तदस्मै गुरवेऽर्पय।
अयं नैव विजानाति वैद्यराजस्तु मामिह ॥ 51 ॥

अहं त्वस्य गृहे स्थित्वा पठितं बहुवत्सरम्।
इत्युक्त्वा तस्य वैद्यस्य नामग्रामादिकं हरिः ॥ 52 ॥

उवाच तत्पितुर्नाम तत्पत्न्याश्चापि सस्मितम्।
निश्चित्य तु ततः सर्वे शिष्योऽस्यायं न संशयः ॥ 53 ॥

---

1. ममास्य पूर्वं – ख, ग।
2. निशिं पातं – ख।
3. स्योक्षयानृणाम् – क।
4. यावत्ते – ख, ग।

राजापि[1] प्रददौ हंसौ हरये वैद्यरूपिणे।
हरिर्वैद्यो गृहीत्वा तौ हंसौ प्रचलितस्ततः ॥ 54 ॥

आगत्य नगराद्बाह्ये तत्याज भगवान् खगौ।
मायया मोहितौ तौ तु हंसौ वैद्यमवोचतुः[2] ॥ 55 ॥

अहो धन्योऽसि भद्रं ते यदावां रक्षितौ त्वया।
नोचेदयं वृथा राजा घातयेन्मां न संशयः ॥ 56 ॥

इत्युक्त्वा तौ गतौ हंसौ हरिर्वैकुण्ठमागतः।
राजापि तस्मै वैद्याय दत्त्वा बहुधनं तदा ॥ 57 ॥

विसर्जयामास मुदा विजहार सुखी स्वयम्[3]।
व्याधोऽपि स च तद्रूपं तत्याजेति विचिन्त्य वै ॥ 58 ॥

अहो मिथ्यापि तद्वेषं भक्तस्य धृतवानहम्।
पक्षिणावपि[4] विश्वासान्न मत्तः [5]प्रपलायितौ ॥ 59 ॥

सत्यं चैन्मम तद्रूपं स्यात्तदा किमु दुर्लभम्।
इति संचिन्त्य तद्रूपं हरेर्नामानुकीर्त्तनम् ॥ 60 ॥

तदारभ्यैव तत्याज व्याधोऽपि भक्तिमानभूत्।
एवं भक्तेस्तु माहात्म्यं हंससम्बन्धि यन्मया ॥ 61 ॥

श्रुतं तल्लिखितं वापि शृण्वतां शान्तिवर्द्धनम्।
एवं भगवतो भक्तिर्भक्तरक्षाकरी सदा ॥ 62 ॥

भगवानपि सर्वत्र सर्वस्मिन्नपि वै क्षणे।
स्वभक्तं चापि तद्भक्तं रक्षत्येव न संशयः ॥ 63 ॥

विश्वासः केवलं चित्ते नृणामेको ह्यपेक्षितः ॥ 64 ॥

इति श्रीभगवद्भक्तिमाहात्म्ये हंसव्याधचरितं नामैकोनषष्टितमस्सर्गः ॥ 59 ॥

❊ ❊ ❊

1. अद्यापि – क।
2. प्रवोचत – क।
3. स्त्वयम् – क।
4. पक्षिणापि – क।
5. तत्समागतौ – ख, ग।

षष्टितमः सर्गः

॥ वैश्यभक्तिचरितम् ॥

अथापरं प्रवक्ष्यामि भक्तेर्माहात्म्यमुत्तमम्।
यस्य श्रवणमात्रेण हरिभक्तिः प्रजायते ॥ 1 ॥

आसीद्वै पश्चिमे कश्चिद्वणिक् धनसमृद्धिमान्।
अनपत्यत्वदोषेण[1] महाचिन्ताकुलः सदा[2] ॥ 2 ॥

एकदा कोऽपि भक्तस्तु समायातो वणिग्गृहे।
तं सम्पूज्य वणिक्पश्चादुवाच दुःखमात्मनः ॥ 3 ॥

अहो मे सन्ततिर्नास्ति को भोक्ष्यति धनं मम।
तस्माद्वद महाभाग यथा स्यात्सन्ततिर्मम ॥ 4 ॥

इत्युक्तस्तेन वणिजा सभक्तस्तमुवाच ह।
सत्यं वदसि वैश्य त्वं न पुत्रेण विना सुखम् ॥ 5 ॥

विशेषतो गृहस्थस्य जन्मैव तु निरर्थकम्।
तस्मात्तवाहं वक्ष्यामि यथा स्यात्सन्ततिः शुभा ॥ 6 ॥

अद्यारभ्य वणिक्श्रेष्ठ साधुसेवापरो भव।
प्रीणाति भगवान्कृष्णः साधुसेवनतः[3] सदा ॥ 7 ॥

तस्मिन्प्रीते भवति[4] किमसाध्यं शरीरिणाम्।
इत्युक्त्वा स गतो भक्तः स वैश्योऽपि हि तद्दिनात् ॥ 8 ॥

साधुसेवां समारेभे कर्मणा मनसा गिरा।
एवं गतेषु कालेषु तस्यैका तनयाभवत् ॥ 9 ॥

दृष्ट्वा तां तनयां वैश्यः पुत्रवत्प्रीतिमानभूत्।
अनपत्यस्य कन्यापि पुत्रवत्प्रीति[5]वर्द्धिनी ॥ 10 ॥

---

1. दुःखेन – ख, ग।
2. स तु – क।
3. भगवति – ख।
4. सेवापरोभव – ख, ग।
5. ख–मध्ये लुप्तः पाठः।

अथ तस्यास्तृतीयेब्दे[1] जातः पुत्रोतिशोभनः।
अथामन्यत वणिक् साधुसेवनस्य फलं त्विदम्॥ 11॥

तदारभ्य वणिक् साधूनतिभक्त्या [2]ह्यपूजयत्।
ददाति वित्तं वस्त्राणि साधुभ्यो [3]यद्यदीप्सितम्॥ 12॥

अथैकस्मिन् दिने रोगीभक्त एकः समागतः।
दृष्ट्वा तं रोगिणं भक्तं भक्तिमान्स वणिक् स्वयम्॥ 13॥

निनाय स्वगृहे तं तु दापयामास चौषधम्।
औषधैश्च तथा पथ्यैर्द्रुतं स नीरुजोऽभवत्॥ 14॥

ततस्तं वणिजं प्राह भक्तोऽतिविनयान्वितः।
त्वयाहं जीवितो रोगादनाथो नात्र संशयः॥ 15॥

अहं वैश्यकुले जातो मृतौ च पितरौ मम।
बाल्ये ततः साधुभिश्च जीवितोऽहं यथा तथा॥ 16॥

इदानीं त्वद्गृहान्नैव गन्तुमिच्छाम्यहं क्वचित्।
भोजनं त्वेकदा चेत्स्यात्तदात्रैव वसाम्यहम्॥ 17॥

इति श्रुत्वा वचस्तस्य वैश्यस्य[4] साधुभक्तिमान्।
उवाच प्राञ्जलिर्वाक्यं सर्वं हि भवतामिदम्॥ 18॥

यथेच्छसि तथा भुङ्क्ष्व वयं ते किङ्करा अमी।
इत्युक्तो वणिजाभक्तस्तस्थौ तस्य गृहे सुखी॥ 19॥

एवं गतेषु कालेषु स भक्तो वैश्यमन्दिरे।
स्ववेश्म निवसन्[5] तस्थौ वैश्यो विश्वस्तवानभूत्॥ 20॥

वैश्यपुत्रस्तु यो बालः स तं भक्तं पितुः समम्।
अमन्यताथ भक्तोऽपि पुत्रवन्तं निरैक्षत[6]॥ 21॥

एकस्मिन् दिवसे तत्र ग्रामस्य निकटे वने।
श्रीकृष्णप्रतिमां रम्यां द्रष्टुं सर्वे गतास्ततः॥ 22॥

---

1. अथ तस्मात्तृतीयेब्दे – ख।
2. पूजयन् – ग।
3. यद्य दीक्षितम् – ख।
4. श्चापि – क।
5. निवदा – ग।
6. निरीक्षतः – ख।

वैश्यस्य पत्नी भक्तश्च बालश्च कन्यका तथा।
देवं द्रष्टुं गतास्सर्वे साकं वै ग्रामवासिभिः ॥ 23 ॥

दृष्ट्वागत्य पुनः सर्वे तस्थुः स्वे स्वे गृहे जनाः।
वैश्यपुत्रस्तु तं भक्तं मुहुरुत्कण्ठितोऽब्रवीत् ॥ 24 ॥

[1]नय मां तत्र यत्रास्ते देवो द्रक्ष्याम्यहं तु तम्।
इति बालवचः श्रुत्वा भक्तस्तं प्रणिपत्य च ॥ 25 ॥

दर्शयामास तं देवं पुनरानीतवान् गृहम्।
एवं मुहुर्मुहुस्तं तु दर्शयामास वैष्णवः ॥ 26 ॥

एकदा तस्य भक्तस्य मतिरासीत्तु दारुणा[2]।
तं नीत्वा वैश्य बालं तु वनेऽलङ्कारसंयुतम् ॥ 27 ॥

मारयित्वा तु जग्राह[3] तस्यालङ्करणानि सः।
तं बालं मृतकं भूमौ निखन्याथ[4] तद्गृहं ययौ ॥ 28 ॥

तत्रालङ्करणं तस्य वस्त्रे बध्वा न्यधारयत्।
प्रातर्गन्तुमना [5]भूत्वा तूष्णीं तस्थौ स चौरवत् ॥ 29 ॥

अथ सा वैश्यपत्नी तु बहुकालगतं सुतम्।
विचिन्वती न पश्यन्ती तदा पप्रच्छ वैष्णवम् ॥ 30 ॥

स भक्तस्तामुवाचाथ नासोऽद्य ममान्तिकम्।
ततः सातीव संत्रस्ता वैश्यं प्राहातिविह्वला ॥ 31 ॥

क्व ते पुत्रो गृहे नैव बहुकालाद्विवर्तते।
श्रुत्वैतद्वचनं तस्याः स वैश्यश्चातिचिन्तितः ॥ 32 ॥

दासीं प्राह निरीक्षस्व[6] कुत्रास्ते स तु बालकः।
श्रुत्वा तद्वचनं दासी ग्राममध्ये ययौ द्रुतम् ॥ 33 ॥

पप्रच्छ च जनान्सर्वान् पुत्रं[7] नैव ददर्श ह।
एवं पृच्छापरा दासी न प्राप क्वापि तं शिशुम् ॥ 34 ॥

---

1. तव – क।
2. वभूव ह – क।
3. तं बालं – ख।
4. खनित्वाथ – क, ग।
5. भक्तस्य – क।
6. निरिक्षेस्त्वं – क।
7. पुत्रं न दृष्टवान् – क, ख।

परावृत्य निजं गेहमागच्छन्तीं ततस्तु ताम्।
उवाच पथिकोऽप्येकः संन्यासी दासयोषितम्॥ 35॥

अयं[1] यस्त्वद्गृहे भक्तो वैष्णवः खलु तिष्ठति।
तेनैव निहतो बालो नूनं नास्त्यत्र संशयः॥ 36॥

अद्यैवाहं वनेऽपश्यं भक्तं तं दुर्गमस्थले।
भूमौ खनित्वा यत्किञ्चित् संस्थाप्यापूरयन्मृदा॥ 37॥

श्रुत्वैतद्वचनं तस्य स्वामिनो दासवल्लभा।
प्रणिपत्याब्रवीन्नाथ दर्शयस्व स्थलं हितम्॥ 38॥

ततः स भिक्षुको[2] दासीं दर्शयामास तत्स्थलम्।
दृष्ट्वा दासी शोणिताक्तं तत्स्थलं प्ररुरोद सा॥ 39॥

उत्पाट्य[3] बालकं दृष्ट्वा मृतकं सा पुनस्तथा।
भूमौ निखन्य चायाता स्वामिनं वैश्यमब्रवीत्॥ 40॥

नाथानेन[4] तु भक्तेन बालस्ते घातितो वने।
दृष्ट्वाहं मृतकं बालमागतास्मि तवान्तिकम्॥ 41॥

केनापि स्वामिना दृष्टस्तस्मिन्स्थाने त्वयं वने।
भूमौ खनित्वा निक्षिप्य किञ्चिच्चापूरयन्मृदा॥ 42॥

ततस्तेनैव तत्स्थानं दर्शितं मेऽथ भिक्षुणा।
अहं तु बालमुत्पाट्य दृष्ट्वा संस्थाप्य पूर्ववत्॥ 43॥

समागतास्मि भवनं सत्यमेतन्न संशयः।
इति श्रुत्वा वचस्तस्यास्तत्रासौ गतवांस्तदा॥ 44॥

ददर्श तं निजं बालं गतासुं स्थापितं भुवि।
पूरयित्वा स्वयं मृद्भिः समायातोऽतिहृष्टवत्॥ 45॥

उवाच सर्वं भार्यायै निजकर्म विचेष्टितम्।
साधुसेवाप्रसादेन दत्तोऽयं हरिणा शिशुः॥ 46॥

तेनैव निहतोऽयं चेत्तदा नास्त्यस्य दूषणम्।
अतः परं न वक्तव्यं त्वायात्र शपथो मम॥ 47॥

---

1. अरे – क।
2. स भित्लको – ख, ग।
3. उत्पाथ्य – ख।
4. नाप्याते न – ख।

शृणु चैकं मतं मेऽद्य यथा स्यादावयोः सुखम्।
मृतोऽयं बालकः दैवाज्जीवनं न सुखाय[1] नौ ॥ 48 ॥

ततस्त्वेषां तु या पुत्री कृपणा तां तु भक्तितः।
भक्तायास्मै प्रदायाथ गत्वा चावां महापथम् ॥ 49 ॥

हिमालये[2] प्रपतिष्यावो हितमेतन्मतं मम।
इति पत्युर्वचः श्रुत्वा स्वीचक्रे सापि सुव्रता ॥ 50 ॥

ततस्तस्मिन्दिने वैश्यस्तं भक्तं प्राह तं स्तुवन्[3]।
अहो मे तनयो जातो भवतामेव सेवनात् ॥ 51 ॥

दुर्दैवदोषतो नष्ट इदानीमिति मे मतिः।
अतो मया हितं किञ्चित्पत्न्या सह विचारितम् ॥ 52 ॥

अनुमोदस्व तत्त्वं तु कृपां कुरु ममोपरि।
इति श्रुत्वा वचस्तस्य स भक्तोऽतीव शङ्कितः ॥ 53 ॥

नोवाच किञ्चित्स्वकर्म स्मृत्वा सोऽतीव भीतवत्।
मुहुरेवं प्रार्थ्यमानः शनैराह किमित्यहो ॥ 54 ॥

ततो वैश्योऽब्रवीद्भक्तं भवान्भक्तः सुहृन्मम।
[4]साजातीयोऽसि तस्मात्त्वां स्वाभीष्टं प्रार्थयाम्यहम् ॥ 55 ॥

बालो हृतो विधात्राथ कन्येयं वर्ततेऽधुना।
इमां तुभ्यं प्रदायावां यास्यावश्चोत्तरापथम् ॥ 56 ॥

[5]इदं धनमियं भृत्या यत्सर्वमिदमस्ति मे[6]।
न तत्र रमते चित्तमावयोरतिदुःखिनोः ॥ 57 ॥

धनानि चैव सर्वाणि तवैतानि न संशयः ॥ 58 ॥

यत्त्वया चिन्त्यते चित्ते स्मृत्वा कर्म स्वयं कृतम्।
न तत तव दोषोऽस्ति कर्त्ता नारायणः स्वयम् ॥ 59 ॥

इति वैश्य वचः श्रुत्वा न स्वीचक्रेऽथ वैष्णवः।
म्लानस्तस्माद्बहिर्गत्वा मर्तुमेच्छथाप्यसौ[7] ॥ 60 ॥

---

1. तस्तुस्त्वायतां – क।
2. हिमाग्नौ – ख, ग।
3. भवत् – क।
4. मज्ज – क।
5. इमं – ख।
6. यत् – ख, ग।
7. सोऽप्यथ – ख।

अथ तस्मिन्क्षणे कृष्णो भक्तस्य गुरुवेषधृक्।
तेषां संरक्षणार्थाय समायातोऽतिसत्वरम्॥ 61॥

दृष्ट्वा तं गुरुमायान्तं स भक्तोऽतीव लज्जितः।
ज्ञात्वा दुश्चरितं मेऽद्य गुरुर्मे किं वदिष्यति॥ 62॥

इति चिन्तापरोऽप्येषः सञ्चकार[1] गुरुं स्वयम्[2]।
वैश्योऽपि तद्गुरुं भक्त्या सम्पूज्याह निजेप्सितम्॥ 63॥

गुरुस्तु श्रुत्वा तत्सर्वं वैश्यं प्राहातिसत्वरम्।
सम्यग्विचारितं वैश्य त्वयैतत्समयोचितम्॥ 64॥

कन्यादानं कुरुष्वाद्य यात्रायां युवयोस्तु यत्।
करिष्यति हरिस्तत्ते भविष्यति न संशयः॥ 65॥

इत्युक्तो गुरुणा वैश्यः समानीय पुरोहितम्।
तस्मै भक्ताय तनयां ददौ सविधिपूर्वकम्॥ 66॥

अथ दानक्षणे लाजा होमस्य समये गुरुः।
प्राह लाजस्तु कन्यायै भ्रातृहस्तेन दीयते[3]॥ 67॥

इति सर्वत्र सिद्धान्तस्तस्माद्भ्रातास्ति वा न वा।
इति श्रुत्वा वचस्तस्य गुरोर्वैश्यसुहृज्जनाः॥ 68॥

रुरुदुर्भृशदुःखार्ताः वैश्यस्तत्प्रत्यषेधयत्।
अथ सोऽपि गुरुः प्राह वर्त्ततेऽस्य सहोदरः॥ 69॥

आयाति केनचित्सार्द्धं क्षणादेव न संशयः।
इति तस्य गुरोर्वाक्यं श्रुत्वा सर्वेऽतिविस्मिताः[4]॥ 70॥

अथैकस्तत्र विपिने पत्राद्यानयितुं गतः।
तद्ग्रामीणः स तं बालं दृष्ट्वा वैश्यस्य चास्त्ययम्॥ 71॥

वने कथमिहायात इति सञ्चिन्त्य तं पुनः।
गृहीत्वा वैश्यभवने निनायातित्वरान्वितः॥ 72॥

दृष्ट्वा तं बालकं सर्वे साधुसाध्विति तं गुरुम्।
प्रणेमुः पूजयित्वाथ गुरुस्तं बालकं स्वयम्॥ 73॥

---

1. तच्चकार – क।
2. स्वकम् – क।
3. प्रगृह्यते – ख।
4. विस्मृताः – ख, ग।

गृहीत्वा पाणिना लाजान्दापयामास तत्करात्।
ततो विवाहसञ्जाते वैश्यः पत्न्या समन्वितः ॥ 74 ॥

किमयं स्वप्न आहोस्विद्[1] भ्रमोऽयमिति चिन्तयन्।
साधुसेवाफलं चैतदित्येवं निश्चिकाय सः ॥ 75 ॥

अथ प्रातर्गुरुस्तस्माद्वैश्यागाराद्यदृच्छया[2]।
गन्तुमुत्कण्ठितो वैश्यस्तदा[3] सम्पूज्य भक्तितः ॥ 76 ॥

प्रस्थापयामास मुदा दत्त्वा धनमनेकशः।
अथ वैश्यः परावृत्य भक्तेन सह हर्षितः ॥ 77 ॥

सुतं दृष्ट्वा क्षणं हृष्टो साधुसेवापरोऽभवत्।
भक्तोऽपि तस्य बालस्य स्वर्णालङ्करणानि तु ॥ 78 ॥

परिधाप्य च तं बालमुवाच स्वस्य किल्बिषम्।
वैश्यः श्रुत्वा तु तत्सर्वं ज्ञातपूर्वं न विव्यथे ॥ 79 ॥

सन्तोषवाक्यं भक्ताय प्रोवाचाथ प्रहर्षितः।
न ते दोषोऽस्ति जामातः सर्वं हरिविचेष्टितम् ॥ 80 ॥

एवं वैश्यस्य भक्त्या वै भगवान्भक्तवत्सलः।
आगत्य जीवयामास वैश्यनिश्चययन्त्रितः ॥ 81 ॥

[4]स्वपुत्रमरणं तेन भक्तेनेति निशम्य सः।
स्वभक्तिं तु पुनस्तस्मिंश्चकारातिदृढव्रतः[5] ॥ 82 ॥

एवं बुद्ध्या विनिश्चित्य कलावपि जगन्मयः।
न दूरेऽस्तीति मन्तव्यं सत्यं सत्यं न संशयः ॥ 83 ॥

इति श्रीभगवद्भक्तिमाहात्म्ये वैश्यभक्तिचरितं नाम षष्टितमः सर्गः ॥ 60 ॥

❊ ❊ ❊

---

1. रिचम्भ्रमो – क।
2. दृक्या – ख।
3. तथा – ख, ग।
4. क्क – ख।
5. चकाराथ दृढव्रता – ख।

एकषष्टितमः सर्गः

॥ भुवनचौभानचरितम् ॥

अथापरं प्रवक्ष्यामि [1]भक्तेर्माहात्म्यमुत्तमम्।
यस्य श्रवणमात्रेण श्रीकृष्णे भक्तिमाप्नुयात्॥ 1 ॥

पश्चिमे गढचित्तौरे[2] राजासीत्कृष्णपूजकः।
चतुर्भुजाहरेर्मूर्तिस्तस्य गेहे प्रतिष्ठिता॥ 2 ॥

तामेव नृपतिर्भक्त्या स्वयं च ब्राह्मणेन वा।
सर्वदा पूजयन् राजा बुभुजे राज्यमुत्तमम्॥ 3 ॥

तस्य स्वज्ञातयः सर्वे भृत्या आत्मसमा भटाः।
तेषां मध्ये स्थितश्चैकः सेनानी राजवल्लभः॥ 4 ॥

तस्य सर्वाधिकं मानं चैतन्यं त्वधिकं तथा।
विश्वासोऽपि च हितस्यैव राज्ञः सर्वाधिकः किल॥ 5 ॥

नाम्ना तु भुवनसिंहस्तु जात्या चौभानसंज्ञितः।
महावीरः स्वामिकार्ये मरणे कृतनिश्चयः॥ 6 ॥

एकदा स तु राजा वै मृगयायां गतो वने।
तत्र हत्वा मृगान् व्याघ्रान् गृहमागन्तुमुद्यतः॥ 7 ॥

तदैका हरिणी राज्ञः समीपात्प्रपलायिता।
तदान्यान्[3] तत्र संस्थाप्य नीत्वा तं भुवनं नृपः॥ 8 ॥

चलितो हरिणीं हन्तुं[4] हयेनातिजवेन वै।
अथारण्ये सरस्तीरे कर्दमोदकभीतितः॥ 9 ॥

न गन्तुं हरिणी शक्ता ततो राजाब्रवीद्वचः।
तस्मै भुवनसिंहाय जहीमं मृगमुत्तमम्॥ 10 ॥

श्रुत्वा तद्वचनं राज्ञो द्रुतं स भुवनाह्वयः।
खड्गेन तां जघानाशु हरिणीं राजशासनात्॥ 11 ॥

उदरे निहता सा तु आसन्नप्रसवायवा।
तस्या उदरमध्यात्तु शिशुयुग्मं पपात ह॥ 12 ॥

---

1. भक्ति – क।
2. तदान्या – ख।
3. धर्तुम् – क।
4. शरः – क।

दृष्ट्वा तौ[1] मृगपुत्रौ[2] स राजा किञ्चिद्दयान्वितः।
न्यवर्त्तत तदा सोऽपि भुवनोऽतिदयान्वितः॥ 13॥

ज्ञात्वा तां हरिणीं त्यक्त्वा राजा गृहमुपागतः।
मृगं च तद्द्वयं नीत्वा पालयामास यत्नतः॥ 14॥

भुवनस्तु तदात्मानं जगर्हातिदयान्वितः।
तत्याज हिंसासंवादं कृष्णभक्तिरतोऽभवत्॥ 15॥

खड्गं तत्याज तं हस्तान्निर्मायासिं स दारुजम्।
कोशे[3] कृत्वा करे दध्रे जीविकार्थं नृपान्तिके॥ 16॥

चतुर्भुजमहोरात्रं ध्यायंस्तन्नाम[4] संस्मरन्।
हिंसाविरक्तो राजानं शिश्रिये वाति वैष्णवः॥ 17॥

एकस्मिन्दिवसे तस्य जातयोऽन्ये विरोधिनः।
राजानमूचुः सर्वेऽपि भुवनस्य विचेष्टितम्॥ 18॥

भुवनोऽयं महाराज मिथ्यां सेवां करोति वै।
मालां जग्राह स्वं खड्गं तत्याज दारुजं त्विदम्॥ 19॥

कृत्वासिं कोशमध्ये तु धृत्वा कं धार्यते[5] करे।
त्वं तु धूर्तस्य तस्यैव विश्वासं कुरुषे सदा॥ 20॥

इति श्रुत्वा वचस्तेषां जनानां स नृपस्तदा।
तानुवाचास्य शीघ्रं वै करिष्यामि विनिश्चयम्॥ 21॥

इति श्रुत्वा ततो राजा निनाय कतिचिद्दिनम्।
अथैकस्मिन् दिने राजा द्रष्टुमाराममुत्तमम्॥ 22॥

आययौ सर्वभृत्यैश्च भुवनेनापि संयुतः।
तत्र रम्भावनं पक्वफलाढ्यं स ददर्श ह॥ 23॥

दृष्ट्वैकां कदलीं पक्वफलाढ्यां नृपतिः स्वयम्।
छित्वासिना फलं तस्य स्थापयामास चैकतः॥ 24॥

---

1. तु – क।
2. जौर्तै – ख।
3. केशे – क।
4. ननाम – क।
5. धारयते – क।

अथोवाच स तान्सर्वान् भुवनं भूपतिः ।
एवं रम्भातरुं छित्वा नयध्वं तत्फलानि भोः ॥ 25 ॥

इति श्रुत्वा वचस्तस्य सर्वे ते वै विरोधिनः ।
तदैव रम्भां छित्वा वै फलं भूपतये ददुः ॥ 26 ॥

अथ चिन्ताकुलस्तत्र भुवनश्चाति शङ्कितः ।
सस्मार तं निजं देवं चतुर्भुजमनन्यधीः ॥ 27 ॥

अथ तस्मिन्क्षणे राजा तं वै भुवनमब्रवीत् ।
त्वं कस्मान्नैव सञ्छिद्य रम्भामानयसीह भोः ॥ 28 ॥

इति श्रुत्वा वचस्तस्य राज्ञः स भुवनाह्वयः ।
चतुर्भुजमुवाचेदं मनसा चाति विस्मितः ॥ 29 ॥

उद्यमे जीवितकीर्तिस्त्वदधीनं चतुर्भुज ।
रक्ष वागमयात्रैव यथेच्छसि तथा कुरु ॥ 30 ॥

इत्युक्त्वासिं करे कृत्वा वामने दक्षपाणिना ।
कोशात्खड्गं विनिष्काश्य चिच्छेद कदलीतरुम् ॥ 31 ॥

निरीक्ष्य खड्गं ते सर्वे घोरं विद्युत्समद्युतिम् ।
निमील्याक्षिणी[1] भीत्या राजायास्तत्र संस्थिता ॥ 32 ॥

राजा भुवनसिंहं तु प्रोवाचातीव विस्मितः ।
कस्मादिहागतोऽयं ते खड्गं पश्यामि देहि मे ॥ 33 ॥

इति श्रुत्वा वचो राज्ञः स तदा भुवनाह्वयः ।
ददौ खड्गं करे राज्ञो ददर्शासिं महाद्भुतम् ॥ 34 ॥

ततो[2] राजातिकोपेन भृकुटीभीषणाननः ।
वैरिणो[3] दर्शयामासु राजानं तं विरोधिनम् ॥ 35 ॥

ऊचुः प्रणम्य भो स्वामिन्[4] खड्गोऽयं दारुनिर्मितः ।
सत्यमेतन्न सन्देहः पृच्छ त्वं भुवनं नृप ॥ 36 ॥

ततो राजा तु तं खड्गं दत्त्वा भुवनमब्रवीत् ।
किमिदं भुवनैते त्वां वदन्ति दृढनिश्चयाः ॥ 37 ॥

---

1. अक्षीणी – क।
2. दृष्ट्वासिमति – क।
3. विरोधिनो ददर्शाथ – क, ख।
4. भूप – क।

त्वं सत्यं वद किञ्चास्ति कारणं कलहेन किम्[1]।
इति राज्ञो वचः श्रुत्वा भुवनो वाक्यमब्रवीत्॥ 38॥

राजन्सत्यं वदन्त्येते न मिथ्यावादिनो ह्यमी[2]।
शृणुष्व मम वृत्तान्तं कथयामि यथार्थतः॥ 39॥

तस्मिन् दिने मृगीं राजन् यदा घातितवानहम्।
दृष्ट्वा तत्पोतयुगलं बभूवातीव मे दया॥ 40॥

वैराग्यं च समुत्पन्नं[3] त्यक्ता हिंसा ततो मया।
ध्यायंश्चतुर्भुजं देवं कपटेनापि ते नृप॥ 41॥

सेवां कुर्वन् जीविकायै तिष्ठामि तव सन्निधौ।
एष दारुमयः खड्गो मया निर्मापितः किल॥ 42॥

धृत्वा कोशं करे धृत्वा तिष्ठामि पुरतस्तव।
अद्य को वेद किं जातं यद्दारुमय एव सः॥ 43॥

बभूवोत्तमखड्गस्तु को वेद हरिचेष्टितम्।
जहि रम्भातरुं चेति श्रुत्वाज्ञां शङ्कितोऽभवम्॥ 44॥

ध्यात्वा चतुर्भुजं देवं त्वद्भयान्नृपसत्तम।
कोशन्निष्काशितः खड्गो दृष्टमेवं महाद्भुतम्॥ 45॥

इति श्रुत्वा वचो राजा भुवनस्य महात्मनः।
प्रोवाच खड्गं कोशाद्वै पुनर्निष्काशयेति तम्॥ 46॥

श्रुत्वा नृप वचः सोऽपि भुवनोऽसिं तु कोशतः।
निष्काश्य दर्शयामास खड्गं दारुमयं तदा॥ 47॥

राजा दृष्ट्वाथ तं दारुमयं खड्गं स्वयं तदा।
प्रशशंसास्य भक्तिं सः प्रोवाच भुवनं वचः॥ 48॥

एतत्ते भक्तिमाहात्म्यं भुवनात्र[4] न संशयः।
चतुर्भुजस्तवप्रीतस्तेनेदं सकलं कृतम्॥ 49॥

अतः परं स्वगेहे त्वं स्थित्वा तद्भजनं[5] कुरु।
न त्वं मद्भृत्यतायोग्योऽसि त्वं हि भक्तिमान्[6]॥ 50॥

---

1. वै – ख, ग।
2. त्यर्मी – क।
3. समुत्पर्यत्पन्नं – ख।
4. भुवनास्य – ख।
5. भद्भुवनं – क।
6. ख मध्ये लुप्तः पाठः।

गृहाण वेतनं मत्तो द्विगुणं नात्र संशयः ।
निवस स्वगृहे कृष्णं भजस्व त्वं निजेच्छया ॥ 51 ॥

ममापि दर्शनं देहि सत्यमेतन्न संशयः ।
इत्युक्तो भुवनो भूपं प्राहाज्ञान्ते करोम्यहम् ॥ 52 ॥

इति दृष्ट्वा महाश्चर्य्यं राजाद्यो गृहमागताः ।
भुवनं तं प्रसशंतो मनसा कर्मणा गिरा ॥ 53 ॥

यावज्जीवं स भुवनश्चतुर्भुजमुपास्य वै ।
मृतो जगाम परमं धाम कृष्णप्रसादतः ॥ 54 ॥

एवं तु कथितं सर्वं भुवनस्य विचेष्टितम् ।
शृण्वन्कृष्णे परां भक्तिं लभते नात्र संशयः ॥ 55 ॥

इति श्रीभगवद्भक्तिमाहात्म्ये भुवनचौभानचरितं नामैकषष्टितमः सर्गः ॥ 61 ॥

❊ ❊ ❊

द्वाषष्टितमः सर्गः

॥ देवाजीचरितम् ॥

अस्यैव राज्ञो भक्तेस्तु माहात्म्यं परमाद्भुतम् ।
वक्ष्यामि भक्तिजनकं शृण्वतां प्रीतिवर्द्धनम् ॥ 1 ॥

चित्तौरगढराजस्य कृष्णमूर्तिश्चतुर्भुजी ।
आसीत्तस्यास्तु पूजायां नियुक्तो ब्राह्मणोत्तमः ॥ 2 ॥

देवाजी इति नाम्ना स भक्तिमान्वैष्णवः शुचिः ।
राजाज्ञया त्रिकालं सम्पूजयामास भक्तितः ॥ 3 ॥

राजा तु प्रत्यहं तत्र कृतनित्यक्रियः शुचिः ।
समागत्य नमस्कृत्य चतुर्भुजमनन्यधीः ॥ 4 ॥

जगाम राजकार्य्यार्थमेवं तस्य व्रतं दृढम् ।
देवाजी तु ततस्तस्मै राज्ञे रात्र्यर्पितां स्रजम् ॥ 5 ॥

प्रसादं प्रत्यहं प्रीत्या प्रददौ प्रीतिहेतवे ।
राजा तु शिरसा नत्वा पर्य्यधा तां स्रजं सदा[1] ॥ 6 ॥

---

1. तदा – क, ग।

एकस्मिन्दिवसे तत्र देवाजी ब्राह्मणोत्तमः।
उपोष्यैकादशीं प्रातर्द्वादश्यां प्रातरेव हि॥ 7॥

चतुर्भुजं समभ्यर्च्य राजार्थं च स्रजं स्वके।
गले निधाय सन्तस्थौ राजागमनकाङ्क्षया॥ 8॥

अथागच्छन्तमालोक्य शीघ्रं मालां गलात्तु सः।
उत्तार्य्य स्थाल्यां संस्थाप्य राज्ञे दातुं व्यवस्थितः॥ 9॥

अथ राजा तु भक्त्या तां गृहीत्वा स्रजमुत्तमाम्।
परिधाय ददर्शाथ मालायां धवलान् कचान्॥ 10॥

स क्रुद्धो नृपतिर्ज्ञात्वा मालानेन धृता गले।
अत एवास्य वृद्धस्य लग्नाः शुभ्राः[1] कचा इह॥ 11॥

इति सञ्चिन्त्य तं विप्रं प्राह राजाद्भुतं वचः।
अहो वृद्धो बभूवासौ किमयं तु चतुर्भुजः॥ 12॥

दृश्यतां[2] धवलाः केशा यत्तस्य स्रजि[3] संस्थिताः।
इति श्रुत्वा वचो राज्ञां देवाजी वापि शङ्कितः॥ 13॥

उवाच नृपतिं धैर्य्याद्राजन् वृद्धो हि कीदृशः।
विधेरपि विधाता यः स किं वृद्धो न भूपते॥ 14॥

केशाः शुक्लास्तथा कृष्णः निष्केशत्वं तथा पुनः।
सर्वमैच्छिकमेतस्य[4] सन्देहं मा कुरु प्रभो॥ 15॥

इति श्रुत्वा वचस्तस्य द्विजस्य स तु भूपतिः।
उवाच प्रातर्द्रक्ष्यामि वृद्धं वा शिशुमेव वा॥ 16॥

अद्य तु द्वादशी स्वल्पा पारणार्थं त्वरान्वितः।
व्रजामि पाकशालायां भोक्तुं ब्राह्मणसत्तम[5]॥ 17॥

इति श्रुत्वा वचस्तस्य देवाजी नृपतेर्भयात्।
शकां तु महतीं प्राप्य उक्तवान्नैव किंचन॥ 18॥

अहो[6] राजा परिज्ञातमुपभुक्ता स्रगर्पिता।
ततः क्रोधेन मनसा संक्षेपं वाक्यमब्रवीत्॥ 19॥

---

1. शुभाः – क, ख।
2. राज्यं ते – ख।
3. स्वनि – क।
4. मेक्षि – ख, क।
5. स जन – ख, ग।
6. इति – ख, ग।

पलायित्वा क्व गन्तव्यमवस्था मे जरातुरा।
तस्माच्चतुर्भुजो मेऽद्य शरणं कोऽपि नापरः॥ 20॥

इति निश्चित्य तस्याग्रे सुष्वाप स द्विजोत्तमः।
त्यक्त्वान्नजलपानं स सन्ध्यापूजां विधाय च॥ 21॥

सुप्तमात्रस्य तस्याथ चतुर्भुज उवाच ह।
उतिष्ठ विप्र भुंक्ष्वान्नं त्यज शोकं निरर्थकम्॥ 22॥

त्वदुक्तं न मृषा विप्र राजा ज्ञास्यत्यसंशयम्।
पश्य मे मस्तके केशाः शुभ्रा वक्षःस्थले तथा॥ 23॥

आगत्य राजा मां दृष्ट्वा वृद्धं ते भक्तिमुत्तमाम्।
करिष्यति न सन्देहस्तस्मात्त्वं भुंक्ष्व साम्प्रतम्॥ 24॥

इति दृष्ट्वा हरिं स्वप्ने देवाजी चाति हर्षितः।
उत्थाय तस्य देवस्य मस्तकं हृदयं तथा॥ 25॥

शुभ्रकेशैः परिवृतमपश्यद्वृद्धवच्च तम्[1]।
हरिं दृष्ट्वा वृद्धरूपं जहर्ष द्विजसत्तमः॥ 26॥

बुभुजे फलमूलादि स्वप्नवृत्तमनुस्मरन्।
अथ प्रभाते राजापि कृतनित्यक्रियः शुचिः॥ 27॥

द्रष्टुं चतुर्भुजं देवमागतो ब्राह्मणैस्सह।
नमस्कृत्य स्थितस्तत्र देवाजी तु ततः परम्॥ 28॥

उवाच वचनं राज्ञे संक्षेपं स्मितपूर्वकम्।
चतुर्भुजं पश्य राजन् वृद्धोऽयमथ वा युवा॥ 29॥

इति विप्रवचः श्रुत्वा राजा किञ्चित्प्रकुप्य च।
मूर्तेः समीपमागत्य ददृशे तं चतुर्भुजम्॥ 30॥

दर्शयामास तान्सर्वान् ब्राह्मणांश्च पुनः पुनः[2]।
मस्तके धवलाः केशास्तथा वक्षसि संस्थिताः॥ 31॥

राज्ञा दृष्टस्तदा राजा महाश्चर्यममन्यत।
समीपमेत्य देवस्य ददर्शाति प्रयत्नतः॥ 32॥

---

1. परिव्राजमपश्यद्वृद्दवच्चतम् – ख।
2. नृपः – क।

देवाजी तु ततो वस्त्रं मुकुटं देवतां गतः ।
पृथक्कृत्याब्रवीद्वाक्यं पश्य सम्यग्नराधिप ॥ 33 ॥

ततो दृष्ट्वा महाराजा ब्राह्मणैः सहितः स्वयम् ।
शिखाकेशद्वयं धृत्वा सन्देहाद्वै चकर्ष ह ॥ 34 ॥

राजाति दुर्मति यस्तु तत्राद्भुतममन्यत ।
तत उत्पाटितं केशद्वयं तस्माच्च शोणितम् ॥ 35 ॥

निःससार ततो राजा दृष्ट्वा भीतोऽति शङ्कि तः ।
देवाजीब्राह्मणस्याथ पादयोः पतितो नृपः ॥ 36 ॥

त्राहि ब्रह्मन्दुराचारं सापराधं तु मामिह ।
गतो मे त्वयि संदेहः पश्यन्नेवं चतुर्भुजम् ॥ 37 ॥

केशोत्पाटनतः शीर्षादसृग्धारा पतत्यसौ ।
निवारय द्रुतं त्वं तु प्रार्थयित्वा हरिं द्विज ॥ 38 ॥

श्रुत्वैतद्वचनं तस्य देवाजी मूर्तिसन्निधौ ।
उवाच भगवन्तं स क्षम्यतां [1]मूर्खचेष्टितम् ॥ 39 ॥

ततो रुधिरधारा सा न्यवर्तत शिखास्थलात् ।
राजा तु बहिरागत्य बद्धाञ्जलिपुटः स्थितः ॥ 40 ॥

देवाजी तु ततो दैवं सम्पूज्य बहिरागतः ।
शान्त्वयामास राजानं मा चिन्तां कुरु भूपते ॥ 41 ॥

जातो महाननर्थस्तु त्वत्तो नैवात्र संशयः ।
क्षम्यते भगवानेष सापराधस्य ते प्रभो ॥ 42 ॥

गच्छ स्वभवने राजन् त्यज चिन्तां मनोगताम् ।
इत्युक्तः स नृपस्तेन जगाम गृहमात्मनः ॥ 43 ॥

चिन्तयन्स्वापराधं हि [2]महाचिन्तापरोऽभवत् ।
उपवासपरो भूत्वा रात्रौ सुष्वाप भूपतिः ॥ 44 ॥

ततः स्वप्ने ददर्शाथ किञ्चिद्विप्रं तपस्विनम् ।
आगत्य ब्रूते भो राजन् किमर्थं खिद्यसे वृथा ॥ 45 ॥

---

1. मूर्ष – ख ।
2. सम – ह – क ।

अतः परन्तु भगवान् गतोऽन्यत्र चतुर्भुजः ।
इदं तु तदवस्थानं[1] म्लेच्छैस्तद्वै ग्रहीष्यते ॥ 46 ॥

इति दृष्ट्वा नृपः स्वप्ने शयात्त्वरितमुत्थितः ।
चिन्तयामास बहुशो मन्त्रिणः समुवाच तत् ॥ 47 ॥

अथ जाते कतिपये काले दिल्लीश्वरो नृपः ।
म्लेच्छो जग्राह तत्स्थानं ततो देवं चतुर्भुजम् ॥ 48 ॥

नीत्वा ते पूजकास्सर्वे अन्तर्वेदमुपागमत् ।
अद्यापि गोकुलस्थास्ते पूजयन्त्येव[2] भक्तितः ॥ 49 ॥

एवं चतुर्भुजे भक्तिर्द्विजस्य परिवर्णिता ।
श्रुतेयं भक्तिदा नृणां पातकध्वंसकारिणी ॥ 50 ॥

इति श्रीभगवद्भक्तिमाहात्म्ये देवाजीभक्तिचरितं नाम द्वाषष्टितमः सर्गः ॥ 62 ॥

❊ ❊ ❊

त्रिषष्टितमः सर्गः

॥ कामध्वजचरितम् ॥

अथापरं प्रवक्ष्यामि भक्तेर्माहात्म्यमुत्तमम् ।
यस्य श्रवणमात्रेण दृढा भक्तिर्भवेन्नृणाम्[3] ॥ 1 ॥

राजोदयपुरस्यासीज्ज्ञात्या राणेति विश्रुतः ।
तस्यासीत् क्षत्रियो भृत्यो महाशूरो नृपः प्रियः ॥ 2 ॥

संग्रामे निहतः सोऽथ सम्मुखं राज्ञि पश्यति ।
ततो नरपतिस्तस्य पुत्रानाहूय यत्नतः ॥ 3 ॥

सन्तोष्य चतुरो बन्धून् ररक्ष पृथिवीपतिः ।
तेषां मध्ये त्रयो नित्यं राजसेवापरायणाः ॥ 4 ॥

तेषां कामध्वजो नाम्ना कनीयानतिभक्तिमान् ।
स राजभवनं गत्वा सिषेवे च नराधिपम् ॥ 5 ॥

---

1. तव यत्स्थानं – क।
2. पूजययेति – ख।
3. नरः – क।

प्रातरुत्थाय भवनाद्वनं गत्वा तरोस्तले।
रामेति प्रजपन्नित्यं[1] मध्याह्ने तु पुनर्गृहम्॥ 6॥

आगत्यान्नमशित्वा तु पुनर्याति वनं द्रुतम्।
दृष्ट्वैवं चरितं तस्य भ्रातुस्ते बान्धवाः क्रुधा॥ 7॥

ऊचुः कामध्वजं वाक्यं भर्त्सयन्तोऽतिनिर्दयाः।
अरे [2]मूर्ख गृहं त्यक्त्वा प्रातरुत्थाय गच्छसि॥ 8॥

भोक्तुं पुनः समायासि पुनर्यासि गृहाद्वनम्।
केयं ते मतिरुत्पन्ना केनेत्थं शिक्षितो [3]ह्यसि॥ 9॥

राज्ञो भृत्या वयं सर्वे यामो नित्यं नृपान्तिके।
त्रयो वयं जातु[4] न त्वं तत्र गच्छसि मूर्खवत्॥ 10॥

राजा त्वामीदृशं ज्ञात्वा किं करिष्यति धर्मवित्।
यो ददाति पितुर्भक्तिं संस्मृत्याद्यापि नो धनम्॥ 11॥

तस्मादस्माभिरेवाथ सहागच्छ नृपान्तिकम्।
नो चेत्क्रुद्धो नृपः सर्वं हरिष्यति न संशयः॥ 12॥

इति कामध्वजः श्रुत्वा बन्धूनां वचनं हितम्।
उवाच विनयाद्भ्रातॄन् स्मितपूर्वमिदं वचः॥ 13॥

सत्यं वदत यूयं भो भ्रातरो नात्र संशयः।
परन्त्वहं तु चैकस्य राज्ञो भृत्यत्वमाप्तवान्॥ 14॥

त्यक्त्वायोध्यापतिं तं तु राजराजेश्वरं प्रभुम्।
नान्यं सेवितुमिच्छामि सत्यमेतद्ब्रवीमि वः॥ 15॥

राजायं सेवितः पित्रा युष्माभिः सेव्यते पुनः।
यष्मासु[5] परितुष्टोऽस्ति मयि कोपेन तस्य किम्॥ 16॥

मद्वेतनस्य हर्ता चेद्भविष्यति भवत्वयम्।
इत्युक्त्वा विरराමාथ भ्रातॄन्कामध्वजस्तदा॥ 17॥

---

1. प्राग्जनयान्नित्यं – क।
2. मूर्ष – ख।
3. त्वसि – क।
4. यातु – ख, ग।
5. युष्मांहि – ख ग।

भ्रातरोऽपि च तं भ्रान्तचित्तमुन्मेनिरे पुनः।
ऊचुः सर्वे दयायुक्ता अरे वेश्मनि संविश ॥ 18 ॥

मा याहि विपिनं घोरं सिंहव्याघ्रभयङ्करम्।
किञ्च दैवान्मृतं त्वां तु को द्रक्ष्यति वने पुनः ॥ 19 ॥

किञ्च तत्र वृका व्याघ्रा भक्षयिष्यन्ति चेदहो[1]।
तस्मादिहैव निवस भ्रातर्मागच्छ काननम् ॥ 20 ॥

इति श्रुत्वा वचस्तेषां भ्रातॄणां च दयान्वितम्।
उवाच कामध्वजस्तान् प्रहसन्विनयान्वितः ॥ 21 ॥

भ्रातरः सत्यमेवेदं युष्माभिर्यदुदाहृतम्।
परन्तु यस्य भृत्योऽहं स मां द्रक्ष्यति[2] निश्चितम् ॥ 22 ॥

यस्य प्रभावतो देवा नागा यक्षाश्च राक्षसाः।
नोपसर्पन्ति तं भक्तं व्याघ्रादीनां तु का कथा ॥ 23 ॥

न तस्य मृत्युः कोऽप्यस्ति दुःखदो[3] वा धरातले।
इति यूयं विजानीत मच्चिन्तां त्यजताधुना ॥ 24 ॥

स कामध्वज इत्युक्त्वा हृदि रामं विचिन्तयन्।
जगाम विपिनं तत्र सस्मार पूर्ववद्धरिम् ॥ 25 ॥

एवं [4]प्रत्यहमेवासौ वनमायाति वै हरिम्।
चिन्त्यमानस्तु मध्याह्ने भोक्तुमायाति मन्दिरम् ॥ 26 ॥

भ्रातृभिश्चापि विज्ञातो विक्षिप्तोऽयं [5]न संशयः।
तदारभ्य न किञ्चित्तमूचुरौदास्यमाश्रिताः ॥ 27 ॥

एवं गतेषु कालेषु एकस्मिन् दिवसे स तु।
कामध्वजो ममाराथ चिन्तयन्रघुनायकम् ॥ 28 ॥

ततस्तं तु मृतं ज्ञात्वा भगवान्भक्तवत्सलः।
प्रेषयामास चतुरो वानरान् तस्य सन्निधौ ॥ 29 ॥

---

1. कलेवरं – ख, क।
2. ध्यक्ष्यति – क।
3. दुःखितो – ख, ग।
4. प्रहृत्य – क।
5. कालो बभूव ह – क।

दग्धुं कामध्वजं भक्तं मृतं ज्ञत्वातिसत्वरम्।
ततस्ते भ्रातरास्तत्र[1] समागत्य स चान्तिकम्[2] ॥ 30 ॥

उत्थाप्य तं शवं नद्यास्तीरे नीत्वा शुचिस्थले।
काष्ठान्यानीय शुष्काणि तस्योपरि निधाय तम्॥ 31 ॥

ददावग्निं मुखे तस्य मध्याह्ने समुपस्थिते।
अथ तस्य तु ये तत्र भ्रातरो गृहसंस्थिताः ॥ 32 ॥

सस्मरुस्ते तदा कामध्वजं नेयाद्यदा गृहम्।
ततस्तेषां तु भ्रातृणां एकस्तत्र गतो वने॥ 33 ॥

द्रष्टुं तं भ्रातरं भ्राता पश्यंस्तत्स्थानमुत्तमम्[2अ]।
शुष्ककाष्ठस्य निचये स्थापितं मृतकं तु तम्॥ 34 ॥

वानराः प्रदहन्ति स्म दृष्ट्वेदं प्ररुरोद ह।
अथ वानरभीत्या स तत्र गन्तुं शशाक नो॥ 35 ॥

द्रुतमागत्य भवने भ्रातरावाह वै शुचा।
श्रुत्वा तद्वचनं तौ तु भ्रातरौ चातिदुःखितौ॥ 36 ॥

आजग्मतुर्ग्रामवृद्धै रुदन्तौ तत्समीपतः।
दृष्ट्वा तानागतान्सर्वान्मनुष्यान् वानराश्च ते॥ 37 ॥

तस्मात्स्थानादुपक्रम्य तस्थुर्वै वातिदूरतः।
ततस्ते भ्रातरोऽन्ये च ग्रामवृद्धास्तथापरै॥ 38 ॥

चितासमीपमागत्य ददृशुः कामध्वजं तदा।
तेषां सन्दर्शनार्थाय नाग्निस्तस्य मुखं पुरा॥ 39 ॥

ददाह दृष्टं तैः सर्वैः भस्मसादकरोत्क्षणात्।
ततस्तौ भ्रातरौ ते च ग्रामीणाः शोकदुःखिताः ॥ 40 ॥

ततः प्रचलितांस्तांस्तु वानरान्सन्ददर्श ह।
स्नात्वा नद्यां जलं तस्मै दत्त्वा कामध्वजाय ते॥ 41 ॥

जग्मुर्विपिनमध्यात्तु तदाश्चार्य्यमिवाभवत्।
अथ सर्वेऽपि ते ग्राममागत्य चौर्द्ध्वदेहिकम्॥ 42 ॥

---

1. वानराः – ख।
2. शङ्कितम् – ख, ग।
2अ. सन्निधौ – क।

चक्रुः कामध्वजस्याथ ददुरन्नं धनानि च।
[1]पश्येदं परमाश्चार्य्यं प्रशशंसुर्जनाश्च तम्॥ 43॥

एवं कामध्वजो भक्तिं कृत्वा प्राप्य हरेः पदम्।
ददाह भगवान्स्तस्य शवं भक्त्या वशीकृतः॥ 44॥

यः शृणोत्येतदाख्यानं दुर्गतिस्तस्य नश्यति[2]।
प्रसन्नो भगवान् तस्मै ददात्यभिमतं पदम्॥ 45॥

इति श्रीभगवद्भक्तिमाहात्म्ये कामध्वजचरितं नाम त्रयःषष्टितमो सर्गः॥63॥

❊ ❊ ❊

चतुष्षष्टितमः सर्गः

॥ जयमल्लचरितम्॥

अथापरं प्रवक्ष्यामि भक्ते[3]र्माहात्म्यमुत्तमम्।
यस्य श्रवणमात्रेण भक्तिमान् जायते नरः॥ 1॥

मरुदेशे बभूवैको राजा जयमल्लसंज्ञकः।
सोऽपि मूर्तिं चतुर्बाहं श्रीकृष्णस्यातिभक्तितः॥ 2॥

गृहं संस्थाप्य तत्पूजां चकार प्रत्यहं नृपः।
यद्यद्वस्तु गृहे तस्य राज्ये चासीन्महोत्तमम्॥ 3॥

तत्सर्वं विष्णवे तस्मै भक्त्या दत्त्वा तु वै स्वयम्।
धनं पुत्रान् तथा दारानात्मानं च समर्प्य सः॥ 4॥

कृतकृत्यो बभूवाथ राजा परमभक्तिमान्।
उदयात्प्रहरं यावत् कृष्णपूजापरायणः॥ 5॥

शृणोति नान्यन्नो ब्रूते नान्यं पश्यति भूपतिः।
पूर्वं हि नियमस्तस्य भूपतेः परमो दृढः॥ 6॥

[4]कियद्व्यतीते काले तु शत्रवस्तस्य भूपतेः।
विचार्य्य मनसा सर्वे राज्यं हर्तुं व्यवस्थिताः॥ 7॥

---

1. दृष्टेदं – क।
2. नश्यते – ख, ग।
3. भक्ति – क, ग।
4. कियत्पथगते – ख।

अयं नृपो यामेकं न पूजा गृहतोऽन्यतः ।
निर्यात्येवं व्रतं तस्य तावन्मध्ये वयं पुनः ॥ 8 ॥

परिवार्य्य पुरीं सर्वां जयमल्लं निहन्म[1] वै ।
इति निश्चित्य ते सर्वे जयमल्लस्य शत्रवः ॥ 9 ॥

एकस्मिन् दिवसे सर्वे [1अ]पुरीमाचक्रुराशुगाः ।
दृष्ट्वा तान्मन्त्रिणस्तस्य[2] जयमल्लस्य चिन्तिताः[3] ॥ 10 ॥

पूजागृहद्वारि बहिः स्थित्वोचुर्विनयान्विताः ।
राजन् ते रिपवो एत्य परिवेष्य पुरीमिमाम् ॥ 11 ॥

जिघांसवः समायान्ति किं कुर्म्मस्तद्वदस्व नः ।
इति श्रुत्वा वचस्तेषां मन्त्रिणां नृपसत्तमः ॥ 12 ॥

नोवाच किञ्चिन्मौनस्थः पूजयंस्तं चतुर्भुजम् ।
एवं निवेद्य बहुधा मन्त्रिणोऽथ यदोत्तरम् ॥ 13 ॥

न प्रापुश्च यदा तेषामेको वृद्धस्त्वरान्वितः ।
सैन्यमाज्ञपयामास द्रुतं सन्नह्यतामिति ॥ 14 ॥

श्रुत्वा तस्य वचः सर्वे सज्जा[4] एकत्र संस्थिताः ।
पुनराह नृपं मन्त्री राजंस्तेऽतीव सन्निधिम् ॥ 15 ॥

समायातास्तवाज्ञा चेद्गच्छामो वयमेव हि ।
इति श्रुत्वापि नोवाच श्रीकृष्णबलमाश्रितः ॥ 16 ॥

तस्याथ दृष्ट्वा[5] तां भक्तिं निश्चयं तादृशं पुनः ।
श्रीकृष्णः स च तज्ज्ञात्वा स्वयमेकोऽश्ववाहनः ॥ 17 ॥

भूत्वा रिपुचमूं गत्वा वेत्रपाणिर्भयङ्करः ।
वेत्रेणैव च तान् सर्वान् जघानातुलविक्रमः ॥ 18 ॥

ते सर्वे रिपवस्तं तु बाणैः खड्गैः परस्वधैः ।
शक्तिभिर्भिन्दिपालैश्च मुद्गरैस्तोमरैस्तथा ॥ 19 ॥

---

1. निहत्य – ख, ग।
1अ. भाव चुरायुगाः – ख, क।
2. सर्वे – ख।
3. चित्तया – ख, ग।
4. सन्ना – ख।
5. दृढां – क।

निजग्मुस्तं तदास्त्राणि तद्गात्रं नास्पृशन्नहो।
एवं दृष्ट्वा तु ते सर्वे प्राणत्राणपरायणाः ॥ 20 ॥

दुद्रुवः स्वेच्छया सर्वे दिशो दश भयार्दिताः।
केचिन्मृतास्तु तत्रैव केचिच्छिन्नोरुबाहवः ॥ 21 ॥

रुदन्तो देहि पानीयमित्येवं ते बभाषिरे।
अथ श्रीजयमल्लोऽपि नित्यपूजां विधाय[1] च ॥ 22 ॥

जाते तु प्रहरे पूजागाराद्बहिरुपागतः।
निजमश्वं समारुह्य मन्त्रिभिः सह सेनया ॥ 23 ॥

ततो[2] ग्रामाद्बहिस्तत्र ह्यपश्यं[3]स्तांस्तथाविधान्।
संग्रामनिहतान्कांश्चित्तथा छिन्नकलेवरान् ॥ 24 ॥

दृष्ट्वा राजातिसंदिग्धो मन्त्रिणः प्राह तान्स्वयम्।
अहो केनेदृशं युद्धं [4]कृतमस्त्यत्र संयुगे ॥ 25 ॥

यत् सहस्त्रावधिमृताच्छिन्नांगाश्चापि भूरिशः[5]।
अन्ये पलायिताः सर्वे केनेदं कृतमीदृशम् ॥ 26 ॥

इति श्रुत्वा वचो राज्ञो मन्त्रिणः[6] प्राहुरानताः।
महाराज न जानीमः केनेदं कृतमीदृशम् ॥ 27 ॥

वयं तु भवतामाज्ञां प्रतीक्षतः स्थिता गृहे।
ततो राजा स्वयं तस्मिन् किञ्चिच्छिन्नपदद्वयम् ॥ 28 ॥

पप्रच्छ केन वो वीराः कृतेयं दुर्गति वद।
इति श्रुत्वा वचो राज्ञः[7] प्राह सच्छिन्नपादकाः ॥ 29 ॥

शृणु राजन् महाश्चर्यं यथास्माकमियं दशा।
ग्रामोदेको युवा श्यामो विशालनयनः पुमान् ॥ 30 ॥

पीताम्बरो वेत्रपाणिः श्वेताश्वोपरि संस्थितः।
वेत्रेणैव निहत्येमामस्यांश्चाति भयङ्करः ॥ 31 ॥

---

1. समाप्य च।
2. गतो – क।
3. ना – क।
4. मत्यत्र – ख।
5. भूरिसः – ख।
6. राजानं च ब्रवन्ति ते – ख, ग।
7. राज्ञो च्छिन्नपादभरोऽब्रवीत् – ख।

भवद्ग्रामप्रविष्टः सः क्रीडन्निव महाबलः।
अस्माकं यानि शस्त्राणि तदंगेत विशन् क्वचित्॥ 32॥

ज्ञात्वैतद्बहवो वीरा मदीयाः प्रपलायिताः।
वयं तु दुर्गतिं प्राप्ताः रणभूमौ मृता इव॥ 33॥

मरिष्यामः क्षुतार्ता वै क्षुत्पिपासार्दिताः किल।
इति श्रुत्वा वचस्तस्य छिन्नाङ्गस्य महीपतिः॥ 34॥

अवतीर्य्य हयात्तस्मात्प्रणनाम मुहुश्च तम्।
अहो धन्या भवन्तो वै न शोचन्तु किमप्यथ॥ 35॥

आगच्छत गृहं मेऽद्य विक्षतान्प्रकरोमि वः।
इत्युक्त्वा तान् समारोप्य वाहनेषु नृपोत्तमः॥ 36॥

निनाय नगरे सर्वानौषधैस्तानजीवयत्।
ये मृतास्तत्र संग्रामे तज्जातीयास्तु तानपि॥ 37॥

स्व-स्व जात्युक्तसंस्कारं कारयामास भूपतिः।
अथ ये जीवितास्तांस्तु बहुमानपुरस्सरम्॥ 38॥

दत्त्वा धनान्नपानादि प्रेषयामास तान् गृहान्।
तदा ते मन्त्रिणस्ते तु राजानं प्रोचुरानताः॥ 39॥

महाराज[1] महानेष संशयो हृदि[2] वर्तते।
शत्रुपक्षकराः शूरा ये स्थिता रणभूमिगाः॥ 40॥

मृतप्राया मृता वापि युक्तास्तेषां च सत्क्रियाः।
अवतीर्य्य हयात्तांस्तु धृत्वा देवं[3] चतुर्भुजम्॥ 41॥

(किं तस्य कारणं राजन् ब्रूहि गुह्यं न चेत्किमु।
इति श्रुत्वा वचस्तेषां मन्त्रिणां नृपसत्तमः॥ 42॥

उवाच वचनं तांस्तु स्मृत्वा देवं चतुर्भुजम्[4]।)
अहो मे रिपवो भग्ना मृताच्छिन्नाश्च येन वै॥ 43॥

तं श्रीचतुर्भुजं ते वै मम रक्षापरायणम्।
प्रत्यक्षं दृष्टवन्तोऽतो धन्या एते न संशयः॥ 44॥

---

1. राजन्नेको – क।
2. अस्मासु – क।
3. नमश्चक्रे भवान्मुहुः – क।
4. ख – मध्ये लुप्तः पाठः।

इति ज्ञात्वा नमस्कारं तेषां वै कृतवानहम्।
इति श्रुत्वा वचस्तस्य राज्ञस्ते मन्त्रिणस्तदा॥ 45॥

नमस्कृत्य च राजानं ततस्ते[1] स्वगृहं ययुः[2]।
राजापि स्वगृहे नित्यं चिन्तयन्वै चतुर्भुजम्॥ 46॥

कृत्वा[3] राज्यं जगामान्ते पूजया वैष्णवं पदम्।
एवं तु जयमल्लस्य भक्तिमाहात्म्यमुत्तमम्॥ 47॥

श्रुत्वा भक्तिमवाप्नोति मानवो नात्र संशयः॥ 48॥

इति श्रीभगवद्भक्तिमाहात्म्ये जयमल्लचरितं नाम चतुःषष्टितमः सर्गः॥ 64॥

❊ ❊ ❊

पञ्चषष्टितमः सर्गः

॥ गोपालचरितम्॥

अथापरं प्रवक्ष्यामि [4]भक्तेर्माहात्म्यमुत्तमम्।
यस्य श्रवणमात्रेण भक्तिर्भवति वैष्णवी॥ 1॥

जयमल्लस्य राज्ञो वै गोपालो नगरेऽभवत्।
तस्यैका जननी गेहे नान्यः कोऽपि नियोजनः[5]॥ 2॥

एका तु महिषी तस्या दुग्धेनैव तु जीविका।
चारयामास विपिने गोपालो महिषीं स्वयम्॥ 3॥

सायमागत्य निलये पयस्तस्याः प्रदुह्य वै।
दत्त्वा मात्रे स्वयं भुक्त्वा सुधाभं प्रत्यहं स तु॥ 4॥

परन्तु विपिने साधुसेवायां निरतोऽभवत्।
पुष्पैर्मूलैश्च पत्रैश्च पाकार्थमिन्धनैरपि॥ 5॥

सेवयामास वै साधून् गोपालोऽप्यतिभक्तितः।
केनापि शिक्षितो गोप[6]नाम स्मरणमाचर॥ 6॥

---

1. भक्त्या – क।
2. ययौ – ख, ग।
3. ख मध्ये लुप्तः पाठः।
4. भक्तिः – क।
5. नियोजितः – ख।
6. अरण्ये – क।

तदा प्रभृति गोपालो हरिनाम स्मरन् हृदि।
साधुसेवां चकाराथ महिषीमपि चारयन्॥ 7॥

एकस्मिन्दिवसे साधुसेवायां निरतो वने।
विसस्मार निजां गोपो महिषीमप्यरण्यगाम्॥ 8॥

तदा चौरेण महिषी हृता गोपस्य तस्य[1] वै।
यमुनायाः परेपारे नीत्वा तां महिषीं ययौ॥ 9॥

सन्ध्यायां स तु गोपालः स्मृत्वा तां महिषीं निजाम्।
अरण्ये[2] पर्यटन् द्रष्टुं नापश्यन्महिषीं च ताम्॥ 10॥

ततो निववृत्ते तस्मादागच्छन्निजमन्दिरम्।
मातुर्भयेन चिन्तार्त्तो गोपो गृहमुपागतः॥ 11॥

दृष्ट्वा जनन्या पृष्टस्तु महिषी कुत्र पुत्रक।
श्रुत्वैतद्वचनं मातुः प्रोवाच भयतो मृषा॥ 12॥

मातर्मया सा महिषी न्यस्ता कस्मै द्विजन्मते।
पालयित्वा धृतं तस्याः संततिश्चापि या पुनः[3]॥ 13॥

वर्षत्रयेण तत्सर्वं प्रदास्यामीति पणं कृतम्[4]।
तक्रमात्रेण वृत्तिर्मे स कुटुम्बस्य गोपकः॥ 14॥

भविष्यति च निर्वाह उपकारो महानयम्।
इति श्रुत्वा वचस्तस्य गोपस्य जननी तदा[5]॥ 15॥

विचार्य दत्ता महिषी स्तोकदुग्धा जरातुरा।
इति श्रुत्वा वचस्तस्य गोपस्य जननी तदा[6]॥ 16॥

नाभ्यनन्दच्च तद्वाक्यात्तूष्णीं तस्थौ गृहे तु सा।
अथ तस्यै जनन्यै स गोपालोऽभन्तुमिच्छया॥ 17॥

आदाय दत्त्वा विपिने स्वयं साधुजनैः सह।
फलमूलादि भुञ्जानो निन्येऽहानि सुखेन वै॥ 18॥

---

1. जग्मतुः – क।
2. ख मध्ये लुप्तः पाठः।
3. ख मध्ये लुप्तः पाठ।
4. न संशयः – ख।
5. क मध्ये लुप्तः पाठः।
6. मयापि हितमात्मनः – क।

अथ तस्य तु भक्त्या वै तुष्टो देवश्चतुर्भुजः।
गोपाय महिषीं दातुं मनश्चक्रे जनार्दनः॥ 19॥

वर्षत्रये व्यतीते तु महिषीं तां तु तस्करः।
नीत्वाथ यमुनातोये स्नापयन् स्वयमागतः॥ 20॥

तस्या पुत्रत्रयं जातं पुत्र्येका तु स्थिता पुरा।
एवं पञ्चाभवंस्तास्तु महिष्यश्चौरमन्दिरे॥ 21॥

चौरेण तासां दुग्धादि विक्रीयासीत्तु यद्धनम्।
तेनालङ्करणं कृत्वा तासां ग्रैवेयबन्धनम्॥ 22॥

अथ सर्वा महिष्यस्ता यमुनायां च तस्करैः।
दण्डेन निहितास्तोयाद्बहिर्नेतुं समं ततः॥ 23॥

अथ तासां तु स्थविरा चतुर्णां जननी तु सा।
तां कृष्णः स्मारयामास गोपस्थान[1] पुरातनम्॥ 24॥

स्मृत्वा स्थानं तु महिषी यमुनां तर्त्तुमुत्सुका।
चौरा निवारयामासुर्न निवृता बभूव सा॥ 25॥

ततस्तस्याश्चतस्रस्तु पुत्र्योऽनुययुरुत्सुकाः॥ 26॥

न शेकुर्भीषिताः सर्वे तरङ्गैर्जलजन्तुभिः।
महिष्यस्तास्तु सन्तीर्य परम्पारं ययुर्मुदा॥ 27॥

ततोऽपि वनमेत्याशु गोपगेहं ययुर्मुदा।
दृष्ट्वा गोपस्तु महिषीं स्वावृद्धां ज्ञातवान् ततः॥ 28॥

तत्पृष्टलग्ना अन्यास्तु तस्या[2] जाताः सुता इति।
ज्ञात्वा निनाय[3] भवने गोपो मातरमब्रवीत्॥ 29॥

ममेयं[4] महिषी मातर्ब्राह्मणेन समर्पिता।
धृतमूल्यधनेनापि दत्त्वालङ्करणं गले॥ 30॥

अपत्यसहिता अद्य दत्ता मे सत्यवादिना।
इति श्रुत्वा वचस्तस्य पुत्रस्य जननी तदा॥ 31॥

---

1. न निवता बभूव सा – ख।
2. सपुत्रीस्तत् – ख।
3. ख मध्ये लुप्तः पाठः।
4. पश्येमा – क।

दूर्वाक्षतैस्तास्सम्पूज्य निनाय निजमन्दिरे।
अथ गोपस्य जननी दृष्ट्वालङ्करणानि सा॥ 32॥

बहुमूल्यानि विज्ञाय दधारोत्तार्य्य तद्गलात्।
अथ तासां तु सर्वासां दुग्धैस्तैश्च धनैरपि॥ 33॥

महाधनवती जाता[1] गोपस्य जननी तदा।
विवाहं कारयामास पुत्रस्य सा [2]महोत्सवैः॥ 34॥

गोपस्तु साधुसेवायां निरतः सर्वदा सदा।
स्मरन्नामान्नपानाद्यैर्वस्त्रैर्भक्तानतोषयत्॥ 35॥

पुत्रपौत्रैः सुखं भुक्त्वा मृतोऽगादुत्तमां गतिम्।
एवं सज्जनसेवायाः फलं कलियुगेऽपि च॥ 36॥

भक्त्या कृतायाः पश्यन्वै सुखार्थी तां समाचरेत्॥ 37॥

इति श्रीभगवद्भक्तिमाहात्म्ये गोपालचरितं नाम पञ्चषष्टितमः सर्गः॥65॥

❊ ❊ ❊

षट्षष्टितमः सर्गः

॥ श्रीधरचरितम्॥

अथ भूयः प्रवक्ष्यामि भक्तेर्माहात्म्यमुत्तमम्।
यस्य श्रवणमात्रेण नरो मुच्येत संसृतेः॥ 1॥

पूर्वं यः कथितोऽत्रैव श्रीधरस्वामिसंज्ञितः।
तस्य [3]पूर्वव्यवस्थायां भक्तिमाहात्म्यमुच्यते॥ 2॥

स एकदा गृहे तिष्ठन्वेदशास्त्रार्थपारगः।
आहूतो धनिनैकस्मिन् दिने केनचिदध्वरे॥ 3॥

तत्र गत्वाप्तवान् विप्रो धनानि कतिचिद्द्विजः।
गृहीत्वा तानि चैकाकी श्रीधरो गृहमाव्रजत्॥ 4॥

मध्यमार्गे तु लुण्ठकैरनुयातः[4] स हिंसितुम्।
ततस्तान् श्रीधरो ज्ञात्वा शस्त्रपाणीन् भयङ्करान्॥ 5॥

---

1. याता – ख, ग।
2. महोत्सुकैः – ख, ग।
3. वै पूर्ववस्थाया – क।
4. मार्ग चौराः – ख।

[1]त्रस्तः श्रीरामकवचं भक्त्या सस्मार स द्विजः।
पठिते कवचे[2] तस्मिन् भ्रातरौ रामलक्ष्मणौ॥ 6॥

धनुर्बाणधरौ वीरौ श्यामगौरकलेवरौ।
श्रीधरस्य समीपे तु गच्छन्तौ भाषयन् बलात्॥ 7॥

तावत्स श्रीधरोऽपश्यच्चौरान् पृष्ठवान् तु ते।
न प्रहर्तुं शक्नुवन्तः श्रीधरेण सहागताः[3]॥ 8॥

दृष्ट्वा तयोः सौकुमार्य्यं सौन्दर्यं चाप्यनुत्तमम्।
मोहिताः न प्रहर्तुं वै शक्तास्तद्भयतः खलाः॥ 9॥

अथ श्रीधरविप्रोऽसौ[4] निजग्रामं यदा गतः।
तदा तौ भ्रातरावन्तर्द्दधाते रामलक्ष्मणौ॥ 10॥

अथ चौरा अदृष्ट्वा तौ वीरौ चापशरायुधौ।
वित्तहर्ताः श्रीधरस्य द्वार्य्यागत्य समास्थिताः॥ 11॥

दृष्ट्वा तान् श्रीधरो विप्रः पप्रच्छ विनयान्वितः।
यूयं त्वद्य समायाता मे मया सह ते ध्रुवम्॥ 12॥

किमत्र ब्रूत कार्य्यं वो यदर्थमिह चागताः[5]।
निवसिष्यथ चेदद्य वसतात्र गृहे मम॥ 13॥

इत्युक्त्वा श्रीधरेणाथ ते हि चौरा इदं वचः।
न वस्तुमिच्छाम इह त्वया सह समागताः॥ 14॥

मार्गेद्राक्ष[6] चर्या वीरौ श्यामगौरकलेवरौ।
चापबाणधरौ धीरावागच्छन्तौ त्वया सह॥ 15॥

तौ वयं द्रष्टुमिच्छामः क्व गतौ तौ प्रदर्शय।
दृष्ट्वा तौ सुन्दरौ वीरौ गच्छामोऽद्य न संशयः॥ 16॥

श्रुत्वा तेषां वचो विप्रः श्रीधरः प्राह तान्पुनः।
अहो किं वदताश्चर्यं यूयं सत्यं वचः किमु॥ 17॥

---

1. जातः – क, ग।
2. कवचे तु कृतेपीठे – ख, ग।
3. समागताः – ख, ग।
4. अपि – ख।
5. तिष्ठतः – ख।
6. द्राक्षिण्य – ग।

के यूयं कुत्र वो वेश्म का वा वृत्तिरिहास्ति वः।
ब्रूत सत्यं ततोऽहं तौ दर्शयिष्याम्यसंशयम्॥ 18॥

इति श्रुत्वा वचस्तस्य चौराः सत्यं बभाषिरे।
वयं विप्रकुले जाता धर्मकर्मविवर्ज्जिताः॥ 19॥

स्थित्वा तस्मिन् वने चौरवृत्यास्माकं तु जीवनम्।
दृष्ट्वा वयं भवन्तं तौ सधनं हिंसितुं तदा॥ 20॥

समायातास्तदा दृष्ट्वा वीरौ चापशरायुधौ।
भीषयन्तौ तु तावस्मान् तद्भयेन[1] वयं पुनः॥ 21॥

न हिंसितो भयार्त्ता तु त्वया सह समागतौ।
[2]प्रविष्टौ त्वद्गृहे सत्यं न दृष्टौ तौ पुनर्द्विज॥ 22॥

इति श्रुत्वा वचस्तेषां श्रीधरो विनयान्वितः।
प्रणम्य धन्या यूयं तु इत्युवाच पुनः पुनः॥ 23॥

ततस्ते तमपृच्छन्वै किमिदं भाषसे द्विज।
तौ दर्शय महाभाग प्रतिज्ञातं पुरा त्वया॥ 24॥

श्रुत्वैतद्वचनं तेषां श्रीधरः प्राह तान्पुनः।
अहो न तौ गृहे स्तोमे भ्रातरौ रामलक्ष्मणौ॥ 25॥

ज्ञात्वा तु भवतोऽहं वै हिंसितुं मां समागतान्।
तदा श्रीरामकवचमपठं विपिने भयात्॥ 26॥

रक्षितुं मां समायातौ देवौ तौ भक्तवत्सलौ।
ग्रामपर्यन्तमायातावन्तर्द्धानं गतौ तदा[3]॥ 27॥

धन्या भवन्तः पुण्या वै भाग्यवन्तो न संशयः।
यैर्दृष्टौ जगतां नाथौ लोचनै रामलक्ष्मणौ॥ 28॥

इति श्रुत्वा वचस्तस्य श्रीधरस्य च तस्कराः।
अस्त्राणि चूर्णयित्वा ते वैराग्यं परमं ययुः॥ 29॥

नमस्कृत्य च तं विप्रं श्रीधरं विनयान्विताः[4]।
यदृच्छया गताः सर्वे चिन्तयन्तस्तु तौ मुदा॥ 30॥

---

1. ततोऽस्माभिर्वने पुनः – क।
2. ग्रामे – क।
3. सदा – क।
4. विनियान्विता – ख।

तेऽपि याता महाभक्ताश्चौरा अपि कलौ युगे।
तस्माद्भक्तिसमं नास्ति नृणां सुखकरं भुवि॥ 31॥

इति श्रीभगवद्भक्तिमाहात्म्ये श्रीधरचरितं नाम षट्षष्टितमः सर्गः॥ 66॥

❊ ❊ ❊

सप्तषष्टितमः सर्गः

॥ कृष्णभक्तिचरितम्॥

अथापरं प्रवक्ष्यामि [1]भक्तेर्माहात्म्यमुत्तमम्।
यस्य श्रवणमात्रेण लभते भक्तिमुत्तमाम्॥ 1॥

पुरासीन्मथुराप्रान्ते ब्राह्मणः कोऽपि धार्मिकः।
मातैका तस्य भवने नान्यः कोऽपि सुहृज्जनः॥ 2॥

स एकदा द्विजः पत्नीं नीत्वा [2]स्वसुरमन्दिरात्।
आगच्छन्निजवेश्मासौ कृष्णभक्तोऽति वैष्णवः॥ 3॥

मध्ये मार्गं वने तस्य लुण्ठका मिलितास्तदा।
दृष्ट्वा तानस्त्रशस्त्रादयान्विप्रो भयसमाकुलः॥ 4॥

क्वचित्तरुतले तस्थौ पत्न्या सह महामतिः।
स्नानादि कर्तुमुद्युक्तस्तमूचुस्ते च घातकाः[3]॥ 5॥

किमत्र कुरुषे विप्र स्नानपूजादिकं वृथा।
योजनद्वयमग्रेऽस्ति वनमेतद् भयङ्करम्॥ 6॥

उल्लङ्घ्य तु ततः स्नानं करिष्यसि तु निर्भयः।
अस्माभिः साकमेवं हि यास्यामोऽथ वयं द्रुतम्॥ 7॥

इत्युक्तस्तैस्तु लुण्ठकैर्ब्राह्मणोऽतीव भीतवत्[4]।
उवाच नाहं गच्छामि भवद्भिः साकमेव हि॥ 8॥

गन्तव्यं भवता पूर्वं गमिष्यामि ततस्त्वहम्।
नाज्ञातकुलशीलैश्च साकं गच्छेद्वने बुधः॥ 9॥

---

1. भक्ति – क।
2. स्वसुर – क।
3. घातिनः – ख, ग।
4. भीतिमान् – क।

इत्युक्तास्ते पुनः प्राहु ब्राह्मणं तेऽतिवञ्चकाः।
मा भयं कुरु भो विप्र कथयामो भवद्धितम्॥ 10॥

आवयोरन्तरे देवः श्रीकृष्णो नात्र संशयः।
यस्यात्र पापबुद्धिस्स्यात्तस्य दण्डं करिष्यति॥ 11॥

इति श्रुत्वा वचस्तस्य चौरस्यैकस्य स द्विजः।
विश्वस्य गमनं चक्रे साकं तैः कृष्णभक्तिमान्॥ 12॥

अथ ते हिंसकास्सर्वे द्विजं यातं[1] महावने।
घातयामास खड्गेन गृहीत्वा यत् स्थितं वसु॥ 13॥

पत्नीं हन्तुं द्रुतं सर्वे तत्समीपमुपागताः।
ऊचुर्दोलावहान्सर्वे लुण्ठका अतिनिर्दयाः॥ 14॥

क्व गच्छथ अरे भृत्या नायं वामः पथो हि नः[2]।
दक्षिणेन पथा यात गृहमस्माकमेव हि॥ 15॥

नोचेद्युष्मान्निहन्मोऽद्य विप्रवन्नात्र संशयः।
इति श्रुत्वा वचस्तेषां दोलावाहा भयार्दिताः॥ 16॥

तद्गृहाभिमुखा जग्मुः प्राणरक्षापरायणाः।
इति श्रुत्वा वचस्तेषां चौराणां ब्राह्मणी तु सा॥ 17॥

रुरोदार्तातिदुःखेन पत्युर्मरणसंश्रयात्।
कृष्णः कुत्रास्ति भोः स्वामिन् तवेष्टोऽयन्तु नामतः॥ 18॥

विश्वस्य तैः समायातो महारण्येऽति हिंसकैः।
एवं वदन्ती सा बाला रुरोद च मुहुर्मुहुः॥ 19॥

अथ तेनैव मार्गेण चत्वारो हयवाहकाः।
निःकोशखड्गहस्तास्ते तिष्ठ तिष्ठेतिवादिनः॥ 20॥

चौरान्सन्त्रासयामासुः समागत्य तदन्तिकम्।
जघ्नुः खड्गेन तान्सर्वान्दोलावाहान्न्यवर्तयन्[3]॥ 21॥

तामूचुः विप्रपत्नीं वै मा भयं कुरु पुत्रिके।
एह्यस्माभिः सहैवात्र पत्या सहयुता भव॥ 22॥

---

1. जातं – ख, ग।
2. पथाहितः – क।
3. वर्तते – ख।

इत्युक्त्वा ते तु तां बालां[1] निन्युः पत्युः समीपतः।
ददृशुस्तं मृतं विप्रं शयानं धरणीतले॥ 23॥

विप्रपत्नी रुरोदार्ता तां दृष्ट्वा ते कृपान्विताः।
अभयं प्रददुस्तस्यै तेषामेकस्त्ववातरत्॥ 24॥

अश्वतस्तस्य विप्रस्य शिरः काये नियोज्य च।
वस्त्रेणाच्छाद्य सर्वे[2] ते ततो जग्मुर्यदृच्छया॥ 25॥

अथाच्छादितमात्रस्तु स द्विजो जीवसंयुतः[3]।
उत्तस्थौ तत्क्षणाद्देव त्यक्तनिद्रो यथा नरः॥ 26॥

दृष्ट्वा तं जीवितं विप्रं दोलावाहाश्च हर्षिताः।
ऊचु सर्वेऽथ यज्जातं मृते तस्मिन् द्विजन्मनि॥ 27॥

पत्नी चापि तथोवाच श्रुत्वा विप्रोऽतिविस्मितः।
श्रीकृष्णे परमां भक्तिं चकार पूर्वतोऽधिकाम्॥ 28॥

ततस्तस्माद्विनिःसृत्य[4] सह पत्न्यातिहर्षितः।
आजगाम गृहं मातुर्नमश्चक्रे पदाम्बुजम्॥ 29॥

माता श्रुत्वा तु तत्सर्वं पथिवृत्तं सुतस्य वै।
रुदती कृष्णभक्त्यैव जीवितश्चेत्यमन्यत॥ 30॥

एवं स वै द्विजो जीवन् श्रीकृष्णचरणाम्बुजम्।
ध्यात्वान्ते परमं धाम जगाम कृष्णभक्तितः॥ 31॥

एवं भक्तस्य वशगः श्रीकृष्णोऽद्यापि भूतले।
आपद्भ्यस्त्रास्यत्येव[5] भक्तं नास्त्यत्र संशयः॥ 32॥

इति श्रीभगवद्भक्तिमाहात्म्ये कृष्णभक्तिचरितं नाम सप्तषष्टितमः सर्गः॥67॥

❊ ❊ ❊

---

1. तामार्तीं – ख।
2. गहने वने – ख।
3. ते पुनः – क।
4. तस्मात्समुत्पत्य – ख, ग।
5. पालयन्तेव – ख, ग।

अष्टषष्टितमः सर्गः

॥ निष्किञ्चनचरितम् ॥

अथापरं प्रवक्ष्यामि [1]भक्तेर्माहात्म्यमुत्तमम्।
यस्य श्रवणमात्रेण श्रीकृष्णे प्रीतिरुत्तमा ॥ 1 ॥

मरुद्देशे बभूवैको ब्राह्मणो धनवान् शुचिः।
हरिपालेति[2] नाम्ना वै वृद्धाऽवस्थां गतो यदा ॥ 2 ॥

अपुत्रो देवयजनात् पुत्रमेकमवाप सः।
जाते पुत्रेऽपि हर्षेण ब्राह्मणेभ्यो ददौ धनम् ॥ 3 ॥

अथ कालेन पुत्रस्तु वर्द्धमानो दिने दिने।
उपवीतं[3] विवाहं च कारयामास वै पिता ॥ 4 ॥

अति स्नेहेन बाल्ये तु स पित्रा नाति पाठितः।
परन्तु भगवद्भक्तो मतिस्तस्य स्वभावजा ॥ 5 ॥

पितुरग्रेऽपि भक्तेभ्यो दीनेभ्योऽदाद्धनं मुहुः।
सत्कार्यमिति विज्ञाय न्यवर्तयतनो पिता ॥ 6 ॥

अथ कालेन रोगार्तो हरिपालो मृतस्तदा।
तस्य पत्नी महाभागा बभूव सहगामिनी ॥ 7 ॥

अथ तस्य सुतः सोऽपि पत्न्या सह गृहं वसन्।
भुञ्जानः स्वधनैर्नित्यं साधुभ्योऽपि ददौ मुदा ॥ 8 ॥

एवं गतेषु कालेषु विप्रः क्षीणधनोऽभवत्।
तथापि साधुसत्कारं[4] न तत्याजातिभक्तिमान् ॥ 9 ॥

पात्रवस्त्रादिकं यद्वत्पत्न्यलङ्क रणानि च।
विक्रीय साधुसन्तोषं[5] चक्रे स द्विजसत्तमः ॥ 10 ॥

ऋणं कृत्वा ततो विप्रः सहसावधि संख्यया।
पितुप्रतिष्ठामासाद्य तोषयामास सज्जनान् ॥ 11 ॥

---

1. भक्ति – क।
2. दाशेति – क।
3. उपनीय – ख, ग।
4. भक्तिं स – क।
5. सन्तोष्यं – क।

ऋणं नापि च तेनाथ यदालब्धं द्विजन्मना।
ग्रामे ग्रामे तु भिक्षित्वा भोजयामास चातिथीन्॥ 12॥

ततः सर्वैर्ज्ञातिसर्गैरन्यैः सामाजिकैरपि।
अमानितोऽपि लज्जां च न लेभे भक्तियन्त्रितः॥ 13॥

ततः सर्वे द्विजं तं तु ज्ञात्वा निःकिञ्चनं जनाः।
निःकिञ्चनेति नामैव चक्रुः सर्वे हसन्मुखाः॥ 14॥

तदादि स द्विजः ख्यातो नाम्ना निःकिञ्चनेति वै।
अथ निःकिञ्चनो भिक्षां नाप्तवान् तादृशीं यथा॥ 15॥

सर्वेषामतिथीनां तु सम्पद्यते न भोजनम्।
तदा निःकिञ्चनश्चौर्य्यं चक्रे ग्रामेऽति निर्भयः॥ 16॥

चौर्यानीतधनैः साधून्भोजयामास केवलम्।
स्वयं तु विषवन्मत्वा नागृहीद्भार्यया सह॥ 17॥

चौर्य्येणापि यदा पूर्तिर्नाभूदतिथिभोजने।
तदा वने लुण्ठयित्वा शस्त्रपाणिर्जनान्स्वयम्॥ 18॥

धनमादाय गतेभ्यो ददौ नित्यं च भोजनम्।
परन्तु धनमात्रं स जग्राहाति विभीषया॥ 19॥

न जघान कमप्याहो हिंसादोषमनुस्मरन्।
तत्रापि वैष्णवान्नैव लुण्ठयामास[1] कानपि॥ 20॥

एवं कतिपये काले जाते[2] चैकदिने तदा।
लुण्ठनेनापि नैवाप्तं धनं किञ्चिद्द्विजन्मना॥ 21॥

समागत्य गृहे सायं चिन्तितः प्रियया सह।
क्षुधार्त एव सुष्वाप भोजनाभावतो द्विजः॥ 22॥

प्रातःकाले तु सम्प्राप्ते जगाम विपिनं द्विजः।
निःकिञ्चनो नापतु किञ्चिन्मध्याह्ने त्वागतो गृहे॥ 23॥

तत्रापश्यत्समायातानतिथीन् बहुवैष्णवान्।
पत्नीदत्तासने सर्वानुपविष्टान्प्रणम्य सः॥ 24॥

---

1. वैष्णवान्विप्रान्नलुण्ठति द्विजोत्तमः – ख, ग।
2. गते – ख।

गृहमध्ये समागत्य पत्नीं प्राह करोमि किम्।
एते समागताः सर्वे तिष्ठन्ति च बुभुक्षिताः॥ 25॥

अभोजयित्वा चैतान्वै मरिष्ये नात्र संशयः।
इति श्रुत्वा पतिवचः पत्नी प्राहाति विस्मिता॥ 26॥

तवेयं चेद्गतिर्नाथ ममाप्येतद्विनिश्चितम्।
तवानुगमने नैव प्राणांस्त्यक्षाम्यसंशयम्॥ 27॥

परन्तु साधूनेतान्वै स्नातुं प्रेषय निश्चितम्[1]।
तत्पश्चान्मरणोपायं करिष्यामि न चेदिमे॥ 28॥

मर्तुं दास्यन्ति नैवात्र साधवोऽति दयालवः।
वारयिष्यन्ति चात्रावां मरणे कृतनिश्चयौ॥ 29॥

इति श्रुत्वा वचस्तस्याः पत्न्याः स द्विजपुङ्गवः।
आगत्य द्वारि तान्साधून् स्नातुं [2]गच्छेति जल्पितुम्॥ 30॥

एतस्मिन्नन्तरे कृष्णो रुक्मिणीं प्राह याम्यहम्।
लुण्ठाकरुणो भक्तोऽस्ति दातुं तस्मै धनानि च॥ 31॥

श्रुत्वैतद्वचनं तस्याः प्राह कृष्णो हसन्निव॥ 32॥

आगच्छ किन्तु मां त्वां स लुण्ठिष्यति न संशयः।
तत्रैका मुद्रिका देवि न देया[3] सहसा त्वया॥ 33॥

एवं पत्न्या विचार्यासौ भगवान्भक्तवत्सलः।
रक्षणाय स्वभक्तस्य विनोदं कर्तुमागतः॥ 34॥

अथ श्रीभगवान्कृष्णो ज्ञात्वा तौ मरणोन्मुखौ।
वैश्यरूपं समादाय रुक्मिण्या भार्यया सह॥ 35॥

तद्गृहद्वारमागत्य कुत्र निःकिञ्चनो द्विजः।
इत्युवाच ततस्तौ तु दृष्ट्वा निकिञ्चिनः [4]स्वयम्॥ 36॥

स्वर्णालङ्करणैर्युक्तौ नाना वस्त्रोपशोभितौ।
पथिकाविति तौ मत्वा जहर्ष मनसा द्विजः॥ 37॥

---

1. निष्ठूरम् – ख।
2. गच्छन्तु – क।
3. देवा न – क।
4. तदा – ख, सर्वे – क।

स्नानं कुरुत भो यूयमित्युक्त्वा तांस्तु वैष्णवान्।
प्रेषयामास सहसा[1] हर्षेण महावृत: ॥ 38 ॥
प्राह नि:किञ्चनोऽहं वै किं कार्यं तद्वदस्व[2] भो: ।
इति श्रुत्वा वचस्तस्य प्रत्युवाच हसन् तदा ॥ 39 ॥
अहं तत्र गमिष्यामि मार्गे वनमिदं[3] महत्।
श्रूयते तत्र लुण्ठका लुण्ठन्ति पथिकान् जनान् ॥ 40 ॥
वैश्योऽहं स्त्रीसहायश्च स्वर्णलङ्कारभूषित: ।
भयाद्गन्तुं न शक्नोमि तस्मात्त्वं चात्र तिष्ठति ॥ 41 ॥
यथा सुखं गमिष्यामि वनेऽस्मिन् द्विजसत्तम।
तथा कुरूपकारं त्वं किञ्चिद्दास्यामि ते धनम् ॥ 42 ॥
इति श्रुत्वा वचस्तस्य कृष्णस्य वैश्यरूपिण: ।
नि:किञ्चनो हृष्टमना: प्रोवाच मधुराक्षरम् ॥ 43 ॥
आगच्छ त्वं प्रियासार्द्धमेकत्रैव व्रजाम्यहम्।
यदग्रेऽन्ये तु लुण्ठका लुण्ठिष्यन्ति न वै[4] पुन: ॥ 44 ॥
इत्युक्त्वास्त्रं समादाय गृहीत्वा वणिजं तु तम्[5] ।
चलित: प्राह पत्नीं तु पाकं कुरु यदृच्छया ॥ 45 ॥
अहं शीघ्रं समायामि प्रेष्येमौ वैश्यदम्पती।
इत्युक्त्वा प्रययौ ताभ्यां वनं निष्किञ्चचनो द्विज: ॥ 46 ॥
गत्वारण्ये समुद्यम्य भीषयन्वैश्यमब्रवीत्।
देहि शीघ्रं धनं वैश्य सर्वालङ्ककरणानि च ॥ 47 ॥
नो चेत्त्वां घातयाम्यत्र[6] सपत्नीकं न संशय: ।
नि:किञ्चनवच: श्रुत्वा वैश्यरूपोऽब्रवीद्धरि: ॥ 48 ॥
अहो किमर्थं कुरुषे पापं भूत्वा द्विजन्मज:[7] ।
सर्वस्य[8] भोजनं लोकं भवत्येव विनाप्यघं वने ॥ 49 ॥

---

1. कूपादि समीपेऽथ ततस्तु तौ – क।
2. तव विद्यते – क।
3. तस्मिन्वने क्वचित् – ख, ग।
4. कथचन – क, ख।
5. पथि – ख, ग।
6. मध्ये लुप्त: पाठ: ।
7. द्विजन्मन: – ख।
8. ख मध्ये लुप्त: पाठ: ।

इति श्रुत्वा वचस्तस्य वैश्यरूपस्य स द्विजः।
उवाच नाहं भोक्तुं वै करोम्येतदघं वने॥ 50॥

ममैकं तु व्रतं वैश्य बाल्यमारम्भ निश्चितम्।
विष्णुभक्ताश्च ये [1]केचित्समागच्छति मद्गृहे॥ 51॥

एकोवाथ शतानीह भोजयेयं न संशयः।
पापं चेदस्तु मे वैश्य प्रीयतां भगवान्मम॥ 52॥

यस्मिन्दिने क्षुधार्त्तास्ते गमिष्यन्ति ममाश्रमात्।
मरिष्येऽहं तदैवेति व्रतमेतद् दृढं मम॥ 53॥

सपत्नीकस्य मे चैतद्विषमे वनसंश्रये[2]।
तस्मात्कृष्णस्य प्रीत्यर्थं करोम्येतत्सुदारुणम्॥ 54॥

देहि शीघ्रं धनं वैश्य द्वारि तिष्ठन्ति वैष्णवाः।
मध्याह्नोल्लङ्घनं तेषां भविष्यति हि भोजने॥ 55॥

नोचेत्त्वां घातयिष्यामि सपत्नीकं न संशयः।
श्रुत्वैतद्वचनं तस्य वैश्यरूपधरो हरिः॥ 56॥

ददौ धनानि वस्त्राणि सर्वाण्याभरणानि च।
रुक्मिण्यपि ददौ सर्वं धनं मुद्रिकया विना॥ 57॥

निष्किञ्चनोऽथ दृष्ट्वा तां मुद्रिकां तत्करे स्थिताम्।
देहीत्युवाच नादात्सा तदा निःकिञ्चनः[3] स्वयम्॥ 58॥

[4]गृहीत्वा पाणिना पाणिं रुक्मिण्या अतिनिर्दयः।
त्रोटयित्वाङ्गुलिं तस्या आजहार स मुद्रिकाम्॥ 59॥

अनया तु शतं भोक्ष्ये साधूनितिवदन् द्विजः[5]।
सर्वं वस्त्रे निबध्याथ[6] चलितः स्वगृहं प्रति॥ 60॥

ततः कृष्णो हसन् प्राह निष्किंचनमिदं वचः।
अरे निष्किञ्चनेयं तु मुद्रिकाऽतीव दुर्लभा॥ 61॥

इमां रक्ष गृहे सम्यक् दत्तेयं वैष्णवेन मे।
साधुसेवार्थमेषा वै ददामि सकलं धनम्॥ 62॥

---

1. केचन – क।
2. संशयः – ख।
3. पाणि रुक्मिण्या अतिनिर्दयः – ख।
4. ख मध्ये लुप्तः पाठः।
5. वचः – ख, ग।
6. अयं – ख।

अतस्त्वमपि रक्षेमां पापं त्यज सुदुःखदम्।
इयं ते सर्वभक्तानां भोजनं वितरिष्यति॥ 63॥

श्रुत्वैतद्वचनं तस्य कृष्णस्य वैश्यरूपिणः।
स्वीकृत्य शीघ्रमायातो मन्दिरं स तु वैष्णवः॥ 64॥

पत्न्यै ददौ धनं सर्वं मुद्रिका पृथगर्पिता।
उक्त्वा तस्य गुणं पत्न्यै [1]सा तया परिरक्षिता॥ 65॥

अतिथीन् भोजयित्वा तु वैष्णवान्संविसृज्य सः।
आत्मार्थं प्रययौ ग्रामे भिक्षितुं स तु हर्षितः॥ 66॥

आनीय भिक्षां रात्रौ स बुभुजे भार्य्यया सह।
ततस्तस्मिन्धने क्षीणे प्रार्थयित्वा स मुद्रिकाम्॥ 67॥

लब्ध्वा ततो धनं तेन तोषयामास सज्जनान्।
इत्थं निष्किञ्चनो यावज्जीवमाराध्य सज्जनान्॥ 68॥

अन्ते जगाम वैकुण्ठं पत्न्या[2] सह स वै द्विजः।
भगवानपि रुक्मिण्या सह तुष्टो ययौ गृहम्॥ 69॥

एवं भक्तेस्तु माहात्म्यं निष्किञ्चनसमुद्भवम्।
किञ्चिदेवात्र कथितं सम्यग्वक्तुं क्षमो हि कः॥ 70॥

इति श्रीभगवद्भक्तिमाहात्म्ये निष्किञ्चनचरितं नामाष्टषष्टितमः सर्गः॥ 68॥

❊ ❊ ❊

एकोनसप्ततितमः सर्गः

॥ साक्षिगोपालचरितम्॥

अथापरं प्रवक्ष्यामि भक्तिमाहात्म्यमुत्तमम्।
यस्य श्रवणमात्रेण भक्तिर्भवति शाश्वती॥ 1॥

अस्ति[3] गोडेषु विख्यातो ग्रामः शुरदहा इति।
तत्रैकं ब्राह्मणकुलं शास्त्राध्ययनतत्परम्॥ 2॥

तत्रासीद् ब्राह्मणश्चैको धनवानतिधार्मिकः।
स्त्रीपुत्रकन्यासहितो विरक्त इव स्वगृहे॥ 3॥

---

1. तस्यै – ख। 2. मत्वा – ख। 3. अति – ख।

एकदा तीर्थयात्रायां मनश्चक्रे द्विजोत्तमः।
ततश्चिन्ताकुलो जातो निरीक्ष्यात्मजरां द्विजः॥ 4॥

कथमेकाकिनो मेऽद्य वृद्धस्य गमनं भवेत्।
इति चिन्तयतस्तस्य पुर एको द्विजन्मनः॥ 5॥

आजगामाथ तद्ग्रामवासी कृष्णस्य भक्तिमान्।
पितृभ्यां रहितो विप्रः कृतदारपरिग्रहः॥ 6॥

दृष्ट्वा तं प्राह वृद्धस्तु सम्यगागतवानसि।
तीर्थयात्रां [1]चिकीर्षामि वृद्धावस्थां निरीक्ष्य भोः॥ 7॥

मया सह व्रजेस्त्वं चेत्तदा मे गमनं भवेत्।
इति श्रुत्वा वचस्तस्य स विप्रोऽथातिहर्षितः॥ 8॥

उवाच वचनं तस्मै वृद्धायातिविनीतवान्।
अहो ममापि यात्रायां मतिर्बहुदिनावधि॥ 9॥

वर्तते न गृहे कोऽपि पिता माताथवा सुहृत्।
तस्मात्सत्यं गमिष्यामि कुरूद्योगं यथोचितम्॥ 10॥

इति श्रुत्वा स वृद्धस्तु पुत्रं पत्नीं सुहृज्जनान्।
उक्त्वा तत्कालमेवासौ प्रतस्थे स्थविरो द्विजः॥ 11॥

अथ सोऽपि युवा विप्रः स्वमादायाम्बरादिकम्।
आगतस्तेन सार्द्धं तु चलितः स प्रहृष्टवत्॥ 12॥

गयामागत्य प्रथमं श्राद्धं कृत्वा तु भक्तितः।
काशीमाजग्मतुर्हृष्टौ तत्र यात्रां प्रचक्रतुः॥ 13॥

ततः प्रयागमागत्य स्थितौ मासं तु तत्र वै।
मथुरामाजग्मतुस्तत्र स्थित्वा यात्रां प्रचक्रतुः॥ 14॥

अथ रोगातुरो वृद्धस्तत्र [2]जातोऽथ दैवतः।
तं वृद्धं सेवयामास [3]तातवद्भक्तिसंयुतः॥ 15॥

अथ रोगादिनिर्मुक्तः स वृद्धः सुखवानभूत्।
दृष्ट्वा सेवां प्रहृष्टोऽभूत्तं युवानमुवाच ह॥ 16॥

---

1. चिकीर्ष्यामि – ख०। चिकीर्ष्य – ख।
2. पपातोऽथ – क।
3. स तावत् – ख।

अहो त्वया कृता सेवा ममातीव स्वतातवत्।
अतस्ते यदि तुष्टोऽहं यद्ब्रवीमि शृणुष्व तत्॥ 17॥
मम या वर्त्तते कन्या गृहे सा तेऽर्पिता मया।
तत्र गत्वा प्रदास्यामि विधिना तां न संशयः॥ 18॥
इति श्रुत्वा वचस्तस्य स युवा वाक्यमब्रवीत्।
अहो नैवं प्रवक्तव्यमयोग्यं [1]द्विजसत्तम॥ 19॥
अहो मयि[2] स्थिते कोऽन्यो दातुमर्हति कन्यकाम्॥ 20॥
पितृदेया हि कन्या स्यादिति शास्त्रविनिश्चयः।
तस्माद्दत्तात्मना तुभ्यं साक्षी गोपाल एव नौ[3]॥ 21॥
इत्युक्त्वा तत्र गोपालं साक्षिणं तौ प्रचक्रतुः।
ऊचतुस्तं च गोपालं त्वं साक्षी भव चावयोः॥ 22॥
इत्युक्त्वा कतिचित्कालं स्थित्वा नत्वाथ केशवम्।
चलितौ तौ निजं देशं मार्गे वृद्धं युवा पुनः॥ 23॥
सेवयामास भक्त्या वै पूर्वतोऽप्यतिभक्तितः।
एवं समागतौ तौ तु क्षेमपूर्वं निजे गृहे॥ 24॥
अथ वृद्धः स्वपुत्राय[4] पत्न्यै बन्धुभ्य एव च।
उवाच स्वस्य[5] दुःखादि ब्राह्मणस्य च सेवनम्॥ 25॥
कन्यादानप्रतिज्ञां तां[6] श्रुत्वा पुत्रादयोऽब्रुवन्।
किमिदं भाषसे व्यर्थं केयं ते मतिरीदृशी॥ 26॥
नैवं विधाय विप्राय दत्ता कन्या कुले मम।
जातिबाह्यो भविष्यामि दत्त्वास्यै कन्यकामिमाम्॥ 27॥
तस्मात्त्वं तिष्ठ तूष्णीं तु विवदामो वयं द्विजम्[7]।
इति तेषां वचः श्रुत्वा स्वीचक्रे सोऽपि तद्वशः॥ 28॥
अथासौ ब्राह्मणं वृद्धं गत्वा[8] कन्यामया[9]चत।
श्रुत्वा तद्वचनं ते तु वृद्धपुत्रादयः क्रुधा॥ 29॥

---

1. भवद्भिर्वचनं मयि – क।
2. मेऽपि – ख, क।
3. तौ – ख, ग।
4. वृद्धाय – ख, ग।
5. तस्य – ख।
6. त्वां – ख, ग।
7. द्विजाम – ख।
8. दत्वा – क, ख।
9. त्वयानवत् – ख।

ब्राह्मणं तर्जयामासुर्गालिदानादिभिस्तदा।
अथ स ब्राह्मणः क्रोधाद्राजद्वारमुपागतः ॥ 30 ॥
नृपायोक्तं तु तत्सर्वं श्रुत्वा राजा चुकोप ह।
आनयित्वाथ तान्सर्वान् विद्वांसं समुपाह्वयत् ॥ 31 ॥
उक्तवान् विदुषे राजा वादं कन्यानिमित्तकम्।
एतयोः को महानस्ति तत्र धर्मं वदैतयोः ॥ 32 ॥
इति राजाज्ञया विद्वान्सभां कृत्वाथ तत्र ह।
स्थित्वा वृद्धजनैः सार्द्धं शुश्रावोभयभाषितम् ॥ 33 ॥
अन्ये च शुश्रुवुः सर्वे ये च तत्र सभासदः।
कन्यादानं कनिष्ठाय जात्या नैव तु दीयते ॥ 34 ॥
एवं स्वदेशमर्य्यादाच्छेत्तव्या न कथञ्चन।
तस्मादेनं तु युक्त्या वै करिष्यामो निरुत्तरम् ॥ 35 ॥
इति वृद्धसुतादीनां कुलीनानां च पिण्डतः।
सभासद्भिः पक्षपातं चक्रे धर्मं च विस्मरन् ॥ 36 ॥
प्राह तं ब्राह्मणं कोऽपि जानात्येवं त्वदीरितम्।
लिखितं नास्ति वृद्धस्य साक्षी वा कोऽपि चास्ति भोः ॥ 37 ॥
तद्दर्शय गृहाणास्य कन्यारत्नमनुत्तमम्।
इति श्रुत्वा वचस्तस्य विदुषो विप्र आह तम् ॥ 38 ॥
लिखितं नास्ति मे विद्वन्साक्षी नैवास्ति मानुषः।
गोपालो मथुरायां तु स मे साक्षीह वर्तते ॥ 39 ॥
वृद्धेन च मया चापि धृतः साक्षी तदा हरिः।
श्रुत्वैतद्वचनं विद्वान्सभासद्भिरुवाच तम् ॥ 40 ॥
आगत्य साक्षी सदसि तं ब्रूयाच्चेत्सत्यमेव तत्।
तदा कन्यां दापयामो[1] वयं सर्वे न संशयः ॥ 41 ॥
इति श्रुत्वा वचस्तेषां स विप्रश्चातिदुःखितः।
उवाच यामि ते देवं गोपालं शरणं त्वहम् ॥ 42 ॥
अतः परं गतिर्नास्ति वर्तते मम सर्वथा।
यत्करिष्यति गोपालस्तदेव च हितं मम ॥ 43 ॥

1. प्रदास्यामो – ख, ग।

परन्त्वेकं तु मद्वाक्यं सर्वे शृण्वन्तु नीतिमत्[1]।
श्रुत्वा युक्तं प्रकर्त्तव्यमयुक्तं त्यज्यतां[2] ध्रुवम्॥ 44॥

मासैश्चतुर्भिर्यास्यामि समेष्यामि पुनर्गृहम्।
तावदस्यात्मजां यो वै [3]गृह्णीयात्स विप्रहा॥ 45॥

एवं प्रतिज्ञां कुरुत यूयं सर्वेऽत्र धार्मिकाः।
तदाहं तु गमिष्यामि गत्वा यास्यामि च द्रुतम्॥ 46॥

इति श्रुत्वा वचस्तस्य विद्वान्सर्वे सभासदः।
ऊचुस्तं सत्यमागत्य तत्रापि शृणु नो वचः॥ 47॥

अथारभ्य गते चैव चतुर्मासेऽथ पञ्चमे।
प्रथमे दिवसे कन्यां दास्याम्येतां न संशयः॥ 48॥

सोऽपि स्वीकृत्य विप्रस्तु जगाम मथुरां पुरीम्।
मासेनैकेन दुःखार्तश्चिन्तयन् तं हरिं द्विजः[4]॥ 49॥

गोपालमन्दिरस्याग्रे गत्वा तत्र स्थितोऽभवत्।
गोपालमुक्त्वा तत्सर्वं विप्रः सर्वजनैः कृतम्॥ 50॥

न गच्छसि यदि त्वं भोः त्यक्ष्याम्यत्रैव जीवितम्।
इति निश्चित्य विप्रस्तु सुष्वापातिबुभुक्षितः॥ 51॥

गोपालस्तु तदा रात्रौ भक्तानुग्रहवान् प्रभुः।
स्वप्ने तं कथयामास भक्तं श्रान्तं बुभुक्षितम्॥ 52॥

मा चिन्तां कुरु विप्र त्वं गमिष्यामि त्वया सह।
कथयिष्यामि सत्यं तदुक्तं[5] तव हिताय च॥ 53॥

त्वं तु प्रातः समुत्थाय स्नात्वान्नं भुङ्क्ष्व सत्वरम्।
ततोऽर्द्धरात्रिसमये प्रस्थास्यामि मठादहम्[6]॥ 54॥

त्वमग्रे व्रज पादाभ्यां त्वत्पृष्ठस्थे व्रजाम्यहम्।
मत्पादनूपुररवं शृण्वन् गच्छ त्वमग्रतः॥ 55॥

न मां विलोकयेः क्वापि भ्रान्त्यापि द्विजसत्तम।
ततोऽहं न गमिष्यामि यत्र त्वं द्रक्ष्यसि द्विज॥ 56॥

---

1. मे मतम् – ख।
2. त्यजतां – ख।
3. गृह्णीयात् – ख, ग।
4. सदा – क।
5. तद्व्रतं – ख।
6. मुठादहम् – क।

इति मे[1] समयो विप्र चित्ते स्थाप्यो निरन्तरम्।
इति स्वप्नं द्विजो दृष्ट्वा प्रातरुत्थाय सत्वरम्॥ 57॥

स्नात्वा भुक्त्वाथ मुदितो मन्दिरस्याग्रतः स्थितः।
कदा यास्यति रात्रिर्वै [2]इत्युत्कण्ठासमन्वितः॥ 58॥

अथ रात्र्यामागतायां महानिशि महाप्रभुः।
गोपालो मन्दिराद्बाह्ये समायातो यदाङ्गणे॥ 59॥

अजागरीत्तदा विप्रः शुश्राव[3] नूपुरध्वनिम्।
स्ववस्त्रादिकमादाय बहिरेत्याग्रतो ययौ॥ 60॥

इति श्रीभगवद्भक्तिमाहात्म्ये साक्षिगोपालचरितं नामैकोनसप्ततितमः सर्गः॥69॥

❊ ❊ ❊

सप्ततितमः सर्गः

॥ साक्षिगोपालचरितम्॥

अथ भक्तिवशादेव गोपालो भक्तवत्सलः।
गौडब्राह्मणपृष्ठस्थो[4] गौडदेशं जगाम ह॥ 1॥

स तु विप्रो निजग्रामसमीपं तु यदा गतः।
तदास्तं प्रययौ सूर्यो निशायामप्यगाद्द्विजः॥ 2॥

नीत्वा गोपालमद्याहमागतश्चेति हर्षतः।
विस्मृत्य समयं पृष्ठदेश[5]मालोकयद्द्विजः॥ 3॥

ततस्तत्रैव गोपालः प्रादुर्भूय स्थितोऽभवत्।
अथ विप्रस्तु तं दृष्ट्वा हर्षाश्रुव्याकुलेक्षणः॥ 4॥

स्तुत्वा नत्वा मुहुस्तत्र तां रात्रिं स्थितवान् मुदा।
एकाकिनं तं गोपालं त्यक्त्वा नैवागतो गृहे॥ 5॥

अथ तस्यां तु रात्र्यां वै राजाद्या ग्रामवासिनः।
स्वप्ने ददृशुरायातो गोपालो ब्राह्मणः स च॥ 6॥

---

1. मम – क।
2. इत्युक्त्वाथ – ख, ग।
3. सुश्राव – क, ख।
4. पृष्ठस्थौ – क।
5. पृष्ठं विलोक्यत् – ख।

वदति स्पष्टमेवासौ ब्राह्मणेनार्पितात्मजाम्।
कृत्वा मां साक्षिणं चास्मै द्विजाय प्रतिषेधते ॥ 7 ॥

इति राजा[1] तथामात्यः स च विद्वान् सभासदः।
तद्ग्रामवासिनोऽन्ये च ददृशुश्चाद्भुतं निशि ॥ 8 ॥

प्रातरुत्थाय तेष्वेवं चिन्तयत्सु परस्परम्।
प्रातरेको ययौ ग्रामात्पश्चिमे कार्यगौरवात् ॥ 9 ॥

ददर्श तत्र तं विप्रं प्रतिमां वैष्णवीं तथा।
दृष्ट्वा समीपमागत्य नमस्कृत्य द्विजं मुदा ॥ 10 ॥

आगतो ह्येष गोपालस्त्वया[2] सह किमागतः।
धन्योऽसीत्यभिधायासौ त्वरितो ग्राम आगतः ॥ 11 ॥

उवाच सर्वान् ग्रामीणान् गोपालोऽत्र समागतः।
ब्राह्मणस्य तु कार्यार्थं साक्ष्यं दातुं न संशयः ॥ 12 ॥

अथ ते ग्रामनिलयाः सर्वे तत्र समागताः।
राजापि चाययौ तत्र दृष्ट्वा गोपालमद्भुतम् ॥ 13 ॥

हर्षगद्गदया वाचा स्तुत्वा ते[3] जगदीश्वरम्।
ब्राह्मणस्य पदाम्भोजेऽभिषेतुस्तेऽति[4]भक्तितः ॥ 14 ॥

अथ राजा तु तत्कालमाहूयाथ द्विजं तु तम्।
दापयामास सत्कृत्य कन्यां तस्मै विधानतः[5] ॥ 15 ॥

स्वयं धनं भूरि तस्मै दत्त्वा विप्राय भूपतिः।
ग्रामं खुरदहाख्यातं जीविकायै ददौ नृपः ॥ 16 ॥

गोपालस्य मठं राजा धनैर्बहुभिरादरात्।
कारयामास त्वरितं समाहूय तु शिल्पिनः ॥ 17 ॥

स विप्रस्तत्र निवसन् कन्यां प्राप्य कुलोद्भवाम्।
गोपालगतचित्तोऽसौ गोपालस्मृतितत्परः ॥ 18 ॥

गोपालसेवां चक्रे स कर्मणा मनसा गिरा।
राजाद्यास्तु जनाः सर्वे विप्रं भक्त्या सिषेविरे ॥ 19 ॥

---

1. राज्ञा – ख, ग।
2. विप्रः – ख।
3. श्रुतं तद्जगदीश्वरम् – ख।
4. निपपातातिभक्तिमान् – ख, ग।
5. भक्ताय दापयामास कन्यां विप्राय सत्कृतम् – ख।

साक्षी भूत्वा सदागत्य स्थितस्तत्र महाप्रभुः।
साक्षिगोपाल इत्येतन्नाम तस्याभवत्ततः॥ 20॥
अद्यापि तत्र देवेशः साक्षिगोपालनामतः[1]।
तिष्ठतीत्यद्भुतं लोकाः पश्यन्तु भक्तिचेष्टितम्॥ 21॥
अथासीन्मथुरायां वै महाचिन्ता नृणां तदा।
गोपालः क्व गतः केन नीतोऽस्माकं तु जीवनम्॥ 22॥
आनेतुं न हि शक्यः स मनुष्येणेति निश्चितम्।
तस्माद्देवाश्च दैत्याश्च जहुर्देवं न संशयः॥ 23॥
इति चिन्ताकुलाः सर्वे न किञ्चित्कर्तुमुद्यताः।
अथ तस्मिन् क्षणे विप्रो गौडदेशात्समागतः॥ 24॥
स्नात्वा विश्रामतीर्थेषु दृष्ट्वा देवं च केशवम्।
गोपालमन्दिरस्याग्रे समायातो दिदृक्षया॥ 25॥
ज्ञात्वैवं तत्र वृत्तान्तं दृष्ट्वा सर्वान्स चिन्तितान्।
उवाच ब्राह्मणस्तान्वै मा चिन्तां कुरुत द्विजाः॥ 26॥
अहं वक्ष्यामि शृणुत गोपालो यत्र तिष्ठति।
इति श्रुत्वा वचस्तस्य पप्रच्छुस्तं मुदान्विताः॥ 27॥
वद विप्र महाभाग त्वं भाग्यादत्र चागतः।
नोचेद्विना तं गोपालं विद्ध्यस्मान्त्यक्तजीविकान्[2]॥ 28॥
इति तेषां वचः श्रुत्वा प्रोवाच ब्राह्मणः स तान्।
मद्देशे श्री[3]जगन्नाथात्पश्चिमे योजनोपरि॥ 29॥
ग्रामः खुरदहाख्योऽस्ति गोपालस्तत्र तिष्ठति।
यथा ब्राह्मणयोर्जातो[4] विवादः कन्यका कृते॥ 30॥
विदुषो वचनं तद्वत्सामाजिकवचस्तथा।
आनेतुं साक्षिणं देवं पुनर्विप्रोऽगमत्तथा॥ 31॥
गोपालागमनं तत्र राजभक्तिं तथा द्विजः।
उवाच सर्ववृत्तान्तं श्रुत्वा तेऽतिप्रहर्षिताः॥ 32॥
तेनैव ब्राह्मणेनाथ साकं सर्वे प्रतस्थिरे।
गतास्ते यत्र गोपालो दृष्ट्वा तं हु हु उच्यते॥ 33॥

---

1. नामकः – क।
2. तान् – क।
3. जगन्नाथः – ख।
4. र्तातौ – ख।

ऊचुः सर्वे तु तं देवं किमिदं कृतवानसि।
इत्युक्त्वा तत्र ते सर्वे प्रतिमासन्निधिं गताः ॥ 34 ॥

उत्थापयितुमुद्युक्ताः नोत्तस्थौ प्रतिमा ततः।
तस्थुस्त्यक्त्वान्नपानादि निराहाराः स्थिता द्विजाः ॥ 35 ॥

अथ रात्रौ तु गोपालस्तान्स्वप्ने वाक्यमब्रवीत्।
यूयं गच्छत तत्रैव मथुरायामितो द्विजाः ॥ 36 ॥

नेयं मूर्तिरितस्तत्र गमिष्यति कथञ्चन।
अयं मेऽस्तीह यो भक्तस्तद्वशेऽहं स्थितः किल ॥ 37 ॥

युष्माभिस्तत्र गन्तव्यं[1] नीत्वान्यं प्रतिमां मम।
स्थाप्यतां मन्दिरे तत्र तस्मिन् स्थास्याम्यहं मुदा ॥ 38 ॥

एवं वदन्तं ते सर्वे गोपालं ददृशुर्निशि।
प्रातरुत्थाय सुस्नाता[2] गोपालं तं प्रणम्य च ॥ 39 ॥

चलिताश्च ततस्तान्वै भोजयामास स द्विजः।
भोजयित्वा ददौ तेभ्यो धनानि विविधानि च ॥ 40 ॥

विससर्ज च तान् सर्वान् अश्रुविह्वललोचनात्।
स भक्तो वै द्विजः श्रेष्ठो महाश्चर्यममन्यत ॥ 41 ॥

अथ ते त्वरितास्सर्वे ब्राह्मणाः मथुरां ययुः।
गोपालप्रतिमां कृत्वा स्थापयामासुरानताः ॥ 42 ॥

पूर्ववत्पूजयन्ति स्म तत्र ते पूजका द्विजाः।
सर्वे तत्र प्रमुदिता मथुरावासिनो नराः ॥ 43 ॥

एवं भक्तिवशीभूतः श्रीकृष्णो भक्तवत्सलः।
पूरयत्यखिलान्कामान्निजभक्तस्य सर्वदा ॥ 44 ॥

श्रुत्वेदं परमाश्चर्य्यं द्विजभक्तिविचेष्टितम्।
लभते सकलान्कामान् कृष्णभक्तिं लभेत वै ॥ 45 ॥

इति श्रीभगवद्भक्तिमाहात्म्ये साक्षिगोपालचरितं नाम सप्ततितमः सर्गः ॥ 70 ॥

* * *

---

1. गत्वा तु कृत्यान्यां – क।
2. सुस्नात्य – ख।

एकसप्ततितमः सर्गः

॥ रामदासचरितम् ॥

अथापरं प्रवक्ष्यामि [1]भक्तेर्माहात्म्यमुत्तमम् ।
परमाश्चर्यजनकं हरिभक्तिप्रदायकम् ॥ 1 ॥

द्वारकायास्तु पूर्वस्यां डाकोर[2] इति विश्रुतः ।
महाग्रामोऽस्ति तत्रासीद्ब्राह्मणो भक्तिसंयुतः ॥ 2 ॥

रामदास इति ख्यातः कुटुम्बी हरिपूजकः ।
प्रतिमासं द्विजः सोऽथ गत्वा द्वारवतीं मुदा ॥ 3 ॥

उपोष्यैकादशीं तत्र कृत्वा जागरणं निशि ।
समाययौ निजं गेहमिति तस्य दृढव्रतम् ॥ 4 ॥

गेहेऽपि साधुसेवायां निरतः सर्वदा द्विजः ।
भिक्षयान्नानि चादाय साधुभ्यः प्रददौ मुदा ॥ 5 ॥

एवं गतेषु कालेषु रामदासो जराङ्गतः ।
तथापि द्वारकायात्रां रणच्छोरहरेः पुरः ॥ 6 ॥

उपवासं जागरणं चक्रे कृच्छ्रेण स द्विजः ।
एवं गतागतं[3] कर्तुमशक्तो ब्राह्मणोत्तमः ॥ 7 ॥

न च तस्थौ द्वारकायां कुटुम्बभरणाय सः ।
डाकोर ग्राममागत्य चक्रे पुत्रादिपालनम् ॥ 8 ॥

अथैकस्मिन् दिने विप्रो रामदासो जरातुरः ।
एकादश्यां गतस्तत्र रणच्छोरसमीपतः ॥ 9 ॥

यथा श्रमाज्जरादोषादतिम्लानो बभूव सः ।
तथाप्युपोषितो रामदासः कृत्वाथ जागरम् ॥ 10 ॥

द्वादश्यां पारणं कृत्वा न गन्तुं शक्तिमानभूत् ।
ततस्तत्रैव सुष्वाप रणच्छोरस्य सन्निधौ ॥ 11 ॥

---

1. भक्ति – क।
2. जाकोर – ख।
3. श्रत्वागतं – ख।

अथ स्वप्ने रामदासं रणच्छोर उवाच तम्।
अहो मां नय तत्रैव यत्रत्वं वससि द्विज॥ 12॥

आनीय शकटं तत्र मामारोप्य महानिशि।
इतः प्रयाहि त्वद्भक्त्या गमिष्यामि न संशयः॥ 13॥

इति दृष्ट्वाथ[1] स्वप्नं प्रातरुत्थाय स [2]द्विजः।
द्विजोऽथ[3] गृहमागत्य नीत्वा शकटमुत्तमम्॥ 14॥

एकादश्यां रामदासो द्वारकायां समागमत्[4]।
जनैर्ज्ञातस्तु वृद्धत्वादागतः शकटेन वै॥ 15॥

स तु रात्रौ स्थितस्तत्र व्रती जागरणं चरन्।
द्वादश्यां पारणं कृत्वा निशायामर्द्धरात्रिके॥ 16॥

उतार्य्यालङ्कृतीः सर्वाः संस्थाप्य तन्मठे पुनः।
रणच्छोरं समुत्थाप्य संस्थाप्य शकटोपरि॥ 17॥

निर्जगाम द्वारिकाया भयादतिजवने सः।
अथ प्रभाते द्वादश्यां रणच्छोरस्य पूजकाः॥ 18॥

अदृष्ट्वा रणच्छोरं तु चिन्तां जग्मुर्दुरत्ययम्।
केन नीतोऽयमस्माकं रणच्छोरः प्रतापवान्[5]॥ 19॥

इति सञ्चिन्त्य ते सर्वे तत्रत्यान् ददृशुर्जनान्।
जिज्ञासवो रामदासमदृष्ट्वा तेऽथ पूजकाः॥ 20॥

शकटं चाप्यदृष्ट्वा ते सर्वैरेतद्धि निश्चितम्।
अनेनैव तु नीतोऽसौ निशायां नात्र संशयः॥ 21॥

अत एव रथं नीत्वा पूर्वेद्युरिह चागतः।
अद्धरात्रौ रामदासो जगाम शकटेन वै॥ 22॥

इति तत्रत्यमनुजैरुक्तास्ते पूजकास्तदा।
उत्थाय द्रुद्रुवुः सर्वे रामदासं प्रति द्विजाः॥ 23॥

---

1. निशि – क॥
2. हर्षितः – ख, ग।
3. मुदितो – ख।
4. गतो मुदा।
5. हरिर्निश – क।

रामदासः समायातो यदा स्वग्रामसन्निधौ।
तदा ते पूजकास्तत्र ददृशुस्तं द्विजोत्तमम्॥ 24॥

रामदासोऽपि तान्सर्वान् ददर्शाति त्वरागतान्।
विज्ञाय मूर्तिमुत्थाप्य वाप्यां चिक्षेप भीतिमान्॥ 25॥

स्वयमागत्य शकटे रामदासः स्थितोऽभवत्।
अथ ते पूजकास्तत्र समायाताः त्वरान्विताः॥ 26॥

ददृशुः शकटं तत्र नापश्यन्प्रतिमां तु[1] तां।
तन्मध्ये कोऽप्युवाचाथ वापीतीरे गतो ह्ययम्॥ 27॥

को वेद तत्र निःक्षिप्य पुनरागतवान् भवेत्[2]।
इत्युक्तास्तत्र ते सर्वे वापीतीरमुपागता॥ 28॥

पश्यन्तो जलमध्ये तु ददृशुः प्रतिमां हरेः।
उत्थापयितुमारेभे[3] सर्वे ते पूजकास्तदा[4]॥ 29॥

नोत्तस्थौ प्रतिमा तस्मात् सर्वे चिन्तासमाकुलाः।
ग्रामादन्यान्बलिष्ठान्वै यथा शतसहस्रशः॥ 30॥

प्रार्थ्यनीय च तैश्चापि नोत्थिता प्रतिमा स्थलात्।
ततः सर्वे निवृत्तास्ते ज्ञात्वा हरिविचेष्टितम्॥ 31॥

रामदासेन चैकेन प्रतिमेयं समुत्थिता।
सैवास्माभिस्तु बलिभिः सहस्रैरपि नोत्थिता॥ 32॥

अतो नैव हरेस्तत्र गन्तुमिच्छास्ति निश्चितम्।
तथा चात्रैव वत्स्यामो वयं चैव न संशयः॥ 33॥

इति निश्चित्य ते सर्वे तस्थुस्त्यक्ताशनोदकाः।
निशायां राणच्छोरस्तु तानुवाच वचो हितम्॥ 34॥

अहो नाहमितो यामि रामदासस्य भक्तितः।
यूयं यात द्वारकायां स्वर्णं नीत्वा तु तत्समम्॥ 35॥

तत्रान्यमुर्तिं कृत्वा मे स्थापयध्वमहं पुनः।
तत्रापि भवतां भक्त्या[5] तिष्ठाम्येव न संशयः॥ 36॥

---

1. शुभाम् – ख।
2. असौ – ख।
3. शक्ताः – क।
4. मुदा – क।
5. भक्ताः – ख, ग।

तानुक्त्वैवं ततो रामदासं स्वप्नेऽवदत्प्रभुः।
मत्तुल्यकनकं प्रातर्दत्त्वा तेभ्योऽति भक्तितः॥ 37॥

पूजकेभ्योऽथ तान्भक्त्या[1] विसृज्य मां पुनर्गृहे।
संस्थाप्यार्च्चय तिष्ठामि [2]त्वद्गेहे नात्र संशयः॥ 38॥

इत्युक्त्वा रामदासाय स्वप्नं[3] तस्य स्त्रियं पुनः।
स्वप्ने प्रोवाच भगवान् भक्तानुग्रहकारकः॥ 39॥

कर्णालङ्करणं यत्तुरक्तिकात्रयमस्ति ते।
तदर्पय तुलायां तु तत्समोऽपि भवाम्यहम्॥ 40॥

इति दृष्ट्वाथ ते स्वप्नमुतस्थुः प्रातरेव हि।
पूजका रामदासस्य गृहद्वारि समागताः॥ 41॥

देहि नः प्रतिमातुल्यं स्वर्णं यामो गृहं वयम्।
इति तेषां वचः श्रुत्वा रामदासोऽति विस्मितः॥ 42॥

उवाच सत्यमेतद्वै मामप्याह जनार्दनः।
परन्तु कनकं तावद्[4] वर्तते कुत्र मे द्विजाः॥ 43॥

तथापि पत्नीं पृष्ट्वाहं समागच्छामि तिष्ठत।
इत्युक्त्वा तान् गतः पत्नीसमीपे प्राह सा स्वयम्॥ 44॥

अहो किमर्थं खिन्नोऽसि भगवान्भक्तवत्सलः।
मामुवाच निशि स्वप्ने यत्कर्णेऽस्ति हिरण्यकम्॥ 45॥

तेनैव तुलितो भद्रे भविष्यामि न संशयः।
इत्युक्त्वा कर्णदेशात् तत्[5] कनकं प्रददौ सती॥ 46॥

हर्षयन्ती रामदासं वचनैर्भक्तिसंयुतैः।
अहो यो न मनुष्यैस्तु सहस्रैरुत्थितः प्रभुः॥ 47॥

कथं स तु त्वयैकेन स्थापितः शकटे[6] हरिः।
कथं चात्र जले न्यस्तस्तत् सर्वं हृदि चिन्तय॥ 48॥

---

1. तु गृहे – ख।
2. वाचं – क।
3. तद्वद् – ख।
4. सा – क।
5. सा – क।
6. सकटे – ख।

मा कुरुष्वात्र सन्देहं तुलितः स्यादनेन सः ।
इति तस्या वचः श्रुत्वा गृहीत्वा कनकं तु तत् ॥ 49 ॥
तुलामादाय महतीं रणच्छोरं समानयत् ।
श्रुत्वैतत्सर्ववृत्तान्तमागता ग्रामवासिनः ॥ 50 ॥
तेषामग्रे[1] तुलायां स रामदासोऽति भक्तितः ।
रणच्छोरं स्थापयित्वा ददौ तत्कनकं स्वयम् ॥ 51 ॥
ततः प्रजहसुस्सर्वे दृष्ट्वा तत्कनकं जनाः ।
पूजकास्ते समूचुस्तं किमिदं कुरुषे द्विज ॥ 52 ॥
एतावती कथं मूर्तिरनेन तुलिता भवेत् ।
इति तेषां वचः श्रुत्वा रामदासोऽब्रवीद्वचः ॥ 53 ॥
तोलयन्तु भवन्तोऽत्र मा कुरुध्वं[2] च संशयम् ।
गुरुता लघुता चेति सर्वं कृष्णस्य लीलया ॥ 54 ॥
सहस्रैर्नोत्थितो योऽसौ पश्यैकेन मयोत्थितः ।
इति श्रुत्वा वचस्तस्य रामदासस्य पूजकाः ॥ 55 ॥
सत्यं मत्वाथ तन्मध्ये एक उत्थाय चागतः ।
तुलामुत्थापयामास तेनैव तुलितः प्रभुः ॥ 56 ॥
ततः सर्वे महाश्चर्यं मेनिरे भक्तिसंभवम् ।
अथ तेषां पूजकानां मध्ये चैकोऽति मुर्खवत् ॥ 57 ॥
हरिं नेतुं मनः कृत्वा तमुत्थापयितुं गतः ।
बहु प्रयासं कृतवान्नोत्तस्थौ स महाप्रभुः ॥ 58 ॥
ततः सर्वे हसन्तस्तं[3] वारयामासुराशु तम् ।
अथ ते ब्राह्मणास्तावद् गृहीत्वा कनके मुदा ॥ 59 ॥
भोजिता रामदासेन यग्मुर्द्वारवतीं पुरीम् ।
रामदासोऽपि तां मूर्तिं रणछोरस्य भक्तितः ॥ 60 ॥
स्थापयामास भवने सिषेवे तामहर्निशम् ।
संपूज्य च रणच्छोरं यावज्जीवं कृतार्थधीः ॥ 61 ॥

---

1. तेषां ये – ख, ग।
2. कुरुष – ख।
3. अहं मं तस्तं – ख।

मृतो वैकुण्ठभुवनं ययौ कृष्णमनुस्मरन्।
अद्यापि स हरिस्तत्र [1]डाकोरग्राममध्यत: ॥ 62 ॥

तिष्ठत्येव जनान्भक्तान् कृतार्थी कर्तुमात्मना।
धन्यो वै रामदासस्तु धन्या तद्भक्तिरुत्तमा ॥ 63 ॥

इति श्रीभगवद्भक्तिमाहात्म्ये रामदासचरितं नाम एकसप्ततितम: सर्ग: ॥ 71 ॥

❊ ❊ ❊

द्वासप्ततितम: सर्ग:

॥ जसूश्यामचरितम् ॥

अन्तर्वेदे [2]जसूश्याम नाम्नासीद्वैष्णव: किल।
तस्यैको वृषभो गेहे नान्यत् किञ्चिद्धनादिकम् ॥ 1 ॥

तेन क्षेत्रं चकारासौ क्षेत्रात्प्राप्तान्नसञ्चय:।
(तेनैव भोजयामास साधून्सर्वान्गृहागतान् ॥ 2 ॥

भिक्षया तु स्वयं भुङ्क्ते भक्तसेवापरायण:।
क्षेत्रोत्पन्नं तु सर्वेभ्यो भक्तेभ्य: प्रददौ मुदा) ॥ 3 ॥[3]

(जसूश्यामोऽतिखिन्नोऽभूदलब्ध्वा वृषभं वने ॥ 4 ॥

चिन्तयामास मनसा किं करोम्यहमद्य वै।
वृषभोऽपि हृतश्चौरै: कथं क्षेत्रं भविष्यति) ॥ 5 ॥[4]

क्षेत्राभावे तु साधूनां सेवनं न भविष्यति।
मृत्युरेव वरं मन्ये साधुसेवां विना मम ॥ 6 ॥

तस्मादद्यैव मर्तव्यं गृहे गत्वा न संशय:।
इति निश्चित्य मनसा समागच्छन् गृहं प्रति ॥ 7 ॥

ज्ञातं भगवतासौ तु मरिष्यति न संशय:।
तादृशो वृषभस्तस्य समीपेऽग्रे निवेशित: ॥ 8 ॥

अथासौ तु जसूश्यामो दृष्ट्वा तं वृषभं स्वकम्।
जहर्ष त्वरितस्तं तु जग्राह वृषभं मुदा ॥ 9 ॥

---

1. जाकोर – ख, ग।
2. जशूश्याम: – क।
3. ख – मध्ये लुप्त: पाठ:।
4. मध्ये लुप्त: पाठ:।

गृहीत्वा गृहमायातो भक्तसेवापरायणः।
कृत्वा क्षेत्रं तदुत्पन्नैस्तर्प्पयामास सज्जनान्॥ 10॥

एवं संवत्सरे जाते स चौरस्तत्र चागतः।
कृष्यन्तं तादृशं क्षेत्रं ददर्श वृषभं स तु[1]॥ 11॥

स एवायं वृषः कस्मादागतोऽत्र पुनर्गृहात्।
इति सञ्चिन्त्य गेहे स्वे समायातोऽथ तस्करः॥ 12॥

ददर्श वृषभं तं तत्र पुनस्तत्र समागतः।
तत्राप्यपश्यद्वृषभं पुनरेव[2] गृहं ययौ॥ 13॥

पुनर्जगाम स्वं गेहं वृषभं तं न संशयः।
एकदा वृषभो नीतः पुनरागत्य दृष्टवान्॥ 14॥

एवं पुनः पुनश्चौरो दृष्ट्वाश्चर्यं महत्तदा।
जसूश्यामस्य चरणे निपत्येदमुवाच ह॥ 15॥

अहो मया वृषो नीतो वनात्तव न संशयः।
पुनस्तु चायं वृषभस्तादृशो दृश्यते मया॥ 16॥

इतीदं मे महच्चित्रं जायते भक्तसत्तम।
तस्मात्त्वद्वृषभं नीत्वा तुभ्यं दातुं समागतः॥ 17॥

गृहाणेदं वृषं स्वामिन् कुरु शिष्यं च मामिह।
अद्यारभ्य मया चौर्य्यं त्यक्तं सत्यं न संशयः॥ 18॥

तस्मात्त्वां शरणं प्राप्तः कृतार्थं कुरु मां विभो।
इत्युक्तस्तेन चौरेण जसूश्यामो दयान्वितः॥ 19॥

प्रददौ गोपचौराय मन्त्रं भक्तिविवर्द्धनम्[3]।
गृहीत्वा तस्य मन्त्रं स प्रदाय वृषभं च तत्[4]॥ 20॥

आगत्य स्वगृहे गोपो महाभक्तो बभूव ह।
दधिदुग्धादिकं नीत्वा जसूश्यामस्य सेवनम्॥ 21॥

चकार प्रत्यहं गोपः सोऽतिभक्तो बभूव ह।
एवं चौरोऽपि भक्तस्य संसर्गाद्भक्तिमानभूत्॥ 22॥

---

1. तदा – ख।
2. पुनस्तादृशमेव सः – क।
3. विवद्धिनम् – ख।
4. वनम् – क।

तस्मात्सज्जनसंसर्गो नृणां सर्वार्थसाधकः ॥ 23 ॥

इति श्रीभगवद्भक्तिमाहात्म्ये जसूश्यामचरितं नाम द्वासप्ततितमः सर्गः ॥ 72 ॥

❊ ❊ ❊

त्रिसप्ततितमः सर्गः

॥ नन्ददासचरितम् ॥

अथापरं प्रवक्ष्यामि भक्तेर्माहात्म्यमुत्तमम् ।
महाश्चर्य्यप्रदं नृणां हरिभक्तिप्रदायकम् ॥ 1 ॥

गङ्गाया उत्तरे कूले नैमिषारण्यपश्चिमे ।
अस्ति नाम्ना वरेलीति ग्रामो ब्राह्मणसंकुलः ॥ 2 ॥

तत्राभूद्ब्राह्मणश्चैको नन्ददास इति [1]श्रुतः ।
अविद्यो निर्द्धनः शान्तः कृषिकर्म्म चकार सः ।। 3 ॥

परन्तु हरिभक्तोऽसौ साधुसेवापरायणः ।
सन्ध्यायामागतान्सर्वान् ददात्यन्नं स भक्तितः ॥ 4 ॥

तं दृष्ट्वा निरपेक्षं तु तत्रान्या ये सुदुर्जनाः ।
तं कदर्थयितुं सर्वे मन्त्रं चक्रुः परस्परम् ॥ 5 ॥

अहोऽस्मिन्नगरे नीचः सर्वस्मादप्ययं द्विजः ।
(सर्वेभ्यो महतीं लोके प्रतिष्ठां प्राप दम्भतः ॥ 6 ॥

सायं समागतेभ्योऽसौ ददात्यन्नं यतस्ततः[2]) ।
ख्यातो लोकेषु सर्वत्र ग्रामे[3] सर्वाधिकोऽभवत् ॥ 7 ॥

अतस्तथा प्रकर्तव्यं येन तस्य च मन्दिरे ।
न गच्छेत्कोऽपि तं दूरात् त्यज चाण्डालवद् द्विजम् ॥ 8 ॥

सर्वेभ्यो महतीं लोके प्रतिष्ठां प्राप भक्तितः ।
तथा केनाप्युपायेन अप्रतिष्ठा भवेद्यथा ॥ 9 ॥

इत्येवं मन्त्रयित्वा ते मृतां वत्सतरीं खलाः ।
तत्क्षेत्रे स्थापयामासुः सुप्ते लोके महानिशि ॥ 10 ॥

---

1. स्मृतः – क।
2. क – मध्ये लुप्तः पाठः
3. यामे – ख।

अथ प्रातस्तु स्वक्षेत्रे नन्ददासो गतः स्वयम्।
तदैव ते द्रुतं तत्र गताः क्षेत्रेऽति दुर्जनाः ॥ 11 ॥

दृष्ट्वा वतत्सतरीं तां ते नन्ददासं तथा द्विजम्।
ऊचुः धिक् शब्दमुच्चार्य नन्ददासं महाशुचिम्॥ 12 ॥

अरे विप्रकुले जातः कथमेषा हता त्वया।
वृथा मुद्रां च मालां च वहसि त्वं द्विजाधम ॥ 13 ॥

दम्भेन नगरे नूनं सर्वान्वञ्चयसि स्वयम्।
इत्युक्त्वा ते समायग्मुर्ग्रामे दर्शयितुं जनान्॥ 14 ॥

उक्त्वा नीत्वा च सर्वास्ते गतास्तत्राति दुर्जनाः।
दर्शयामासुरुद्विग्नं नन्ददासं च तां मृताम्॥ 15 ॥

निनिन्दुर्दुर्जनास्तत्र समेताः मौनमास्थिताः।
नोचुः किञ्चिन्नन्ददासं परावृत्य स्वकं गृहम्॥ 16 ॥

अथ तान्नन्ददासस्तु प्रोवाचाति प्रहृष्टवत्।
मया न घातितेयं चेत्येतद्वक्ष्याम्यहं कथम्॥ 17 ॥

यत्रैते साक्षिणः सन्ति ब्राह्मणा अतिधार्मिकाः।
तस्माद्भवन्तो गच्छन्तु श्रुत्वैकं वचनं मम ॥ 18 ॥

जीवयिष्यति चेदेनां रामो वत्सतरीं प्रभुः।
तदानया सहायं भो आगमिष्यामि मन्दिरम्॥ 19 ॥

नो चेद्यत्र गता चेयं तत्र यास्याम्यसंशयम्।
इति श्रुत्वा वचस्तस्य सर्वे ग्राममुपागताः ॥ 20 ॥

नन्ददासस्तु तत्रैव वत्सतर्य्याः समीपतः।
स्थित्वा रामेति मन्त्रं वै भक्तिपूर्वं जजाप ह ॥ 21 ॥

ततो मध्याह्नसमये प्रोत्तस्थौ सा क्षुधातुरा।
श्रीरामकृपया वत्सा चचार क्षेत्रजान्यवान्॥ 22 ॥

चारयित्वाथ तां रामदासः कृत्वाग्रतः स्वयम्।
समायातोऽथ नगरे शिष्टब्राह्मणसन्निधौ ॥ 23 ॥

ते दृष्ट्वा तं प्रणम्योचुः धन्यस्त्वं द्विजसत्तम।
त्वत्समो नास्ति कोऽप्यन्यो भगवद्भक्तिमान् द्विजः ॥ 24 ॥

दृष्ट्वा दृष्ट्वा तु तां वत्सां जीवितामति विस्मिताः।
अधोमुखाः स्थिता तूर्ष्णीं महाशोकातुरा इव ॥ 25 ॥

अथ वत्सतरी सा तु हम्भारावैः स्वमातरम्।
आहूयन्ती मुहुस्तस्या माता श्रुत्वा तु तद्ध्वनिम् ॥ 26 ॥

छित्वा स्वबन्धनं तत्र समायाताथ तत्क्षणात्।
गोस्वाम्यपि[1] समायातो गौः पश्चात्तु गता स्वयम् ॥ 27 ॥

दृष्ट्वा वत्सतरीं सा गौः पाययामास वै स्तनम्।
तदा गोस्वामिनं सर्वे पप्रच्छुः कथमत्र ते ॥ 28 ॥

वत्सेयमागता विप्र ब्रूहि सत्यं यथार्थतः।
इति श्रुत्वा वचस्तेषां गोस्वामी वक्तुमुद्यतः ॥ 29 ॥

[2]अथान्तरे समायातो ग्रामाधीशस्तु तत्र वै।
सोऽपि पप्रच्छ तं विप्रं यथार्थं वद मे द्विज ॥ 30 ॥

तमाह विप्रो गोस्वामी सत्यमेव ब्रवीम्यहम्।
एषा वत्सतरी चास्या गोर्मृता मम मन्दिरे ॥ 31 ॥

तृतीयदिवसे पश्चादिमां गेहात्तु चर्म्मकृत्।
[3]निनाय बहिरेतत्तु जानेऽहं नात्र संशयः ॥ 32 ॥

गौरियं तु तदारभ्य हंभारावैः सुदुःखदैः।
उद्वेजयन्ती घासं वै न जग्राह शुचाकुला ॥ 33 ॥

अद्यास्यास्तु रवं श्रुत्वा त्रोटयित्वा तु बन्धनम्।
आगतात्र ततः पश्चादहमागतवानिह ॥ 34 ॥

इति श्रुत्वा वचस्तस्य गोप्रभो नराधिपः।
प्रणम्य नन्ददासं तु विससर्ज गृहं प्रति ॥ 35 ॥

तान्दुष्टान् ब्राह्मणान् सर्वान् च नाथनगरेश्वरः।
निन्दयित्वा बहिश्चक्रे स्वराज्यादति [4]कोपतः ॥ 36 ॥

तदादि नन्ददासस्य यशोऽतीव बभूव ह।
पूर्वस्मादप्ययं नन्ददासो दीनवदास्थितः ॥ 37 ॥

---

1. साम्यपि – ख।
2. अथान्ते – क।
3. तवान – ख।
4. माब्रह्म – ख।

श्रीरामं चिन्तयन्नित्यं साधुसेवापरायणः।
यावज्जीवं स्थितस्तत्र मृतो रामान्तिके ययौ॥ 38॥

इति श्रीभगवद्भक्तिमाहात्म्ये नन्ददासचरितं नाम त्रिसप्ततितमः सर्गः॥ 73॥

* * *

चतुस्सप्ततितमः सर्गः

॥ अल्हन्दासचरितम्॥

अथापरं प्रवक्ष्यामि माहात्म्यं परमाद्भुतम्।
अल्हन्दसस्य भक्तस्य भक्तेर्भक्तिविवर्द्धनम्॥ 1॥

गङ्गाया उत्तरे कूले ब्रह्मावर्तसमीपतः।
अल्हन्दासो महानासीद्विष्णुभक्तो विमत्सरः॥ 2॥

आब्रह्मकोटिपर्यन्तं पश्यन्विष्णुं सनातनम्।
जीवमात्रस्य सेवायां निरतो द्विजसत्तमः॥ 3॥

एकदा स तु भक्तो वै नैमिषारण्यमुत्तमम्।
तीर्थं गन्तुं मनश्चक्रे नीत्वैकं शिष्यमुत्तमम्॥ 4॥

चलितो नैमिषारण्यं कियद्दूरं गतो यदा।
तदा[1] मार्गे ददर्शासावाम्रवृक्षवनं महत्॥ 5॥

निदाघघर्म्मतप्तां गो विशश्राम वने तदा।
तस्य शिष्यो ददर्शैकं महोच्चं वृक्षमुत्तमम्॥ 6॥

तस्योपरिस्थ[2]शाखायां फलान्यासन्महान्ति वै।
पक्वानि पीतरक्तानि दृष्ट्वा शिष्योऽति हर्षितः॥ 7॥

अल्हन्दासमुवाचेदं स्वामिन् देह्यस्य मे फलम्।
महान्ति पीतरक्तानि दृष्ट्वा लुब्धमनो मम॥ 8॥

इति श्रुत्वा वचस्तस्य शिष्यस्य स गुरुस्तदा।
अयाचत फलं तस्य तरोस्तु[3] वनरक्षकम्॥ 9॥

---

1. ततो – ख।
2. परिष्टात् – ख।
3. शिरोस्तु – क।

श्रुत्वाल्हन्दासस्य वचनं वनरक्षाकरोऽब्रवीत्।
अहो कश्चास्य शिरसि तरोर्गन्तुमिहार्हति॥ 10॥

कदाचित्पतितस्तस्मान्म्रियेतात्रैव न संशयः।
इत्युक्त्वा स पुनः प्राह वनरक्षाकरो हसन्॥ 11॥

त्वं तु सिद्धोऽसि भक्तोऽसि ब्रूह्येनं वृक्षमुत्तमम्।
स ते श्रुत्वा वचो भक्त नम्रो भूत्वार्पयिष्यति॥ 12॥

इति तद्धासंसंयुक्तं श्रुत्वा स वचनं गुरुः।
तमुवाच ससन्तुष्टः किमसाध्यं जगत्प्रभोः॥ 13॥

इत्युक्त्वा तं तरुं विष्णुं हृदि मत्वाब्रवीद्वचः।
अहो भवानपि हरिर्महान्साधुस्वरूपवान्॥ 14॥

परार्थं जन्म चादाय तिष्ठसीह धरातले।
पत्रैः पुष्पैः फलैर्मूलैरुपकर्तुं जनानिह॥ 15॥

अतोऽयं बालको दृष्ट्वा त्वत्फलं नैव गच्छति।
याचते मां फलं त्वत्तः कथमस्मै ददाम्यहम्॥ 16॥

तस्मात्ते यदि भो चूत दया स्याद्ब्रूहि बालके।
तदाद्य गमनं मे स्यादतस्त्वं तु प्रसीद मे॥ 17॥

इति श्रुत्वा वचस्तस्य अल्हन्दासस्य वै [1]तरुः।
नम्रीकृत्योर्द्ध्वगां शाखां तस्थौ पक्वफलैर्युताम्[2]॥ 18॥

अल्हन्दासस्ततस्तं तु वनरक्षाकरं नरम्।
पप्रच्छ भवतो वाक्यादेवं भूतस्तरुस्त्वयम्॥ 19॥

अतः परं फलान्यस्मै देहि यानीप्सितानि ते।
इति श्रुत्वा वचस्तस्य वनरक्षाकरस्तदा॥ 20॥

साष्टाङ्गं प्रणिपत्याह स्वामिन्मे क्षम्यतामिह।
तवैवैतद्वनं सर्वं गृह्यतां यावदिच्छसि॥ 21॥

इत्युक्तस्तेन विप्रेण वनरक्षाकरेण सः।
उवाच शिष्यं गृह्यन्तां फलान्यस्य तरोस्त्वया॥ 22॥

---

1. तदा – ख, ग।
2. मुदा – ख।

इति श्रुत्वा गुरोर्वाक्यं शिष्यस्तत्र फलानि सः।
पञ्चैव त्रोटयामास जग्राह स्वस्य वाससा॥ 23॥

पुनराहाल्हन्दासस्तु रसाल त्वं सुखी भव।
पूर्ववत्तिष्ठ बालोऽयं कृतः पूर्णमनोरथः॥ 24॥

अथ तत्र वने ह्यासन् ये केचिद् वनरक्षकाः।
दृष्ट्वा तदद्भुतं तूर्णं तदैवोचुर्गृहे गृहे॥ 25॥

श्रुत्वा तद्वचनं सर्वे तदैवाजग्मुरुत्सुकाः।
ददृशुस्ते महाश्चर्यं वृक्षसन्नामनादिकम्॥ 26॥

अथाल्हन्दासश्चलितः शिष्यैः सार्द्धं त्वरान्वितः।
अनुयातास्ततस्तेऽमुं[1] ग्रामीणा[2] अतिभक्तितः॥ 27॥

स्थित्वैकत्र च तान्सर्वान्नमस्कृत्य विसृष्टवान्।
स्वयं तु नैमिषारण्यं जगाम शिष्यसंयुतः॥ 28॥

इत्येतत्कथितं पुण्यं भक्तेर्माहात्म्यमुत्तमम्।
श्रद्दधानो नरः श्रुत्वा मुच्यते सर्वसंशयात्[3]॥ 29॥

इति श्रीभगवद्भक्तिमाहात्म्ये अल्हन्दासचरितं नाम चतुस्सप्ततितमः सर्गः॥ 74॥

❊ ❊ ❊

पञ्चसप्ततितमः सर्गः

॥ वेश्याभक्तिचरितम्॥

अथापरं प्रवक्ष्यामि भक्तिमाहात्म्यमुत्तमम्।
यस्य श्रवणमात्रेण कृष्णे भक्तिर्दृढा भवेत्॥ 1॥

श्रीरङ्गनाथो यश्चास्ति दक्षिणेऽतीव विश्रुतः।
तत्समीपे बभूवैका वेश्या कामकलावती॥ 2॥

गीतनृत्यादिकुशला मोहिनी सर्वदेहिनाम्।
धनाढ्यातिथिभक्ता च साधुसेवापरायणा॥ 3॥

---

1. तस्मै – ख।
2. गैरपि – क।
3. संशयैः – ख

एकदा तद्गृहद्वारं दृष्ट्वा स्फीतं सुसंस्कृतम्।
महानुभावश्चैकस्तु विद्वान् धर्माकुलो द्विजः ॥ 4 ॥

ब्राह्मणाश्रय इत्येवं ज्ञात्वा तत्रोपविष्टवान्।
अथ दृष्ट्वाथ सा वेश्या विद्वान्समागतं द्विजम् ॥ 5 ॥

रत्नानि स्वर्णमुद्राश्च कृत्वा रजतभाजने।
ब्राह्मणाग्रे निधायाथ नत्वाञ्जलिपुटा स्थिता[1] ॥ 6 ॥

अथ विप्रस्तु तां दृष्ट्वा विनीतं ददतीं धनम्।
उवाच कासि कल्याणि कस्य त्वं[2] दयिता वद ॥ 7 ॥

श्रुत्वेदं वचनं तस्य वारनारी वचोऽब्रवीत्।
स्वामिन्नहं तु दुर्भाग्या वेश्यास्मिन्नगरे स्थिता ॥ 8 ॥

इति श्रुत्वा वचस्तस्या महाभागवतोऽब्रवीत्।
वत्से नाहं ग्रहीष्यामि धनमेतन्न संशयः ॥ 9 ॥

इत्थमेव हि तुष्टोऽस्मीत्युक्त्वा गन्तुमना अभूत्।
ततो वेश्या प्रणम्याह कृताञ्जलिपुटा द्विजम् ॥ 10 ॥

ब्राह्मन्निदं धनं तुभ्यं मया सङ्कल्पितं [3]मनः।
कथं नेष्यामि तद् ब्रूहि किञ्चैकं प्रार्थयाम्यहम् ॥ 11 ॥

भवादृशानां विप्राणां न योग्या यद्यहं विभो।
तदा कथं मे प्रीयेत भगवान्पुरुषोत्तमः ॥ 12 ॥

इति श्रुत्वा वचस्तस्य द्विजो वचनमब्रवीत्।
त्वयि तुष्टोऽस्ति श्रीरङ्गो भगवान्भक्तवत्सलः ॥ 13 ॥

वेश्यापि त्वं शुभाचारा साधुसेवापरायणा।
अहो[4] जानामि ते तुष्टो वर्तते जगदीश्वरः ॥ 14 ॥

इदं तु यद्धनं मह्यं दत्तं तस्य तु शोभनम्।
कारयित्वा च मुकुटं श्रीरङ्गाय समर्पय ॥ 15 ॥

इत्युक्तवन्तं तं विप्रं वेश्या प्राह कृताञ्जलिः।
भवानेव न गृह्णाति श्रीरङ्गश्च कथं स्पृशेत् ॥ 16 ॥

---

1. स्थित्वा – ख, क।
2. कस्यासि विमनयान्विता – क।
3. पुनः – क।
4. अतो – ख, ग।

इति श्रुत्वा वचस्तस्याः पुनर्विप्र उवाच ताम्।
भक्तिप्रियोऽसौ लोकेषु निरपेक्ष्यो ग्रहीष्यति॥ 17॥

इत्युक्त्वा स गतो विप्रो ग्रामान्तरमुदारधीः।
सापि वेश्यातिभक्त्या वै स्वर्णकारमथाह्वयत्॥ 18॥

अन्यान्यपि सुवर्णानि दत्त्वा तस्मिन्सुवर्णके।
मुकुटं कारयामास रत्नैश्च खचितं शुभम्॥ 19॥

एकस्मिन् दिवसे वेश्या मुकुटं रत्नमण्डितम्।
श्रीरङ्गस्वामिने दातुं मनश्चक्रे[1] तदा निशि॥ 20॥

तस्यामेव तु श्रीरङ्गः स्वप्ने सेवकमब्रवीत्।
प्रातरेष्यति सा वेश्या दातुं मे मुकुटं शुभम्॥ 21॥

दृष्ट्वा मां पुष्पिणी सा वै भविष्यति तथापि[2] सा।
स्वहस्तेनैव मुकुटं मस्तके मे यथार्पयेत्॥ 22॥

तथा त्वया प्रकर्तव्यं प्रीतये मम पूजकः।
[3]ततः पूजा प्रकर्तव्या सा ममातीव वल्लभा॥ 23॥

इति दृष्ट्वा तु स्वप्नं स पूजकः प्रातरुत्थितः।
उक्त्वान्येभ्यश्च विप्रेभ्यः पूजां कर्तुं मठे गतः॥ 24॥

अथ सा वारयोषापि स्नात्वा शुक्लाम्बरस्रजा।
शुक्लचन्दनलिप्ताङ्गी मुकुटं रौप्यभाजने॥ 25॥

कृत्वा करेण चादाय दासीभिर्बन्धुभिः सह[4]।
जगाम सा मठद्वारि महाभक्तिसमन्विता॥ 26॥

दृष्ट्वा तां पूजकः सत्यं रात्रिस्वप्नममन्यत।
आगत्य तामुवाचाथ समागच्छ भयं जहि॥ 27॥

तवाज्ञा वर्तते विष्णोर्मुकुटं दातुमुत्तमम्।
धन्यासि त्वं यतो भक्त्या एवं प्रीतोऽस्ति वै हरिः॥ 28॥

---

1. मे रत्नमुकुटं शुभम् – क।
2. न संशयः – ख, ग।
3. संदेहोऽत्र न कर्त्तव्यः सा ममातीव दुर्लभा – ख, ग।
4. सदा – क।

इति श्रुत्वा वचस्तस्य पूजकस्य च साधुना।
नमस्कृत्य जगामान्तर्मठस्य मुदिता तदा॥ 29॥

दृष्ट्वा श्रीरङ्गनाथं सा महानन्दे ममज्ज ह।
रजस्वला तदैवाऽभूद्वेश्याऽतीव लज्जिता ॥ 30॥

तस्थौ तत्रैव संत्रस्ता पूजकस्तां तदाऽब्रवीत्।
किं तिष्ठसि शुभे गच्छ देह्यस्मै मुकुटं द्रुतम्[1] ॥ 31॥

श्रुत्वेदं प्राह सा वेश्या स्प्रष्टुं नार्हास्म्यहं हरिम्।
दर्शनादेव देवस्य जातास्मि च रजस्वला॥ 32॥

इति श्रुत्वा वचस्तस्याः पूजकः पुनरब्रवीत्[2]।
न ते दोषोऽस्ति शुश्रोणि देह्यस्मै मुकुटं स्वयम्॥ 33॥

इति श्रुत्वापि सा वेश्या संस्थाप्य मुकुटं मठे।
बहिरागत्य सुस्नाता वासोऽन्यत्परिधाय सा॥ 34॥

मठे गत्वाथ मुकुटं नीत्वा[3] रङ्गसमीपतः।
दातुं मुकुटमारेभे न प्राप मस्तकं हरेः॥ 35॥

प्रतिमाया स्वपत्नयास्तु मस्तकं तुल्य[4]संस्थितम्।
तदा सा चिन्तिता वेश्या किमर्थं मुकुटः कृतः॥ 36॥

एवं सञ्चिन्त्य तुदती तस्थौ स भगवाँस्तदा।
उत्थाय स्वशिरस्तस्तु जग्राह मुकुटं शुभम्॥ 37॥

पश्यतां सर्वलोकानां महाश्चर्यमभूदिदम्।
अथ सा वारयोषापि धन्या हर्षाश्रुलोचना॥ 38॥

ननर्त गीतं गायन्ती चानाप्य स्वगृहाद्धनम्।
दीनानाथदरिद्रेभ्यो ददौ श्रीरङ्गतुष्टये॥ 39॥

तुष्टवुस्तां वारयोषां धन्या धन्येति वादिनः।
सा वेश्या विजहौ स्वीयं कर्म्म श्रीरङ्गसन्निधौ॥ 40॥

कृत्वा कुटीमुवासाथ भुक्त्वा किञ्चिद्दयार्चितम्।
नृत्यगीतैश्च सततं तोषयामास वै हरिम्॥ 41॥

---

1. शुभम् – ख, ग।
2. प्राहसस्मितः –स।
3. स्वागत्वा – क।
4. तुल्यं – क, मल्य – ख।

अद्यापि मस्तकं तस्या मूर्तेस्तादृशमस्ति वै।
एवं भक्तिपरा वेश्या त्यक्त्वा कर्म्म[1] तु लौकिकम्॥ 42॥
श्रीरङ्गोपासनां कृत्वा सम्प्राप्ता हरिमन्दिरम्।
जातिभ्रष्टो महापापी कृतघ्नो गोघ्न एव च॥ 43॥
भक्त्या हरिं व्रजेदेव सत्यं सत्यं न संशयः।
तस्मात्कलौ विशेषेण भक्तिरेव गरीयसी॥ 44॥

इति श्रीभगवद्भक्तिमाहात्म्ये वेश्याभक्तिचरितं नाम पञ्चसप्ततितमः सर्गः॥ 75॥

❊ ❊ ❊

षट्सप्ततितमः सर्गः

॥ राजभक्तिचरितम्॥

अथापरं प्रवक्ष्यामि भक्तिमाहात्म्यमुत्तमम्।
यस्य श्रवणमात्रेण परमां भक्तिमाप्नुयात्॥ 1॥
पाञ्चालेषु बभूवैको राजा भक्तिसमन्वितः।
विष्णुपूजापरो नित्यं नामोच्चारणतत्परः॥ 2॥
प्रातरारभ्य सामान्तं सायादि प्रातरं ततः।
श्री कृष्णप्रीतये कार्य्यं चक्रे स नृपसत्तमः॥ 3॥
वैष्णवेभ्यो धनं नित्यं ददौ नान्यत्र कुत्रचित्।
अन्ये जनाः विष्णुभक्तान्[2] नमन्ति स्म न भक्तितः॥ 4॥
चोरो वा पतितो वापि भक्तरूपधरो हि यः।
तममन्यत भक्त्या वै ददौ तस्मै यथेप्सितम्[3]॥ 5॥
इति तस्य व्रतं राज्ञो दृष्ट्वा ज्ञात्वा जनास्तदा।
स्तुवन्ति चाति निदन्ति आसन् तस्य प्रजास्तु वै॥ 6॥
एकदा तस्य क्रीडार्थं भाण्डा ये नगरे स्थिताः।
ते सर्वे मन्त्रयामासुः वञ्चयित्वा नृपं वयम्॥ 7॥
ग्रहीष्यामो धनं चेति निश्चित्यैकत्र संस्थिताः।
कृत्वा वैष्णवरूपं ते मालातिलकभूषिताः॥ 8॥

1. सर्वं – क।
2. भक्त्या – ख।
3. यथेक्षितम् – ख, ग।

हरिनाम वदन्तस्तु राजद्वारि समागताः ।
ऊचुर्दौवारिकं ब्रूहि राजानं वयमागताः ॥ 9 ॥

श्रुत्वा तेषां वचो द्वारपालो राजसमीपगः ।
राजन्भक्ताः समायाताः द्वारे तिष्ठन्ति साम्प्रतम् ॥ 10 ॥

श्रुत्वा तद्वचनं राजा ययौ तत्र त्वरान्वितः ।
दृष्ट्वा तान्वैष्णवान्भक्त्या प्रणम्य स तु भूपतिः ॥ 11 ॥

उवाच यूयं धन्याश्च विरक्ता विचरन्ति हि ।
पुत्रदारधनादीनां मोहं त्यक्त्वा निराकुलाः ॥ 12 ॥

कुत आगच्छत तदा गन्तुमिच्छथ कुत्र वै ।
श्रुत्वा राज्ञो वचस्तेऽपि प्रोचुः कृत्रिमवैष्णवाः ॥ 13 ॥

[1]द्वारकातः समायाता अयोध्यां गन्तुमुत्सुकाः ।
त्वां श्रुत्वा वैष्णवं भूयो द्रष्टुकामा इहागताः ॥ 14 ॥

इति श्रुत्वा वचस्तेषां राजोवाच कृताञ्जलिः ।
स्नात्वा भुक्त्वाद्य वसत गमिष्यथ दिनान्तरे ॥ 15 ॥

श्रुत्वा राजवचः सर्वे शङ्किता भाण्डवैष्णवाः ।
जानीयादथ चेद्राजा[2] गन्तव्यं च ततोऽधुना ॥ 16 ॥

इति निश्चित्य राजानमाहु सर्वे त्वरान्विताः ।
इदानीमेव गच्छामो राजन्स्थातुं न शक्नुमः ॥ 17 ॥

इति श्रुत्वा वचस्तेषां राजा वस्त्रैर्धनैर्मुदा ।
तोषयामास तान्सर्वान् रत्नैश्च विविधैरपि ॥ 18 ॥

अथ सर्वं गृहीत्वा ते भण्डा [3]राजाग्रतस्ततः ।
ननृतुर्भण्डिमत्त्वं स्वं[4] दर्शयन्तश्च पूर्ववत् ॥ 19 ॥

दृष्ट्वा ज्ञात्वाऽपि राजा स न चुकोपाति भक्तिमान् ।
दृष्ट्वा तान्भक्तरूपान्वै नमश्चक्रे विसृज्य वै ॥ 20 ॥

अथान्तःपुरमायातो राजा तेऽप्यथ भण्डिकाः ।
राज्ञा यन्निश्चिता एते भक्तास्तस्मात्तु तेऽपि वै ॥ 21 ॥

---

1. द्वारकायाः – ख, ग।
2. वेद्राजा – क।
3. तदा – ख, ग।
4. त्वं – ख।

तत्क्षणादभवन्सर्वे विरक्ता स्त्रीसुतादिषु।
राजदत्तं धनं तस्मै दत्त्वा विप्रेभ्य एव ते॥ 22॥

दिशो दश गताः सर्वे चिन्तयन्तो हरिं मुदा।
तेऽपि जाता[1] महाभक्ता भक्तिनिश्चयतोऽधमाः॥ 23॥

दृष्ट्वेदं परमाश्चर्यं सर्वे मन्त्रिपुरोगमाः।
राजानं ह्यमन्यन्त साक्षाद्विष्णुसनातनम्॥ 24॥

राजापि राज्यं पुत्राय दत्वान्ते श्रीहरिं स्मरन्।
जगाम परमं धाम योगिनामपि दुर्लभम्॥ 25॥

इति श्रीभगवद्भक्तिमाहात्म्ये राजभक्तिचरितं नाम षड्सप्ततितमः सर्गः॥ 76॥

❊ ❊ ❊

सप्तसप्ततितमः सर्गः

॥ अन्तर्भक्तिराजचरितम्॥

अथापरं राजभक्तेर्माहात्म्यं परमाद्भुतम्।
वक्ष्यामि भक्तिजनकं सर्वपापप्रणाशनम्॥ 1॥

आसीद्राजा महाभक्तः सततं रामनाम सः।
जजाप हृदये बाह्ये कदाचिदपि नैव सः॥ 2॥

कीदृशी भक्तिरित्यस्य[2] न जानाति कथञ्चन।
अन्तर्भक्तस्य तस्याथ पत्नी भक्तिमती सती॥ 3॥

चिन्तयामास सततं पतिः स्यात् भक्तिमान्कथम्।
अन्तर्भक्तस्य तस्यैव राज्ञो भक्तिमजानती॥ 4॥

एवं चिन्तापरा साध्वी शयानं स्वपतिं दिवा।
अवेक्ष्यमाणा शय्यायां जाग्रती चिन्तिता स्थिता॥ 5॥

अथ पत्युर्मुखाद्राज्ञी सीतारामेति शुश्रुवे।
तदैवोत्थाय विप्रेभ्यो दापयामास भूरिशः॥ 6॥

---

1. याता – ख, ग।
2. रित्यता – ख।

धनानि वरवस्त्राणि[1] रत्नानि विविधानि च।
वादयामास वाद्यानि महामाङ्गलिकानि सा॥ 7॥

अथ वाद्यादिनिर्घोषैरुत्थितो[2] नृपतिस्तदा।
पत्नीं पप्रच्छ किमिदं मत्काण्डे ताण्डवादिकम्॥ 8॥

कस्य पुत्रोऽद्य जातोऽस्ति भ्रातुस्ते वा सुतस्य वा।
इति पत्युर्वचः श्रुत्वा राज्ञी प्राहाति हर्षिता॥ 9॥

न मे भ्रातुर्न पुत्रस्य पुत्रो जातो महाभुजः।
शृणु नाथोत्सवस्यास्य कारणं कथयामि ते॥ 10॥

त्वन्मुखान्नैव रामस्य नामाश्रौषं[3] कदाप्यहम्।
तस्मान्नाथाति खिन्नाहं जानन्ती त्वामवैष्णवम्॥ 11॥

उपदेष्टुं न शक्नोमि गुरुरेकः पतिः स्त्रियाः।
कथं ते हृदि भक्तिः स्यादिति चिन्तापरायणा॥ 12॥

सा चाद्याहं त्वत्समीपे जाग्रती शयने स्थिता।
सुप्तस्य तव वक्त्रात्तु सीतारामेति निर्गतम्॥ 13॥

तदा श्रुत्वाति मुदिता जाताहं हृदये तव।
वर्तते श्रीहरिश्चेति ज्ञात्वा सर्वं मया कृतम्॥ 14॥

दानानि ब्राह्मणेभ्यश्च दत्तानि[4] विविधानि च।
त्वमप्युत्तिष्ठ विप्रेभ्यो देहि वित्तानि[5] भूरिशः॥ 15॥

इति श्रुत्वा प्रियवाक्यमुवाच स च भूपतिः।
यत्कृतं सुकृतं देवि[6] त्वया नास्त्यत्र संशयः॥ 16॥

परन्तु शृणु मद्वाक्यं श्रुत्वा कुरु यथोचितम्।
अद्याहं नैव जीवामि सत्यमेतन्न संशयः॥ 17॥

सीतया सहितो रामः स्थितो मद्हृदये च तम्[7]।
अन्तर्भक्त्या तु सम्पूज्य कृतार्थोऽहं स्थितः प्रिये॥ 18॥

---

1. वासांसि – क।
2. ख मध्ये लुप्तः पाठः
3. श्रोयं – क।
4. अन्नानि – ख, ग।
5. विज्ञानि – ख।
6. देहि – क।
7. किल – ख, ग।

गते तस्मिन्प्रभौ सत्यं मरिष्येऽद्य न संशयः।
इत्युक्त्वाहूय नृपतिर्मन्त्रिणः पुत्रमुत्तमम्॥ 19॥

उक्त्वा सर्वमशेषेण दत्त्वा राज्यं सुताय वै।
ध्यात्वा सीतापतिं चित्ते नृपोऽगात्परमं पदम्॥ 20॥

तत्पत्नी तु महाभागा बभूव सहगामिनी।
दृष्ट्वैतत्परमाश्चर्यं सर्वे विस्मयमागताः॥ 21॥

एवमन्तःस्थिता भक्तिस्सर्वेषां हितकारिणी।
इति ज्ञात्वा जनैः कार्या भक्तिरेव सुखार्थिभिः॥ 22॥

इति श्रीभगवद्भक्तिमाहात्म्ये अन्तर्भक्तिराजचरितं नाम सप्ततितमः सर्गः॥ 77॥

❊ ❊ ❊

अष्टसप्ततितमः सर्गः

॥ गुरुभक्तिचरितम्॥

अथैको मथुराप्रान्ते बभूव वैष्णवोत्तमः।
एकाकी गतसङ्गस्तु भिक्षाशी दृढभक्तिमान्॥ 1॥

तस्यैवं वर्तमानस्य कुटीद्वारे समागतः।
कृतोपवीतो विप्रस्य पुत्रो बन्धुविवर्जितः॥ 2॥

तं दृष्ट्वा वैष्णवास्यासीन्महती हृदये दया।
कोऽसीत्युवाच तं बालं कथमत्रैव तिष्ठसि॥ 3॥

श्रुत्वैव तस्य वचनं बालः प्राहाति हर्षितः।
नाथाहं द्विजपुत्रोऽस्मि पितृमातृविवर्जितः॥ 4॥

बाल्य एव मृतौ तौ तु ग्रामीणैरस्मि पालितः।
दुर्भिक्षसमये चात्र त्वामहं शरणं गतः॥ 5॥

इति तस्य वचः श्रुत्वा बालस्याति[1] दयान्वितः।
आनीय स्वगृहे[2] तं तु पुत्रतुल्यमवैक्षत॥ 6॥

---

1. वैष्णवोऽति – ख। 2. सगृहे – क।

ततस्तं वर्द्धमानं तु शिक्षयामास वै गुरुः ।
नासौ जग्राह[1] वै किञ्चिद्गुरुसेवापरोऽभवत् ॥ 7 ॥

एवं गतेषु कालेषु गुरुर्जातो जरातुरः ।
चिन्तयामास मनसा नास्य भक्तिरभूत्किल ॥ 8 ॥

ममेयं मरणावस्था कथं स्याद्भक्तिमानयम् ।
इति चिन्ताकुलो भूत्वा तत्रोपायं चकार सः ॥ 9 ॥

ज्ञात्वात्ममरणं कञ्चिदाहूय ब्राह्मणं गुरुम् ।
उवाचाहं[2] मरिष्येऽद्य शिष्यो मेऽत्र न वर्तते ॥ 10 ॥

तावदेतच्छरीरं भो रक्षणीयमिहैव मे ।
आगते मम शिष्ये तु वक्तव्यं वचनं मम ॥ 11 ॥

अथापि हरिभक्तिश्चेन्मम शिष्यः करिष्यति ।
जीविष्यामि तदैवाहमिति शिष्यं वदिष्यसि ॥ 12 ॥

इत्युक्त्वा तं द्विजं स्वामी ममार दैवयोगतः ।
अथापराह्ने शिष्योऽपि समायातोऽति भक्तिमान् ॥ 13 ॥

दृष्ट्वा मृतं गुरुं तत्र निपपात शुचार्द्दितः ।
रुरोदोच्चैर्भृशं तस्मै स विप्रो वाक्यमब्रवीत् ॥ 14 ॥

अहोऽत्र पश्यतो मेऽद्य मृतोऽयं वै गुरुस्तव ।
यदुक्त्वा शृणु तत्सर्वं यथावत्कथयामि ते ॥ 15 ॥

इति श्रुत्वा वचस्तस्य शिष्यः प्राह कृताञ्जलिः ।
वद विप्र गुरोर्वाक्यं किमुक्त्वा मे गुरुर्मृतः ॥ 16 ॥

तदोवाच स विप्रस्तं गुरुणोक्तं शृणुष्व तत् ।
मम शिष्याय वक्तव्यं दृष्टिभक्तिं करोति चेत् ॥ 17 ॥

जीवितः स्यां तदाहं तु तस्माद्भक्तिं कुरुष्व भोः ।
इति शिष्यो वचः श्रुत्वा तत्रैव[3] संस्मरन् हरिम् ॥ 18 ॥

जजाप परमं मन्त्रमेकाग्रहृदयः स्थितः ।
रामेति शिष्यस्तत्कालं जीवित्वा चोत्थितो गुरुः ॥ 19 ॥

---

1. शिक्षितवान् – क।
2. न वाचाहं – क।
3. तत्रैव वसस्मरत् हरिम् – ख।

दृष्ट्वा शिष्यं रामनामजपन्तं हर्षितो गुरुः।
उवाच शिष्यं वत्सेदं पश्य त्वं मम जीवनम्॥ 20॥

एतादृशी हरेर्भक्तिर्भवतीत्येव धारय।
तस्मात्कुरुष्व भगवद्भक्तिं संसार[1]तारिणीम्॥ 21॥

तव भक्तिप्रसादेन जीवितोऽहं न संशयः।
परन्त्वहं न संसारे वस्तुमिच्छामि पुत्रक॥ 22॥

त्वमत्रैव हरेर्भक्तिं कुर्वन्निवस सर्वदा।
एतद्वक्तुमहं वत्स [2]स्वर्गलोकादिहागतः॥ 23॥

उक्त्वैवं शिष्यमात्मीयं स ममार गुरुस्तदा।
ततः शिष्यो गुरुं तं तु सश्चकार[3] विधानतः॥ 24॥

संस्कृत्य विधिवत्तस्य कृत्वा चैवौद्ध्र्वदेहिकम्।
स्वयं तत्राश्रमे तस्थौ विष्णुभक्तिपरायणः॥ 25॥

तत्रैवाश्रममध्ये तु यावज्जीवं स्थितः स तु।
चिन्तयन्परमात्मानमवाप परमं पदम्॥ 26॥

इति श्रीभगवद्भक्तिमाहात्म्ये गुरुभक्तिचरितं नामाष्टसप्ततितमः सर्गः॥ 78॥

❊ ❊ ❊

एकोनाशीतितमः सर्गः

॥ रविदासभक्तचरितम्॥

अथ वक्ष्ये महाश्चर्य्यं भक्ते[4]र्माहात्म्यमुत्तमम्।
रामानुजस्य शिष्यास्तु देवाचार्यस्तथापरः॥ 1॥

हर्य्यानन्दस्तथा भक्तो राघवानन्दनामकः[5]।
महामहिमसंज्ञस्तु तुर्य्यः शिष्यो बभूव ह॥ 2॥

राघवानन्दशिष्यस्तु रामानन्दोऽति वैष्णवः।
शान्तो दान्तो दयायुक्तः श्रीकृष्णसेवने रतः॥ 3॥

---

1. कुर्वन्निवस सर्वदा – ख।
2. सर्ग – ख।
3. ख – मध्ये लुप्तः पाठः
4. भक्ति – क।
5. संज्ञकः – क, ख।

शापानुग्रहकर्त्तासौ महाभक्तो बभूव सः।
तस्य शिष्या महाभक्ता वैष्णवा लोकविश्रुताः॥ 4॥

भक्तिभावाद्भवाम्भोधेस्तारयामासु वै जनान्[1]।
कबीरो नृहरिश्चैव राजा पीपा इति श्रुताः॥ 5॥

रविदासो भवानन्दो धनश्च सद्मनादयः।
तत्रादौ रविदासस्य कथां वक्ष्ये मनोरमाम्॥ 6॥

यां श्रुत्वा तु द्विजाः सर्वे विष्णुभक्ता भवन्ति हि।
पूर्वजन्मनि शिष्यो हि रामानन्दस्य भक्तिमान्॥ 7॥

ब्रह्मचारी स्थितस्तस्य गुरोः सेवापरायणः।
रामानन्दस्य नियमः प्रतिगेहात्तु भिक्षितम्॥ 8॥

अन्नमल्पं समानीय भोक्तव्यं हरयेऽर्पितम्।
एवमेव स शिष्याय प्राह वै ब्रह्मचारिणे॥ 9॥

सोऽपि शिष्यस्तथा कुर्वन् याचित्वा प्रतिमन्दिरम्।
आदायान्नं शुचिः पक्का गुरवे तं न्यवेदयत्॥ 10॥

गृहीत्वा तद्गुरुर्भक्त्या श्रीकृष्णाय निवेद्य च।
रामानन्दोऽथ बुभुजे सह शिष्येण भक्तिमान्॥ 11॥

एवं गतेषु कालेषु कदाचिद्दैवयोगतः।
ब्रह्मचारी गतो भिक्षामागतं चातिवर्षणम्॥ 12॥

न शशाक प्रचलितुं ब्रह्मचारी तदन्तिके।
नास्तिकस्य गृहं दृष्ट्वा तद्द्वारि समुपागतः॥ 13॥

ज्ञातस्तेन च शिष्योऽसौ रामानन्दस्य भक्तिमान्।
उवाच तस्मै सुगतो नाद्य वृष्टिर्गमिष्यति॥ 14॥

तस्माद् गृहाण मत्तोऽन्नं गत्वा भोजय वै गुरुम्।
इति श्रुत्वा वचस्तस्य तस्मै प्राह गुरोर्व्रतम्॥ 15॥

न स्वीचक्रे तस्य भिक्षां वृष्ट्यभावं समेक्षत।
एवं सम्प्राप्त[2]मध्याह्ने वृष्ट्याधिक्याति दुर्दिने॥ 16॥

1. रानान्
2. गतेषु – क, ख।

मुहुरुक्तो नास्तिकेन स्वीचक्रेऽन्नं जिनस्य सः
गृहीत्वान्नं समागत्य [1]स्नात्वा पक्वा त्वरान्वितः ॥ 17 ॥
अन्नं समर्पयामास गुरवे विष्णुहेतवे ।
गुरुरन्नं गृहीत्वा तु संप्रोक्ष्य विधिवच्छुचिः ॥ 18 ॥
ध्यात्वा कृष्णं समर्प्यान्नं ददर्श हृदि नो हरिम् ।
पुनः समाधाय मनो दध्यौ भक्त्या हरिं मुहुः ॥ 19 ॥
नागते हृदये तस्य श्रीकृष्णेऽन्नस्य दोषवित्[2] ।
रामानन्दस्ततः प्राह दुःखितो ब्रह्मचारिणम् ॥ 20 ॥
कीदृगन्नमिदं वाद्य नायाति हृदये हरिः ।
इति श्रुत्वा वचस्तस्य शिष्यः प्रोवाच सत्वरम् ॥ 21 ॥
अद्य वृष्टिभयादेकनास्तिकस्य गृहे गतः ।
बहुकालस्थितस्तत्र न निवृत्तं तु वर्षणम् ॥ 22 ॥
ततो मुहुः प्रार्थयित्वा नास्तिकोऽन्नं ददौ मुदा[3] ।
तदेवान्नमिहानीय पक्वा तुभ्यं समर्पितम् ॥ 23 ॥
रामानन्दस्तु तच्छ्रुत्वा महाक्रोधवशं गतः ।
शशाप तं प्रियं शिष्यं चर्मकारो भवेति[4] वै ॥ 24 ॥
श्रुत्वा घोरं गुरोर्वाक्यं ब्रह्मचार्यब्रवीद्वचः ।
प्रणम्य तं गुरुं भक्त्या प्रार्थयन्करुणाक्षरम् ॥ 25 ॥
चर्मकारगृहे जन्म भविष्यति न संशयः ।
तत्रापि भवतो भक्तिर्दृढा भूयान्मम प्रभो ॥ 26 ॥
किञ्चास्मिन्नगरे चाहं जनिष्यामि न संशयः ।
चर्म्मकारगृहे यातस्तव शापाद्दयानिधे ॥ 27 ॥
न यास्यामि स्तनं मातुस्तव मन्त्रं विना प्रभो[5] ।
तस्मात्तत्र समुत्पन्ने मयि श्रीमन् कृपानिधे ॥ 28 ॥

---

1. स्तं तु पक्वं – ख, क।
2. ख – मध्ये लुप्तः पाठः
3. मम – ख, क।
4. भवन्ति – क।
5. गुरो – क।

आगत्य मन्त्रं दास्यामीत्येवं देहि वरं मम।
इत्युक्त्वा ब्रह्मचारी तु बहिर्गत्वा स्थितोऽभवत्॥ 29॥
रामानन्दोऽति चिन्तार्तो जगर्हात्मानमात्मना।
अथ स ब्रह्मचारी तु मृतो यमपुरं गतः॥ 30॥
तत्रास्य पुण्यनिचयं किञ्चिन्पापमिति ब्रुवन्।
चित्रगुप्त उवाचैनं किं भोक्ष्यति पुरा भवान्॥ 31॥
तदोवाच स दृष्टस्तु पूर्वं भोक्ष्यामि पातकम्[1]।
यमराज इति श्रुत्वा प्राह तं ब्रह्मचारिणम्॥ 32॥
चर्म्मकारकुले जन्मप्राप्त पुण्यबलात्पुनः।
हरिभक्तिं समासाद्य गमिष्यत्युत्तमां गतिम्॥ 33॥
चर्मकारकुले जन्म प्राप्य पुण्यबलात्पुनः।
महागुरुप्रसादेन तरिष्यसि भवार्णवात्॥ 34॥
इत्युक्तस्तं यमं मूर्ध्न्या ननाम क्षणमेव सः।
उदरे चर्म्मकारिण्याः समायातो विमोहितः॥ 35॥
नवमासान् स्थितस्तत्र दशमे समुपस्थिते।
सम्प्राप्य चर्म्मकारिण्या गृहे जन्म गुरुं स्मरन्॥ 36॥
अथ तत्र ददौ दुग्धं माता जग्राह नैव तत्।
परन्तु सुदृढोऽप्यग्रे राजपुत्र इवाभवत्॥ 37॥
सर्वैरेव तदा ज्ञातं जीविष्यति शिशुर्नहि।
माता तस्य तु दुःखार्ता पप्रच्छ रुदन्ती जनान्॥ 38॥
एवं गतमहोरात्रं द्वितीये दिवसे पुनः।
दृष्टो बालस्तु तादृग्वै न ग्लानिं प्राप किञ्चन॥ 39॥
एवमाश्चर्य्यभूतं हि श्रुत्वा सर्वे पुरस्थिताः।
समागत्य च तं दृष्ट्वा जातं[2] नृपसुतप्रभम्॥ 40॥
अथ सुश्राव तद्वृत्तं रामानन्दो दयान्वितः।
शिष्यमेकं समादाय चर्मकारगृहं ययौ॥ 41॥

---

1. यानकम् – ख।
2. यग्मुः – ख, क।

तत्र बालगृहे गत्वा सर्वान्निःकाश्य दूरतः।
तस्य बालस्य कर्णे स रामेति प्रददौ मनुम्॥ 42॥

सम्प्राप्तराममन्त्रस्तु प्रजहास स बालकः।
उवाच गुरुरप्येनं पिब दुग्धं सुखी भव॥ 43॥

इत्युक्त्वा मोहवशगः स्मृत्वा तं ब्रह्मचारिणम्।
रामानन्दो रुदन् तस्माद्गेहात्तूर्णं बहिर्ययौ॥ 44॥

अथ बालस्य माता तु पुनरागत्य बालकम्।
क्रोडे कृत्वा ददौ स्तन्यं पपौ क्षुधितो यथा॥ 45॥

दृष्ट्वा तत्परमाश्चर्य्यं जहर्ष चर्म्मकारिणी।
अमन्यत गतः शोको रामानन्दप्रसादतः॥ 46॥

अथ तस्याकरोन्नाम रविदासेति सास्फुटम्।
ततः स वर्द्धमानस्तु रविदासो महामनाः॥ 47॥

प्राप्ते चैवाष्टमे वर्षे [1]उपानत्करणे क्षमः।
बभूवोपानहौ कृत्वा विक्रीय च यथारुचि॥ 48॥

तन्मूल्यं प्रददौ मात्रे रविदासो महामनाः।
अथ कालेन तन्माता पिता तद्भ्रातरश्च तम्॥ 49॥

स्वाश्रमात्तं पृथक्चक्रुर्वृथा दत्ते ह्युपानहौ।
रविदासोऽपि बन्धुभ्यः पृथग्भूय स्थितः क्वचित्॥ 50॥

भिक्षामादाय बुभुजे निर्मायोपानहौ मुदा।
दीनानाथदरिद्रेभ्यो दत्त्वा हृदि हरिं स्मरन्॥ 51॥

एकदा स तु भिक्षायामटन् ग्रामान्तरं गतः।
शालग्रामशिलां मार्गे संप्राप्य शुभलक्षणाम्॥ 52॥

तामानीयातिमुदितो रामभक्तिपरायणः।
पूजयामास भवने संस्थाप्यति प्रयत्नतः॥ 53॥

अङ्गणे तुलसीवृक्षं रोपयामास भक्तितः।
अथ तत्त्याज स्वं कर्म्म बभूवातीव वैष्णवः॥ 54॥

---

1. यन्त्रधीकरणे – क, ख।

एकदा तस्य भवने सिद्धः साधुः समागतः।
रविदासस्य चरितं दृष्ट्वा सोऽभूद्दयापरः॥ 55॥

प्रातरुत्थाय सम्पूज्य शालग्रामशिलां मुदा।
जगाम भिक्षामानेतुं सायङ्काले समागतः॥ 56॥

सम्पूज्यातिथये दत्त्वा स्वयं भुङ्क्ते स्म नित्यशः।
एवं दृष्ट्वाति तुष्टोऽभूत् सिद्धो नीत्वा रहः स्थते॥ 57॥

रविदासमुवाचेदं शृणु मे वचनं हितम्।
एष स्पर्शमणिर्मेऽस्ति दीयते त्वं गृहाण भोः॥ 58॥

इत्युक्तस्तेन सिद्धेन [1]रविदासोऽब्रवीद्वचः।
शालग्रामशिलाप्रान्ते स्थापयित्वा व्रज प्रभो॥ 59॥

इत्युक्तः स गतः सिद्धो रविदासोऽपि पूर्ववत्।
भिक्षाशी दृढा भक्तिश्च मम स्पर्शमणिं तु तम्॥ 60॥

विचार्य्य मनसा नूनं धनं लोके मदप्रदम्।
तस्माद्रामेति यन्नाम तत्सर्वस्वं ममाव्ययम्॥ 61॥

एवं गते समस्तेऽब्दे सिद्धस्तत्रागतः पुनः।
ददर्श तादृशं जीर्णं रविदासस्य मन्दिरम्॥ 62॥

मनसा चिन्तयामास नास्य भाग्यं करोमि किम्।
तथाप्यस्योपकारं तु स्थित्वा किञ्चित्करोम्यहम्॥ 63॥

इत्युक्त्वा रविदासस्य समीपे सः समागतः।
उवाच किमिदं साधो दुःखमस्त्येव पूर्ववत्॥ 64॥

श्रुत्वा तस्य वचः साधो[2] रविदासोऽब्रवीन्मुदा।
न मेऽस्ति दुःखमधुना नासीद्वै पूर्वमप्यहो॥ 65॥

त्वमस्मिन्खलु संसारे दयावानसि वैष्णवः।
अतः सर्वाणि भूतानि दुःखितान्येव पश्यसि॥ 66॥

आगच्छेमं मणिं स्वीयं गृहाण पूर्ववत्स्थितम्।
इत्युक्तः स तदागत्य शिलाग्रे तं ददर्श ह॥ 67॥

---

1. अपि पूर्ववत् – ख। 2. स्तंतु – क।

जग्राहोत्थाप्य स मणिं रविदासमुवाच ह।
अहो कियद्दिनं साधो स्थास्यामि तव मन्दिरे ॥ 68 ॥

रविदास इति श्रुत्वा प्राह तं विनयान्वितः।
तवैवेदं गृहं नाथ सनाथं कुरु मां विभो ॥ 69 ॥

इति श्रुत्वा स्थितस्तत्र सोऽपि सिद्धोऽति वैष्णवः।
निर्माय कनकं नित्यं रविदासस्य [1]मन्दिरे ॥ 70 ॥

कारयामास पूजार्थं विष्णोर्मन्दिरमप्यसौ।
शालग्रामशिलां तत्र स्थापयामास भक्तितः ॥ 71 ॥

रविदासस्तु भिक्षित्वा ददौ च बुभुजे स्वयम्।
एवं तत्र समाजोऽभूद्वैष्णवानां निरन्तरम् ॥ 72 ॥

इति श्रीभगवद्भक्तिमाहात्म्ये रविदासभक्तचरितं नामैकोनाशीतितमः सर्गः ॥ 79 ॥

❊ ❊ ❊

अशीतितमः सर्गः

॥ रविदासचरितम् ॥

अथ तत्र स्थिता ये वै ब्राह्मणाः क्षत्रिया विशः।
शूद्राश्चापि च ते सर्वे गत्वा राजानमब्रुवन् ॥ 1 ॥

रविदासश्चर्मकारो ग्रामेऽस्मिन्नृपसत्तम।
शालग्रामशिलां गेहे संस्थाप्य स्वयमर्चति ॥ 2 ॥

इति श्रुत्वा वचस्तेषां राजा चुक्रोध वै भृशम्।
तत्कालं रविदासं तु समानीय च तर्ज्जयन् ॥ 3 ॥

किं करोषि महामूर्ख[2] शालग्रामशिलार्च्चनम्।
इदानीमेव तां देहि ब्राह्मणाय ममाज्ञया ॥ 4 ॥

इति श्रुत्वा वचस्तस्य रविदास उवाच तम्[3]।
अतः परन्त्वहं राजन् तां स्पृशामि न पाणिना ॥ 5 ॥

---

1. मन्दिरम् – क।
2. महामूर्ष – ख।
3. अपि भूपतेः – ख, ग।

गृहाण कुञ्जिकामेतां देवागारस्य मे प्रभो।
प्रयातु ब्राह्मणस्तत्र गृहीत्वा यातु तां शिलाम्॥ 6॥
इति श्रुत्वा वचस्तस्य रविदासस्य भूपतिः।
प्रसन्नो ब्राह्मणं प्राह गच्छानय हरेः शिलाम्॥ 7॥

अथादाय द्विजश्चैकः कुञ्चिकामति सत्वरम्।
गत्वोद्घाट्य कपाटं स गृहीत्वा तां शिलां शुभाम्॥ 8॥

आगत्य स्वगृहे तां तु पञ्चगव्यादिना तदा।
स्नापयित्वार्चयित्वा च स्थापयामास मन्दिरे॥ 9॥

रविदासोऽपि राजानं नमस्कृत्य ययौ गृहम्।
अथ रात्रौ शिला सा तु विप्रमन्दिरतो ययौ॥ 10॥

रविदासस्य वेश्मेति दृष्ट्वा प्रातस्तदा [1]जनाः।
गत्वा राजसमीपं ते प्रत्युचुर्वै द्विजा नृपम्॥ 11॥

राजन्सम्पूज्य भवने स्थापिता सा शिला मया।
न जाने केन मार्गेण गता तन्मन्दिरं पुनः॥ 12॥

तत्रैकः प्राह राजानं रविदासोऽतिमान्त्रिकः।
आकर्षयति वस्तूनि कृष्टा तेन ततः शिला॥ 13॥

श्रुत्वैतद्वचनं राजा तमुवाच पुनर्द्विजम्।
[2]पुनर्गच्छ गृहं तस्य समानय पुनः शिलाम्॥ 14॥

स्थापयस्व गृहे किञ्च रविदासो ममाज्ञया।
तिष्ठत्वत्र बहिर्गेहे सुखं रात्रौ यदृच्छया॥ 15॥

तथा चकार विप्रस्तु रविदासो निशामुखे[3]।
समागत्य बहिर्गेहे तस्थौ चित्ते हरिं स्मरन्॥ 16॥

अथ रात्रौ शिला सा तु गता तत्रैव मन्दिरे।
रविदासस्य यत्रासीत्सिंहासनगता पुरा॥ 17॥

स्वप्ने राजाथ विप्रोऽपि ददर्श परमाद्भुतम्।
विप्रः एकः समागत्य मालामुद्राविभूषणः॥ 18॥

---

1. जग्मुः– क।
2. द्रुतं – ख, ग।
3. निशासुखं – ख।

किमर्थं शासिता भूप नीयते द्विजमन्दिरे।
भक्तिप्रियो हरिस्तस्य शिला तदनुगामिनी ॥ 19 ॥

स्वयमेव हरिस्तत्र याति केयं शिला [1]पुनः।
[2]हरेः सर्वं समं भूप न नीचं नापि चोत्तमम् ॥ 20 ॥

इति विज्ञाय भूप त्वं त्यजोद्योगं शिलां प्रति।
एवमेव द्विजाः सर्वे स्वप्ने तं ददृशुर्निशि ॥ 21 ॥

अथ [3]प्रातः प्रबुद्धास्ते राजा च ब्राह्मणा अपि।
परस्परं निशास्वप्नमुक्त्वा राजाथ तं द्विजम् ॥ 22 ॥

प्राह सास्ति शिला गेहे राजन्नास्तीति सोऽब्रवीत्।
ततस्तु रविदासं हि समाहूय नृपोऽब्रवीत् ॥ 23 ॥

गच्छ स्वभवनं साधो हरिस्तुष्टोऽस्ति ते ध्रुवम्।
कुरु भक्तिं यथापूर्वं न ते किञ्चिद्वदिष्यति ॥ 24 ॥

इत्युक्तो रविदासस्तु ययौ स्वभवनं मुदा।
शालग्रामशिलां दृष्ट्वा हर्षाश्रुपरिपूरितः ॥ 25 ॥

पूजयामास भक्त्या[4] तां पूर्ववद्वैष्णवैर्युतः।
एवं भक्तिवशः कृष्णस्तत्राप्यभिरतोऽभवत् ॥ 26 ॥

नासाध्यं विद्यते भक्तेस्त्रिषु लोकेषु किञ्चन।
अथ तस्यैव राज्ञस्य तु चितौरगढसम्भावा ॥ 27 ॥

आसीद्वै पट्टमहिषी विष्णुभक्तिरता शुभा।
या भक्त्या रविदासाय भोजनाच्छादनादिकम् ॥ 28 ॥

मुहुर्ददौ स्वयं तत्र गत्वा तं प्रणनाम सा।
एवं दृष्ट्वा द्विजाः सर्वे निनिन्दुस्तां नृपप्रियाम् ॥ 29 ॥

चर्मकारगृहं याति तं नमस्यति सर्वदा।
ददात्यन्नं च वासांसि तस्मादस्या गृहे [5]वयम् ॥ 30 ॥

---

1. सठ – ख।
2. हरिः – क।
3. प्राहुः – क।
4. भक्तानां – क।
5. वंसम् – ख।

न भोक्ष्यामः कदाप्येवं मतिं चक्रे परस्परम्।
एकदा तु द्विजांस्तांस्तु भोजनाय न्यमन्त्रयत्॥ 31॥

सा राज्ञी तां द्विजाः प्राहुर्न वै भोक्ष्यामहे वयम्।
आमान्नं देहि नो राज्ञि पक्का भोक्ष्यामहे स्वयम्॥ 32॥

इत्युक्ता सा गतक्रोधा तथैवादापयत् द्विजान्।
ब्राह्मणा अपि चामान्नं गृहीत्वैकत्र संस्थिताः॥ 33॥

पाकं विधाय भुञ्जाना ददृशुः पंक्तिमध्यगम्।
रविदासं च भुञ्जानं दृष्ट्वा सर्वे विमोहिताः॥ 34॥

अथ कोऽपि बहिश्चक्रे रविदासं क्रुधान्वितः।
पुनरन्यत्र पंक्तिस्थं भुञ्जानं ददृशुश्च तम्॥ 35॥

तदा ते ब्राह्मणाः सर्वे ज्ञात्वा विष्णुविचेष्टितम्।
तस्य भक्तिं दृढां मत्वा नोचुः कञ्चिदपि क्वचित्॥ 36॥

स्वधर्मरक्षणं कार्य्यं निन्यमानं[1] परस्य च।
को वेद भगवान्विष्णुः कथं तुष्यति सर्वगः॥ 37॥

नियोजिताः स्वधर्म्मे तु वयं तं करवामहे।
इत्युत्वा ते गृहीत्वा तु दक्षिणां मुदिता ययुः॥ 38॥

स्वं स्वमालयमाश्चर्य्यं चिन्तयन्तो द्विजा हृदि॥ 39॥

इति श्रीभगवद्भक्तिमाहात्म्ये रविदासचरितं नामाशीतितमः सर्गः॥ 80॥

❊ ❊ ❊

1. निन्दयानं – क।

एकाशीतितमः सर्गः

॥ रविदासचरितम् ॥

अथापरं प्रवक्ष्यामि रविदासस्य चेष्टितम्।
अमानुषं यथा[1] जातं प्रसिद्धं पृथिवीतले ॥ 1 ॥

एकस्मिन् दिवसे गङ्गास्नातुं तद्ग्रामवासिनः।
चलितास्तत्र चैकस्तु रविदासमुवाच ह ॥ 2 ॥

यामि भागीरथीं स्नातुं गमिष्यति भवान् किमु।
श्रुत्वा द्विजवचः प्राह रविदासोऽति हर्षितः ॥ 3 ॥

धन्योऽसि यदिदं ब्रूषे मामप्यधमसम्भवम्।
कथं यामि जराग्रस्तस्तस्मादेकं ब्रवीमि ते ॥ 4 ॥

करोषि यदि भो ब्रह्मन् त्वामहं नौम्यनेकशः।
इति श्रुत्वा वचस्तस्य विप्रः प्रोवाच कथ्यताम् ॥ 5 ॥

रविदासस्तदोत्थाय पूगीफलयुगं ददौ।
इदं फलद्वयं विप्र[2] गङ्गायै त्वं समर्प्य च ॥ 6 ॥

नागन्तुं स समर्थोऽस्ति रविदासो ददाविमे।
इत्युक्त्वा देहि गङ्गायै कृतार्थं कुरु मां प्रभो[3] ॥ 7 ॥

इत्युक्तः स तु विप्रो वै गृहीत्वा तत्फलद्वयम्।
तत्र गत्वा द्विजः स्नात्वा स्थित्वा तत्र दिनत्रयम् ॥ 8 ॥

विसस्मार फलं दातुं गङ्गायै स तदा द्विजः।
प्रातस्ततः समायातुमिच्छां चक्रे द्विजैस्सह ॥ 9 ॥

तस्यां रात्रौ ददर्शाथ स्वप्ने स्वमातरं द्विजः।
वदन्तीं पुत्र नादास्त्वं कुतस्तस्य फलद्वयम् ॥ 10 ॥

गृहीत्वा तत्फलद्वन्द्वं यद्दास्यति सुरापगा।
तं[4] तस्मै रविदासाय दातव्यं पुत्रक त्वया ॥ 11 ॥

---

1. यदायातं – ख, ग।
2. ब्रह्मन् – ख।
3. विभो – क।
4. स – ख, ग।

इति दृष्ट्वा महाश्चर्य्यं स्वप्ने स द्विजसत्तमः ।
उक्त्वा शिष्टजनेभ्यस्तद्गृहीत्वा च फलद्वयम् ॥ 12 ॥

[1]प्रातर्भागीरथीगङ्गां प्राह विप्रः कृताञ्जलिः ।
नागन्तुं समर्थोऽस्ति रविदासो ददाविदम् ॥ 13 ॥

इति ब्रुवति विप्रे तु गङ्गां तोयात्करं शुचम् ।
याचमानं बहिर्यातं रत्नकङ्कणभूषितम् ॥ 14 ॥

ततस्तस्मिन्करे विप्रो ददौ पूगीफलद्वयम् ।
अथैकं कङ्कणं तस्माद्बहिरागत्य वारिणः ॥ 15 ॥

ब्राह्मणाग्रे समायातं सर्वेषां चैव पश्यताम् ।
ततः करो जले मग्नो कङ्कणं जगृहे द्विजः ॥ 16 ॥

हर्षाश्रुपरिपूर्णाक्षो बभूवुस्तत्र वै द्विजाः ।
साधुसाध्विति जल्पन्तो रविदासं द्विजं च तम् ॥ 17 ॥

अथागत्य द्विजस्तस्मै रविदासाय भक्तिमान् ।
उक्त्वा सर्वमशेषेण कङ्कणं प्रददौ करे ॥ 18 ॥

नीत्वा तत्कङ्कणं भक्तो रविदासोऽति हर्षितः ।
ननर्त गणमध्ये तु मूर्ध्नि कृत्वा च कङ्कणम् ॥ 19 ॥

[2](अथ पूजागृहे गत्वा शालग्रामशिलान्तिके ।
संस्थाप्य कङ्कणं भक्त्या पूजयामास भक्तितः ॥ 20 ॥

अथ श्रुत्वा महाराज्ञी गङ्गादत्तं तु कङ्कणम् ।)
आययौ द्रष्टुकामा सा रविदासस्य मन्दिरे ॥ 21 ॥

दृष्ट्वाति विस्मयं प्राप राज्ञी कङ्कणमुत्तमम् ।
विस्मितां तां तु विज्ञाय रविदासो नृपाङ्गनाम् ॥ 22 ॥

ददौ तत्कङ्कणं तस्यै भक्तास्तीति व्यचिन्तयन् ।
परिधाय करे सा तु गता स्वभवनं मुदा ॥ 23 ॥

[3]पत्ये सन्दर्शयामास कङ्कणं चाति हर्षिता ।
दृष्ट्वा राजापि मुमुदे नत्वा कङ्कणमब्रवीत् ॥ 24 ॥

---

1. र्गमागतस्तां संप्राह – क।
2. ख मध्ये लुप्तः पाठः
3. पत्युः – ख, ग।

पत्नी धन्यासि कान्ते त्वं यस्यै देव्याः करे स्थितम्।
कङ्कणं प्रददौ भक्तो रविदासो दयान्वितः ॥ 25 ॥

एवं प्रियोदितं श्रुत्वा परिधाय च कङ्कणम्।
रूपसौभाग्यसम्पत्त्या बभौ देवस्तुतोपमा ॥ 26 ॥

एवं गतेषु कालेषु राज्ञी तं पतिमेकदा।
प्रार्थयामास विनयाद्द्वितीयं कङ्कणं मुदा ॥ 27 ॥

श्रुत्वा राजा हसन्प्राह किमिदं भाषसे प्रिये।
रविदासप्रसादाय गङ्गया तत्समर्प्पितम् ॥ 28 ॥

एतादृशं द्वितीयं क्व मर्त्यलोके भविष्यति।
तस्मादेवं हठं त्यक्त्वा याचस्वान्यद्ददामि ते ॥ 29 ॥

इति भर्तृवचः श्रुत्वा नामन्यत नृपाङ्गना।
बहुधा प्रार्थ्यमानापि राज्ञाति प्रीतिपूर्वकम् ॥ 30 ॥

सा पुनः प्राह भर्तारं यावदेतादृशं पुनः।
द्वितीयं कङ्कणं नाथ न दास्यसि करे मम ॥ 31 ॥

तावन्मया न भोक्तव्यं शपे त्वच्चरणाब्जयोः।
इति श्रुत्वा वचो राज्ञा राजा शोकसमन्वितः ॥ 32 ॥

न किञ्चित्कुरुते कर्म्म तूष्णीं तस्थौ तथा तथा।
स चिन्तयन्कथं चास्या द्वितीयं कङ्कणं भवेत् ॥ 33 ॥

एवं चिन्तयतस्तस्य दिनद्वयमथागमत्।
तृतीये दिवसे प्राप्ते स्निग्धमन्त्रिणमाह्वयत् ॥ 34 ॥

तमुवाच नृपः सर्वं निजसंलापकारणम्।
श्रुत्वा मन्त्रिवरः प्राह राजानं विनयान्वितः ॥ 35 ॥

भूपते तादृशं नास्ति कङ्कणं धरिणीतले।
अतोऽहं नैव पश्यामि तदुपायं तु मानुषम् ॥ 36 ॥

एकमायाति मे चित्ते लोभोपायं शृणु प्रभो।
तत्र गन्तव्यमावाभ्यां रविदासस्य सन्निधौ ॥ 37 ॥

तस्मै सर्वे वदेमाद्य स वै किञ्चित्करिष्यति।
इति मन्त्रिवचः श्रुत्वा राजा तत्कालमेव हि ॥ 38 ॥

रविदासगृहं गत्वा तस्मै प्रोवाच सर्वशः।
रविदास महाभक्त! सत्यं शृणु वचो मम॥ 39॥

द्वितीयं कङ्कणं नोचेदद्य तादृग्भवेन्मम।
तदा राज्ञी म्रियेतैव मरिष्येऽहं ततः परम्॥ 40॥

तस्माद्यथा द्वितीयं तत्कङ्कणं स्यात्तथा कुरु।
इति राज[1]वचः श्रुत्वा रविदासोऽति चिन्तितः॥ 41॥

किं करोमि कथं गङ्गा पुनर्दास्यति कङ्कणम्।
सपत्नीको नृपोऽयं तु मरिष्यति न संशयः॥ 42॥

मृते राज्ञि ममाप्यद्य[2] जीवनान्मरणं वरम्।
इति संचिन्त्य मनसा काष्ठपात्रे जलं शुचि॥ 43॥

कृत्वा तत्रैव गङ्गां स ध्यायन्नाम मुहुर्मुहुः।
मनो चेत्[3] सुष्ठु सर्वत्र जलं गङ्गा न संशयः॥ 44॥

इत्युक्त्वा तत्र हस्तेन जले कङ्कणमर्प्पयन्[4]।
स प्राप[5] कङ्कणं तत्र जले वै पश्यतां नृणाम्॥ 45॥

अथ काष्ठस्थितं वारि भूमियुक्तं तरङ्गवत्।
दृष्ट्वा सर्वे महाश्चर्यं गता धन्येति वादिनः॥ 46॥

अथ तत्कङ्कणं राज्ञे रविदासो ददौ मुदा।
नीत्वा प्रणम्य राजापि समायातो निजं गृहम्॥ 47॥

कङ्कणं तद्ददौ पत्न्यै सापि जग्राह वै मुदा।
तदा राजापि राज्ञी च मुदितौ भक्तितत्परौ॥ 48॥

बभूवतुर्महाभक्तौ साधुसेवनतत्परौ।
भुक्त्वा भोगानशेषेण जग्मतुः परमं पदम्॥ 49॥

एवं भक्तेस्तु माहात्म्यं महदाश्चर्य्यकारकम्।
शृण्वन् भक्तिमवाप्नोति जनः श्रद्धासमन्वितः॥ 50॥

इति श्रीभगवद्भक्तिमाहात्म्ये रविदासचरितं नामैकाशीतितमः सर्गः॥ 81॥

❊ ❊ ❊

1. राजा – ख।
2. अग्र – ख, ग।
3. मनश्चोत्साद् – ख, ग।
4. निजकंकणमर्प्यंयत् – ख, ग।
5. संप्राप – क, ख।

द्व्यशीतितमः सर्गः

॥ कवीरभक्तिचरितम् ॥

कवीरभक्तिमाहात्म्यं कथयामि यथाश्रुतम्।
यस्य श्रवणमात्रेण हरिभक्तिः भवेन्नृणाम् ॥ 1 ॥

आसीत्पूर्वं भवेद् विप्रो वेदान्ताभ्यासतत्परः।
सर्वं मिथ्येति विज्ञाय सर्वं कर्म्म जहौ द्विजः ॥ 2 ॥

स्त्रीपुत्रमोहवशगः शिल्पकार्येऽतिपण्डितः।
यस्तस्य[1] तन्तुवायस्य जगाम भवने द्विजः ॥ 3 ॥

सूत्राण्यादाय वस्त्रार्थं ददौ तस्मै च शिल्पिने।
एवमेव प्रदातव्यमित्युक्त्वा गृहमागतः ॥ 4 ॥

तत्रागत्य [2]जराविष्टो मृतः स द्विजसत्तमः।
परन्तु दैवयोगेन तन्तुवायं स्मरन्मुहुः ॥ 5 ॥

नास्ति शिल्पी तन्तुवायः कथं वा सः करिष्यति।
स्थितश्चेत्स्यादहं तत्र सम्यग्वासो भवेदिति ॥ 6 ॥

चिन्तयानो मृतो विप्रो जातोऽसौ तन्तुवायकः।
तत्रापि बाल्यमारभ्य साधुसङ्गतितत्परः ॥ 7 ॥

[3]शिक्षितो मातृपितृभ्यां वस्त्रनिर्माणकर्मणि।
परन्तु पूर्वसंस्काराद्ब्रह्मज्ञानोदयोऽभवत् ॥ 8 ॥

जानन्नसारं संसारं सदा वचनतत्परः।
चिन्तयामास सततं को मे काश्यां गुरुर्भवेत् ॥ 9 ॥

गुरुं विना वृथा सर्वं न तरेद्भवनार्णवात्।
कर्णधारं विना पोतः समुद्र इव निश्चितम् ॥ 10 ॥

इति सञ्चिन्त्य मनसा साधूनां सन्निधिं गतः।
द्वारात्प्रोवाच[4] तान्साधून् तन्तुवायोऽस्मि वो नमः ॥ 11 ॥

---

1. एकदा – ख, क।
2. त्वरा – क।
3. शिक्षितः – ख, ग।
4. दूरादुवाच – क, ख।

इति श्रुत्वा वचस्तस्य वैष्णवाः प्राहुरादरात्[1]।
कोऽसि किं चेप्सितं तेऽत्र ब्रूहीत्युक्त उवाच तान्॥ 12॥

तन्तुवायोऽस्मि जात्या वै काश्यामेव वसाम्यहम्।
शिष्यो भवितुमायातो रामानन्दस्य सद्गुरोः॥ 13॥

इति श्रुत्वा वचस्तस्य हसन्तस्ते तमब्रुवन्।
अरे यो नेच्छते म्लेच्छं स कथं ते गुरुर्भवेत्॥ 14॥

तस्मादस्मात् स्थलाद्गच्छ द्रुतं नोचेत्तु वैष्णवाः।
ताडयिष्यन्ति मूढं त्वां याहि याहि यथासुखम्॥ 15॥

इति तेषां वचः श्रुत्वा कवीरो गृहमागतः।
पुनरन्यद्दिने गत्वा तत्र तानाह पूर्ववत्॥ 16॥

एवं बहुदिनं यातं काश्यां सर्वांस्तु वैष्णवान्।
पप्रच्छ मुहुरार्त्तः सः प्रति साधुसभां स्वयम्॥ 17॥

रामानन्द इति ख्यातः स्वामी मे स्यात्कथं गुरुः।
इति पृच्छन्स बभ्राम वाराणस्यामितस्ततः॥ 18॥

एकस्मिन् दिवसे चैको दयालुत्वादुवाच तम्।
कवीर शृणु वक्ष्यामि यथा ते [2]सद्गुरुर्भवेत्॥ 19॥

रामानन्दो रात्रिशेषे गङ्गां स्नातुं प्रयात्यसौ।
तद्बहिर्द्वारि गत्वा त्वं कपाटाद्यः स्थितो भव॥ 20॥

जायत शयानश्चेत्स्वामी समागच्छन् बहिः स्वयम्।
निधास्यति तदा पादं तवोपरि दयान्वितः॥ 21॥

स्मरिष्यति जपन्नाम तत्ते मन्त्रो भविष्यति।
नान्यथा त्वां कदाचित् स शिष्यं कर्तुमिहार्हति॥ 22॥

इति श्रुत्वा वचस्तस्य दयालोर्वैष्णवस्य सः।
जहर्ष परमप्रीतः कवीरस्तु ननाम तम्॥ 23॥

उवाच त्वं गुरोर्लाभे गुरुर्यातोऽसि साम्प्रतम्।
अतस्त्वं प्रथमं पूज्यो गुरुरेव न संशयः॥ 24॥

---

1. ऊधुरागतः – क।
2. परमधीतः – ख।

इत्युक्त्वा स गतः क्वापि वैष्णवोऽपि ययौ क्वचित्।
कवीरस्त्वेकदा पर्व ज्ञात्वा स्वामिगृहान्तिके ॥ 25 ॥

स्थित्वा रात्रौ निशाभागे सुप्ते लोके समागतः।
बहिर्द्वारि कपाटस्य शिश्येऽधस्ताद्धरातले ॥ 26 ॥

पादस्पर्शं समाकाङ्क्षन्न बभूव स निद्रितः।

अथोषसि समुत्थाय रामानन्दोऽति हर्षितः ॥ 27 ॥

स्नातुं [1]सम्प्रस्थितश्चक्रे कपाटोद्घाटनं स्वयम्।
अथोद्घाट्य कपाटं तु ददौ पादं ततो[2] बहिः ॥ 28 ॥

पतितः स कवीराङ्गे ततः स्वाम्यति चिन्तितः।
उवाच राम रामेति कोऽसि रेऽत्र स्वपनहो ॥ 29 ॥

इति श्रुत्वा वचस्तस्य कृतकृत्यः प्रणम्य तम्।
कवीरः प्रययौ तस्मात्स्थानात्तूष्णीं गुरुं नमन् ॥ 30 ॥

रामानन्दोऽपि तं वेद विक्षिप्तः कोप्यसाविति।
एवं लब्ध्वा गुरोर्मन्त्रं रामानन्दस्य हर्षितः ॥ 31 ॥

मालां च तिलकं चापि दधार स्वयमेव सः।
अन्यवैष्णववत्सोऽपि वाराणस्यां स्थितोऽभवत् ॥ 32 ॥

अथ ज्ञात्वा तु तं सर्वे वैष्णवाश्चक्रुधुर्भृशम्।
कवीरमूचुः किं नीच कुरुषे केन शिक्षितः ॥ 3 ॥

इति श्रुत्वा वचस्तेषां कवीरोऽप्यब्रवीद्वचः।
रामानन्दस्वामिना मे दत्तो मन्त्र[3]महोत्तमः ॥ 34 ॥

तेनाहं वैष्णवो यातः सत्यमेतद्ब्रवीम्यहम्।
श्रुत्वा तद्वचनं स्वामी रामानन्दोऽति कोपतः ॥ 35 ॥

आनाप्य तं कवीरं समपृच्छत्तर्जयन् रुषा।
ततो गुरुं प्रणम्याह रामानन्दं कृताञ्जलिः ॥ 36 ॥

नाथ तस्मिन् दिने द्वारि रात्रौ सुप्त्वा स्थितोऽभवम्[4]।
भवदागमने स्नातुं पादश्च पतितो मयि ॥ 37 ॥

---

1. समा ययौ – क, ख।
2. तदा – ख, ग।
3. महात्मनः – क।
4. ह्यहम् – ख।

श्रीभगवन्मुखाद्रामरामेति विश्रुतं मया।
तदा कृतार्थः सञ्जातः क्षम्यतां मे दयानिधे ॥ 38 ॥

इति श्रुत्वा स सस्मार सत्यमेतन्न संशयः।
ज्ञात्वा तस्य तु तद्बुद्धिं प्राह भक्तिपरो भव ॥ 39 ॥

अन्येऽपि वैष्णवास्तत्र जहुः क्रोधं हसन्मुखाः।
एवं कवीरो भक्तोऽभूद्धृदि रामं व्यचिन्तयन् ॥ 40 ॥

ददावन्नं जनन्यै स तन्तुवायस्य कर्मणा।
एकदा वस्त्रमेकं तु निर्माय नगरे गतः ॥ 41 ॥

हट्टायां विक्रयार्थं स माघे मासे हिमाकुलः।
कश्चिद्वृद्धो मुहुः प्राह शीतेनार्तोऽति [1]वेपितः ॥ 42 ॥

वस्त्रं देहि म्रियन्तं मां वृद्धं शीतेन [2]ताडितम्।
इति श्रुत्वा वचस्तस्य कवीरोऽति दयान्वितः ॥ 43 ॥

गत्वा तस्य समीपं तु वस्त्रार्द्धं दातुमुत्सुकः।
तदा वृद्धः पुनः प्राह सम्पूर्णं देहि मे प्रभो ॥ 44 ॥

नार्द्धेन भविता किञ्चिद्रामस्ते प्रीतिमेष्यति।
इति श्रुत्वा वचस्तस्य कवीरोऽति दयान्वितः ॥ 45 ॥

दत्त्वा समस्तं तद्वसो हृदये संस्थितोऽभवत्।
अथ माता च पुत्रश्च पत्नी चापि गृहे स्थिताः ॥ 46 ॥

कवीरो न [3]नये किञ्चिदित्येवं हृदि चिन्तयन्।
कवीरागमनं सर्वे प्रतीक्षन्तः क्षुधाकुलाः ॥ 47 ॥

किं वदिष्यति मे माता किं वा दास्यामि भोजनम्।
अथैव क्षुधितान्सर्वान् दृष्ट्वा श्रीभगवान्हरिः ॥ 48 ॥

धनमादाय तद्गेहे ददौ साधुस्वरूपधृक्।
कवीरेण ददौ तुभ्यमित्युक्त्वा स गतो हरिः ॥ 49 ॥

ततस्तृतीये दिवसे कवीरोऽपि जनैर्हठात्।
आनीतो भवने मात्रा कथितं तद्धनादिकम् ॥ 50 ॥

---

1. वै पुनः – क।
2. म्रिये वृद्धो दयावन्तो सनाः अरे – क।
3. कवीरस्तु नयान्नेति स्वगृहं – ख।

श्रुत्वा मेने हरिः साक्षाद्ददौ सत्यं धनं मम।
इति निश्चित्य तत्सर्वं साधुभ्यः प्रददौ पुनः ॥ 51 ॥

मेने तां जननीं धन्यां श्रीकृष्णस्य च दर्शनात्।
तदारभ्य स तत्याज स्वां वृत्तिं तन्तुवापिकाम् ॥ 52 ॥

विश्वम्भरो वृत्तिदातेत्येवं निश्चित्य मानसे।
अथैवं शुश्रुवुः सर्वे कवीराय धनं बहु ॥ 53 ॥

कोऽपि साधुः समागत्य ददाविति तदा जनाः।
अरे त्वया धनं प्राप्तं तन्तुवाय वृथा पुनः ॥ 54 ॥

विनियुक्तं तु सर्वेभ्योऽस्मभ्यं दत्ते कथं न तत्।
आयास्यामो वयं चाद्य त्वं तावद्भवनं व्रज ॥ 55 ॥

इत्युक्ता ते गताः सर्वे कवीरश्चिन्तितोऽभवत्।
नास्ति गेहे किमप्यद्य[1] तेभ्यो वक्ष्यामि किं पुनः ॥ 56 ॥

तस्मान्निलीय[2] वस्तव्यं गेहादन्यत्र च क्वचित्।
इति निश्चित्य मनसा क्वचिद्गत्वा स्थितोऽभवत् ॥ 57 ॥

अथ ते ब्राह्मणाश्चान्ये समेत्यागन्तुमुत्सुकाः।
एतस्मिन्नन्तरे तत्र भगवान्भक्तवत्सलः ॥ 58 ॥

कृत्वा कवीररूपं तु धनमादाय भूरिशः।
कवीरगृहमागत्य तस्थावाश्रमिवत्स्वयम् ॥ 59 ॥

अथागतास्तु ते सर्वे कवीरद्वारि नागराः।
दृष्ट्वा तेभ्यो मुदायुक्तो ददौ वित्तान्यनेकशः ॥ 60 ॥

गतास्ते याचकाः सर्वे भगवान्विप्ररूपधृक्।
तिरोभूय स्थितो यत्र कवीरस्तमुवाच ह ॥ 61 ॥

अरे त्वं किं करोष्यत्र कवीरस्य गृहं व्रज।
ददात्यभिमतं वित्तं[3] याचकेभ्योऽति भक्तिमान् ॥ 62 ॥

इति श्रुत्वा कवीरोऽपि समायातो गृहं निजम्।
ददर्श मुदितान्सर्वान् धनधान्यपुरस्कृतान् ॥ 63 ॥

---

1. किमप्यस्य – ख, ग।
2. ख मध्ये लुप्तपाठः।
3. ख मध्ये लुप्तपाठः।

मेने कृष्णस्य चरितं कवीरो हृदि तं स्मरन् ॥ 64 ॥

इति श्रीभगवद्भक्तिमाहात्म्ये कवीरभक्तिचरितं नाम द्व्यशीतितमः सर्गः ॥ 82 ॥

❊ ❊ ❊

त्र्यशीतितमः सर्गः

॥ कवीरचरितम् ॥

अथ श्रुत्वा कवीरस्य दानं ते नागरा जनाः ।
धनं ग्रहीतुमायाता अपि ग्रामान्तरस्थिताः ॥ 1 ॥

तदा कवीरो विक्षिप्त इव भूत्वा करेण च ।
वेश्यां धृत्वा ननर्ताथ ददृशुस्ते तथाविधम् ॥ 2 ॥

सन्तो[1] दुःखपरायाता विक्षिप्तोऽयं बभूव ह ।
असन्तो जहसुस्तं वै नीचा एव न वैष्णवाः ॥ 3 ॥

इत्युक्त्वा ते गताः सर्वे कवीरोचारपोषितम् ।
गृहीत्वोन्मत्तवच्चैव राजद्वारमुपागतः ॥ 4 ॥

राजापि तादृशं दृष्ट्वा कवीरं [2]हृद्यमन्यत ।
विक्षिप्तोऽयं बभूवेति कवीरस्तदनन्तरम् ॥ 5 ॥

तोयं पूर्वमुखो भूत्वा चिक्षेपाञ्जलिना मुहुः ।
दृष्ट्वा राजा हसन् प्राह किं करोषीदमत्र[3] भोः ॥ 6 ॥

श्रुत्वा राजवचः प्राह कवीरो निर्भयो नृपम् ।
जगन्नाथपुरे राजन् पचतोऽन्नं द्विजस्य वै ॥ 7 ॥

पादयोः पतितं तप्तभक्तं तस्य जलं ददे ।
इत्युक्तः प्रहसन्राजा विक्षिप्तं तममन्यत् ॥ 8 ॥

पुनः को वेद भक्तस्य चरितं येत्यचिन्तयत् ।
जगन्नाथपुरीं राजा प्रेषयामास वै चरान् ॥ 9 ॥

चरास्तत्र गतास्तस्मिन् दिने पत्रमलीलिखत् ।
तत्पूर्वपञ्चमेऽह्नि पदोः पतिनञ्चोष्णमोदनम् ॥ 10 ॥

---

1. सन्ति – क।
2. दुःख – क।
3. करोषीदं मे प्रभो – क।

तदा कवीर आगत्य जलमञ्जलिना वहन्।
शीघ्रं निर्वापयामास तापं तस्य पदोस्तदा॥ 11॥

इति वृत्तं चराः ज्ञात्वा [1]लेखयित्वा समागताः।
ददौ सभायां भूपाय भूपो दृष्ट्वाद्भुतं महत्॥ 12॥

कवीरं सिद्धमेवाथ राजा मत्वा च मानसे।
राज्ञा[2] सह ययौ तस्य कवीरस्य निकेतनम्॥ 13॥

कवीरो नृपतिं दृष्ट्वा सच्चकाराति हर्षितः।
महाराज कुतश्चेदं भवदागमनं महत्॥ 14॥

किङ्करस्य च मे किञ्चिद्यदि कार्य्यं भवेत्तव।
तदा नाथ प्रवक्तव्यं दासश्चाहं न संशयः॥ 15॥

इति श्रुत्वा वचस्तस्य राजा प्राञ्जलिरब्रवीत्।
अहो दुर्विनयं मेऽद्य क्षमस्व वैष्णवोत्तम ॥ 16॥

अजानता मया पूर्वमुपहासः कृतस्तव।
ब्रूहि ते किं प्रदास्यामि जीविकायै धनाधिकम्॥ 17॥

इति श्रुत्वा वचस्तस्य कवीरो नृपमब्रवीत्।
राजन् का जीविका कोऽहं जीवनं मरणं च किम्॥ 18॥

मूर्खत्वान्नैव जानामि राजन्नेच्छाम्यतो धनम्।
किञ्च पश्यामि लोकेऽस्मिन् वैचित्र्यं तद्विचारय॥ 19॥

वृत्तिमन्तो म्रियन्ते वै क्षुधया अपि पीडिताः।
अवृत्तिका नरा सर्वे म्रियन्ते प्रलयेऽपि न॥ 20॥

तस्माद्वृत्तिर्न[3] मे योग्या देहि तस्मै यदृच्छसि[4]।
इति श्रुत्वा वचो राजा समायातो निजं गृहम्॥ 21॥

ग्रामे सर्वानुवाचेदं कवीरोऽतीव मे प्रियः।
यस्तद्द्वेष्टि स मे शत्रुः [5]सत्यमेतन्न संशयः॥ 22॥

---

1. प्रलिखाप्य – क।
2. राजा – ख, ग।
3. तस्या वृत्ति – ख।
4. परेच्छति – ख।
5. स्वयमेव तन्न – ख।

तत आरभ्य ग्रामेऽपि न कवीरविरोधकः ।
जनः कोऽपि वभूवाग्रे स्मृत्वा वै राजशासनम् ॥ 23 ॥

एकदा तीर्थयात्रायां वैष्णवैः [1]परिवारितः ।
कवीरो मथुरां गत्वा जगाम हस्तिनापुरम् ॥ 24 ॥

सिकन्दरोऽति नाम्नासीत्तत्र म्लेच्छो धरापतिः ।
तं प्राहुर्दुर्ज्जनाः सर्वे तन्तुवायोऽयमागतः ॥ 25 ॥

गृहीत्वा वैष्णवं वेषं दम्भेन पदवञ्चकः ।
तच्छ्रुत्वा वचनं तेषां म्लेच्छो भृत्यानथाह्वयत् ॥ 26 ॥

[2]तन्तुवायं त्वरायुक्ता आनयध्वं ममान्तिके ।
इत्थं नायाति चेद्बध्वा समानय तु माचिरम् ॥ 27 ॥

श्रुत्वैतद्वचनं भृत्याः कवीरनिकटे गताः ।
ऊचुः कवीरं राजा त्वां द्रष्टुमिच्छति चैहि भोः ॥ 28 ॥

नो चेद्बध्वा वयं तत्र नेष्यामो राजशासनात् ।
इति तेषां वचः श्रुत्वा कवीरः प्राह वै हसन् ॥ 29 ॥

बन्धनादीनि तत्रैव भविष्यति न संशयः ।
यूयं किमर्थं प्रथमं बन्धयिष्यथ मां वृथा ॥ 30 ॥

इत्युक्त्वा प्रहसंस्तत्र जगाम नृपसन्निधौ ।
तस्थौ स्थाणु समस्तं तु सर्वे प्राहुर्नमस्कुरु ॥ 31 ॥

तेषां श्रुत्वा वचः प्राह कवीरो निर्भयो हसन् ।
कोऽयं कोऽहं कः प्रणामः के यूयं नैव वेद्म्यहम् ॥ 32 ॥

इति श्रुत्वा [3]वचो राजा क्रुद्धः शृङ्खलया दृढम् ।
बध्वा कवीरं चिक्षेप यमुनागाधवारिणि ॥ 33 ॥

जले निपतितो दृष्टः कवीरः सकलैर्जनैः ।
अदृश्यत पुनस्तीरे प्रव्रजन्मुदितो हसन् ॥ 34 ॥

दृष्ट्वेदं महदाश्चर्य्यं दुर्जना म्लेच्छमब्रुवन् ।
राजन्नयं क्षुद्रविद्यां [4]जानात्यैन्द्रजालिकाम् ॥ 35 ॥

---

1. परितः करो – क।
2. कुर्विद्धं – क।
3. ततो – क।
4. विज्ञानात्यै द्वजलिको – ख।

ततो जलाद्विनिर्गत्य व्रजतीति महाद्भुतम्।
ततो महाजले क्षिप्तस्तत्रापि संस्थितोऽभवत्॥ 36॥

बद्ध्वा वह्नौ पातितोऽयं सायमिन्धनराशिके।
प्रातर्निर्वापिते वह्नौ ददृशुर्भस्मनि स्थितम्॥ 37॥

ततो दिल्लीश्वरः क्रुद्धो हस्तिपादतले रुषा।
कवीरं दापयामास हस्ती दृष्ट्वा पलायितः॥ 38॥

सिंहोऽयमिति चीत्कृत्य ततो हस्तिपकस्तुदन्।
अङ्कुशेन ददर्शाग्रे कवीरं सिंहरूपिणम्॥ 39॥

ततो म्लेच्छादयः सर्वे ये स्थितास्तत्र दुर्जनाः।
दृष्ट्वा सिंहस्वरूपं तं बभूवुर्भयसंयुताः॥ 40॥

दिल्लीश्वरस्तदोत्थाय निपत्य तत्पदाम्बुजे।
क्षमापयन्स्वापराधं प्रणनाम मुहुर्मुहुः॥ 41॥

कवीरः प्राह तं राजन् किं [1]त्वयाद्य कृतं मम।
यदेवं प्रार्थनाशीलः क्षमापयसि मां वृथा॥ 42॥

इत्युक्तः स गतो राजा म्लेच्छश्चिन्तासमन्वितः।
कवीरोऽपि ततः काशीमाजगामति हर्षितः॥ 43॥

इति श्रीभगवद्भक्तिमाहात्म्ये कवीरचरितं नाम त्र्यशीतितमः सर्गः॥ 83॥

❊ ❊ ❊

चतुरशीतितमः सर्गः

॥ कवीरचरितम्॥

इत्थं काश्या[2] वसन्भक्तः साधुसेवापरायणः।
जानन्नसारं संसारमात्मज्ञानपरोऽभवत्॥ 1॥

एकदा दुर्जनास्तत्र काश्यां तद्द्वेषकारिणः।
साधून्निमन्त्रयामासुः कवीरस्येति चाब्रुवन्॥ 2॥

कवीरस्तु गतस्तस्मिन् दिने कुत्रापि कार्य्यतः।
सहस्रशः समायाता अथ तत्र बुभुक्षिताः॥ 3॥

1. त्वया यत् – क। 2. काशीं – ख

दृष्ट्वा कवीरशिष्यस्तु महाचिन्तापरोऽभवत्।
अथान्तरे समायातो भगवान्भक्तवत्सलः ॥ 4 ॥

कवीरवेषमादाय भोज्यान्यापणतो नयन्।
शिष्यं प्राहाद्य साधूनां [1]भोज्यमानयितुं गतः ॥ 5 ॥

इत्युक्त्वा तांस्तु सर्वान्वै सर्वोपकरणैर्मुदा।
भोजयामास भगवान् कवीरस्य स्वरूपधृक् ॥ 6 ॥

भोजयित्वा विसृज्याथ स्वयमन्तर्दधे हरिः।
ज्ञात्वा यान्तं कवीरं निःसृत्य तद्गृहाद्बहिः ॥ 7 ॥

अथागतः कवीरोऽपि पथ[2]श्रमसमाकुलः।
ददर्श गणमध्ये स महोत्साहो यथाभवत् ॥ 8 ॥

दृष्ट्वा तथाविधं वेश्म शिष्यं पप्रच्छ सत्वरम्।
किमिदं दृश्यते वत्स महोत्साह इवाभवत् ॥ 9 ॥

इति श्रुत्वा वचस्तस्य शिष्यः प्राहाति विस्मितः।
किमिदं भाषसे नाथ भ्रान्तिमानिव साम्प्रतम् ॥ 10 ॥

सहस्रावधि विप्रान्वै भोजयित्वा सुभोजनैः।
इदानीं त्वं बहिर्यातः पुनरागतवानसि ॥ 11 ॥

किमिदं भाषसेऽत्यर्थं संशयो मे महानभूत्।
इति शिष्यवचश्श्रुत्वा बुबुधे हरिचेष्टितम् ॥ 12 ॥

मनसा भाग्यवन्तं तं शिष्यं मुहुरमन्यत[3]।
ततः प्रोवाच तं शिष्यं सत्यं भान्तिरभून्मम ॥ 13 ॥

श्रमेणाति बुभुक्षाभूत्तस्माद्भोजय मां द्रुतम्।
इति श्रुत्वा स शिष्यस्तु श्रीकृष्णानीतमुत्तमम् ॥ 14 ॥

[4]भोज्यं तं भोजयामास साधुभुक्तावशेषितम्।
भुक्त्वा स चिन्तयामास हृदये भक्तवत्सलम् ॥ 15 ॥

ततस्ते दुर्जनाः सर्वे दृष्ट्वा तत्परमाद्भुतम्।
कवीरं तुष्टुवुर्हृष्टाः सत्यं त्वं भक्तिमानसि ॥ 16 ॥

---

1. भाजनान्नगतः क्वचित् – ख, ग।
2. यथाश्रम – क, ख।
3. गुरु – क।
4. भोजये – ख।

कृतोऽपराधस्तेऽस्माभिस्तव नाम्ना निमन्त्रिताः।
साधवस्ते समागत्य सहस्रादधिका जनाः॥ 17॥

त्वन्मन्दिरे सुखं भुक्त्वा स्तुवन्तस्ते पुनर्ययुः।
इति श्रुत्वा वचतेषां धन्या यूयं न संशयः॥ 18॥

अनिच्छता मयाप्येवं यद्धर्मः कारितोऽधुना।
इति श्रुत्वा तु ते सर्वे स्तुवन्तस्तं ययुर्गृहम्॥ 19॥

कवीरोऽपि विशश्राम रामस्मरणतत्परः।
निजगेहे तदा काचिद्वेश्या [1]रूपकलान्विता॥ 20॥

समायाता कवीरस्य गृहे प्राञ्जलिरब्रवीत्।
कवीराहं भवद्गेहे वसितुमिच्छामि सर्वदा॥ 21॥

नृत्यगानोपभोगैस्तु तव तोषकरी सदा।
भविष्यामि न सन्देहः सत्यमेतद्ब्रवीमि ते ॥ 22॥

दृष्ट्वा तां रूपसम्पन्नां नृत्यगीतकलावतीम्।
उवाच नाहं जानामि भोगं गानं च नर्तनम्॥ 23॥

क्लीवं मामवगच्छ त्वं नाहं स्त्री न पुमानपि।
तथापि त्वद्धितार्थाय वक्ष्ये किञ्चिन्निशम्यताम्॥ 24॥

अयं यो मम गेहेऽस्ति भगवान् श्रीहरिः प्रभुः।
सोऽतिरागी महाभोगी[2] तदग्रे नर्तनं कुरु॥ 25॥

भोगे तव यदीच्छा स्यात्तदा रात्रौ हरिः स्वयम्।
त्वां भोक्ष्यति न सन्देहः कृतार्थस्त्वं भविष्यसि॥ 26॥

इति श्रुत्वा वचस्तस्य सा नारी चातिहर्षिता।
उवास तस्य निलये देवाग्रे नृत्यतत्परा॥ 27॥

[3](अथ नागरिकाः सर्वे मेनिरेऽप्सरसो वराम्।
दृक्पातमकरोऽत्रैव सा लौकिकजनेषु वै॥ 28॥

एकस्मिन्दिवसे सा तु कवीरं कामवासिता।
इच्छां चक्रे ततोऽपश्यद्धरिरूपं ननाम सा॥ 29॥

---

1. कल्यान्विताः – ख।
2. तथा भोगी – ख।
3. ख मध्ये लुप्तपाठः।

एवं बहुदिनं स्थित्वा गीतनृत्यपरायणा।)
जगामैकदिने नारी वनमध्ये यदृच्छया॥ 30॥

वने सान्तर्दधे बाला न दृष्टा केनचित्क्वचित्।
[1]अप्सरा सेति सर्वेषां तदाभून्निश्चयो महान्॥ 31॥

एकदा स कवीरस्तु काश्यां शिष्यान्गृहे गृहे।
प्रेषयामास सर्वेभ्यो वक्तव्यं मदुदीरितम्॥ 32॥

अद्याहं निजलोकं तु गमिष्यामि न संशयः।
ततो भवद्भिः क्षन्तव्यं मम दुर्विनयादिकम्॥ 33॥

[2](एवं वदत सर्वान्वै तावत्तु मणिकर्णिकाम्।
याम्यहं तत्र निःशङ्कं भवद्भिरपि गम्यताम्॥ 34॥)

इति श्रुत्वा वचस्तस्य गुरोः शिष्या द्रुतं ययुः।
सर्वानुक्त्वा गताः सर्वे मणिकर्ण्यां त्वरान्विताः॥ 35॥

कवीरोऽपि गतस्तत्र द्रष्टुं सर्वे समागताः।
कथं याति निजं लोकमिति विस्मितचेतसः॥ 36॥

[3]कवीरस्तानुवाचाथ परं पारं व्रजाम्यहम्।
तत्र गत्वा मरिष्यामि यदि भक्तिर्हि तारिणी॥ 37॥

मगधेऽपि तदा मोक्षो मे भविष्यति न संशयः।
ददामि प्रत्ययं युष्मान्सर्वसन्देहनाशनम्॥ 38॥

अहं जात्याभवं [4]म्लेच्छः कर्म्मणा वैष्णवोऽभवम्।
ततो ममास्य देहस्य कः संस्कर्ता भविष्यति॥ 39॥

इति विज्ञाय देहस्य भूततत्त्वगुणानहम्।
प्रविलाप्य गमिष्यामि देहो मिथ्येति बोधयन्॥ 40॥

इति श्रुत्वा वचस्तस्य सर्वे पारं गता जनाः।
अग्रे कृत्वा कवीरं तु द्रष्टुमाश्चर्यमुत्तमम्॥ 41॥

परं पारं कवीरस्तु गत्वा भूमौ निराकुलः।
सुष्वापो परिवस्त्रं स्वशिष्यै प्राच्छाद्य यत्नतः॥ 42॥

1. अक्षरामेति – ख, ग।
2. ख – मध्ये लुप्तपाठः।
3. तमुवाच – ख।
4. म्लेक्षः – ख।

अतीते घटिकायुग्मे वस्त्रं नीत्वा तु मामकम्।
गम्यतां निजगेहे वै स्थीयतां भक्तितत्परैः ॥ 43 ॥

इत्युक्त्वा शयितो भूमौ जातं च घटिकाद्वयम्।
शिष्या वस्त्रं समाहर्तुमुद्युक्तास्तत्र चागताः ॥ 44 ॥

द्रष्टुं कवीरदेहं च सर्वे तत्र समागताः।
अथ शिष्यास्तु तद्वस्त्रं जगृहुः पश्यतां नृणाम् ॥ 45 ॥

ददृशुस्तत्र तद्भूमौ न किमप्यद्भुतं महत्।
विलाप्य तत्त्वभूतानि कवीरोऽगात्परं पदम्[1] ॥ 46 ॥

एवं भक्तेस्तु माहात्म्यं को हि वर्णयितुं क्षमः।
क्व कुविंदः कवीरोऽसौ क्व तादृग्गमनं दिवि ॥ 47 ॥

तस्माद्भक्तिवशीभूतो भगवान्भक्तवत्सलः।
नाकर्तव्यं हि कुरुते[2] भक्तार्थं करुणामयः ॥ 48 ॥

इति श्रीभगवद्भक्तिमाहात्म्ये कवीरचरितं नाम चतुरशीतितमः। सर्गः ॥ 84 ॥

❊ ❊ ❊

पञ्चाशीतितमः सर्गः

॥ पीपाभक्तचरितम् ॥

पीपाभक्तस्य माहात्म्यं कथयामि यथाश्रुतम्।
महाश्चर्यप्रदं नृणां हरिभक्तिप्रदायकम् ॥ 1 ॥

नागरे नगरे वासीत् उत्तरे हस्तिनापुरे।
तत्र पीपेति नाम्नाभूद्राजा धर्मरतः शुचिः ॥ 2 ॥

देवीपूजां प्रकुर्वाणो देवीनाम जपन्सदा।
राज्यं शशास मुदितः पुत्रपौत्रसमन्वितः ॥ 3 ॥

निःकामः [3]संस्तुवन्देवीं पूजयामास भक्तितः।
ततो ज्ञानं ददौ तस्मै देवी संसारतारिणी ॥ 4 ॥

प्रतिज्ञैषा हि देव्यास्तु[4] यो निःकामो भजेन्माम्।
तारयिष्यामि तं दत्त्वा ज्ञानं योगिसुदुर्लभम् ॥ 5 ॥

---

1. एवम् – ख।
2. मनुते – ख।
3. सुनुयद्दे – क।
4. द्विजास्यास्तु – ख।

ततः सा प्रददौ तस्मै वै [1]राज्यं मुक्तिदायकम्।
तदा पीपानृपश्चित्ते सर्वं मिथ्येत्यमन्यत॥ 6॥

कदा मे दर्शनं विष्णोः स्यादित्येवं वरं हृदा।
प्रार्थयामास तां देवीं नान्यत्किञ्चिन्नृपोत्तमः॥ 7॥

ततः प्रसन्ना दुर्गा सा तन्मातृरूपधारिणी।
स्वप्ने प्रोवाच पीपास्त्वं शृणु मद्वचनं शुभम्॥ 8॥

देवतानां तु [2]मद्रूपदर्शनं दुर्लभं भुवि।
तथापि कृष्णसदृशस्तन्मायाकल्पितोऽपरः॥ 9॥

तव दृक्पथगो भावी स तेऽभीष्टं करिष्यति।
इति दृष्ट्वा तु स स्वप्ने प्रातरुत्थाय हर्षितः॥ 10॥

देवीं सम्पूज्य भवनादागतो रङ्गमण्डपे।
अथान्तरे समायाता रामानन्दस्य वैष्णवाः॥ 11॥

तान्दृष्ट्वा परमप्रीतः भोजयित्वाथ भूपतिः।
प्राहाहमपि भो भक्तो रामानन्दस्य सद्गुरोः॥ 12॥

शिष्यो भवितुमिच्छामि कथं शिष्यं करिष्यति।
इति तस्य वचः श्रुत्वा भक्ता [3]ऊचुर्नृपं तदा॥ 13॥

तत्र गच्छ महाराज त्वां शिष्यं स करिष्यति।
तव भाग्यवशात्तस्य यदि तादृङ्मनो भवेत्॥ 14॥

इति श्रुत्वा वचस्तेषां पीपा तान्प्राह वैष्णवान्।
प्रातर्यास्याम्यहं यूयं [4]प्रयाति गुरुसन्निधिम्॥ 15॥

इत्युक्तास्ते ययु[5]र्प्रातः रामानन्दस्य सन्निधौ।
पीपा चापि समुत्थाय प्रातराहूय मन्त्रिणः॥ 16॥

उवाच याम्यहं काशीमद्य सैन्यं नियोजय।
प्रेतेन द्वन्द्वयुद्धे निशि स्वप्ने पराजितः॥ 17॥

ततो भीतः प्रयास्यामि काशीं भो मन्त्रिणो द्रुतम्।
इत्युक्त्वा सैन्यसहितः प्रतस्थे काशिकां पुरीम्॥ 18॥

---

1. शस्यं – ख।
2. संदर्शतन् – ख, ग।
3. प्रोचुः – ख।
4. प्रयोग – ख, क।
5. सुप्तायाता – ख।

आगत्य काश्यां प्रययौ रामानन्दगृहान्तिके।
ततो द्वारि समागत्य स्थितः शिष्यैश्च वारितः ॥ 19 ॥

रामानन्दस्तु तच्छ्रुत्वा पीपायाति ममान्तिके।
नृपतिः शिष्यचक्रेण रामानन्दोऽब्रवीद्वचः ॥ 20 ॥

राजचिह्नानि सर्वाणि धृत्वा[1]यातु ममान्तिकम्।
श्रुत्वा चैवं ददौ सर्वं चामरव्यजनादिकम् ॥ 21 ॥

पुनराह नृपं शिष्यैः कूपे निपत[2] निर्भयः।
श्रुत्वैवं पतितुं तत्र कूपस्य निकटे गतः ॥ 22 ॥

निवारितस्तदा शिष्यै रामानन्देन शिक्षितैः।
आनीतस्तु तदा पीपा [3]रामानन्दस्य सन्निधिम् ॥ 23 ॥

श्रीकृष्णं भज साधूनां सेवनं भक्तितः कुरु।
इत्युक्तो नृपतिः पीपा प्रणम्य गुरुमब्रवीत् ॥ 24 ॥

एकदा मम दासस्य[4] गेहं गत्वा पुनीहि नः।
इति तद्वचनं श्रुत्वा स्वीचक्रे स गुरुस्तदा ॥ 25 ॥

पीपानृपः समायातः सेनया सहितो गृहम्।
तत्रागत्य हरेर्भक्तिं चक्रे स नृपसत्तमः ॥ 26 ॥

राज्यं पुत्राय दत्त्वा स मन्त्रिणो विनियुक्तवान्।
स्वयं तु वैष्णवैः सार्द्धं हरिभक्तिरतोऽभवत् ॥ 27 ॥

विक्षिप्तोऽयं बभूवेति प्रजाः सर्वा [5]बभाषिरे।
अथ संवत्सरे याते गुरुं पत्रमलीलिखित् ॥ 28 ॥

भवदागमनं चेत् स्यादहं स्यां पुण्यवान्नरः।
इति तत्पत्रमाकर्ण्य रामानन्दो दयान्वितः ॥ 29 ॥

कवीररविदासाद्यैः सहितस्तत्र चागतः।
आगच्छन्तं गुरुं ज्ञात्वा योजनोपरि भूपतिः ॥ 30 ॥

---

1. दत्वा – ख, ग।
2. विधन – ख।
3. तं तस्तु शिष्यमकरोद्रामानन्दौ दयान्वितः – ख।
4. दास्यं – ख।
5. अमन्यत् – ख।

आदाय शिविकां सैन्यैरग्रे गत्वा ननाम तम्।
गुरुं च बहु शिष्यांस्तु नमस्कृत्य मुदान्वितः ॥ 31 ॥

आरोप्य शिविकायां तं निनायाथ स्वमन्दिरम्।
संपूज्य भोजयामास भक्तिपूर्वं नृपोत्तमः ॥ 32 ॥

[1]उषित्वा द्वित्रिदिनानि गुरुरागन्तुमुत्सुकः।
ततः पीपा धनं भूरि दत्त्वाथ गुरवे मुदा ॥ 33 ॥

रविदासादिशिष्येभ्यो ददौ धनमनेकधा।
प्रस्थितं तं गुरुं पीपा [2]प्राह भक्तिसमन्वितः ॥ 34 ॥

त्वया सार्द्धमहं यामि त्यक्तं राज्यमिदं मया।
दृष्ट्वा तन्निश्चयं प्राह गुरुरागच्छ भूपते ॥ 35 ॥

श्रुत्वा गुरुवचः पीपा तत्कालं निर्ययौ गृहात्।
अथ पत्न्यः स्थितास्तस्य चलिता द्वादशापि ताः ॥ 36 ॥

अथ ता वारयामास[3] राजपत्नीः प्रयत्नतः।
[4]जग्मुः सर्वा गृहं तासां मध्ये सीता तु नो ययौ ॥ 37 ॥

त्यक्त्वा लज्जां स्थितवती पत्युरग्रेऽतिभक्तितः।
ततः पीपा गुरुं प्राह नाथ नेयमिहार्हति ॥ 38 ॥

प्रापयैनां गृहं चेति गुरुः श्रुत्वा द्विजाय वै।
प्राहैनां प्रापय गृहमिति श्रुत्वाथ सा [5]पुनः ॥ 39 ॥

गुरुं प्राह मरिष्येऽहं यदि मां न नयेदयम्।
ततो गुरुर्नृपं प्राह नयेमां साधुकारिणीम् ॥ 40 ॥

पुत्रीव वैष्णवानां नः समाजे स्थास्यति ध्रुवम्।
ततः सर्वे प्रचलिता द्वारकां द्रष्टुमुत्सुकाः ॥ 41 ॥

तत्र गत्वाथ ते सर्वे यात्रां कृत्वा विधानतः।
दत्त्वा दानान्यनेकानि चलिता निजमन्दिरम् ॥ 42 ॥

---

1. अथ – ख, ग।
2. माह – क।
3. चारयामास – क।
4. यग्मुः – ख, ग।
5. साधुनः – ख।

रामानन्देन सहिता वाराणस्यां त्वरान्विताः ॥ 43 ॥

इति श्रीभगवद्भक्तिमाहात्म्ये पीपाभक्तचरितं नाम पञ्चाशीतितमः सर्ग : ॥ 85 ॥

❊ ❊ ❊

षडशीतितमः सर्गः

॥ पीपाचरितम् ॥

अथ सर्वे समायाता द्वारिकातोऽथ वैष्णवाः ।
पीपास्तत्रैव सन्तस्थौ सीतया सह सुव्रतः ॥ 1 ॥

एकस्मिन् दिवसे नौकामारुह्योदधिमध्यगः ।
निपपातो नद्यौ द्वारवन्ती द्रष्टुमना मुदा ॥ 2 ॥

अथ श्रीभगवान्कृष्णो भक्तरक्षणतत्परः ।
विधाय तादृशं रूपं पीपाग्रे समुपस्थितः ॥ 3 ॥

दर्शयामास नगरीं द्वारकां भक्तवत्सलः ।
दर्शयित्वा हरिं प्राह पीपाभक्तं दयान्वितः ॥ 4 ॥

गच्छास्मात्त्वं बहिर्भक्त गृहीत्वेमान्तु मुद्रिकाम् ।
शङ्खचक्रगदापद्मलाञ्छितां पुण्यदां नृणाम् ॥ 5 ॥

इति श्रुत्वा वचस्तस्य न गच्छामीत्युवाच तम् ।
नृपंस्तमब्रवीत्कृष्णो न [1]कार्योऽयं दृढस्त्वया ॥ 6 ॥

कथयिष्यन्ति लोका वै भक्तो मग्नो मृतोऽम्भसि ।
द्वारावत्यामिति महान्कलङ्कः स्यत्ततो व्रज ॥ 7 ॥

ततो निमीलिताक्षस्तु श्रीकृष्णवचनान्नृपः ।
समुद्रतीरे शुष्काङ्ग[2] आययौ पश्यतां नृणाम् ॥ 8 ॥

तं वीक्ष्य सीता रुदती स्नेहात्पादौ निपत्य[3] सा ।
चक्रे महोत्सवं साध्वी लब्ध्वा मृतमिवागतम् ॥ 9 ॥

ततः कियद्दिनं स्थित्वा चलितः स्वगृहं प्रति ।
मार्गे म्लेच्छेन तत्पत्नी सीता सापहृताभवत् ॥ 10 ॥

---

1. कार्याय हठ – क।
2. शुष्कोग – क।
3. पपात ह – ख, ग।

ततस्तु भगवन्तं सा सस्माराति शुचाकुला।
तस्मिन्नेव क्षणे कृष्णो हयमारुह्य सत्वरम्॥ 11॥

धृत्वा खड्गमश्ववाहरूपं कृत्वा समागतः।
उवाच दूरादायाता वयं किं प्रकरोषि रे॥ 12॥

इति श्रुत्वा वचस्तस्य म्लेच्छस्तु प्रपलायितः।
अश्ववाहस्तु तां नीत्वा पीपान्तिकमुपागतः॥ 13॥

अश्ववाहं प्राह पीपा भवान् धन्यो न संशयः।
यदेनां विपिने दीनां चौरात्सन्त्रातवानसि॥ 14॥

इत्युक्त्वा प्राह सीतां स गच्छाद्यपि गृहं शुभे।
किं मया सह दुःखानि भोक्तुमिच्छसि[1] कानने॥ 15॥

इति श्रुत्वा वचः पत्युः सीता प्राहाति दुःखिता।
किं मुहुर्भाषसे नाथ न त्वां त्यक्ष्यामि कर्हिचित्॥ 16॥

भगवान्किन्नु मां रक्षेत्पश्याद्यैव यथाभवत्।
इत्युक्तस्तु तया पत्न्या ततोऽपि चलितो वने॥ 17॥

कियद्दुरे समागत्य व्याघ्रमेकं ददर्श सः।
मार्गमारुह्य तिष्ठन्तं व्यातास्यं भीषणाननम्॥ 18॥

दृष्ट्वा सीताति सन्त्रस्ता तामाश्वास्य नृपोऽब्रवीत्।
गत्वा समीपं व्याघ्रस्य निर्भयेनान्तरात्मना॥ 19॥

अहो व्याघ्र करोषि त्वं किमिदं कर्म्म गर्हितम्।
न[2] त्वं व्याघ्रः स्थितः पूर्वं कर्मणेमां दशाङ्गतः॥ 20॥

कतिधा त्वमभूद्राजा कतिधा पशुरप्यभूः।
इदानीं कर्मणा तेन व्याघ्रो भूत्वाद्य[3] मे स्थितः॥ 21॥

अतस्त्वं त्यज कर्मेदं शिष्यो भव ममाधुना।
शवमांसेन वृत्तिं स्वां यावज्जीवं कुरुष्व भोः॥ 22॥

---

1. मिच्छमि – ख।
2. स्वयं – क।
3. वने – क।

पश्येमां तुलसीमालां कण्ठे बध्नाम्यहं तव।
अद्यारभ्य प्राणिहिंसान्त्यज ते शपथो हरेः ॥ 23 ॥
इति श्रुत्वा ततो व्याघ्रो भूत्वा सौम्योऽथ तत्पदोः।
निपत्य चलितोऽरण्ये कृत्वा तस्य प्रदक्षिणम् ॥ 24 ॥
अद्यापि तद्वने व्याघ्राः सन्ति नैव भयानकाः।
मृतमांसं समश्नन्ति[1] घनन्ति नैव च जीविनम् ॥ 25 ॥
ततस्तस्मात्प्रचलितः पीपा बहिरुपागतः।
वनाद्ददर्श मार्गे तु मध्याह्ने जीर्णमन्दिरम् ॥ 26 ॥
तत्र गत्वा ददर्शैकं भक्तं श्रीधर[2]संज्ञितम्।
श्रीधरस्तु सपत्नीको दृष्ट्वा तौ मुदितस्त्वरम् ॥ 27 ॥
उत्थितो जलमादाय प्रक्षाल्य तत्पदम्बुजम्।
गृहीत्वा हस्तमानीय गेहे तावुपवेश्य च ॥ 28 ॥
एकान्ते पाकशालायां पत्नीमाह[3] करोमि किम्।
अद्य भिक्षापि नायाता किमावाभ्यां भोक्ष्यतेऽधुना ॥ 29 ॥
इति श्रीधरवाक्यं सा श्रुत्वा प्राहाथ तत्प्रिया।
अन्यत्किञ्चिन्न गेहेऽस्ति परिधानीयमस्ति मे ॥ 30 ॥
तद्ददामि गृहाण त्वं विक्रीयान्नं समानय।
भोजयेतौ त्वहं तावत्स्थास्यामि कोष्ठमध्यगा ॥ 31 ॥
इत्युक्त्वा सा ददौ वस्त्रं मुदा सोऽप्यगृहीच्च तत्।
गत्वापणे तद्विक्रीय त्वरितोऽन्नानि चानयत् ॥ 32 ॥
सीतामाह प्रसादाय कुरु पाकं यथारुचि।
आवाभ्यामपि तत्रैव भोक्तव्यं नात्र संशयः ॥ 33 ॥
इति श्रुत्वा ततः सीता शीघ्रं पाकमथाकरोत्।
जाते[4] पाके ततः पीपा श्रीधरश्चेत्युभौ पुनः ॥ 34 ॥

---

1. शमश्रावाश्नन्ति – ख, समन्यानीघ्नन्ति – क।
2. प्राह – ख, ग।
3. प्राह – ख ग।
4. याते – ख, ग।

अर्पयामासतुर्भक्त्या प्रसादं हरये मुदा।
अर्प्पयित्वा प्रसन्नात्मा पीपा प्राहाथ श्रीधरम्॥ 35 ॥

त्वमप्यागच्छ ते पत्नी क्व गतायातु सापि भोः।
चतुर्भिरपि भोक्तव्यं युगपच्चेति मे मतिः॥ 36 ॥

श्रुत्वा पीपावचः प्राह श्रीधरो विनयान्वितः।
भोक्तव्यं प्रथमं साधो युवाभ्यां नात्र संशयः॥ 37 ॥

भवद्भुक्तावशिष्टं तदावां भोक्ष्यावहे मुदा।
इति श्रुत्वा ततः सीता पाकस्थाद्बहिर्गता॥ 38 ॥

विचिन्वन्तीं श्रीधरस्य पत्नीं कोष्ठे ददर्श ताम्।
नग्नां निलीय तिष्ठन्तीं प्राह सीता किमित्यहो॥ 39 ॥

ततः श्रीधरपत्नी तामाहेदं कतिधा ह्यभूत्।
भक्तभोजनसिध्यर्थं नासीदङ्गेऽशुङ्कं मम। 40 ॥

ततः सीता स्ववस्त्रार्द्धं दत्त्वा तस्यै मुदान्विता।
बहिर्निष्कास्य[1] तत्पत्नीं सर्वे ते मुदिता भृशम्॥ 41 ॥

अथ सीता स्वमनसि चिन्तयन्ती मुहुर्मुहुः।
धन्योऽयं श्रीधरो धन्या तस्येयं वल्लभा सती॥ 42 ॥

यदेवं दुर्दशां प्राप्ता साधून्भोजयती मुदा[2]।
का मे भक्तिर्यदस्या वै भक्तिलेशोऽस्ति मे नहि॥ 43 ॥

इति चिन्त्यमाना सा [3]पतिं वृत्तान्तमब्रवीत्।
श्रुत्वा पीपा अपि तथा चिन्तयामास भूरिशः॥ 44 ॥

प्राह पत्नीं कथं चास्य कुर्यामुपकृतिं पुनः।
सीता प्राह पतिं नाथ यद्वक्ष्यसि करोमि तत्॥ 45 ॥

सीतां प्राह ततः पीपा ह्रदं गत्वा यथारुचि।
अन्यायेनार्पितं प्राप्य धनमस्मै समर्प्यय॥ 46 ॥

अहं तत्रैव गच्छामि भूत्वा कर्म्मकरः पुनः।
वेतनादिकमादाय दास्याम्यस्मै न संशयः॥ 47 ॥

---

1. र्निष्क्रम्य – क।
2. सदा – ख।
3. व्रतातम् – ख।

इत्युक्त्वा स गतः क्वापि सीता हट्टमुपागमत्।
भाग्यवद्वणिजो द्वारि तस्थावन्नादिसन्निधौ॥ 48॥

तां दृष्ट्वा स वणिक् प्राह का त्वं कमललोचने।
राजपुत्रीव मे भासि[1] स्वैरिणीव किमागता॥ 49॥

दृश्यतेऽन्यो न ते कश्चित्त्वं वैश्येति मे मतिः।
किं जिघृक्षसि तद्ब्रूहि गृहाणान्नादिकं पुनः॥ 50॥

इत्युक्त्वा प्रददौ वैश्यो वस्त्रमन्नादिकं बहु।
विससर्ज्ज प्रणम्याथ सीता नोवाच किञ्चन॥ 51॥

गृहीत्वा सर्वमन्नादि श्रीधरस्य गृहे गता[2]।
ददौ तस्मै स पीपा तु न लभेद्वेतनं तदा॥ 52॥

भिक्षामादाय चान्नादिवस्त्रं चापि मनोरमम्।
श्रीधरस्य गृहे दत्त्वा तस्थौ तत्र कियद्दिनम्॥ 53॥

एकस्मिन् दिवसे पीपा स्नातुं[3] गच्छन्नचिन्तयत्।
कथमस्य धनं भूरि दत्त्वा यास्याम कुत्रचित्॥ 54॥

अथापश्यद्घटं ताम्रं मुद्रितास्यं नवं दृढम्।
गत्वोद्घाट्य ददर्शासौ स्वर्णमुद्राप्रपूरितम्॥ 55॥

तथैव स्थापयामास परवित्तमिति स्मरन्।
स्नात्वागत्य विसस्मार दिने रात्रौ तु तं स्मरन्॥ 56॥

उवाच सीतां स्नानार्थं गतोऽहं सरिदन्तिके।
घटमेकमपश्यं वै स्वर्णमुद्राप्रपूरितम्॥ 57॥

दृष्ट्वा तथैव संस्थाप्य परस्वादानभीतितः।
आगतोऽहं दिवेदानीं स्मृतिर्मे समुपागता॥ 58॥

इति सर्वं गृहाद्बाह्ये स्थितः शुश्राव तत्परः।
गत्वा तत्राद्भुतं तस्य मुखमुद्घाट्य[4] दृष्टवान्॥ 59॥

महासर्प्पं ततः शीघ्रं मुद्रयित्वाति यत्नतः।
क्रोधाच्छ्रीधरभक्तस्य पीपाशयनमन्दिरे॥ 60॥

---

1. भाति – ख, ग।
2. राजा – ख, ग।
3. स्नानं – क।
4. मुद्वाथ – क, ख।

छिद्रं कृत्वोपरिष्टात्तु पातयामास तं घटम्।
घटे निपतिते पीपा प्राह सीतां घटस्तु सः ॥ 61 ॥

द्रव्यपूर्णो न सन्देहः श्रीधरं कथयाधुना।
ततः सीता सपत्नीकं श्रीधरं प्रातरानयत् ॥ 62 ॥

तं घटं प्रददौ पीपा श्रीधराय वदन्मुदा।
भवदर्थं घटमिदं दत्तवान्भगवान् हरिः ॥ 63 ॥

गृहाण भुंक्ष्व साधुभ्यो देहि साधो व्रजाम्यहम्।
इत्युक्तः चलितः पीपा वारितोऽपि न संस्थितः ॥ 64 ॥

अथश्रीधरभक्तस्तु अनुवव्राज तं रुदन्।
स्थित्वा निर्वर्त्तयामास पीपास्तं श्रीधरं रुदन् ॥ 65 ॥

इति श्रीभगवद्भक्तिमाहात्म्ये पीपाचरितं नाम षडशीतितमः सर्गः ॥ 86 ॥

❊ ❊ ❊

सप्ताशीतितमः सर्गः

॥ पीपाचरितम् ॥

अथ पीपा समागच्छन्मार्गे राजाति भक्तिमान्।
शूरसेन इति ख्यातस्तस्थौ तन्नगरे मुदा ॥ 1 ॥
गते दिनत्रये राजा शुश्राव तं समागतम्।
अनपत्यो द्रष्टुकामः पीपासन्निधिमागतः ॥ 2 ॥
दृष्ट्वा तं प्रणिपत्याह नाथ शिष्यो भवाम्यहम्।
इति श्रुत्वा वचस्तस्य पीपा तं प्राह भूपतिम् ॥ 3 ॥
ममाज्ञां कुरुषे त्वं च तदा शिष्यं करोम्यहम्।
इत्युक्तः स्वीचकारासौ गुर्वाज्ञां[1] करवाण्यहम् ॥ 4 ॥
ततः पीपा नृपं प्राह धनमर्प्पय मेऽखिलम्।
तुभ्यं समर्पितं सर्वमित्युवाच नृपस्तदा ॥ 5 ॥
पत्नीमानय चात्रेति श्रुत्वा निन्ये तदा सतीम्[2]।
पीपा भक्ताय च ददौ ततः पीपा उवाच तम् ॥ 6 ॥

---

1. कुर्वाज्ञां – ख।
2. सतां – क।

इदं मदीया पुत्रीव जाता तिष्ठतु चात्र भोः।
निर्लज्जा साधुसदसि स्वीचकार तदाप्यसौ ॥ 7 ॥

ततो राजजनाः सर्वे [1]क्रोधसंरक्तलोचनाः।
निनिन्दुर्नृपतिं चातो विक्षिप्तोऽयं न संशयः ॥ 8 ॥

ततो मन्त्रं ददौ राज्ञे संसारार्णवतारकम्।
उपदेशानथोवाच यत्किञ्चित्प्रकरोषि भोः ॥ 9 ॥

सर्वं कृष्णार्पितं कृत्वा सुखी भव निरामयः।
पुत्रवत्पालय जनान् नीतिं नोल्लङ्घय क्वचित् ॥ 10 ॥

हरौ भक्तिं सतां सङ्गसेवनं सर्वदा कुरु।
गृहाणेमां धर्मपत्नीं कुरु राज्यमकण्टकम् ॥ 11 ॥

एवं विसृष्टो गुरुणा राजा धनमथार्प्पयत्।
गुरवे न स जग्राह पीपा निस्पृहतां [2]गतः ॥ 12 ॥

अथ राजा गुरुं नत्वा जगाम निजमन्दिरम्।
पीपा तत्रैव कतिचिद्दिनानि स्थितवान्मुदा ॥ 13 ॥

एकदा वृषभान् क्रेतुं वणिगेकः समागतः।
तं प्राहुर्विहसन्तस्ते ग्रामीणा दुर्जना वचः ॥ 14 ॥

पीपा नामास्ति भक्तोऽत्र वृषभाः सन्ति तस्य वै।
सदास्य निरतस्तत्र गच्छ त्वं नात्र संशयः ॥ 15 ॥

इति श्रुत्वा वचस्तेषां धूर्तानां स वणिक् तदा।
पीपासमीपमागत्य प्रोवाच विनयान्वितः ॥ 16 ॥

सद्योऽहं वृषभाकाङ्क्षी वणिगत्र समागतः।
ग्राम्यैरुक्तं भवन्नाम तस्मात्त्वं देहि मे वृषान् ॥ 17 ॥

[3]मूल्यं तेषां गृहाण त्वं यथोचितमिदं प्रभो।
पीपा श्रुत्वा वचस्तस्य वैश्यस्योवाच सस्मितम् ॥ 18 ॥

अहो मे वृषभास्सन्ति सत्यं नास्त्यत्र संशयः।
सायं तेऽत्रागमिष्यन्ति ग्रहीष्यति ततो भवान् ॥ 19 ॥

---

1. संयुक्त – क, ग। 2. रतः – ख, ग।
3. मुल्यं – ग।

इत्युक्तः स वणिक् तस्थौ क्वचित्पीपा गृहे गतः।
सस्मार भगवन्तं स महाचिन्ता परोऽभवत्॥ 20॥
सायंकाले समायाते वृषभानति दुर्दमान्।
नीत्वैको वैष्णवः पीपागृहद्वारि समागतः॥ 21॥
दृष्ट्वा तान्वृषभान् पीपा वैश्यं हर्षात्समाह्वयत्।
आगताय विशे तस्मै वाञ्छितान्वृषभान्ददौ॥ 22॥
मूल्यं जग्राह तेषां तु वृषवाहं तु वैष्णवम्।
सम्पूज्य परया भक्त्या विससर्जाति हर्षितः॥ 23॥
तत्कालं स तु पीपा वै ग्रामीणान् समुपाह्वयत्।
साधूनसाधून् सर्वान्वै तद्द्रव्यमुत्तमम्॥ 24॥
अहो मे वृषभा नीता वणिजैकेन साम्प्रतम्।
दत्तं मूल्यमिदं तद्वै युष्मभ्यं प्रददाम्यहम्॥ 25॥
इत्युक्त्वा प्रददौ तेभ्यो धनं तेऽप्यतिविस्मिताः।
तुष्टवुस्तं महाभक्तमाश्चर्य्यं परमं गताः॥ 26॥
एकदा स तु पीपा वै स्नातुं [1]नद्यां क्वचिद्गतः।
राजदत्ताश्वमारुह्य तत्र बध्वा क्वचित्ततः॥ 27॥
स्वयं स्नातुं गतो नद्यां धूर्तास्तद्ग्रामवासिनः।
चोरयित्वाश्वमानीय[2] बबन्धुर्निजवेश्मनि॥ 28॥
स्नात्वा गन्तुमना पीपा अश्वं तत्र ददर्श ह।
तादृशं तु तथा बद्धं तमारुह्यागतो गृहम्॥ 29॥
अथ ते दुर्जना[3] दृष्ट्वा तमारुह्यायमेति[4] किम्।
गत्वा गृहे तमश्वं तु बद्धं सन्ददृशुस्तथा॥ 30॥
मुहुरेवं सनिश्चित्य नीत्वा तं घोटकं जनाः।
पीपासमीपमागत्य प्रार्थयन्तोऽब्रुवन्वचः॥ 31॥
अहोऽस्माभिश्चोरयित्वा नीतोऽयं घोटकस्तव।
गृहाणेमं महासाधो क्षम्यतां दुर्जयोऽत्र[5] नः॥ 32॥

---

1. दूरे – क, ख।
2. समानीय – क, ख।
3. दुर्जनां – क।
4. प्रायाति किम् – ख।
5. दुर्न्नधो मम – ख।

ततस्तूभौ हयौ पीपा राज्ञे शीघ्रं समर्प्पयत्।
राजा श्रुत्वा तु तत्सर्वं विस्मितो भक्तिमानभूत्॥ 33 ॥

एकदा स तु कुत्रापि गत उक्तां प्रियां प्रति।
सायमेष्यामि सीते त्वं मध्याह्ने समुपागतान्॥ 34 ॥

भोजयिष्यसि सर्वान् वै कृत्वा कर्मापि निन्दितम्।
इत्युक्त्वा स गतः पीपा मध्याह्ने समुपागते॥ 35 ॥

आगताः साधवः पीपागृहे क्षुत्तृष्प्रपीडिताः।
सीता दृष्ट्वा तु तान्सर्वान् मुदा दत्त्वा जलादिकम्॥ 36 ॥

स्वयं जगाम हट्टायां कस्यचिद्वणिजो गृहे।
पतिवाक्यमनुस्मृत्य साध्वी प्राह वणिग्जनम्[1] ॥ 37 ॥

साधवो मे समायातास्तिष्ठन्ति बहुभुक्षिताः।
देहि तद्भोजनाय त्वं तण्डुलादिकमुत्तमम्॥ 38 ॥

इति श्रुत्वा वचस्तस्या दृष्ट्वा तामतिसुन्दरीम्।
उवाच गृह्यतां सर्वमागमिष्यसि चेन्निशि॥ 39 ॥

इत्युक्ता साप्युवाचाथ देहि चान्नं तवान्तिकम्।
आगमिष्यामि रात्रौ तु [2]सत्यमेतद्ब्रवीम्यहम्॥ 40 ॥

इत्युक्तः स तु सीतायै ददावन्नमनुत्तमम्।
सीता गृहीत्वा तत्सर्वं समायाता निजं गृहम्॥ 41 ॥

पक्वा तान्भोजयामास बुभुजेऽन्नं स्वयं तु तत्।
[3]तादृशं तु पणं कृत्वा यदानीतं वणिक् गृहात्॥ 42 ॥

अथ भुक्ता गताः सर्वे सायं पीपा समागतः।
फलमूलादिकं तस्मै भोजयामास भक्तितः॥ 43 ॥

स्वयं भुक्त्वा ततः सीता पतिं प्राह यथाकरोत्।
श्रुत्वा तद्वचनं पीपा प्राह गच्छ द्रुतं शुभे॥ 44 ॥

स्वीकृत्याहं समेष्यामि न यास्यामि पुनर्यदि।
तदा महानधर्म्मः स्यात्तस्माद् गच्छ तदन्तिकम्॥ 45 ॥

---

1. उवाच वणिजं साध्वी पतिवाक्यमनुस्मरन् – ख, ग।
2. सायमेतद् – ख, ग।
3. त्वार्पणं – क।

इति पत्युर्वचः श्रुत्वा गमनायोपचक्रमे।
तदावृष्टिः समायाता सीता प्राह करोमि किम्॥ 46॥

तदा पीपा प्रियां वस्त्रैराच्छाद्य स्वयमेव हि।
प्रापयामास वणिजो गेहे सीतां महासतीम्॥ 47॥

स्वयं तु वणिजो द्वारि स्थितस्तां प्रापयन्गृहम्।
दृष्ट्वा तां तु वणिक् प्राह कथं वृष्टौ समागता॥ 48॥

अनार्द्रवस्त्रदेहा त्वमिति श्रुत्वाब्रवीद्वचः।
[1]पतिर्मां वाससाच्छाद्य प्रापयित्वास्ति ते बहिः॥ 49॥

इति श्रुत्वा वचस्तस्या बहिरागत्य दृष्टवान्।
पीपां [2]स्वतातरूपं च सन्दिहानो गतो गृहे॥ 50॥

ततः सीतां स्वजननीं ददर्श स वणिक् तथा।
महासन्देह[3]पाथोधौ निमग्नो मनसावदत्॥ 51॥

अहो मे पितरौ काले मृतौ केयं च कश्च सः।
एवं मुहुर्बहिर्गत्वा समागत्य गृहं पुनः॥ 52॥

न निश्चेतुं शशाकासौ तदा भूत्वा भयातुरः।
सीताया मातृरूपिण्याः पपात चरणाब्जयोः॥ 53॥

उवाच गच्छ मातस्त्वं क्षन्तुमर्हसि मत्कृतम्।
ततः पीपा समागत्य वणिजं प्राह हृष्टवत्॥ 54॥

वैश्यान्नं तव नीत्वेयं गता स्वीकृत्य यद्वचः।
तत्र तेनैव दोषोऽस्तीत्युक्तः प्राह वणिक् रुदन्॥ 55॥

त्वं पितेयं तु जननी सत्यं पश्यामि तादृशौ।
क्षमश्च[4] तात बालस्य तवैवान्नादिकं त्विदम्॥ 56॥

गच्छ स्वभवनं साधो कृपां कुरु ममोपरि।
इति वैश्यवचः श्रुत्वा पीपा पत्न्या समागतः॥ 57॥

[5]निजगेहं तदा प्रातः स वणिक् समुपागतः।
पीपां गृहे मुहुर्नत्वा जगाम स्वगृहे पुनः॥ 58॥

---

1. सां – ख, ग।
2. सृजात – क।
3. पापो – क।
4. स्वतान् – क।
5. निजगृहम् – ख, ग।

एवं सेवापरं तं तु वणिजं भक्तिसंयुतम्।
कालेन चाकरोच्छिष्यं पीपा सोऽप्यतिवैष्णवः ॥ 59 ॥

बभूव भक्तमाहात्म्यात्साधुसेवनतत्परः।
पीपा तु स्वगृहं गत्वा पत्न्यासाकं स्थितोऽभवत् ॥ 60 ॥

इति श्रीभगवद्भक्तिमाहात्म्ये पीपाचरितं नाम सप्ताशीतितमः सर्गः ॥ 87 ॥

* * *

अष्टाशीतितमः सर्गः

॥ पीपाभक्तिचरितम् ॥

श्रुत्वेदं सकलं राजा सीतावृतान्तमद्भुतम्।
शूरसेनश्चुकोपाथ पौरानाज्ञपयत्तदा ॥ 1 ॥

पीपा गुरुर्मे सीता तु मम माता न संशयः।
तां चाभक्त्या वीक्ष्यमाणः प्रवदन् यः स दण्डभाक् ॥ 2 ॥

इत्याज्ञां प्रददौ सर्वान्पीपा श्रुत्वा नृपान्तिके।
गत्वा प्रोवाच राजानं पत्नी तेऽस्त्यपुत्रिणी ॥ 3 ॥

तामानय ममाग्रे चेत्युक्तः स नृपतिः स्वयम्।
जगाम पत्नीं प्रोवाच गुरुर्मेऽत्रागतोऽस्ति वै ॥ 4 ॥

[1]त्वां द्रष्टुकामः शीघ्रं त्वं तत्रागच्छ मया सह।
इत्युक्त्वा स तया सार्धं गुरोरन्तिकमागमत् ॥ 5 ॥

तावत् पीपा व्याघ्ररूपो बभूवाति भयङ्करः।
दृष्ट्वा व्याघ्रं महाघोरं सर्वे तत्र पलायिताः ॥ 6 ॥

राजा तु कम्पमानः सन्तस्थौ राज्ञी तु निर्भया।
व्याघ्रस्यापि पुरस्तस्थौ व्याघ्रोऽप्यन्तर्दधे क्षणात् ॥ 7 ॥

राज्ञः क्रोडे बभूवैकः सद्यो जातोऽथ बालकः।
पीपा स्वयं स्वरूपेण प्रादुर्भूयाब्रवीन्नृपम् ॥ 8 ॥

राजन् तवैकपत्नीयं सुभगाति पतिव्रता।
अपुत्रिणीति ज्ञात्वा मे महाशोको बभूव ह ॥ 9 ॥

---

1. तां – क।

ततस्तु भगवान् तुभ्यं पुत्रमेकं ददौ स्वयम्।
तं गृहाण सुतं राजन् तव वंशकरं शुभम्॥ 10॥

इति श्रुत्वा ननन्दाथ राजा[1] राज्ञी च तौ मुदा।
प्रणिपत्य गुरोः पादे चक्रतुस्तौ महोत्सवम्॥ 11॥

पीपा स्वगृहमागत्य तस्थौ सीतासहायवान्।
श्रीकृष्णं मनसा ध्यायन् पूजयन् वैष्णवान् मुदा॥ 12॥

एवं कर्मभिरत्युग्रैः प्रसिद्धोऽभूच्च तत्र सः।
पीपाभक्तिः प्राणिमात्रे तदा तत्रत्यवैष्णवाः॥ 13॥

पीपापरीक्षां कर्तुं वै समायाताश्च धूर्तवत्।
तं चैकत्र गृहं गत्वा तत्रोषुः कपटान्विताः॥ 14॥

एकस्मिन् दिवसे सायं तेषामेकः समागतः।
पीपां प्राहातिथिस्तेऽहमस्यां रात्रौ प्रियामिमाम्॥ 15॥
मह्यं देहि पुनः प्रातस्तवैवाहं ददामि ताम्।
इति श्रुत्वा वचस्तस्य पीपा चातीव हर्षितः॥ 16॥

स्वीकृत्य पत्नीं प्राहाशु [2]सीतेऽनेन सह व्रज।
अस्यां रात्रौ पतिस्तेऽयं यद्वदिष्यति तत्कुरु॥ 17॥

इति श्रुत्वा पतिवचः सीता तत्कालमुत्थिता।
तं भक्तमनुवव्राज निर्गत्य स्वगृहाद्बहिः॥ 16॥

गतः स धूर्तो भक्तस्तु विसस्मार गृहं स्वकम्।
गृहमार्गं च सर्वत्र ददर्श जनसंकुलम्॥ 19॥

एवं बभ्राम नगरे समस्तां रजनीं जडः।
उषाकाले परिश्रान्तः पीपाद्वारे समागतः॥ 20॥

ततः प्रातरभूत् सीता प्राह तं कपटान्वितम्।
रात्रिरेषा गता साधो! द्वितीयमिदमस्त्यहः॥ 21॥

नातः पत्नी तवाहं भोः क्षम्यतां याम्यहं गृहम्।
इति श्रुत्वा स भक्तस्तु लज्जमानमुखः स्थितः॥ 22॥

---

1. राज्ञा – क। 2. मुनीते – क, ख।

सीता जगाम भवनं पत्ये प्राहतिहर्षिता।
बहिः सोऽपि समागत्य तं भक्तं प्राह सान्त्वयन्॥ 23॥

किमुदासीनवत्त्वं हि दृश्यसे भक्तसत्तम।
तवोक्तमनया किन्तु न कृतं तद्वदस्व मे॥ 24॥

इति पीपावचः श्रुत्वा भक्तोऽतीवसुलज्जितः।
साष्टाङ्गं प्रणिपत्याह क्षम्यतां मे महागुरो॥ 25॥

ततः स लज्जितो भूत्वा गतो यत्र तु ते स्थिताः।
वैष्णवांस्तान्समाचष्ट निशि स्वभ्रमणादिकम्॥ 26॥

नामन्यन्त ततस्ते तु सर्वे पीपागृहं [1]ययुः।
सांयकालेऽब्रवुन् सर्वे परीक्षां कर्तुमागताः॥ 27॥

अहो ते गृहिणीं सीतां दृष्ट्वा चातीव सुन्दरीम्।
व्यथते नो [2]मनोऽतोऽद्य भोक्तुमिच्छामहे च ताम्॥ 28॥

इति श्रुत्वा वचस्तेषां पीपा प्राहाति हर्षितः।
सीते त्वया रन्तुकामा आगताः साधवस्त्विमे॥ 29॥

तस्मादेतैः रमस्वास्यां रात्रौ मम वचो बलात्।
कुरुष्व सर्वशृङ्गारं यथैषां स्याद्रतिः परा॥ 30॥

इति श्रुत्वा वचः पत्युः कृत्वा शृङ्गारसाधनम्।
गेहे गत्वा स्थिता पश्चात्तेपि गन्तुं समुत्सुकाः॥ 31॥

गता तद्गृहदेहल्यां ददृशुस्तां महासतीम्।
व्याघ्रीं व्यात्ताननां घोरां दृष्ट्वा ते प्रपलायिताः॥ 32॥

ततः पीपा तानुवाच भवन्तो विद्रुताः कथम्।
सा [3]सीतैव न सन्देहो यूयं गच्छत वै गृहम्॥ 33॥

इति [3अ]श्रुत्वा पुनस्ते तु तद्गृहद्वारमागताः।
अथ सीता समुत्थाय तदग्रे गन्तुमुत्सुका॥ 34॥

ततस्ते भयसंत्रस्ता हा हा कृत्वा प्रदुद्रुवुः।
पीपाभक्तस्य चरणौ धृत्वा त्राहीति चाब्रुवन्॥ 35॥

---

1. ययौ – क, ख।
2. मनोऽद्य तां – ख, क।
3. मीनैव – क।
3अ. तेषा – ख, ग।

[1](पीपा तानभयं दत्त्वा नीत्वा साकं गृहं ययौ।
सा तु तां दर्शयामास तस्मिन्गेहे व्यवस्थिताम्॥ 36॥)

ततस्तेऽपि च तां सीतां प्राहु मातः क्षमस्व नः।
अज्ञानात्तु परीक्षार्थमागता वयमत्र वाम्॥ 37॥

तत्क्षन्तव्यं युवाभ्यां नो वयं शिष्या न संशयः।
इति श्रुत्वा वचस्तेषां पीपा प्राहाति भक्तिमान्॥ 38॥

कोऽहं केयं सती रात्रौ यया[2] भक्तेः परीक्षणम्।
कर्तुमागतवन्तस्तु भवन्तो भगवत्प्रियाः॥ 39॥

आवां धन्यौ परीक्षार्थमागतानां सतां हि नः।
दुर्लभं दर्शनं जातमावयोर्नात्र संशयः॥ 40॥

इति पीपावचः श्रुत्वा सर्वे ते वैष्णवा जनाः।
स्तुवन्तः स्वालयं जग्मुर्निन्दतः स्वकृतं मुहुः॥ 41॥

एवं पीपा नृपो जातो भगवद्भजनात्कलौ।
महासिंहो वैष्णवानां मुख्यो भक्तिप्रसादतः॥ 42॥

तस्माद्भक्तिसमं किञ्चिन्नास्ति संसारतारकम्।
इति ज्ञात्वा सदा धीमान् भगवद्भक्तिमाचरेत्॥ 43॥

इति श्रीभगवद्भक्तिमाहात्म्ये पीपाभक्तिचरितं नामाष्टाशीतितमः सर्गः॥ 88॥

❊ ❊ ❊

एकोननवतितमः सर्गः

॥ धन्नाभक्तचरितम्॥

अथापरं प्रवक्ष्यामि भक्तिमाहात्म्यमुत्तमम्।
महाश्चर्य्यप्रदं नृणां सद्यो भक्तिप्रदायकम्॥ 1॥

आसीद्वै मथुराप्रान्ते आमीरकुलसंभवः।
धन्ना नाम्नाति सरलो गोप्रचारणतत्परः॥ 2॥

पितृमातृयुतः पुत्रभार्य्याभ्यामपि संयुतः।
प्रातरुत्थाय गां नीत्वा चारयित्वा दिवा वने॥ 3॥

---

1. ख मध्ये लुप्तः पाठः।
2. पयो – क।

सायं स्वगृहमानीय निशि सुष्वाप नित्यशः।
एवं तस्य तु गोपस्य गतमर्द्धं वयो मुदा॥ 4॥

एकदा तस्य द्वारे तु द्विज एकः समागतः।
स्नानपूजादिकं कर्तुं विचिन्वन्स्थलमुत्तमम्॥ 5॥

दृष्ट्वा गोष्ठं [1]धन्नाद्वारे तस्थौ तत्र द्विजोत्तमः।
उपलिप्य स्थलं तत्र चक्रे विष्णोः प्रपूजनम्॥ 6॥

धन्ना गोपस्तु तद्दृष्ट्वा शालग्रामशिलार्च्चनम्।
संकल्पयामास चित्ते [2]पक्षेऽहमपि चेदृशम्॥ 7॥

इति कृत्वा मनो गोपो दधिदुग्धं घृतं गृहात्।
महाभक्त्या समानीय ब्राह्मणाय ददौ मुदा॥ 8॥

भुक्त्वा प्रस्थातुमुद्यते विप्रे गोपोऽब्रवीद्वचः[3]।
कृताञ्जलिपुटो भक्त्या प्रणम्य विनयान्वितः॥ 9॥

ब्रह्मन्नेकं तु मे देहि भगवन्तं कृपां कुरु।
पूजयिष्याम्यहमपि लग्नं चातीव मे मनः॥ 10॥

एवं पुनः पुनः प्राह भूत्वा विप्रोऽपि तद्वशः।
अर्पयत् प्रस्तरं त्वेकं स्थितं तस्मै[4] ददौ हसन्॥ 11॥

गृहीत्वा प्रस्तरं गोपः प्रणिपत्य मुहुर्मुहुः।
हृदि संयोज्य नेत्रे च वस्त्रखण्डे बबन्ध तत्॥ 12॥

विप्रवत्स्वगले बध्वा स्वगाश्चारयितुं गतः।
गृहीत्वा रोटिकादीनि भोक्ष्ये तत्रेति चिन्तयन्॥ 13॥

गत्वा वने नदीतीरे स्नात्वा पुष्पाणि चानयत्।
पत्रे तत्प्रस्तरं धृत्वा पूजयित्वा जलादिना॥ 14॥

रोटिकाः खण्डशः कृत्वा शाकं दत्त्वा च भक्तितः।
प्रस्तराग्रे निवेद्याथ वस्त्रेणाच्छाद्य चाब्रवीत्॥ 15॥

अहो भुंक्ष्वेदमन्नं मे भगवन्स्त्वां नमाम्यहम्।
इत्युक्त्वा वस्त्रमुद्घाट्य ददर्शाभुक्तमेव तत्॥ 16॥

---

1. धन्ना द्वारि – ख, ग।
2. वक्ष्ये – क।
3. ब्रवीद्धन्ना – ख।
4. तत्प्र – ख, ग।

तदामन्यत दुग्धादि नास्ति तस्माद्भुनक्ति न।
ततोऽब्रवीत् प्रभो दुग्धं दधि प्रातर्भविष्यति॥ 17॥

अद्य नासीद्गृहे सत्यं कथयामि न संशयः।
तस्माद्भुंक्ष्व महाराज क्षुत्तृड्भ्यां[1] पीडितोऽस्म्यहम्॥ 18॥

इत्युक्त्वा च पुनर्ज्ञात्वा भुक्तं नैव च किञ्चन।
तदा मेने न मे स्नानं प्रायः सम्यग्बभूव ह॥ 19॥

इति सञ्चिन्त्य सुस्नातो मृदा तिलकमाहरत्।
तत आगत्य वस्त्रेण संच्छाद्यान्नमुवाच तम्[2]॥ 20॥

अहो भुंक्ष्व हरे नाथ शपथस्ते ममाधुना।
इत्येकाग्रमना भूत्वा प्रार्थयामास भक्तितः॥ 21॥

ततः श्रीभगवान्कृष्णो भक्तानुग्रहतत्परः।
प्रस्तराद्बुभुजे [3]तदाविर्भूय कृपामयः॥ 22॥

बिभ्रद् गोपालस्य बालस्य रूपं चाति मनोहरम्।
कृष्णभुक्तावशिष्टं तु तदन्नं बुभुजेऽधुना॥ 23॥

एवं कतिपयैरब्दैः जातः स ब्राह्मणोत्तमः।
कालान्तरे धनागेहे पुनर्विप्रः स आगतः॥ 24॥

धन्ना दृष्ट्वा तु तं विप्रं साष्टाङ्गं प्रणनाम ह।
उवाच विप्र धन्योऽसि सम्यग्दत्तो हि मे प्रभुः॥ 25॥

वने भुङ्क्ते मया साकं गाश्चारयत्यलम्।
तस्मात्त्वं ब्राह्मणश्रेष्ठ यदिच्छसि करोमि तत्॥ 26॥

इति श्रुत्वा महाश्चर्यं [4]धन्नां प्राह द्विजोत्तमः।
शपथं कुरु मे गोप करिष्यसि मदीरितम्॥ 27॥

तदाहं कथयिष्यामि स्वाभीष्टं ते न संशयः।
इति श्रुत्वा धन्ना प्राह शपथस्ते गुरोर्मम॥ 28॥

करिष्यामि वचस्तेऽहं न सन्देहं कुरु प्रभो।
इति श्रुत्वा वचस्तस्य विप्रः स्वाभीष्टमाह तम्॥ 29॥

---

1. ख मध्ये लुप्तः पाठः
2. ह – ख, ग।
3. धि – क।
4. वचः – ख, ग।

यदायाति हरिः भोक्तुं त्वया साकं वने तदा।
तं मां दर्शय गोपालबालवेषं[1] मम [2]प्रियम्॥ 30॥

इति श्रुत्वा धन्नाः प्राह प्रातस्तत्कथयाम्यहम्।
ततस्त्वां दर्शयिष्यामि तं प्रभुं नात्र संशयः॥ 31॥

इत्युक्त्वा स गतः प्रातर्वने गाश्चारयन् धन्नाः।
समर्प्यान्नं भोजयित्वा गोपालमिदमब्रवीत्॥ 32॥

नाथागतो गुरुर्मेद्य त्वां द्रष्टुं सोऽभिवाञ्छति।
धन्ना वचनमाकर्ण्य भगवान् गोपवेषधृक् ॥ 33॥

उवाच नैवं वक्तव्यं विहरस्व यथारुचि।
शालग्रामस्वरूपेण स मां पश्यति नित्यशः॥ 34॥

इति गोपालवचनं श्रुत्वा प्राह धना पुनः।
अहो मया कृतस्तस्य शपथो नात्र संशयः॥ 35॥

भवतो दर्शनं तस्य यदि न स्यात्तदा मम।
गुरुद्रोहसमं सम्प्राप्य जीवनेन किम्॥ 36॥

तस्मात्त्वं दर्शनं देहि तस्मै श्रीगुरवे मम।
नोचेदद्य मरिष्यामि तवाग्रे नात्र संशयः॥ 37॥

इति भक्तवचः श्रुत्वा गोपालः पुनरब्रवीत्।
त्वं मा शुच ध्रुवं[3] तस्य दर्शनं मे भविष्यति॥ 38॥

त्वदर्च्चासमये दूरे समागत्य स वै द्विजः।
सम्मुखे संस्थितो भूत्वा मां पश्यतु न संशयः॥ 39॥

इति श्रुत्वा वचस्तस्य मुदितोऽभूद्धनाद् भृशम्।
आगत्य भवने रात्रौ गुरुं प्राह तदीरितम्॥ 40॥

अथ प्रातर्धना गत्वारण्ये गाश्चारयन्मुदा।
मध्याह्ने पूजयामास गोपालं भक्तिसंयुतः॥ 41॥

ततः स भगवान्बालगोपालस्य स्वरूपतः।
प्रादुर्बभूव तस्याग्रे श्यामः कमललोचनः॥ 42॥

---

1. वयं – क।
2. हरिम् – क।
3. स्व – ख।

दृष्ट्वा तं श्रीहरिं विप्रो मोहितस्तस्य मायया।
तत्कालं चेद् [1]भवेत्कोऽपि बालो गेहात्समागतः ॥ 43 ॥

परन्तु तस्य रूपेण मोहितः प्रेमतत्परः।
[2]निर्निमेषदशाविप्रो ददर्श मुदितश्चिरम् ॥ 44 ॥

अथ श्रीभगवान्भुक्त्वा जगाम स्वेच्छया हरिः।
ब्राह्मणस्तु तदा मेने याति वेश्मास्य कोऽप्यसौ ॥ 45 ॥

ततो गते दृशौ विप्रं द्रष्टुकामो धना गुरुम्।
विचिन्वन्न विदूरे तु दृष्ट्वा तत्सन्निधिं गतः ॥ 46 ॥

गुरुं प्राहागतो देवो ह्यष्टवानसि तं प्रभुम्।
इति श्रुत्वा वचस्तस्य गुरुराहाति विस्मितः ॥ 47 ॥

अहो स एव किं भगवान् श्यामः कमललोचनः।
बालरूपो मया दृष्टो यस्तवान्तिकमागतः ॥ 48 ॥

इति श्रुत्वा वचस्तस्य धन्ना प्राह गुरुं पुनः।
स एव भगवान् विप्र यस्त्वया मेऽर्प्पितः पुरा ॥ 49 ॥

पाषाणस्तु ततो देवः प्रादुर्भूयान्वहं तथा।
भुङ्क्ते मयार्प्पितं चान्नं मदर्थे चापि यच्छति ॥ 50 ॥

तन्मया भुज्यते नित्यं यथाद्य दृष्टवानसि।
श्रुत्वेदं वचनं विप्रो महाविष्णुः समागतः ॥ 51 ॥

उवाच वञ्चितोऽहं भो हरिणा नात्र संशयः।
एतस्मिन्समये मेऽभूत्तादृशो मतिविभ्रमः ॥ 52 ॥

इत्युक्त्वा स द्विजस्तं तु प्राह धन्योऽसि पुत्रक[3]।
यत्तवोपरि देवेश एवं भूतो दयापरः ॥ 53 ॥

भाग्यवानसि वत्स त्वं प्रसन्नोऽहं व्रजाम्यतः।
स्वगृहे त्वं[4] तु साधूनामेव सेवार्च्चनं कुरु ॥ 54 ॥

इत्युक्त्वा स गतो विप्रो धन्ना स्वगृहमागतः।
तदारभ्यातिथीनां[5] स महासेवापरोऽभवत् ॥ 55 ॥

---

1. कोऽयस्य – ख – ग।
2. निमिमेष – क, ख।
3. गोपक – क।
4. गन्तुं – ख, ग।
5. अतिधीनां – ख।

यदा कदाचिद्भिक्षार्थी समायातस्तु कुत्रचित्।
धन्ना तस्मिन् क्षणे तत्र तोषयामास तं मुदा॥ 56॥

एकदा महदाश्चर्यं जातं तस्य ब्रवीमि तत्।
[1]पित्रा सम्प्रेषितः क्षेत्रे गोधूमवपनाय सः॥ 57॥

धन्ना गृहीत्वा गोधूमं गच्छन्मार्गोऽथ सज्जनान्।
क्षुधाकुलान्ददर्शाथ याचमानांश्च भोजनम्॥ 58॥

तदा धन्ना प्रसन्नात्मा प्राह तान्वैष्णवान्मुदा।
तिष्ठन्तु क्षणमात्रं तु भवन्तोऽत्र निराकुलाः॥ 59॥

आनयित्वा ददाम्येष च भोजनं नात्र संशयः।
इत्युक्त्वा त्वरितं भ्राष्टे गोधूमांश्चातिभर्ज्य सः॥ 60॥

[2]क्रीत्वा गुडं च तेनैव नीत्वा सर्वमुपागतः।
तेषामेव तु पात्राणि गृहीत्वा जलमानयत्॥ 61॥

भोजयामास तान्सर्वान्वैष्णवान्परया मुदा।
ते वैष्णवाः सुसन्तुष्टाः प्रशंसन्तो धन्नां ययुः॥ 62॥

धन्ना अपि पितुर्भीत्या नीत्वा मूखकमृत्तिकाः।
क्षेत्रं संवापयामास हसतां तत्र वै नृणाम्॥ 63॥

वापयित्वा तथा गेहं समायातो धन्ना मुदा।
अथ तत्र तु यैर्दृष्टा उप्ता मूषकमृत्तिकाः॥ 64॥

ते सर्वेऽपि समायाता[3] धन्नापितरमब्रुवन्।
अनेन तव पुत्रेण उप्ता[4] मूषकमृत्तिकाः॥ 65॥

गोधूमान्भोजयामास वैष्णवान्नात्र संशयः।
इत्युक्तस्तत्पिता प्राह किं कृतं रे धन्ना त्वया॥ 66॥

किं भविष्यति मे क्षेत्रे मृत्तिकावपने कृते।
इति श्रुत्वा पितुर्वाक्यं धन्ना प्राह वचो मुदा॥ 67॥

अहो तात किमेतेषां शृणोषि वचनं मृषा।
कोऽपि कुत्रापि वपति क्षेत्रे मूखकमृत्तिकाः॥ 68॥

---

1. विप्रा – क।
2. कृत्वा गुरुं – क।
3. समागता – क, ख।
4. उमा – क।

इति श्रुत्वा धना वाक्यं पिता तूष्णीं स्थितोऽभवत्।
[1]अथ याते कतिपये दिने क्षेत्रं धनापिता॥ 69॥

द्रष्टुं गतो ददर्शासौ गोधूमाङ्कुरसञ्चयम्।
दृष्ट्वा जहर्ष सोऽन्ये तु विस्मयं परमं गताः॥ 70॥

अथ तत्क्षेत्रनिकटे येषां क्षेत्राणि यानि वै।
तेभ्योऽधिका धनाक्षेत्रे गोधूमा दशधाभवत्॥ 71॥

इति दृष्ट्वा महाश्चर्यं सर्वे विस्मयमागताः।
धनापितापि मुदितोऽमन्यत श्रीहरेः कृपाम्॥ 72॥

एवं भक्तेस्तु माहात्म्यं को वा वर्णयितुं क्षमः।
नासाध्यं विद्यते लोके हरेः [2]भक्तानुकम्पिनः॥ 73॥

इति श्रीभगवद्भक्तिमाहात्म्ये धन्नाभक्तचरितं नामैकोननवतितमः सर्गः॥ 89॥

❊ ❊ ❊

नवतितमः सर्गः

॥ सेनाभक्तिचरितम्॥

अथान्यत्संप्रवक्ष्यामि भक्तिमाहात्म्यमुत्तमम्।
परमाश्चर्य्यजनकं हरिभक्तिप्रवर्धनम्॥ 1॥

आसीद्बुन्देलखण्डे वै नृपो राम इति श्रुतः।
अद्यापि बान्धवगढो निवासस्तस्य विश्रुतः॥ 2॥

धर्मात्मा दानशीलश्च देवतातिथिपूजकः।
एकनारीव्रतरतः सङ्ग्रामविजयी सदा॥ 3॥

तस्यैको नापितो नित्यं तैलाभ्यङ्गादिकर्म्मकृत्।
नाम्ना सेनेति विख्यातः प्रीतिपात्रं नृपस्य वै॥ 4॥

स तु [3]बाल्यं समारभ्य साधुसेवापरायणः।
राज्ञो लब्ध्वा धनं सर्वं दीनेभ्यश्च ददौ सदा॥ 5॥

---

1. अनुपाते – क।
2. भक्त्या – ख, ग।
3. वाक्यं – ख, ग।

राजसेवां विधायासौ यत्र यत्र कथा हरेः।
तत्र तत्र स्थितः शृण्वन् महानन्दे ममज्ज ह॥ 6॥

दीनानां केशवपनं श्रान्तानां पादमर्द्दनम्।
अङ्गोद्वर्जनकर्मादि चक्रे स वेतनं विना॥ 7॥

एवं भक्तिपरः सेना नापितो [1]राजसेवकः।
एकदा प्रातरुत्थायागच्छन्स राजसन्निधिम्॥ 8॥

अभ्यङ्गादिविधानाय मार्गेऽपश्यत्स वैष्णवान्।
बुभुक्षितान् याचमानानन्नं [2]सेना प्रणम्य तान्॥ 9॥

आनीय स्वगृहे तेषां परिचर्यापरोऽभवत्।
विसस्मार स राजानमात्मनश्चापि दासताम्॥ 10॥

भगवद्भक्तसेवायामेकचित्तो बभूव ह।
तेषां सेवावशात्तस्य मध्याह्नः स्वगृहेऽभवत्॥ 11॥

राजा रामस्तु भवने प्रातरुत्थाय चाह्निकम्।
चिकीर्षुर्बहिरागत्य दन्तधावनमाचरत्॥ 12॥

अथाभ्यङ्गस्य समयो जातस्तस्य महीभुजः।
तदा सेनास्वरूपेण भगवान्भक्तवत्सलः॥ 13॥

प्रेषयामास पुरुषं किञ्चिन्मायाविनिर्मितम्।
सेनाभक्तस्य नृपतेः कोपो माभूदिति स्मरन्॥ 14॥

अथासौ कृत्रिमः सेना नीत्वा तैलादिभाजनम्।
अभ्यङ्गयामास नृपं कुशली बहुसौख्यदम्॥ 15॥

राजाप्यभ्यङ्गजं सौख्यं तादृशं नाप कर्हिचित्।
मुमुदे मनसात्यर्थं ज्ञात्वा तस्याति कौशलम्॥ 16॥

अभ्यंग्य भूपतिं भूयः सेना कोष्ठाद्बहिर्गतः।
नगराद्बहिरागत्य तत्रैवान्तर्बभूव ह॥ 17॥

अथ सेनास्तु तान् भक्तान् भोजयित्वाति भक्तितः।
विसृज्य नृपतिं रामं सस्माराति भयाकुलः॥ 18॥

---

1. सम सेवकः – क।
2. सेवा – ख।

ततस्तु चरितुं राम द्वारे गत्वाति शङ्कितः।
तस्थौ न राजसविधे भयाद्गन्तुं शशाक सः॥ 19॥

अथान्यो भृत्यवर्गस्तु सेनां प्राह कुतो भवान्।
तिष्ठत्यत्रैव नृपतेस्तु [1]सविधे नैव गच्छति॥ 20॥

इति श्रुत्वा ततः सेनास्तं प्राहाति भयाकुलः।
अद्याहं सापराधोऽस्मि सेवां कर्तुं न चागतः॥ 21॥

किं करिष्यति मां दृष्ट्वा राजेत्येवं भयाकुलः।
तिष्ठाम्यत्र ततो भ्रातस्त्वं गच्छ नृपसन्निधिम्॥ 22॥

मदर्थं स तु विज्ञाप्यः त्वया भूमिपतिः प्रभुः।
यथा क्षमत मे भ्रातरपराधं तथा कुरु॥ 23॥

इत्युक्तः स तु भृत्योऽसौ गत्वा नृपतिसन्निधिम्।
प्राञ्जलिः प्रार्थयामास प्रभो सेना स नापितः॥ 24॥

सेवार्थमथ नायातस्ततो द्वारि भयातुरः।
अनुग्रहं प्रार्थयति तत्राज्ञा यादृशी भवेत्॥ 25॥

इति श्रुत्वा वचस्तस्य राजा प्राहाति विस्मितः।
अरे प्रातः समागत्य कृत्वाभ्यङ्गादिकं मम॥ 26॥

सेनाः गतः पुनश्चैवं भाषते भ्रान्तवत्कथम्।
आनय त्वं ममाग्रेनं दत्तं तदभयं मया॥ 27॥

इति श्रुत्वा ततो भृत्यः सेना[2]मुक्त्वा निनाय सः।
समागत्य ततः सेना[3] नत्वा भूपं कृताञ्जलिः॥ 28॥

तस्थौ भूपस्ततः प्राह सेनास्ते किमभूदिदम्।
प्रातरभ्यङ्गकर्मादि कृत्वा त्वं गतवानसि॥ 29॥

पुनरेवं वचो ब्रूषे कारणं नात्र वेद्म्यहम्।
इति राजवचः श्रुत्वा सेना प्राह कृताञ्जलिः॥ 30॥

राजन्नद्य भवत्सेवां कर्तुमागतवान्पथि[4]।
अपश्यं भगवद्भक्तान् नीत्वा तांश्च पुनर्गृहम्॥ 31॥

---

1. सनिधिं- ख।
2. युक्ता निनाय सः - क।
3. सेवा - क।
4. चान्यधि - ख।

गत्वा तत्सेवनासक्तो नागतोऽहं तवान्तिके।
अतोऽपराधाद्भवतां भीत्या द्वारि स्थितोऽभवम्॥ 32 ॥

इति श्रुत्वा वचस्तस्य राजा चातीव विस्मितः।
उवाचान्यानापि जनान् युष्माभिरयमीक्षितः॥ 33 ॥

ममाभ्यङ्गस्य समये सेना सेवापरायणः।
तैरुक्तं भो महाराज दृष्टोऽस्माभिरयं किल॥ 34 ॥

ततो राजा तथान्ये च भगवत्कृपयास्य वै।
कृत्वा रूपं समागत्य तन्मायाकल्पितः पुमान्॥ 35 ॥

अकार्षीत्सेवनं मेऽद्य नात्र कार्य्या विचारणा।
इति निश्चित्य राजा तु सेनां भक्तममन्यत॥ 36 ॥

सेना प्राहाति भक्त्या वै भूपतिर्नर्मया गिरा।
अहोऽद्यारभ्य सेनास्त्वं त्यज सेवां नृणामिह॥ 37 ॥

ममापि सेवनं त्यक्त्वा कुरु साधुसमर्च्चनम्।
ददामि जीविकां तुभ्यं ग्राममेकं प्रसन्नधीः॥ 38 ॥

तदुत्पन्नैर्धनैस्साधून्तोषयन्मम सन्निधौ।
[1]सुखमातिष्ठ नगरे त्यज वृत्तिं निजां पुनः॥ 39 ॥

इति श्रुत्वा ततः सेना प्रणम्य नृपतिं मुदा।
समायातो निजं वेश्म स्थितो भक्तिपरायणः॥ 40 ॥

राजा चान्येऽपि ते सर्वे यैर्यै[2]र्दृष्टं महाद्भुतम्।
ते सर्वेऽपि महाभक्ता जाताः साधुसमागमात्॥ 41 ॥

एवं भक्तिप्रसादेन गताः सर्वे परं पदम्।
तस्माद्भक्तिसमं किञ्चिन्नास्ति लोके हितं नृणाम्॥ 42 ॥

इति श्रीभगवद्भक्तिमाहात्म्ये सेनाभक्तिचरितं नाम नवतितमः सर्गः॥ 90॥

❊ ❊ ❊

---

1. गुरुवत् – ख, ग।
2. ख – ग मध्ये लुप्तपाठः।

एकनवतितमः सर्गः

॥ सुखानन्दचरितम् ॥

अथापरं प्रवक्ष्यामि भक्तिमाहात्म्यमुत्तमम्।
यस्य श्रवणमात्रेण हरिभक्तिभवेन्नृणाम् ॥ 1 ॥

रामानन्दस्य शिष्यो यः सुखानन्द इति स्मृतः।
महाभक्तो बभूवासौ[1] गानविद्याविशारदः ॥ 2 ॥

साधुसेवा स संसक्तो निःस्पृहो विषये सदा।
तीर्थाटनरतः शान्तः श्रीकृष्णध्यानतत्परः ॥ 3 ॥

यदा वीणां समादाय श्रीकृष्णचरितं मुदा।
गायति स्म वने तत्र हरिणाश्चित्रवत्स्थिताः ॥ 4 ॥

अन्येऽपि पशवोऽरण्ये[1अ] गायन्तं श्रीहरेर्गुणम्।
सुखानन्दं समावब्रुर्लिहन्तः साश्रुलोचनाः ॥ 5 ॥

एकदा मथुरायां तु राधामन्दिरसन्निधौ।
वैष्णवानां समूहोऽभूत् सुखानन्दः समागतः ॥ 6 ॥

वीणां निनादयन्[2] गायन् श्रीकृष्णचरितं मुदा।
दृष्ट्वा तं वैष्णवाः सर्वे नेमुरुत्थाय सादरम् ॥ 7 ॥

सुखानन्दोऽपि तान्नत्वा क्वचित्तत्रोपविष्टवान्।
अथ सर्वैर्विष्णुभक्तैः सुखानन्दसमर्थितः ॥ 8 ॥

कृष्णे गते द्वारकायामत्र गोप्यः समुत्सुकाः।
विरहिण्यो जगुः कीदृक् तथा गानं कुरु प्रभो ॥ 9 ॥

इति श्रुत्वा सुखानन्दो राधाकृष्णौ विचिन्तयन्।
विप्रयोगं तयोर्भक्त्या प्रगायति मनोहरम् ॥ 10 ॥

तस्मिन् गायति वै तत्र बभूवुश्चित्रवन्नराः।
[3]केचिद्रुदन्तः सन्तस्थुः केचिन्मूर्च्छां प्रपेदिरे ॥ 11 ॥

---

1. ववूवसौ – ख।
1अ. पश्यतो – ख, ग।
2. विवादयन् – ख, ग।
3. दुन्दतः – ख।

तदारभ्य गृहं केचित्त्यक्त्वा हि सर्वदा स्थिताः।
[1]निःस्पन्दतनवो जाताः सुखानन्दे प्रगायति॥ 12॥
राधाया[2] मन्दिरे चासीत् प्रतिभाति मनोहरा।
चकम्पे साऽपि रुदती मुञ्चत्यश्रुदृशोर्बहु॥ 13॥
इत्येवं परमाश्चर्यं जातं तस्मिन् प्रगायति।
निःकम्पास्तरवो जाता जीवमात्रं च निश्चलम्॥ 14॥
अथ ज्ञात्वा तु तान्सर्वान्सुखानन्दोऽति मोहितान्।
गानान्निववृत्ते तत्र स्वयमुत्थाय यत्नतः॥ 15॥
उत्थाप्य मोहितान्सर्वान्नाना लौकिकभाषया।
ते सर्वेऽपि समुत्थाय सस्मरुर्लब्धचेतनाः॥ 16॥
गीताश्रवणतो जातमानन्दं परमाद्भुतम्।
सुखानन्दं प्रणेमुस्ते वैष्णवा भक्तिसंयुताः॥ 17॥
धन्योऽसि भगवद्भक्त पृथिव्यां नास्ति त्वत्समः।
एवं तैः संस्तुतो भक्तः सुखानन्दो यदृच्छया॥ 18॥
गायन् श्रीकृष्णचरितं प्रतिकुञ्जे चचार ह।
एवं स रममाणस्तु[3] गायन् कृष्णविचेष्टितम्॥ 19॥
कृत्वा तीर्थान्यनेकानि मथुरायां समागतः।
पूर्णायुर्यमुनातीरमासाद्यैकदिने स्वयम्॥ 20॥
गायन् श्रीकृष्णचरितं ययौ यः पदमुत्तमम्।
दुःप्रापमपि देवानां योगिनामपि दुर्लभम्॥ 21॥

इति श्रीभगवद्भक्तिमाहात्म्ये सुखानन्दचरितं नामैकनवतितमः सर्गः॥ 91॥

❊ ❊ ❊

द्विनवतितमः सर्गः

॥ सुरसुरानन्दचरितम् ॥

रामानन्दस्य शिष्यो यः सुरानन्देति विश्रुतः।
महावैराग्यसंयुक्तः श्रीकृष्णध्यानतत्परः॥ 1॥

1. निस्पंदास्तनुवो – ख, ग। 2. राधाद्याः – ख।
3. संस्मरणां तं तु – ख।

कृत्वा सर्वाणि तीर्थानि जगन्नाथं गतो मुदा।
शिष्यैः सार्द्धं महाभक्त्या तत्रोवास कियद्दिनम्॥ 2॥

ततो नत्वा जगन्नाथं प्रास्थितः काशिकां प्रति।
शिष्यैः परिवृतो मार्गे पुरीतो बहिरागतः॥ 3॥

हट्टायां वटकान्[1] शुभ्रान् ददर्शैकत्र[2] रक्षितान्।
तत्र स्थित्वा स्वयं प्राह तं वै वटकरक्षकम्॥ 4॥

किमिदं भो महाभाग महोऽज्ज्वलतरं पुनः।
स्थाप्यते [3]तन्ममाचक्ष्व ज्ञातुमिच्छति मे मनः॥ 5॥

इति श्रुत्वा वचस्तस्याब्रवीद्वटकरक्षकः।
महामूर्ख इति ज्ञात्वा उपाहासपरायणः॥ 6॥

जगन्नाथप्रसादोऽयं किं भोक्ष्यसि गृहाण भोः।
इत्युक्त्वा वटकं त्वेकं ददौ वटकरक्षकः॥ 7॥

मुदा सुरसुरानन्दो गृहीत्वा बुभुजे स्वयम्।
ततस्तस्यैक शिष्योऽपि बुभुजे वटकं ततः॥ 8॥

दृष्ट्वा सुरसुरानन्दः शिष्यं प्राहातिकोपतः।
अरे त्वया कथं भुक्तमन्नं नीचेन याचितम्॥ 9॥

अतस्त्वं तु बहिस्तिष्ठ पंक्तितो नात्र संशयः।
ततस्तत्र स्थिता ये वै ते सर्वे भक्तमब्रुवन्॥ 10॥

भवद्भुक्तं विलोक्यायं भुक्त्वान्नं तत्र किं भवान्।
कुरुते वाच्यतामन्नममुं शिष्यं निरासम्॥ 11॥

इति श्रुत्वा वचस्तेषां जनानां सोऽब्रवीद्वयः।
अहो महाप्रसादोऽयमिति निश्चित्य [4]बुद्धितः॥ 12॥

भुक्तं मया न सा बुद्धिरस्येदानीं हि वर्तते।
इत्थं सुरसुरानन्दवचः श्रुत्वा तु नागराः॥ 13॥

आहुः कथं विजानीमो भवतस्तादृशी मतिः।
तस्य नैवेति वचनं श्रुत्वा भक्तोऽब्रवीद्वचः॥ 14॥

---

1. वटिकान् – ख, ग।
2. केन – ख।
3. समा चक्षु – ख, ममावश्च – क।
4. बुद्धिना – ख, क।

दर्शयाम्यावयोर्बुद्धिं विशेषं नागरा अहो।
इत्युक्त्वा तमुवाचासौ शिष्य त्वं वमनं कुरु॥ 15॥

अहं चापि करोम्येव वमनं यत् प्रपश्यताम्।
इत्युक्त्वा गुरुशिष्यौ तौ वमतुश्च पृथक् पृथक्॥ 16॥

शिष्यस्तु वटकं यत्नादुद्गाराति [1]कष्टतः।
गुरुस्तु तुलसीपत्रमुद्गीर्यादर्शयच्च तान्॥ 17॥

उवाच च ततस्तांस्तु निश्चयस्य फलं त्विदम्।
मया प्रसादबुध्यैव भुक्तमेतेन वै पुनः॥ 18॥

मया भुक्तमिति ज्ञात्वा पक्वान्नस्य धिया पुनः।
तस्मादयं पङ्क्तिबाह्यो यावत्काशीं गमिष्यति॥ 19॥

प्रायाश्चितं द्विजप्रोक्तं कृत्वा शुद्धो भविष्यति।
ततो वयं तु भोक्ष्यामः सहानेन न संशयः॥ 20॥

इत्थं सुरसुरानन्दचरितं परमाद्भुतम्।
दृष्ट्वा सर्वे महाश्चर्यं प्रीत्या नेमुश्च तं मुदा॥ 21॥

ततः सुरसुरानन्दः समागत्य च काशिकाम्।
प्रायश्चितं ददौ तस्मै शुद्धं कृत्वा विधानतः॥ 22॥

बुभुजेऽन्नं ततस्तेन साकं शिष्यसमन्वितः।
एवं सुरसुरानन्दो महाभक्तो बभूव ह॥ 23॥

इति श्रीभगवद्भक्तिमाहात्म्ये सुरसुरानन्दचरितं नाम द्विनवतितमः सर्गः॥ 92॥

❊ ❊ ❊

त्रिजवतितमः सर्गः

॥ सुरसरिचरितम्॥

रामानन्दस्यापरोऽभूच्छिष्यः सुरसरिः शुभः।
तस्य भक्तेस्तु चरितं प्रवक्ष्यामि यथाश्रुतम्॥ 1॥

---

1. नि तिष्टतः ख।

सुरसरिर्महाभक्तो विरक्तो विषयेष्वभूत्।
स्त्रीपुत्रधनमित्रादौ वसतो ममता न च॥ 2 ॥

ग्रामे विरक्ति देशस्याभावाद्वनमुपागतः।
पत्नी तस्याति शुभगा सती धर्मपरायणा॥ 3 ॥

पत्या सह वनं याता पतिसेवाचिकीर्षया।
अरण्येऽपि च भक्त्या सा फलमूलादिना मुदा॥ 4 ॥

सज्जनान् भोजयामास महासेवापरायणा।
एवं गतेषु कालेषु दुष्ट एकः समागतः॥ 5 ॥

सुरसरेर्गृहे सायं हर्तुं सुरसरिस्त्रियम्।
सुरसरिस्तु तं भक्त्या मुदा परिचचार ह॥ 6 ॥

अथार्द्धरात्रिसमये समुत्थाय स दुर्ज्जनः।
सुरसरिं निहत्येमां ग्रहीष्यामि पतिव्रताम्॥ 7 ॥

इति निश्चित्य स्वगृहाद्बहिर्यातो यदा तदा।
सुरसरिस्तु सस्मार श्रीकृष्णं विजने वने॥ 8 ॥

तत्क्षणात्तत्र सुमहान् व्याघ्रोऽतीव भयङ्करः।
समागत्य गृहीत्वा तं दुष्टं कपटरूपिणम्॥ 9 ॥

गत्वा वने [1]चखादाशु ततः सुरसरिः स्वयम्।
बहिरागत्य तं दुष्टमाजुहावाति भीतवत्॥ 10 ॥

कुतो गतोऽयं पापात्मा कुरुते किं महानिशि।
इति चिन्तापरो भूत्वा पुनः शयनमाविशत्॥ 11 ॥

ततः प्रभाते सञ्जाते तं दुष्टमुटजान्तिके।
व्याघ्रेण निहतं दृष्ट्वा चिन्तयामास वै भृशम्॥ 12 ॥

कस्मादेष समायातो मम वेशमन्यसौ पुनः।
व्याघ्रेण निहतः स्वेन कर्मणा नात्र संशयः॥ 13 ॥

अहो कर्मगतिश्चित्रा दुर्निवार्य्यापरैरपि।
यद्वशो लभते मर्त्यः सुख दुःखे उपार्जिते[2]॥ 14 ॥

---

1. उपारिते – ख।
2. उपारिते – ख।

इत्थं सुरसरिर्भक्तश्चिन्तंस्तं च दुर्जनम्।
आगत्य स्वगृहे तस्थौ श्रीकृष्णध्यानतत्परः ॥ 15 ॥

इति श्रीभगवद्भक्तिमाहात्म्ये सुरसरिभक्तिचरितं नाम त्रिणवतितमः सर्गः ॥ 93 ॥

❊ ❊ ❊

चतुर्नवतितमः सर्गः

॥ नरहरिचरितम् ॥

अथापरो बभूवैको नाम्ना नरहरिः शुभः।
परमानन्दस्य शिष्योऽसौ तद्भक्तिं कथयाम्यहम् ॥ 1 ॥
नरहरिर्महाभक्तो विरक्तो विषयेऽभवत्।
ग्रामाद्बहि[1] कुटीं बध्वा तस्थौ चित्ते हरिं भजन् ॥ 2 ॥
परन्तु स्वगृहे सायं समायायाज्जनान्मुदा।
अकर्त्तव्यमपि प्रेम्णा कृत्वा सन्तर्पयन् स्थितः ॥ 3 ॥
एकदा तस्य भवने समायाताश्च वैष्णवाः।
तेषां भोजनसिध्यर्थं नासीत्तस्येन्धनं क्वचित् ॥ 4 ॥
यावच्च स्वगृहे काष्ठं हर्तुं योग्यं स्थितं तु तत्।
सर्वमिन्धनमेवासौ चकार परया मुदा ॥ 5 ॥
तस्मिन् दिने नरहरिरलब्ध्वा स्वगृहेन्धनम्।
विचिन्त्य स गतो ग्रामाद्बाह्ये न प्राप किञ्चन ॥ 6 ॥
तत्रासीद्ग्राम्यदेव्यैका दुर्गा जाग्रत्स्वरूपिणी।
तस्या गृहं ददर्शसौ जीर्णकाष्ठचयान्वितम् ॥ 7 ॥
तत्र गत्वा नमस्कृत्य सम्प्रार्थ्य ग्रामदेवताम्।
इन्धनानि समाहृत्य तद्गृहात्स्वगृहं ययौ ॥ 8 ॥
तेनेन्धनेन तेषां वै सम्पाद्यान्नं प्रहृष्टवत्।
भोजयामास तान्सर्वान्स्वार्थार्थं पाकमथाचरत् ॥ 9 ॥
ततो भगवती तुष्टा निशि तं [2]स्वप्नमादिशत्।
अरे नरहरे तेऽहं तुष्टाऽस्मि शृणु मे वचः ॥ 10 ॥

---

1. वाह्ये – ख, क। 2. मयादिशत – क।

अद्यारभ्य[1] तवाकस्मादिन्धनं वै भविष्यति।
न मे मन्दिरकाष्ठानि ग्राह्यानीह त्वया पुनः ॥ 11 ॥

इत्थं नरहरिर्दृष्ट्वा स्वप्नं प्रातः समुत्थितः।
ददर्श चाङ्गणे बद्धं शुष्ककाष्ठचयं स्थितम् ॥ 12 ॥

अमन्यत तदा स्वप्नं सत्यं देव्या प्रभाषितम्।
एवं द्वित्रिदिने जाते ज्ञातं तत्केनचित्पुनः ॥ 13 ॥

सामाजिकेन तेनापि रात्रौ दुर्गागृहे स्थितम्।
काष्ठं नीतं च पाकार्थं ममाप्येवं भविष्यति ॥ 14 ॥

एवं सञ्चित्य तत्कालमारभ्यास्य शिरोव्यथा।
महती सम्बभूवाथ समुमूर्षुरभूत्क्षणात् ॥ 15 ॥

अथ तस्मै निशि स्वप्नं ददौ देव्यतिकोपिनी।
अरे त्वया मे भवनात् [2]काष्ठमानीतमित्यहो ॥ 16 ॥

इन्धनार्थं ततस्त्वां तु सकुलं नाशयाम्यहम्।
यदि च त्वं मम वचो न करिष्यस्यतः परम् ॥ 17 ॥

आस्ते नरहरिर्भक्तो योऽसौ ग्रामे मम प्रियः।
तस्मै शुष्केन्धनं बध्वा प्रत्यहं देहि वेश्मनि ॥ 18 ॥

न करिष्यसि चेद्वाक्यं मदुक्तं मोहतो यदा।
तदा त्वां सकुलं चाहं हनिष्यामि न संशयः ॥ 19 ॥

इति स स्वप्नमालोक्य प्रातरुत्थाय यत्नतः।
शुष्ककाष्ठचयं बध्वा धृत्वा शिरसि भक्तितः ॥ 20 ॥

ददौ नरहरेर्गेहे दुर्गादेवीं स्मरन्मुदा।
तत्कालादेव तस्यापि शिरःपीडा न्यवर्तत ॥ 21 ॥

प्रत्यहं स तदारभ्य गत्वा नरहरेर्गृहम्।
प्रददाविन्धनं भक्त्या देव्या वाक्यं स्मरन्भयात् ॥ 22 ॥

तदारभ्य च भक्तस्य [3]तस्य नरहरेर्गृहे।
नाभूदिन्धनवैकल्पं बभूवात्यन्तमद्भुतम् ॥ 23 ॥

---

1. अथारभ्य – ख, क।
2. नीतवानसि – क, ख।
3. श्रीति – क, ख।

एवं भक्तेर्विलसितं महाश्चर्यप्रदं प्रभोः ।
आसाध्यमपि सिध्येत लोके भक्तिमतां नृणाम् ॥ 24 ॥

इति श्रीभगवद्भक्तिमाहात्म्ये नरहरिचरितं नाम चतुर्णवतितमः सर्गः ॥ 94 ॥

❊ ❊ ❊

पञ्चनवतितमः सर्गः

॥ पद्महरिभक्तिचरितम् ॥

कवीरस्य च शिष्योऽभून्नाम्ना पद्म इति स्मृतः ।
स तु नामैव जग्राह रामेत्यक्षरयुग्मकम् ॥ 1 ॥

अजामिलादिपापिष्ठसमुद्धारणकारकम् ।
श्रुत्वा कवीरवदनान्नामैव परमं [1]मनुम् ॥ 2 ॥

स तु काश्यां वसन् भक्तो रामनामपरायणः ।
साधुसेवासमायुक्तो गुरुशुश्रूषणे रतः ॥ 3 ॥

एकदा चाविमुक्तेस्तु वणिग्गेहे महाधनः ।
कुष्ठरोगातुरो मर्तुं गङ्गातीरमुपागतः ॥ 4 ॥

महाभारं गले बध्वा प्रस्तरं जाह्नवीजले ।
निर्मज्याहं मरिष्यामीत्येवं निश्चित्य चेतसा ॥ 5 ॥

अथ तत्र समायातः पद्मनामातिभक्तिमान् ।
पप्रच्छ वणिजं त्वं किमर्थं मर्तुमिच्छसि ॥ 6 ॥

वणिगाह स्ववृत्तान्तं श्रुत्वा पद्मोऽब्रवीत् पुनः ।
अहो मयोच्यते यत्ते तत्कुरुष्वाद्य मे वचः ॥ 7 ॥

अद्यैव नीरुजो देहः गच्छ किं मर्त्तुमिच्छसि ।
इति श्रुत्वा वचस्तस्य पद्मस्य च वणिक्पुनः ॥ 8 ॥

प्रणम्य पद्मं प्रोवाच नाथ तद्ब्रूहि मे वचः ।
इति वैश्यवचः श्रुत्वा पद्मो वचनमब्रवीत् ॥ 9 ॥

इदानीं जाह्नवीतोये मणिकर्ण्यां [2]प्रविवेश्य च ।
स्नात्वा रामेति नामैव त्रिधोच्चारय भक्तितः ॥ 10 ॥

---

1. मतम् – ख, ग।
2. प्रविवेश च – क।

तदा पुनः [1]कुष्ठरोगान्मुक्तो भवितुमर्हसि।
इति श्रुत्वा वचस्तस्य वणिक् तत्कालमेव हि ॥ 11 ॥

भृत्यैर्धृतकरो गङ्गातोये भक्त्या विवेश ह।
ततस्त्रिमज्जनं कृत्वा निमील्य नयने स तु ॥ 12 ॥

त्रिधा रामेति नामैव प्रोवाच चाति हृष्टवत्।
तदैव निर्व्रणौ हस्तपादौ तस्य बभूवतुः ॥ 13 ॥

निर्व्यर्थं च समस्ताङ्गमङ्गुलीनां प्ररोहणम्।
दृष्ट्वा वणिक्च मुदितो नत्वा [2]पद्महरिं मुहुः ॥ 14 ॥

जगाम भवनं पद्भ्यां पश्यतां सर्वदेहिनाम्।
अन्ये ये संस्थितास्तत्र तेऽप्याश्चर्यं परं ययुः ॥ 15 ॥

एवं पद्मो हरेर्भक्तो नामनिष्ठो बभूव ह।
तस्य नाम्नैव सञ्जातं दिव्यज्ञानमनुत्तमम् ॥ 16 ॥

न नामसदृशं [3]किञ्चिदिहामुत्रफलप्रदम्।
एकं वान्यानि कर्म्माणि व्रतदानादिकानि वा ॥ 17 ॥

एकतो रामनामैव सर्वकामफलप्रदम्।
मोक्ष इव मुमुक्षूणां कामिनां कामदायकम् ॥ 18 ॥

विचिन्त्य सर्वधर्म्मांश्च सत्यमेतद्ब्रवीम्यहम्।
न नामसदृशं किञ्चिदिहामुत्रफलप्रदम् ॥ 19 ॥

इति श्रीभगवद्भक्तिमाहात्म्ये पद्महरिभक्तिचरितं नाम पञ्चनवतितमः सर्गः ॥ 95 ॥

❊ ❊ ❊

षण्णवतितमः सर्गः

॥ तत्त्वाजीवचरितम् ॥

दक्षिणस्यामुभौ जातौ तत्त्वाजीवेति नामतः।
भ्रातरौ साधुपूजायां नियुतौ [4]क्षत्रवंशजौ ॥ 1 ॥

---

1. पूतः – ख।
2. मुहुर्मुहुः – क।
3. वर्तते नृणाम् – क।
4. क्षण – ख।

कर्म्ममात्रमजानन्तौ वैष्णवाराधने रतौ।
काङ्क्षन्तौ सद्गुरुं चित्ते शिष्यौ स्यातां च कस्य वै॥ 2॥

एवं [1]विचिन्तयतोस्तत्र साधुरेकः समागतः।
तेनोक्तौ तौ भवद्वारि शुष्कोऽयं वर्तते तरुः॥ 3॥

यस्य पादोदकेनास्य तरोः शाखाप्ररोहणम्।
स एव सद्गुरुः शिष्यौ तस्य वै भवतं युवाम्॥ 4॥

एवं श्रुत्वा वचस्तस्य ताभ्यामपि [2]सुनिश्चितम्।
यो यस्तत्रागतः साधुस्तस्य पादोदकं स्वयम्॥ 5॥

गृहीत्वा शुष्कवृक्षं तं भक्त्या सिषिचतुर्मुदा।
एवं गतेषु कालेषु नाभूच्छाखाप्ररोहणम्॥ 6॥

तदा तौ चिन्तयाविष्टौ गुरुर्मे को भविष्यति।
एवं चिन्तयतोस्तत्र साधुसेवां [3]प्रकुर्वतोः॥ 7॥

कवीरः पर्य्यटन्देशे तयोर्द्वारमुपागतः।
सायं कालेऽथ तौ दृष्ट्वा कवीरं श्रुतनामकम्॥ 8॥

आतिथ्यं परया भक्त्या स्नात्वा पादोदकं तदा।
ददौ शुष्कतरो मूर्ध्नि शाखारोहाभिकाङ्क्षया॥ 9॥

ततः कवीरं सम्भोज्य रात्रौ सुषुपतुर्गृहे।
प्रातरुत्थाय तौ वृक्षं रूढशाखां निरीक्ष्य वै॥ 10॥

मुदितौ तस्य निकटे कवीरस्य समागतौ।
ऊचतुस्तं कवीरं च गमनायोद्यतं मुदा॥ 11॥

अद्येह तिष्ठ भक्तः त्वं कुरु नौ वाञ्छितं प्रभो।
यथेष्टं प्रातरेवातो गमिष्यसि न संशयः॥ 12॥

इति श्रुत्वा तयोर्वाक्यं कवीरस्तावुवाच ह।
ब्रूतं युवां वाञ्छितं यन्ममाग्रे तत्करोम्यहम्॥ 13॥

इति तद्वचनं श्रुत्वा प्रोचतुस्तौ निजोच्छितम्[4]।
कवीरोऽपि ततः प्राह नाहं योग्यो गुरुर्हि वाम्॥ 14॥

---

1. विचारवन्तौ तौ – ख, ग।
2. विनिश्चितम् – क।
3. प्रकुर्वताम् – क।
4. निजोक्षितम् – ख।

जात्या म्लेच्छोऽस्मि युवयोः कथं स्यां क्षत्रजन्मनोः।
इति श्रुत्वा कवीरस्य वचस्तौ पुनरूचतुः॥ 15॥

नावां [1]जातिवशौ भक्तौ त्यक्त्वा सर्वमशेषतः।
गृहीतौ वै भवन्पादौ सर्वं सत्यं न संशयः॥ 16॥

कवीरं न कथञ्चित्तौ यदा तत्यजतुस्तदा।
सोऽपि रामेति नामैव तावप्युपदिदेश ह॥ 17॥

प्राह तौ युवयोः कष्टं[2] यदाज्ञा निष्कृतंम्भवेत्।
तदा मत्सन्निधौ काश्यामागन्तव्यं न संशयः॥ 18॥

तदोपायं करिष्यामि भवतोः कष्टवारणे।
इत्युक्त्वा तु गतः काशीं कवीरो ज्ञानिनां वरः॥ 19॥

[3]तावपि स्वगृहे रामनामस्मरणतत्परौ।
निवसन्तौ ततः काले ज्ञातौ ज्ञातिजनैरपि॥ 20॥

तत्वाजीवेत्युभौ शिष्यौ कवीरस्य बभूवतुः।
तदा तिरस्कृतौ सर्वैः ज्ञातिभिश्चातिकोपितौ॥ 21॥

भवन्तौ म्लेच्छशिष्यौ यज्जातौ क्षत्रियवंशजौ।
ततो ज्ञातेर्बहिर्भूतौ तिष्ठन्तौ नीचजातिवत्॥ 22॥

इत्युक्त्वा तौ परित्यज्य सर्वे तद्ग्रामवासिनः।
निन्दन्तस्तौ तिरश्चक्रुस्तत्वाजीवेत्युभावपि॥ 23॥

ततस्तौ परमक्लिष्टौ ग्रामे सर्वैस्तिरस्कृतौ।
कन्यापुत्रविवाहो वा कथं स्यादिति दुःखितौ॥ 24॥

एकस्यैका सुतान्यस्य पुत्र एकस्तयोः कथम्।
भविष्यति विवाहोऽत्र ग्रामे इति विचिन्त्य तौ॥ 25॥

स्मृत्वा गुरुवचः काशीं गतौ परमदुःखितौ।
कवीरं प्राहतुर्भक्त्या कष्टं [4]ज्ञातिजभिः कृतम्॥ 26॥

कन्यापुत्रविवाहो मे कथं स्यादित्यवोचताम्।
श्रुत्वा तयोर्वचः कृष्टं कवीरः प्राह तौ मुदा॥ 27॥

1. जनि – क, ग।
2. कथं – क।
3. नावपि – क।
4. नैः – क, ख।

कन्यैका युवयोर्मध्ये पुत्रश्चैकश्च वर्तते।
तयोरेव विवाहस्य योगः कार्यो विचारितम्॥ 28॥

ततस्ते ज्ञातयः सर्वे रामचन्द्रकृपाबलात्।
स्वयं निवर्तयिष्यन्ति ग्रहीष्यन्ति स्वयं तु ताम्॥ 29॥

इति श्रुत्वा कवीरस्य वचनं तौ मुदान्वितौ।
आगत्य स्वगृहे कन्यापुत्रयोरुभयोस्तयोः॥ 30॥

विवाहस्य तु चक्राते समुद्योगं प्रहर्षितौ।
ततो ज्ञातिजनैर्ज्ञातो विवाहस्तूभयोस्तयोः॥ 31॥

आगत्य प्रत्यषिध्यन्त कुरुथः किं [1]जुगुप्सितम्।
तदा तौ प्राहतुर्ज्ञातीन् किं कुर्वो यत्पृथक् कृतौ॥ 32॥

भवद्भिश्च ततो म्लेच्छधर्ममेवाश्रयावहे।
इति श्रुत्वा ततस्ते तु प्राहुर्ज्ञातिजनास्तु तौ॥ 33॥

गत्वाग्रभवने सर्वे विचार्य्य प्रातरेव हि।
वदिष्यामो वयं यद्वा युवां तद्वै करिष्यथः॥ 34॥

इत्युक्त्वा ते गताः सर्वे ज्ञातयो निजमन्दिरे।
न विचारे [2]यदायातं तयोः सङ्ग्रहणं तदा॥ 35॥

रात्रौ स्वप्नेऽथ हनुमांस्तान् ज्ञातीनिदमब्रवीत्।
तत्वाजीवेत्युभौ भक्तौ श्रीरामस्य न संशयः॥ 36॥

मन्त्रज्ञगृहतुर्म्लेच्छात्तेन त्यागमहो गतौ।
प्रातस्तु तद्गृहे यो वै न भोक्ष्यति ममाज्ञया॥ 37॥

तमहं नाशयिष्यामि भक्त[3]निन्दापरायणम्।
एवं दृष्ट्वा तु ते स्वप्नं प्रातरुत्थाय संस्थिताः॥ 38॥

एकत्र मन्त्रयामासुर्गन्तव्यं नात्र संशयः।
इति निश्चित्य मनसा सर्वे ते ज्ञातयस्तदा॥ 39॥

तत्त्वाजीवगृहेभ्येत्य [4]प्रोचुश्च विनयान्विताः।
अहो युवाभ्यां नैवैवं कर्तव्यं कर्म्मनिन्दितम्॥ 40॥

---

1. जुगुक्षितम् – ख, ग।
2. रसेनायातं – ख, क।
3. भक्ति – ख, ग।
4. समोचुश्च।

आयाता वयमत्राद्य सङ्गृहीतुं न संशयः।
युवयोर्नैव दोषोऽस्ति पापमस्माकमेव हि ॥ 41 ॥

युवां विनापराधेन यज्ज्ञातिभ्यो बहिः कृतौ।
भोजयास्मानिदानीं त्वं क्षम्यतां [1]दुःकृतं हि नः ॥ 42 ॥

इति तेषां वचः श्रुत्वा ज्ञातीनां प्रेमवर्द्धनम्।
तत्वाजीवौ प्रमुदितौ प्रोचतुस्तान् विनीतवत् ॥ 43 ॥

तिरस्कृतौ भवद्भिश्च पुरेवानुकमुषितौ।
आवामाज्ञाकरौ नित्यं युष्माकं नात्र सशंयः ॥ 44 ॥

इत्युक्त्वा स्वगृहे पाकं कारयित्वाथ [2]तान्पुनः।
भोजयामासतुर्ज्ञातीन् ततस्तौ तेऽब्रुवन् वचः ॥ 45 ॥

अतः परं वां [3]सुतयोर्विवाहोऽस्माभिरुच्यते।
यत्र तत्रैव कर्तव्यो नान्यथा गर्हितं [4]कुरु ॥ 46 ॥

इति श्रुत्वा वचस्तेषां तत्त्वाजीवौ प्रहर्षितौ।
युष्माकं तनयावेतौ यथेच्छसि तथा कुरु ॥ 47 ॥

इत्युक्त्वा ज्ञातिवचनात्कन्याश्चैव सुतस्य च।
विवाहोऽभून्महोत्साहाद्यथायोग्यं कुलस्य तु ॥ 48 ॥

एवं तौ रामभक्तौ तु तत्वाजीवेति नामकौ।
यावज्जीवं साधुसेवानिरतौ वैष्णवोत्तमौ ॥ 49 ॥

अन्ते संप्रापतुः स्वर्गं रामनामप्रसादतः।
निवसन्तावपि गृहे भक्तिरेव हि कारणम् ॥ 50 ॥

इति श्रीभगवद्भक्तिमाहात्म्ये तत्त्वाजीवचरितं नाम षण्णवतितमः सर्गः ॥ 96 ॥

❊ ❊ ❊

---

1. दुष्क्लान्त – ख।
2. मुदा – क।
3. श्रुतयोः – क।

सप्तनवतितमः सर्गः

॥ माधवचरितम् ॥

अथ माधवदासस्य कथां वक्ष्ये मनोरमाम्।
यस्य स्मरणमात्रेण नरो भक्तिमवाप्नुयात् ॥ 1 ॥

बभूव चोत्कले देशे विप्रो माधवसंज्ञकः।
स्त्रीपुत्रधनमित्रादौ महासुखसमाकुलः ॥ 2 ॥

निनाय बहुवर्षाणि वयसा स जरां गतः।
एकदा स गतः क्वापि कार्यार्थं नगरान्तरे ॥ 3 ॥

कृत्वा कार्यमथैकाकी समागच्छन्पथि स्थितः।
तरुच्छायामुपाश्रित्य श्रमापना सःयनाय ॥ 4 ॥

अथ दैववशात्तस्य समुत्पन्ना महाव्यथा।
उदरे तु [1]क्षणेनैव मूर्च्छां प्राप स वै द्विजः ॥ 5 ॥

निश्चेष्टो निपतन् भूमौ मुहूर्तादुत्थितः पुनः।
अहो किं जातमिति स चिन्तयामास चेतसा ॥ 6 ॥

अद्यास्मिन्निर्जने स्थाने क्व मे पुत्रः सुहृत्स्त्रियः।
दुःखितस्य च साहाय्यं कर्तुमत्र समागताः ॥ 7 ॥

प्राग्जन्मकर्म्मणैवाहं जीवितो नात्र संशयः।
अथवा पश्यतां तेषां मयि यद्भावि तद्भवेत् ॥ 8 ॥

नत्वस्य [2]वारणं कोऽपि कर्त्तुमर्हति भूतले।
मयि पश्यति मे पुत्राः कतिधा [3]दुःखभागिनः ॥ 9 ॥

किञ्चैवमेव[4] मर्तव्यमेकस्मिन् दिवसे मया।
तदा क्व मे सुताः क्वाहं क्ववायं स्नेहो गमिष्यति ॥ 10 ॥

अपि चाद्यवधि कृतं सुखं वैषयिकं तथा।
जरया शक्यते नैव कर्तुं तदपि वै मया ॥ 11 ॥

तस्माद्वृथैव मोहोऽयं कं दर्शयामि मामिह।
इतोऽपि स्थावरावस्था यदा यास्यति मे पुनः ॥ 12 ॥

---

1. क्षत्रे – ख।
2. वाणां – ख।
3. आभुवन् – ख।
4. किं वा पश्यं हि – क।

तथा मन्दादरो भूत्वा शोचिष्ये नात्र संशयः।
दृश्यन्ते हि महावृद्धा सर्वत्र शिथिलादशः॥ 13॥

तस्मादद्यैव भवनाद्बहिर्गत्वा क्वचित्स्थितः।
परलोकहितार्थाय करिष्ये स्मरणं हरेः॥ 14॥

इति निश्चित्य विप्रोऽसौ माधवः स्वगृहं गतः।
स्नात्वा भुक्त्वा सुतान् पत्नीं सुहृदः प्राह हृष्टवत्[1]॥ 15॥

अहो शृणुत मे वाक्यं भवन्तोऽतीव मे प्रियाः।
तस्मान्मदुक्तमेवात्र स्वीकर्त्तव्यं ममाज्ञया[2]॥ 16॥

अद्यावधि गृहे स्थित्वा युष्मदर्थं मया कृतम्।
शुभाशुभफलं कर्म्म [3]मोहग्रस्तेन चेतसा॥ 17॥

अतः परन्तु स्वहितं करिष्यामि न संशयः।
जगन्नाथं स्मरिष्यामि स्थित्वाहं कुत्रचिद्वने॥ 18॥

मृते मयि न पूर्वं मे यूयं युष्माकमहम्पुनः।
जीवन्तोऽप्युपकुर्वन्ति किञ्चिन्नैव परस्परम्॥ 19॥

तस्मादद्यैव गच्छामि यूयं तिष्ठत स्वे गृहे।
इत्युक्त्वा माधवो विप्रः प्रतस्थे निजमन्दिरात्॥ 20॥

अथ ते बान्धवाः सर्वे वारयन्तस्तमन्वपुः।
नामन्यत स कस्यापि [4]गत एव यदृच्छया॥ 21॥

तेऽपि सर्वे परावृत्य समायाता निकेतनम्।
माधवोऽपि प्रहृष्टात्मा नीलाचलमुपागतः॥ 22॥

तत्र गत्वाद्रिपार्श्वस्थो गुहायामास्थितोऽभवत्।
निराहारोदको देवं जगन्नाथं विचिन्तयन्॥ 23॥

जाते दिनत्रये तस्य निराहारोदकस्य च।
तदा तुष्टो जगन्नाथः प्रसन्नोऽभूद् द्विजस्य सः॥ 24॥

चतुर्थे दिवसे राजन् निशायां शयनक्षणे।
लड्डुकानि सुवर्णस्य स्थाल्यां कृत्वा हि[5] पूजकाः॥ 25॥

---

1. हृष्टवान् – ख, ग।
2. तदाज्ञया – ख, ग।
3. पाशेन – ख, ग।
4. वाक्यं मायातानेके जनम् – क।
5. अथ – क।

जगन्नाथाय दत्त्वा ते मुद्रायित्वा कपाटकम्।
सुषुपुः स्वगृहे सर्वे यथान्यदिवसे तथा॥ 26॥

अथ श्रीभगवान् लक्ष्मीमुवाच करुणामयः।
इदं लड्डुकनैवेद्यं नीलाचले त्वहम्॥ 27॥

गत्वा माधवभक्ताय [1]दत्त्वायास्यामि साम्प्रतम्।
स तु सर्वं परित्यज्य स्त्रीपुत्रधनबान्धवम्॥ 28॥

दिनत्रयं निराहारः स्मरते मामनन्यभाक्।
तस्मात्तस्मै प्रदातव्यमिदमस्मिन्क्षणे मया॥ 29॥

इति श्रुत्वा वचस्तस्य लक्ष्मीः प्राह कृताञ्जलिः।
नाथाहमेव गच्छामि दत्त्वायास्यामि वै द्रुतम्॥ 30॥

इत्युक्त्वा स्वर्णपात्रं तत्सलड्डुकं करेण सा।
गृहीत्वा स्त्रीस्वरूपं च कृत्वा तत्र ययौ रमा॥ 31॥

गत्वा माधवदासस्य समीपे प्राह सादरम्।
गृहाणैवं सलड्डुकं प्रत्यहं प्रेषयामि ते॥ 32॥

तव भोजनदानाय इत्युक्त्वा भाजनं[2] रमा।
लड्डूकपूर्णं तस्याग्रे प्रणिधाय समागता॥ 33॥

तदा माधवदासोऽपि मत्वा हृदि हरेः कृपाम्।
बुभुजे तानि सर्वाणि पात्रं तत्रैव [3]स न्यधात्॥ 34॥

अथ प्रातः समुत्थाय जगन्नाथस्य पूजकाः।
पूजां कर्तुं मठे जग्मु ददृशुर्नैव भाजनम्॥ 35॥

न लड्डूकं तदोद्विग्नाः कश्चौरोऽत्र समागतः।
कपाटस्तादृशो लग्नोऽस्माभिरुद्घाटितस्तथा॥ 36॥

कथं चौरः समायातो महाश्चर्यमभूदिदम्।
सर्वमेतत्तथा राज्ञे दुःखिता अब्रुवन् जनाः॥ 37॥

राजापि चारान्सर्वत्र प्रेषयामास चिन्तितः।
पूजका अपि सर्वत्र चौरं ज्ञातुं समं ततः॥ 38॥

---

1. धन्वा या स्वामि – ख।
2. तद्भाजनम् – ख।
3. स्थापितम् – ख, क।

गता अन्वेषमाणास्ते वने ग्रामे च पर्वते।
नीलाचलगताः केचिच्चौरदर्शनकांक्षिणः॥ 39॥

ददृशुः पर्वते तत्र माधवं मीलितेक्षणम्।
तदग्रे स्वर्णपात्रं तद् दृष्ट्वा सर्वेऽतिहर्षिताः॥ 40॥

अहोऽनेन [1]हृतं सत्यं पात्रं देवस्य नान्यथा।
इत्युक्त्वा जगृहुस्ते तु तदा तं माधवं रुषा॥ 41॥

नीत्वायाताः स्वनगरे ताडयामास कोऽपि तम्।
माधवस्तु ततस्तूष्णीं स्थितः प्राक्कर्म्मजं स्मरन्॥ 42॥

पृष्ठे भग्नास्त्वचस्तस्य शोथश्च ताडनादभूत्।
दयालुरेकस्तन्मध्ये वारयामास ताडकम्॥ 43॥

अथ सायं जगन्नाथं स्नापयन्तो[2] जनास्तदा।
पृष्ठे मूर्तेस्त्वचो भग्नाः [3]शोथं वै ददृशुर्हरेः॥ 44॥

दृष्ट्वा सर्वे महाश्चर्य्यं चिन्तया [4]परयान्विताः।
किं जातमिति शोकेन त्यक्ताऽशनजला निशि॥ 45॥

[5]सुषुपुः खिन्नमनसस्ततः श्रीपुरुषोत्तमः।
स्वप्ने तानाह भो विप्रा माधवोऽतीव मे प्रियः॥ 46॥

नीलाचले स्थितस्तस्मै सलडुकं तु भाजनम्।
मयैव प्रेषितं तस्माद् नायं चौरो हि माधवः॥ 47॥

तस्य यत्ताडनं पृष्ठे कृतं युष्माभिरत्र भोः।
तेन मे पृष्ठदेशेऽद्य शोथो भेदस्त्वचामभूत्॥ 48॥

नान्यत्कोऽपि च मे जातो दोषः पृष्ठक्षतप्रदः।
एवं दृष्ट्वा निशि स्वप्नं [6]पूजकास्तत्क्षणं द्रुतम्॥ 49॥

उत्थाय तं महाभक्तं मुमुचुर्बन्धनाद् द्रुतम्।
मुक्त्वा प्रणेमुस्ते सर्वे स्नापयित्वा शुभाम्भसा॥ 50॥

---

1. त्वक्ष्च हृदं तं – ख, क।
2. तर्पयन्तो – ख, ग।
3. सोऽयं – ख।
4. मासयान्विताः – ख।
5. युयुः – क।
6. सरणं तु ते – क।

भोजयित्वाति भक्त्या तं ददुरास्तरणं शुभम्।
उपचारान्प्रचक्रुस्ते सोऽथ क्षतनिवृत्तये[1] ॥ 51 ॥

एवं माधवदासस्तु भक्तस्तत्र बभूव सः।
उवास श्रीजगन्नाथक्षेत्रे च कतिचिद्दिनम् ॥ 52 ॥

इति श्रीभगवद्भक्तिमाहात्म्ये माधवचरितं नाम सप्तनवतितमः सर्गः ॥ 97 ॥

❊ ❊ ❊

अष्टनवतितमः सर्गः

॥ माधवदासचरितम् ॥

एकदा निशि पूजायां जगन्नाथस्य सन्निधौ।
गतो माधवदासस्तु दध्यौ स्थित्वा क्वचिन्मठे ॥ 1 ॥

अथ ते पूजकाः सर्वे तमदृष्ट्वा तु माधवम्।
द्वाराद्बहिः समागत्य कपाटं प्रददुर्मठे ॥ 2 ॥

अथ माधवदासस्तु ध्यानशेषे समुत्थितः।
बहिर्गन्तुं मनश्चक्रे तत्र द्वारं च मुद्रितम् ॥ 3 ॥

निवृत्य तन्मठे एव भूमौ सुष्वाप हृष्टवत्।
अथ तस्य महाशीतम्भूत्कम्पो बभूव ह ॥ 4 ॥

दृष्ट्वा तं वेपमानं च जगन्नाथः कृपामयः।
वैष्णवस्य स्वरूपेण स्ववस्त्रं तूलगर्भितम् ॥ 5 ॥

तस्योपरि ददौ प्रीत्या माधवस्य त्वरान्वितः।
ततो माधवदासस्तु सुखं सुष्वाप[2] वै निशि ॥ 6 ॥

प्रातः समागताः सर्वे पूजका ददृशुश्च तम्।
कोऽसि रे भगवद्वस्त्रं समाच्छाद्य [3]स्वपिष्यहो ॥ 7 ॥

इत्युक्तः प्रोत्थितः सोऽपि दृष्ट्वा पूजकमब्रवीत्।
निशापूजाक्षणेऽहं तु मठे[4] एव स्थितोऽभवम् ॥ 8 ॥

---

1. निवृत्तये – क।
2. सुषाप – ख।
3. स्व शिष्य हो – ख, ग।
4. क्षणेदं मठे एवस्थितोऽभवम् – क।

मुद्रयित्वा मठद्वारं भवन्तस्तु गताः द्रुतम्।
ततोऽत्रैव मया सुप्तं शीतं लग्नं महन्मम॥ 9॥

तत एकोऽति पुण्यात्मा वैष्णवस्तूलिकामिमाम्।
तूष्णीमाच्छाद्य मेऽङ्गानि निर्जगाम यदृच्छया॥ 10॥

शीतत्राणात्ततोऽहं तु न जाने निद्रयान्वितः।
भवद्भिरेवेदानीं तु सहसोत्थापितोऽस्मि भोः॥ 11॥

इति श्रुत्वा वचस्तस्य ज्ञात्वा तं माधवं तथा[1]।
प्रणम्योचुर्न तेऽसाध्यं किञ्चिन्नः क्षम्यतां प्रभो॥ 12॥

इत्युक्त्वा तेऽर्च्चनं चक्रुर्माधवोऽपि मठाद्बहिः।
जगाम विचरंस्तत्र स्वेच्छया मठसन्निधौ॥ 13॥

एवमेकदिने जातमपरं शृणु तस्य वै।
भक्तिमाहात्म्यमखिलं शृण्वतां भक्तिवर्धनम्॥ 14॥

एकदा स ययौ दैवान्माधवोऽन्यन्मठे शुभे।
शूलरोगसमुत्पन्नस्तस्यातीव सुदारुणः॥ 15॥

आमशूलेन तेनासौ व्यथितोऽभून्मुहुर्मुहुः।
बभूव रेचनं तस्य दौर्बल्यात्पतितो भुवि॥ 16॥

भूमौ निपतितस्तस्य दिनं सर्वं समभ्यगात्।
निशायामथ सस्मार जगन्नाथं कृपामयम्॥ 17॥

म्रियेऽहमिति बुध्या स जगन्नाथस्तदा स्वयम्।
सत्वरं जलमादाय समायातस्तदन्तिके॥ 18॥

प्रक्षाल्याङ्गं जलेनास्य भोजयित्वान्नमुत्तमम्।
नेतुं मठसमीपे तु यत्नवानभवद्धरिः॥ 19॥

अथ माधवदासस्तं प्राह [2]ज्ञात्वात्मनि कृपाम्।
अहो किमेवं कुरुषे ममाङ्गपरिशोधनम्॥ 20॥

इति श्रुत्वा वचस्तस्य प्राह भक्तस्वरूपिणः[3]।
अहो त्वं ममैवात्मा शरीरं ते परं मम॥ 21॥

---

1. जनः – क।
2. ज्ञात्मनि भक्तिः – ख।
3. स्वरुपधृक् – क, ग।

स्वदेहशोधनं सर्वैः क्रियते तत्र का घृणा[1]।
इति श्रुत्वा पुनः प्राह माधवो भक्तरूपिणम्॥ 22॥

यद्येवं मन्यसे नाथ कथं दुःखं ददासि मे।
यतस्त्वयाप्यकर्तव्यं क्रियते कर्म मत्कृते॥ 23॥

इति श्रुत्वा[2] वचः [3]प्राह भक्तरूपधरो हरिः।
अद्यावधि स्थितं दुःखं प्रारब्धं ते पुराकृतम्॥ 24॥

तस्य भोगोऽयमभवन्न ते दुःखमतः परम्।
भविष्यति न सन्देहः समागच्छ मया सह॥ 25॥

ततो माधवदासस्तु बलवानभवत्क्षणात्।
तेनैव साकमागत्य समायातो मठान्तिके॥ 26॥

तत्रैव निवसन् देवं चिन्त्यमानो दिवा निशम्।
निनाय बहुवर्षाणि पलवन् मुदितात्मना॥ 27॥

एकदा माधवो भक्तो निवसन् तत्र वै पुरे।
भिक्षामादाय भोक्तव्यमिति कृत्वा व्रतं तु सः॥ 28॥

पर्यटन् नगरे नित्यं भिक्षामादाय सर्वतः।
भुक्त्वोवास सुखी तत्र चैकस्मिन् दिवसे स तु॥ 29॥

स्थितैका तत्र नगरे [4]महाचण्डातिकर्कशा।
महाधनवती दिष्ट्या दानभोगविवर्ज्जिता॥ 30॥

तस्या गृहं गतो भक्तो माधवोऽन्नं च भिक्षितुम्।
भिक्षां च मां प्रदेहीति प्रोच्चचारा विदूरतः॥ 31॥

श्रुत्वापि न च शुश्राव लिपन्ती चाङ्गनं निजम्।
पुनः प्रोवाच देहीति सा श्रुत्वापि न चाब्रवीत्॥ 32॥

[5](ततः प्रोवाच भक्तस्तु पुनर्देहीति सा तदा।
जाज्वल्यमाना क्रोधेन ददौ गालीरनेकशः॥ 33॥)

पुनर्देहीति स प्राह श्रुत्वापि न चाब्रवीत्[6]।
उत्थाय दक्षिणं हस्तं लेपिन्यास हितं रुषा॥ 34॥

---

1. काष्टणाः – ख।
2. तदा – ख।
3. ततः – क।
4. अति कर्कसा – ख, ग।
5. ख – मध्ये लुप्तः पाठः।
6. साथ प्रदुद्रवे – ख।

ततो दृष्ट्वा तु तां चण्डीं हन्तुकामां भयङ्करीम्।
पलायित्वा गृहद्वाराद्बहिरागत्य संस्थितः॥ 35॥

तत्रापि सा समायाता हन्तुं तं सोऽपि च [1]द्रुतम्।
पलायनं चकाराथ सा तु तामेव लेपिनीम्॥ 36॥

तमुद्दिश्य प्रचिक्षेप सा गत्वाथ तदन्तिके।
माधवस्य ततः शीघ्रं परावृत्य स लेपनीम्॥ 37॥

गृहीत्वा दुद्रुवे भक्तः कर्कशापि न्यवर्तत।
गालिदानं प्रकुर्वन्ती क्रोधेन स्फुरिताधरा॥ 38॥

अथ माधवदासस्तु साधुभावात्स तां स्त्रियम्।
उपकर्तुं मनश्चक्रे गत्वोदधितटे स्वयम्॥ 39॥

प्रक्षालनैश्च बहुभिः शुल्कीकृत्य लेपिनीम्।
शोषयित्वा तपेवर्तीं विधाय बहुशस्ततः॥ 40॥

विक्रीय कतिचित्तस्य क्रीत्वाज्यमार्तिकांस्ततः।
दीपान्निर्माय संध्यायां श्रीजगन्नाथमन्दिरे॥ 41॥

प्रक्षाल्य प्रददौ प्रेम्णा सङ्कल्पं मनसाकरोत्[2]।
तस्यास्त्वं भो जगन्नाथ सुप्रसन्नो भव प्रभो॥ 42॥

अज्ञानतिमिरान्धायाज्ञानं भवतु निर्भयम्[3]।
दाने तस्या मतिर्भूयादिह जन्मनि सर्वदा॥ 43॥

उपभोगो धनस्यास्य दीपदानप्रसादतः।
एवं सङ्कल्पं स ददौ दीपांस्तत्र मठे द्विजः॥ 44॥

तत्क्षणादेव तस्यास्तुपश्चात्तापो महानभूत्।
उत्पन्नं हृदि विज्ञानं वृथैवेदं धनं मम॥ 45॥

न ददामि विशिष्टेभ्यो न भुञ्जामि[4] स्वयं पुनः।
अथैकः साधुरायातस्तस्मै गालीरदामहम्॥ 46॥

अतो मत्सदृशी लोके नान्या दुर्भाग्यशालिनी।
धिङ् तां मूर्खां यदेतावद्धनं प्राप्यापि पुष्कलम्॥ 47॥

---

1. चाद्भुतम् – ख, ग।
2. करोतु – ख।
3. मुक्तिदम् – क।
4. भुनक्ति – क।

न दीयते भुज्यते वा तस्या जन्मैव मे मृषा।
इति चिन्तापरा रात्रौ लेभे निद्रां[1] न कर्कशा॥ 48॥

प्रातरुत्थाय सम्मार्ज्य गृहद्वारं तथाङ्गणम्।
अन्नानि वस्त्र[2]द्रव्याणि निष्कास्य स्वगृहात्तु सा॥ 49॥

दीनानाथदरिद्रेभ्यो साधुभ्यो ददती मुदा।
चिन्तयामास मनसा कदा पश्यामि तादृशम्॥ 50॥

यस्मै गालिर्यथा दत्ता याचमानाय साधवे।
मिलिष्यति यदा दैवात् तोषयिष्यामि सर्वथा॥ 51॥

एवं चित्ते चिन्तयन्ती द्वारदेशे समागता।
अथ माधवदासस्तु ज्ञातुं तच्चेष्टितं पुनः॥ 52॥

आयातस्तेन मार्गेण कर्कशापि ददर्श तम्।
दूरादागत्य [3]न्यपतत्पादयोरतिभक्तितः॥ 53॥

क्षमस्वाद्यापराधान्मे मूर्खायास्त्वं दयानिधे।
यत्पूर्वेऽद्युर्मया दत्ता गालयस्ते निरागसे॥ 54॥

अद्यागच्छ गृहे नाथ दयां कुरु ममोपरि।
इत्युक्त्वा तं करे धृत्वा निनाय निजमन्दिरे॥ 55॥

सोऽपि मत्वा दीपदानमाहात्म्यं तद्गृहे गतः।
तद्दिने सर्वमन्नादि स्वीकृत्य प्रददौ स्वयम्॥ 56॥

उवाच तस्मै मातस्त्वं साधुसेवापरायणा।
हरिभक्तिरता भूत्वा समुद्धटकुलं निजम्॥ 57॥

इत्युक्त्वा निर्ययौ तस्या गेहात्स माधवो द्विजः।
ब्राह्मणी सापि सत्कर्म्मनिरता भक्तिमत्यभूत्॥ 58॥

भुक्त्वा भोगानशेषांश्च मृता हरिपुरं ययौ॥ 59॥

इति श्रीभगवद्भक्तिमाहात्म्ये माधवदासचरितं नामाष्टनवतितमः सर्गः॥ 98॥

❊ ❊ ❊

---

1. निशं – क।
2. न तु – ख।
3. निपतत् – ख, ग।

नवनवतितमः सर्गः

॥ माधवदासचरितम ॥

अपरं भक्तिमाहात्म्यं वक्ष्यामि परमाद्भुतम्।
श्रीमन्माधवदासस्य शृण्वतां प्रीतिवर्द्धनम्॥ 1 ॥

एकदा माधवो यात्रां कुर्वन्काशीमुपागतः।
तत्र कृत्वाऽखिलां यात्रामुवास कतिवत्सरान्॥ 2 ॥

एकदा तत्र चायातः सस्त्रीकोऽप्यतिगर्वितः[1]।
मया पराजिताः सर्वे काशीं जेतुमितो गतः॥ 3 ॥

इत्येवं भाषमाणस्स पण्डितानां सदो गतः।
तत्राप्युवाच सर्वांस्तान्पण्डितानतिगर्वितः॥ 4 ॥

अहं जेतुं समायातो युष्मान्नैवात्र संशयः।
विवदध्वं मया सार्द्धं जयपत्रं प्रयच्छ वा॥ 5 ॥

इति श्रुत्वा वचस्तस्य महाहङ्कारसंयुतम्।
उपहासपराः सर्वे पण्डितास्तमथाब्रुवन्॥ 6 ॥

अहो नैव [2]वयं सर्वे त्वया विवदितुं क्षमाः।
अस्त्येकः पण्डितः काश्यां बिन्दुमाधवसन्निधौ॥ 7 ॥

नाम्नास्ति माधवदासस्तु सिद्धः सर्वज्ञ एव सः।
तव तेन विवादे तु यदि तस्य पराजयः॥ 8 ॥

तदा वयं जिता एव भवता नात्र संशयः।
तस्मात्त्वं निकटे गच्छ माधवस्य द्विजोत्तम॥ 9 ॥

इति श्रुत्वा वचस्तेषां पण्डितानां स वै द्विजः।
ययौ माधवदासस्य सन्निधिं तत्र चाब्रवीत्॥ 10 ॥

अहं जित्वाखिलां [3]पृथ्वीं काशीं जेतुमिहागतः।
अत्रत्याः पण्डिताः सर्वे त्वामाहुः सर्ववित्तमम्[4]॥ 11 ॥

त्वज्जये जयिनः सर्वे विजितास्त्वत्पराजये।
अतस्त्वं विवदस्वाद्य यथाशक्ति मया सह॥ 12 ॥

---

1. हर्षितः – ख, ग।
2. त्वया – ख।
3. पृथिवी – क,ख।
4. शास्त्रवितम् – ख।

नो चेत्पराजितोऽनेन पण्डितेनेति पत्रकम्।
लिखित्वा देहि मे यामि दर्शयित्वा च तानहम्॥ 13॥

श्रुत्वा मधवदासस्तु तदुक्तमतिहर्षितः।
लिखित्वा प्रददौ पत्रं स्वपराजयबोधकम्॥ 14॥

नीत्वा तत्पत्रमायातः स द्विजो विदुषां सभाम्।
ददौ तत्र तु तत्पत्रं [1]विद्वज्जनसभासु सः॥ 15॥

सर्वे तत्र तु विद्वांसो ददृशुः पत्रमुत्तमम्।
जितो मया पण्डितोऽयमित्यक्षरपरिस्फुटम्॥ 16॥

ततस्ते जहसुः सर्वे तं द्विजं प्राहुरादरात्।
अहोऽत्र लिखितं चान्यद्भवान्ब्रूते तदन्यथा॥ 17॥

इति श्रुत्वा वचस्तेषां नीत्वा पत्रं द्विजः स तु।
परावृत्यागतस्तत्र यत्रासीन्माधवः स तु॥ 18॥

दृष्ट्वा माधवदासं तु भर्त्सयन्निदमब्रवीत्।
अहो धैर्यं समालम्ब्य किमिदं वञ्चितस्त्वया॥ 19॥

विपरीतप्रलेखोऽयं लिखितो यस्त्वया पुनः।
तस्य दण्डं प्रदास्यामि भवतो नात्र संशयः॥ 20॥

विवादं क्रियतामद्य पणस्तत्र निशम्यताम्।
यश्चावयोर्विवादे तु न्यायतः स्यात्पराजितः॥ 21॥

गर्द्दभारोहणं तस्य [2]पणश्चातःपरं ध्रुवम्।
श्रुत्वा माधवदासस्तु द्विजं प्राह विनीतवत्॥ 22॥

भवदुक्तं करिष्यामि सर्वं नास्त्यत्र संशयः।
परन्तु स्नात्वा गङ्गायामागमिष्याम्यहं द्रुतम्॥ 23॥

इत्युक्त्वा माधवो भक्तो जगन्नाथं स्मरन्हृदि।
जगाम जाह्नवीतोये स्नातुं चिन्तासमाकुलः॥ 26॥

अथ माधवदासस्य शिष्यरूपं विधाय[3] च।
हरिरेवागतस्तत्र विवादाय द्विजेन वै॥ 25॥

---

1. विद्वन्मम सदागतः – क, ख।
2. पुनः – क।
3. धरणं च – ख।

स्वरायारोहणं कृत्वा विवादमकरोद् द्विजः।
अथ तत्र समायाताः कतिचित्पण्डिता जनाः॥ 26॥

मध्यस्थास्ते तयोर्वादं दृष्ट्वा परमविस्मिताः।
साधु साध्विति च प्रोचुः ज्ञात्वोभौ शास्त्रवित्तमौ॥ 27॥

अथ माधवदासस्य शिष्यरूपधरेण च।
पराजितो द्विजः शास्त्री यः काशीं जेतुमागतः॥ 28॥

स्वयं मेने स [1]चानेन जितोऽहं नात्र संशयः।
खरमारोढुमुद्युक्तो द्विजस्तत्कालमेव तु॥ 29॥

श्रीमन्माधवदासस्तु स्नात्वायातो ददर्श तम्।
द्विजं निवारयामास गर्दभारोहणात्स्वयम्॥ 30॥

भर्त्सयामास शिष्यं च किं विप्रमवमन्यसे।
इत्युक्तः सोऽथ शिष्यस्तु तूष्णीं स्थित्वा बहिर्गतः॥ 31॥

अन्तर्दधे स भगवान् तस्य शिष्यस्तु यः स्थितः।
सोऽपि तत्र समायातः श्रुत्वा द्रष्टुं महाद्भुतम्॥ 32॥

अथ सर्वे समायाताः श्रुत्वैतदद्भुतं महत्।
द्रष्टुं माधवदासस्य शिष्यं शास्त्रविदुत्तमम्॥ 33॥

ददृशुस्तं महामूर्खं शिष्यं प्राहुर्जनास्तुतम्।
कथं त्वया जितः शास्त्री कुत्र वादो बभूव तम्॥ 34॥

इति पृष्ठस्तु तैः सर्वैः प्राह शिष्यो हसन्निव।
किं ब्रुवन्ति भवन्तो वै भ्रान्ता इव विचेतसः॥ 35॥

योऽहमाजन्मतो नैव जानेऽक्षरमपि ध्रुवम्।
सोऽहमेतस्य [2]शास्त्रस्य विषयः स्यां कथं पुनः॥ 36॥

इति श्रुत्वा वचस्सर्वे सत्यं मत्वातिविस्मिताः।
मत्वा माधवभक्तेस्तु माहात्म्यं स्वगृहं ययुः॥ 37॥

सोऽपि विप्रस्तु तत्कालं ज्ञात्वैतत्परमाद्भुतम्।
स्तुत्वा माधवदासं तु जगाम निजमन्दिरम्॥ 38॥

---

1. स्वयं चापि समेनैव जिताहं – क, ख। 2. पुश्नस्य विधयः त्वां – क।

एवं माधवदास्यस्य भक्त्या श्रीपुरुषोत्तमः।
वशी भूत्वा स्थितो नित्यं सहैव सत्सहायनः॥ 39॥

श्यामः कमलपत्राक्षो भक्तानां दृष्टिगोचरः।
परन्तु माधवो नैव तं ददर्श हरिं दृशा॥ 40॥

एकदा मथुरायाः समागच्छन्पथि स्थितः॥
विश्रामार्थं तरोर्मूले तस्थौ सोऽति पिपासितः॥ 41॥

तत्रैकां स महावृद्धां ददर्शाति दयान्विताम्।
वैष्णवीं पथिकेभ्यस्तु [1]ददतीमन्नमम्बु च॥ 42॥

सा दृष्ट्वा तं महाभक्तं परिश्रान्तं क्षुधार्दितम्।
तं चापि श्यामलं बालं पद्माक्षं सुपिपासितम्॥ 43॥

शीघ्रं जलं समादाय ददौ तस्मै सुचर्वणम्।
अथ तं बालकं दृष्ट्वा शुशोचातीव[2] दुःखिता॥ 44॥

कस्यास्त्वं मन्दभाग्याया इदृक् पुत्रो वियोजितः।
कथं जीवति सा वत्स यस्यास्त्वं च सुहृत्सुतः॥ 45॥

इत्येवं शोचमानां तां [3]माधवो वाक्यमब्रवीत्।
किं शोचसि महावृद्धे कथयस्व ममाग्रतः॥ 46॥

इति श्रुत्वाब्रवीद्वृद्धा यस्या एष सुतः शुभः।
त्वया यो नीह्रियते भक्त तां शोचम्यति दुर्भगाम्॥ 47॥

इति तस्या वचः श्रुत्वा मिथ्या मत्वा स्वमानसे।
विवेदैषा जरादोषैर्यथेच्छं भाषते वचः॥ 48॥

इति निश्चित्य भक्तः स माधवो निजसम्मुखे।
दत्त्वासनं जगन्नाथमुपवेश्य जलं ददौ॥ 49॥

पादप्रक्षालनं चक्रे मनसा तु स माधवः।
भोजनार्थं स पात्रं च तदग्रे स न्यवेशयत्॥ 50॥

ततो वृद्धार्प्पितं तत्र चर्व्वणं हरये मुदा।
अर्पयामास मनसा स बालो बुभुजे मुदा॥ 51॥

---

1. मे वचः – क।
2. सुशोच – ख, ग।
3. साधवो – ख।

सा वृद्धा तु पुनर्दृष्ट्वा बालसत्कारणं द्विजः।
प्रोवाच माधवं भक्तराजं स्तुति[1]पुरःसरम्॥ 52॥

त्वं साधुनात्र संदेहो यत्पूर्वं शिशुवेऽधुना।
सर्वं समर्पितं पश्चात्स्वयमन्नादि युज्यते॥ 53॥

एवं सा श्री हरेर्माया मोहिता जरती हृदि।
अमन्यत तु जरत्या[2] दत्तमन्नं स वैष्णवः॥ 54॥

भुक्त्वा तु हरिणा सार्द्धं ययौ तत्स्थानतोऽग्रतः॥ 55॥

इति श्रीभगवद्भक्तिमाहात्म्ये माधवदासचरितं नाम नवनवतितमः सर्गः॥ 99॥

❊ ❊ ❊

शततमः सर्गः

॥ माधवदासचरितम्॥

अथ तस्माद् व्रजन्स्थानान्माधवो दिवसान्तरे।
मध्याह्ने कुत्रचिद्ग्रामे समायतो जलान्तिके॥ 1॥

उपविश्य हरिं तत्र सम्पूज्यान्नं समर्प्य सः।
चलितो वैश्य एकस्तु वैष्णवस्तमुवाच ह॥ 2॥

साधो मम गृहे किञ्चिद्भुक्त्वा गन्तुं ततोऽर्हसि।
इत्युक्त्वा त्वरितं गन्तुं स वैश्यो निर्ययौ ततः॥ 3॥

दैवान्मार्गे राजभृत्यैर्नीतोऽसौ राजमन्दिरे।
स वै माधवदासस्तु समायातो वणिग्गृहे॥ 4॥

तत्र वैश्यसती दृष्ट्वा माधवं वैष्णवोत्तमम्।
हस्तं गृहीत्वा निन्ये सा गृहमध्येऽति भक्तितः॥ 5॥

तत्रैकश्च स्थितो भक्त्या वणिजा रक्षितो गृहे।
तमाह वैश्यपत्नी सा साधुरेकः समागतः॥ 6॥

इति श्रुत्वा वचस्तस्याः साधुराह स तां स्त्रियम्।
नात्र स्थलं द्वितीयस्य योग्यमस्तीति सा पुनः॥ 7॥

---

1. परस्परं – क।
2. वृद्धायादत्तमन्नं – क,ख।

श्रुत्वा चुकोप मनसा माधवं प्राह भक्तितः।
अत्रैव भगवंस्तिष्ठ हरये भोगमर्पय॥ 8॥

इति श्रुत्वा वचस्तस्या माधवस्तामुवाच ह।
न मे भोक्तुं मनो भद्रे पयः किञ्चित्समर्प्य॥ 9॥

इत्युक्त्वा ययौ दत्त्वा कृताञ्जलिपुटा स्थिता।
माधवोऽपि पयः पीत्वा कथयित्वा स्वनाम च॥ 10॥

जगाम मथुरामार्गं दत्त्वा तस्यै शुभाशिषम्[1]।
त्वं साधुपुत्रिणी भूयाः शुभगा धर्म्मतत्परा॥ 11॥

अथ वैश्योऽपि सम्प्राप्तः श्रुत्वा पत्नीमुखाद्भुतम्।
गृहस्थितेन भक्तेन सह गत्वा प्रसादयन्॥ 12॥

निवर्तयितुमारेभे न निवृत्तो बभूव सः।
पुत्रे तव समुत्पन्ने समेष्यामि न संशयः॥ 13॥

कृत्वाहं मथुरायात्रां दृष्ट्वा श्रीकृष्णमद्भुतम्।
आगमिष्यामि ते वैश्य[2] सत्यं याहि निजं गृहम्॥ 14॥

इत्युक्त्वा स गतो भक्तो माधवस्तु यदृच्छया।
वैश्योऽपि गृहमागत्य साधुसेवापरोऽभवत्॥ 15॥

सम्प्राप्य चाशिषं तस्य जन्मबन्ध्यापि वैश्यजा।
सुषुवे वैष्णवं पुत्रं वैश्यवंशे यशस्विनम्॥ 16॥

अथ माधवदासस्तु मथुरायां गतः सुखी।
दृष्ट्वा तां मथुरां रम्यां [3]यमुनायां ममज्ज ह॥ 17॥

स्नात्वा श्रीभगवान्मूर्तेः समीपे संस्थितोऽभवत्।
अथ तत्रागतः कश्चिद्वैष्णवोऽतीवभक्तिमान्॥ 18॥

भर्ज्जितं चणकान्नं स सर्वेभ्यः प्रददन्मुदा।
ददौ माधवदासाय सोऽपि जग्राह भक्तितः॥ 19॥

नीत्वा तद्यमुनातीरे गत्वा पादौ विशोध्य च।
सोपानोपरि संविश्य श्रीकृष्णायार्पयश्च तत्॥ 20॥

---

1. सुभाषितम् – ख, ग। 2. वैश्मसस्त्वं – क।
3. महानन्दे – ख, क।

अथ तस्मिन् क्षणे भक्तः पूजकः स्वहरेर्मठे।
निवेद्य च महाभोगं बहिरागत्य संस्थितः॥ 21॥
तावन्माधवदासेन चणकान्नं निवेदितम्।
स्थाल्यां प्राप्तं च तत्तत्र बुभुजे भक्तवत्सलः॥ 22॥
किञ्चित्स्थाल्यां स्थितं भुक्तशेषं चणकमुत्तमम्।
अथ ते पूजकास्सर्वे समागत्य मठे पुनः॥ 23॥
ददृशुश्चणकं स्थाल्यां भर्जितं परमाद्भुतम्।
दृष्ट्वा संशयमापन्नः कस्मादेतदिहागतम्॥ 24॥
इति चिन्ताकुलास्तेषां प्रधानः पूजको द्विजः।
त्यक्त्वान्नमुदकं चैव सुष्वाप निशि चिन्तितः॥ 25॥
अथ स्वप्ने तु श्रीकृष्णस्तमुवाच हसन्निव।
विप्र मा कुरु चिन्तां त्वं शृणु तच्चणकागमम्॥ 26॥
नीलाचलाद्वियातो मम प्राणप्रियो द्विजः।
नाम्ना माधवदासस्तु ते तत्समये क्वचित्॥ 27॥
सम्प्राप्तं चणकं मह्यं समर्पितमहं तु तत्।
भुक्त्वा सर्वं ततः किञ्चित्स्थाल्यां रक्षितवानिति[1]॥ 28॥
जानीहि सत्यमेतत्त्वं न ते दोषोऽस्ति कश्चन।
इति स्वप्नं निरीक्ष्यासौ पूजकः प्रातरुत्थितः॥ 29॥
उक्त्वा स्वप्नं पूजकेभ्यो गतो माधवसन्निधौ।
तमानीय स्वगेहं स पूजकः प्रत्यहं ततः॥ 30॥
महाप्रसादतः सर्वं वस्तु माधवशर्म्मणे।
दत्त्वा स्वयं तु बुभुजे परिवारसमन्वितः॥ 31॥
तदा माधवदासं तेऽमन्यन्तातिप्रियं हरेः।
भक्तिं चक्रुः सुमहतीं मथुरावैष्णवाः जनाः॥ 32॥
अथैकस्मिन् दिने भक्तो माधवः पर्य्यटन्वने।
[2]भाण्डीरवृक्षनिकटे समागत्य स्थितोऽभवत्॥ 33॥
तत्रासीत् क्षेमनामैको भक्तः सिद्ध इवापरः।
तदन्तिके समागत्य तस्थौ तेन च सत्कृतः॥ 34॥

1. रक्षितवानथ – ख, ग।
2. पाण्डीर – क।

अथ तत्र ददर्शासावन्नमाच्छादितं दृढम्।
उवाच माधवः क्षेमं किमिदं दृढमुद्रितम्॥ 35॥

इत्युक्तः क्षेमनामापि प्राह तं माधवं द्विजम्।
भगवन्न मे तन्मे भोक्तुं दत्तं च साधुभिः॥ 36॥

मुद्रयित्वा [1]तद्वै स्थाप्यते निशि भुज्यते।
इति श्रुत्वा पुन प्राह माधवो वाक्यमद्भुतम्॥ 37॥

अहो एवं न कर्तव्यं दिवैव भोजनं कुरु।
उधृत्य तस्मात्साधुभ्यो दत्त्वा तदवशेषितम्॥ 38॥

स्वयं भुंक्ष्व न चेदेतदन्ने तु कृमयो ध्रुवम्।
न मन्यसे चेत्पश्याद्य समुद्घाट्य पिधानकम्॥ 39॥

इति श्रुत्वा वचस्तस्य क्षेमोऽपि स्वयमुत्थितः।
उद्घाट्यान्नं ददर्शाथ कृमीनतिविगर्हितान्॥ 40॥

तदा स मेने क्षेमोऽपि स्वकर्मपरिनिन्दितम्।
तत्याज तादृशीं वृत्तिं दिनान्नं प्राप्य भिक्षवे॥ 41॥

दत्त्वा भक्त्याथ बुभुजे तदारभ्याति भक्तिमान्।
क्षेमोऽपि माधवदासस्य भक्तिं चक्रे परां स्वयम्॥ 42॥

एवं माधवदासस्तु मथुरायां कियद्दिनम्।
उषित्वा वनयात्रायां [2]हरिणा नागरदिषु॥ 43॥

शृण्वन्श्रीकृष्णचरितमुवास कतिचिद्दिनम्।
ततः कृत्वाखिलां यात्रां नीलाचलमथागमत्॥ 44॥

मार्गे तस्य तु वैश्यस्य समागत्य गृहे स्वयम्।
कृतार्थो कृत्य तं वैश्यं पुरुषोत्तमपुरं ययौ॥ 45॥

तत्र नीत्वाखिलं जन्म मृतोऽगान्मन्दिरं हरेः।
हरिभक्तिप्रसादेन यत्सुरैरपि दुर्लभम्॥ 46॥

इति श्रीभगवद्भक्तिमाहात्म्ये माधवदासचरितं नाम शततमः सर्गः॥ 100॥

❊ ❊ ❊

1. तस्मै – क।
2. हरियान – क, ख।

एकाधिकशततमः सर्गः

॥ रघुनाथदासचरितम् ॥

अथापरं प्रवक्ष्यामि भक्तिमाहात्म्यमुत्तमम्।
यस्य स्मरणमात्रेण हरिभक्तिर्भवेद्दृढम्॥ 1 ॥

राजासीदुत्कले देशे धर्म्मिष्ठो वैष्णवोत्तमः।
तस्यासीत्तनयश्चैको रघुनाथ इति श्रुतः॥ 2 ॥

बाल्यादेव स भक्तान्वै पूजयामास भक्तितः।
अथ कालेन कियता रघुनाथो युवाऽभवत्॥ 3 ॥

युवराजं विधातुं तं राजा स्वमनसाऽकरोत्।
रघुनाथस्तु तच्छ्रुत्वा पितरं [1]प्रत्यषेधयत्॥ 4 ॥

किं मे राज्येन भोः तात देह्य यस्मै सुताय तत्।
इत्युक्त्वा स परित्यज्य सर्वं राज्यं पितुर्धनम्॥ 5 ॥

श्रीजगन्नाथनिकटे सिंहद्वारि स्थितोऽभवत्।
अयाचित्वं समालम्ब्य स्थितो हृदि हरिं भजन्॥ 6 ॥

[2]पित्रा सम्प्रेषितं द्रव्यं वस्त्रमन्नादिकं तु यत्।
तत्सर्वं प्रददौ दीनानाथेभ्यो भक्तिपूर्वकम्॥ 7 ॥

एवं स निरपेक्षो वै रघुनाथो हरिं भजन्।
तस्थौ श्रीमज्जगन्नाथमन्दिरे सिंहसन्निधौ॥ 8 ॥

एकदा माघमासे तु रघुनाथो महानिशि।
सुप्ते लोकेऽथ शीतार्तो वेपमानोऽपतद्भुवि॥ 9 ॥

तदा श्रीमज्जगन्नाथो महावैष्णवरूपधृक्।
समागत्य स्वकं वस्त्रं शीतत्राणं ददौ स्वयम्॥ 10 ॥

प्रातरुत्थाय तत्रत्या ददृशुस्तन्महाद्भुतम्।
ऊचुस्तं भोः कुतश्चैतद्वस्त्रं प्राप्तं वदस्व तत्॥ 11 ॥

श्रुत्वा प्रोवाच तान्सर्वान्रघुनाथो हसन्निव।
अहो रात्रौ तु शीतार्तं ज्ञात्वा मां कोप्यदादिदम्॥ 12 ॥

---

1. वोधयत् – ख, ग। 2. ग, ख मध्ये लुप्तः पाठः।

श्रुत्वा तद्वचनं सर्वं जगन्नाथस्य चेष्टितम्।
भक्ताः प्रणेमुस्तं सर्वे रघुनाथं च वैष्णवाः॥ 13॥

स एकदा समायातो मथुरायां जनैः सह।
राधाकुण्डे स्थितो नित्यमयाचितव्रतं वहन्॥ 14॥

श्रीकृष्णं मनसा ध्यायन् कुर्वन्मानसपूजनम्।
तस्थौ बहुदिनं तत्र राधाकुण्डेति भक्तितः॥ 15॥

एकदा मनसार्च्चायां दुग्धं चातिघनं श्रितम्।
बहुलं हरये दत्त्वा मनसा तत्पुनः स्वयम्॥ 16॥

बुभुजे सर्वमेवैतन्महाभक्तिपुरस्सरम्।
अथ तस्मिन् दिने तस्य रघुनाथस्य चोदरे॥ 17॥

उत्पन्ना महती पीडा ततो वैद्यमथानयत्।
वैद्यस्तु नारिकां दृष्ट्वा[1]जीर्णं रोगमुवाच तम्॥ 18॥

तत्रापि पयसो नूनं घनीभूतं श्रितस्य च।
श्रुत्वा तद्भिषजो वाक्यं रघुनाथोऽब्रवीद्वचः॥ 19॥

निश्युपोषित एवाहं नाद्य किञ्चिदखादितम्[2]।
कथमेतदजीर्णं मां महाश्चर्यं वदस्व हो॥ 20॥

इति श्रुत्वा ततो वैद्यो रघुनाथमुवाच ह।
भुंक्ष्वेदमौषधं सद्योऽजीर्णदुग्धं तवोदरात्॥ 21॥

निपतिष्यति चात्रैव वमनेन तवोदरात्।
इत्यक्त्वा प्रददौ तूर्णं रघुनाथश्चखाद तत्॥ 22॥

अथ क्षणेन तत्रैव घनीभूतं पयः श्रितम्।
निःपपातोदरात्तस्य तदौषधबलात्तदा[3]॥ 23॥

दृष्ट्वैतत्परमाश्चर्यं सर्वे विस्मयमागताः।
किमिदं महदाश्चार्यमित्यूचुस्ते मुदा जनाः॥ 24॥

अथ तस्मिन् क्षणे कश्चिदायातो वृद्धवैष्णवः।
श्रुत्वा तदद्भुतं प्राह रघुनाथ हसन्निव॥ 25॥

---

1. धृत्वा – ख, ग।
2. दुःखादिकम् – क।
3. तव – ख।

अर्पयित्वा तु दृश्ये पयो बहुघनीकृतम्।
अद्य त्वां वैष्णवेभ्यस्तत्स्वयं भुक्तं त्वया[1] यतः॥ 26॥

ततोऽजीर्णेन खिन्नोऽभूत्सत्यं वदति तेऽभिषक्।
श्रुत्वैतत्साधुवाक्यं स रघुनाथ उवाच तम्॥ 27॥

सत्यमेतन्न सन्देहः [2]परन्तु न पयस्तथा।
मानसेनोपचारेण पूजायां यादृशं पयः॥ 28॥

समर्प्य भुक्तं सर्वं तददत्त्वैव तु लोभतः।
सत्यमेतन्न सन्देहो नान्यं किञ्चिन्मुखेर्पितम्॥ 29॥

श्रुत्वैतद्वचनं तस्य रघुनाथस्य वै जनाः।
वृद्धसाधोरपि तदा विस्मयं परमं ययुः॥ 30॥

एवमादीनि कर्माणि राधाकुण्डे तु भूयसः।
जगाम हरिसान्निध्यमन्ते योगिसुदुर्लभम्॥ 31॥

इति श्रीभगवद्भक्तिमाहात्म्ये रघुनाथदासचरितं नामैकाधिकशततमः सर्गः॥ 101॥

❊ ❊ ❊

द्व्यधिकशततमः सर्गः

॥ नित्यानन्दचरितम्॥

अथापरो बभूवैको गोडे देशे द्विजोत्तमः।
नित्यानन्देति नाम्ना स नित्यानन्दमयः सदा॥ 1॥

भूत्वा ब्रह्मकुलेऽधीत्य वेदशास्त्राणि वै द्विजः।
अध्यापयामास मुदा शिष्यान्पुत्रानिवौरसान्॥ 2॥

दृष्ट्वा भागवतं शास्त्रं विप्रस्त्वेकदिने क्वचित्।
पूर्वपुण्यप्रभावेण जातं[3] चातीव तत्प्रियम्॥ 3॥

तदारभ्य द्विजः सोऽपि नित्यानन्दोऽति पण्डितः।
पठन्भागवतं नित्यं चिन्तयामास वै हरिम्॥ 4॥

---

1. यतो यत – ख, ग।
2. ऽपिबन्तु पयस्तथा – ख।
3. लग्नं – ख, ग।

एवं चिन्तयतस्तस्य पश्यतः पुस्तकं रहः ।
दिव्यज्ञानं समुत्पन्नं श्रीनित्यानन्दशर्म्मणः ॥ 5 ॥

सर्वं कृष्णमयं विश्वममन्यत हृदि स्वयम् ।
आत्मानमपि श्रीकृष्णं मत्वा नन्दमयोऽभवत् ॥ 6 ॥

दृष्ट्वा निष्ठां भिदा शून्यो बभूवातीव तन्मयः ।
मृते जातेऽथवा पुत्रे मित्रे रात्रौ समाः सदा ॥ 7 ॥

शीतोष्णानलतोयेषु नाभूद्भेदमतिः क्वचित् ।
क्षुत्पिपासा विनिर्मुक्तो बभूवातिसुखी तदा[1] ॥ 8 ॥

सर्वं कृष्णमयं जानन् वारुणीमदमत्तवत् ।
भाषते नाति हसति वदति स्म यथा तथा ॥ 9 ॥

एकदा स बहिर्ग्रामे शुष्के तृणचये स्थितः ।
अकस्मात्तत्र दावाग्निर्लग्नो वायुसमीरितः ॥ 10 ॥

तस्यासनतले प्राप्तो लग्नः शुष्कतृणेऽनलः ।
समुत्तस्थौ महाज्वाला नित्यानन्दं न चावृणीत् ॥ 11 ॥

तया समावृतो भक्तो न चचाल ततः क्वचित् ।
दृष्ट्वा तत्परमाश्चर्य्यं सर्वे ते तत्र संस्थिताः ॥ 12 ॥

यावदन्तिकमायाति तावदग्निः समं ययौ ।
नित्यानन्दस्तु तत्रैव स्थितोऽतीव मुदान्वितः ॥ 13 ॥

अथोपविशतस्तस्याधस्तच्छुष्कं तृणं तु यत् ।
न तु दग्धं तथैवासीत्तदङ्गस्पर्शतो ध्रुवम् ॥ 14 ॥

एवं भरतयोगी च बभूव द्विजसत्तमः ।
भुक्त्वा प्रारब्धमखिलं ययौ श्रीकृष्णमेव सः ॥ 15 ॥

इति श्रीमद्भक्तिमाहात्म्ये नित्यानन्दचरितं नाम द्व्यधिकशततमः सर्गः ॥ 102 ॥

❊ ❊ ❊

---

1. सदा – क।

त्र्यधिकशततमः सर्गः

॥ श्रीकृष्णचैतन्यप्रभुचरितम् ॥

अथापरो बङ्गदेशे योऽभूद्भक्तिमतां वरः ।
कृष्णचैतन्यनाम्ना वै वक्ष्ये तस्य कथां शुभाम्[1] ॥ 1 ॥

येन संस्थापिता भक्तिर्हरेर्गोडेऽपि शाश्वती ।
गृहस्थ एव विप्रोऽसौ विद्यामभ्यस्य चाखिलाम् ॥ 2 ॥

कृतदारो हरिं भक्त्या पूजयन्संस्थितो गृहे ।
श्रीकृष्णोऽहमिति ध्यायन् तद्रूपोऽभूदिद्वजोत्तमः ॥ 3 ॥

परिनिन्ये स दारान्वै बहुशोऽति प्रतिष्ठितः ।
तैर्दारैः सह श्रीकृष्णलीलामनुचचार सः ॥ 4 ॥

कृत्वा कुञ्जनदीतीरे स्त्रीभिर्वंशीं निनादयन् ।
एवं भावयतस्तस्य कृष्णाहमिति निश्चयात् ॥ 5 ॥

प्रययुः कतिवर्षाणि निरुद्योगस्य वृत्तये ।
तदैको दुर्ज्जनस्तत्र चिन्तयामास चेतसि ॥ 6 ॥

[2]अहो नायात्ययं क्वापि न च याति च कुत्रचित् ।
कुर्वन्बहुव्ययं नित्यं विहरत्येष निर्भयम् ॥ 7 ॥

कस्मादस्येदृशी सम्पदागच्छति निरन्तरम् ।
इति ज्ञातुं यतिष्येऽद्य यदयं दम्भितोऽस्ति चेत् ॥ 8 ॥

तदा दण्डं ज्ञापयिष्ये कथयित्वा नृपाय तत् ।
इति सञ्चिन्त्य मनसा गत्वा राजसमीपतः ॥ 9 ॥

प्राह तं नृपतिं धूर्त्तो राजन् तव पुरे महान् ।
अनर्थो जायते तत्त्वं निवारयितुमर्हसि ॥ 10 ॥

दण्डं प्रयच्छ धूर्तानां प्रजाः पालय धर्म्मतः ।
एष श्रीकृष्णचैतन्यनामाप्योऽत्रास्ति वैष्णवः ॥ 11 ॥

सोऽतिधूर्त्तो दुराचारी वञ्चयित्वाखिलं जनम् ।
आत्मानं पूजयत्येष मिथ्याचारेण पापकृत् ॥ 12 ॥

---

1. कृष्णचैतन्यनाम्ना प्रभुर्द्गौड देशे द्विजोत्तमः – ख, ग।
2. ख – मध्ये लुप्तपाठः ।

शिष्यांश्चकार सर्वान्स नगरे धनलोभतः ।
स्वयं प्रतिनिशं स्त्रीभिः क्रीडत्येष मदाकुलः ॥ 13 ॥

न जानाति तदा किञ्चिज्जनानां च तदागमम् ।
तस्मात्साधि महाराज धूर्तं दम्भरतं शठम् ॥ 14 ॥

नोचेत्सर्वाः महामोहे निपतिष्यन्ति ते प्रजाः ।
श्रुत्वेदं तद्वचो राजा प्रोवाचाति प्रयत्नवान् ॥ 15 ॥

अहो श्रुतं मयाप्येतद्वैष्णवोऽतीव भक्तिमान् ।
नाम्ना श्रीकृष्णचैतन्यो मत्पुरे वर्ततेऽधुना ॥ 16 ॥

परन्तु नैवं जानामि दुराचारं करोति सः ।
तस्मादद्य निशाभागे त्वया सह तदालयम् ॥ 17 ॥

अहं प्रच्छन्नरूपः सन् गमिष्यामि न संशयः ।
तदा तच्चरितं सर्वं साक्षात्पश्याम्यहं दृशा ॥ 18 ॥

तदा तथा करिष्यामि निग्रहं वाप्यनुग्रहम् ।
इति निश्चित्य धूर्तेन साकं राजा समुत्थितः ॥ 19 ॥

धूर्तोऽपि स्वगृहं गत्वा रात्रौ राजगृहं ययौ ।
अथ राजापि तं धूर्तं नीत्वा रात्रौ महानिशि ॥ 20 ॥

वीरमेकं पदातिं[1] च कृत्वानुचरमाययौ ।
कृष्णचैतन्यभवने दूरात्तं ददृशुश्च ते ॥ 21 ॥

परमाश्चर्य्यरूपं तं हरिभक्तिप्रसादतः ।
धूर्तस्तु तं चतुर्बाहुं शंखचक्रगदाधरम् ॥ 22 ॥

भृकुटीकुटिलाक्षं च दृष्ट्वातीव विमोहितः ।
उक्त्वा नृपं महाराज पश्येदं परमाद्भुतम् ॥ 23 ॥

चतुर्भुजोऽग्रदृष्टोऽयं पश्चात्स षष्टिहायनः ।
द्विभुजः प्राकृतो विप्रः सोऽयं जातो महाप्रभुः ॥ 24 ॥

एवं कथयस्तस्य धूर्तस्य नृपसन्निधौ ।
ब्रह्माण्डं स्फुटितं तत्र तत्क्षणात्स ममार ह ॥ 25 ॥

---

1. वदान्ती – ख, क।

ततो राजातिसन्दिग्धो ददर्श द्विजमद्भुतम्।
द्विभुजं पुण्डरीकाक्षं श्यामं वंशीनिनादिनम्॥ 26॥

प्रसन्नं वनिताभिश्च साक्षाद्देवीभिरावृतम्।
पदातिरपि तं तत्र ददर्श द्विभुजं नरम्॥ 27॥

वृद्धं श्रीकृष्णचैतन्यं स्त्रीसहायं च पूर्ववत्।
ततो राजाति भक्त्या तं प्रणिपत्य द्रुतं ततः॥ 28॥

मृतं धूर्तं समुत्थाप्य स्वमन्दिरमुपागतः।
तत्राप्याश्चर्यतो राजा न सुष्वाप च तां निशाम्॥ 29॥

उवाच पत्न्यै तत्सर्वं कृष्णचैतन्यचेष्टितम्।
अथ प्रभाते चोत्थाय राजा सर्वानथाह्वयन्॥ 30॥

ग्रामवृद्धान् मन्त्रिणश्च पण्डितांश्च पुरोहितान्।
[1](तद्धूर्ततनयं चापि यो मृतो भक्तकोपतः॥ 31॥

ततः सर्वे समायाताः सभायां भूपतेर्जनाः।
राजा सर्वानथोवाच यद्यद् दृष्टं कृतं स्वयम्॥ 32॥)

तद्धूर्तोपगमनं रात्रौ स्वकीयगमनं[2] पुनः।
कृष्णचैतन्यभक्तस्य दर्शनं[3] परमाद्भुतम्॥ 33॥

धूर्तब्राह्मणवाक्यं च तस्य ब्रह्माण्डभेदनम्।
मरणं चापि [4]तस्यैवं पदातेर्दर्शनं यथा॥ 34॥

[5]दृष्टं स्वयं यथा तैश्च सर्वं सर्वानुवाच सः।
श्रुत्वा सर्वे राजवाक्यं मेनिरे परमाद्भुतम्॥ 35॥

तममन्यन्त श्रीकृष्णचैतन्यं[6] भक्तसत्तमम्।
मृतधूर्तस्य पुत्रोऽपि गृहीत्वा स्वपितुः शवम्॥ 36॥

सञ्चकार बहिर्ग्रामे राजा पुनरुवाच तान्।
अहं तु तस्य श्रीकृष्णचैतन्यस्य महाप्रभोः॥ 37॥

---

1. ख मध्ये लुप्तपाठः।
2. स्वकोपरा मनं – क।
3. ददर्श – ख, ग।
4. तमैव – ख, ग।
5. दृष्ट्वा – ख, ग।
6. चेतन्यस्य महाप्रभो – क।

शिष्यो भवामि चाद्यैव भवद्भिश्चानुमोद्यताम्।
इति श्रुत्वा वचस्तस्य राज्ञस्तेऽपि [1]विचार्य तत्॥ 38॥

अन्वमन्यन्त नृपतिं प्रशंसन्तोऽथ वैष्णवम्।
अथ राजा च ते सर्वे तस्मिन्नेव दिने तदा॥ 39॥

कृष्णचैतन्यभवनमाजग्मुश्चातिभक्तितः।
राजा प्रणम्य श्रीकृष्णचैतन्यं परमादरात्॥ 40॥

उक्त्वा सर्वमशेषेण यद्यज्जातं महानिशि।
ततः प्रोवाच नृपतिः कृताञ्जलिपुटः पुनः॥ 41॥

गुरो क्षमस्व मूर्खस्य शाधि मां शरणागतम्।
इदं राज्यमिमे दारा इमे पुत्रा बलं त्विदम्॥ 42॥

तुभ्यमर्पितवानस्मीत्युक्त्वा पादौ पपात सः।
अथैवं मन्त्रिणः सर्वे पुरोधाश्च बभाषिरे॥ 43॥

श्रुत्वा सर्वेरितं कृष्णचैतन्यो वाक्यमब्रवीत्।
वस्तुतो गुरुशिष्यादिव्यवहारो भ्रमो नृणाम्॥ 44॥

तथापि तव बुद्धिश्चेत्करिष्ये निजं नृप।
इत्युक्त्वा प्रददौ मन्त्रं राज्ञे सिद्धिमवाप सः॥ 45॥

उवाच स्वीय धर्मेण कुरु राज्यमकण्टकम्।
श्रीकृष्णं मनसा ध्यायन्नभिमानं विवर्जितः॥ 46॥

जीवमात्रे दयां कुर्वन्देहि दानं निरन्तरम्।
त्वद्वित्तमखिलं नीत्वा पुनस्तुल्यं समर्पितम्॥ 47॥

इत्युक्त्वा विररामासौ गुरुर्वैष्णवसत्तमः।
राजापि सचिवैः सार्द्धं कृतार्थोगात् स्वमन्दिरम्॥ 48॥

अथ श्रीकृष्णचैतन्यो राजार्पितधनं बहु।
ब्राह्मणेभ्यश्च साधुभ्यः सर्वं प्रादाच्च तत्क्षणात्॥ 49॥

ततः स्वयं चिदानन्दे मग्नस्तस्थौ च पूर्ववत्।
एवं श्रीकृष्णचैतन्यो महाभक्तो बभूव सः॥ 50॥

---

1. विचारय – ख।

बङ्गेऽपि स्थापिता येन वैष्णवी भक्तिरुत्तमा।
अद्यापि तस्य ये शिष्या हृष्टास्तिष्ठन्ति वैष्णवाः ॥ 51 ॥

प्रतिष्ठिता गौडदेशे विष्णुभक्तिप्रवर्तकाः ॥ 52 ॥

इति श्रीभगवद्भक्तिमाहात्म्ये श्रीकृष्णचैतन्यप्रभुचरितं नाम त्र्यधिकशततमः सर्गः ॥ 103 ॥

❊ ❊ ❊

चतुरधिकशततमः सर्गः

॥ सूरदासचरितम् ॥

अथ वक्ष्ये कथां रम्यां सूरदासस्य विश्रुताम्।
परमाश्चर्यजनकं हरिभक्तिप्रदायिनीम् ॥ 1 ॥

श्रीकृष्णस्य सखा कश्चित् शूरसेनकुलोद्भवः।
कृष्णेनैव समं सोऽपि द्वारकायां ययौ पुरा[1] ॥ 2 ॥
परन्तु तस्य हृदयं वृन्दावननिवासजम्।
स्मृत्वानन्दं तनोति स्म मुहुः कृष्णमुवाच ह ॥ 3 ॥

कदा गमिष्यसि त्वं भो मधुरायां मया सह।
कदा द्रक्ष्यामि भाण्डीरं कालिन्दीं तं[2] च पर्वतम् ॥ 4 ॥

इत्यहर्निशमेवासौ महोत्कण्ठासमन्वितः।
नालभत द्वारकायां यावज्जीवं तथा सुखम् ॥ 5 ॥

अथ कालेन श्रीकृष्णो द्वारावत्यां यदून्स्वयम्।
नीत्वां जगाम वैकण्ठं तत्रापि स तु यादवः ॥ 6 ॥

वृन्दावनं दिदृक्षुः सन् महोत्कण्ठासमन्वितः।
यदा कृष्णं गमिष्यामि मथुरामित्यभाषत[3] ॥ 7 ॥

[4]नेदं वैकुण्ठभवनं सुखाय मम जायते।
तथा त्वयि स्थिते तत्र कुञ्जे सुखमभूत्पुरा ॥ 8 ॥

---

1. पुरीम् – ख, ग।
2. तव – क।
3. त्वया सह कदा हरेः – ख।
4. ख – मध्ये लुप्तपाठः।

तत्तथानुभविष्यामि त्वया सह कदा हरे।
इति श्रुत्वाथ तद्वाक्यं श्रीकृष्णः प्रहसन्वचः॥ 9॥

प्रोवाच तं महोत्कण्ठं मथुरागमनाय सः।
अहो नाहं गमिष्यामि पूर्वकमथुरापुरीम्॥ 10॥

किन्तु तत्रैव तिष्ठामि परिवारसमन्वितः।
राधया सहितो नित्यं प्रतिकुञ्जं न संशयः॥ 11॥

मथुरानगरी सत्यं वैकुण्ठादपि मे प्रिया।
न तां त्यक्त्वा सुखं क्वापि सखे प्राप्नोम्यहं तथा॥ 12॥

शङ्करस्य विमुक्ताख्या पुरी वाराणसी यथा।
तथा ममापि मथुरा ब्रह्माण्डे नात्र संशयः॥ 13॥

स्मराम्यद्यापि यत्राहं बालो भूत्वा स्थितः पुरा।
मृत्तिकाभक्षणादीनि कृतवान्बाललीलया॥ 14॥

पूतनामारणं चैव शकटस्य च भञ्जनम्।
[1]जमालार्जुनभङ्गश्च बकासुरवधस्तथा॥ 15॥

अघासुरस्य निधनं कालियस्य मदक्षयः।
ब्रह्मसम्मोहनं तद्वद् वृन्दावननिवेशनम्॥ 16॥

[2]प्रलंवधेनुकादिषु हननं गिरिपूजनम्।
गोवर्द्धनाचलोद्धारो रासक्रीडनमेव च॥ 17॥

केशिनो मरणं [3]तद्वन्नन्दादीनां च रक्षणम्।
दावाग्नेः शमनं चैव गोपालैर्गृहनाटनम्॥ 18॥

रासभादेर्विहननं तृणावर्तादिनाशनम्।
एवमादीनि कर्म्माणि स्मृत्वा खिद्येऽहमप्यहो॥ 19॥

कदा तथा विधास्यामीत्येवमुत्कण्ठितोऽस्म्यहम्।
यस्तु तत्र मम प्रेम्णा मम लीलां करोति वै॥ 20॥

अहमेव स मन्तव्यो नात्र कार्या विचारणा।
मम जन्मोत्सवं तत्र स्थित्वा यां कुरुते सती॥ 21॥

---

1. चम – ख, ग।
2. प्रलम्बधेनुकारिष्ट – ख।
3. तद्वच्चाणूराङ्घ्रिनिपातनम् – क।

पुरुषो यस्तु मज्जन्मदिने व्रतपरायणः।
बालरूपं भजेन्मां स मामेवाप्नोति निश्चितम्॥ 22॥

यथा कथञ्चिच्चेत्तत्र यो वा को वापि मानवः।
मथुरायां ततो नाम गृह्णाति स तु मे प्रियः॥ 23॥

त्वं चेज्जिगमिषुस्तत्र शृणु मे वचनं हितम्।
यथा तत्र गतस्त्वं वै तथैवानुभविष्यति॥ 24॥

कलेः सन्ध्यांशसमये मथुरायाः समीपतः।
भूत्वा विप्रकुले त्वं भो गत्वा तां मथुरां पुरीम्॥ 25॥

गायन्ममैव लीलां तां [1]तादृक्सुखमवाप्स्यसि।
यल्लीलां प्राकृतैः पद्यै[2]र्गास्यसि त्वं स्फुटं तदा॥ 26॥

श्रुत्वाऽन्येऽपि मयि प्रेम करिष्यन्ति जनाः कलौ।
तेऽपि भक्ता भविष्यन्ति चोद्धरिष्यामि तानहम्॥ 27॥

परन्तु जातमात्रत्वं नेत्रहीनो भविष्यसि।
अन्धत्वाज्जननी माता पोषयिष्यति केवलम्॥ 28॥

[3]अन्ये त्वौदास्यमापन्ना न ते कुत्रापि सौहृदम्।
एवमुक्त्वा ततः कृष्णो विररामाथ यादवः॥ 29॥

प्रणम्य प्रार्थयन् चित्ते समयं तं तथा वसन्।
अथागते तु समये तस्मिन् स यादवस्तदा॥ 30॥

बभूव विप्रभवने[4] मथुरायाः समीपतः।
जातमात्रो बभूवान्धो बालो मात्रा निरीक्षितः॥ 31॥

नातिहर्षवती जाता दृष्ट्वान्धं तं शिशुं तदा।
अन्येऽपि दृष्ट्वा तं चान्धमुदासीनाः सुहृज्जनाः॥ 32॥

न तथा समभाषन्त जनन्या योषितः परम्।
अथाष्टमाब्दे पित्रासावुपनीतो यथाविधि॥ 33॥

सूरदास इति ख्यातो नगरेऽसौ बभूव ह।
स एकदा जनैः सार्द्धं मथुरामाजगाम ह॥ 34॥

---

1. वाक्ष्यति – ख।
2. मास्यसि – ख।
3. अमे – ख।
4. सदने – क, ग।

पितृभ्यां सहितो बालस्सूरदासोऽति भक्तितः।
तत्रागत्याखिलां यात्रां कृत्वा तत्पितरौ गृहम्॥ 35॥

चलितौ सूरदासं तं बालं प्राहतुरेहि भोः।
श्रुत्वा तद्वचनं पित्रोः सूरदास उवाच तौ॥ 36॥

युवाभ्यां तत्र गन्तव्यं नाहं गच्छाम्यतो गृहम्।
गृहकर्मासमर्थोऽहं नोपकुर्वे किमप्यथ॥ 37॥

गत्वा तत्र करिष्यामि[1] युवयोः किं समीहितम्।
अथेयं मथुरा साक्षाद्यत्र कृष्णोऽस्ति सर्वदा॥ 38॥

भक्तानुग्रहकर्त्ताऽसौ पालयिष्यत्यसंशयम्।
तस्मान्नाहं गमिष्यामि पितरौ भवतो गृहम्॥ 39॥

इति श्रुत्वा वचस्तस्य सूरदासस्य तौ पुनः।
पुत्रस्नेहसमासक्तौ रुदन्ताविदमूचतुः॥ 40॥

अरे त्वमन्धो बालो मे कथं यावो विना[2] त्वया।
अथालपत्सु तेष्वैवं दैवयोगान्महाशुचिः॥ 41॥

साधुरेकः समायातो वृद्धोऽतीव दयान्वितः।
स प्रोवाचाति मुदितो वचनं तौ प्रहर्षयन्॥ 42॥

गच्छतं भो युवां विप्रौ [3]निःसन्देहौ सुतं प्रति।
एष मद्भवने बालः स्थास्यत्यतिसुखेन वै॥ 43॥

अहमेनं गृहीत्वा तु यास्यामि निजमन्दिरम्।
मा[4] चिन्तां कुरुत पुत्रे श्रीकृष्णोऽस्यास्ति रक्षिता॥ 44॥

एवमुक्त्वा स साधुस्तं बालं नीत्वा गृहं ययौ।
पितारावपि बालं हि शोचमानौ गृहं गतौ॥ 45॥

स बालः साधुनिकटे तस्थौ तद्बालवन्मुदा।
अथ तस्य तु साधोर्वै गृहे श्रीकृष्ण[5]पूजने॥ 46॥

---

1. गमिष्यामि – ख, ग।
2. त्वां विना यां कथं पुनः – ख
3. ऽति – ख
4. ख – मध्ये लुप्तपाठः।
5. तु निवसन्तुदा – ख।

श्रीकृष्णचरितं गीतं सूरः शुश्राव सर्वदा।
स्वयं तैर्वैष्णवैः साकं नृत्यगीतं जगौ मुदा॥ 47 ॥

कृष्णलीलां सूरदासः शुश्राव सकलं मुदा।
पूर्वानुभूतं तत्[1]सर्वं चरितं श्रीहरेस्तथा॥ 48 ॥

अन्वभून्मथुरायां सः क्षुत्पिपासातिवर्जितः।
अथ स्वयं सूरदासः कृत्वा पद्यान्यनेकशः॥ 49 ॥

कुञ्जे कुञ्जे जगौ प्रेम्णा सर्वलोकमनोहरम्।
एवं स मथुरायां तु निवसन्भक्तसत्तमः॥ 50 ॥

सूरदासः प्रसिद्धोऽभूत्सर्वदेशेषु चोत्तमः।
पद्यानि तस्य गायन्ति निर्मितानि हरेर्जनाः॥ 51 ॥

गायान्तो भक्तिसंयुक्ताः जातास्तेऽतीववैष्णवाः।
यत्र यत्र जगामासौ गायन् गीतं हरेर्यशः॥ 52 ॥

तत्र तत्र स्वयं कृष्णः प्रेम्णानुचलति स्म तम्।
[2](अद्यापि सूरदासस्य पद्यं गायति यत्र वै॥ 53 ॥

तत्र प्रेम्णा समायाति श्रीकृष्णो राधया सह।
एकदा सूरदासः श्रीकृष्णस्य चेष्टितं जगौ॥ 54 ॥)

साक्षात्पश्यन् हरिं चित्ते गोवत्सानां तु चारकम्[3]।
महानन्दनिमग्नोऽभूत्सस्मारात्ममनोगतिम्॥ 55 ॥

अथ मार्गे व्रजन्कूपे पतन्निव यदाभवत्।
तदा स भगवान्कृष्णो गोपवेषधरो हरिः॥ 56 ॥

सूरदासं करे धृत्वा न्यवारयत कूपतः।
अथ तं सूरदासोऽपि दधार दृढमुष्टिना॥ 57 ॥

ततो हरिर्हसन् मुष्टिं[4] मोचयित्वा बहिर्गतः।
ततस्सूरोऽब्रवीत्तं तु श्रीकृष्णं भक्तवत्सलम्॥ 58 ॥

तत्करस्पर्शजानन्दजन्यं वारि दृशेर्वहन्।
मोचयित्वा करं यन्मे दुर्बलस्य गतो ह्यसि॥ 59 ॥

---

1. क, ख मध्ये लुप्तपाठः।
2. ख मध्ये लुप्तपाठः।
3. वारकम् – क, ग।
4. दृष्टिं – ख, ग।

हृदयाच्चेद्बहिर्यासि तदा त्वां पुरुषं ब्रुवे।
इत्याकर्ण्य हरिस्तुष्टो ददौ नेत्रे सुनिर्मले ॥ 60 ॥

सूरदासस्तमद्राक्षीत्कृष्णं कमललोचनम्।
वनमालापरिक्षिप्तं वेत्रपाणिं स्मिताननम् ॥ 61 ॥

गाश्चारयन्तं गोपालबालवेषं दयामयम्[1]।
साष्टाङ्गं प्रणिपत्याह सूरदासोऽति हर्षितः ॥ 62 ॥

श्रीकृष्णमायया मुग्धो मत्वा तं गोपबालकम्।
अहो त्वयाहं किं कूपात् पतन्निह निवारितः ॥ 63 ॥

अतस्त्वां नौमि गोपालं प्रेम्णाहं रक्षितस्त्वया।
किञ्च त्वत्करसंस्पर्शादभूतां विमले दृशौ ॥ 64 ॥

अतस्त्वं कोऽसि यासि क्व किन्नामासि वदस्व मे।
इति तेन तदा पृष्टः सूरदासेन मुह्यता ॥ 65 ॥

उवाच प्रहसन्वाक्यं श्रीकृष्णो गोपवेषधृक्।
[2]गोपालोऽस्म्यहमत्रैव मथुरायां वसाम्यहम् ॥ 66 ॥

गाश्चारयन्निहायातो दृष्ट्वा त्वामन्धचक्षुषम्।
कूपेऽपि पतितं भक्तं तदाहं त्वां न्यवारयम् ॥ 67 ॥

इतो यथेष्टं गच्छ त्वं याम्यहं यान्ति धेनवः।
इत्युक्त्वा स तु गोपालस्ततो दुद्राव गोर्दिशि ॥ 68 ॥

कियद्दूरं गते तस्मिन् पादपान्तरिते सति[3]।
यातो द्रष्टुं पुनः सूरो न ददर्श किमप्यथ ॥ 69 ॥

ततोऽतिखिन्नः पप्रच्छ जनान् पथि समागतान्।
दृष्टस्त्वयैको गोपालश्चारयन्निह गा वने[4] ॥ 70 ॥

वनमालापरिक्षिप्तो वेत्रपाणिः स्मिताननः।
श्रुत्वा सूरस्य वचनं पथिकः प्राह तं पुनः ॥ 71 ॥

अहो भ्रान्तोऽसि किं ब्रूषे नास्ति गोपोऽत्र कानने।
[5]वर्तन्ते क्वापि नो गावस्तस्माद् व्रज गृहं स्वकम् ॥ 72 ॥

---

1. सुयन्त्रितम् – ख।
2. सोऽस्त्य – क।
3. प्रभो – ख, ग।
4. गा वने रहः – ख।
5. वर्तते – ख।

पथिकस्य वचः श्रुत्वा सूरदासोऽति विस्मितः।
विचिन्वन्विपिनं सर्वं प्राप तं न क्वचिद्वने॥ 73॥

[1]श्रान्तो बभूव चात्यर्थं तस्थौ तरुतले क्वचित्॥ 74॥

इति श्रीभगवद्भक्तिमाहात्म्ये सूरदासचरितं नाम चतुरधिकशततमः सर्गः॥ 104॥

※ ※ ※

पञ्चोत्तरशततमः सर्गः

॥ सूरदासचरितम्॥

अथ तत्रोपविष्टस्य सूरदासस्य खिद्यतः।
रात्रिः समागता तत्र सूरदासोऽपि संस्थितः॥ 1॥

वनेऽपि पर्यटन् क्लेशात्तद्रूपाल्लोभतस्तथा।
ग्रामं गन्तु मनो नैव चक्रे तद्गतमानसः॥ 2॥

अथ रात्रौ ददर्शासौ स्वप्ने कृष्णं तु तादृशम्।
दृष्ट्वा सोऽयमिति ज्ञात्वा प्रणनाम मुहुर्मुहुः॥ 3॥

अथ सूरं समाचष्ट श्रीकृष्णः प्रहसन्निव।
अहोऽहमेव दिवसे कूपाद्रक्षितवानिति॥ 4॥

नेत्रे मयैव ते दत्ते[2] मद्रूपदर्शनाय वै।
नात्र गावो न वा गोपस्त्वमद्राक्षीर्वने तु यत्॥ 5॥

मन्मायाकल्पितं सर्वं तव दर्शनहेतवे।
तस्मादुत्थाय मथुराग्रामे गच्छ यथासुखम्॥ 6॥

पूर्ववद्विचरन् लोके मद्यशोगानमाचर।
इति श्रुत्वा वचस्तस्य सूरदासोऽब्रवीत् तदा॥ 7॥

अहो धन्योऽस्मि लोकेऽस्मिन् यत्त्वं दृष्टो मया प्रभुः।
अतः परन्तु मे किञ्चिद्वाञ्छितं वर्तते भुवि॥ 8॥

परन्तु त्वत्स्मृतिस्तादृग् वर्ततां मम सर्वदा।
माया न बाधतां नाथ त्वदीया मां जनार्दन॥ 9॥

---

1. अन्त्ये – ख।
2. दृष्टा – क, ख।

किञ्च याभ्यां भवान् दृष्टो नेत्राभ्यां पद्मलोचन।
न ताभ्यां जगदेतद्वै द्रष्टुमिच्छाम्यहं पुनः ॥ 10 ॥

तस्मादन्धत्वमेव स्यात्पूर्ववन्मम केशव।
इति स्वप्नगतो वाक्यमुक्त्वा तूष्णीं बभूव सः ॥ 11 ॥

ततः स भगवान्स्वप्ने प्राहैवं सर्वमस्तु ते।
इति स्वप्ने वरं दत्त्वा [1]जगामान्तर्हितः प्रभुः ॥ 12 ॥

स्मृत्वा स्वप्नं तथान्ध्यं च ज्ञात्वा हर्षसमन्वितः।
जगौ कल्पितपद्येन कृष्णस्य चरितानि सः ॥ 13 ॥

अथ प्रभाते सञ्जाते सूरदासस्तु तद्वनात्।
आगत्य यमुनातीरे तस्थौ गायन् हरेर्गुणान् ॥ 14 ॥

तत्रस्थैः पूर्ववत्तत्र भोजनाच्छादनादिभिः।
सम्मानितो मुदावासीद्यावज्जीवं हरिं भजन् ॥ 15 ॥

एकदा म्लेच्छभूपेन दिल्लीशेनातिभक्तितः।
समाहूतः सूरदासो ययौ गायन् हरेर्यशः ॥ 16 ॥

तत्रागतं सूरदासं दृष्ट्वा दिल्लीश्वरो[2] नृपः।
उत्थाय प्रणनामासौ महाभक्तिपुरस्सरम् ॥ 17 ॥

उपवेश्य शुचौ देशे प्राञ्जलिर्वाक्यमब्रवीत्।
भगवंस्त्वं हरेर्भक्तस्तत्सखा [3]यादवो ह्यसि ॥ 18 ॥

इति सर्वे वदन्त्यत्र जानेऽहमपि तादृशम्।
तस्मादेकं वदस्वात्र भवान् प्रश्नोत्तरं[4] मम ॥ 19 ॥

मम सन्ति स्त्रियो बह्व्यस्तासां कापि च यादवी।
चेत्तां कथय मह्यं भो दयां कृत्वा ममोपरि ॥ 20 ॥

इति श्रुत्वा वचस्तस्य सूरदासोऽब्रवीद्वचः।
अहो याः सन्ति ते पत्न्यो गृहे तास्त्वयि पश्यति ॥ 21 ॥

अत्रागत्य तु मां दृष्ट्वा प्रत्येकं सा व्रजत्वितः।
तन्मध्ये या परिचिता मम स्यात्सा तु मामिह ॥ 22 ॥

---

1. तत्क्षणात् – क।
2. डिल्लीश्वरो – ख, क।
3. पादयो वो – ख, क।
4. प्रश्नोतारं – क।

त्यक्तलज्जाति विनयान्मया सह वदिष्यति।
परन्तु सा तदैवोक्त्वा त्यक्त्वा देहं गमिष्यति॥ 23॥

इत्युक्तो म्लेच्छनृपतिः स्त्रियः सर्वा आजिज्ञपत्।
प्रत्येकं सूरदासं तु प्रणम्येतो व्रजत्विति॥ 24॥

अथ ताः म्लेच्छनृपतेः पत्न्यः प्रत्येकमागताः।
प्रणम्य सूरदासं तु गताः सर्वाः स्वमन्दिरम्॥ 25॥

पश्चादेका समायाता प्रेयसी म्लेच्छभूपतेः।
दूराद्दृष्ट्वा सा सूरं हर्षादुत्फुल्ललोचना॥ 26॥

अहो कुतः समायातो भवान् जानाति मां किमु।
इत्युक्तः सोऽब्रवीत्तां तु जानेऽहं त्वां न संशयः॥ 27॥

अथ सान्तिकमागत्य धृत्वा पादौ ननाम तम्।
तदैव तस्या ब्रह्माण्डं प्रस्फोटाथ ममार सा॥ 28॥

अथ तां नृपतेर्दास्यः समुत्थापयितुं गताः।
दृष्ट्वा तदा संरुरुदुर्भूयोऽपि विमना अभूत्॥ 29॥

[1]राजा तु धैर्यमालम्ब्य भूयः पप्रच्छ तं पुनः।
कासीदियं परिचिता तव भक्त वदाशु भोः॥ 30॥

इति श्रुत्वा वचस्तस्य सूरदास उवाच तम्।
शृणुष्वास्या महाराज पूर्वजन्मसमुद्भवम्॥ 31॥

मथुरायामियं पूर्वमासीद्वेश्या नराधिप।
सुलोचनेति नाम्ना वै नृत्यगीतविशारदा॥ 32॥

[2]दृष्टा मयापि बहुशो नृत्यन्ती राजसंसदि।
नासीदस्याः समा काचिद्गीतनृत्यकलापटुः॥ 33॥

एकदा तु तदा कोऽपि वैश्यो धनसमृद्धिमान्।
अत्रायातो गृहीत्वेमां पुत्रपाणिग्रहोत्सवे॥ 34॥

इयमत्र समागत्य नृत्यगीतैर्मनोहरैः।
मोहयामास सकलान्पुरवासिजनान्नृप॥ 35॥

---

1. तथापि – क, ख।
2. दृष्ट्वां – क, ख।

[1]एकदा तत्र नृपतिः श्रुत्वेमां सोऽनयन्मुदा।
प्रणर्तयामास नृपस्तुष्टो धनमदाद्बहु ॥ 36 ॥

इयं तु नृत्यसमये ददर्श नृपमन्दिरम्।
राज्ञीं महार्हरत्नाढ्यां दासीगणनिषेविताम् ॥ 37 ॥

तदेयं मनसा चक्रे मनोरथमनल्पकम्।
अहो कथमहं त्वेवं महासुखसमागमम् ॥ 38 ॥

[2]लभेयं केन तपसा दानेनाथ करोमि यत्।
इति निश्चित्य मनसि जगर्हात्मानमात्मना ॥ 39 ॥

एकैषा पट्टमहिषी दिव्यस्त्री चात्र [3]राजते।
एकाहमुदरार्थे तु नृत्यामीति धिगस्तु माम् ॥ 40 ॥

एवमेषा मनश्चक्रे नृत्यान्ते गृहमागता।
तत्राप यद्धनं सर्वं तद् ददावति भक्तितः ॥ 41 ॥

दीनानाथ दरिद्रेभ्यो ब्राह्मणेभ्योऽथ वै मुदा।
यथेयं सुखमश्नाति तथा भूयासमप्यहो[4] ॥ 42 ॥

एवं सङ्कल्पयामास मनसैव तदा त्वियम्।
दैवाद्बभूव दुःखार्त्ता ज्वररोगेण तद्दिने ॥ 43 ॥

ततः पञ्चत्वमापन्ना नीतेयं यमकिङ्करैः।
तत्र भुक्त्वा बहुदिनं दुःखं सेयं दिवं गता ॥ 44 ॥

तत्र स्थित्वाथ गोलोके गीतनृत्यसमुद्भवे।
महानन्दे निमग्नाभूदियं मन्मथुरापुरे ॥ 45 ॥

पूर्वं ननर्त देवाग्रे पश्चादन्यत्र वृत्तये।
तत्कर्मसुकृतेनेयं जाता स्वर्गेऽप्सरो[5] गृहे ॥ 46 ॥

तत्र स्थिता बहुदिनं तन्मनोरथसिद्धये।
क्षीणे पुण्ये महाराज मर्त्यलोके भवद्गृहे ॥ 47 ॥

आगत्य बुभुजे पूर्वं सङ्कल्पितसुखं सती।
त्वया सह महीपाल सेदानीमायुषः क्षये ॥ 48 ॥

---

1. तदात्रत्यस्तु – क।
2. प्राक्ष्यामि – ख याक्ष्यामि – क।
3. भक्तितः – ख, ग।
4. भूषा समर्प्यहम् – ख।
5. स्वगोऽक्षरो – ख।

[1](दृष्ट्वा मां स्मृतिमापन्ना गता दिविवराङ्गना।
एषा प्रवृत्तिरेतस्यास्तव पत्न्या न संशयः॥ 49॥

तस्मान्न यादवी वैषा स्थिता प्रेयसी तव।)
किञ्च यादववंशस्य याः स्त्रियः पुरुषाश्च ये॥ 50॥

न ते मनुष्या ज्ञातव्या देवांशाः समुपागताः।
कृष्णेन सह तल्लोकं गता नास्त्यत्र संशयः॥ 51॥

इत्युक्त्वा सूरदासोऽपि भूपमाभाष्य चोत्थितः।
चलितुं मथुरायां वै ततो राजा ददौ धनम्॥ 52॥

न सूरदासो जग्राह प्राह मे किं धनेन भोः।
दिल्लीशोऽपि समुत्थाय तं [2]प्रचाल्य न्यवर्तत॥ 53॥

एवं स सूरदासोऽभूद्भक्तिमान्पृथिवीतले।
[3]अन्ते त्यक्त्वा तनुं तत्र मथुरायां हरिं स्मरन्॥ 54॥

जगाम कृष्णभवनं मुमोद स च पूर्ववत्॥ 55॥

इति श्रीभगवद्भक्तिमाहात्म्ये सूरदासचरितं नाम पञ्चोत्तरशततमः सर्गः॥ 105॥

❊ ❊ ❊

षडधिकशततमः सर्गः

॥ हरिव्यासचरितम्॥

[4]अथैवं मथुरायां वै बभूवुर्भक्तसत्तमाः।
तेषां नामानि चरितं वक्ष्यामीह यथाश्रुतम्॥ 1॥

[5]अन्यत्रापि च ये भक्ता नामतः कर्म्मतश्च तान्।
कथयिष्यामि सर्वान्वै यथाभक्ति यथाश्रुतम्॥ 2॥

परमानन्दनामासीद्भक्तः सारङ्गरागवित्।
तेनैव तोषयामास राधाकृष्णौ निरन्तरम्॥ 3॥

---

1. मध्येऽधिक पाठः।
2. प्रक्षाल्य – ख।
3. अन्त्ये – ख, क।
4. अथैषां – ख, ग।
5. अथात्रापि – ख, ग।

तथा काश्मीरदेशे तु केशवः पण्डितोऽभवत्।
भट्टोपनामा विदुषो जित्वा तन्मार्गमाहतान्॥ 4॥

श्रीभट्टोऽपि तथा जातो भक्तिमान् पाण्डुनन्दनः।
तथा दिवाकरो जातो दिवाकर इवापरः॥ 5॥

हरिव्यासो बभूवैको ब्राह्मणो भक्तसत्तमः।
स पर्य्यटन् धरातीर्थं यात्रायामेकदा द्विजः॥ 6॥

चटकावलिनाम्नासीद् ग्रामस्तत्र बुभुक्षितः।
जगाम शिष्यसहितः [1]आश्रयं सन्ददर्श तम्॥ 7॥

घनच्छायाद्रुमाकीर्णं विमलोदजलाशयम्।
नानाकुसुमगन्धाढ्यं मुमुदे भक्तसत्तमः॥ 8॥

शिष्यमाहात्र पश्यामि[2] देवं त्वं पाकमाचर।
एवं [3]वदन् ददर्शाग्रे मठे देवीं शिलामयीम्॥ 9॥

तत्र छागांश्च मेषांश्च बलिं वितरतो जनान्।
दृष्ट्वा दयार्द्रचित्तः सः तानुवाच विनीतवत्॥ 10॥

पायसादिबलिं त्यक्त्वा किं जीवान्हिंसकामतः।
इमे जीवेऽपि जातोऽपि तव कामोऽति नश्वरः॥ 11॥

तस्मादद्यादि देव्यर्थं पायसादि प्रयच्छ भोः।
इति श्रुत्वा तु ते सर्वे जहसुस्तं मदान्विताः॥ 12॥

तदग्रे एव खड्गेन घातयामासुराजकम्।
दृष्ट्वा चुकोप चात्यर्थं हरिव्यासोऽतिभक्तिमान्॥ 13॥

शिष्यं निवारयामास क्रुधा पाकादिकर्मतः।
अद्य देवीं तोषयित्वा जीवहिंसां निवार्य च ॥ 14॥

[4](भोक्ष्यामि नो चेदत्रैव मरिष्ये नात्र संशयः।
इत्युक्तः स निवृत्तोऽभूच्छिष्यः पाकादिकर्मतः॥ 15॥

स्वयं देवीं हि संस्तुत्य हरिव्यासोऽब्रवीदिदम्[5]।
जीवहिंसावलोकनदुःखितेनान्तरात्मना॥ 16॥

---

1. आगमं – क, ख।
2. पश्येहं – ख, क।
3. वामे – ख।
4. ख – मध्ये लुप्तपाठः।
5. दुहीरितम् – ख।

भद्रकालि महामाये त्वमद्यारभ्य सर्वदा।
गृहाण पायसादीनि बलिं जीवबलिं त्यज॥ 17॥

नोचेत्प्रातरहं तुभ्यं स्वकीयं मस्तकं शिवे।
छित्वा खड्गेन दास्यामि सत्यमेतन्न संशयः॥ 18॥

इत्युक्त्वा स मठस्याग्रे स्थितश्चित्ते हरिं भजन्।
शिष्योऽपि तद्वचः श्रुत्वा हरिं सस्मार चिन्तितः॥ 19॥

अथ रात्रिः समायाता हरिव्यासोऽति निर्भयः।
सुष्वाप मन्दिरस्याग्रे शिष्यः सुप्तस्तदाज्ञया॥ 20॥

अथ रात्रेश्चतुर्थांशे तृतीयांशे गते तदा।
मन्दिरादेत्य जल्पन्ती ददर्श निजमातरम्॥ 21॥

अरे भुंक्ष्व न चाद्यादि[1] पशुघातो भविष्यति।
यास्यामि नगरे सर्वान्निवारयितुमप्यहम्॥ 22॥

सर्वे रात्रौ तदा ग्रामे ददृशुः स्वप्नमद्भुतम्।
[2]मठादागत्य वदति काचिद्दिव्याम्बरा कला॥ 23॥

अद्यादि पायसान्नेन बलिदानं ममाज्ञया।
देव्यै देयं परित्यज्य पशुघातं मठान्तिके॥ 24॥

तेनैव सर्वकामानां सिद्धिर्वः सम्भविष्यति।
ये मोहान्न करिष्यन्ति तानेव घातयाम्यहम्॥ 25॥

एष मे परमो भक्तो हरिव्यासोऽतिवैष्णवः।
एष तस्मै वरो दत्तो न हिंसात्र भविष्यति॥ 26॥

एवं दृष्ट्वा निशि स्वप्नं ते वै प्रातः [3]समुत्थिताः।
एकत्रीभूय तां वार्तां ऊचुः परमविस्मिताः॥ 27॥

ततः सर्वे समाज्ञाप्य हरिव्याससमीपतः।
प्रार्थयित्वाहुरखिलं न हिंसात्र भविष्यति॥ 28॥

त्वत्कृतेयं व्यवस्थात्र चिरं स्थास्यति वैष्णव।
हरिव्यासोऽपि श्रुत्वैवं समुत्थायातिहर्षितः॥ 29॥

---

1. द्यापि – क, ख।
2. गृहादागत्य – ख, ग।
3. पातरुत्थिताः – ख, क।

स्वकीयमपि सस्मार स्वप्नं देवीप्रसादजम्।
स्नात्वा संपूज्य भुक्त्वा च ययौ स्वैरगतिर्द्विजः ॥ 30 ॥

तदारभ्य च तत्रापि सर्वे [1]तत्रस्थवैष्णवाः।
[2]शाक्ताश्चाप्यविरोधेन भेजिरे जगदम्बिकाम् ॥ 31 ॥

वस्तुतस्तु न भेदोऽस्ति मन्तव्यस्य च वस्तुनः।
गन्तृभेदेन पन्था वै दृश्यतेऽनेकधा बुधैः ॥ 32 ॥

इति श्रीभगवद्भक्तिमाहात्म्ये हरिव्यासचरितं नाम षडधिकशततमः सर्गः ॥ 106 ॥

❊ ❊ ❊

सप्ताधिकशततमः सर्गः

॥ त्रिपुरदासचरितम् ॥

यः पूर्वं वल्लभाचार्य्यः सम्प्रदायप्रवर्तकः।
प्रोक्तस्तस्य सुतो नाम्ना विट्ठलेति बभूव ह ॥ 1 ॥

महाभक्तो जितक्रोधो विजितेन्द्रियसञ्चयः।
मथुरायां कलौ येन द्वापरः प्रकटीकृतः ॥ 2 ॥

सोऽपि कृष्णाज्ञया दारपरिग्रहमथाकरोत्।
तस्य पुत्राश्च सप्तासन् नामान्येषां ब्रवीम्यहम् ॥ 3 ॥

रघुनाथो घनश्यामो यदुनाथस्तथैव च।
श्रीमद्गोकुलनाथश्च बालकृष्णस्तथैव च ॥ 4 ॥

श्रीगोविन्दो गिरिधरः सर्वे ते वैष्णवोत्तमाः।
पित्राज्ञयोषुस्ते सर्वे स्थानं कृत्वा निजं निजम् ॥ 5 ॥

वज्रनाभकृता मूर्तिं सप्त सप्ताप्यपूजयन्।
तेषां नामानि वक्ष्यामि [3]सर्वपापहराणि वै ॥ 6 ॥

गोविन्ददेवः श्रीनाथस्तथा गिरिधरः स्मृतः।
चतुर्भुजेति विख्यातो हरिदेवस्तथैव च ॥ 7 ॥

---

1. सर्वेषां तश्च – ख, क। 2. साक्ताश्चार्थ – क, ख।
3. सर्वथा – क, ख।

श्रीमत्केशवदेवश्च तथा वंशीधरः परम्।
एतन्नाम्ना पूजयन्तो निजाचारप्रवर्तकाः ॥ 8 ॥
सर्वे बभूवुर्विख्याता अद्यापि पृथिवीतले।
अथ विट्ठलशिष्यस्य कायस्थस्य कथां ब्रुवे ॥ 9 ॥

नाथद्वारेति विख्याता पश्चिमे वैष्णवी पुरी।
तत्र श्रीनाथदेवोऽस्ति भुक्तिमुक्तिप्रदायकः ॥ 10 ॥

श्रीमत् त्रिपुरदासोऽभूत् तत्रैको राजकार्यकृत्।
कायस्थः स महाभक्तः पूजयामास वैष्णवान् ॥ 11 ॥

श्रीनाथस्वामिने सोऽथ प्रतिवर्षं नवं नवम्।
तत्तत्कालोचितं वस्त्रं महार्हं प्रददौ मुदा[1] ॥ 12 ॥

अथ कालेन कियता त्रिपुरो निर्धनोऽभवत्।
शोचित्वाथ सुदुःखेन व्रतसंरक्षणाय सः ॥ 13 ॥

यथाकथञ्चिदानीय येन केनाप्युपायतः।
[2]रुदन् श्रीनाथभक्ताय वासः स्थूलतरं ददौ ॥ 14 ॥

[3]पूजकश्च तदा दृष्ट्वा वस्त्रं तत्स्थापितं क्वचित्।
न योग्यमिति मत्वाऽन्यत् प्रददौ वस्त्रमुत्तमम् ॥ 15 ॥

अथ रात्रौ महाशीते तुषारैराकुले जने।
ददर्श पूजकः स्वप्नं श्रीनाथं तादृशं गृहे ॥ 16 ॥

अहो शीतातुरोऽस्म्यद्य घनैर्वस्त्रैः सुखं न मे।
त्रिपुरेण तु यद्दत्तं तदर्प्पय ममोपरि ॥ 17 ॥

तदा सुखी स्यान्नो चेद्वै शीतं मां बाधते भृशम्।
दृष्ट्वापि स्वप्ने नोत्तस्थौ महाशीतभयेन सः ॥ 18 ॥

पुनः स्वप्नं तथैवासीद्ददर्श पूजको निशि।
तत उत्थाय सहसा त्रिपुरार्पितमंशुकम् ॥ 19 ॥

ददौ श्रीरङ्गनाथस्य शरीरे स तु भक्तिमान्[4]।
मत्वाश्चर्यं स भक्तस्तु प्रातरुत्थाय भक्तितः ॥ 20 ॥

---

1. सदा – ख, ग।
2. ख मध्ये लुप्तपाठः।
3. पूजकेन – क, ख।
4. पूजकेन – क, ख।

श्रीमत्त्रिपुरदासस्य सत्कारं कृतवान् स्वयम्।
एवं भक्तिवशो देवो भक्तदलमभीप्सति[1] ॥ 21 ॥

इति श्रीभगवद्भक्तिमाहात्म्ये त्रिपुरदासचरितं नाम सप्ताधिकशततमः सर्गः ॥ 107 ॥

❊ ❊ ❊

अष्टोत्तरशततमः सर्गः

॥ कृष्णदासचरितम् ॥

अथैवं मथुरावासी कृष्णदासोऽतिभक्तिमान्।
कथामस्य प्रवक्ष्यामि महाश्चर्यप्रदायिनीम् ॥ 1 ॥

कृष्णदासो महाप्रेम्णा श्रीकृष्णस्य स सेवकः।
यद्यत्प्रियं भोज्यवस्तु तत्तत्कृष्णाय दत्तवान्[2] ॥ 2 ॥

एकस्मिन् दिवसे दिल्ल्यागच्छन् वृन्दावनं पथि।
हट्टायां सन्ददर्शासौ शुभ्रकुण्डलिकाः शुभाः ॥ 3 ॥

तत्र स्थित्वा[3] ततः प्रेम्णा ताः कृष्णाय ददौ पुनः।
तस्मै कुण्डलिकामूल्यं ददौ यत्तेन भाषितम् ॥ 4 ॥

अथास्मिन्समये कृष्णं मथुरायां तु पूजकः।
पूजयित्वार्पयामास नैवेद्यं बहुमोदकम् ॥ 5 ॥

निवेद्य मन्दिराद्बाह्ये समागत्य स्थितोऽभवत्।
दत्त्वा कपाटं स्थित्वा तु कञ्चित्कालं विचिन्तयन् ॥ 6 ॥

निवेदितं मया यद्यत्तद्भुङ्क्ते भगवानिति।
पुनः कपाटमुद्घाट्य मन्दिरान्तर्गतो मुदा ॥ 7 ॥

ददर्श तत्र पात्रेषु शुभ्राः कुण्लिकाः स तु।
भुक्तावशिष्टाः काश्चित्तु खण्डिताः कतिचित्तथा ॥ 8 ॥

दृष्ट्वैतत्परमाश्चर्यं भक्तः चिन्तापरोऽभवत्।
कस्मादिमाः कुण्डलिका आयाता नार्पिता मया ॥ 9 ॥

---

1. शत्रुपूजकः – ख।
2. ददौ मुदा – क, ख।
3. स्थातु – क, ख।

इति सञ्चिन्त्य नैवेद्यं नीत्वा स्वभवनं ययौ।
सर्वास्तद्दर्शयामास परमाश्चर्यकारकम्॥ 10॥

अथ सर्वेऽपि चिन्तार्ता लेभिरे नैव ते सुखम्।
तदा रात्रौ हरिः स्वप्नं सर्वानाह सुचिन्तितान्॥ 11॥

यूयं चिन्तां त्यजध्वं भो वक्ष्ये कुण्डलिकागमम्।
कृष्णदासेन मे दिल्ल्यां दृष्ट्वा कुण्डलिकार्पिताः॥ 12॥

भुक्ता[1] मयातितोषेण शिष्टाः पात्रे स्थिताः कति।
सन्देहो नात्र कर्तव्यः स चातीव मम प्रियः॥ 13॥

एवं दृष्ट्वा तु तैः स्वप्नमुत्थाय तु परस्परम्।
ऊचुः स्वप्नं कथां सर्वे आश्चर्योत्फुल्ललोचनाः॥ 14॥

अथ मध्याह्नसमये कृष्णदासोऽपि चागतः।
पप्रच्छुस्तं महाभक्त्या पूर्वेऽद्युः क्व स्थितं त्वया॥ 15॥

किमर्पितं भगवते सत्यं तद्ब्रूहि नः प्रभो।
इति श्रुत्वा स तूवाच दिल्ल्यां हट्टस्थितेन च॥ 16॥

मया कुण्डलिका दृष्टा[2] सैव प्रेम्णा समर्पिता।
श्रुत्वैतद्वचनं तस्य सर्वे तं तुष्टुवुर्मुदा॥ 17॥

उक्ता कुण्डलिका वार्ता नैवेद्येषु यदागता।
रात्रिस्वप्नं च सर्वेषां श्रुत्वा सोऽपि जहर्ष ह॥ 18॥

एवं प्रभावो भक्तेस्तु कृष्णदासस्य विश्रुतः।
अपरं भक्तिमाहात्म्यं तस्यैव कथयाम्यहम्॥ 19॥

एवमेकदिने दिल्ल्यां समागच्छत्कुतोऽपि सः।
नृत्यन्तीं सुन्दरीं वेश्यां ददर्शातिमनोहराम्॥ 20॥

इयं चेन्मम तस्याग्रे श्रीमत्कुञ्जविहारिणः।
नृत्यं कुर्याद्यतिष्येऽहं किं मे लोकः करिष्यति॥ 21॥

इति निश्चित्य मनसा तदग्रे समुपागतः।
तामुवाचातिविनयान्मया सह गमिष्यसि[3]॥ 22॥

---

1. भुक्त्वा – क, ख।
2. दृष्ट्वा – क, ख।
3. समीपे – क।

यत्र गच्छाम्यहं तत्र प्रभुर्मे रसिको महान्।
प्रार्थयिष्यसि यद्यत्त्वं तत्तत्प्राप्यस्यसंशयम्॥ 23॥

इति श्रुत्वा तु सा वेश्या स्वीकृत्य चलिता ततः।
कृष्णदासस्तया सार्द्धं नृत्यगीतपरायणः॥ 24॥

शृण्वन्नपि परीवादं मथुरामाजगाम ह।
तत्र तां तर्प्पयित्वा स भूषयित्वा प्रयत्नतः॥ 25॥

श्रीकृष्णमूर्तिसविधे[1] नर्त्तयामास भक्तितः।
सा नृत्यन्ती हरे रूपं दृष्ट्वातिप्रेमवत्यभूत्॥ 26॥

विसस्मार स्वयमात्मानं जाता तद्गतमानसा।
पश्यन्ती कृष्णमूर्त्तिं सा लीना गोपीवत्क्षणात्॥ 27॥

इत्याश्चर्यं तदा[2] दृष्ट्वा तुष्टुवुस्तां तु माथुराः।
कृष्णदासस्तु मुदितः तस्थौ तत्र हरिं भजन्॥ 28॥

इति श्रीभगवद्भक्तिमाहात्म्ये कृष्णदासचरितं नाम अष्टोत्तरशततमः सर्गः॥ 108॥

❊ ❊ ❊

अष्टोत्तरशततमः सर्गः ([3]प्रक्षिप्तः)

॥ कृष्णदासचरितम्॥

एकदा सूरदासस्तु तत्रायातोऽतिभक्तिमान्।
कृष्णदासः समुत्थाय नत्वा पूजयति स्म तम्॥ 1॥

भोजयामास विधिवदन्नं सर्वरसान्वितम्।
सूरदासस्ततो भुक्त्वा कृष्णदासमुवाच तम्॥ 2॥

कृष्णदास तव प्रेम श्रूयते चाद्भुतं महत्।
ततो मत्कृतपद्येषु या लीला नैव वर्त्तते॥ 3॥

तदर्थं कर्म पूर्वं त्वं कृत्वा गायस्व मत्पुरः।
श्रुत्वेदं कृष्णदासस्तु चिन्तयामास चेतसा॥ 4॥

---

1. ख मध्ये लुप्तपाठः।
2. परि – क, ख।
3. प्रक्षिप्त अष्टोत्तरशततमः सर्ग ख मातृकायां नास्ति।

अहोऽयं यत्प्रजानाति जानामि तदहं कथम्।
इति सञ्चिन्त्य तं प्राह कृष्णदासोऽति नम्रवत्[1] ॥ 5 ॥

प्रातर्गास्यामि भोः स्वामिन्सूरदास तवाग्रतः।
इति श्रुत्वा गतः सूरः सोऽपि चिन्तासमन्वितः ॥ 6 ॥

न लेभे मनसा किञ्चित्सुरोक्तान्यत्पदानि सः।
ततः सुष्वाप रात्रौ स चिन्तया दारवर्जितः ॥ 7 ॥

अथ श्रीभगवान्कृष्णः स्वयं निर्माय सुन्दरम्।
पद्यं श्रीकृष्णदासस्य शय्यायां प्रददौ निशि ॥ 8 ॥

कृष्णदासः समुत्थाय दृष्ट्वा काव्यमनुत्तमम्।
अनुच्छिष्टा हरेरेषा कृतिर्नूनममन्यत ॥ 9 ॥

ततोऽतिहृष्टः सम्पाद्य सर्वमावश्यकं स तु।
नीत्वा गीतं गतस्तत्र सूरदासाग्रतः स्थितः ॥ 10 ॥

तमाह श्रूयतां पद्यं तवाग्रे गीयते मया।
इत्युक्त्वा स जगौ कृष्णदासः पद्यं विलक्षणम् ॥ 11 ॥

श्रुत्वा तत्सूरदासस्तमुवाचेदं तदा वचः।
अहो सत्यं तव प्रेम वर्त्तते श्रीहरौ दृढम् ॥ 12 ॥

अतः सोऽपि स्वयं पद्यं निर्माय प्रददौ तव।
एवं प्रेम विना कोऽपि पक्षपातं करोत्यहो ॥ 13 ॥

इत्युक्तः सूरदासेन कृष्णदासोऽति भक्तितः।
शय्यायां तु यथा प्राप्तं पत्रं तत्प्राह सत्यतः ॥ 14 ॥

इत्थं तयोस्तदा भक्तिचरितं वीक्ष्य माथुराः।
सर्वे परमाश्चर्यं प्रापु नेमुश्च भक्तितः ॥ 15 ॥

अथैवं तत्र वसतः कृष्णदासस्य चैकदा।
आगतश्चान्तसमयस्तत्कथां कथयाम्यहम् ॥ 16 ॥

स्वयं कूपस्य निकटे जलमाहर्त्तुमागतः।
पपात कूपमध्ये स मूर्च्छां प्रापाथ सम्भ्रमात् ॥ 17 ॥

---

1. नाम्रवत् – ग।

ततः श्रीभगवत्कृष्णो दयालुर्भक्तवत्सलः।
वैष्णवस्य स्वरूपेण क्रोडे कृत्वा ररक्ष तम्॥ 18॥

तं दृष्ट्वा कृष्णदासस्तु प्रोवाच भक्तितो वचः।
किमर्थं खिद्यसे नाथ मम संरक्षणाय भोः॥ 19॥

अनुकम्पय मामद्य ज्ञातोऽसि त्वं मयाधुना।
इत्युक्तस्तेन भगवान् निनाय स्वपुरीं हरिः॥ 20॥

देहमात्रं स्थितं कूपे दृष्ट्वा सर्वेऽतिदुःखिताः।
अहो किं जातमद्येदं यदेतत्परमाद्भुतम्॥ 21॥

कृष्णदासस्य मरणमेवं दुष्टतमं ह्यभूत्।
क्व चास्य तादृशी भक्तिः क्व दुष्टमरणं पुनः॥ 22॥

एवं ते चिन्तिताः सर्वे कृष्णदासगुरुस्तदा।
तत्रागत्य क्रियां चक्रे मृतकरन्यौद्र्ध्वदैहिकीम्॥ 23॥

महाशोकाकुलः सोऽपि कृष्णदासेन रक्षितम्।
धनमप्यखिलं नष्टमिति चिन्ताकुलोऽभवत्॥ 24॥

अथैवं मथुरायां ये स्थिता वै सज्जना नराः।
तेषां मनसि सन्तापस्तादृशान्मरणादभूत्॥ 25॥

इति विज्ञाय भगवान् कलङ्कं परिमार्जितुम्।
गोपवेषं विधायाथ गोवर्द्धनतटे ययौ॥ 26॥

तत्रैको मथुरावासी गोपो गाश्चारयन् स्थितः।
तं पप्रच्छात्र वद भो बलदेवः समागतः॥ 27॥

श्रुत्वैतत्परमाश्चर्य्यं प्राह किं भाषसेऽद्भुतम्।
परन्तु तस्य रूपेण मोहितोऽभूद्वनेचरः॥ 28॥

अथान्तरे समायातः कृष्णदासस्तु तादृशः।
तं दृष्ट्वाति शशङ्के प्रणनामाति भीतवत्॥ 29॥

कृष्णदासस्तु तं प्राह मा भैस्त्वं शृणु मे वचः।
अहं कूपे निपतितो रक्षितो हरिणा ततः॥ 30॥

पश्चात्तेन स्वदास्यं मे दत्त्वा मामनुगामिनम्।
चकार भगवांस्तस्य भृत्यो जातोऽस्म्यहं सुखी॥ 31॥

इदानीमग्रतो याति त्वया नात्र विलोकितः ।
अहमप्यथ गच्छामि द्रष्टुं त्वामिह चागतः ॥ 32 ॥

गुरवे प्रणतिर्वाच्या किञ्च मद्रक्षितं धनम् ।
मदीयशयनागारे शय्यास्थानेऽस्ति भूगतम् ॥ 33 ॥

स गृह्णात्वथ दूता ये तेभ्यो दद्याच्च मत्कृते ।
अहं सुखी वसाम्यत्र श्रीकृष्णेन समं मुदा ॥ 34 ॥

इत्युक्त्वा स गतस्तस्मात्स्थानाद्गोपोऽतिविस्मितः ।
स्वप्नोऽयं वास्ति मोहो वा भ्रमो वायमुपागतः ॥ 35 ॥

यदिदं कृष्णदासस्य मृतस्य दर्शनं त्वभूत् ।
इति सञ्चिन्त्य तूष्णीं स गा नीत्वा गृहमागतः ॥ 36 ॥

उक्त्वा सर्वेषु लोकेषु गतस्तद्गुरुसन्निधौ ।
तमप्युवाच स श्रुत्वा तत्क्षणादेव चोत्थितः ॥ 37 ॥

तेन गोपेन चान्यैश्च सह तद्भवनं गतः ।
कृष्णदासस्य शय्यायाः स्थानं खानितवान् गुरुः ॥ 38 ॥

तत्र लब्धं धनं सर्वं दृष्ट्वा सर्वेऽति विस्मिताः ।
गोपाय कृष्णदासस्य सर्वं सत्यममन्यत ॥ 39 ॥

एवं स कृष्णदासोऽभून्मथुरायां महायशाः ।
राधाकृष्णौ भजन्प्रेम्णा ययौ श्रीकृष्णसन्निधौ ॥ 40 ॥

इति श्रीभगवद्भक्तिमाहात्म्ये कृष्णदासचरितं नामाष्टोत्तरशततमः सर्गः प्रक्षिप्तपाठः ॥ 108 ॥

❊ ❊ ❊

नवाधिकशततमः सर्गः

॥ माथुरविट्ठलचरितम् ॥

एवमन्यौ महाभक्तौ वल्लभाचार्यशिक्षितौ ।
गङ्गलो वर्द्धमानश्चेत्युभौ वैष्णवसत्तमौ ॥ 1 ॥

नित्यं भागवताभ्यासनिर्मलीकृतमानसौ ।
दीनानाथदरिद्रेषु दयावन्तौ शुचिव्रतौ[1] ॥ 2 ॥

दृष्ट्वा दुष्टजनानां च निर्मलं चक्रतुर्मनः ।
तौ गायमानौ भक्तैस्तु साधुविश्रामवेश्मनी ॥ 3 ॥

एवं खेमेति विख्यातो रामभक्तोऽतिवैष्णवः ।
रामनाम जपाशक्तो [2]हनुमत्कृपया युतः ॥ 4 ॥

अथापरो बभूवैको माथूरो विट्ठलो द्विजः ।
कथां यस्य प्रवक्ष्यामि शृण्वतां प्रीतिवर्द्धिनीम् ॥ 5 ॥

तत्पिता तत्पितृव्यश्चेत्युभौ राजपुरोहितौ ।
परस्परं युध्यमानौ मृते कालवशं गतौ ॥ 6 ॥

आसीदेकस्य पुत्रस्तु नाम्ना विट्ठलमाथुरः ।
सोऽति भक्तो हरेरग्रे ननर्त्ताति मनोहरम् ॥ 7 ॥

जगौ गीतानि रम्याणि वाद्यवादन[3]पण्डितः ।
नृत्यतस्तस्य विप्रस्य नात्मान्यविषयस्मृतिः ॥ 8 ॥

अथैकदा नृपो राजा तं सस्मार पुरोहितम् ।
तदा विट्ठलमाहूय पूजयामास भक्तितः ॥ 9 ॥

एवं कतिपये जाते दिने चैकादशी व्रतम् ।
कुर्वन् राजा हरेरग्रे नृत्यगानपरायणः ॥ 10 ॥

ततो विद्वेषिणः प्राहु राजानं विट्ठलस्य तु ।
[4]नृत्यगानादिशौडीर्यं राजा श्रुत्वा तमब्रवीत् ॥ 11 ॥

अद्य जागरणं रात्रौ कुरु नृत्यं हरेः पुरः ।
सोऽपि स्वीकृतवान् राज्ञो वचनं विट्ठलो द्विजः ॥ 12 ॥

---

1. बभूव तु – ख, ग।
2. पुनः – क।
3. तत्परः – ख, ग।
4. सौन्दर्यं – ख, ग।

अथ दुष्टैस्तु प्रासादस्योपरिष्टात्स्थलं कृतम्।
नृत्यस्य तत्र श्रीकृष्णमूर्तिं सम्यगतिष्ठपत्॥ 13॥

तत्र रात्रौ समायातो राजा भूयोऽब्रवीन्मूदा।
विट्ठलोऽपि समायातः साधुभिः परिवारितः॥ 14॥

तमाह राजा श्रीकृष्णप्रतिमाग्रे तु नर्तने।
न दोषं पश्य नृत्यामीत्युक्तः सोऽप्युत्थितो द्रुतम्॥ 15॥

गायन्ननर्त देवाग्रे दृष्ट्वा राजा विमोहितः।
अथायं विट्ठलो नृत्यन् विस्मारात्मनो गतिम्॥ 16॥

पपातोर्व्यां ततो राजा हा हा कृत्य समुत्थितः।
तत्राजगाम तं दृष्ट्वा गतप्राणमिव द्विजम्॥ 17॥

गालीर्ददौ नृपस्तेभ्यः खलेभ्यश्चातिकोपतः।
अथ तं साधवः सर्वे नीत्वा तद्गृहमागताः॥ 18॥

राजापि भृत्यान्सम्प्रेष्य दत्त्वा बहुधनं तथा।
सेवयामास तं विप्रं तृतीये दिवसे तथा॥ 19॥

संज्ञामवाप तं माता पतनादीन्यथाब्रवीत्।
श्रुत्वा तूष्णीं स्थितस्तस्यां मथुरायां निजाश्रमे॥ 20॥

एकस्मिन् दिवसे रात्रौ समुत्थायाश्रमाद्बहिः।
स्थित्वा सर्वमद्येत्येवं विचार्य चलितो गृहात्॥ 21॥

घटीकरा इति ख्यातो ग्रामो वैष्णवसङ्कुलः।
आसीद्गरुडगोविन्दनाम्ना मूर्ति हरेः शुभा॥ 22॥

तत्रागत्य स्थितो राधाकृष्णौ हृदि विचिन्तयन्।
मातरं वनितां त्यक्त्वा एकाकी सुखमवसत्॥ 23॥

अथ माता च पत्नी च विट्ठलस्यातिदुःखिते।
[1]अन्वेषयन्त्यौ शोकेन भृशं रुरुदतुस्तदा॥ 24॥

एनं [2]नृपोन्वेषयितुं बहून् भृत्यान्नियुक्तवान्।
तेषां न मिलितः क्वापि ततस्तज्जननी स्वयम्॥ 25॥

स्नुषया सह तत्रागाच्छ्रुत्वा वार्तां सुतस्य सा।
समागत्याब्रवीत्पुत्रं चल वेश्मेति वासकृत्॥ 26॥

1. पत्यौ – ख। 2. त्वेषिता – क।

नामन्यत ततः सापि माता सुस्नुषया सह।
तत्रैवोवास मोहेन त्यक्त्वा सर्वं गृहादिकम्॥ 27॥

विट्ठलो भक्तिसमन्नः सुखदुःखसमः स्वयम्।
मातुः [1]पत्न्याश्च स दुःखमन्नादीनामभावतः॥ 28॥

ततः स्वप्ने तु गोविन्दो विट्ठलायेदमब्रवीत्।
गच्छ त्वं गृहमेताभ्यां गृहिधर्मेण मां भज॥ 29॥

एव वारत्रयं दृष्ट्वा विट्ठलोऽति मुदान्वितः।
आजगाम निजं गेहं न लेभेऽसौ गृहीगृहम्॥ 30॥

जातिभिश्च परित्यक्तस्ततः स्वग्रामसन्निधौ।
तत्रैको भक्तिमानासीत्पूर्वमित्रमिति स्मरन्॥ 31॥

जगाम तद्गृहं मात्रा पत्न्या सह स विट्ठलः।
सोऽति सत्कारपूर्वं तं स्थापयामास मन्दिरे॥ 32॥

अथैकदा विट्ठलस्य पत्नी गर्भवती सती।
अधोमुखी नखाग्रेण खनती भूमिमादारात्॥ 33॥

[2]विधानं कलशस्याग्रे दृष्ट्वात्यर्थं चखान सा।
उत्पाट्य कलशं कृष्णमूर्तिं मापति शोभनाम्॥ 34॥

अथ स्वामिनमाहूय श्वश्रूंश्च वरवर्णिनी।
दर्शयामास दृष्ट्वा सा तत्क्षणं विट्ठलोऽद्भुतम्॥ 35॥

आहूय दर्शयामास गृहाणेदं धनं निजम्।
ततस्तं साब्रवीत्सर्वं तवैवेदं न संशयः॥ 36॥

अहं मदीया ये सन्ति सर्वे दासा न संशय।
इति श्रुत्वा वचस्तस्या विट्ठलोऽतीव हर्षितः॥ 37॥

कृष्णमूर्तिं प्रतिष्ठाप्य तदाराधनतत्परः।
अक्षय्यभाण्डाद्वसुभि दानं भोगं समाचरत्॥ 38॥

महादाता प्रसिद्धोऽभूज्ज्ञातिभिश्चापि सत्कृतः।
लेभे पुत्रं महाभक्तं रङ्गीलालेति नामकम्॥ 39॥

---

1. पत्न्यामाह – क, ख।
2. निधानम् – क।

सोऽपि नृत्यादिकुशलो भक्तिमानतिवैष्णवः।
एवं तत्र वसन्तस्ते बभूवुर्भक्तसत्तमाः॥ 40॥

गतेषु बहुकालेषु नटी काचित्समागता।
[1]कृष्णमूर्तेः पुरस्तात्तु नर्तयामास विट्ठलः॥ 41॥

नृत्यं दृष्ट्वाति सन्तुष्टो ददौ रत्नान्यनेकशः।
तथापि नैव विट् सा तं मुमोच विट्ठलं द्विजम्॥ 42॥

ततो विचार्य्य सर्वेभ्यो यत्प्रियं तद्ददाम्यहम्।
इत्युक्त्वा रङ्गिलालं तं वेश्यायै प्रददौ मुदा॥ 43॥

सा गृहीत्वा त्वदन्तं तं दृष्ट्वा प्रचलिता गृहम्।
अथ राज्ञी रङ्गिलालं शिष्याच्छ्रुत्वा[2] गुरुं तथा॥ 44॥

आनाय्य नर्त्तकीं तां तु राज्ञी प्राहाति चिन्तिता।
जिघृक्षसि धनं यावत्तावद्दास्याम्यहं तव॥ 45॥

देहि मे रङ्गिलालं त्वमिति श्रुत्वाब्रवीच्च सा।
राज्ञि तुष्टेन केनापि दत्तोऽयं मे प्रियं धनम्॥ 46॥

तथाहमपि तुष्टैव दास्याम्येतन्न संशयः।
नान्यथा बहुभिश्चापि धनैरपि ददाम्यहम्॥ 47॥

तस्मादेकदिने राज्ञि श्रीकृष्णप्रतिमाग्रतः।
नर्त्तयित्वाति तुष्टाहं दास्याम्येनं न संशयः॥ 48॥

इति श्रुत्वा तु सा राज्ञी नर्त्तयामास तां नटीम्।
कृत्वा नृत्यं स्वयं वेश्या रङ्गीलालं ततः परम्॥ 49॥

आनीय दोलिकायां वै स्त्रीवेषमति सुन्दरम्।
नर्तयामास सा वेश्या पश्यन्ती चाति हृष्टवत्॥ 50॥

ततः सा नर्तकी तुष्टा गृहीत्वाङ्केऽति भक्तितः।
अर्पयामास कृष्णाय राज्ञीं प्राहार्पितो मया॥ 51॥

श्रीकृष्णायातिसुतुष्टा युक्ता राज्ञी तया पुनः।
समुत्तस्थौ गुरुं तत्र[3] तं ग्रहीतं मुदान्विता॥ 52॥

---

1. मूर्तिः – ख, क।
2. त्वमिति श्रुत्वाब्रवीच्च स – ख।
3. पुत्रं – क।

रङ्गीलालस्ततो राज्ञीमाह मां न स्पृशाधुना।
जातोऽहमद्य कृष्णस्य पश्यामि च तदन्तिकम्॥ 53॥

इत्युक्ता रङ्गिलालस्तु नृत्यन् श्रीकृष्णसन्निधौ।
प्राप्य तन्मयतां कायं तत्याज पश्यतां नृणाम्॥ 54॥

एवं विट्ठलनाम्नाभून्माथुरो भक्तसत्तमः।
तत्संसर्गात्तु सा वेश्या सा च राज्ञी पतिव्रता॥ 55॥

निर्वेदं परमं प्राप्य जग्मतुः कृष्णसन्निधौ।
एवमन्येऽपि तद्वंशे बभूवुर्बहवो जनाः॥ 56॥

इति श्रीभगवद्भक्तिमाहात्म्ये माथुरविट्ठलचरितं नाम नवाधिकशततमः सर्गः॥ 109॥

❋ ❋ ❋

दशाधिकशततमः सर्गः

॥ हरिरामचरितम्॥

एवमेको हरिरामो हठीलेत्युपनामकः।
महाभक्तो बभूवाथ सख्यं राणानृपेण च॥ 1॥

एकस्मिन्दिवसे साधोर्भूमिर्वृत्तिकरी स्थिता।
सा केनापि च दुष्टेन मिथ्या संन्यासिना नृपम्॥ 2॥

नास्य भूमिरिति प्रोच्य रोधिता चापि वैष्णवः।
आगत्योवाच राजानं स तं दूरीचकार ह॥ 3॥

दुष्टसंन्यासिवाक्येन ततः स वैष्णवो रुदन्।
आजगाम हरिरामं वृत्तं सर्वमुवाच सः॥ 4॥

श्रुत्वा स आह[1] तं भक्तं याम्यहं राजसन्निधिम्।
त्वमप्यागच्छ पश्चाद्भो यथायोग्यं भविष्यति॥ 5॥

ततस्तस्मिन् गते भक्तो जगाम राजसन्निधिम्।
विनयात्माह राजानं राजा श्रुत्वा चुकोप ह॥ 6॥

हरिरामस्ततो भूपं प्राह साधोर्जिघृक्षसि[2]।
श्रुत्वा राजा ततो ब्रते[3]नास्य भूमिर्हि वर्तते॥ 7॥

---

1. अहितं – क, ख।
2. पृच्छसि – क।
3. नासि – क, ख।

इति मां प्राह संन्यासी ततो नीता मया धरा।
श्रुत्वेदं राजवचनं ततो रामोऽब्रवीद्वचः ॥ 8 ॥

राजन्सत्यमिदं ब्रूषे परन्तु शृणु मे वचः।
अत्रागत्य स संन्यासी ब्रूयादेतन्ममाग्रतः ॥ 9 ॥

यदि सत्यं तदा तस्य मुखाद्वाणी भविष्यति।
असत्यं चेत्तदा नैका भविष्यति न संशयः ॥ 10 ॥

पश्येदमद्भुतं राजन् राधाकृष्णविचेष्टितम्।
शीघ्रमानय तं दुष्टं यः साधोर्वृत्तिमाहरत् ॥ 11 ॥

प्रह्लादरक्षणार्थाय यः स्तम्भात्समवातरत्।
स किं दयालुर्भगवान्नेतावन्न करिष्यति ॥ 12 ॥

([1]इत्युक्तो भूपतिस्तं तु संन्यासिनमथाह्वयत्।
आगतं परिपप्रच्छ राजा साधुधरां प्रति ॥) 13 ॥

हरिरामस्तु सस्मार श्रीकृष्णं करुणामयम्।
प्रार्थयामास मनसा साधुकार्य्यं कुरु प्रभो ॥ 14 ॥

स संन्यासी तदा तूष्णीं तस्थौ राजसमीपगः।
मुहुः प्रोवाच तं राजा संन्यासिनमतिक्रुधा ॥ 15 ॥

वाचामभिनयेनासौ बोधयामास भूपतिम्।
शक्नोमि नाहं कथितुं वाग्भिः शक्ति[2]र्न वास्ति मे ॥ 16 ॥

ज्ञात्वैतद्वचनं राजा परमाश्चर्य्यमागतः।
हरिरामं[3] नमस्कृत्य ददौ भूमिं स साधवे ॥ 17 ॥

गृहीत्वा निजभूमिं स भक्तोऽगान्निजमन्दिरम्।
हरिरामः स्व वेश्माथ संन्यासी चाप्यभाष्यत[4] ॥ 18 ॥

राजा तमाह सत्यं मे वद भूस्तस्य वा न वा।
तदोवाच स संन्यासी द्वेषादेवं कृतं मया ॥ 19 ॥

इति श्रुत्वा स राजा तं जगर्हाथातिभक्तिमान्।
हरिपूजापरो भूत्वा जीवन्मुक्तो बभूव ह ॥ 20 ॥

---

1. ख मध्ये लुप्तपाठः।
2. पति – ख।
3. हरिदासं – क।
4. भाषितम् – ख, ग।

कमलाकरभट्टोऽपि एवमासीन्महायशः ।
माध्वसिद्धान्तसञ्चारो तत्त्वज्ञानपरायणः ॥ 21 ॥

शास्त्रज्ञानेन सम्पन्नो ज्ञानविज्ञानपारगः ।
श्रीमद्भागवताभ्यासान्मुक्तिमायाति दुर्ल्लभाम् ॥ 22 ॥

नारायणेति नाम्नाभूदेको भट्टोपनामकः ।
मथुरायां वसंस्तत्र स्थानानि कथितानि च ॥ 23 ॥

प्रकाशयामास मुदा[1] पुराणोक्तानि सर्वशः ।
सन्देहस्तस्य यत्रासीत्तत्स्वप्ने हरिरब्रवीत् ॥ 24 ॥

एकस्मिन्दिवसे प्राप्ते प्रयागं गन्तुमुत्सुकाः ।
जनास्तमाहुर्यास्यामस्त्वं गमिष्यसि वा न वा ॥ 25 ॥

श्रुत्वा स आह तान्सर्वान् प्रयागोऽप्यत्र वर्तते ।
आगच्छत मया सार्द्धं त्रिवेणी दर्शयामि वः ॥ 26 ॥

इत्युक्त्वा समुत्थाय कियद्दूरं गतस्ततः ।
ग्राममेकं समागत्य तत्रोच्चस्थानमारुहत् ॥ 27 ॥

तत्रस्थो दर्शयामास त्रिवेणीं परमोज्ज्वलाम् ।
दृष्ट्वा सर्वेऽति मुदिताः साधु साध्विति तुष्टुवुः ॥ 28 ॥

व्रजवल्लभ नामाभूद्भक्तोऽस्यैव कुले महान् ।
यो रासलीलां सततं कुर्वन्मुक्तो बभूव ह ॥ 29 ॥

इति श्रीभगवद्भक्तिमाहात्म्ये हरिरामचरितं नाम दशाधिकशततमः सर्गः ॥ 110 ॥

❊ ❊ ❊

1. महा – क।

एकादशाधिकशततमः सर्गः

॥ रूप-सनातनचरितम् ॥

रूपः सनातनश्चोभौ भ्रातरौ गौडसम्भवौ।
कथां तयोः प्रवक्ष्यामि परमाश्चर्यदायिनीम् ॥ 1 ॥

उभौ स्वदेशादागत्य वृन्दावनमुपागतौ।
गोपेश्वरस्य निकटे ऊषतुः परमादरात् ॥ 2 ॥

अयाचितव्रतं धृत्वा[1] यथालाभेन जीविकाम्।
कुर्वन्तौ निर्ममौ भूत्वा[2] कृष्णलीलामृतं शुभम् ॥ 3 ॥

नन्दग्रामे समागत्य स्थितौ[3] गायन् हरेर्यशः।
महाप्रसिद्धस्तत्रासौ बभूवायाचितव्रतः ॥ 4 ॥

एकदा तं समायातो द्रष्टुं भ्राता सनातनः।
दृष्ट्वा तं भ्रातरं रूपो मनसा चिन्तयत्तदा ॥ 5 ॥

अथ दुग्धं यदि भवेत्तदाहं पायसं शुभम्।
समर्प्य हरये भ्रात्रे दत्तं स्याद्भोजनं मया ॥ 6 ॥

एवं चिन्तयतस्तस्य गोपी काचित्समागता।
साक्षाल्लक्ष्मीव रूपेण नीत्वा दुग्धं करेण सा ॥ 7 ॥

सुगन्धितण्डुलान् सम्यक् घृतं च शर्करामपि।
प्राह रूपमहाभक्तं गृहाणेदं समर्प्पितम् ॥ 8 ॥

मया प्रतिश्रुतं पूर्वं यदा गौः सोष्यते[4] सुखम्।
तदास्यास्तु पयः पूर्वं दास्यामि[5] भवते इति ॥ 9 ॥

तेन पायससिध्यर्थं तण्डुलादिकमर्प्पये।
श्रुत्वेदं सोऽति हर्षेण सर्वं जग्राह तत्करात् ॥ 10 ॥

परन्तु दृष्ट्वा तद्रूपमलौकिकमुवाच ताम्।
सनातनोऽति भक्त्या वै माता कस्ते पिता क्व सः ॥ 11 ॥

---

1. नीत्वा – क, ख।
2. रूपः – क, ख।
3. तस्थौ – क, ख।
4. शोच्यते – ख, ग।
5. ख मध्ये लुप्तपाठः।

इति श्रुत्वा तदोवाच वृषभानुसुतास्म्यहम्।
अत्रैव नगरे सोऽपीत्युक्त्वा सा त्वरितं ययौ॥ 12॥

अथ रूपस्तु तत्सर्वं सम्पाद्य हरये मुदा।
पश्चात्सनातनायापि दत्त्वा तद्बुभुजे स्वयम्॥ 13॥

भुञ्जानं पायसं रूप: सनातनमथाब्रवीत्।
त्वय्यागते मनो मेऽभूद्भवेत्पायसमद्य चेत्॥ 14॥

तदा कस्मात्समागत्य गोपी सर्वं ददाविदम्।
श्रुत्वेदं वचनं भ्रातु: सनातन उवाच तम्॥ 15॥

अहो लोभो न कर्त्तव्य: सर्वथा तीर्थवासिभि:।
लोभात्तपश्च्युति[1]स्तस्माद् भक्तिस्तेन तु तं त्यजेत्॥ 16॥

किं चेयं नैव गोप्यासीद्यया दत्तमिदं तव।
साक्षाद्राधा महाराज्ञी माता स्नेहाद्ददाविदम्॥ 17॥

एवं वदन्तौ तौ भुक्त्वा समुत्थायातिभक्तित:।
नन्दग्रामे गतौ तौ तु दिदृक्षुतां तु गोपिकाम्॥ 18॥

वृषभानुगृहं तौ च पप्रच्छतुरितस्तत:।
सर्वैरुक्तं न चात्रास्ति तन्नाम्ना कोऽपि निश्चितम्॥ 19॥

तत आगत्य तौ गेहे रूपमाह सनातन:।
तव लोभेन जननी राधा प्राप्नोति वै श्रमम्॥ 20॥

तस्मादेवं कदाप्यङ्ग न कर्त्तव्यो मनोरथ:।
इत्युक्त्वा तु गत: स्थानं स्वकीयं स सनातन:॥ 21॥

अथैकस्मिन् दिने रूपो रासनृत्यं विलोकयन्।
मठभित्तिं समालम्ब्य लीनो मृत इवाभवत्॥ 22॥

तत्रायौ कर्णपूराख्य: श्रीकृष्णस्य स पूजक:।
आगत्य तमचेष्टं तु ज्ञात्वा तत्सन्निधिं गत:॥ 23॥

मृतो वा जीवतीत्येतत् ज्ञातुं हस्तं ददौ नसि।
अग्निजालमिव संलग्न: [2]श्वासस्तस्य करे तदा॥ 24॥

1. स्याम - क, ख।
2. कुटवान् - क, ख।

क्षिप्त्वा करं विवेदासौ जीवतीत्यद्भुतं महत्।
एकदा तस्य सुप्तस्य स्वप्नेऽभूत्परमाद्भुतम्॥ 25॥

गोविन्ददेव आगत्य चास्माद्ग्रामाद्बहिस्त्विह।
तिष्ठन्ति यत्र वै गावस्तत्र भूमिगतोस्म्यहम्॥ 26॥

गौरेका तत्र चागत्य दुग्धं त्यजति नित्यशः।
ज्ञात्वा तत्र खनित्वा मां बहिः कृत्वा प्रपूजय॥ 27॥

तदा प्रातः समुत्थाय रूपो गत्वाथ सज्जनान्।
उक्त्वा स्वप्नं ददर्शाथ गां क्षरन्तीं पयः स्वयम्॥ 28॥

खानयामास तत्स्थानं कियद्दूरे धरातले।
गोविन्ददेवो मिलितः सर्वे मुमुदिरे जनाः॥ 29॥

रूपस्तं सम्प्रतिष्ठाप्य पूजयामास भक्तितः।
अद्यापि पूज्यते सा वै मूर्तिर्जयपुरमध्यगा॥ 30॥

राज्ञा नीतातिभक्त्या वै म्लेच्छोपद्रवभीतितः।
जयसिंहेन तत्कालमारभ्याद्यापि तत्र सा॥ 31॥

एवमेकदिने नन्दग्रामं गच्छन्सनातनः।
कुञ्जे[1] मार्गेण वै कृष्णं चिन्तयानो वनं गतः॥ 32॥

तत्र कण्टकवृक्षाणां गृहीता कण्टकैर्जटा।
तस्थौ तत्रैव तूष्णीं स प्रभो राज्ञैव मे नमे॥ 33॥

इति सञ्चिन्त्य तस्यासीद्दिन द्वयमथ स्वयम्।
तृतीयदिवसे दुग्धं नीत्वा गोपालपालकः॥ 34॥

मनोहरशरीरः सन् पाययामास तं पयः।
कण्टकेभ्यो जटां तस्य पृथक् चक्रे स्वपाणिना॥ 35॥

दृष्ट्वा तद्रूपममलं तं पप्रच्छ सनातनः।
कोऽसि त्वं कुत्र ते सन्ति भ्रातरः कति तद्वद॥ 36॥

इति तस्य वचः श्रुत्वा गोपवेश उवाच तम्।
गोपोऽहं भ्रातरः सन्ति चत्वारोऽत्र वसाम्यहम्[2]॥ 37॥

---

1. कुटवान् – क, ख।
2. वसामहे – ख, ग।

नन्दग्रामेति विख्यात इत्युक्त्वा स ययौ क्वचित्।
सनातनोऽपि तत्रैत्य नन्दग्रामेऽतिविस्मितः॥ 38॥

अन्वेषयामास मुहुर्न लब्धः स तु कुत्रचित्।
तदा ज्ञातस्तु तेनापि भगवानेव संस्थितः॥ 39॥

पश्चात्तापं चकारोच्चै रुरोद स सनातनः।
अथागत्य च रूपस्य बन्धोर्गृहमुवास सः॥ 40॥

एकदा राधिकावेणीं मनसा सर्पिणीमिव।
मत्वा वर्णयितुं चक्रे मनो रूपश्च तत्क्षणात्॥ 41॥

सनातनस्तु तज्ज्ञात्वा कुरु काव्यं मनोहरम्।
ततो रूपश्चिकीर्षुस्तत्सरस्तीरमुपागतम्॥ 42॥

कदम्बवृक्षशाखायां दृष्ट्वा तच्चरणद्वयम्।
किमिदं त्विति विभ्रान्तचिन्तोऽभ्येत्य स्थितो गृहे॥ 43॥

सनातनस्तु तं ज्ञात्वा तादृशं भ्रान्तमानसम्।
किं भ्रान्तोऽसि वृथा तस्याश्चरणावेव चिन्तय॥ 44॥

इति श्रुत्वा तदा रूपः परमाश्चर्यमात्मवान्।
तदादि चरणाभ्यासं चक्रे हृदि निरन्तरम्॥ 45॥

एवं तौ गौडदेशीयौ विप्रौ रूपसनातनौ।
बभूवतुर्महाभक्तावलौकिककथास्पदौ॥ 46॥

इति श्रीभगवद्भक्तिमाहात्म्ये रूपसनातनचरितं
नामैकादशाधिकशततमः सर्गः॥ 111॥

❊ ❊ ❊

द्वादशाधिकशततमः सर्गः

॥ व्यासचरितम्॥

हरिवंशेति नाम्नैवं गोस्वामी भक्तिमानभूत्।
राधाकृष्णजपासक्तो मनसा तत्प्रपूजकः॥ 1॥

चेतसा तु तयोर्नित्यं सर्वथा सन्निधौ स्थितः।
भोजितो बुभुजेऽन्नं स पायितश्चेत्पपौ जलम्॥ 2॥

बहि: शरीराद् बुद्धिस्तु नासीत्तस्यातियोगिन: ।
च्युतो विधिनिषेधाभ्यां राधाकृष्णौ स्मरन्सदा ॥ 3 ॥

एकदा तत्र नगरे कञ्चिद्विप्रं निशात्यये ।
कृष्ण: स्वप्नेऽब्रवीद्वाक्यं बारम्बारं तथैव च ॥ 4 ॥

हरिवंशाय भक्ताय सुतां देहि ममाज्ञया ।
श्रुत्वा विप्रोऽति सन्दिग्ध: पत्नीं प्राहातिविस्मित: ॥ 5 ॥

([1]तदा ददौ तु तां तस्यै हरिवंशाय स द्विज: ॥ 6 ॥

गृहीत्वा सोऽपि तत्कन्यां तदावेशेन केवलम् ।
तस्यामुत्पाद्य पुत्रान् वै कृष्णभक्तान्मनोहरान् ॥ 7 ॥

स्वयं जगाम भवनं हरे: पत्नीसहायवान् ।)
तद्वंशे तु महाभक्ता: सिद्धा एवाभवञ्जना: ॥ 8 ॥

[2]आशाधीरेति नाम्नासीद्विप्रो गुर्जरसम्भव: ।
तस्य पुत्रोऽस्ति विख्यातो हरिदास इति श्रुत: ॥ 9 ॥

महाभक्तोऽतिरसिको राजभि: परिसेवित: ।
यद्यदाप्नोति भोज्यं स मर्कटेभ्यो ददौ स्वयम् ॥ 10 ॥

सर्वं कृष्णमयं ज्ञात्वा पशुपक्षिमृगादिकम् ।
समर्प्य विष्णवे पूर्वं तत:[3] सर्वं बुभोज स ॥ 11 ॥

एकस्मिन् दिवसे भक्तो यमुनातीरमास्थित: ।
तत्रैको नृपसम्बन्धी तं द्रष्टुं समुपागत: ॥ 12 ॥

आदायाति सुगन्धं च तैलं चाति मनोहरम् ।
प्रददौ हरिदासाय नत्वा तस्थौ तदग्रत: ॥ 13 ॥

हरिदासस्तु तन्नीत्वा तैलं गन्धवदुत्तमम् ।
राधाकृष्णौ स्मरन् चित्ते चिक्षेप नीररोधसि ॥ 14 ॥

दृष्ट्वा तद्राजसम्बन्धी उद्विग्नो मनसाभवत् ।
बहुमूल्यमिदं तैलं वृथा भूमौ समर्पितम् ॥ 15 ॥

---

1. ख मध्ये लुप्तपाठ: ।
2. आसाधिरेति – ख, ग ।
3. सर्वानुभोजयत् – ख ।

इति तस्याभवच्चित्ते हरिदासोऽपि वेद तत्।
शिष्यमाज्ञापयामास नयेमं देवसन्निधौ ॥ 16 ॥

इत्युक्तस्तं नृपजनं नीत्वा शिष्यो जगाम ह।
स आगत्य प्रणम्यासीज्जिघ्रन् तत्र मनोहरम् ॥ 17 ॥

तमेव गन्धं कृष्णाङ्गे लग्नं चापि ददर्श ह।
मत्वाश्चर्य्यं ततो हृष्टो हरिदासान्तिकं गतः ॥ 18 ॥

तं प्रणम्यातिभक्त्या स गृहीत्वाज्ञां गृहं ययौ।
उवाच सर्वं वृत्तान्तं यद्दृष्टं परमाद्भुतम् ॥ 19 ॥

एवमेकदिने तत्र कालिन्द्याः पुलिने स्थितः।
एकः समागतः[1] कोऽपि कृत्वा तीर्थान्यनेकशः ॥ 20 ॥

नीत्वा स्पर्शमणिं तस्मै हरिदासाय दत्तवान्।
हरिदासो गृहीत्वा तं चिक्षेप[2] यमुनाम्भसि ॥ 21 ॥

ततः सोऽतीव शीतार्तस्तूष्णीं तस्थौ तदन्तिके।
ततः स हरिदासो ज्ञात्वा तन्मनसो व्यथाम् ॥ 22 ॥

उत्थाय यमुनायां स गत्वा तत्रत्यसर्वशः।
हस्ताभ्यां बहुशो नीत्वा दर्शयित्वाब्रवीद्वचः ॥ 23 ॥

एतेषु हस्ते[3]न मणिः गृह्यतामविशङ्कितम्।
दृष्ट्वा तत्परमाश्चर्य्यं स भक्तोऽतीव विस्मितः ॥ 24 ॥

प्रणम्य हरिदासस्य शिष्योऽभूदतिभक्तितः।
सेवमानस्तमत्यर्थं कृष्णतुल्यममन्यत ॥ 25 ॥

अद्रोच्छाग्रामवास्येवं नाम्ना व्यासो द्विजः स्थितः।
गृहे विरक्तो सस्त्रीको वृन्दावनमुपागतः ॥ 26 ॥

अथ तत्र स राज्ञापि प्रार्थितो भवनाय सः।
न जगाम महाभक्तो राधाकृष्णैकचिन्तनः ॥ 27 ॥

एकदा रासमये राधायाः पादकिङ्किणी।
भग्नैका तत्क्षणे व्यासो जग्रन्थ यज्ञसूत्रतः ॥ 28 ॥

---

1. एकमागतः – क।
2. चिक्षिपे – क, ख।
3. स – क, ख।

उवाचैतद् यज्ञसूत्रं धृतं बहु दिनान्मया।
अद्य कार्याय सञ्जातमित्युवाचातिहृष्टवत्॥ 29॥

[1]ततोऽस्य नूतनं यज्ञसूत्रं तत्क्षणमेव हि।
व्यासस्कन्धे समायातं सर्वेषां पश्यतां नृणाम्॥ 30॥

एवमेकदिने कृष्णमूर्तिं परिचरन् स्थितः।
शिरसो वेष्टनं स्वर्णसूत्रं पीतमनुत्तमम्॥ 31॥

श्रीकृष्णमूर्तेः शिरसि बद्धुं तदुपचक्रमे।
[2]शिरसि चिक्कणं वस्त्रं तस्थौ नैव कथञ्चन॥ 32॥

मुहुर्मुहुः समुत्तिष्ठन् बबन्ध न स्थिरं त्वभूत्[3]।
ततोऽतिदुःखितः किञ्चित्प्रेमकोपसमन्वितः॥ 33॥

अग्रे संस्थाप्य चोवाच बध्नीहि स्वयमेव हि।
याम्यहं बहिरिक्त्युक्त्वा बहिरागत्य तस्थिवान्॥ 34॥

तावत्त्वयं हरिर्वस्त्रं बबन्धातिमनोहरम्।
स तूष्णीं घटिकामात्रं स्वकोपं परिगर्हयन्॥ 35॥

केनाप्यन्येन भक्तेन साकं तद्भवनं गतः।
ददर्श मूर्तिमूर्धस्थं शिरो वेष्टनमद्भुतम्॥ 36॥

हर्षाश्रुगद्गदः प्राह कथं मत्कृतमीदृशम्।
भवेदित्येव विज्ञाय मद्ध[4]स्तान्न स्थिरीकृतम्॥ 37॥

इत्येवं परमाश्चर्य्यं दृष्ट्वा सोऽतीव विस्मितः।
भक्तो ननाम तं भक्त्या साधुसाध्विति संस्तुवन्[5]॥ 38॥

एवमेकदिने भुञ्जन्स्थितः साधुजनैः सह।
ददाति तस्य पत्न्येव सर्वेभ्योऽन्नादिकं मुदा॥ 39॥

सर्वेभ्यः प्रददौ दुग्धं तत्सारं व्यासभोजने।
अनिच्छयागतं दृष्ट्वा व्यासः पत्न्यै चुकोप ह॥ 40॥

---

1. तत्रनयं – ख।
2. शिरोति – ख, क।
3. ह्यभूत् – ख, ग।
4. तद्धस्तान्न – क, ख।
5. तुष्टवुः – ख, क।

किमिदं चार्पितं मूढे दुग्धं सारतरं मयि।
विहाय सकलान्साधून् पतिस्नेहान्धया त्वया॥ 41॥

अनेनाहं युवा किं स्यां शृण्वेतस्य तु यत्फलम्।
महानर्थकृतं पापं ऋषिभिः परिकीर्तितम्[1]॥ 42॥

एकपङ्क्तौ[2] तु यः कस्मै मिष्टमन्नं[3] प्रयच्छति।
भुङ्क्ते वा तावुभौ घोरे पच्येते नरके चिरम्॥ 43॥

तस्मात्त्वन्नासि साधूनां सेवायोग्यातिपापिनी।
बहिर्गच्छेत्युवाचाथ सा [4]श्रुत्वान्यगृहे गता॥ 44॥

निरागसं निजां ज्ञात्वा तत्याजान्नादिकं सती।
एवं दिनद्वये जाते तृतीये दिवसे निशि॥ 45॥

व्यासः स्वप्ने ददर्शैकं साधुं कमललोचनम्।
अहो त्वयापराधेन विना पत्नी तिरस्कृता॥ 46॥

[5]अकस्मात्तवपत्रे तु सारभूतमुपागतम्।
तां त्वं सत्कुरु नोचेत्ते गृहे भोक्ष्याम्यहं नहि॥ 47॥

[6]एवं दृष्ट्वा तु स्वप्नं स पत्न्याः सन्निधिमागतः।
प्रेम्णोवाच न ते दोषः सत्यं जातं मयापि भोः॥ 48॥

अकस्मादपि यज्जातं तेन शङ्का ममाभवत्।
अतः परमलङ्कारं सर्वं [7]कृत्वातिहर्षिता॥ 49॥

साधुभ्यः पाकशालायां समेत्य कुरु पूर्ववत्।
अनिच्छतोऽपि चेत्पापं जातं विधिवशाद्यदि॥ 50॥

प्रायश्चितं तु तत्रापि कर्त्तव्यमिति वै स्मृतिः।
सापि श्रुत्वा मुदा युक्ता चक्रे सर्वं यथोदितम्॥ 51॥

पूर्ववत्तत्प्रिया भूत्वा सेवयामास वैष्णवान्।
अथैकस्मिन् दिने तत्र समायातास्तु साधवः॥ 52॥

---

1. परिकीर्तनम् – ख, ग।
2. पङ्क्त्याय – ख, पत्न्योपरा – क।
3. मिष्टान्नं – ख, ग।
4. धृत्वा – क।
5. अस्मात्तवपात्रे – क।
6. परम् – ख, ग।
7. दत्वा – क, ख।

अपराह्णे [1]बुभुक्षार्त्ता दृष्ट्वा व्यासोऽतिहर्षितः।
तस्मिन्नेव दिने रात्रौ कन्यापरिणयः स्थितः॥ 53॥

तदर्थं बन्धुभिः कृत्वा मिष्टान्नं स्थापितं गृहे।
तत्सर्वं भोजयामास साधूनति मुदान्वितः॥ 54॥

भुक्त्वा तेऽपि स्थिता रात्रौ विवाहार्थं वरोऽभ्यगात्।
बहुभिः स्वजनैः सार्द्धं ततस्तेऽतिथिसाधवः॥ 55॥

चिन्तयामासुरत्यर्थं मिष्टान्नं स्यात्कथं पुनः।
ततो व्यासस्तु तानाह यावदस्ति गृहे ततः॥ 56॥

नीत्वेमान्भोजयध्वं भो हरिः पूर्णं करिष्यति।
तथैव जातं सर्वैस्तु भुक्तं गेहे स्थितं पुनः॥ 57॥

पूर्वतोऽप्यधिकं दृष्ट्वा सर्वे विस्मयमागताः।
एकस्मिन् दिवसे तस्य गेहे साधुः समागतः॥ 58॥

लोकवार्तानभिज्ञः स भक्तिमान् गरुडध्वजे।
स्थित्वा दिनद्वयं तस्माच्चलितो व्यास आह तम्॥ 59॥

प्रातर्यास्यसि साधो त्वमित्युक्तः सोऽपि चावसत्।
अथ रात्रौ स्वयं तस्य शालग्रामशिलां [2]निजाम्॥ 60॥

शालग्रामशिलास्थाने निधायैकं च पक्षिणम्।
तत्सम्पुटे निधायाथ रात्रौ सुप्तश्च पूर्ववत्॥ 61॥

प्रातरुत्थाय चलितः पुनः साधुस्तमब्रवीत्।
साधोऽत्र[3] योजनादग्रे जलमस्त्यतिसुन्दरम्॥ 62॥

तत्रैव स्नानं कर्तव्यं पाथेयं गृह्यतामिदम्।
गृहीत्वा पथिकोऽन्नादि चलितस्तत्र चागतः॥ 63॥

स्नात्वा पूजयितुं देवं समुद्युक्तोऽथ सम्पुटम्।
उद्घाटयामास तदा पक्षी चोड्डीय निर्गतः॥ 64॥

अथ साधुस्तु सन्दिग्धः शून्यं दृष्ट्वा तु सम्पुटम्।
तत्रैव[4] प्रायो गतवान् दुष्करो नात्र संशयः॥ 65॥

---

1. बुभुक्षार्था – ख।
2. निजे – ग।
3. अन्नभोजनादग्रे – क, ख।
4. तथैव – ख।

[1](इति निश्चित्य तत्कालमायातोऽतिविशङ्कितः ।
व्यासाय सर्वं प्रोवाच श्रुत्वा सोऽप्यतिहृष्टवत् ॥ 66 ॥

गत्वा पश्यागतश्चेत्स्यान्मिलिष्यति न संशयः ।
इत्युक्तः स गतस्तत्र शालग्रामं ददर्श तम् ॥ 67 ॥

व्यासं हर्षादुवाचासावागतोत्रैव मे प्रभुः ।
ततो व्यासोऽपि तं प्राह निवसात्र कियद्दिनम् ॥ 68 ॥

तथैवास्ति तव स्वामिन् दुष्करस्य मनोगतम् ।
अत उड्डीय मार्गात्तु समायातोऽत्र स प्रभुः ॥ 69 ॥

इति श्रुत्वा सोऽपि साधुरुवाच व्याससन्निधौ ।
व्यासभक्तिपरीक्षार्थमेकदा कोऽपि वैष्णवः ॥ 70 ॥

मध्याह्ने समुपागत्य श्रावयन् व्यासमब्रवीत् ।
बुभुक्षितोऽहमत्यर्थं कदान्नं मे प्रदास्यति ॥ 71 ॥

व्यासः श्रुत्वा वचः सर्वं शीघ्रमुत्थाय यत्नतः ।
आनीयान्नं सर्वरसं पुरा[2] तस्मै ददौ स्वयम् ॥ 72 ॥

स तु भुक्त्वा कतिपयान् ग्रासान् शीघ्रं समुत्थितः ।
उदरव्यथया भोक्तुं शक्यते नेति चाब्रवीत् ॥ 73 ॥

ततो व्यासो महाभक्त्या तदुच्छिष्टं तु पत्रकम् ।
स्वयमुत्थापयामास अहो भाग्यमिति ब्रुवन् ॥ 74 ॥

ततः स साधुर्व्यासस्य पतित्वा पादयोर्मुदा ।
क्षमापयामास स द्विजं कृतं कपटमब्रवीत् ॥ 75 ॥

एवं [3]पर्णायुषामन्ते ज्ञात्वा मृत्युं ततः सुतान् ।
आहूय प्रददौ सर्वं कृत्वा भागत्रयं स्वयम् ॥ 76 ॥

धनमेकत्र चैकत्र कृष्णमूर्तिस्तथैव च ।
मुद्रातिलकमेकत्र पुत्रानाह प्रगृह्यताम् ॥ 77 ॥

तदैकेन तु सर्वस्वं परेण प्रतिमा हरेः ।
तृतीयेन तु मुद्रादि गृहीतं भक्तिपूर्वकम् ॥ 78 ॥

---

1. ख मध्ये लुप्तपाठः ।
2. पुरीं – ख ।
3. पुरुषां ते – ख, क ।

एवं व्यासो महाभक्तो बभूवाति दयान्वितः।
स नाम्ना ब्राह्मणः ख्यातः सर्वभक्तशिरोमणिः ॥ 79 ॥

इति श्रीभगवद्भक्तिमाहात्म्ये व्यासचरितं नाम द्वादशाधिकशततमः सर्गः ॥ 112 ॥

※ ※ ※

त्रयोदशाधिकशततमः सर्गः

॥ भक्तिसमुदायकथनम् ॥

एवं रूपस्य शिष्योऽभून्नाम्ना जीवेति विश्रुतः।
गोस्वामीति च विख्यातो राधाकृष्णौ जजाप सः ॥ 1 ॥

करामलकवत्सर्वं यस्य शास्त्रमभूत्किल।
सर्वसन्देहसञ्छेता तत्त्वज्ञानी महायशाः ॥ 2 ॥

एकदा केनचित्तस्मै दत्तं भोज्यमनुत्तमम्।
चिक्षेप यमुनायां स सर्वं तत्स्वयमेव हि ॥ 3 ॥

तदैकः प्राह तं शिष्यः स्वामिन्नेतं तु रक्ष्यताम्।
एतेन साधुसेवां वै करिष्ये भवदाज्ञया ॥ 4 ॥

इति शिष्यवचः श्रुत्वा जीवः प्राहातिभक्तिमान्।
न योग्यः साधुसेवायां वर्तते कोऽपि तेऽन्तिके ॥ 5 ॥

त्वं चिकीर्षसि चेत्सर्वं गृहीत्वा कुरु सेवनम्।
इति श्रुत्वा तदा शिष्यः साधुसेवापरोऽभवत् ॥ 6 ॥

स तु शिक्षां ददौ तस्मै शिष्यायातिप्रयत्नतः।
न गर्वः साधुसेवायां कर्तव्यः सर्वदा त्वया ॥ 7 ॥

एवं गोपालभक्तोऽभूद्राधाकृष्णप्रपूजकः।
सर्वभूतसुहृद्दोषत्यागी वक्ता गुणस्य च ॥ 8 ॥

भगवानपि नाम्नाभूद्भक्त इत्युपनामकः[1]।
सीतारामस्य रूपं तु गृहीतं गुरुभक्तितः ॥ 9 ॥

---

1. चाल्यु – क, ख।

एकदा मथुरायां स समायातो दिदृक्षया।
राधाकृष्णौ तत्र दृष्ट्वा तद्रूपं चेतसा धृतम्॥ 10॥

तथैव रासनृत्यादिलीलाः कुर्वन्नहर्न्निशम्।
तस्थौ गुरुरथायातो भगवन्तं ददर्श ह॥ 11॥

अन्यैव रीतिरस्याभूदिति शङ्कामवाप सः।
भगवानपि तज्ज्ञात्वा गुरोरन्तर्गतां मतिम्॥ 12॥

वृन्दावने तदैकान्ते गुरुं नत्वाब्रवीत्स्वयम्।
भवत्प्रसादादेषा वै बुद्धिः प्रादुर्बभूव मे॥ 13॥

गुरुस्तमाह किं मे न राधाकृष्णौ तु याविह।
तावेव सीतारामौ त्वं ज्ञात्वेमावेव पूजय॥ 14॥

इत्युक्त्वा प्रययौ सोऽपि गुर्वाज्ञातो [1]गृहं ययौ।
एवमेको महाभक्तो द्विजो विपुल विट्ठलः॥ 15॥

गुरुं श्रीकृष्णमेवासौ मन्यमानोऽर्च्चयन् स्थितः।
एकदा स गुरुस्तस्य मृतो दैवाद्धरिं स्मरन्[2]॥ 16॥

तदारभ्य स शोकेन तूष्णीं गेहे स्थितोऽभवत्।
अथ शोकापनोदाय तं राससमये जनाः॥ 17॥

वैष्णवा निन्युरेकस्मिन् दिने सोऽपि समागतः।
दृष्ट्वा नृत्यं हरेरग्रे तनुं तत्याज लीलया॥ 18॥

कृष्णचैतन्यशिष्योऽभूल्लोकनाथेति विश्रुतः।
कृष्णलीलां जगौ नित्यं तत्त्वज्ञानपरायणः॥ 19॥

मधु[3] गोस्वामिनाथोऽभूद्भक्तोऽतीव विलक्षणः।
एकदा स तु शुश्राव मथुरायां निरन्तरम्॥ 20॥

कृष्णस्तिष्ठति चेत्येवमागतो[4] मथुरां पुरीम्।
प्रतिकुञ्जं प्रतिवनं प्रतिह्रदं प्रतिक्षणम्॥ 21॥

विचिन्वत्स तु बभ्राम परित्यक्ताशनोदकः।
एवं दिनद्वयं जातं तृतीये दिवसे तदा॥ 22॥

---

1. गुरुं – ख।
2. जपन् – क।
3. मधुरा – ख।
4. सागतो – क, ख।

दुर्बलो यमुनातीरं गच्छन् वंशीतटं प्रति।
दृष्ट्वान्तर्गोपवेषं तु श्यामं कमललोचनम्॥ 23॥

द्रुतमागत्य तं प्रेम्णा दधाराङ्केऽतिहृष्टवत्।
ततस्तं भगवानाह मोहयन्निजमायया॥ 24॥

कोऽसि गृह्णासि मामत्र किमर्थं भ्रान्तिमानिव।
तदोवाच मधुस्वामी कृष्णबुद्ध्या धृतोऽस्मि भोः॥ 25॥

परन्तु त्वामिदानीं तु गोपं जानामि सुन्दरम्।
इत्युक्त्वा तं स तत्याज पुनर्यातो यदृच्छया॥ 26॥

अथ रात्रौ हरिः स्वप्ने प्रोवाच प्रहसन्निव[1]।
ध्यायंस्तद्रूपममलं मम सन्निधिमेष्यसि॥ 27॥

ततः सोऽति कृतार्थोऽभूत्मधुगोस्वामिनामकः।
मरणान्ते तु तत्रैव स्थित्वा विष्णुं जगाम सः॥ 28॥

कृष्णदासो ब्रह्मचारी शिष्यो रूपस्य सत्तमः[2]।
[3]गुर्वाज्ञयार्च्चयन् राधाकृष्णौ मुक्तो बभूव ह॥ 29॥

यस्य शिष्यो महानासीद्भटो नारायणाभिधः।
एवं द्वितीयः शास्त्रज्ञः कृष्णदासोऽतिभक्तिमान्॥ 30॥

भूगर्भेति च विख्यातो गोस्वामी चातिभक्तिमान्।
[4]त्यक्त्वा मनुष्यसंसर्गं भूगर्भे निवसन्सदा॥ 31॥

मानसेनोपचारेण पूजयित्वा हरिं स्वयम्।
तदार्प्पितान्नशेषेण जीवन् क्षुत्तृड्विवर्ज्जितः॥ 32॥

एवमाराध्य गोविन्दं भोजनादिविवर्जितः।
मृतो जगाम श्रीकृष्णसन्निधिं योगिदुर्लभम्॥ 33॥

इति श्रीभगवद्भक्तिमाहात्म्ये भक्तिसमुदायकथनं नाम
त्रयोदशाधिकशततमः सर्गः॥ 113॥

❊ ❊ ❊

---

1. इसन् एव हि – क, ख।
2. चोत्तमः – क।
3. गुरुक्षया – ख।
4. ख मध्ये लुप्तपाठः।

चतुर्दशाधिकशततमः सर्गः

॥ मुरारिदासचरितम् ॥

मुरारि नामा भक्तोऽभूद्रसिकेत्युपनामकः ।
कथामस्य प्रवक्ष्यामि परमाश्चर्य्यकारिणीम् ॥ 1 ॥

निधाय कुण्डे सर्वेषां भक्तानां चरणोदकम् ।
तस्यैव पूजा तत्पानं चक्रे तेनैव मार्ज्जनम् ॥ 2 ॥

एवं तस्य व्रतं नित्यमासीद्भक्तस्य दुर्ल्लभम् ।
एकदा स तु भक्तो हि गुरोः क्षयदिने बहून् ॥ 3 ॥

भक्तान्निमन्त्रयामास समायातास्तु वैष्णवाः ।
तत्रैकस्तत्परीक्षार्थं गलत्कुष्ठमवैष्णवम् ॥ 4 ॥

मालातिलकमुद्राभिर्योजयित्वा समानयत् ।
मुरारिस्तम्प्रणम्याह शिष्यं साधुपदाम्बुजात् ॥ 5 ॥

सर्वस्मादुदकं नीत्वा पाययस्वाति सत्वरम् ।
इति श्रुत्वा ततः शिष्यस्त्वरितं साधुसंसदि ॥ 6 ॥

गत्वा प्रक्षाल्य चरणौ जलं नीत्वा मुरारये ।
ददौ मुरारिस्तत्किञ्चिद्धृत्वा शिरसि भक्तितः ॥ 7 ॥

पपौ किञ्चित्ततः प्राह न तादृक् स्वादु वै कुतः ।
सत्यं ब्रूहि त्वया कोऽपि त्यक्तो नैव ममाग्रतः ॥ 8 ॥

ततः शिष्योऽब्रवीत्कुष्ठी एकस्त्यक्तो मयात्र भोः ।
मालां मुद्रां बह[1] सत्यं ब्रवीमि तव चाग्रतः ॥ 9 ॥

ततः स्वयं समुत्थाय कुण्डस्यान्तिकमागतः ।
स्वयं प्रक्षाल्य चरणौ तत्पादोदकमादरात् ॥ 10 ॥

साधुपादोदकं दत्त्वा ययौ तद्भक्तिपूर्वकम् ।
ततो हि कुष्ठिनस्तस्य[2] तत्करस्पर्शमात्रतः ॥ 11 ॥

शरीरमभवत्सम्यक् कुष्ठरोगविवर्जितम् ।
दृष्ट्वा सर्वे तदाश्चर्यं मुरारिं तुष्टुवुर्जनाः ॥ 12 ॥

---

1. बहून् – क।
2. ततस्तस्यैव कुष्ठस्य – क, ख।

द्वादशाहमसौ साधून्भोजयामास यत्नतः ।
आरामवसतस्तांस्तु तत्कर्तुं स्वयमागतः ॥ 13 ॥

अथ तेषां तु साधूनामेको धूमं पिबन् स्थितः ।
दृष्ट्वा मुरारिं तत्पात्रं नारिकेरन्तिरोदधे ॥ 14 ॥

स्वयं दृष्ट्वा मुरारिस्तु तदन्तिकमुपागतः ।
सम्भाष्य सर्वान् तत्तुष्टौ मिथ्या रोगीवदब्रवीत् ॥ 15 ॥

अहो ममोदरे पीडा समुत्पन्ना ततः क्वचित् ।
वर्तते मम पानाय नारिकेरन्तदर्प्यय ॥ 16 ॥

इति श्रुत्वा तु संहृष्टः समुत्थाय ददौ स्वकम् ।
उद्घाट्य नारिकेरं तद्गृहीत्वा योजयन्मुखे ॥ 17 ॥

मिथ्यापानं[1] विधायाथ समुत्तस्थौ गृहं प्रति ।
नोद्वेगः स्याच्च साधूनामित्येव कृतवान्स्वयम् ॥ 18 ॥

एकदा साधवस्तत्र समायाता बुभुक्षिताः ।
तान्भोजयन्स[2] शिष्यस्तु केनचित्साधुनार्थितः ॥ 19 ॥

यो मदीयोऽस्ति दण्डो यं तदर्थं पत्रमर्प्पय ।
सर्वोपकरणं तस्मै [3]यच्छेत्यब्रवीन्मुहुः ॥ 20 ॥

ततः शिष्यो न चोवाच सर्वेभ्योऽन्नं ददन्स्थितः ।
ततस्तु दण्डवान्साधुः कोपप्रस्फुरिताधरः ॥ 21 ॥

स्वोच्छिष्टपत्रमादाय मुरारेः सन्निधौ गतः ।
गत्वा तन्मस्तके क्रोधाच्चिक्षेपातिरुषा स वै ॥ 22 ॥

मुरारिस्तु ततो हृष्टो मम भाग्यमिति ब्रुवन् ।
पत्रावलीं गृहीत्वा तां नत्वा नेत्रे पिधाय च ॥ 23 ॥

शिष्यं निर्भत्सयामास तस्मै शिक्षां ददौ पुनः ।
अरे दण्डाय भवता कुतो नैवार्प्पितं वद ॥ 24 ॥

गत्वा स्वयं तन्निकटे दत्त्वा दण्डाय भूरिशः ।
प्रार्थयामास तं साधुं क्षमस्वेति वदन्मुहुः ॥ 25 ॥

---

1. रोगं – ख।
2. ख मध्ये लुप्तपाठः।
3. प्रपद्ये सो – क, ख।

दृष्ट्वैतत्परमाश्चर्य्यं सर्वे ते साधवस्तदा।
मुरारिं[1] तुष्टुवुर्हृष्टा दण्डवानतिलज्जितः ॥ 26 ॥

अथैकस्मिन् दिने तस्य श्यामानन्दो गुरु स्थितः।
तस्यैको जीविका ग्रामो हृतो म्लेच्छेन भूभुजा ॥ 27 ॥

ततो मुरारये पत्रं लिलेख स गुरुस्तदा।
पत्रं दृष्ट्वा स्थितो यादृक् तथैवैहि ममाग्रतः ॥ 28 ॥

भुक्त्वा शोधयितुं पाणिं चलितस्तद्ददर्श सः।
गुरोः पत्रं तथैवासौ चलितो गुरुसन्निधम् ॥ 29 ॥

तत्रागत्य गुरुं नत्वा श्रुत्वा सर्वं गुरोर्मुखात्।
तदैव म्लेच्छनृपतेः ग्रामसन्निधिमागतः ॥ 30 ॥

नृपतेः सचिवास्तस्य श्रुत्वा सर्वे तमागमम्।
आजग्मुर्भक्तिपूर्वं ते तमूचुरतिविस्मिताः ॥ 31 ॥

महाम्लेच्छोऽयमस्तीति[2] न तं द्रष्टुं त्वमर्हसि।
अस्माभिरेव भवतः कार्यं सम्पाद्यते सुखम् ॥ 32 ॥

इति श्रुत्वापि नासौ तदमन्यत वचस्ततः।
सचिवा आगता राजसन्निधौ नृपतिस्तु तान् ॥ 33 ॥

पप्रच्छाद्य कुतश्चासीद्विलम्बोऽभवतामिह।
इति राजवचः श्रुत्वा सचिवा आहुरादरात् ॥ 34 ॥

राजन्नो गुरुरायातस्तद्गुरोर्जीविका हृता।
भवदीयेन तेनासौ भवन्तं वक्तुमागताः ॥ 35 ॥

इति श्रुत्वाब्रवीद्राजा तमानयत साम्प्रतम्।
कीदृशी वर्त्तते शक्तिः तां मे दर्शयितुं स्वयम् ॥ 36 ॥

इत्युक्तास्तेऽपि सचिवा आनेतुं[3] तं गतास्तदा।
राजद्वारि महामत्तं स्थापयामास स्वं[4] गजम् ॥ 37 ॥

स्वयं तदुपरिष्टात्तु प्रासादे संस्थितोऽभवत्।
मुरारिरपि चायातो दोलायां गजसन्निधौ ॥ 38 ॥

---

1. मुरारीं – क, ख।
2. मस्ति ह – ख, ग।
3. ख मध्ये लुप्तपाठः।
4. वै गतम् – क।

दृष्ट्वा दोलां ततो हस्ती मत्तश्चीत्कृत्य दुद्रुवे।
दृष्ट्वा तद्दोलिकावाहा दुद्रुवुश्च[1] दिशो दश॥ 39॥

भीता[2] रुदन्तो दोलातो मुरारिर्बहिरागतः।
[3]ददर्श मत्तकरिणं जिघांसितुमुपागतम्॥ 40॥

प्राह तं गजराजं स त्यजेमां तामसीं मतिम्।
कोऽसीति हृदि सञ्चिन्त्य भज कृष्णं महागज॥ 41॥

हरेकृष्ण हरेकृष्ण राधाकृष्णेति सञ्जपन्।
इति श्रुत्वा ततो हस्ती मुरारि चरणाम्बुजे॥ 42॥

संयोज्य मस्तकं तस्थौ मुरारिरपि तत्क्षणात्।
राधाकृष्णेति मन्त्रं स तत्कर्णे प्राह निर्भयः॥ 43॥

गलेऽथ तुलसीमालां गजराजाय[4] दत्तवान्।
गोपालदास इत्येतन्नाम चक्रेऽतिहर्षितः॥ 44॥

अथेमं सर्ववृत्तान्तं प्रासादस्थो महीपतिः।
दृष्ट्वा स्वयमुपायातो बद्धाञ्जलिपुटो भयात्॥ 45॥

नत्वा क्षमापयामास नीत्वा स्वभवने मुदा।
तं ग्रामं दत्तवान्सद्यो ग्रामानन्यान्समर्प्पयत्॥ 46॥

रत्नवस्त्रादिकं चान्यद्दत्त्वा तुष्टं व्यसर्जयत्।
अथ गोपालदासस्तु गजराजो बभूव यः॥ 47॥

स साधून्पृष्ठे आरोप्य चचाराथ तदिच्छया।
राजकार्ये महामत्तो [5]नाजगामाङ्कुशादपि॥ 48॥

एवं वणिग्गृहे गत्वा गोणीमन्नप्रपूरिताम्।
नीत्वा दरिद्रसाधुभ्यो ददौ नित्यं स्वयं गतः॥ 49॥

ततस्ते वणिजः सर्वे मुरारिनिकटे गताः।
आहुर्हस्तिकृतं सर्वं श्रुत्वा सोऽप्याजगाम ह॥ 50॥

तं गजं प्राह किमिदं कुरुषेऽति [6]जुगुप्सितम्।
एकं तु दुःखितं कृत्वा परस्मै यत्प्रयच्छसि॥ 51॥

---

1. पलायित्वा – क, ख।
2. जग्मू – क, ख।
3. ख मध्ये लुप्तपाठः।
4. गजाय दतवान्स्वयम् – ख, ग।
5. मतीनां कुशादपि न्यस्यति – क।
6. जुगुक्षितम् – ख।

न्यवर्तत ततो हस्ती वणिजामवलुण्ठनात्।
स्व[1]पृष्ठोद्वहनेनैव साधुसेवां चकार सः ॥ 52 ॥

इत्येवं परमाश्चर्यं श्रुत्वा दिल्लीश्वरो[2] नृपः।
वैष्णवं[3] प्रेषयित्वा तमानिनायाथ हस्तिनम् ॥ 53 ॥

दृष्ट्वा स परमाश्चर्य्यं प्रार्थ्य[4] तस्मै गजाय[5] वै।
ददौ मिष्टान्नपानादि न जग्राह स किञ्चन ॥ 54 ॥

एवं दिनत्रये जाते दिल्लीशश्चातिचिन्तितः।
प्राप्य मद्भवनं नैव भुङ्क्ते तस्मादिमं गजम् ॥ 55 ॥

गङ्गायां स्नापयत्वद्य ततो भोक्ष्यति चेदयम्।
इति श्रुत्वा ततः सर्वे वैष्णवास्ते तु तत्क्षणात् ॥ 56 ॥

नीत्वा गङ्गां ययुः सर्वे दृष्ट्वा गङ्गां जहर्ष सः।
अथ ते वैष्णवास्तस्य पृष्ठाद्भुवि समास्थिताः ॥ 57 ॥

हस्ती[6] गङ्गां प्रविश्यासौ सम्यक् स्नात्वातिभक्तितः।
तीरे स्थित्वा ततः प्राणान् मुमोच[7] पश्यतां नृणाम् ॥ 58 ॥

इत्येतत्परमाश्चर्यं श्रुत्वा दिल्लीश्वरादयः।
तुष्टुवुर्भक्तिमाहात्म्यं साधु साध्विति वादिनः ॥ 59 ॥

एवमन्ये महाभक्ता बभूवुर्मथुरापुरि।
शाकाशी तथा चात्र[8] त्रिलोचन इति श्रुतः ॥ 60 ॥

आशाधरो देवराज इत्याद्या वैष्णवोत्तमाः।
नाम्ना च कीर्तिताश्चैते हरिभक्तिप्रदायकाः ॥ 61 ॥

इति श्रीभगवद्भक्तिमाहात्म्ये मुरारिदासचरितं नाम
चतुर्दशाधिकशततमः सर्गः ॥ 114 ॥

❊ ❊ ❊

---

1. वि – ख।
2. डि – ख, क।
3. वैभवं – क।
4. प्राप्य – ख, क।
5. जनाय – ख प्रजाय – क।
6. हस्ति।
7. मुमुचे – क, ख।
8. चैव – ग, क।

पञ्चदशाधिकशततमः सर्गः

॥ सदनाभक्तिचरितम् ॥

सदनेति महाम्लेच्छवंशजो भक्तिमानभूत्।
कथामस्य प्रवक्ष्यामि परमाश्चर्यकारिणीम् ॥ 1 ॥

पूर्वजन्मनि विप्रोऽसौ धनी [1]वृद्ध्युपजीविकाः।
दानधर्मादिरहितो निजकर्मच्युतः सदा ॥ 2 ॥

परन्त्वेकं व्रतं तस्य न कदाचित् [2]च्युतं क्वचित्।
शालग्रामशिलापूजामकृत्वा नैव भोजनम् ॥ 3 ॥

एकदा वृद्धिलोभेन ददौ म्लेच्छाय वै धनम्।
मांसविक्रयिणे विप्रो जाते कियति वत्सरे ॥ 4 ॥

न प्राप तद्धनं तस्मादथ काले ममार सः।
स्मरन् तमधमर्णं यत् प्राणांस्तत्याज स द्विजः ॥ 5 ॥

ततस्तस्यैव म्लेच्छस्य पुत्रोऽभूत्कर्मबन्धनात्।
तत्र तेनातिधनिना ह्येकपुत्रेण पालितः ॥ 6 ॥

सदनेत्यकरोन्नाम महाधनसमृद्धिमान्।
सदनोऽपि च कालेन जातो द्वादशवार्षिकः ॥ 7 ॥

शालग्रामशिलापूजानियमो यः स्थितः पुरा।
तेन तस्यैकदा कस्मादरण्ये मिलितः स्वयम् ॥ 8 ॥

शालग्रामोऽति विपुलः सेटकेनमितः शुभः।
तं गृहीत्वातिहृष्टः सन् समागत्य स्वमन्दिरम् ॥ 9 ॥

तेनैव सेटकेनासौ मांसं विक्रीतवान्सदा।
परन्तु हिंसारहितो दयावान् जीवमात्रके ॥ 10 ॥

अथ तस्य पिता माता भ्रातारश्चापि ये स्थिताः।
मृताः सर्वे तदा तेषां[3] धनस्वामी बभूव [4]ह्यः ॥ 11 ॥

एकदा तेन मार्गेण जगन्नाथदिदृक्षया।
आगता वैष्णवास्तत्र तन्मध्ये कोऽपि चागतः ॥ 12 ॥

---

1. वृत्यु – ग, ख।
2. तं भवेत् – ख, ग।
3. ते च – ख।
4. ह – क।

सदनस्य गृहद्वारि शालग्रामं ददर्श सः।
मत्वाश्चर्यं स दुःखार्त्तः सदनं प्राह[1] नम्रवत्॥ 13॥

अहो ममास्ति देवोऽयं दीयतां मे कृपां कुरु।
नास्ति किञ्चित्फलं चास्य तव सत्यं ब्रवीम्यहम्॥ 14॥

इत्युक्तः सदनः प्रादाच्छालग्रामं तु साधवे।
गृहीत्वा सोऽतिहर्षेण ययौ वैष्णवसंसदि॥ 15॥

पञ्चगव्येन संक्षाल्य[2] ततो गङ्गोदकेन च।
पूजयित्वा समर्प्यान्नं स्वयं भुक्त्वा सुखी स्थितः॥ 16॥

अथ[3] रात्रौ तदा विष्णुः स्वप्ने वैष्णवरूपदृक्।
तं साधुमब्रवीद्वाक्यं त्वद्गृहं चातिनिष्ठुरम्॥ 17॥

अहो मां नय तत्रैव म्लेच्छस्य निकटे द्रुतम्।
नोचेत्ते सर्वनाशं वै करिष्यामि न संशयः॥ 18॥

एवं दृष्टमुभाभ्यां तु स्वप्नं[4] निशि भयप्रदम्।
उत्थाय भ्रम[5] एवायमिति मत्वा स्वपत्पुनः॥ 19॥

पुनर्ददर्श चोत्तस्थौ पुनः सुप्त्वा[6] ददर्श तत्।
अथ प्रातः समुत्थाय गुरु शिष्यमुपाह्वयत्॥ 20॥

शालग्रामो यतो नीतस्तस्मै देहि द्रुतं तु तम्[7]।
श्रुत्वा शिष्योऽपि तत्कालं सदनाय ददौ शिलाम्॥ 21॥

उवाचाहो तवैवायं पूजां वाञ्छति नो मम।
गृहाणातो निजामेतां शालग्रामशिलां शुभाम्॥ 22॥

ततस्तु सदनो हृष्टो गृहीत्वा तां शिलां स्वयम्।
धनं सर्वे तु साधुभ्यो दत्त्वा प्रचलितः स्वयम्॥ 23॥

[8]तैरेव साधुभिः सार्द्धं रामनाम जपन्मुदा।
गच्छन्मार्गे तु भिक्षित्वा यत्किञ्चिद्बुभुजे मुदा॥ 24॥

---

1. हितमब्रवीत् – ख।
2. सङ्क्षाल्य – ख।
3. अद्य – ख, ग।
4. ख मध्ये लुप्तपाठः।
5. भृश – क, ख।
6. सुखाद् – क, ख।
7. तत् – क।
8. ख मध्ये लुप्तपाठः।

एवं यात:[1] क्वचिद्ग्रामे[2] भिक्षार्थी कस्यचिद्गृहे।
तत्रैकां युवतीं दृष्ट्वा ययाचे तां तु भोजनम्॥ 25॥

दृष्ट्वा सा सदनं गेहे युवानं सुन्दरं तदा।
सत्कृत्वा कुरु भो: पाकं साधो सर्वं ददाम्यहम्॥ 26॥

सदनोऽपि च तन्मत्वा पक्त्वा भुक्त्वा समुत्थित:।
चलितं तं समागत्य युवती प्राह तं रह:॥ 27॥

अहो त्वं निवसात्रैव कृत्वा लग्नं मनो मयि।
इदं गृहमिदं वित्तमहं चापि तवैव हि॥ 28॥

न मां[3] त्यज मत्वात्र मयाति प्रियया प्रिय।
श्रुत्वैतद्वचनं तस्या: सदन: प्रत्युवाच ताम्॥ 29॥

मात: कथमिदं ब्रूषे वचनं चाति गर्हितुम्।
न सेवितेन गेहेन स्त्रिया वास्ति प्रयोजनम्॥ 30॥

तवापि पतिरस्त्येव तेन साकं रमस्व भो:।
इत्युक्त्वा साति पापिष्ठा मत्पतेर्भयत: स्वयम्॥ 31॥

एवं वदति चेत्येवं चिन्तयित्वा गृहे गता।
छित्वा पत्यु: शिर: प्राह सदनं पुनरागता॥ 32॥

मया हत: पति: पश्य त्वयि प्रेम यथा मम।
अत: परं न गन्तव्यं नि:शङ्कं निवसात्र वै॥ 33॥

इत्युक्त: सदन: शीघ्रं निर्ययौ भयविह्वल:।
अथ सा पृष्ठतस्तस्य बहिरागत्य तत्क्षणात्॥ 34॥

महास्वरेण रोदिति सामाजिकमथाह्वयत्।
अहो सर्वे समायान्तु द्रुतं पश्यन्तु मे [4]दशाम्॥ 35॥

अयं साधुस्वरूपेण छित्त्वा मत्पतिमस्तकम्।
मां नीत्वा याति रक्षन्तु भवन्तोऽभ्येत्य मामिह॥ 36॥

[5]अथ सर्वे समायाता धृत्वा तं सदनं क्रुधा।
ताडयन्तो नृपस्थाने निन्यु: सर्वेऽतिकोपना:॥ 37॥

---

1. जाते – ख, मार्गे – क। 2. जाते – ख, क।
3. नामं – ख। 4. भी दृशो: – क। 5. अहो – ख।

राजापि दृष्ट्वा तं साधुरूपिणं प्राह कोपतः ।
छित्त्वा हस्तौ बहिःकार्यः नगरादेष[1] पामरः ॥ 38 ॥

तत आगत्य चाण्डालाः छित्वा हस्तौ तमत्यजन्।
ततः स सदनो मत्वा पूर्वकर्मफलं निजम् ॥ 39 ॥

तूष्णीं साधु समूहे स गत्वा तस्थौ प्रपीडितः ।
दृष्ट्वा ते साधवः प्रोचुश्चौर्य्यकर्मदशात्वियम् ॥ 40 ॥

निर्भर्त्सितोऽपि तैः सर्वैः साकमेव ययौ मुदा।
भिक्षावृत्तिः छिन्नहस्तः पुरीसन्निधिमागतः ॥ 41 ॥

अथ रात्रौ जगन्नाथः स्वप्ने प्रोवाच पूजकम्[2] ।
यः छिन्नहस्त आयाति वैष्णवैः सह तेऽन्तिके ॥ 42 ॥

शिविकायां तमारोप्य प्रातः शीघ्रं समानय।
अथ प्रातः समुत्थाय पूजकोऽभ्येत्य तत्र तु[3] ॥ 43 ॥

सर्वेषां पश्यतां तं तु सदनं प्राह भक्तिमान्।
जगन्नाथाज्ञया साधो आरुह्य शिविकामिमाम् ॥ 44 ॥

चलेति श्रुत्वा स प्राह नार्हामि शिविकामिमाम्।
पूजकेन पुनः प्रोक्तस्ततस्तान् प्रणनाम सः ॥ 45 ॥

तस्य प्रणामसमये हस्तौ जातौ तु पूर्ववत्।
अथ शोभनहस्तः स आरुह्य[4] शिविकान्तु ताम्[5] ॥ 46 ॥

जगन्नाथसमीपेगात्तत्र तस्थौ समाकृतिः ।
आयुःशेषे हरिपदं प्राप्य योगिसुदर्लभम् ॥ 47 ॥

तस्माद्भक्तिर्हि लोकस्य जात्यन्तरगतस्य च।
उद्धाराय भवत्येव सत्यं सत्यं न संशयः ॥ 48 ॥

काशीश्वरस्तु गोस्वामी कृष्णचैतन्यशिक्षितः ।
नीलाचलाद्व्रजं गत्वा कृष्णभक्त्या दिवङ्गतः ॥ 49 ॥

---

1. पुरादेषोऽति पामरः – ख।
2. पूजकैः – क।
3. हः – क।
4. मारुह्य – ख, ग।
5. काम् – ख, क।

एवं सोऽभूद्दयारामो रामदासादयस्तथा।
रामदासस्तथैवाभूद्विमलानन्दनामकः ॥ 50 ॥

पति रामस्तथा श्यामो दल्हपद्म[1]मनोरथाः।
विष्णुभक्तिरताः सर्वे मृता जग्मुर्हरेः पदम् ॥ 51 ॥

इति श्रीभगवद्भक्तिमाहात्म्ये सदनाभक्तिचरितं नाम पञ्चदशाधिकशततमः सर्गः ॥ 115 ॥

※ ※ ※

षोडशाधिकशततमः सर्गः

॥ लड्डुभक्तिचरितम् ॥

[2]खोजी नामा बभूवैको भक्तोऽतीव सुसत्तमः।
स्वगुरुं कृष्णवत्पश्यन् पूजयामास भक्तितः ॥ 1 ॥

एकदा तं गुरुः प्राह बध्वा घण्टां क्वचित्स्वयम्।
मम प्रस्थानसमयः समायातोऽन्तिकेऽधुना ॥ 2 ॥

मृतोऽहं यदि कृष्णस्य दूतैर्नीतस्तदन्तिके।
तदा कस्मात्स्वयं घण्टानादः सत्यं भविष्यति ॥ 3 ॥

[3]अन्यथान्यत्र गमनं ममैतन्निश्चितं मनः[4]।
इति श्रुत्वा वचः सर्वे ज्ञातास्तज्ज्ञातुमुत्सुकाः ॥ 4 ॥

अथैकस्मिन् दिने खोजी प्रेषितो गुरुणा क्वचित्।
तस्मिन्नेव दिने तस्य गुरुरत्यन्तदुःखितः ॥ 5 ॥

स्वाङ्गणे स्थापितः शिष्यै हृतासुः शयने स्थितः।
मृतं विलोकयन्नूद्ध्र्वं घण्टायाः नाभवद्ध्वनिः ॥ 6 ॥

नीत्वा तस्य शरीरं तु शिष्यास्ते रुरुदुस्तदा।
द्वितीये दिवसे खोजी समायातो निजं गृहम् ॥ 7 ॥

श्रुत्वा गुरुं मृतं भक्त्या रुरोदोच्चैः स्वरेण सः।
प्रबोधितोऽन्यशिष्यैस्तु खोजी पप्रच्छ तान्पुनः ॥ 8 ॥

---

1. दत्वा मम – क।
2. षोजी – ख।
3. अथान्यत्र – क।
4. मनम् – ख, वचः – क।

घण्टानादो बभूवेति नेत्युक्तं सर्वबन्धुभिः।
ततस्तु महतीं चिन्तां प्राप्य तूष्णीं स्थितः क्षणम्॥ 9॥

कथं स्थितो मृतः कुत्रेत्येवं पप्रच्छ तान्पुनः।
[1]तैरुक्तमाम्रवृक्षस्याधस्तादूर्ध्वमुखो वृत्तः[2]॥ 10॥

ततः खोजी समुत्थाय तथा सुप्त्वा विलोकयन्।
उपरिष्टाद्ददर्शैकं पक्वमाम्रफलं शुभम्॥ 11॥

उत्थाय तद्गृहीत्वा स चिच्छेद च शनैः शनैः।
तन्मध्यान्निर्गतः कीटो घण्टाध्वनिरभूत्तदा॥ 12॥

ततः सर्वे समागत्य किमिदं त्विति चाब्रुवन्।
प्राह खोजी ततः सर्वान् शृणुध्वं चात्र कारणम्॥ 13॥

गुरोर्मे[3] मृत्युसमये मनश्चास्मिन्फले गतम्।
उत्तान शायितो दृष्ट्वा ततः कीटो बभूव सः॥ 14॥

गत्वाम्रे बुभुजे पश्चात्तस्यानिःकाशितो मया।
जगाम हरिसान्निध्यं घण्टाध्वनिरभूत्तदा॥ 15॥

[4]यन्मतिस्तद्गतिश्चान्ते एवं सम्बोधयन्स्वयम्।
मनो निवेश्य चाम्रेऽस्मिन् [5]कीटोऽभूदिति निश्चितम्॥ 16॥

इति सर्वे समाकर्ण्य साधुसाध्विति चाब्रुवन्।
मनो जेतव्यमित्येव सर्वशास्त्रविनिश्चयः॥ 17॥

वर्तते तत्र कर्त्तव्यो यत्नो नित्यं मुमुक्षुभिः।
एवं परस्परालापं कृत्वा सर्वे जहुः शुचम्॥ 18॥

पुण्डरीकपुरे रङ्का नामा शूद्रो बभूव ह।
वङ्का नाम्नी च तत्पत्नी रङ्कातोऽपि दृढव्रता॥ 19॥

अकस्मादुभयोर्भक्तिर्बभूवातीव वैष्णवी।
यथालाभेन सन्तुष्टौ धनतृष्णापराङ्मुखौ॥ 20॥

---

1. ते उचुरा – ख।
2. मृतः – क।
3. गुरुर्मे – ख, क।
4. या मतिः सा – क, ख।
5. भूत्वावोधयन् – क, ख।

अरण्ये शुष्ककाष्ठानि गृहीत्वा नगरे पुनः।
विक्रीयान्नादिकं तस्य क्रीत्वा तौ जीवतः सुखम्॥ 21॥

विट्ठलेत्येव जल्पन्तौ स्मरन्तौ हृदि विट्ठलम्।
तन्मनस्कौ तदात्मानौ महाभक्तौ बभूवतुः॥ 22॥

रङ्कानुगामिनी वङ्का यत्र यत्र स गच्छति।
तत्र तत्र तु सा चापि गच्छत्येव निरन्तरम्॥ 23॥

एवं गतेषु कालेषु नामदेवोऽब्रवीद्धरिम्।
विट्ठलं दयया स्वामी देहि त्वमेतयोर्धनम्॥ 24॥

विट्ठलस्तु ततः स्वप्ने नामदेवमुवाच ह।
प्रातर्वने समागच्छ तदा दास्याम्यहं धनम्॥ 25॥

भक्तो [1]न वाच्यस्तेनैव साकं तिष्ठ वनेऽप्यहो।
अथ प्रातः समुत्थाय रङ्कावङ्केति दम्पती॥ 26॥

चलितौ स्वगृहात्तत्र हर्तुमिन्धनसञ्चयम्।
नामदेवः पुरा तत्र गत्वा भक्तं ददर्श ह॥ 27॥

ताभ्यां दातुं धनं तस्मै नामदेवाय चाब्रवीत्।
पश्य दास्यामि वित्तानि[2] मार्गे चावां निलीय वै॥ 28॥

तिष्ठावोऽत्रागतावेतौ सन्तौ किमु करिष्यतः।
इत्युक्त्वा स धनं[3] सर्वं मार्गे संस्थाप्य सन्निधौ॥ 29॥

तिरोभूय स्थितः साकं नामदेवेन यत्नतः।
अथ रङ्का समायातो दृष्ट्वा बहुधनं पथि॥ 30॥

मत्वा तृणसमं किञ्चिच्चलितः प्रत्यगात्पुनः।
धूलिभिः पूरयामास पश्यन्पत्नीं समा[4]गताम्॥ 31॥

साप्यागत्य[5] च पप्रच्छ किमत्र कृतवान्भवान्।
रङ्का आह ततः पत्नीं धनमत्र स्थितं बहु॥ 32॥

---

1. भक्तेनवोन्नं चिद्यैव – क, ख।
2. चित्तानि – क, ख।
3. सदनं – ख।
4. सुखा – क, ख।
5. साध्य – ख।

तं दृष्ट्वा तेन लोभः स्यादिति प्राच्छादितं मया।
श्रुत्वैतत्पतिवाक्यं सा अहो किं तद्धनं जनैः ॥ 33 ॥

उच्यते तस्य किं कार्यं दर्शयित्वा वदस्व तत्।
ततो रङ्का तु [1]निस्सार्य धूलीस्तामब्रवीत्प्रिये ॥ 34 ॥

पश्येदमेव तु धनं ग्रहणेऽस्य फलं शृणु।
महामोहो महाशोको महाक्रोधश्च जायते ॥ 35 ॥

एतदर्थं निहत्याशु भ्रातरं पितरं गुरुम्।
पत्नीं पुत्रं[2] पतिं हन्ति यल्लोको[3] लोभतो भुवि ॥ 36 ॥

तद्धनं नैव गृह्णीयाद्भक्तिमार्गस्य कण्टकम्।
इति श्रुत्वा तदा वङ्का गृहीत्वा पाणिना पतिम् ॥ 37 ॥

पलायित्वा द्रुतं तस्मान्निर्ययौ व्याघ्रभीतवत्।
दृष्ट्वेदं चरितं नामदेवः स वैष्णवस्तदा ॥ 38 ॥

गत्वाग्रे शुष्ककाष्ठानि स्थापयामासतुर्वने[4]।
अपरिश्रमतः काष्ठमेतयोः स्यादितीच्छया ॥ 39 ॥

तौ तु तत्सञ्चितं त्यक्त्वा विचिन्वन्तावितस्ततः।
नामदेवस्ततस्तेन भक्तेन गृहमागतः ॥ 40 ॥

रङ्कावङ्के अपि तथा भवनं समुपागतौ।
पुनः स नामदेवस्तु तेन भक्तेन संयुतः ॥ 41 ॥

रङ्कागृहे समायातो दातुं वासो धनानि च।
आगत्याग्रे [5]प्रददतुर्दृष्ट्वा वङ्कातिकोपनी ॥ 42 ॥

किमर्थमेतद्दुष्टं मे गृहे संस्थापितं धनम्।
नीत्वा गच्छ गृहात्स्वामिन् न[6] चेद्गच्छाम्यहं त्वितः ॥ 43 ॥

इत्युक्त्वा सा पतिं नीत्वा चलिता तद्गृहाद्द्रुतम्।
अथ तां नामदेवस्तु वारयामास यत्नतः ॥ 44 ॥

---

1. स्तुति सार्यधूरौ – ख, क।
2. पतिः – क, ख।
3. भो – क।
4. वर्त्तते – क।
5. प्रददतां – ख।
6. त्वं – क, ख।

वस्त्रमेकं प्रयत्नेन रङ्का जग्राह तत्करात्।
एवं तच्चरितं दृष्ट्वा विष्णुर्वैष्णवरूपधृक्॥ 45 ॥
नामदेवेन सहितो मुमुदे भक्तवत्सलः।
यावज्जीवमुभावेवं निःस्पृहौ विट्ठलेति वै॥ 46 ॥
जपन्तौ श्रीहरेर्धाम जग्मतुर्वपुषः क्षये।
एवं लक्ष्मणदासोऽभून्महाभक्तोऽतिविश्रुतः॥ 47 ॥
लड्डूभक्तो बभूवैकः कथयिष्यामि तत्कथाम्।
तीर्थयात्रां भ्रमन्सोऽथ बहुदूरं गतः क्वचित्॥ 48 ॥
तत्रासीद्रात्रिपूजार्थं[1] देवीमूर्तिर्विलक्षणा।
राजाज्ञया मनुष्यस्य बलिरासीत्सुनिश्चितः[2]॥ 49 ॥
प्रत्याहं यद्गृहेऽवात्सीत्तस्य वारो बलेरभूत्।
लड्डूभक्तं[3] गृहस्थः स नीत्वा राज्ञे[4] समर्प्ययत्॥ 50 ॥
तं गृहीत्वा ततो राजा आहूय बलिदायकम्।
देवीमन्दिरमागत्य बलिं दापयितुं स्थितः॥ 51 ॥
स्नापयित्वाप्यलङ्कृत्य मूर्तेरग्रे निधाय तम्।
लड्डूभक्तशिरः छेत्तुं बलिदाता समुत्थितः॥ 52 ॥
एकोऽप्यत्र मद्धाता[5] चिरं जीवतु कश्चन।
इति सन्तोषितस्तूष्णीं तस्थौ नोवाच किञ्चन॥ 53 ॥
देवीमूर्तिस्ततस्तं तु बलिदातारमच्छिनत्।
पलायितस्ततो राजा दृष्ट्वा तत्कदनं महत्॥ 54 ॥
लड्डूभक्तस्तु तुष्टाव भद्रकालीमनन्यधीः।
वरं ब्रूहीति सा तुष्टा देवी प्राहाथ सोऽब्रवीत्॥ 55 ॥
जगदम्ब नरं त्यक्त्वा पायसादिबलिं कुरु।
तेनैव राज्ये नृपतौ प्रजायां वरदा भव॥ 56 ॥

---

1. पूजायो – ख, पूजासी – क।
2. स्थितोन्वहम् – ख।
3. भक्तो – ख।
4. राजा – ख।
5. मेवात्र – ख, ग।

पुनराह वरं ब्रूहीत्युक्तः प्राह कृताञ्जलिः।
हरिभक्तिर्दृढा मेऽस्तु त्वत्प्रसादान्महेश्वरि ॥ 57 ॥

वरद्वयं ददौ तुष्टा देवी चान्तर्दधे ततः।
रात्रौ स्वप्ने महामाया तं राजानं च तत्प्रजाम् ॥ 58 ॥

आहाद्यादि नरं त्यक्त्वा पायसादिकमर्प्पय।
इति दृष्ट्वा तदा स्वप्नं प्रातरुत्थाय भूपतिः ॥ 59 ॥

लड्डूभक्तस्य शिष्योऽभूत् पायसादिभिरेव ताम्।
पूजयामास कालीं स[1] परं विस्मयमागतः ॥ 60 ॥

एवं तस्य प्रसन्नाभूज्जगदम्बापि भक्तितः ॥ 61 ॥

इति श्रीभगवद्भक्तिमाहात्म्ये लड्डूभक्तिर्नाम षोडशाधिकशततमः सर्गः ॥ 116 ॥

❊ ❊ ❊

सप्तदशाधिकशततमः सर्गः

॥ त्रिलोकादिचरितम् ॥

सन्त नामा बभूवैकः कुटुम्बी वैष्णवोत्तमः।
भिक्षयान्नं गृहीत्वा स भोजयामास वैष्णवान् ॥ 1 ॥

न कश्चिद्विमुखो गच्छेन्मद्गृहादिति तद्व्रतम्।
एकदा स तु भिक्षार्थं गतो ग्रामान्तरे क्वचित् ॥ 2 ॥

अथ तद्भवने साधुरेकस्तद्दिवसे गतः।
पत्नीं पप्रच्छ कुत्रास्ति सन्तभक्तो वदाशु[2] मे ॥ 3 ॥

श्रुत्वा सा चाति कोपेन साधुं प्राहाति निष्ठुरम्।
चुह्ल्यां[3] गतोऽसौ श्रुत्वा तद्वाक्यं साधुस्तु तत्क्षणात् ॥ 4 ॥

उत्थाय चलितस्तस्मात्स्थानादुद्विग्नमानसः।
अथ मार्गे सन्तभक्तो दृष्ट्वा तं च बुभुक्षितम् ॥ 5 ॥

प्रणम्योवाच साधो त्वमागच्छागच्छ मे [4]गृहम्।
भुक्त्वा यथेष्टं गच्छ त्वं ततः साधुरुवाच तम् ॥ 6 ॥

---

1. सारम् – ख।
2. स्व मे – क।
3. चुल्यां – ख, क।
4. गृहे – क।

तव गेहे गतः पूर्वं स कुत्रास्तीति मे वचः।
श्रुत्वा चुह्ल्यां[1] गतः सेति त्वत्पत्नी प्राह मे रुषा॥ 7॥

अतो न गन्तुमिच्छामि तव गेहेऽस्ति कर्कशा।
इति तद्वचनं श्रुत्वा सन्तभक्तोऽब्रवीच्च तम्॥ 8॥

न सास्ति[2] कर्कशा स्वामिन्सत्यमुक्तं वचस्तया।
चुह्ली[3]सिद्ध्यर्थमेवाहमागतोऽत्रास्मि निर्धनः॥ 9॥

तस्मादागच्छ भोः स्वामिन् कृपां कृत्वा ममोपरि।
आनीय स्वगृहं तं तु भोजयित्वा व्यसर्जयत्॥ 10॥

तदादि तस्य गेहे तु अक्षयान्नादिकं ह्यभूत्।
भगवत्कृपया नासीद्धनिकस्यापि तादृशम्[4]॥ 11॥

एवं त्रिलोकनामाभूत् स्वर्णकारोऽतिभक्तिमान्।
अलङ्कारादिनिर्माणाद् यत्तस्य वेतनं[5] ह्यभूत्॥ 12॥

तत्सर्वं प्रददौ सद्भ्यो कुटुम्बानिच्छयापि यत्।
एकदा नृपतेः कन्याविवाहः समुपागतः॥ 13॥

तदा राजा त्रिलोकं तु समाहूय ददौ स्वयम्।
सुवर्णमस्य शीघ्रं त्वं कुर्वलङ्करणं शुभम्॥ 14॥

स गृहीत्वा सुवर्णं तु रुष्टः स्वं गृहमागतः।
संस्थाप्य तत्सुवर्णं स साधुसेवनतत्परः॥ 15॥

विसस्मार त्वलङ्कारनिर्माणमथ भूपतेः[6]।
दिनद्वयेऽवशिष्टे तु विवाहस्य तदा नृपः॥ 16॥

पदातिना त्रिलोकं तं धृत्वा सन्निधिमानयत्।
अरेऽलङ्करणं जातमित्युक्तः सोऽब्रवीन्नृपम्॥ 17॥

किंविदस्ति तु कर्तव्यं कृत्वाद्यैवानयाम्यहम्।
इत्युक्त्वा गृहमागत्य राजभीत्या पलायितः॥ 18॥

---

1. चुल्यां – ख, क।
2. मेऽस्ति – ख।
3. चुल्लो – क, ख।
4. वस्तुनः – ख, ग।
5. चेतनं त्वभूत् – क।
6. भूपतिः – ख।

वनं गतो निलीयासौ चिन्तयन् जगदीश्वरम्।
अथ श्रीभगवान् कृष्णो भक्तानुग्रहकारकः[1] ॥ 19 ॥

स्वयं त्रिलोकरूपेण कृत्वालङ्करणं शुभम्।
क्षणादेव राजाग्रे कृत्वालङ्करणं ददौ ॥ 20 ॥

राजालङ्करणं दृष्ट्वा महासुन्दरमद्भुतम्।
त्रिलोकरूपिणे तस्मै ददौ बहुधनं मुदा ॥ 21 ॥

पारितोषिकमादाय नत्वा भूपं त्रिलोकवत्।
गृहमागत्य चोत्साहं चक्रे नृपकृपां वहन् ॥ 22 ॥

ज्ञातीन्स भोजयामास साधुभ्योऽन्नं ददौ मुदा।
साधुवेषेण विपिने त्रिलोकनिकटे गतः ॥ 23 ॥

प्राह त्रिलोकं कस्त्वं भोः किमर्थं चात्र तिष्ठसि।
गच्छ त्रिलोकभवने महोत्साहं करोति सः ॥ 24 ॥

पश्येदं तद्गृहादेव नीत्वेदमहमागतः।
गृहाण किञ्चिदेतस्मात् मिष्ठान्नं गच्छ तत्र वै ॥ 25 ॥

कोऽसौ त्रिलोक इत्येवं श्रुत्वा प्राह पुनः स तु।
स्वर्णकारस्तु यस्तत्र नान्यस्तन्नाम कोऽस्ति हि ॥ 26 ॥

इति श्रुत्वा त्रिलोकस्तु भुक्त्वा मिष्ट तु तत्करात्।
शनैः शनैर्गृहं गत्वा दृष्ट्वा तत्र महोत्सवम् ॥ 27 ॥

पत्नीं पप्रच्छ किमिदं कुरुषे यन्महोत्सवम्।
श्रुत्वा पत्नी तु तं प्राह विस्मिता[2] पतिवाक्यतः ॥ 28 ॥

किमेतद्भाषसे नाथ भ्रान्तिमानिव सम्प्रति।
पूर्वेद्युर्नृपतेर्गेहान्नीत्वा भूरि धनं त्वया ॥ 29 ॥

पारितोषिकमेतद्वै तदेवोत्सवकारणम्[3]।
इति पत्नीवचः श्रुत्वा त्रिलोकश्चातिविस्मितः ॥ 30 ॥

श्रीहरेः कृपया चेदं सर्वं जातममन्यत।
ज्ञात्वैवं निजभक्तस्य रक्षणं कुरुते हरिः ॥ 31 ॥

---

1. कातराः – क।
2. चिन्तिता – क, ख।
3. इति प्रभो – ख।

मत्वाऽतिदृढभक्तोऽभूद्ययावन्ते हरेः पदम्।
एवमन्ये बभूवुर्ये भक्तांस्तानत्र नामतः ॥ 32 ॥

कीर्तयिष्यामि ते सर्वे कीर्तिता भक्तिदायकाः।
सोमदासो भीमदासस्त्रिविक्रमो रघुस्त ॥ 33 ॥

मुकुन्दश्चापि गोपालभक्तश्चैव गणेश्वरः।
वाल्मीकि नामा च तथा वृद्धव्यासस्तथैव च ॥ 34 ॥

जगतो विट्ठलाचार्यो डुण्डुर्भोला तथैव च।
हरिदासस्तथालाष[1]श्छीतरश्चोद्धवस्तथा ॥ 35 ॥

कपूरीभक्त इत्येको देवानन्दस्तथैव च।
नरहर्यानन्द इति मुकुन्दाख्यो महामतिः ॥ 36 ॥

सन्तरामस्तथा खेमः[2] श्रीरङ्गो नन्द इत्यपि।
विष्णुः श्रीतम[3] इत्येष द्वारकादासमाधवौ[4] ॥ 37 ॥

रूपदामोदरश्चैव मण्डनो नृहरिस्तथा।
लोहाङ्गः केशवश्चैव भगवान्पालकन्धरः ॥ 38 ॥

प्रयागदासो गोपालो बद्रीनाथस्तथैव च।
केशवो हरिनाथश्च भौमः[5] खेमा तथैव च ॥ 39 ॥

गोविन्दब्रह्मचारीति बालकृष्णाभिधः परः[6]।
जडपूर्वश्च भरतो गोपीनाथश्च याचकः ॥ 40 ॥

गजपतिर्मुकुन्दश्चेत्येतेऽभूवंश्च साधवः।
एवं प्रतापरुद्रोऽभूद्राजा नीलाचलस्य सः ॥ 41 ॥

शिष्योऽभूत्कृष्णचैतन्यप्रभोरेकदिने स तु।
कृष्णचैतन्यनिकटे समागत्य स्थितस्तदा ॥ 42 ॥

राजानं कृष्णचैतन्यो क्रन्दन्नोवाच किञ्चन।
अथ राजा महाभूपो विमनाः प्रययौ गृहम् ॥ 43 ॥

---

1. स्वः छ – क।
2. षेमः – ख।
3. क्षी – क।
4. सन्निधौ – क।
5. भीमः – क।
6. स्तथा – ख।

श्रुत्वा श्रीकृष्णचैतन्यो महाक्रोधेन संयुतम्।
प्रतिज्ञामकरोत्तं तु न द्रक्ष्यामि पुनर्नृपम्॥ 44॥

प्रतापरुद्र आयातो भूपो भूयोऽपि भक्तितः।
न तं ददर्श श्रीकृष्णचैतन्यस्तं महाप्रभुः॥ 45॥

तदा चोत्कण्ठितो राजा कथं द्रक्ष्यति मां[1] गुरुः।
एवं चिन्तापरो राज्यं पुत्राय प्रददौ स्वयम्॥ 46॥

विष्णुभक्तस्वरूपेण[2] जगन्नाथमुपागतः।
रथयात्रादिने तत्र रथाग्रे नृत्यमाचरत्॥ 47॥

अथ श्रीकृष्णचैतन्यः प्रभुस्तत्र समागतः।
प्रतापरुद्रं दृष्ट्वा स तुतोष तत्क्षणात्प्रभुः॥ 48॥

आलिङ्ग्य तमुवाचासौ गतस्ते राज्यतो मदः[3]।
अतः परन्तु मे शिष्यो हरिभक्तिर्दृढास्तु ते॥ 49॥

इत्याकर्ण्य गुरोर्वाक्यं राजा नत्वा पुनः पुनः।
ननर्तातीवहर्षेण जीवन्मुक्त इवाभवत्॥ 50॥

एवमन्ये बभूवुर्ये भक्तास्तान्कीर्तयाम्यहम्।
[4]ब्रह्मनिष्ठो ब्रह्मदासो विहारी चतुरादिकः॥ 51॥

गङ्गारामश्च गोविन्दो लालदासः तथैव च।
प्रियादासस्तथा तक्षा महाभक्तो बभूव ह॥ 52॥

रसिकप्रियो ग्रन्थकर्त्ता महारसिकसत्तमः।
भक्तकेशवदासेति बभूवाति महायशाः॥ 53॥

इति श्रीभगवद्भक्तिमाहात्म्ये त्रिलोकादिचरितं नाम
सप्तदशाधिकशततमः सर्गः॥ 117॥

❊ ❊ ❊

---

1. मे – क, ग।
2. भक्तस्य – ख।
3. गदः – क।
4. ब्रह्मरतो – ख, ग।

अष्टादशाधिकशततमः सर्गः

॥ गोविन्दस्वामिचरितम् ॥

गोविन्दस्वामिनामाभूद्भक्तस्तत्पूजकात्मजः ।
कथामस्य प्रवक्ष्यामि परमाश्चर्य्यकारिणीम् ॥ 1 ॥

मथुरायां स्थितो विप्रो गोविन्दस्य प्रपूजकः[1] ।
तस्य पुत्रो बभूवैको नाम्ना गोविन्द इत्यसौ ॥ 2 ॥

बाल्ये गोविन्दपूजां स पश्यन् तद्भक्तिमानभूत् ।
दृष्ट्वा गोविन्दमूर्तिं स बालोऽयमित्यमन्यत ॥ 3 ॥

यथा बालोऽन्यबालेन क्रीडत्येव मनेन सः ।
गोविन्दमूर्त्या चिक्रीड बालभावान्निरन्तरम् ॥ 4 ॥

अथ श्रीभगवांस्तत्र चिक्रीड बालरूपधृक् ।
तं पश्यति स गोपालो नान्यः कोऽपीति मानुषः ॥ 5 ॥

एकस्मिन् दिवसे बालो मठाद्बहिरुपाह्वयत् ।
अथ गोविन्ददेवस्तु शिशुवेषः समागतः[2] ॥ 6 ॥

चिक्रीडतुर्दण्डखण्डमुद्दण्डौ तौ परस्परम् ।
भूमिं खनित्वा संस्थाप्य दण्डखण्डं ततः परम् ॥ 7 ॥

किञ्चिन्निहत्य दण्डेन पुनः शीघ्रं निहन्ति सः ।
स जयी चापरस्तेन जितोरिङ्गति तत्पुरः[3] ॥ 8 ॥

एवं परस्परं क्रीडन् गोविन्दो जितवान् हरिम् ।
आजितोऽपि हि भक्तेन जितो भक्त्या वशीकृतः ॥ 9 ॥

तदा[4] स भगवान्बालो दण्डखण्डं तु सत्वरम् ।
गृहीत्वा स्वमठं शीघ्रं प्रययौ तद्भयादिव ॥ 10 ॥

अथ पूजकपुत्रोऽपि गृहीतुं तमनुद्रुतः ।
मठद्वारि गतस्तत्र पूजकैर्विनिवारितः ॥ 11 ॥

अथागत्य मठद्वारात्सम्मुखे भुवि संस्थितः ।
रुदन् गालिं ददौ तस्मै गोविन्दाय मुहुर्मुहुः ॥ 12 ॥

---

1. च – ख, ग।
2. षमुपागतः – ख।
3. पुनः – क।
4. तदास्य – क।

बहिरेष्यसि चेदद्य तदा द्रक्ष्याम्यहं पुनः।
एवं ब्रुवन् खनन्[1] भूमिं ददन्गालिं स्थितो बहिः ॥ 13 ॥

अथ सायमभूत्तस्य माता निन्ये गृहञ्च तम्।
तत्रापि नासौ बुभुजे तमेव हृदि संस्मरन् ॥ 14 ॥

अथ गोविन्ददेवस्तु स्वप्ने पूजकमब्रवीत्।
गोविन्दो बालको योऽसौ ममातीवप्रियोऽस्ति भोः ॥ 15 ॥

न भुक्तं तेन मद्दोषान्मयाप्यद्य न भक्षितम्।
अतः प्रातस्तमानीय भोजयित्वा समर्प्पय ॥ 16 ॥

मह्यं प्रसादमित्येवं दृष्ट्वा स्वप्नात् समुत्थितः।
गोविन्दं शिशुमानीय भोजयामास यत्नतः ॥ 17 ॥

भगवानपि तद्रूपो बहिरेत्य पुनः स्वयम्।
क्रीडित्वा[2] द्रुतं तेन बालेन सहितोऽद्भुतम् ॥ 18 ॥

एवमेकदिने बालो रुदन्नैकान्तभूमिगः।
अर्कवृक्षफलेनाथ गोविन्देन प्रताडितः ॥ 19 ॥

सोऽप्युत्थाय फलं नीत्वा दुद्रावाति त्वरान्वितः।
अरे रे इत्यसौ मात्रा धृत्वा नीतो गृहे तया ॥ 20 ॥

दत्तं तु भोजनं भोक्तुं स यदसितुमागतः[3]।
तदा सस्मार शौचं तु न कृतं तदुपद्रवात् ॥ 21 ॥

जननीं[4] प्राह गोविन्दो मामर्कस्य फलेन सः।
सन्ताड्योद्वेजयामास[5] न शौचं कृतमित्यहो ॥ 22 ॥

ततस्तज्जननी चित्रं मत्वा तद्भाषितेन च।
हसन्तो जलमादाय ददौ स[6] शौचमाचरत् ॥ 23 ॥

एवमेकदिने श्रीमद्गोविन्दस्य च पूजने।
नीत्वा सर्वरसं चान्नं पूजकश्चलितो मठे ॥ 24 ॥

---

1. वनन् – ख।
2. क्रीडयित्वा – ख।
3. मुपस्थितः – क, ख।
4. जनन्यै – ख, ग।
5. द्विज – क, ख।
6. तं – क, ख।

गोविन्दः शिशुरभ्येत्य रुद्ध्वा मार्गे स्थितोऽब्रवीत्।
अहो मह्यं पुरा देहि ततोऽस्मै त्वं समर्पय ॥ 25 ॥

भुक्त्वायं प्रथमं याति ततः कष्टान् मिलिष्यति।
भुज्यते चेन्मया पूर्वं तदा यास्याम्यहं सह ॥ 26 ॥

इत्युक्तः पूजकः क्रुद्धो गत्वा तत्पितुरन्तिके।
उवाच पूजनं स्वामिन् गृह्यतां न करोम्यहम् ॥ 27 ॥

अयं ते तनयो नाम्ना योऽसौ[1] गोविन्द उच्यते।
करोत्यनर्थं मार्गे च रुध्वा वदति निर्भयम् ॥ 28 ॥

देहि मे प्रथमं भोक्तुं ततश्चास्मै प्रयच्छ भोः।
इति श्रुत्वा पिता तस्य तत्रागत्याब्रवीत्सुतम् ॥ 29 ॥

किमिदं कुरुषेऽनर्थं श्रुत्वा सोऽतीव निर्भयः।
प्रोवाच पितरं सोऽपि पिता प्रोवाच तं पुनः ॥ 30 ॥

न गमिष्यसि चाद्य त्वं बहिर्भुंक्ष्व मठे तु सः।
भुक्त्वा गमिष्यति बहिस्त्वया सह न संशयः ।। 31 ॥

तथा स्वीकृत्य बाह्ये स बुभोज[2] पूजको ददौ।
मठेऽन्ने विष्णवे सोऽथ भुक्त्वा बहिरुपागतः ॥ 32 ॥

ते दृष्ट्वा शिशुगोविन्दस्त्यक्त्वान्नं स समुत्थितः।
अहोऽयं प्रथमं याति वनं त्यक्त्वा तु मामिह ॥ 33 ॥

अतो मया न भोक्तव्यं सहानेन व्रजाम्यहम्।
इत्युक्त्वा प्रययौ शीघ्रं सर्वे दृष्ट्वाति विस्मिताः ॥ 34 ॥

किं वदत्येष बालोऽयमुन्मत्त[3] इव दृश्यते।
इति संचिन्तयन्तस्ते ययुः कार्यार्थमातुराः ॥ 35 ॥

अथ[4] रात्रौ पूजकाय गोविन्द इदमब्रवीत्।
एष मेऽतीव भक्तोऽस्ति न भोक्ष्येऽमुं विनात्वहम् ॥ 36 ॥

अतोऽस्मै प्रथमं देहि ततो मह्यं समर्पय।
तदादि तस्मै शिशवे पूजकोऽन्नं ददौ मुदा ॥ 37 ॥

---

1. यो वै – ख।
2. बुभुजे – ख।
3. मन्यत – ख।
4. ख, ग मध्ये संदिग्धपाठः।

एवं गोविन्दबाल: स बाल्यादेवातिभक्तिमान्।
गृहीधर्मेण श्रीकृष्णं पूजयामास भक्तित: ॥ 38 ॥

लोके भुक्त्वाखिलान् कामान् श्रीकृष्णस्य प्रसादत:।
आयुषोऽन्ते जगामासौ वैकुण्ठं योगिदुर्लभम् ॥ 39 ॥

एवं श्रीकृष्णरघुनाथाख्यो गोपीनाथस्तथैव च।
रामभद्रेति विख्यात: सर्वे वैष्णवसत्तमा: ॥ 40 ॥

इति श्रीभगवद्भक्तिमाहात्म्ये गोविन्दस्वामिचरितं नामाष्टादशाधिकशततम: सर्ग: ॥ 118 ॥

❊ ❊ ❊

एकोनविंशत्यधिकशततम: सर्ग:

॥ गुञ्जामाली-गणेशदेवीचरितम् ॥

गुञ्जामाली बभूवैक: पश्चिमे विष्णुभक्तिमान्।
लाहाउर इति ख्याते ग्रामे[1] धनसमृद्धिमान् ॥ 1 ॥

तस्यैकतनयोऽकस्माद्युवा मृत्युमुपागत:।
गुञ्जामाली ततो गेहाद्विरक्तोऽभूदतिव्यथ: ॥ 2 ॥

धनं सर्वं द्विधा कृत्वा पत्न्यै[2] पुत्रस्त्रियै यथा।
दत्त्वोवाच गृहाणेदं याम्यहं मथुरापुरीम् ॥ 3 ॥

अथ स्नुषा प्रणम्याह किमनेन धनेन मे।
भोगाय धनमाहेति[3] नाहं भोगाधिकारिणी ॥ 4 ॥

सह त्वयैव यास्यामि कुर्वन्ती तव सेवनम्।
गुञ्जामालीति वचनं श्रुत्वा पत्न्यै ददौ धनम् ॥ 5 ॥

कियन्नीत्वा धनं पुत्रस्त्रिया सह समागत:।
मथुरायां व्रजे चैको मठो जीर्णचिरन्तन: ॥ 6 ॥

तन्मध्ये कृष्णमूर्तिश्चास्थिता तस्य मठस्य स:।
समीपे स्वकुटीं कृत्वा तस्थौ तत्रातिभक्तित: ॥ 7 ॥

---

1. देश – क।
2. पत्नी – ख।
3. मिच्छति – ख।

स्नुषापि तस्य सद्बुद्धिर्ब्रह्मचर्यपरायणा।
शुश्रूषयन्ती श्वशुरं पितृवद्भक्तितत्परा॥ 8॥

पूजयामास कृष्णस्य तां मूर्तिं चाति यत्नतः।
गुञ्जामालिस्नुषा नित्यं ब्रह्मचर्यपरायणा॥ 9॥

यदा निवेद्य चान्नं सा बहिरायाति [1]तत् क्षणे।
तदन्नं व्यक्तमेवाभूदङ्गुलीभिस्तु खण्डितम्॥ 10॥

एवं प्रत्यहमाश्चर्यं तयोर्भक्तिप्रभावतः।
एकदा शिशवस्तत्र क्रीडितुं समुपागताः॥ 11॥

धूलीभिरिष्टकाभिश्च क्रीडन्तश्च परस्परम्।
भगवन्मूर्तिमपि तां धूल्या संच्छादयन्ति हि॥ 12॥

गुञ्जामालिस्नुषा दृष्ट्वा धूलिभिर्धूसरं हरिम्।
ततस्ते शिशवः सर्वे तया निर्भत्सिता गताः॥ 13॥

ततो नैवेद्यमादाय मूर्त्यग्रे प्रददौ स्नुषा।
बहिरेत्य स्थिता द्वारं [2]पिधाय तदनन्तरम्॥ 14॥

गृहे गत्वा ददर्शान्नमच्छिन्नं चिन्तिताभवत्।
गुञ्जामालिनमाहार्ता न भुक्तं हरिणा विभो॥ 15॥

सोऽपि दृष्ट्वा विचिन्त्यार्तो हरेर्दत्त्वा पिधानकम्।
मुहुः क्षमापायित्वाथ गत्वा दृष्ट्वा तथा स्थितम्॥ 16॥

बहिरागत्य तूष्णीं स तस्थौ चिन्तासमन्वितः।
स्नुषां प्राह पुनर्मोहात् त्वं भुंक्ष्वान्नमहं तु न॥ 17॥

तावद्भोक्ष्यामि यावन्नो भोक्ष्यति श्रीहरिः स्वयम्।
श्रुत्वा सा प्राह नैवाहमपि भोक्ष्यामि किञ्चन॥ 18॥

ततस्ताभ्यां क्षुधार्ताभ्यां नैव भुक्तं तु किञ्चन।
नैवेद्यं श्रीहरेरग्रे दत्त्वा सुषुपतुर्निशि॥ 19॥

उभौ स्वप्ने हरिः प्राह दिवा ये शिशवः स्थिताः।
तेऽतीव मे प्रिया यस्माद्युवाभ्यां यद्बहिः कृताः॥ 20॥

---

1. वे क्षणम् – ख, क।
2. विधाय – ख।

ततो भुक्तं न नैवेद्यं तस्मादानयतां तु तान्।
इति दृष्ट्वा तु तौ[1] स्वप्नं श्वशुरेण सह स्नुषा॥ 21॥
उत्थाय तं हरिं प्राह प्रातरेष्यन्ति तेऽर्भका:[2]।
भुंक्ष्व प्रातस्तु दास्यामि धूलीस्तै: शिशुभि: सह॥ 22॥
धूल्यामेव यदि प्रेम भवते प्रददाम्यहम्।
किं त्वन्नं धूलिभिर्दुष्टं भविष्यति ततोऽधुना॥ 23॥
इति श्रुत्वा ततो देव: सुप्रीतो बुभुजे तु तत्।
नैवेद्यं स समागत्य दृष्ट्वा भुक्तं यथा पुरा॥ 24॥
मुमुदे श्वशुरस्तस्या गुञ्जामाली ननर्त ह।
एवं तौ भगवद्भक्तौ भूत्वान्ते मुक्तिमापतु:॥ 25॥
एवं विट्ठलनामाभून्महाराष्ट्रेऽतिभक्तिमान्।
मुरली रघुनाथश्च तथैव यदुनन्दन:॥ 26॥
हरिदासो मुकुन्दश्च विष्णुदासश्चतुर्भुज:।
दण्डप्रणामं कर्ता च केशवश्चातिभक्तिमान्॥ 27॥
एवं स्त्रियो भक्तिमत्यो बभूवु: कथयामि तत्।
हाला [3]क्षत्रियकन्यैका सीता नामेति विश्रुता॥ 28॥
उमा गङ्गा तथा गौरी गोपालेत्येवमादय:।
एवं गणेशदेवीति राज्ञी भक्ता बभूव ह॥ 29॥
कथामस्या: प्रवक्ष्यामि शृण्वतां प्रीतिवर्द्धिनीम्।
गणेशदेवी श्रीकृष्णं पूजयन्त्यथ वैष्णवान्॥ 30॥
महाभक्त्यार्च्चयामास मत्वा[4] श्रीकृष्णसेवकान्[5]।
एकदा कोऽपि दुष्टात्मा भूत्वा वैष्णवरूपधृक्॥ 31॥
जनयामास राज्ञे स भक्तिं कपटचेष्टिताम्।
तत: स धूर्तभक्तस्तु राज्ञो विश्वासवानभूत्॥ 32॥

---

1. सा – ख, ग।
2. तद्धुना – क।
3. क्षत्री – ख।
4. ज्ञात्वा – ग, ख।
5. सेवनात् – ख।

अतः पुरोऽपि[1] स याति स्वेच्छं[2] तैः सह तिष्ठति।
राजापि वैष्णवं मत्वा न किञ्चित्तमुवाच ह ॥ 33 ॥

एकस्मिन् दिवसे राज्ञी तस्थावेकान्तमन्दिरे।
धूर्तभक्तो गतस्तत्र क्षुरिकां प्रतिगृह्य च ॥ 34 ॥

राज्ञीं जघान जङ्घायां शक्त्या चैवं वदन् खलः[3]।
क्क धनं वर्तते मह्यं देहीत्येवं वदन्मुहुः ॥ 35 ॥

निःससार ततो रक्तं दृष्ट्वा तद्धूर्तवैष्णवः।
त्रस्तः[4] पलायितस्तस्मात्स्थानात्प्राणरिरक्षया[5] ॥ 36 ॥

अथ राज्ञी समुत्थाय बबन्ध [6]तद्व्रणं स्वयम्।
राजा तत्र गतो गेहे शय्यां गन्तुं समास्थितः ॥ 37 ॥

ददर्श शोणितं वस्त्रे सन्दिहानोऽब्रवीत्प्रियाम्।
किमिदं दृश्यते रक्तमिति श्रुत्वाब्रवीन्नृपम् ॥ 38 ॥

स्त्रीधर्मेणेदमभवन्नात्रागच्छामि तेऽन्तिकम्।
श्रुत्वा तद्वचनं राजा परावृत्यागतो बहिः ॥ 39 ॥

चतुर्थे दिवसे राजा कामुको मन्दिरं गतः।
पत्नीं तु समुपागत्य दृष्ट्वा तामतिदुःखिताम् ॥ 40 ॥

ततः पप्रच्छ तां राजा दुःखं किं वर्तते तव।
ततो राज्ञी नृपं प्राह धूर्तभक्तस्य चेष्टितम् ॥ 41 ॥

तस्मिन्नेव दिने शक्त्या जङ्घायां विनिहत्य सः।
मत्तो धनं जिघृक्षुः[7] सन् दृष्ट्वा[8] मे शोणितश्रवम् ॥ 42 ॥

पलायितो गतो गेहान्न जानेऽत्रास्ति वा न वा।
साधुर्लोभवशादेवं मास्य दण्डो भवेदिति ॥ 43 ॥

ज्ञात्वा मया न भवते प्रोक्तं तस्मिन् दिने तथा।
इति श्रुत्वा पतिस्तस्या भक्तिधैर्यात्तुतोष ह ॥ 44 ॥

---

1. ऽति – ख।
2. स्वेकां – ख, ग।
3. वलः।
4. ब्रह्माः – क।
5. णादिरक्षया – ख, ग।
6. तत्क्षणम् – ख, ग।
7. वृक्षु – ख।
8. दत्वा – क।

सत्यं तयाथ प्रियया भुक्त्वा राज्यमकण्टकम्।
अन्ते जगाम नृपतिः श्रीकृष्णपदमुत्तमम्॥ 45॥

एवमन्यास्तथा जात्या स्त्रियो भक्ता ब्रवीमि ताः।
[1]कलावती सत्यभामा काली मानवती तथा॥ 46॥

यमुना कमलादेवी मृगा हीरा च देवकी।
एवमाद्या महाभक्ता बभूवुर्योषितोऽपि च॥ 47॥

इति श्रीभगवद्भक्तिमाहात्म्ये गुञ्जामालिगणेशदेवीचरितं नामैकोनङ्कवशत्यधिकशततमः सर्गः॥ 119॥

❊ ❊ ❊

विंशत्यधिकशततमः सर्गः

॥ लषाभक्तिचरितम्॥

अन्तर्वेदे कान्यकुब्जग्रामस्य तु समीपतः।
भूमिग्रामोऽस्ति तत्राभून्नरवाहन नामतः॥ 1॥

स भक्तो[2] नौकया वैश्यव्यापारं कृतवांस्ततः।
अन्नवस्त्रादिना साधूंस्तोषयामास यत्नतः॥ 2॥

एकदा तस्य नौः सर्वसामग्रीसहिता बलात्।
केनाप्यपहृता तस्य लुण्ठकेन बलीयसा॥ 3॥

आनीतो भवने तेन बध्वासौ नरवाहनः।
ततो लुण्ठाकभवने समीपान्नरवाहनः।
तत्र स्थितो हरिं चित्ते स्मरन् द्वित्रिदिनोत्तरम्[3]॥ 4॥

नरवाहनाय लुण्ठाकदास्यन्नं दातुमागता॥ 5॥

दृष्ट्वा तं साधुरूपं सा नरवाहनमब्रवीत्।
अहोऽयं हरिवंशस्य युवा [4]शिष्योऽत्र तिष्ठति॥ 6॥

अतस्तमुच्चैः श्रीराधावल्लभेति ध्वनिं कुरु।
श्रुत्वा पृच्छति कस्त्वं भोः तदा तस्मै वद न द्रुतम्॥ 7॥

---

1. लध्वा - ख, लखा - क।
2. मुक्ती - क।
3. नान्तरं - क।
4. शिष्योभूवात्र - ख।

गोस्वामिहरिवंशस्य शिष्योहमिति तं वद।
श्रुत्वा तन्नाम सत्कृत्य सर्वं दास्यति ते धनम्॥ 8॥

ततो दासीवचः श्रुत्वा चक्रे सर्वं तदुक्तवत्।
लुण्ठाकस्तं महाभक्त्या सम्पूज्य प्रददौ धनम्॥ 9॥

नैवं कुत्रापि वक्तव्यमित्युक्त्वा प्रददौ धनम्।
ततस्तञ्चापि लुण्ठाकं शिक्षित्वा नरवाहनः॥ 10॥

महाभक्तं[1] विधायाथ नीत्वा स्वीयं धनं मुदा।
तदा[2] ततोऽपि स्वगृहमाजगामातिहर्षितः॥ 11॥

[3]जयमल्लार्ज्जुनौ चैवं श्रीगोविन्दजनार्दनौ।
दामोदरश्चेश्वरश्च मायानन्दस्तथैव च॥ 12॥

गुठले तुलसीदासो गौरीदासस्तथापरः।
जटी आनपुरे भाडदासो भक्तो बभूव ह॥ 13॥

वेदी वैश्यो रामदासो गौतमो मोहनस्तथा।
माडौरे जगदीशोऽभूल्लक्ष्मणश्च रथावलौ॥ 14॥

तथा सोमपथग्रामे भगवा इति विश्रुतः।
सलषानपुरे तद्वद्गोपालोऽभून्महायशाः॥ 15॥

योवनेरपुरेऽथान्यो गोपालो भक्तिमानभूत्।
कुटुम्बी सकलत्रादिर्मुक्तोऽप्यस्तुतिस्पृहः॥ 16॥

अथैकदिवसे तस्य वंश्योऽरण्यं गतः पुरा।
विरक्तः स तु गोपालं श्रुत्वा भक्तं समागतः॥ 17॥

तत्परीक्षां [4]चिकीर्षुः स गोपालद्वारमागतः।
गोपालस्तं न जानामि ममायं कोऽपि पूर्वजः॥ 18॥

सामान्यवैष्णवधिया सत्कृत्य भक्तिपूर्वकम्।
उवाचागच्छ भवने श्रुत्वोवाच स पूर्वजः॥ 19॥

अहो ममैष नियमो न पश्याम्यबलामुखम्।
त्वं कुटुम्बी तव गृहे कथं यास्याम्यहं व्रती॥ 20॥

---

1. भक्ति – क।
2. तद्दत्तं – क।
3. जग्मतुः प्रागुभौ – ख।
4. वृक्षस् – ख, जिघृक्षुः – क।

श्रुत्वा तमाह गोपालः स्त्रियः स्थास्यन्ति कुत्रचित्।
इत्युक्त्वा तास्तिरोधाय[1] विरक्तं गृहमानयत्॥ 21॥

अथागत्य विरक्तस्तु दृष्ट्वा कस्याश्चिदाननम्।
क्रुद्धो गोपालवदने निजघान चपेटया॥ 22॥

अरे त्वया दर्शितं मे स्त्रीमुखं कथमद्य भोः।
इति जल्पन् तदा तस्मै गोपालः प्राह दृष्टवत्॥ 23॥

अहो भाग्यमभूदस्य कपोलस्य न संशयः।
द्वितीयमपि चेदेवं कृतार्थं स्यात्तदा तु तत्॥ 24॥

ययातु भवने भक्तं दर्शितं स्वमुखं हठात्।
तस्या दण्डः प्रवक्तव्यः करोम्यद्यैव ते पुरः॥ 25॥

वचनं [2]निर्दयं चेदं श्रुत्वा तु कुलजोऽब्रवीत्।
अहो स्त्रीणां न दण्डोऽस्ति न तवाप्यस्ति दूषणम्॥ 26॥

अहं तव परीक्षार्थमागतोऽत्र न संशयः।
येन क्रोधो जितो लोके तेन सर्वारयो जिताः॥ 27॥

लोभमोहादयोऽन्ये ये भक्तिविघ्नकरा नृणाम्।
इत्युक्त्वा स ययौ क्वापि गोपालोऽपि गृहे स्थितः॥ 28॥

लषा[3] नाम बभूवैको महादेशेऽति भक्तिमान्।
भिक्षामादाय सततं साधवेऽन्नं[4] ददौ मुदा॥ 29॥

एवं तस्य व्रतं ह्यासीदेकस्मिन् दिवसे तदा।
दुर्भिक्षमभवद्घोरं तदा सोऽप्यतिचिन्तितः॥ 30॥

तस्मिन् दिने भोजयित्वा साधूनस्वयमुपोषितः।
पत्नीमुपोषितां प्राह किं करिष्याम्यतःपरम्॥ 31॥

देशान्तरेऽद्य गन्तव्यं स्थातव्यं चात्र तद्वद।
मया चैवन्तु निश्चित्य स्थापितं शृणु भोः प्रिये॥ 32॥

यस्मिन् दिनेऽत्र साधुभ्यो न दास्यामि कथञ्चन।
तदा सन्दीप्य भवनं मरिष्ये नात्र संशयः॥ 33॥

---

1. स्नाति – ख, क।
2. अति निर्द्दयं वचनं।
3. तेषां – ख।
4. मन्नं सद्यौ – ख।

इत्युक्त्वा सापि निःशङ्का तथैवाह पतिं मुदा।
रात्रावुभौ सुषुपतुर्लषा स्वप्ने ददर्श ह॥ 34॥

विष्णुभक्तः समागत्य वदत्यतिदयान्वितः।
लषाभक्त न कर्तव्या चिन्ता हृदि कथञ्चन॥ 35॥

प्रातरेत्य पुराधीशो महिषीं ददतीं पयः।
पञ्चाशन् मणगो[1]धूमानिहागत्य प्रदास्यति॥ 36॥

स्वयं करेण पिष्ट्वा[2] तान् पिधायोपरि यत्नतः॥ 37॥

महिष्याः पयसस्तक्रं[3] घृतं चापि भविष्यति।
तेन भोजय भक्तांस्त्वं युवाभ्यामपि भुज्यताम्॥ 38॥

दुर्भिक्षभयतो मृत्यौ न मनः कर्तुमर्हसि।
इति स्वप्नं समीक्ष्यासौ समुत्थाय हरिं स्मरन्॥ 39॥

प्रातः पत्नीं वदन्नेतद्ग्रामे ग्रामणीः स्थितः।
स आह स्वजनान्सर्वान् दुर्भिक्षोऽयं महानभूत्॥ 40॥

सर्वेषामन्नमस्त्यत्र सर्वं संवत्सराधिकम्।
लषाभक्तस्य नास्त्यन्नं तस्मै देयं मतिर्मम॥ 41॥

श्रुत्वैतद्वचनं सर्वे स्वीकृत्यान्नं ददुर्मुदा।
तथैव ग्रामणीर्दत्त्वा नीत्वा च महिषीं स्वकाम्॥ 42॥

लषाभक्ताय दत्त्वाह गृह्यतामिदमद्य भोः।
व्यये कृतेऽस्मिन् वक्तव्यं पुनर्दास्याम्यहं तव॥ 43॥

इति श्रुत्वा लषा प्राह पर्याप्तमिदमेव मे।
ग्रामणीः स्वगृहं यातो लषाभक्तोऽपि तत्क्षणात्॥ 44॥

स्वप्नं संस्मृत्य कोष्ठ्यां स कृत्वा तद्वदुपाहरत्।
महिषीघृततक्राभ्यां भोजयामास वैष्णवान्॥ 45॥

एवं दुर्भिक्षसमयं सर्वं निन्ये सुखेन[4] सः।
ततः श्रीमज्जगन्नाथं द्रष्टुं स चलितोऽभवत्॥ 47॥

---

1. मनसो – ख।
2. कृत्वा – ख।
3. पयः सस्तकं – क।
4. तु तेन सः – ख।

कुर्वन् साष्टाङ्गनमनं पुरुषोत्तमपुरे गतः।
कृशोऽपि नैव तत्याज साष्टाङ्गप्रणतिं लषा॥ 48 ॥

अथाष्टादशनिशायां वै दृष्ट्वा स्वप्नं तु पूजकः।
आदाय शिविकां तत्र लषां संस्थाप्य यत्नतः[1] ॥ 49 ॥

दर्शयामास नीत्वा तं जगन्नाथं सतां गतम्।
दृष्ट्वा तत्र स्थितो भक्त्या लषाभक्तोऽस्य कन्यका॥ 50 ॥

स्थिता तस्या विवाहार्थं स्वप्ने पूजकमब्रवीत्।
जगन्नाथो देहि तस्मै लषाभक्ताय पूजक॥ 51 ॥

अथागच्छन् नृपग्रामे क्वचिद्रात्रौ स्थितोऽभवत्।
तत्र राजा निशि स्वप्नं दृष्ट्वा मुद्रासहस्रकम्॥ 52 ॥

कन्याविवाहसिध्यर्थं लषाभक्ताय देहि भोः।
लषा नैवाग्रहीद्राजा रोधयित्वा ददौ पुनः॥ 53 ॥

तदादत्तां[2] लषा मुद्रां गृहीत्वा गृहमागतः।
शतेनैव सुताकार्य्यं कृतमन्यैस्तु साधवः॥ 54 ॥

तर्पितास्तु ततो यावज्जीवं हरिपदाम्बुजम्।
स्मरन् साधु जनान्नित्यमर्च्चयन्निह भक्तितः॥ 55 ॥

अन्ते जगाम श्रीकृष्णसंनिधिं योगिदुर्लभाम्॥ 56 ॥

इति श्रीभगवद्भक्तिमाहात्म्ये[3] लषाभक्तिचरितं नाम
विंशत्याधिकशततमः सर्गः॥ 120 ॥

❊ ❊ ❊

---

1. सत्कृतम् – ख।
2. तदाग्रहीत – क।
3. सर्वत्र सर्गे लषेति पाठः – ख।

एकविंशत्यधिकशततमः सर्गः

॥ नरसीभक्तिचरितम् ॥

तद्राजा ग्रामवास्यासीत् गुर्जरेषु च नागरः ।
विप्रो नाम्ना तु नरसी महतेत्युपनामकः ॥ 1 ॥

सौराष्ट्रदेशे विख्यातः पूर्वं जातो द्विजोत्तमः ।
पश्चात्तु द्वारकाया वै अष्टयोजनपश्चिमे ॥ 2 ॥

पर्वतो रैवतो नाम तस्यैव तु समीपतः ।
[1]पूनाठठेति विख्यातस्तत्रोवास निरन्तरम् ॥ 3 ॥

नरसी पितृमातृभ्यां रहितो ज्येष्ठबन्धुयुक् ।
तत्पत्नी चापि भवने स्वयमस्त्रीक एव च ॥ 4 ॥

एकदा पर्य्यटित्वा स ग्रामेऽकस्माद्गृहं गतः ।
भ्रातृजायामुवाचासौ[2] जलं देहि पिपासितः ॥ 5 ॥

सा कार्यवशतः क्रुद्धा भर्त्सयन्त्यब्रवीद्वचः ।
कृत्वा कार्यं श्रमेणाद्य यदत्रागतवानसि ॥ 6 ॥

ततः पिपासितोऽत्यर्थं जल्पन्नेवं न लज्जसे ।
पानभोजनवेलायां दृश्यते त्वं हि सर्वदा ॥ 7 ॥

नान्यस्मिन् गृहकार्येषु ततो याहि पिबान्यतः ।
मम नैवावकाशोऽस्ति स्वयं नीत्वापि वाथवा[3] ॥ 8 ॥

इति भ्रातृवधूवाक्यं श्रुत्वारानिमिव द्विजः ।
तत्कालं निर्ययौ गेहाद् मरणे कृतनिश्चयः ॥ 9 ॥

क्वचिद्गत्वा मरिष्येऽद्य नैतस्याः कटुभाषणम् ।
श्रोतुमिच्छामि चण्डायाः इति निश्चित्य निर्गतः ॥ 10 ॥

ययौ स्वग्रामतः क्रोशत्रयोपरि पिपासितः ।
गोपनाथेति नाम्नास्ते यत्र लिङ्गं वरप्रदम् ॥ 11 ॥

तत्र तस्थौ स सप्ताहमन्नपानविवर्जितः ।
न मृतस्तु तदोत्थाय मर्तुमुद्योगमाचरत् ॥ 12 ॥

---

1. जुनागठेति – क।
2. यमुना चेदं – ख।
3. चान्नवा – ख, क।

गृहीत्वा गुरुपाषाणं स्वशिरः शिवलिङ्गके।
संस्थाप्य हन्तुमारब्धः[1] स्मरन् भ्रातृवधूवचः ॥ 13 ॥

अथाशुतोषो भगवान् महादेवो दयानिधिः।
विप्ररूपधरस्तत्र समायातो न्यवारयत् ॥ 14 ॥

किमर्थमात्महत्येयं क्रियते पूर्ववत्त्वया।
यमिच्छसि वरं ब्रूहि प्रियं मत्तो ददामि ते ॥ 15 ॥

इति श्रुत्वा तु नरसी प्राह तं विप्ररूपिणम्।
नाहं जाने प्रियं नृणां किं भवत्यत्र भूतले ॥ 16 ॥

तस्मात्तव प्रियं यत्स्याद्दर्शयित्वा प्रदेहि तत्।
इति तद्वचनं श्रुत्वा विप्ररूपधरः शिवः ॥ 17 ॥

चिन्तयामास हृदये कथं दास्याम्यहं प्रियम्।
तथापि भक्तेनादेयं वर्त्तते किमपीह मे ॥ 18 ॥

इति निश्चित्य नरसीं पुनः प्राह द्विजः शिवः।
नेत्रे निमील्य तिष्ठात्र ददाम्येष निजप्रियम् ॥ 19 ॥

इति श्रुत्वा तु नरसी तस्थौ नेत्रे निमील्य सः।
ददर्शाथ स्वप्नतुल्यं नीत्वा स तं द्विजं शिवः ॥ 20 ॥

आनीय मथुरायां च दर्शयामास स्वप्रियम्।
प्रदीपधारिकां कृत्वा नरसी स्त्रीस्वरूपिणम् ॥ 21 ॥

स्वयं शिवो रासनृत्ये गत्वोवाच दयान्वितः।
अयं कृष्ण इयं राधा प्रियमेतद्द्वयं मम[2] ॥ 22 ॥

राधाकृष्णेति मन्त्रोऽयं गृह्यतां सर्वकामदः।
ततः कृष्णः शिवं प्राह केयं दीपधरा तव ॥ 23 ॥

भक्तोऽयं तव देवेश मयानीतस्त्वदन्तिके।
कृपावलोकनेनेमं कृतार्थं कुरु भूतले ॥ 24 ॥

श्रुत्वेदं शम्भुवचनं कृष्णः प्रोवाच शङ्करम्।
यस्ते ममातीवभक्तः प्राणसमः स तु ॥ 25 ॥

---

1. मारुद्धा – ख।
2. समः – क।

तव निन्दां प्रकुर्वाणो मद्भक्तिं कुरुते यदि।
मम द्वेष्यो न सन्देहः सत्यं सत्यं वदाम्यहम्॥ 26॥

मद्वेषान्नरके घोरे पीड्यते यमकिङ्करैः।
पश्चाद्विटकृमिरूपेण ग्रामशूकरयोनिजः॥ 27॥

[1]खिद्यते सोऽत्र भिक्षार्त्तो जन्मजन्मनि मानवः।
[2]अतोऽयं तव भक्तश्चेन्ममातीवप्रियः शिव॥ 28॥

इत्युक्त्वा नरसीं दीपधारिणीरूपधारिणम्।
मामीदृशं स्मरन् चित्ते गीतनृत्यपरायणः॥ 29॥

संसारे चरलोकेऽपि सुखं [3]प्राप्स्यत्यनुत्तमम्।
परलोके तु मामेव त्वं सम्प्राप्स्यस्यसंशयम्॥ 30॥

यदा यदा त्वं कार्यार्थे स्मरिष्यसि तदा त्वहम्।
वेषान्तरेण सम्प्राप्तः करिष्यामि [4]तवेप्सितम्॥ 31॥

इत्युक्तो नरसी सर्वं दृष्ट्वा स्वप्नवदुत्थितः।
गोपनाथस्य निकटे तूष्णीं तस्थौ क्षणं ततः॥ 32॥

राधाकृष्णेति नामैव मन्त्रं हृदि जपन् मुदा।
उत्थाय च शिवं नत्वा ययौ ग्रामान्तरे क्वचित्॥ 33॥

तत्रैकस्तस्य जातीयो ज्ञात्वा तं नरसी त्वयम्।
अन्तर्गतेन हरिणा प्रेरितोऽस्मै ददौ सुताम्॥ 34॥

कृत्वा विवाहं स्वग्रामे गत्वा तस्थौ हरिं भजन्।
तत्र कन्यां च पुत्राञ्च समुत्पाद्य मुमोद ह॥ 35॥

सर्वदा साधुभिः सार्द्धं नृत्यगीतपरायणः।
झर्झरादिकवाद्यानि वादयन्निस्त्रपो यथा॥ 36॥

अथ तत्र स्वजातीयैस्त्यक्तो भ्रात्रापि सर्वथा।
अयं कुलकलङ्को मे यदयं नृत्यति स्वयम्॥ 37॥

श्रुत्वापि नरसी चित्ते स क्रोधे नाभवत्तदा।
कुर्वन्नागतसत्कारं त्यागं च त्यजतां नृणाम्॥ 38॥

---

1. विद्यते मेऽत्र – क।
2. अन्तोऽयं 5 ख।
3. दास्याम्य – क, ख।
4. तवेक्षितम् – ख

एवं कतिपये जाते काले कोऽपि गृहीत्तदा।
[1]द्वारवतीं व्रजन् तस्मिन्नगरे समुपागतः ॥ 39 ॥

[2]ग्राम्यान् दृष्ट्वा स चैकत्र स्थितांस्मान्निकटे गतः।
अहं द्वारवतीं यामि वर्तते मे धनं बहु ॥ 40 ॥

मार्गे चौरभयादत्र साधुकारश्च कोऽपि चेत्।
दत्वा तस्मै धनं तस्य तत्र नीत्वा व्रजाम्यहम् ॥ 41 ॥

गत्वा च[3] तद्धनं तत्र ग्रहीष्यामि यथासुखम्।
इति श्रुत्वा तु ते सर्वे धूर्ता पथिकमब्रुवन् ॥ 42 ॥

अहोऽत्र नरसीभक्तः साधुकारो महानिह।
तत्र गच्छ स ते कार्यं करिष्यति न संशयः ॥ 43 ॥

इति श्रुत्वा स पथिको नरसीगृहमागतः।
उवाच तं धनं ह्येतद् गृहीत्वा पत्रमर्प्पय ॥ 44 ॥

द्वारकां याम्यहं तत्र यथाशीघ्रं मिलेद्धनम्।
साधुकार तथा क्षिप्रं कुरु यामि त्वरान्वितः ॥ 45 ॥

इत्युक्तो नरसी चित्ते चिन्तयित्वाति दुर्नयम्।
ग्रामीणानां तथा कृष्णं स्मृत्वा पथिकमब्रवीत् ॥ 46 ॥

अहो चेदं कियत्तेऽस्ति धनं पत्रं ददाम्यहम्।
इत्युक्तः स ददौ सप्तशती मुद्रास्तु राजती ॥ 47 ॥

गृहीत्वा नरसी मुद्राः पत्रं च पथिकाय तत्।
दत्वा सर्वं हरिप्रीत्यै साधुभ्यः प्रददौ मुदा ॥ 48 ॥

पत्रं लिलेख नरसी श्यामलाय यथोचितम्।
साधुकार त्वया[4] पत्रं मुद्रा सप्तशतीमिताः ॥ 49 ॥

दृष्ट्वैवास्मै प्रदातव्यास्तावतीः सन्ति मे गृहे।
अथासौ पत्रमादाय [5]गतो द्वारवतीं पुरीम् ॥ 50 ॥

तत्र पप्रच्छ सर्वान्सश्यामलः क्वास्ति साधुकृत्।
उक्तः सर्वैर्न चात्रास्ति कश्चिच्छ्यामलनामकः ॥ 51 ॥

---

1. द्वारत्तीं – ख।
2. ग्रामन् – क।
3. व – ख।
4. प्रभवति – ख।
5. ततो – ख।

ततोऽति चिन्तितो विप्रो ग्राम्याद्बाह्यमुपागतः ।
ददर्श पथिकस्तत्र रथमेकं मनोरमम् ॥ 52 ॥

श्वेताश्वाभ्यामुद्वहन्तं तस्योपरि महाद्भुतम् ।
साधुकारोऽस्ति कुत्रेति रथी श्रुत्वा तमब्रवीत् ॥ 53 ॥

अहोऽयं श्यामलो नाम्ना साधुकारो वसामि च ।
किं तेऽभिलषितं ब्रूहीत्युक्तः पथिक आह तम् ॥ 54 ॥

अहो ग्रामेन केनापि दर्शितस्त्वं तदा त्वहम् ।
अतिखिन्नः परावृत्य चलितो नरसीगृहम् ॥ 55 ॥

त्वन्नाम्ना पत्रमेकं तु नरसी प्रददौ मम ।
नीत्वा सप्तशतीर्मुद्रास्तां मेऽद्यैव समर्पय ॥ 56 ॥

इत्युक्त्वा नरसी पत्रं श्यामलाय समर्प्पयत् ।
पत्रं गृहीत्वा तत्र नेत्रे स हि संयोज्य हृष्टवत् ॥ 57 ॥

पथिकं प्राह धन्योऽसि स दानीयं ददौ मम ।
अतिप्रियं तस्य पत्रं नानीतं केनचित्पुरा ॥ 58 ॥

पथिकात्रैव मुद्रास्ता गृहीत्वा स्वगृहादहम् ।
[1]सम्प्रस्थितो मुहूर्त्तेन क्वचिद्गन्तुमिहागतः ॥ 59 ॥

अतो न यामि भवनमित्युक्त्वा प्रददौ स ताः ।
मुद्रा श्यामल नामाथ पत्रं चापि स्वकं ददौ ॥ 60 ॥

पथिकं चापि सम्प्राह वक्तव्यो मद्वचः स वै ।
एवमेव सदा पत्रं प्रेषणीयं निरन्तरम् ॥ 61 ॥

इति श्रुत्वा स पथिको नीत्वा पत्रं तथा धनम् ।
द्वारकायामुपागत्य यात्रां चक्रेऽतिभक्तितः ॥ 62 ॥

अथ श्यामलनामापि साधुकारस्तिरोऽभवत् ।
पथिको नरसी ग्रामं कृत्वा यात्रामुपागतः ॥ 63 ॥

तत्र ते दुर्जनाः सर्वे दृष्ट्वा तं पथिकं मुदा ।
तेन साकं समायाता नरसीमन्दिरे द्रुतम् ॥ 64 ॥

---

1. प्रस्थाप्य – ख,ग।

अप्राप्यं धनमेषोऽत्र किं करिष्यति [1]चेति ते।
द्रष्टुं तद्दुर्दशां दुष्टाः तस्थुः सर्वे स्मिताननाः ॥ 65 ॥

पथिकस्तत्र चागत्य दृष्ट्वा तं नरसीं मुदा।
प्रणम्य कथयामास धन्योऽसि त्वं न संशयः ॥ 66 ॥

यस्य ते तादृशो भृत्यो द्वारकायां विराजते।
श्यामः कमलपत्राक्षो युवा सर्वाङ्ग[2]शोभनः ॥ 67 ॥

कुण्डली पीतवसनः श्रीकृष्ण इव चापरः।
न विस्मरामि तं चाहं कथञ्चिदपि कुत्रचित् ॥ 68 ॥

दृष्ट्वैव मुद्राः प्रददौ पत्रं ते श्यामलो मुदा।
इत्युक्त्वा प्रददौ पत्रं पथिको नरसीं तदा ॥ 69 ॥

नीत्वा शिरसि चोत्थाय पथिकस्य प्रदक्षिणा।
कृत्वा प्रणामं चक्रे सहर्षाश्वा विल लोचनः ॥ 70 ॥

ततस्ते दुर्ज्जनाः सर्वे श्रुत्वा दृष्ट्वा [3]तदद्भुतम्।
अधोमुखाः स्व स्ववेश्म जग्मुः सर्वेऽतिचिन्तिताः ॥ 71 ॥

नरसी चापि तं गेहे स्थापयित्वा दिनत्रयम्।
शुश्रूषयित्वा दत्वाथ धनं स विससर्ज ह ॥ 72 ॥

इति श्रीभगवद्भक्तिमाहात्म्ये नरसीभक्तिचरितं
नामैकञ्चवशत्यधिकशततमः सर्गः ॥ 121 ॥

❊ ❊ ❊

द्वाविंशत्यधिकशततमः सर्गः

॥ नरसीभक्तिचरितम् ॥

एकदा नरसी पुत्री स्वपतेर्मन्दिरे सती।
जाता गर्भवती तस्याः सप्ते मासि चागते ॥ 1 ॥

स्नुषा पितुर्गृहात्सर्वैर्भोजनाम्बरभूषणैः।
सन्तोष्या बान्धवा ग्राम्या इत्यचारस्तु कौलिकः ॥ 2 ॥

---

1. चन्तिते – ख।
2. मुवासं वाग सुन्दरः – ख।
3. तदहमुत्तमम् – क।

ततस्तु नरसी पुत्र्याया: श्वश्रू:[1] साति दु:खिता।
स्नुषां दृष्ट्वाब्रवीद्वाक्यं कथं कुर्वेऽहमुत्सवम्॥ 3॥

अस्या: पितातिनिर्लज्जो दरिद्रो भिक्षुकै: सह।
[2]झर्झरं वादयन्नृत्यं कुर्वन् गायति सर्वदा॥ 4॥

किं करोमि कपाले यो लिखितो विधिना स्वयम्।
एवं मुहुर्भाषमाणा तदा तस्या: स्नुषा स्वयम्॥ 5॥

ताताय नरसी नाम्ने प्रेषयामास पत्रकम्।
अत्र सर्वे विनिन्दन्ति त्वां ततो यदि चेद्धनम्॥ 6॥

तव किञ्चिद्भवेत्तर्हि समागत्यात्र तावता।
कृत्वा यथोचितोत्साहं पुनर्गच्छेति मे मन:॥ 7॥

दृष्ट्वा तु पत्रं नरसी तत्कालमुत्थित:[3] स्वयम्।
बद्धो क्षयोजितं जीर्णं रथमारुह्य यत्नत:॥ 8॥

गायन् हरिकथां भक्त्या स्वजामातृ गृहं गत:।
अथ तत्रत्य मनुजा दृष्ट्वा तं नरसीं तथा॥ 9॥

हसन्त: प्राहुरन्योऽन्यमेष पश्यागतोऽत्र भो:।
तत्पुत्री तु तदैकान्ते पितरं प्राह लज्जिता॥ 10॥

किमर्थमागतोऽस्येवं हसिष्यन्ति जना इमे।
न किञ्चिद्वर्त्तते तर्हि शीघ्रं गच्छ निजं गृहम्॥ 11॥

इति पुत्री वच: श्रुत्वा नरसी चाति हर्षित:।
पुत्रीं प्राह त्वया नैव चिन्ता कार्या कथञ्चन॥ 12॥

पूरयिष्यति ते सर्वं तु हरिरत्र मनोरथम्।
तस्मात्त्वं पृच्छ श्वश्रूं वै पृष्ट्वा वस्तूनि लेखय॥ 13॥

आनीय देहि मे पत्रं तत: त्वं मुदिता भव।
ततस्तु नरसी पुत्री श्वश्रूं गत्वाब्रवीद्वच:॥ 14॥

पिता मे सर्वसामग्रीं लेखयित्वा याचते।
इति स्नुषावच: श्रुत्वा श्वश्रूर्हास्यं विधाय सा॥ 15॥

---

1. सृ: – ख।
2. भुर्भुरं – ख।
3. मुक्षित: – ख।

विलिखाप्याखिलं पत्रे स्नुषायै प्रददौ तदा।
सा नीत्वा नरसीभक्तताताय प्रददौ मुदा॥ 16॥

पुनस्तां प्राह नरसी गत्वा श्वश्रूः पुनस्त्वया।
प्राष्टव्या नात्र किमपि विस्मृतं द्विर्विभावय॥ 17॥

इत्युक्ता सा[1] गता श्वश्रूसमीपं पुनरब्रवीत्।
श्रुत्वा जहास सात्युच्चैः क्रोधेन प्रस्तरद्वयम्॥ 18॥

[2]लिखापयित्वा प्रददौ स्नुषायै सापि हर्षिता।
गत्वा पित्रे ददौ सापि नरसी तत्क्षणे मुदा॥ 19।

[3]झर्झरादिकमादाय कविजीर्णगृहे स्थितः।
राधाकृष्णौ भजन् प्रेम्णा[4] तन्मयं वेश्मनि व्याथात्[5]॥ 20॥

अथ वैष्णवरूपेण भगवन्भक्तवत्सलः।
आगत्य तस्मिन्भवने सर्वं सम्पाद्य निर्ययौ॥ 21॥

ततस्तु नरसी सर्वानाहूयातिविनीतवत्।
वस्त्रालङ्करणादीनि भोजयित्वा ददौ मुदा॥ 22॥

सर्वान्सन्तोष्य वस्त्राधैः दक्षिणाभिस्तथैव च।
सौवर्णं प्रस्तरं इन्दूं सम्बन्धिन्यै ददौ स्वयम्[6]॥ 23॥

सा चाति लज्जिता भूत्वा विस्मयं परमं गता।
ततस्तु ग्रामनिलयाः प्रशंसुर्नरसीं मुदा॥ 24॥

तत्रैका विस्मृता काचिद्वाहूणी या समागता।
नरसीदुहिता तस्मै स्वकीया भरणादिकम्॥ 25॥

ददौ तं जगृहे सा तु नवं सर्वं जिघृक्षति।
ततस्तु नरसीभक्तः पुनस्तुष्टाव तं हरिम्॥ 26॥

अथ सर्वं समायातं तदर्थं तद्गृहे पुनः।
नीत्वा तन्नरसी तस्यै ददौ चातिविनीतवत्॥ 27॥

---

1. समागता – ख।
2. पिता – ख।
3. भुर्भृरा – ख
4. प्रेमगात् – क।
5. न्यधात् – ख।
6. मुदा – ख, ग।

स्वयमागत्य भवने राधाकृष्णौ भजन्मुदा।
सर्वं वैषयिकं सौख्यं हृदि मेने [1]तृणाय सः ॥ 28 ॥

अथ सा नरसीपुत्री सुषुवे पुत्रमुत्तमम्।
स्थित्वा कति दिनं तत्र पतिगेहे स्वकं सुतम् ॥ 29 ॥

संस्थाप्य श्वश्रू निकटे स्वयं तात गृहं ययौ[2]।
दृष्ट्वा भक्तेस्तु माहात्म्यं विरक्ता साप्यभूत्तदा ॥ 30 ॥

एका तु तनया तस्य गृहे एव स्थिता ह्यभूत्।
ते चापि भक्ते संजाते कन्यके पितृमन्दिरे ॥ 31 ॥

ताभ्यां चैवति भक्ताभ्यां कन्याभ्यां नरसी समम्[3]।
सस्त्रीको भगवन्मूर्तेरग्रे गायन्ननर्त ह ॥ 32 ॥

एकदा क्वापि गणिका गायन्ती तत्र चागता।
उक्ता सर्वैस्तु नरसीगृहं गच्छ तवेप्सितम्[4] ॥ 33 ॥

करिष्यति न सन्देहः स तु नृत्यादि पारगः।
इत्युक्ता सागता वेश्या नरसीसन्निधिं मुदा ॥ 34 ॥

स तु तस्या वचः श्रुत्वा धनं नात्र भविष्यति।
निवृत्त्यात्र सदाचारा हरिभक्तिं यदीच्छसि ॥ 35 ॥

एवमुक्ता तु सा वेश्या तस्थौ तस्य समीपगा।
भगवद्भजने भक्ता त्यक्त्वा वृत्तिं जुगुप्सिताम्[5] ॥ 36 ॥

अथैकदा तु नरसी मातुलः सचिवः स्थितः।
तत्रत्य राज्ञो निकटे राजानं सोऽब्रवीद्वचः ॥ 37 ॥

राजन्नयन्तु नरसीं कलङ्कोऽभूत्कुले मम।
वेश्यया सह कन्याभ्यां स्वयं नृत्यति गायति ॥ 38 ॥

तस्मादयं बहिःकार्यो ग्रामादस्मान्न संशयः।
इत्युक्तो नृपतिस्तेन पदातीं श्चतुरोऽद्भुताम् ॥ 39 ॥

प्रेषयामास नरसीं शीघ्रमानयतान्तिकम्।
गत्वातिक्रुधा प्राहुश्चल राजसमीपतः ॥ 40 ॥

1. नृणाय – क।
2. प्रति – ख, ग।
3. द्विजः – क, ख।
4. तवेक्षितम् – ख।
5. जुगुक्षितम् – ख।

ततस्तु नरसी ताभिः स्त्रीभिर्गायन्समाययौ।
दृष्ट्वा राजा तु तान्सर्वान् लौकिको मतिमान्स्वयम्॥ 41॥

नरसीमाह किञ्चैतत् क्रियते कुलगर्हितम्।
श्रुत्वा सोऽप्याह भो राजन् न मे जातिः कुलं न वा॥ 42॥

सर्वैस्त्यक्तोऽहमत्रास्मि स्वेच्छया पुनरेव माम्।
इमे वदन्ति निर्लज्जो मत्कुले पतिताः स्वयम्॥ 43॥

त्वं तु राजासि लोकानां दुर्ज्जनोक्त[1]वशीकृतः।
श्रुत्वा भागवतं प्रायो यस्मार्षीः सङ्गदोषतः॥ 44॥

इति श्रुत्वा ततो राजा पौराणिकमुदैक्षत[2]।
स आह राजन् भक्तोऽयं सत्यमेव न संशयः॥ 45॥

राजापि नरसीं प्राह गच्छ साधो यथासुखम्।
पुरे निवसतस्ते मे न क्वचित् भीतिरस्ति भोः॥ 46॥

इत्युक्तो नरसीगेहे समायातोऽतिभक्तितः।
जानन्नसारं संसारं दध्यौ हरिपदाम्बुजम्॥ 47॥

एकदा तस्य भवने सहस्रावधि साधवः।
समायाताः क्षुधार्तास्तान् दृष्ट्वा स्वयमुपस्थितः॥ 48॥

कस्यचिद्वणिजो गेहे गत्वा तं प्राह चार्त्तवत्।
अहो केदाररागोऽयं त्वद्गृहे स्थाप्य ते मया॥ 49॥

त्वं सहस्रमिता मुद्रा देहि मे साधुभुक्तये।
दास्यामि यावत्तेनैव धनं [3]तावदहं पुनः॥ 50॥

गास्यामि नैव केदारं सत्यमेतद्वदाम्यहम्।
इत्युक्तो वणिगुत्थाय पत्रं नीत्वा धनं ददौ॥ 51॥

तस्य पत्नीद्वयं चासीत् एका भक्ततमा[4] स्थिता।
साब्रवीन्नरसीभक्तं श्रीकृष्णं मे प्रदर्शय॥ 52॥

भविष्यतीति तामुक्त्वा नरसी गहमागतः।
नीत्वा धनं भोजयित्वा स्वयं सम्पूज्य केशवम्॥ 53॥

---

1. वही: – ख।
2. मुखमैक्षत् – ख।
3. यावदहं – ग, ख।
4. तया – ख।

अगायन्तं प्रियं रागं नाति तृप्तो बभूव सः ।
तद्दिनेऽभ्यपतन्नैव माला मूर्तेर्गलादपि ॥ 54 ॥

अन्येऽस्मिन् दिवसे तस्य केदारं गायतः सतः ।
कृष्णमूर्तिगलान्माला प्रसादो निपपात ह ॥ 55 ॥

तदादि तस्य गानं स तत्याजाति सुचिन्तितः ।
मालापि न पपाताग्रे[1] मूर्ते[2] कण्ठप्रदेशतः ॥ 56 ॥

ज्ञात्वैवं दुर्जनाः सर्वे राजानं प्राहुरानताः[3] ।
भूपते! नरसीगीतसमये यच्छुतं त्वया ॥ 57 ॥

मिथ्यैव तन्न सन्देहः शृणु तस्य तु कारणम् ।
अयं स्वभवने चैकसूत्रे मालां विधाय च ॥ 58 ॥

पुष्पभारवशान्माला त्रुटित्वा पतति स्वयम् ।
तस्मादद्य परीक्षस्व तवाग्रे प्रकरोतु तत् ॥ 59 ॥

इति दुष्टवचः श्रुत्वा राजा तं नरसीं द्विजम् ।
आनीयोवाच मद्गेहे भगवन्मूर्तिरस्ति भोः ॥ 60 ॥

तत्र गायस्व तन्मूर्तेर्गलान्माला पतिष्यति ।
तदा सत्यं विजानामि त्वन्यथा कपटेन तत् ॥ 61 ॥

इत्युक्तो नरसी वीणां धृत्वा गातुं व्यवस्थितः ।
तदा दुष्टस्तु पट्टस्तु दृढसूत्रेऽकरोत्स्रजम् ॥ 62 ॥

मुहूर्ते स जगौ भक्तो नरसी चातिचिन्तितः ।
न पपात तदा माला दुष्टाः सर्वेऽतिहर्षिताः ॥ 63 ॥

ततस्तु नरसी चित्ते हरिं सस्मार दुःखितः ।
न क्वापि हानिर्मे नाथ [4]तवैवेयं विडम्बना ॥ 64 ॥

इत्याह मनसा तस्मिन्क्षणे श्रीभगवान्हरिः ।
कृत्वा तु नरसीरूपं नीत्वा मुद्रा सहस्रकम् ॥ 65 ॥

जगाम तस्य वैश्यस्य गृहं भक्त[5]प्रियो गतः ।
तमाह नरसी क्वासि पतिर्गृह्णात्विदं धनम् ॥ 66 ॥

---

1. नयमा – क।
2. मूर्ति – क, ग।
3. राजता: – ख।
4. तथैवं यं – ख।
5. गेहे भक्ता प्रियागत: – क।

ददातु मम तत्पत्रं केदारो यत्र वै धृतः।
इति श्रुत्वा स वैश्यस्तु सुप्त एवाह तां प्रियाम्॥ 67॥

गृहाण मुद्रास्तत्पत्रं देहि तस्मै तु साधवे।
इत्युक्त्वा सा तु तत्पत्नी पत्रं तस्य करे ददौ॥ 68॥

धनं ररक्ष कुत्रापि परन्तु तन्मनो भृशम्।
नरसीरूपिणं दृष्ट्वा साभिलाषमभूत्तदा॥ 69॥

नायं सभक्तः कोप्येष तद्रूपेणागतस्त्विह।
इति पत्ये यथार्थं सा प्रोवाचागत्य मन्दिरे॥ 70॥

भगवानपि तत्पत्रं नरसीनिकटे गतः।
उपरिष्टात्पातयित्वा ददौ सोऽप्यपतन्मुदा[1]। 71॥

ततः केदाररागेण जगौ स [2]नरसीद्विजः।
तत्क्षणात् मूर्त्तिकण्ठात्तु माला निपतिता भुवि॥ 72॥

त्रुटित्वाथ द्वितीयापि नरसीकण्ठदेशगा।
स्वयं बभूव सर्वेषां तत्रत्यानां तु पश्यताम्॥ 73॥

अथ राजा महाश्चर्यं दृष्ट्वा तान्दुर्ज्जनान्स्वयम्।
निर्भत्स्य नरसीं भक्त्या पूजयित्वाब्रवीद्वचः॥ 74॥

भक्तराज क्षमस्वेतन्मम दुष्टस्य चेष्टितम्।
किमिदं परमाश्चर्य्यं [3]पत्रं तत्पतितं तु यत्॥ 75॥

इति श्रुत्वा ततो भक्तो नरसी प्राह तं नृपम्।
केदाररागवृत्तान्तं तत्पत्रं चाप्यदर्शयन्॥ 76॥

ततो राजाति मुदितो नमस्कृत्य ददौ धनम्।
न तज्जग्राह नरसी सन्तुष्टः प्रययौ गृहम्॥ 77॥

इति श्रीभगवद्भक्तिमाहात्म्ये नरसीभक्तिचरितं नाम द्वाङ्क्वशत्यधिकशततमः सर्गः॥ 122॥

❊ ❊ ❊

1. गृहान् – ख।
2. सन्यासी वद्विजः – ख।
3. स्यात् – क, ख।

त्रयोविंशत्यधिकशततमः सर्गः

॥ नरसीभक्तिचरितम् ॥

एकदा धनिकः कश्चिन्नागरो ब्राह्मणं निजम्।
कन्यार्थं च वरं ज्ञातुं प्रेषयामास तत्र हि ॥ 1 ॥

तत्र सर्वे द्विजा दुष्टास्तं विप्रं प्राहुरादृताः ।
अत्रास्ते नरसी नाम्ना तस्य पुत्रोऽस्ति सुन्दरः ॥ 2 ॥

श्रुत्वैतद्वचनं तेषां स विप्रो नरसीगृहे ।
समागत्य स तं तस्य दृष्ट्वा प्राहातिहर्षितः ॥ 3 ॥

अहो तस्य गृहस्थस्य कन्यैका वर्तते शुभा।
तस्या पाणिग्रहार्थाय वरस्ते तनयोः [1]कृतः ॥ 4 ॥

इति श्रुत्वा तु नरसी कृताञ्जलिरुवाच तम्।
अहो नाहं तु तद्योग्यः सम्बन्धेन महान् धनी ॥ 5 ॥

अहं तु भिक्षुको दीनस्तस्मादन्यं वरं वृणु।
इत्युक्तः स द्विजः प्राह तदयोग्यस्त्वयमेव मे ॥ 6 ॥

इत्युक्त्वा तिलकं तस्य भालेऽङ्गुष्ठेन [2]चाकरोत्।
दत्त्वा मुद्रां नालिकेरं हर्षितो [3]गृहमाययौ ॥ 7 ॥

कन्यायाः पितरं प्राह नरसीतनयो मया।
[4]वृतो वरस्ते पुत्र्यर्थं सोऽस्या योग्यो न संशयः ॥ 8 ॥

इति श्रुत्वा विप्रवाक्यं स धनी कन्यका पिता।
निर्भत्स्य विप्रं प्रोवाच किं कृतं मुर्खवत्त्वया ॥ 9 ॥

क्वाहं लक्षाधिपः क्वासौ द्ररिद्रनृपतिह्ययम्।
कथं योग्यस्त्वया ज्ञातो विवाहश्चावयोर्वद ॥ 10 ॥

तस्मादिदानीं गच्छ त्वं तद्देहान्मुद्रिका मम।
आनीय दीयतां नासौ कर्त्तव्यो हि वरो मया ॥ 11 ॥

इति तस्य वचः श्रुत्वा स विप्रः कुपितोऽब्रवीत्।
अहोऽङ्गुष्ठेन चान्नेन दत्तं तु तिलकं मया ॥ 12 ॥

---

1. वृतः – ख।
2. वा भवेत् – ख, ग।
3. पयो ययौ – क।
4. दतो – ख।

तच्छेदाय पुनर्यामि मुद्रामानेतुमप्यहम्।
इति श्रुत्वा ततः सोऽपि धनी तूष्णीं स्थितः स्वयम्॥ 13॥

कन्याया भाग्यमेवं हि किं मे मोहेन जायते।
वाञ्छितोऽन्यैर्ज्ञातिवर्गै[1] स्वीकृत्यो योगवानभूत्॥ 14॥

विवाहलग्नपत्रं तल्लिखित्वा प्रेषयन्स तु।
नीत्वा तन्नरसी पत्रं स्थापयामास कुत्रचित्॥ 15॥

विज्ञाय राधाकृष्णाभ्यां व्यग्रोऽभूत् स स्वयं द्विजः।
जगौ कृष्णस्य चरितमवशिष्टे दिनत्रये॥ 16॥

विवाहस्य [2]ततः कृष्णो वैष्णवस्य कुटुम्बिनः।
[3]रूपं कृत्वा सपत्नीको दिशान्तरनयच्छलात्॥ 17॥

निमन्त्रितोऽहं शिष्योऽस्य समायात इति ब्रुवन्।
आनिन्ये सर्वसंभारान् श्रीकृष्णो राजदुर्लभान्॥ 18॥

ततो विवाहपूर्वाह्णत्रये सर्वान्निमन्त्र्य सः।
भोजयामास विविधैर्मिष्टान्नैर्लोकदुर्लभैः॥ 19॥

ते भुक्त्वा वाससावद्धया निन्युः स्वस्य गृहं जनाः।
तथापि सर्वा सामग्री तथैवासीत् तद्गृहे॥ 20॥

ततस्तु वरयात्रायां तद्रूपो भगवान्स्वयम्।
शिविका चामरं छत्रं पताका ध्वज एव च॥ 21॥

वाद्यानि हि विचित्राणि सैन्यं न तर्कसंहतिः।
वस्त्रभोज्यादिकं सर्वं स सम्पादितवान्स्वयम् ॥ 22॥

तदान्ते नरसी प्राह नाहं गच्छामि तत्र वै।
गत्वा त्वमेव सम्बन्धी भविष्यति यथोचितः॥ 23॥

अथ कन्यापिता तं तु विप्रं मुहुरवोचत।
त्वया कन्या विवाहोऽयं गर्हितः कारितो[4] ध्रुवम्॥ 24॥

सायंकालः समायात आगमिष्यति वा न वा।
इति श्रुत्वा तु विप्रस्तु ग्रामाद्बाह्यं गतस्तदा॥ 25॥

---

1. वर्गः – ख, ग।
2. तेऽतः – क।
3. हये – ख।
4. नात्र संशयः – ख, ग।

दद‍र्श चागतं सर्वं वरं सैन्यसमन्वितम्।
कन्यापितरमाहासौ पश्यायातो वरस्तव॥ 26॥

ततः कन्यापितोवाच विप्रं भ्रान्तोऽसि किं तु भो।
क्वासौ स दीनो नरसी क्वेदं सैन्यं महीपतेः॥ 27॥

एवं ब्रुवति वै तस्मिन् सैन्यं ग्रामे समागतम्।
कन्यापितापि निश्चित्य स एवायमिति त्वरन्॥ 28॥

गत्वा गृहे निजान्बन्धून् आह किन्नु भविष्यति।
अतः [1]परं च मे ग्रामे सर्वेषां वित्तसञ्चयैः॥ 29॥

सत्कारो नास्य भविता किं कर्त्तव्यमतःपरम्।
इत्येवं मन्त्रयित्वा स प्रेषयामास तं द्विजम्॥ 30॥

[2]नास्य सैन्यस्य सत्कारमर्हामः कर्तुमत्र भोः।
कन्येवं वर्तते चैका मम दीनस्य गृह्यताम्॥ 31॥

गत्वैवं नरसीभक्तो वक्तव्यो मद्वचस्त्वया।
श्रुत्वा विप्रस्तु तं प्राह कथमेवं वदस्यहो॥ 32॥

क्व ते सखायो वित्तानि यशः कौलीन्यमप्यहो।
[3]यदेवं भाषसेऽद्येति श्रुत्वा सोऽति विलज्जितः॥ 33॥

ततः स विप्रो गत्वा तं नरसीमाह नम्रवत्।
नैतेषां पूजनं कर्तुं शक्तः कन्यापिता अहो॥ 34॥

नृपरूपो हरिः प्राह यथाशक्ति विधीयताम्।
इति श्रुत्वा ततो विप्रः कन्यापितरमब्रवीत्॥ 35॥

सोऽपि हृष्टः समुद्योगं कृत्वा कन्यां ददौ मुदा।
ग्राहयित्वा हरिः कन्यां व्यवहृत्य यथाविधि॥ 36॥

दीनानाथ दरिद्रेभ्यो दत्वा स्वगृहमाययौ।
दृष्ट्वा तत्सैन्यसम्भारं ग्रामे मार्गेऽतिविस्मिताः॥ 37॥

प्रशशंसुश्च[4] नरसीं मुह्यन्तोऽद्भुतदर्शनात्।
एवं दिनत्रयं स्थित्वा नृपरूपधरो हरिः॥ 38॥

---

1. वरं – ख।
2. सास्य – ख।
3. पदेवं – क।
4. प्रशंसन्तो – ख।

सन्तोष्य नरसी सैन्यं नीत्वा धाम ययौ स्वकम्।
एवं स नरसी भक्तो राधाकृष्णप्रसादतः ॥ 39 ॥
भुक्त्वा मनोरथान्सर्वान् जगामान्ते हरेः पदम् ॥ 40 ॥

इति श्रीभगवद्भक्तिमाहात्म्ये नरसीभक्तिचरितं नाम त्रयोविंशत्यधिकशततमः सर्गः ॥ 123 ॥

❊ ❊ ❊

चतुर्विंशत्यधिकशततमः सर्गः

॥ अङ्गदभक्तिचरितम् ॥

दिवोदासकुले जाता : सदनोऽतीवभक्तिमान्।
नन्ददासस्तथा रामपुरे ग्रामे बभूव ह ॥ 1 ॥
एवं हि वङ्गदेशेऽभूद्गोपालोऽतिहरिप्रियः।
निवसन्नरहरिग्रामे ययावन्ते हरेः पदम् ॥ 2 ॥
गाढा नगरवास्येवं माधवो भक्तिमानभूत्।
नृत्येन गीतवाद्याभ्यां तोषयामास वै हरिम् ॥ 3 ॥
एकदा राजनिकटे दुर्जनैः कथितं वचः।
दम्भेनायं स्वमात्मानं पूजयत्यतिदुर्मतिः ॥ 4 ॥
इति श्रुत्वा तदा राजा तमानीयातिसत्कृतम्।
स्थित्वा त्रिभूमिप्रासादे एकादश्यां निशामुखे ॥ 5 ॥
कुर्वन् जागरणं राजा माधवं चेदमब्रवीत्।
अहं नृत्यामि देवाग्रे भवानप्यत्र नृत्यतु ॥ 6 ॥
इति श्रुत्वा ननर्त्तासौ माधवो भक्तसत्तम[1]।
न निवेद स्वमात्मानं प्रासादाग्रात्पपात ह ॥ 7 ॥
भूमौ कटाहे पतितो न ममारेच्छया हरेः।
राजा दुष्टांस्तु निर्भर्त्स्य तस्यै दत्वा तु जीविकाम् ॥ 8 ॥
विससर्ज ततः सोऽपि गृहमागत्य निर्व्यथः।
पूर्ववत्पूजयामास भगवन्तं दिवा निशम् ॥ 9 ॥

---
1. मुत्तमः – क।

राजसेनपुरे[1] चेत्थमङ्गदोऽभून्महायशाः ।
कथामस्य प्रवक्ष्यामि परमाश्चर्यकारिणीम् ॥ 10 ॥

पूर्वं तु भक्तिविमुखो नृपमन्त्रिपितृव्यकः ।
पत्नी तस्य महाभक्त्या गुरुशुश्रूषणरता ॥ 11 ॥

एकदा तु गुरोरग्रे एकान्ते संस्थिता सती ।
अथान्तरेऽङ्गदस्तत्र[2] समायातो ददर्श तम् ॥ 12 ॥

कोऽयं किं भाषसे त्वं तद्ब्रूहीत्युक्ताथ साब्रवीत् ।
अयं मे गुरुरत्रास्ति पितृवत्पूजयामि तम् ॥ 13 ॥

ततः क्रुद्धोऽङ्गदः प्राह गुरुश्चेत्तेन किं गृहे ।
एकान्ते तस्य किं चास्ति प्रयोजनमिदं महत् ॥ 14 ॥

ततो गुरुः समुत्थाय सोद्वेगः प्रययौ गृहात् ।
अङ्गदस्य तु पत्नी सा रुष्टा सुष्वाप कुत्रचित् ॥ 15 ॥

अथ मध्याह्नसमये विश्रामार्थं गतोऽङ्गदः ।
पत्नीसमीपे तां दृष्ट्वा महाशोकेन पातिताम् ॥ 16 ॥

उवाच तां कोऽभिलाषोऽस्ति शोकं त्यज मम प्रिये ।
वद तस्य प्रतीकारं करिष्येऽहं न संशयः ॥ 17 ॥

एवं मुहुर्भाषमाणे सा पत्नी कामुकेऽङ्गदे ।
उवाच विमुखी दीना नाहं वच्मि त्वया सह ॥ 18 ॥

न त्वं वद मया साकं मरिष्येऽहं न संशयः ।
त्वया मिथ्या [3]प्रवादोऽद्य गुरवे मे समर्प्पितः ॥ 19 ॥

स गुरुः पितृतुल्योऽस्ति परिवादस्तु तेन मे ।
यत्कृतो भवता तेन मरिष्येऽहं न संशयः ॥ 20 ॥

इति श्रुत्वा प्रियावाक्यमङ्गदश्चातिदुःखितः ।
सहसैव तदुक्तं तत्क्षमस्वाद्य प्रसीद मे ॥ 21 ॥

अतः परं प्रिये ब्रूहि तत्करोम्यविचारितम् ।
इति श्रुत्वा ततः प्राह प्रियं भक्त्या सती तु सा[4] ॥ 22 ॥

---

1. गरे – ख।
2. गुरु – क।
3. अभिषापो – ख, ग।
4. सुता – क।

अहो स्त्रीधनपुत्रादि मोहवानसि किं वृथा।
न ते सहायः कोऽप्यस्ति नाहं नेदं धनं तथा[1] ॥ 23 ॥

ततः श्रीकृष्णचरणौ शरणी कुरु सर्वदा।
महापदि स्मृतौ चेमौ रक्षितारौ भविष्यतः ॥ 24 ॥

तमेव गुरुमानीय भक्त्या शिष्यो भवाधुना।
ततः पुरावत्प्रीतिर्मे भविष्यति न संशयः ॥ 25 ॥

एवं पत्नी प्रेरणया कृत्वा तं गुरुमङ्गदः।
भक्तो बभूव पत्न्या स तया चातीव तोषितः ॥ 26 ॥

एकदा तस्य भ्रातृव्यो राजमन्त्री क्वाचिद्गतः।
जेतुं शत्रुं पुरे तत्र निन्ये चाङ्गदमप्यसौ ॥ 27 ॥

गतेषु तेषु रिपवस्त्यक्त्वा सर्वं तु विद्रुताः।
मन्त्रीपुरं लुण्ठयित्वा राजसन्निधिमागतः ॥ 28 ॥

अङ्गदः प्राप्य तत्रैकं शिरोऽलङ्करणं महत्।
बहुमल्यैश्च रत्नैश्च खचितं दिव्यहाटकम् ॥ 29 ॥

तत्रैको हीरकश्चासीन्महान् सारं ररक्ष तम्[2]।
जगन्नाथाय दास्यामीत्येवं बुद्ध्यातिभक्तिमान् ॥ 30 ॥

अन्यानि सर्वरत्नानि विचित्य पतितं धनम्।
भोजयामास साधून्सदीनान् विप्रान्मुदाङ्गदः ॥ 31 ॥

कर्णाकर्णितया[3] ग्रामे श्रुतं सर्वैर्महाद्भुतम्।
केनापि राज्ञे कथितं रत्नं तत्र महाद्भुतम् ॥ 32 ॥

श्रुत्वा राजा तु भृत्येन याचयामास तं मणिम्।
न ददावङ्गदो राज्ञे ततो मन्त्रिणमब्रवीत् ॥ 33 ॥

भ्रातुः पुत्रं चाङ्गदस्य सोऽप्ययाचत तं मणिम्।
न ददौ भ्रातृपुत्राय प्राहायं श्रीहरेर्न ते ॥ 34 ॥

ततो राजाङ्गदगृहे भगिनी तस्य या स्थिता।
तामाहान्ते तु गरलं दत्त्वा हत्वाङ्गदं शुभे[4] ॥ 35 ॥

---

1. मम – ख।
2. सः – क, ख।
3. कर्णी ततो – ख।
4. त्वया – ख।

मणिर्देयोऽद्य मे तुभ्यं दास्यामि विविधं धनम्।
इत्युक्ता भगिनी राज्ञा दत्त्वा नेतुं विषं स्वयम्॥ 36॥

भ्रात्रेऽङ्गदाय प्रददौ भोक्तुं सोऽपि च पूर्ववत्।
अर्प्पयित्वा भगवते भागिनेयीं समाह्वयत्॥ 37॥

विषदात्र्या भगिन्या सा पुत्री तस्यापि तादृशी।
स्नेहात्तस्यै पुरा दत्त्वा भोक्तव्यमिति तन्मनः॥ 38॥

अथाङ्गदस्य भगिनी पुत्री प्रेमप्रदर्शनात्।
रुदन्ती मनसात्मानं धिक् चकारात्मना पुनः॥ 39॥

दृष्ट्वा रुदन्तीं तां प्राह किं करोति कुतोऽस्ति सा।
नाहं तावत्तु भोक्ष्यामि यावन्नैष्यति ते सुता॥ 40॥

इत्युक्त्वा भगिनी प्राह न भुंक्ष्वेदं विषान्वितम्।
राज्ञोक्ताहं त्वद्वधाय विषमन्ने न्यवेशयम्॥ 41॥

मदर्थं तं निहत्याशु मणिं मे देहि ते धनम्।
दास्यामि विपुलं चेति नृपोक्ता करवाण्यहम्॥ 42॥

इति श्रुत्वाङ्गदः प्राह भगिनीं भर्त्सयन् मुहुः।
किमेवं भाषसे पापं कृत्वा कर्मेदृशं पुनः॥ 43॥

श्रीकृष्णायर्पितं चैतत्सविषं न भयात् क्वचित्[1]।
भोक्तव्यमिति [2]भुक्त्वाद्य मरिष्ये नात्र संशयः॥ 44॥

इत्युक्त्वा बुभुजेऽन्नं स प्रसादं मनसा तदा।
विषतेजस्तदङ्गेषु बबाधे नैव किञ्चन॥ 45॥

पूर्वतोऽप्यधिका कान्तिस्तस्यासीदङ्गदस्य तु।
श्रुत्वा राजा तु तत्सर्वं भृत्यानति बलीयसः॥ 46॥

प्रेषयामास [3]हत्वा तं मणिमानयत द्रुतम्।
ततस्ते राजभृत्यास्तु गता अङ्गदमन्दिरे॥ 47॥

अङ्गदस्तान्समाकर्ण्य मणिमादय सत्वरम्।
प्रविलाप्य गतो गेहाज्जगन्नाथाय चार्पितुम्॥ 48॥

---

1. कुतः – क।
2. मुक्ताय – ख।
3. दत्वा – क।

राजभृत्या अपि तदा दद्रुवुस्तमनुद्रतम्।
कियद्दूरं गतास्ते तं सन्निरुध्य स्थिता जनाः ॥ 49 ॥

आहुस्तमङ्गदं देहि मणिं हन्मो न चेद्वयम्।
इति श्रुत्वाङ्गदः प्राह दीयते तिष्ठताधुना ॥ 50 ॥

स्नात्वा तडाग सलिले बहिः कृत्य प्रदीयते।
इत्युक्त्वा स जले गत्वा स्नात्वा नीत्वा मणिं करे ॥ 51 ॥

[1]तानाह तु पश्यतेमं भो मणिं मत्करे स्थितम्।
जगन्नाथाय दास्यामि तदर्थं रक्षितो मया ॥ 52 ॥

इत्युक्त्वा श्रीजगन्नाथ त्वदर्थं रक्षितो मया।
तं गृहाण मया सोऽयं भक्त्या तुभ्यं समर्पितः ॥ 53 ॥

इत्युक्त्वा गाधसलिले चिक्षेप पश्यतो नृणाम्।
ततः सर्वे राजभृत्या निपत्य सलिले द्रुतम् ॥ 54 ॥

मणिमन्वेषयन्तस्ते तेभ्य एको ययौ नृपम्।
प्राह राजापि तच्छ्रुत्वा समायातो जलाशये ॥ 55 ॥

बहिर्निःकाशयामास जलं सर्वं नराधिपः।
अप्राप्य तं मणिं राजा रात्रौ तत्रैव [2]संस्थितः ॥ 56 ॥

अथ स्वप्ने जगन्नाथो राजानं साधुरूपधृक्।
उवाच श्रीजगन्नाथो जग्राह तं मणिं नृप ॥ 57 ॥

किं वृथा खिद्यसे याहि गृहं श्रीपुरुषोत्तमः।
सम्पादयति सङ्कल्पं भक्तानां नात्र संशयः ॥ 58 ॥

एवं दृष्ट्वा तदा राजा ततः स्वभवनं ययौ।
तावत्स चाङ्गदो भीत्या सकुटुम्बः पलायितः ॥ 59 ॥

राजा तं निर्गतं ज्ञात्वा तत्याजान्नं जलं शुचा।
यावन्नयात्यङ्गदोऽत्र न भोक्ष्ये तावदप्यहम् ॥ 60 ॥

ततो [3]राजाज्ञया तत्र मन्त्रिणः प्रेषिता द्रुतम्।
तेऽङ्गदद्वारमागत्य उपोषणपरायणाः ॥ 61 ॥

---

1. तान्वद – क, ख।
2. तत्रो वसन् स्थितः – ख।
3. द्विजास् – ख, क।

अङ्गदायाभयं दत्वा समानिन्युर्नृपान्तिके।
राजा दृष्ट्वा समुत्थाय मत्वा तं साधुसत्तमम्॥ 62॥

प्रणम्य तस्य शिष्योऽभूत्सोऽपि भक्तो बभूव ह।
एवं भक्तेस्तु माहात्म्यं को वेदतमृते नरः॥ 63॥

इति श्रीभगवद्भक्तिमाहात्म्ये अङ्गदभक्तिचरितं नाम चतुर्विंशत्यधिकशततमः सर्गः॥ 124॥

❊ ❊ ❊

पञ्चविंशत्यधिकशततमः सर्गः

॥ चतुर्भुजमाहात्म्यचरितम्॥

करोलीग्रामनृपतेः कथां वक्ष्ये मनोरमाम्।
चतुर्भुजेति नाम्नस्तु भक्तराजस्य पावनीम्॥ 1॥

आसीद्राजा महाभक्तो भगवद्भक्तपूजकः।
ग्रामाच्चतुर्दिक्षु नृपो भृत्यान्संस्थाप्य नित्यशः॥ 2॥

यं कश्चिद्वैष्णवं [1]पश्येन्नृपाग्रे प्रापयन्त्विति।
तैरानीतं स्वतः प्राप्तं दृष्ट्वा राजा स वैष्णवम्॥ 3॥

पूजयामास श्रीकृष्णबुद्ध्या पत्नीसमन्वितः।
यावन्मनोरथं तस्य ददौ वित्तानि भक्तितः॥ 4॥

एवं श्रुत्वाथ तद्वार्तामन्यदेशाधिपो नृपः।
उवाच कोऽयं धर्मस्य यद्विवेको न जायते॥ 5॥

अपात्रपात्रयोश्चैव तस्मादेतन्नशस्यते।
इति श्रुत्वाब्रवीत्तस्य द्विजः पौराणिको नृपम्॥ 6॥

राजन्नैवं वद त्वं भो महाभक्तः स भूपतिः।
निर्दम्भो भक्तपूजायां वर्तते [2]इति मे मतिः॥ 7॥

पात्रापात्रविचारस्तु न भक्तेर्लक्षणं नृप।
अपात्रमपि विज्ञाय सद्रूपं पूजयत्यसौ॥ 8॥

---

1. दृष्ट्वा – क, ख। 2. तस्य – ख, ग।

इति श्रुत्वा ततो राजा स्ववन्दिनमुवाच ह।
चतुर्भुजनृपद्वारि भक्तरूपधरो व्रज॥ 9॥

सत्कुर्यात्स यथा त्वां त तथा वदममाग्रत:।
इति श्रुत्वा स वन्दी तु मालां मुद्रां वहन् ययौ॥ 10॥

श्रुत्वा चतुर्भुजो भक्तमागतं द्वारि चाययौ।
स पत्नीकस्तु सम्पूज्य ददौ धनमनेकश:॥ 11॥

ज्ञात्वा तं वन्दिनं बुद्ध्या परीक्षार्थं समागतम्।
चतुर्भुजस्तु तत्रैकं कौशलं कृतवान्स्वयम्॥ 12॥

कृत्वा तु सम्पुटे चैकं राजा काणवराटकम्।
वैष्णवायावेष्ट्य ददौ वस्त्रै: स्वर्णसूत्रैरपूजयत्॥ 13॥

अथ वन्दी प्रसन्नत्मा नृपान्तिकमुपागत:।
उवाच तस्य सत्कारं दत्तं सर्वं प्रदर्शयन्॥ 14॥

उवाच पश्चादेकं तु किञ्चिद्दत्तं नृपेण मे।
तत्पश्य त्वं महाराज दर्शयामि तदस्ति[1] किम्॥ 15॥

इत्युक्त्वा तत्पुरस्कृत्य स्वर्णवस्त्रं पृथक्कृतम्।
पश्चात्तु सम्पुटे सर्वैर्दृष्ट: काणवराटक:॥ 16॥

किमिदं किमिदं चेति राजाप्युवाच तम्।
पौराणिक: स चात्राह राजानं तस्य कारणम्॥ 17॥

राजन् वराटकं मध्ये दत्त्वा दिव्येन वाससा[2]।
संवेष्ट्य प्रददौ तस्य भावं शृणु वदाम्यहम्॥ 18॥

अयं वन्दी मया ज्ञातो यथाकाणवराटक:।
परन्तु साधुरूपेण वेष्टितोऽयं तु भक्तवत्॥ 19॥

मया सम्पूजितो यद्वत्त्वयायं तु वराटक:।
सुवर्णवस्त्रसन्नद्धो दृश्यते परमादरात्॥ 20॥

इति श्रुत्वा ततो राजा [3]मन्ये सत्यं प्रसन्नधी:।
प्राह पौराणिकं गच्छ त्वं दृष्ट्वागत्य मां वद॥ 21॥

---

1. त्वयाधुना – क, ख।
2. वाह्वय सा – ख, ग।
3. मत्वां – क।

इति श्रुत्वा ययौ विप्रश्चतुर्भुजसमीपतः।
राजा तमपि सम्पूज्य विससर्ज मुदान्वितः॥ 22॥

ततः पौराणिको विप्रश्चतुर्भुजमयाचत।
शुकसारिकयोर्मध्ये [1]देह्येकं मे नृपोत्तम॥ 23॥

श्रुत्वैतत्प्रददौ राजा शुकं पौराणिकाय सः।
गृहीत्वा तं शुकं विप्रः स्वराजान्तिकमागतः॥ 24॥

दर्शयित्वा धनं राज्ञे शुकं तं प्रददौ द्विजः।
राजा प्रोवाच कोऽसीति श्रुत्वा भूपं शुकोऽब्रवीत्॥ 25॥

कस्त्वं कोऽहमिति भ्रान्तिः संसारे वर्तते नृणाम्।
अहं कृष्णमयं सर्वं पश्यामि नृपसत्तम॥ 26॥

इति सञ्चिन्त्य राजेन्द्र वद कृष्णं मुहुर्मुहुः।
राधाकृष्णेति कृष्णेति गोविन्देति सदा जप॥ 27॥

इति श्रुत्वा शुकवचो विस्मयं परमं गतः।
तत्कथाश्रवणाद्भक्तिं प्राप्याभूद्वैष्णवो नृपः॥ 28॥

इति श्रीभगवद्भक्तिमाहात्म्ये चतुर्भुजमाहात्म्यचरितं नाम पञ्चविंशत्यधिकशततमः सर्गः॥ 125॥

❊ ❊ ❊

षड्विंशत्यधिकशततमः सर्गः

॥ मीराचरितम्॥

मारवाडे मेरठपतिः जयमल्लेति विश्रुतः।
कन्या बभूव तस्यैका मीराबायीति विश्रुता[2]॥ 1॥

तस्य राज्ञो गृहे कृष्णमूर्तिः परमशोभना।
नाम्नागिरिधरेत्येतत्तद्भक्ताः सर्व एव ते॥ 2॥

मीरापि बाल्यमारभ्य पूर्वजन्मतपोबलात्।
भक्त्या गिरिधरं नित्यं पूजयामास वै मुदा॥ 3॥

1. देत्यमेकं – क। 2. श्रुत्वा – ख।

एवं गतेषु कालेषु जयमल्लो नृपोत्तमः।
मीरा विवाहे सोद्योगो बभूवाति मुदान्वितः॥ 4॥

राजोदयपुराधीशो राणाख्य क्षत्रियो महान्।
तस्य पुत्राय तां दातुं निश्चिकाय नृपस्तदा॥ 5॥

मीरापि पितृवाक्येन विवाहं स्वीचकार सा।
चित्ते गिरिधरं देवं पतिं कृत्वा व्यवस्थिता॥ 6॥

जयमल्लस्ततो मीरां सुमुहूर्ते ददौ मुदा।
[1]राणां पुत्राय वीराय[2] धनानि विविधानि च॥ 7॥

ततः स मीरां नीत्वा स्वं भवनं चलितोऽभवत्।
मीरा गिरिधरं त्यक्त्वा न गन्तुं सहते स्म सा॥ 8॥

प्रस्थानसमये मीरा रुदन्ती मूर्च्छितापतत्।
ततस्तु पितरौ तस्याः समागत्येदमूचतुः॥ 9॥

किमस्ति हृदये मीरे तद्दावो वदा शुभाम्।
इति श्रुत्वाब्रवीन्मीरा समुन्मील्य तु लोचने॥ 10॥

मह्यं गिरिधरं देहि नीत्वा तं यामि हर्षिता।
नोचेदद्यैव मरणं भविष्यति न संशयः॥ 11॥

इति श्रुत्वा वचस्तस्याः पितरावति मोहितौ।
ददतुस्तं गिरिधरं पुत्रीतोषणहेतवे॥ 12॥

अथ मीरा गिरिधरं शिविकायां निधाय तम्।
हर्षिता प्रययौ पत्युर्गेहे सैन्यसमन्विता॥ 13॥

तत्र श्वश्रूः समागत्य मीरया सह चात्मजम्।
ग्रामदेवी समीपे तु निनायाति प्रमोदिता॥ 14॥

पुत्रेण पूजयित्वा तां देवीं मीरामथाब्रवीत्।
स्नुषे सम्पूज्य मनसा ग्रामदेवीं नमस्कुरुः॥ 15॥

इति श्वश्रूः वचः श्रुत्वा मीरा प्राह कृताञ्जलिः।
विना गिरिधरं [3]चान्यं नान्यं नमस्कुर्यामहं नहि॥ 16॥

---

1. राज – ख, एना – क।
2. वराय – ख, ग।
3. देवीं – ख।

इति श्रुत्वा पुनः श्वश्रूराह सौभाग्यवर्द्धनम्[1]।
भविष्यति ततस्त्वं तु नमस्कुरु न संशयः ॥ 17 ॥

इति श्रुत्वा पुनः प्राह मीराश्वश्रू न मे पतिः।
मरिष्यति ततो नित्यं सौभाग्यं वर्तते मम ॥ 18 ॥

किञ्चेमा विधवाः सन्ति ग्रामे तव कथं स्त्रियः।
इति श्रुत्वा वचः श्वश्रूः कोपेन स्फुरिताधरा ॥ 19 ॥

[2]वधूपुत्रौ परित्यज्य पतिसन्निधिमागता।
उवाच तं महादुष्टा स्नुषानीता त्वया गृहे ॥ 20 ॥

अद्यैव न शृणोत्युक्तं किमेषाग्रे करिष्यति।
अहं तु नैव वक्ष्यामि किञ्चिदस्मै हिताहितम् ॥ 21 ॥

इति श्रुत्वा ततो राजा नृपः क्रुद्धो विचारयन्।
मारणेऽस्याः कलङ्कः स्यात् स्त्रीवधश्चातिदारुणः ॥ 22 ॥

तस्मात्क्वचिद्गृहे रक्ष्य भोजनच्छादादिभिः।
[3]जिज्ञास्या नैव गेहेऽस्याः प्राधान्यं स्यात्कथञ्चन ॥ 23 ॥

इति निश्चित्य तां मीरां स्थापयामास मन्दिरे।
क्वचित्तत्र ररक्षासौ द्वारपालान् सुधार्मिकान् ॥ 24 ॥

मीरा गिरिधरं नित्यं पूजयन्ती पतिव्रता।
न वेद किञ्चिच्चरितं श्वश्वार्श्वश्रुरस्य वा ॥ 25 ॥

पूजयन्ती गिरिधरं निर्लज्जा साधुभिः सह।
अनभिज्ञकुलाचारा निमग्ननन्दसागरे ॥ 26 ॥

तदा राजादयः सर्वे तदाचारेण दुःखिताः।
कुले कलङ्की भूतेयं मरिष्यति कदा पुनः ॥ 27 ॥

एवं विचिन्तयन्तस्ते लेभिरे शर्म न क्वचित्।
मीरा ननान्दा चैकस्मिन् दिनेऽभ्येत्याब्रवीच्च ताम् ॥ 28 ॥

भ्रातृजाये किमेवं त्वं कुलद्वयकलङ्किनी।
भूत्वा [4]गायसि निर्लज्जा वैष्णवानां पुरःस्थिता ॥ 29 ॥

1. पतिः – क, ख।
2. बन्धू – ख।
3. जित्त्वा – क।
4. ग्रामयसि – क।

श्वशुरो [1]दु:खितावत्र दृष्ट्वेदं तव चेष्टितम्।
पितापि जयमल्लस्ते यशस्वी किं वदिष्यति॥ 30॥

इति श्रुत्वा तु तद्वाक्यं मीरा प्राह हसन्मुखी।
कुले या वर्तते तस्या: सत्यमेतन्न संशय:॥ 31॥

नाहं जानामि पितरौ श्वशुरौ पतिमेव च।
नान्यं पुमां सञ्जानामि ऋते गिरिधरं शुभे॥ 32॥

किं करोम्येवमेवास्ति मनो विक्षिप्तवन्मम।
लग्नं गिरिधरेऽन्यत्र न याति कथमप्यहो॥ 33॥

तस्माद्धि तादृशं चित्तं कोऽन्यथा कर्तुमर्हति।
मया त्यक्त: कुलाचार: हरिं शरणमागता॥ 34॥

इति श्रुत्वा वचस्तस्या ननन्दा क्रोधसंयुता।
आगत्य पितरौ प्राह न सा कुल सुखाव हा॥ 35॥

मयोक्ता बहुश: प्रेम्णा लोभेन च भयेन च।
न सामन्यत मद्वाक्यं गीतनृत्यपरायणा॥ 36॥

इति पुत्रीवच: श्रुत्वा राजा भूपोऽति कोपित:।
महाविषं प्रेषयित्वा कृत्वा सौवर्णभाजने॥ 37॥

प्रेषयामास मीरायै विष्णुपादोदकं वदन्[2]।
भृत्यो नीत्वा ददौ [3]तस्यै राजोक्तमपि तां वदन्॥ 38॥

अद्य राज्ञार्च्चितो देवस्तस्येदं चरणोदकम्।
दत्तं तुभ्यमिति श्रुत्वा मीरा हर्षात् समुत्थिता॥ 39॥

निधाय पाणौ तत्पात्रं पपौ भक्तिसमन्विता।
विष्णुपादोदकधिया तत्पपौ गरलं सती॥ 40॥

ततो गिरिधरो मीरां ररक्ष भक्तवत्सल:।
न मीरायास्तदा किञ्चिद्वैरुप्यमभवत्तत:॥ 41॥

[4]कान्तिर्दशगुणा जाता नैरुज्यमप्यजायत।
एवं ज्ञात्वा नृपो राजा विस्मयं परमं गत:॥ 42॥

---

1. दु:खितौ तत्र – ख।
2. तथा – ख, ग।
3. तस्मै – ख, क।
4. कोति – क।

मरिष्यति कदा चेयमित्येवं प्रार्थयन् स्थितः।
एकदा स तु मीराया श्रुत्वा वै श्चेष्टितं नृपः॥ 43॥

तत्रत्य रक्षकं प्राह यदैकान्ते स्थिता भवेत्।
केनापि साधुना साकं तदैवागत्य मां वद॥ 44॥

इति राजवचः श्रुत्वा रक्षको ज्ञात तत्क्षणः।
अगत्योवाच राजानं राजा तत्कालमुत्थितः॥ 45॥

तद्गृहद्वारि संलग्न कपाटे समुपस्थितः।
शूश्राव मीरा वचनमन्यस्यापि तथा वचः॥ 46॥

अस्पष्टाक्षरमव्यग्रं ततो राजाह तां स्नुषाम्।
उद्घाटय कपाटं तु कस्तिष्ठति सह त्वया॥ 47॥

इति श्रुत्वा ततो मीरा स्वयमुद्घाट्य तत्क्षणम्।
तस्थावधो मुखी दृष्ट्वा श्वशुरं नृपतिं सती॥ 48॥

राजा प्राह त्वया सार्द्धं कः स्थितो मन्दिरे वद।
इति श्रुत्वा वचो मीरा निर्लज्जा नृपमब्रवीत्॥ 49॥

त्वं रहस्यागतो यस्मान्मम गेहे ततो मया।
त्यक्त्वा लज्जा महाराज पश्यागत्यात्र मन्दिरे॥ 50॥

अयं गिरिधरस्वामी क्रीडाम्येतेन सर्वदा।
इति श्रुत्वा ततो राजा निरीक्ष्य सकलं गृहम्॥ 51॥

नापश्यत् [1]तद्गृहे कञ्चिदृते गिरिधरं [2]प्रभुम्।
ततोऽतिलज्जिता राजा समागत्य स्वमन्दिरम्॥ 52॥

उक्त्वा पत्न्यै तु तत्सर्वं तस्थौ विस्मितमानसः।
एकदा कोऽपि दुष्टात्मा कामी वैष्णवरूपधृक्॥ 53॥

ज्ञात्वातिसुन्दरीं मीरामुवाच रतिमर्प्पय।
इति श्रुत्वा ततो मीरा चुकोप प्राह तं पुनः॥ 54॥

भोजनं कुरु साधोऽद्य निशि दास्यामि ते रतिम्।
ततो मीरा गिरिधरस्यान्तिके विष्णुवल्लभा॥ 55॥

---

1. स्व – ख, क।
2. ख मध्ये लुप्तपाठः।

समानीयाथ तत्रैव शय्यां चक्रे मनोरमाम्।
सायं पूजादिकं कृत्वा समलङ्कृत्य वै [1]वपुः ॥ 56 ॥

समाहूतवती प्रेम्णा तं धूर्तं साधुरूपिणम्।
स समागत्य तां मीरां ददर्श निजमातरम्॥ 57 ॥

कृताञ्जलिपुटः पादौ निपत्येदमभाषत[2]।
मातः क्षमस्व दुष्टस्य मम चैतद्विचेष्टितम्॥ 58 ॥

अज्ञानाज्जननि यत्त्वामवोचं यद्वचोह्यहम्।
ततस्ते वैष्णवाः सर्वे विस्मयं परमं गताः ॥ 59 ॥

तमप्युत्थापयामास मीरा पुत्रधिया स्वयम्।
एवं भक्तेः प्रभावं तु ज्ञात्वा सोऽपि च दुर्मतिः ॥ 60 ॥

भक्तिमार्गरतो भूत्वा परमं पदमाप्तवान्।
एवमेकदिने दिल्लीश्वरो म्लेच्छः स्वयं प्रभुः ॥ 61 ॥

श्रुत्वा मीरा यशो द्रष्टुं [3]तानसेनेन सङ्गतः।
दशान्तरेण चायाता मीरा तत्कालमाह्वयत्॥ 62 ॥

गत्वा तन्निकटे राजा मीरां गिरिधराकृतिम्।
दृष्ट्वातिविस्मितो भक्त्या चक्रे पद्यं मनोरमम्॥ 63 ॥

अद्य मे दृष्टि सम्प्राप्तो नन्दनन्दन एष भोः।
इत्याद्यर्थकगीतेन गायन्नगत्य वेश्मनि ॥ 64 ॥

मीरां मातृसमां जानन्सेवयामास यत्नतः।
एकदा सा गता मीरा वृन्दावनमनुत्तमम्॥ 65 ॥

जीवगोस्वामी वृत्तान्तं शुश्राव [4]जनवत्श्रुतः।
आबाल्य ब्रह्मचार्येष स्त्रीमुखं नैव पश्यति ॥ 66 ॥

इति ज्ञात्वा ययौ मीरा तं द्रष्टुं भक्तसत्तमम्।
ततो मीरा षोडशाब्दं पुरुषं तं ददर्श ह ॥ 67 ॥

उत्थायाश्लिष्य तं धृत्वा करे स्वासनमानयत्।
उपविश्य ततो जीवगोस्वामी तां ददर्श ह ॥ 68 ॥

---

1. पुनः – ख, ग।
2. निद्यत्ये – ख।
3. तेन – ख।
4. चक्रतः – क।

मीरां स्त्रियं ततो चित्ते विस्मितः प्राह तां पुनः।
स्त्रीमुखं नैव पश्यामीत्येतद्यन्मेऽस्ति वै व्रतम्॥ 69॥

न तत्र जगतो माता राधा स्त्री प्रोच्यते मया।
त्वं तु सैवासि सुव्यक्ता श्रीमद्गिरिधरप्रिया॥ 70॥

इति श्रुत्वा वचो मीरा नीवगोस्वामिने पुनः।
नमश्चक्रे मुहुः सोऽथ तां ननाम पुनश्च सः॥ 71॥

कृत्वा वृन्दावने यात्रां मीरा द्वारवतीं ययौ।
तत्रैवोवास मुदिता स्मरन्ती ज्ञाति [1]चेष्टितम्॥ 72॥

अथ राणा नृपो विप्रान् प्रेषयामास तत्र ह।
मीरामानेतुमनघां ज्ञात्वा विप्रााययुर्द्रुतम्॥ 73॥

मीरामूचुस्ततस्तान्सा न यास्यमीति चाब्रवीत्।
ततस्ते ब्राह्मणाः सर्वे त्यक्त्वाशनजलास्तु ताम्॥ 74॥

त्यक्षामो जीवितं सर्वे न त्वं यास्यसि चेद्गृहम्।
इति ज्ञात्वा ततो मीरा श्रीकृष्णान्तिकमागता॥ 75॥

आहूय तान् द्विजानाह मयाज्ञां प्रार्थितो हरिः।
यूयं पश्यत [2]यद्ब्रूयादेष मे करुणानिधिः॥ 76॥

करिष्यामि न सन्देहो भवतां पश्यतामिह।
इत्युक्त्वा तं हरिं चित्ते मीरा प्राहातिदुःखिता॥ 77॥

दासी भूत्वा तवाहं भो क्व गच्छाम्यधुना पुनः।
गणिका शबरी गृध्रान् त्वं समुधृतवानसि॥ 78॥

अहं वराकी कियती न मां त्यज महाभुज।
इत्येवं विलपन्त्यास्तु मीराया भक्तिपूर्वकम्॥ 79॥

ब्रह्माण्डं स्फुटितं तस्यास्तेजो विद्युदिव ज्वलत्।
निर्गत्य कृष्णप्रतिमामुखे न्यस्तमिवाभवत्॥ 80॥

एवं दृष्ट्वा तु ते विप्रा शोकाश्चर्यसमन्विताः।
हा हा कृत्वा रुदन्तस्ते नमश्चक्रुरथार्त्तवत्॥ 81॥

---

1. वे – ख। 2. द्वया – क।

मीरा शरीरं पश्चात्ते [1]संस्कृत्येत्य नृपान्तिकम्।
ऊचुः सर्वं च वृत्तान्तं श्रुत्वा राजातिदुःखितः ॥ 82 ॥

आत्मानं निन्दयन् मीरां सस्मार भक्तिपूर्वकम्।
दृष्ट्वा तस्यास्तु माहात्म्यमलौकिकमिति स्वयम् ॥ 83 ॥

भक्तो बभूव राणाख्यः क्षत्रियो धरणीपतिः ॥ 84 ॥

इति श्रीभगवद्भक्तिमाहात्म्ये मीराचरितं नाम षड्विंशत्यधिकततमः सर्गः ॥ 126 ॥

❊ ❊ ❊

सप्तविंशत्यधिकशततमः सर्गः

॥ पृथ्वीराजचरितम् ॥

कछवाह क्षत्रियेषु पृथ्वीराजो बभूव ह।
आमेरकोठे निवसन्हरिभक्तिमताम्बरः ॥ 1 ॥

कृष्णदासस्य शिष्यः स गुरुशुश्रूषणे रतः।
एकदा स गुरुः कृष्णदासो द्वारवतीं व्रजन् ॥ 2 ॥

पृथ्वीराजगृहे गत्वा ततोऽपि चलितोऽभवत्।
अथ राजापि गुरुणा साकं गन्तुं व्यवस्थितः ॥ 3 ॥

तदा तन्मन्त्रिणः सर्वे कृष्णदासं समब्रुवन्।
गुरो त्वया न नेतव्यः [2]पृथ्वीराजः कथञ्चन ॥ 4 ॥

गतेऽस्मिन्राज्यविभ्रंशो भविष्यति न संशयः।
इत्येकान्ते गुरुः श्रुत्वा पृथ्वीराजमुवाच ह ॥ 5 ॥

न त्वया सह गन्तव्यं तिष्ठात्रैव ममाज्ञया।
इति श्रुत्वा गुरुवचः पृथ्वीराज उवाच तम् ॥ 6 ॥

स्नानं कृत्वा तु गोमत्यां दृष्ट्वा कृष्णं ततः परम्।
शङ्खचक्रादिकं नीत्वा आगमिष्याम्यहं द्रुतम् ॥ 7 ॥

इति स्थितं मनः किन्तु भवदाज्ञा गरीयसी।
अतः परं न गच्छामि भवदाज्ञां करोम्यहम् ॥ 8 ॥

---

1. समागत्य – क।
2. कृष्णदासः – क।

इति श्रुत्वा गुरुः प्राह सर्वं ते भविष्यति।
हरिं भजन् गृहं स्थित्वा कुरु राज्यमकण्टकम्॥ 9॥

इत्याज्ञां शिरसा धृत्वा दत्त्वा धनेकशः।
गुरुं प्रस्थाप्य भवने तस्थौ भक्तिसमन्वितः॥ 10॥

अथैकस्मिन् दिने राजा सपत्नीको वनं गतः।
विहारार्थं तु तत्रैव निश्युवास[1] हरिं स्मरन्[2]॥ 11॥

पृथ्वीराजस्तदा स्वप्ने कृष्णदासं ददर्श ह।
स्वयं द्वारवतीमेत्य कृष्णमूर्तिं मनोहराम्॥ 12॥

कृष्णदासोऽब्रवीत् स्वप्ने द्वारकेयं च गोमती।
तत्र स्नात्वा हरेर्मुर्तिं दृष्ट्वा शङ्खगदादिकम्॥ 13॥

गृहीत्वा गच्छ भवने एवं दृष्ट्वा चकार ह।
[3]प्रातः ततः समुत्थाय गतोद्यद्बाहू ददर्श ह॥ 14॥

शङ्खचक्रादिभिर्युक्तौ गोमती सलिले तथा।
पत्नीं प्रोवाच तं स्वप्नं सापि दृष्ट्वा तु गोमतीम्॥ 15॥

प्रातः सस्नौ जले तस्मिन्महाभक्तिसमन्विता।
पृथ्वीराजोऽतिमुदितो जगाम निजमन्दिरम्॥ 16॥

इति श्रुत्वा जनाः सर्वे तं द्रष्टुं समुपागताः।
उपायनानि प्रददुस्तस्मै भक्तिसमन्विताः॥ 17॥

अथोपायनवित्तैस्तु मठं निर्माय भूपतिः।
स्थापयामास कृष्णस्य मूर्तिं परमशोभनाम्॥ 18॥

एकदा कोऽपि चान्धोऽभूद्वैद्यनाथ जगाम सः।
नेत्रार्थं तस्य स्वप्ने तु वैद्यनाथोऽब्रवीद्द्विजम्॥ 19॥

आमेरकोटे चास्त्येकः पृथ्वीराजातिवैष्णवः।
अङ्गप्रोक्षणवस्त्रेण तस्य नेत्रे सम्मार्ज्य च॥ 20॥

भविष्यति ततो नेत्रद्वयं दृष्ट्वा स [4]चान्धदृक्।
पृथ्वीराजस्य निकटे समागत्याब्रवीच्च तम्॥ 21॥

---

1. निश्यामास – क। 2. भवत् – क।
3. सर्वं – ख। 4. सवांधवत् – क।

अहोऽङ्गप्रोक्षणं स्वीयं वस्त्रं प्रोक्ष्य कलेवरम्।
देहि मेऽन्धाय कृपया ततो नेत्रे भविष्यत: ॥ 22 ॥

इत्याज्ञा वैद्यनाथस्य जाता मेऽस्ति दयानिधे।
पृथ्वीराजो वच: श्रुत्वा सर्वान्सम्पृच्छ्य च द्विजान् ॥ 23 ॥

तदाज्ञां [1]प्राप्यनैजेन वाससाङ्गं प्रमार्ज्य च।
ददौ तस्मै चान्धदृशे सोऽपि तेन [2]दृशौ स्वके ॥ 24 ॥

प्रोक्षयामास मुदितस्तदा तस्य दृशौ [3]शुभे।
तदैव विमले जाते दृष्ट्वा सर्वेऽतिविस्मिता: ॥ 25 ॥

एवं प्रभावो भक्तेस्तु वर्ततेऽद्यापि भूतले।
कस्तं वर्णयितुं शक्तो विना हरिकृपां बुध: ॥ 26 ॥

इति श्रीभगवद्भक्तिमाहात्म्ये पृथ्वीराजचरितं नाम
समङ्कवशत्यधिकशततम: सर्ग: ॥ 127 ॥

❊ ❊ ❊

अष्टाविंशत्यधिकशततम: सर्ग:

॥ रामराजादिचरितम् ॥

श्रुत्वाद्भुतं तु मीरायाश्चरितं तत्पिता नृप: ।
जयमल्लो विरक्तोऽभूद्भगवद्भजने रत: ॥ 1 ॥

स्वयमेकदिने रात्रौ प्रसादे संस्थितो नृप: ।
कृष्णमूर्तिरधरस्तान्मे वर्तते इति संस्मरन् ॥ 2 ॥

उत्थायाध: समागत्य निन्ये तत्रैव तां निशाम्।
प्रात: स्वगृहतोऽन्यं तमुच्चैर्मठमकल्पयत् ॥ 3 ॥

तत्र संस्थाप्य श्रीकृष्णमूर्तिं सर्वोपरि स्वयम्।
दासवत्सेवयामास दिवा निशमतन्द्रित: ॥ 4 ॥

एकस्मिन् दिवसे राजा रात्रौ शय्यां विधाय च।
दत्त्वोपकरणं सर्वं स्वमन्दिरमथागमत् ॥ 5 ॥

---

1. पानर्वनेन – ख, क।
2. ददौ – ख।
3. शुभौ – ख।

अथ राज्ञी तु राजानं किञ्चिद्वक्तुं गता रहः ।
भगवन्निकटे याता तत्रापश्यन्महाद्भुतम् ॥ 6 ॥

श्रीकृष्णमूर्तिशय्यायां पतितां पर्णवीटिकाम् ।
सुचर्वितां ततः शीघ्रं परावृत्यागता गुहम् ॥ 7 ॥

पतिं प्रोवाच मुदिता विस्मयोत्फुल्ललोचना ।
राजा श्रुत्वा प्रियामाह धन्यासि त्वं न संशयः ॥ 8 ॥

एवं त्वभयरामोऽभूत्कर्मशलस्तथैव च ।
भगवानभयरामो राजमल्लश्च कन्धरः ॥ 9 ॥

एतेऽपि च महाभक्ता मथुरा प्रान्तवासिनः ।
कीर्तिता भक्तिदाश्चैव नामतोऽपि न संशयः ॥ 10 ॥

मथुरायामभूद्राजा भक्तिमान् साधुपूजकः ।
नाम्ना मधुकरेत्येतत्सजातोऽतिदयान्वितः ॥ 11 ॥

तस्यैवं नियमो राज्ञः साधुरूपधरस्तु यः ।
तं भक्त्या पूजयामास कृष्णवच्चातिहर्षितः ॥ 12 ॥

अथैकस्मिन् दिने कोऽपि दुष्टो गर्द्दभमानयत् ।
मालातिलकभूषाढ्यं वैष्णवोऽयमिति ब्रुवन् ॥ 13 ॥

श्रुत्वा राजातिहर्षेण समागत्य तदन्तिकम् ।
अहो भाग्यमिति प्रोच्य पूजयामास भक्तितः ॥ 14 ॥

तत्प्रपूजयतस्तत्र चरणं गर्दभस्य वै ।
मनुष्य[1]पादसदृशं बभूवात्यन्तमद्भुतम् ॥ 15 ॥

श्यामपृष्टं रक्ततलं पञ्चाङ्गुलियुतं शुभम् ।
राजा दृष्ट्वा प्रभोरेतदित्युक्त्वा चरणोदकम् ॥ 16 ॥

जग्राह च ततो [2]दुष्टः प्रपलाप्य गतः क्वचित् ।
सर्वे दृष्ट्वा महाश्चर्यं साधुसाध्विति चाब्रुवन् ॥ 17 ॥

राजापि गर्दभं तं तु ररक्ष वाजिमन्दिरे ।
शुश्रूषायै दासमेकं योजयामास भूपतिः ॥ 18 ॥

1. यादृशं – क। 2. हृष्टः – ख।

राम राजा तथैवाभूद्भक्तः श्रीकृष्णतुष्टये।
याचमानाय प्रददौ यद्यदिच्छति याचकः॥ 19॥

एकदा रामलीलायां कश्चिदागत्य तं द्विजः।
रामाराजाभिधं भूपं ययाचे तस्य कन्यकाम्॥ 20॥

श्रुत्वा तदा [1]ग्राम्यास्तं ब्राह्मणं प्रति चुक्रुधुः।
तन्निवर्त्य ततो राजा ब्राह्मणाय ददौ सुताम्॥ 21॥

धनानि दत्त्वा बहुशो दासदासी गृहादिकम्।
चकारात्मसमं भूपो जामातरमविक्षणात्॥ 22॥

अथापरो बभूवैको रामराजातिभक्तिमान्।
एकदा मथुरायां तु समायातो नृपोत्तमः॥ 23॥

सपत्नीको धनं नीत्वा कृत्वा यात्रामशेषतः।
दत्त्वा वित्तानि सर्वाणि ऋणं कृत्वा पुनर्ददौ॥ 24॥

ऋणं दातुं ततस्तस्य पत्नी स्वं कङ्कणद्वयम्।
ददौ राज्ञेऽतिमुदिता कङ्कणं परमाद्भुतम्॥ 25॥

गृहीत्वा रामराजा स नाभादासकरद्वये।
[2]परिधाप्यागतो गेहे पत्नीं प्राहातिहर्षितः॥ 26॥

सा श्रुत्वा हर्षितोवाच गेहाद्दास्यामि तदृणम्।
अथ प्रातर्गृहं गन्तुं रामराजो व्यवस्थितः॥ 27॥

सायंकाले तु सचिव [3]स्वरूपेण हरिः स्वयम्।
रामराजा कृतर्णं तु वैश्याय प्रददौ तदा॥ 28॥

रामराजापि कञ्चित्तं प्रेष्य प्रोवाच तं विशम्।
प्रातर्यास्याम्यहं गेहे ततो दास्यामि ते धनम्॥ 29॥

तदर्थमेकं कञ्चित्त्वं सद्यो देहि निजं जनम्।
इति श्रुत्वा ततो वैश्यः समुत्थाय नृपान्तिके॥ 30॥

आगत्योवाच राजानं धनं प्राप्तं मया विभो।
अद्यैव सचिवो गत्वा दत्त्वा धनमशेषतः॥ 31॥

---

1. छायां गतो – ख।
2. छायां गतो–ख।
3. रूपिणः – ख, ग।

मद्गृहात्क्वचिदन्यत्र जगाम पश्यतां नृणाम्।
सचिवस्तु ततः प्राह नाहं तत्र गतो नृप॥ 32॥

न ददौ वा धनं चास्मै किं वदत्येष भीतवत्।
इति श्रुत्वा वणिग्गत्वा गृहे नीत्वा धनं तु तान्॥ 33॥

साक्षिणस्तु समादाय दर्शयामास भूपतिम्।
राजा दृष्ट्वाद्भुतं मेने श्रीकृष्णस्य विचेष्टितम्॥ 34॥

वणिजे प्रददौ भूरिधनं च पारितोषकम्।
एवं षेमालखने भक्तोऽभूदतिविश्रुतः॥ 35॥

स मृत्यु समयेऽत्युच्चैरुरोदाथ सुतोऽब्रवीत्।
किं [1]रोदिषि पितर्ब्रूहि करिष्ये वचनं तव॥ 36॥

इति श्रुत्वाब्रवीत्पुत्रं षेमालखनस्तदा।
स्वयमानीय कुम्भेन जलं पुष्पादिकं तथा॥ 37॥

न विष्णुः पूजितश्चेति सह याति मनोरथः।
इति श्रुत्वा तु तत्पौत्रः पितामहमुवाच तम्॥ 38॥

अहमेव करिष्यामि सर्वथा हरिपूजनम्।
इति श्रुत्वा तु वचनं मूर्ध्ना प्राथ्र्यातिहर्षितः॥ 39॥

एवमेव भजन्कृष्णं वयो गमयनान्यथा।
ततस्तवसुखं सर्वं भविष्यति न चान्यथा॥ 40॥

इति श्रुत्वाकरोत्सर्वं पितामहवचः स वै।
एवं वंशे हरेर्भक्तिं स्थापयित्वा दिवं गतः॥ 41॥

षेमालखनो नामा महाभागवतोत्तमः॥ 42॥

इति श्रीभगवद्भक्तिमाहात्म्ये रामराजादिचरितं नामाष्टाङ्कवशत्यधिकशततमः सर्गः॥ 128॥

❊ ❊ ❊

1. किं त्वरांदिषितद् – ख।

ऊनत्रिंशदधिकशततमः सर्गः

॥ सूरदासचरितम् ॥

चतुर्भुजो बभूवैको भक्तः सर्वसुहृत्तमः।
गोस्वामी हरिवंशस्य शिष्यः परमधार्मिकः॥ 1 ॥

एकदा स गोण्ड्ययनाख्यदेशे म्लेच्छमयो गतः।
तत्र जीवबलिं दृष्ट्वा [1]देव्याः सन्निधिमागतः॥ 2 ॥

प्रसाद्य देवीं प्रोवाच मातर्जीवबलिं त्यज।
पायसान्नेन लोकानां वरदा भव चण्डिके॥ 3 ॥

इति सम्प्रार्थिता देवी निशि स्वप्नं ददौ पुरे।
अद्यादि पायसान्नेन बलिं मे सम्प्रयच्छत॥ 4 ॥

चतुर्भूजोऽतिभक्तोमेतदुक्तं पूजनं कुरु।
नोचेत्सर्वान्हरिष्यामि सत्यमेतन्न संशयः॥ 5 ॥

इति श्रुत्वा जनाः सर्वे चतुर्भुजमुपागताः।
श्रुत्वा तन्मुखतः सर्वं जीवदानं च तत्यजुः॥ 6 ॥

एकदा कस्यचित्तत्र वैश्यस्य धनसञ्चयन्।
गृहीत्वा चौर आयातस्तत्पृष्टानुगतो द्रुतम्॥ 7 ॥

गृहीत्वा तेन वैश्येन चौरोऽनीतो नृपान्तिके।
तत्र राजसभायां सः प्राह नैव हृतं मया॥ 8 ॥

ततो दिव्यं तृतीयेऽह्नि गृहाणेति नृपोऽब्रवीत्[2]।
स्वीचकार स चौरोऽपि तस्मिन्नेव दिने क्वचित्॥ 9 ॥

पुराणशुश्रुवे दीक्षा [3]ग्राह्या भक्तिपूर्वकैः।
जन्मान्तरं भवेन्नृणां सत्यं सत्यं न संशयः॥ 10 ॥

तत उत्थाय स चौरश्चतुर्भुजसमीपगः।
जग्राह वैष्णवीदीक्षां कृतकृत्यो बभूव ह॥ 11 ॥

अथ तृतीये दिवसे देव्याः स्थाने धृतो गतः।
प्रतिज्ञामकरोत्तत्र चौरः स्मृत्वा गुरोः पदम्॥ 12 ॥

---

1. देवीं – ख, क।
2. ब्रवीति च – ख।
3. ग्रहणे – ख।

न मया चोरितं किञ्चित्करस्यापीह तु जन्मनि।
इत्युक्त्वा लौहमादाय करे सप्तपदीं ययौ॥ 13॥

ततस्तत्याज तं लौहं खदिराङ्गारसन्निभम्।
दृष्ट्वा राजादयः सर्वे साधु साध्विति तुष्टुवुः॥ 14॥

राजा क्रुद्धोऽब्रवीद्वैश्यं दण्ड्येऽनृतवादिनम्।
ततो भृत्यास्तु तं नीत्वा गताः कारागृहं प्रति॥ 15॥

तदा चौरोऽपि तन्मन्त्रग्रहणाद्वैष्णवोऽभवत्।
आगत्य भूपतिं प्राह राजन्वैश्योऽतिधार्मिकः॥ 16॥

मयैव चोरितं वित्तं वैश्यस्यास्य न संशयः।
मयादिव्येजितं यत्तु शृणु तत्कारणं नृप॥ 17॥

जन्मान्तरं भवेद्दीक्षाग्रहणादिति न श्रुतम्।
ततो दीक्षां गृहीत्वा तु मया लौहोधृतः करे॥ 18॥

अत्र जन्मनि कस्यापि न किञ्चिच्चोरितं मया।
इति प्रतिज्ञया दीक्षा कालाज्जन्मान्तरं त्विदम्॥ 19॥

तस्मात् वैश्य समानीय त्यक्तमर्हसि भूपते।
राजा चतुर्भुजं भक्तं समानीय प्रपूज्य च॥ 20॥

मोचयामास तं वैश्यं स चौरोऽपि धनं ददौ।
वैश्योऽपि वैष्णवो भूतश्चौर्य्यं चौरो जहौ ततः॥ 21॥

राजा चतुर्भुजस्याथ शिष्योभूत्वातिवैष्णवः।
यावज्जीवं हरिं स्मृत्वा जगामान्ते हरेः पदम्॥ 22॥

चतुर्भुजस्य चणकक्षेत्रमेकदिने पथि।
स्थितमागन्तुकैर्भक्तैर्लुण्ठितं चात्परोषितम्॥ 23॥

तद्रक्षकः समागत्य प्रोवाचाथ चतुर्भुजम्।
समागत्य तु तान्सर्वान्सत्कृत्य परमा मुदा॥ 24॥

अनीय भोजयामास भर्त्स्यर्न् रक्षकं मुहुः।
अथ क्षेत्रे तु सर्वेभ्योऽधिकमन्नं बभूव ह॥ 25॥

एवं चालकनामाभूद्भक्तः सर्वसुहृत्तमः।
कृष्णगुप्तस्य शिष्यः स जितसर्वारिमण्डलः॥ 26॥

गौडदेशेऽतिविख्यातो निर्वादग्राम उत्तमे।
विमलानन्दनामाभूत्तत्रैको द्विज सत्तमः॥ 27॥

महाभक्तो जगन्नाथ पूजायां निरतः सदा।
यदृच्छा लाभसन्तुष्टः प्रतिग्रह विवर्जितः॥ 28॥

एकदा विमलानन्दः षड्पञ्चाशत्प्रकारकम्।
भोज्यं गृहे जगन्नाथं ध्यात्वा भक्त्या समर्पयत्॥ 29॥

तस्मिन्नेव दिने रात्रौ राजा स्वप्नं ददर्श ह।
आगतो वैष्णवैः साकमेको भक्तोत्तमो महान्॥ 30॥

ततो नीलाचलेशस्तं भोजनायाब्रवीद्वचः।
स [1]महान्वैष्णवः प्राह विमलानन्दमन्दिरे॥ 31॥

सम्यक् भुक्तं मया राजन्नेतैः सह न संशयः।
अभून्नैवेदृशी [2]तृप्तिः कदाचिदपि मे क्वचित्॥ 32॥

इत्युक्त्वा स गतः साधुर्महान्निजजनैः सह।
राजा प्रबुद्धस्तं स्वप्नं चिन्तयन्प्रातरेव हि॥ 33॥

विमलानन्दभवनं गत्वा पप्रच्छ तं मुदा।
पूर्वस्मिन्वासरे ब्रह्मन् किं त्वया हरेऽर्पितम्॥ 34॥

तद्वदेति निशम्याथ विमलानन्द आह तम्।
षड्पञ्चाशत्प्रकारं तु भोज्यकर्पितवानहम्॥ 35॥

इति श्रुत्वा ततो राजा विमलानन्दचेष्टितम्।
स्तुवन्नागतवान् गेहं तं महान्तममन्यत॥ 36॥

मदनमोहनसूरोऽभूद्दिल्लीप्रान्तेऽति[3]भक्तिमान्।
दिल्लीश्वरनृपस्यासीदधिकारी महानयम्॥ 37॥

कुर्वन् श्रीकृष्णभजनं राजकार्यं चकार सः।
दिल्लीश्वरो ददौ तस्मै कियद्देशाधिकारिताम्॥ 38॥

तत्रोत्पन्नं धनं राज्ञे दत्त्वा यच्चावशेषितम्।
तत्साधुभ्यो ददौ नित्यं हरिपूजापरायणः॥ 39॥

---

1. महान् – क।
2. नृभिः – क
3. मान्ते – ख।

एकदा सूरदासः स गुरुं दृष्ट्वा मनोरमम्।
तदैव शकटे कृत्वा गुरु वेश्मनि सिद्धये[1] ॥ 40 ॥

प्रेषयामास भक्तान् स मथुरायां महात्मनः।
निशागतो गुरुः दृष्ट्वा शिष्यमेवमुवाच ह ॥ 41 ॥

प्रातरस्य विधेया वैः अपूपा[2] हरये शुभाः।
इत्युक्तः स्वयं शिष्यो ददर्श स्वप्नमुत्तमम् ॥ 42 ॥

स्वयमागत्य वदति श्रीमन्मदनमोहनः।
अस्येदानीं गुडस्य त्वं कृत्वापूपान्प्रयच्छ मे ॥ 43 ॥

इति दृष्ट्वापि सुष्वाप भ्रान्तिरेषेति चिन्तयन्।
पुनर्ददर्श तादृग्वै स्वप्नमुत्थाय यत्नतः ॥ 44 ॥

कृत्वापूपान्समर्प्याथ हरये वैष्णवैः सह।
भुक्त्वा प्रसादं बुभुजे ततः [3]सुष्वाप निर्भरः ॥ 45 ॥

एकदा सूरदासस्तु पद्यं चक्रेऽद्भुतार्थकम्।
साधोरुपानहै धृत्वा तरिष्यामि भवार्णवम् ॥ 46 ॥
इति श्रुत्वा तु कश्चिद्वै साधुः सोपानादागतः।
मथुरायां सूरदासपरीक्षार्थं स धूर्तवत् ॥ 47 ॥

सूरदासो गुरुद्वारि स्थितस्तत्रगतः स वै।
उवाच सूरदासं भो प्रष्टुमिच्छामि ते गुरुम् ॥ 48 ॥

[4]अहमन्तः प्रयास्यामि [5]पश्योपानत् द्वयं मम।
न काचिद्भीः सुखं गच्छेत्युक्तः सूरेण सोऽगमत् ॥ 49 ॥

तत्र सूरगुरुं नत्वा सूरदासः क्व वर्तते।
इत्युक्तं तेन धूर्तेन ततो गुरुरथाह्वयत् ॥ 50 ॥

सूरदासं ततः सोऽपि गुरुसन्निधिमागतः।
तस्योपानहं द्वयं प्रोक्ष्य कृत्वा करतले मुदा ॥ 51 ॥

गुरुमाहाथ फलितस्त्वत्प्रसादान्मनोरथः।
प्रार्थितो यस्तु गीतेन मया लब्धस्तु सोऽचिरात् ॥ 52 ॥

---

1. वेश्पमिद्वये – ख।
2. अपूजा – क।
3. सुधाय – क, ख।
4. ओहमितः – क।
5. यस्योपान – क।

इति दृष्ट्वा तदा सोऽपि यः परीक्षार्थमागतः।
उत्थाय पादयोस्तस्य निःपपात क्षमापयन्॥ 53॥

एकदा सूरदासस्य गृहे राजधनं स्थितम्।
लक्षावधि ददौ सर्वं दुर्भिक्षसमये मुदा॥ 54॥

साधुभ्योऽथ नृपो भृत्यानानेतुं तद्धनं स्वकान्[1]।
प्रेषयामास ते भृत्याः सूरदासान्तिकं गताः॥ 55॥

ऊचुर्धनं प्रयच्छेति श्रुत्वा सुरोऽपि तत्क्षणात्।
धनभाण्डे प्रस्तरादि कृत्वा संमुद्र्य तत्सुखम्॥ 56॥

ददौ लिखित्वा तत्पत्रं यथा तत्कथयाम्यहम्।
राजन्लक्षावधिधनं मम गेहे स्थितं तव॥ 57॥

दुर्भिक्षे साधुभिर्भुक्तं भवद्भीत्या पलायिताः।
दिल्लीश्वरोऽपि तं दृष्ट्वा भाण्डं प्रस्तरपूरितम्॥ 58॥

पत्रं च तादृशं दृष्ट्वा महामन्त्रिणमाह च।
किं कुर्यां साधुभिर्भुक्तं ते किमर्थं पलायिताः॥ 59॥

ततो [2]तोडलमल्लेन सूरदासोऽतियत्नतः।
धृतो दिल्लीश्वरं चोक्त्वा कारागारे निवेशितः॥ 60॥

ततः सूरो हरेः गीतं निर्ममे भक्तिपूर्वकम्।
आह दिल्लीश्वरं[3] स्वप्ने श्रीमन्मदनमोहनः॥ 61॥

मद्भक्तोऽयं सूरदासः कारागारे धृतास्त्वया।
इदानीं मुञ्च तं नोचेत्प्रातर्यास्यसि दुर्दशाम्॥ 62॥

[4]इति दृष्ट्वा नृपः स्वप्ने सूरं तत्कालमानयत्।
क्षमापयन्धनं भूरि दत्त्वा तत्राधिकारिताम्॥ 63॥

वृन्दावनं समागत्य निर्ममे गीतमुत्तमम्।
तत्राप्याश्चर्यमतुलं यस्मिन्नेव दिने कृतम्॥ 64॥

तदैव च श्रुतं [5]सर्वैर्गीतं क्रोशशतोपरि।
एवं भक्तिवशात्सूरदासो विख्यातिमानभूत्॥ 65॥

1. स्वकम् – ख, ग।
2. षोडत्य – क।
3. तंश्वशुरं – क, ख।
4. हरिं – ख।
5. सर्वं – क, ख।

वसन् वृन्दावने तत्र जगाम हरिमन्दिरम् ॥ 66 ॥

इति श्रीभगवद्भक्तिमाहात्म्ये सूरदासचरितं नाम ऊनत्रिंशदधिकशततमः सर्गः ॥ 129 ॥

❊ ❊ ❊

त्रिंशदधिकशततमः सर्गः

॥ मुरारिदासचरितम् ॥

एवं कात्यायनीदासो बभूवातीव भक्तिमान्।
यस्मिन् गायति वृक्षादि बभूवास्पन्दवर्जितम् ॥ 1 ॥

एवं विलन्दाग्रामे तु भक्तोऽभूदतिविश्रुतः।
मुरारिनामा निर्द्वन्द्वो[1] वक्ष्याम्यस्य कथां शुभाम् ॥ 2 ॥

स मुरारिर्महाभक्तो बभूव राजपूजितः।
ग्रामे सर्वैरर्च्यमानो निःसङ्गो लोभवर्जितः ॥ 3 ॥

स्वग्रामे चैकदा स्नात्वा समागच्छन्निजालयम्।
मार्गे कोऽपि गृहे भक्तः तुलसीतरुसन्निधौ ॥ 4 ॥

पूजयित्वा हरिं तस्मादाजुहाव स वैष्णवम्।
अहो कोप्यत्र भक्तोऽस्ति गृह्णातु चरणोदकम् ॥ 5 ॥

इति श्रुत्वा वचस्तस्य मुरारि स्वगृहं ययौ।
ददर्श तुलसीपत्रं शालग्रामशिलार्चितम्[2] ॥ 6 ॥

दृष्टस्तमाह देहीति श्रुत्वा भीतः स पूजकः।
नाथाहं[3] चर्मकारोऽस्मि क्षम्यतां मम दुर्जयम्[4] ॥ 7 ॥

इत्युक्तवन्तं तं प्राह मुरारिः प्रहसन्निव।
मा भैस्त्वं साधुरेवासि भक्तिरस्तु तवाच्युते ॥ 8 ॥

अतो [5]मज्जातिरेवासि देहि तच्चरणोदकम्।
इत्येवमाग्रहं कृत्वा पीत्वा तच्चरणोदकम् ॥ 9 ॥

---

1. निर्देभोऽथ – ख, क।
2. च ताम् – ख।
3. नाम्र्याहं – क।
4. दुर्जयः – ख, ग।
5. मंताति – ख।

जगाम स्वगृहं हृष्टो मुरारिर्लोकपूजितः ।
अथ ग्रामजनाः श्रुत्वा तरांसर्गं च तत्त्यजुः ॥ 10 ॥

राजापि च समागत्य मुरारिं गूढमब्रवीत् ।
किमिदं श्रूयते नाथ तत्र पादोदकग्रहः ॥ 11 ॥

सत्यं भो चर्म्मकारेण समाहूतो गतः स्वयम् ।
तत्कराद्वलतो नीत्वा [1]पीतवाञ्चरणोदकम् ॥ 12 ॥

इति श्रुत्वाथ राजापि विमनास्तत उत्थितः ।
जगाम स्वगृहं तस्य परित्यागेन दुःखितः ॥ 13 ॥

एवं ज्ञात्वा मुरारिस्तु तं ग्रामं परिहाय सः ।
अन्यत्रोवास हृष्टात्मा हरिकीर्तनतत्परः ॥ 14 ॥

श्रीरामनवमीं प्राप्य महोत्साहं चिकीर्षतः ।
राज्ञि स्वप्नो बभूवाथ रात्रावाश्चर्यदायकः[2] ॥ 15 ॥

तं मुरारिं विना पूजां मम मा कुरु भूपते ।
करिष्यसि विमानं चेदकल्याणं भविष्यति ॥ 16 ॥

एवं कोऽपि वदत्येत्य वैष्णवः क्रोधसंयुतः ।
दृष्ट्वा स्वप्नमिमं राजा प्रातरुत्थाय चिन्तितः ॥ 17 ॥

आहूयोवाच तं स्वप्नं सचिवादीन् ततः स्वयम् ।
मुरारिसन्निधौ गत्वा प्रार्थयामास भक्तितः ॥ 18 ॥

क्षन्तव्यमिति मूर्खस्य दुष्टस्य चरितं गुरो ।
इति श्रुत्वा मुरारिस्तु न ददर्श च तन्मुखम् ॥ 19 ॥

ये [3]भक्तिविमुखास्तेषां नाहं पश्यामि चाननम् ।
इति श्रुत्वा ततो राजा बद्धाञ्जलिरुवाच तम् ॥ 20 ॥

त्वमेव शिक्षको मेऽसि कथमेतावती कृपा ।
न कृता मयि पापिष्ठे कथं प्रज्ञामवाप्नुयाम् ॥ 21 ॥

यथा सन्ताडितो याति पशुः पथि निरन्तरम् ।
न तथा सत्कृतः प्रेम्णा वाण्या[4] चापि तिरस्कृतः ॥ 22 ॥

---

1. यासि त्वं – ख।
2. कारकम् – ख, ग।
3. भक्तः – क।
4. नोवापि च – क।

इति श्रुत्वा प्रसन्नोऽभून्मुरारिः समुपागतः ।
राज्ञा सह निजं ग्रामं विलन्दाख्यं मनोहरम् ॥ 23 ॥

तत्र श्रीरामनवमीदिने कृत्वा महोत्सवम् ।
मुरारिस्तु स्वयं नृत्यन् जगौ रामायणं मुदा ॥ 24 ॥

श्रीरामवनवासस्य कथायाता यदा तदा ।
मुरारिस्तु तदैकाग्रचित्तो नृत्यन् जगौ कथाम् ॥ 25 ॥

गते रामे मुमूर्च्छाथ श्रीमान्दशरथो नृपः ।
इत्युक्त्वा तु कथां सोऽपि मुरारिर्मूच्छितोऽभवत् ॥ 26 ॥

पुनरुत्थाय हा राम हा राम जनकात्मजे ।
अनुकुर्वन्दशरथं मुरारिर्विजहावसून् ॥ 27 ॥

पश्यतां सर्वलोकानां तदद्भुतमिवाभवत् ।
अथ राजारुदन्नेत्य समुत्थापितवान् गुरुम् ॥ 28 ॥

नोत्तस्थौ स मृतो यस्मात्ततः सर्वेति दुःखिताः ।
[1]संश्चक्रुस्ते मुरारेस्तु देहं विधिवदुज्ज्वलम् ॥ 29 ॥

एवं भक्तेस्तु माहात्म्यं को ज्ञातुं क्षमते बुधः ।
यथा कथञ्चिद्भक्तिश्चेन्नृणां संसारतारिणी ॥ 30 ॥

इति श्रीभगवद्भक्तिमाहात्म्ये मुरारिदासचरितं नाम त्रिंशदधिकशततमः सर्गः ॥ 130 ॥

❊ ❊ ❊

1. सं चस्कुरु – क, ख ।

एकत्रिंशदधिकशततमः सर्गः

॥ तुलसीदासचरितम् ॥

तुलसीदासचरितं वक्ष्यामि परमाद्भुतम्।
यस्य श्रवणमात्रेण कृतकृत्यो भवेन्नरः ॥ 1 ॥

गङ्गायमुनयोर्मध्ये देशः पुण्यतमो महान्।
अन्तर्वेद इति ख्यातो मुनिभिः परिसेवितः ॥ 2 ॥

तत्रैकस्तुलसीनाम्ना [1]मुकुलेत्युपनामकः।
कारयित्वा तद्विवाहं पिता तस्य दिवं गतः ॥ 3 ॥

माताप्यनुययौ तस्य स्वपतिं सत्यतत्परा।
अथ स तुलसीनाम्ना[2] स्वपत्न्या सह नित्यशः ॥ 4 ॥

रेमे पितृधनं प्राप्य क्षणभोगसमन्वितः।
कालेन तस्य पुत्रोऽभूद्दृष्ट्वा तं चातिहर्षितौ ॥ 5 ॥

तुलसी तस्य पत्नी चेत्युभौ पूर्णमनोरथौ।
अथ स तुलसी विप्रः पत्नीप्रेमवशानुगः ॥ 6 ॥

न सेहे विरहं तस्याः क्षणार्द्धमपि कुत्रचित्।
एकदा तस्य पत्नी तु समीपे मातृमन्दिरे ॥ 7 ॥

तमनुक्त्वा गता चाथ सोऽप्यदृष्ट्वा गृहे च ताम्।
ययौ तदैव श्वसुरगेहं पत्नीं ददर्श ह ॥ 8 ॥

दृष्ट्वा तमागतं पत्नी भर्त्सयन्ती वचोऽब्रवीत्।
किमर्थमागतोऽस्यत्र न गेहे स्थातुमिच्छसि ॥ 9 ॥

इत्युक्तः प्राह तां पत्नीं प्रहसन् तुलसी द्विजः।
त्वया विना वरारोहे मन्दिरं विपिनायते ॥ 10 ॥

स्थातुं शक्नोमि नैवातस्त्वामदृष्ट्वा कथञ्चन।
इत्युक्ता प्राह तत्पत्नी सा क्रोधेन पतिं पुनः ॥ 11 ॥

किमर्थं भाषसे व्यर्थं गच्छ स्वभवनं प्रति।
अस्थिचर्म्ममये चास्ति मम देहेऽस्ति यादृशी ॥ 12 ॥

---

1. ग्रामो ब्राह्मण संकुलः – क।
2. नामास्यपत्न्या – ख।

प्रीतिः सा यदि रामे स्यात्तदा धन्यो भविष्यसि।
श्रुत्वैतद्वचनं तस्याः पत्न्याः स तुलसी द्विजः ॥ 13 ॥

प्राबुध्यत तदैवासौ सहसोत्थित इवाभवत्।
दृष्ट्वा तं चलितं पत्नी पुनः प्राह पतिं सती ॥ 14 ॥

अन्तःपुरमिहायातश्चेद्भुक्त्वा गच्छ मन्दिरम्।
अहं चापि गमिष्यामि त्वया सह न संशयः ॥ 15 ॥

इति श्रुत्वा तु तद्वाक्यं प्राह स तुलसी द्विजः।
अतः परं न वक्तव्यं त्वया किमपि मत्कृते ॥ 16 ॥

को भोक्ष्यति पतिः कस्ते कः स्थास्यति गमिष्यति।
गृहं कस्येति सर्वं मे विस्मृतं त्वदनुग्रहात् ॥ 17 ॥

धन्यासि त्वं मयि स्नेहवती चासि न संशयः।
यत्त्वया गुरुणेवाह[1]मुद्धृतो भवसागरात् ॥ 18 ॥

इत्युक्त्वा तुलसी विप्रस्तत्कालं प्रस्थितोऽभवत्।
पत्नी चाप्यति सन्दिग्धा रुदन्ती कियदन्वगात् ॥ 19 ॥

निर्मनं तं तु सा वीक्ष्य समायाता निजं गृहम्।
अथ स तुलसी विप्रः संसारासारतां विदन् ॥ 20 ॥

ययावयोध्यां श्रीरामं द्रष्टुं भक्तिसमन्वितः।
तत्र गत्वा ददर्शाथ सीतारामौ मुदान्वितः ॥ 21 ॥

तीर्थोपवासविधिना सुष्वाप सरयू[2]तटे।
किं जपन्निह मुक्तः स्यामिति चिन्तापरोऽभवत्[3] ॥ 22 ॥

तदा स दृष्टवान् स्वप्ने पितरं भक्तरूपिणम्।
वदन्तं वत्स रामेति मन्त्रं जप निरन्तरम् ॥ 23 ॥

एतन्मन्त्रसमो नास्ति मन्त्रस्तु भुवनत्रये।
इमं जपन्ति[4] देवाश्च गन्धर्वोरगकिन्नराः ॥ 24 ॥

यस्योच्चारणमात्रेण पापराशिश्च लीयते।
भवन्ति कृतकृत्या वै मनुष्या नात्र संशयः ॥ 25 ॥

---

1. वहन्. क।
2. शरद्यु – ख।
3. निशि – क।
4. तपन्ति – ख, ग।

रामनाम समं वत्स नास्ति किञ्चिज्जगत्त्रये।
चतुर्वर्गप्रदं नृणां सत्यं सत्यं [1]वदाम्यहम्॥ 26॥

जपो होमस्तथा ध्यानं यागस्तीर्थनिषेवणम्।
जानीहि सर्वसिद्धान्तं रामनामसमं नहि॥ 27॥

तस्मादिमं रामनाम गृहीत्वा मन्त्रमुत्तमम्।
यावदायुः सुखी भूत्वा व्रजान्ते रामसन्निधिम्॥ 28॥

किञ्च प्रातस्तवाकस्मात् सरयूतीरवर्तिनः।
सन्निधावेत्य तुलसीमालां दास्यन्ति वैष्णवाः॥ 29॥

अथैवं स्वप्नमालोक्य प्रबुद्धस्तुलसी द्विजः।
परमानन्दमापन्नः स जजाप[2] मनुं हृदि॥ 30॥

प्रातरुत्थाय सुस्नातः सीतारामौ निरीक्ष्य च।
[3]आसीनः सरयूतीरे तत्रायातोऽतिवैष्णवः॥ 31॥

मालां गृहीत्वा तुलसीदासाय प्रददौ स तु।
जग्राह तां तु मालां स रात्रिस्वप्नमनुस्मरन्॥ 32॥

एवं मालां च मन्त्रं च सम्प्राप्य सोऽतिहर्षितः।
एकचित्तो जपन् तत्र तस्थौ भयविवर्जितः[4]॥ 33॥

ततः काशीं समागत्य असीः नद्या उदग्दिशि।
हनूमद्दक्षिणे कृत्वा कुटीं तत्रावसन्मुखम्॥ 34॥

रामनाम जपासक्तो रामायणपरायणः।
भुञ्जानः परमप्रीत्या यथालब्धमयाचितम्॥ 35॥

यत्र रामकथा काश्यां गत्वा तत्रापि सादरम्।
शुश्राव सततं नित्यं लोभमोहविवर्जितः॥ 36॥

अथैवं वसतस्तस्य श्रीरामस्य कृपा ह्यभूत्।
संस्कृतं प्राकृतं चैव काव्यं चक्रे मनोहरम्॥ 37॥

एकदा निशि स स्वप्नं ददर्श परमाद्भुतम्।
ध्यायमाना राममूर्त्तिः समागत्य ब्रवीति माम्॥ 38॥

---

1. संशयः – ख, ग।
2. सः न जायत् – क, ख।
3. आश्रमः – क।
4. समन्वितः – ख, ग।

शृणुष्व तुलसीभक्त त्वयि तुष्टोऽस्म्यसंशयम्।
ततो वक्ष्यामि जगतां हितं तव विशेषतः ॥ 39 ॥

कुरु रामायणं सर्वं भाषया त्वं मदाज्ञया।
त्वं मयोद्धृत एवासि लोके स्यादुपकारकम्॥ 40 ॥

कलौ मूर्खा भविष्यन्ति न ज्ञास्यन्ति न संस्कृतम्।
तेषां हितमिदं लोके भविष्यति न संशयः ॥ 41 ॥

ये गास्यन्ति तव प्रोक्तं रामायणमनुत्तमम्।
ते ममातिप्रिया नित्यं तेभ्यो दास्याम्यभीप्सितम्[1] ॥ 42 ॥

एवं दृष्ट्वा तु तुलसीदासः स्वप्नं समुत्थितः।
कृतकृत्यमथात्मानं मेनं स भक्तसत्तमः ॥ 43 ॥

गणेशादीन्नमस्कृत्य प्रारम्भे भक्तिपूर्वकम्।
कुर्वन्नहर्न्निशं भक्त्या सम्पूर्णमकरोन्मुदा॥ 44 ॥

दृष्ट्वा तं निर्मितं सर्वे स्तुत्वा सञ्जहृषुर्बुधाः।
देशदेशान्तरे ख्यातमस्त्यद्यावधि पूजितम्॥ 45 ॥

एकदा यदभूत्तस्य माहात्म्यं तद्वदाम्यहम्।
तस्यैव नियमः काश्यां चक्रे शौचं न कुत्रचित्॥ 46 ॥

असी नदीदक्षिणतीरमेत्य स सर्वदा मूत्रपुरीषयोश्च।
कृत्वा विसर्गं पुनरेत्य मन्दिरे चकार चावश्यकमाह्निकं मुदा॥ 47 ॥

अथासि दक्षे क्वचिदाम्रवृक्षे शौचावशेषं च जलं महात्मा।
त्यक्त्वा समागत्य निवेशनं निजं निनाय चैवं कति वत्सरं सः ॥ 48 ॥

अथैकदा तत्र तरौ स्वकर्म्मणा बसन् वभाषे तुलसीं हि प्रेतः।
अहो तवैतज्जलदानतोऽहं प्रीतो ददे स्वाभिमतं वदत्वम्॥ 49 ॥

इत्युक्तस्तुलसीदासः प्रेतं प्राहातिनिर्भयः।
कस्त्वं कथमिमां योनिं सम्प्राप्तोऽत्र विषीदसि॥ 50 ॥

इति श्रीभगवद्भक्तिमाहात्म्ये तुलसीदासचरितं
नामैकङ्क्त्रिशदधिकशततमः सर्गः॥ 131॥

❊ ❊ ❊

1. भीक्षितम् – ख।

द्वात्रिंशदधिकशततमः सर्गः

॥ तुलसीदासचरितम् ॥

इति श्रुत्वाब्रवीत्प्रेतः साधो मच्चरितं शृणु।
आसं पूर्वमहं विप्रो विन्ध्ये राजपुरोहितः ॥ 1 ॥

लुब्धः सत्कर्मरहितः साधुविद्वेषकारकः।
परनिन्दारतो नित्यं विद्वद्ब्राह्मणकण्टकः ॥ 2 ॥

राज्ञा दत्तं द्विजातिभ्यो यद्धनं तदपि [1]त्वहम्।
स्तोकं दत्त्वा द्विजातिभ्यः सर्वं रक्षितवान् गृहे ॥ 3 ॥

एवं मया वयोनीतं न दत्तं किमपि स्वयम्।
न सत्कृतं नोपकृतं मनोवाक्कायकर्मभिः ॥ 4 ॥

एकस्मिन् दिवसे द्वारि समायातः पिपासितः।
तस्मै क्रोधेन महता किञ्चिद्दत्तं जलं मया ॥ 5 ॥

एवं तत्कर्मणा चात्र जलमेतदुपस्थितम्।
इति श्रुत्वा तु तुलसीदासः पप्रच्छ तं पुनः ॥ 6 ॥

कुतोऽत्र स्थीयते नित्यं कदा मुक्तिर्भविष्यति।
प्रेतयो निगतस्येह तवेति वद मे द्रुतम् ॥ 7 ॥

इति श्रुत्वा वचस्तस्य पुनः प्रेत उवाच तम्।
शृणु मेऽत्र स्थितेर्हेतुं यथा वाहमिहागतः ॥ 8 ॥

एकदा मम देशीयो राजा काशीमुपागतः।
तेन साकमहं लोभादिहायातोऽथ दैवतः ॥ 9 ॥

सर्प्पदष्टो[2] मृतश्चाहं ततो मां यमकिङ्कराः।
नेतुमागतवन्तस्तानेवमुक्त्वा न्यवारयत् ॥ 10 ॥

भीमो[3] विनायको देवो नायं नरकमर्हति।
अनिच्छयापि यत्काशी यात्रायां मृत्युमाप्तवान् ॥ 11 ॥

अत एव महापापी क्षुत्पिपासार्दितः सदा।
भुञ्जानो नगराद्बाह्ये कालभैरवयातनाम् ॥ 12 ॥

---

1. ह्यहम् – ख, ग।
2. द्रंष्ठो – क, ख।
3. सीपा – क।

रामभक्तस्य विप्रस्य पीत्वा शौचावशेषितम्।
अयं काशीं समासाद्य मुक्तो भवितुमर्हति ॥ 13 ॥

इत्येतत्कथितं सर्वं साधो स्वचरितं मया।
त्वं यदिच्छसि तद्ब्रूहि दत्त्वा यास्यामि सद्गतिम् ॥ 14 ॥

श्रुत्वैवं तुलसीदासस्तमुवाचातिहर्षितः।
रामं दर्शय मे ब्रह्मन् परिवारसमन्वितम् ॥ 15 ॥

इति श्रुत्वाब्रवीत्प्रेतो न शक्यं तन्ममास्ति भोः।
किन्तूपायं[1] प्रवक्ष्यामि यथा द्रक्ष्यसि राघवम् ॥ 16 ॥

हनूमन्निकटे श्रीमद्रामायणकथाक्षणे[2]।
नित्यमायाति पूर्वं यो याति पश्चात्तु सर्वतः ॥ 17 ॥

कुष्ठरोगातुरो[3] दीनो दुर्दशः साधुरूपधृक्।
हनुमन्तं विजानीहि तमेव भक्तसत्तमम् ॥ 18 ॥

यदा ततः समुत्थाय व्रजेत्त्वं तमनुजन्।
गत्वैकान्ते निपत्याथ पादौ धृत्वा प्रसादयन् ॥ 19 ॥

अथ प्रसन्नो हनुमान् त्वां वदिष्यति यद्वचः[4]।
तदेव सत्यं जानीहि भक्तराजमनोऽस्तु ते ॥ 20 ॥

इत्युक्त्वा स प्रेतस्तु काशीं गत्वाथ तारकम्।
मन्त्रं गृहीत्वा मुक्तोऽभूद्विश्वेश्वरकृपावशात् ॥ 21 ॥

अथ स तुलसीदासः स्नात्वा सम्पूज्य राघवम्।
हनूमन्निकटे पूर्वं सर्वस्माद्गतवान्मुदा ॥ 22 ॥

तत्र गत्वा स्थितः कञ्चित्कालमेवान्तरेण सः।
हनुमानागतस्तादृक् रूपं यथोदितम् ॥ 23 ॥

दृष्ट्वा तं तुलसीदासो मुमुदे निजमानसे।
अथ पौराणिकोऽभ्येत्य रामायणमुवाच सः ॥ 24 ॥

श्रोतारः प्रययुः श्रुत्वा हनूमन्तमनुत्थितः।
चचाल तुलसीदासोऽप्यनुवव्राज तं मुदा ॥ 25 ॥

---

1. कुपायमय – क।
2. श्रमे – ख।
3. वृतो – क।
4. मद्वचः – क।

गत्वैकान्तेऽथ तत्पादौ गृहीत्वा न्यपतद्भुवि।
ततः प्राह हनूमांस्तं कोऽसि गृह्णासि मां कुतः ॥ 26 ॥

ततः प्रोवाच तुलसीदासो भक्त्या प्रसादयन्।
जानेऽहं त्वां न सन्देहो ब्रह्मराक्षसवाक्यतः ॥ 27 ॥

कुरु प्रमादं देवेश हनुमन्भक्तवत्सल।
इत्युक्तो हनुमान् प्राह[1] किमिच्छसि वदस्व तत् ॥ 28 ॥

ततस्तु तुलसीदासः प्राह तं पादयोः पतन्।
रामः सपरिवारो मे दृक्पथः स्यात्कदा विभुः ॥ 29 ॥

श्रुत्वैतन्मारुतिः प्राह चित्रकूटसमीपगः।
द्रक्ष्यसि त्वं मुदा रामं परिवारसमन्वितम्[2] ॥ 30 ॥

इति श्रुत्वा वचस्तस्य तुलसीदास उत्थितः।
मुहुः प्रणम्य तं तत्र ननर्तानन्दविह्वलः ॥ 31 ॥

हनुमान् प्रययौ तस्मादेषोऽपि स्वगृहं गतः।
प्रार्थयंस्तद्दिनं नित्यं चित्रकूटं ययौ मुदा ॥ 32 ॥

एकस्मिन् दिवसे तत्र ददर्शाद्भुतमुत्तमम्।
तत्र पौरजना एत्य रामलीलां प्रकुर्वते ॥ 33 ॥

तत्रापि जित्वा पौलस्त्यं पुष्पकोपरि संस्थितम्।
सीतया लक्ष्मणेनापि भ्रातृभ्यश्चापि संयुतः ॥ 34 ॥

विभीषणेन सुग्रीव हनुमत्प्रमुखैर्वृतः।
गुहाश्रमादयोध्यायां गच्छन् दृष्टस्तु तेन वै ॥ 35 ॥

एवं दृष्ट्वा रामलीलां मोहितोऽभून्महामनाः।
रामलीलेति तुलसीदासो जानन्समागतः ॥ 36 ॥

कियद्दूरे ततस्तस्य हनुमान् साधुवेषधृक्।
मिलितस्तं तु तुलसीदासो हृष्टवदब्रवीत् ॥ 37 ॥

अहोऽपूर्वां रामलीलां दृष्ट्वेदानीमिहागतः।
चित्रकूटसमीपे तु गत्वा द्रक्ष्यामि[3] तां पुनः ॥ 38 ॥

---

1. हनुमानमाह – ख।
2. ख – मध्ये लुप्तपाठः।
3. द्रष्टुमर्हसि – ख।

इति श्रुत्वा तु हनुमान्सम्प्राह प्रहसन्निव।
अहो क्व साश्विने मासि रामलीला प्रजायते॥ 39॥

किमिदं भाषसे साधो भ्रान्तिमानिव सर्वथा।
इति श्रुत्वा तु तुलसीदासः तेन समं ययौ॥ 40॥

चित्रकूटं पुनस्तत्र सर्वान्पृच्छति सादरम्।
इदानीं रामलीलात्र स्थिता किं ब्रूत[1] साधवः॥ 41॥

इति श्रुत्वा तु तद्वाक्यमाहुः सर्वेऽतिविस्मिताः।
किमिदं भाषसे साधो विक्षिप्त इव दृश्यते॥ 42॥

रामलीलादिनं नास्ति तस्माद्गच्छ निजं गृहम्।
इति श्रुत्वा तु वचनं सस्मारोक्तं हनूमतः॥ 43॥

अहो रामेण प्रभुणा वञ्चितोऽहं दुराशयः।
यत्तदा मोहयामास मायया मम मानसम्[2]॥ 44॥

तदा लीलेति मे बुद्धिरभवद्भ्रान्तिशालिनी।
इत्युक्त्वा प्ररुरोदोच्चैस्तत्रत्यैर्निश्चितं तदा॥ 45॥

विक्षिप्तोऽयं बभूवात्र मत्वा सर्वैस्तिरस्कृतः।
समागत्य निजे गेहे भर्त्सयन्निजमानसम्॥ 46॥

त्यक्ताहारो निशायां स सुष्वापातिविमोहितः।
ददर्श तं हनूमन्तं यथाद्राक्षीद्विमानगम्॥ 47॥

अहो भाग्यं तवैवैतन्नान्यस्य जगती तले।
कस्यचिज्जायते चैवं दर्शनं सुरदुर्लभम्॥ 48॥

तस्मात् चिन्तां परित्यज्य भजतां रघुनन्दनम्।
ज्ञानपूर्वं हि साक्षात्तं द्रष्टुमर्हति कः क्षितौ॥ 49॥

इति दृष्ट्वाद्भुतं स्वप्नं समुत्थायातिहर्षितः।
सस्मार रघुनाथं तं यथादृष्टं विमानगम्॥ 50॥

स्मरामि जानकीनाथमयोध्याभिमुखं प्रभुम्।
धनुर्बाणधरं श्यामं जटावल्कलमण्डितम्॥ 51॥

---

1. साधू गता जनाः – ख। 2. माजसम् – क।

जानकीलक्ष्मणाभ्यां च सेवितं वामदक्षयोः।
सुग्रीवेण समं किञ्चिद्वदन्तं सस्मिताननम्॥ 52॥

दृष्ट्वाग्रस्थं तु भरतं पादुकं दधतं स्वकम्।
मुञ्चन्तं हर्षजं वारिनेत्राभ्यां प्रेमविह्वलम्॥ 53॥

कृताञ्जलिपुटं शान्तमानन्दैकदृशं[1] मुदा।
पश्यन्तं तं हनूमन्तं विभीषणपुरः स्थितम्॥ 54॥

अयोध्यां द्रष्टुकामैस्तैर्वानरैः परितो वृतम्।
स्तूयमानं सुरगणैः वर्षद्भिः कुसुमान्यलम्[2]॥ 55॥

इत्येवं संस्मरन्नित्यं शृण्वन् रामायणं[3] मुदा।
उवास कृतकृत्यः स काश्यां विश्वेश्वराज्ञया॥ 56॥

इति श्रीभगवद्भक्तिमाहात्म्ये तुलसीदासचरितं नाम
द्वाङ्त्रिंशदधिकशततमः सर्गः॥ 132॥

❊ ❊ ❊

त्रयस्त्रिंशदधिकशततमः सर्गः

॥ तुलसीदासचरितम्॥

एकदा तु द्विजः कश्चिदायातो द्वारि संस्थितः।
ब्रह्महत्यायुतो हत्याचिह्नं चापि समुद्वहन्॥ 1॥

मध्याह्ने तुलसीदासं समाजुहाव बुभुक्षितः।
परन्तु रामनामेति प्रोच्चचार निरन्तरम्॥ 2॥

श्रुत्वा स तुलसीदासस्तं प्राह किं त्वमिच्छसि।
इति श्रुत्वाब्रवीत्सोऽपि भोक्तुमन्नं प्रदेहि मे॥ 3॥

नार्हामि गन्तुं त्वद्गेहे ब्रह्महत्याकरो ह्यहम्।
इति श्रुत्वा वचस्तस्य तुलसीदास आह तम्॥ 4॥

अहो गता सा हत्या ते सीतारामेति भाषणात्।
ततस्त्यजेदं हत्याया लक्षणं चातिगर्हितम्॥ 5॥

---

1. दशां – ख। 2. योज्वलम् – क।
3. भाषणं मुहुः – क।

स्नात्वा जह्नुसुतायां त्वं शीघ्रमागच्छ मद्गृहे।
त्वया सहाहं भोक्ष्यामि नि:पापस्त्वं न संशय: ॥ 6 ॥

इत्युक्त: स द्विजो गङ्गास्नानं कृत्वा समागत:।
पुनस्तमाहु:[1] चित्तेन सीतारामं वदन् त्रिधा ॥ 7 ॥

तत: सम्मीलिताक्ष:सन्सीतारामेत्युवाच ह।
त्रिधा शनै: शनैर्हृष्टस्ततस्तं प्रेमपूर्वकम् ॥ 8 ॥

करे धृत्वा गृहे गत्वा सह तेनातिहर्षित:।
बुभुजे तुलसीदास: स्वगृहे पश्यतां नृणाम् ॥ 9 ॥

एवमस्य तु वृत्तान्तं शुश्रुवु: पुरवासिन:।
आगता: पण्डिता विप्रास्तमूचु: किं कृतं त्वया ॥ 10 ॥

ब्रह्महत्यावता साकं[2] स्पर्शं कुर्य्याम कर्हिचित् ॥ 11 ॥

इति श्रुत्वा वचस्तेषामुवाच प्रहसन्निव।
भवन्त: पण्डिता: सत्यं मदमात्सर्य्यसंश्रयात् ॥ 12 ॥

माहात्म्यं नैव जानन्ति राममायाविमोहिता:।
नायं सपापो हत्यावान् सीतारामेति भाषणात् ॥ 13 ॥

परीक्ष्यतामयं विप्र: सर्वैर्विश्वेश्वरान्तिके।
इति श्रुत्वाब्रवीत्कश्चिदेतद्धस्तात्तु गौर्यदि ॥ 14 ॥

ग्रासं भुञ्जीत मुदिता नि:पापोऽयं तदा द्विज:।
इति श्रुत्वा तु तुलसीदासश्चातीव हर्षित: ॥ 15 ॥

सत्यमेतन्न सन्देह: किञ्चान्यच्छृणु मे वच:।
गावं ग्रासं भक्षयित्वा नन्दिनं भक्षयाम्यहम् ॥ 16 ॥

रामेत्युच्चारणादेव यदि पूतो भवेद्द्विज:।
इति श्रुत्वा तु ते सर्वे विश्वेशान्तिकमागता: ॥ 17 ॥

नीत्वा तु तुलसीदासो ब्राह्मणं समुपागत:।
तत्र ब्राह्मणहस्तेन ग्रासं पूर्वं गवे ददौ ॥ 18 ॥

मुदिता बुभुजे सा गौर्ग्रासं सर्वं ततस्तु स:।
स्थाल्यामन्नं निधायाथ द्विज हस्ते ददौ स्वयम् ॥ 19 ॥

---

1. पुन: समाहि – ख।
2. शाकं – ख।

उवाच नन्दिनं विप्रं भोजय त्वं[1] हि भक्तितः।
स्वयं तुष्टाव तद्देवं नन्दिनं[2] परमादरात्॥ 20॥

यद्येष ब्रह्महत्यावान्सीतारामेति भाषणात्।
निष्पापोऽभूत्तदास्य त्वं हस्तेनान्नं तु भक्षय[3]॥ 21॥

इत्युक्तः स तु नन्दी वै पाषाणस्याद्भुताकृतिः।
अधः कृत्वा मुखं पात्रे योजयन् बुभुजे मुदा॥ 22॥

पश्यतां सर्वलोकानां तदद्भुतमिवाभवत्[4]।
सर्वं तद्बुभुजे चान्नं जयशब्दो महानभूत्[5]॥ 23॥

ततस्ते पण्डिताः सर्वे दृष्ट्वा तत्परमाद्भुतम्।
साधु साध्विति तुलसीदासं तुष्टुवुरादरात्॥ 24॥

विप्रो नाममाहात्म्यं ज्ञात्वा तज्जपतत्परः।
बभूव वैष्णवश्रेष्ठस्त्यक्त सर्वमनोरथः॥ 25॥

एकदा कोऽपि तद्गेहे चौर एकः समागतः।
निशि चोरयितुं भित्त्वा वेश्ममध्ये जगाम सः॥ 26॥

ददर्श पुरुषं तत्र श्यामं [6]कमललोचनम्।
धनुर्बाणधरं गेहे जाग्रतं तु मनोहरम्॥ 27॥

तं दृष्ट्वा तस्करः शीघ्रं निर्ययौ गृहतो बहिः।
निशि स्थित्वा कियत्कालं पुनरागत्य पश्यति॥ 28॥

दृष्ट्वा तं जाग्रतं[7] गेहे पुनस्तस्मात्पलायितः।
एवं गता निशा सर्वा चौरोऽपि स्वगृहं गतः॥ 29॥

एवं दिनद्वये जाते तस्करः पुनरेत्य सः।
दृष्ट्वा तं जाग्रतं चित्ते महाश्चर्यममन्यत॥ 30॥

ततश्चौरः समायातस्तुलसीदाससन्निधौ।
त्वद्गृहे यो घनश्यामो धनुर्बाणधरो युवा[8]॥ 31॥

---

1. यित्वाति – ख।
2. द्विजं – क।
3. भक्षयम् – क, ग।
4. भवेत् – क।
5. महान्यभूत् – ख।
6. कर्मन् – ख।
7. जायते – क।
8. पुमान् – क।

तं दर्शय महाभक्तमपूर्वं नृषु भूषणम्।
तद्दर्शनात्तुलसीदासः प्राह हृष्टः कदा त्वया॥ 32॥

मद्गेहे पुरुषस्तादृक् दृष्टो वद यथार्थतः।
श्रुत्वा स तुलसीदासो वाक्यं चौरोऽब्रवीच्च तम्॥ 33॥

तस्करोऽहं तव गृहे ग्रहीतुं धनमागतः।
[1]तत्रापश्यमहं गेहे जाग्रतं सुमनोहरम्॥ 34॥

धनुर्बाणधरं श्यामं ततोऽहं प्रपलायितः।
एवं दिनद्वये जाते पुनरागतवानहम्॥ 35॥

दृष्ट्वा तं जाग्रतं भीत्या प्रपालाय्य गतो गृहम्।
परन्तु दृष्टं तद्रूपं परमानन्दकारकम्॥ 36॥

ततो दर्शय तं साधो तदर्थमहमागतः।
श्रुत्वैवं तुलसीदासो ज्ञात्वा रामकृपां स्वयम्॥ 37॥

धनं समादाय ददौ [2]ब्राह्मणेभ्यो यदृच्छया।
अहो मद्धनरक्षार्थे[3] श्रीरामो मम मन्दिरे॥ 38॥

एतावन्तं श्रमं चक्रे तस्मान्नेच्छाम्यहं धनम्।
अतस्त्वमपि भोः चौर यावदिच्छसि मे धनम्॥ 39॥

तावद्गृहाण निःशङ्कः इत्युक्त्वा प्रददौ धनम्।
स चौरो नैव जग्राह तद्धनं भक्तिमानभूत्॥ 40॥

तुलसीदासशिष्योऽभूत् सीतारामौ भजन्मुदा।
परित्यज्य निजां वृत्तिं साधुसेवापरायणः॥ 41॥

गुरुभक्तिरतो नित्यं बभूवातीव वैष्णवः॥ 42॥

इति श्रीभगवद्भक्तिमाहात्म्ये तुलसीदासचरितं नाम
त्रयस्त्रिंशदधिकशततमः सर्गः॥ 133॥

❊ ❊ ❊

1. तत्र च पश्येतं – ख।
2. सर्वं – क, ख।
3. रक्ष्यार्थम् – ख, ग।

चतुस्त्रिंशदधिकशततमः सर्गः

॥ तुलसीदासचरितम् ॥

एकदा कोऽपि तत्रैव काश्यां विप्रो मृतो युवा।
तेन साकं तु तत्पत्नी प्रवेष्टुं चलितानलम् ॥ 1 ॥

मार्गे ददर्श तुलसीदासं सा प्रणनाम ह।
तस्यै सोऽप्याशिषं प्रादाद्भव [1]सौभाग्यशालिनी ॥ 2 ॥

ततः साधोमुखी तस्थौ तस्या बन्धुजनाः पुनः।
ऊचुस्ते तुलसीदासमग्रेऽयं विधवा त्वभूत् ॥ 3 ॥

सह गन्तुमिहायाति न सत्यं तद्भवद्वचः।
कथं फलिष्यति त्वस्या उप्तं बीजमिवोषरे ॥ 4 ॥

इति श्रुत्वा तु तुलसीदासस्तेषां वचः स्वयम्।
स्नात्वा गच्छन् गृहे तस्मान्मार्गादेव न्यवर्तत ॥ 5 ॥

गत्वा गङ्गातटे तस्या[2] भर्तुः शवसमीपतः।
वस्त्रेणाच्छाद्य तं प्रेतं स्वयं तत्रोपविष्टवान् ॥ 6 ॥

सीतारामौ जपन् चित्ते तद्रूपं हृदि चिन्तयन्।
प्रार्थयामास विप्रस्य जीवनं रघुनन्दनात् ॥ 7 ॥

यामैकं हृदि भजन् श्रीरामं भक्तवत्सलम्।
तस्थौ तदा तं श्रीरामो जीवयामास वै द्विजम् ॥ 8 ॥

अथोत्थाय स विप्रस्तु किं जातमिति चाब्रवीत्।
[3]आत्मीयास्ते च तं प्राहुरेष ते प्राणदः पिता ॥ 9 ॥

त्वां मृतं जीवयामास पश्यतां सर्वदेहिनाम्।
इति श्रुत्वा तु तुलसीदासं दण्डवदानमत् ॥ 10 ॥

सोऽपि तस्मात् समुत्थाय स्नात्वा गङ्गाजले क्वचित्।
ययौ स्ववेश्म तुलसीदासो रामं हृदि स्मरन् ॥ 11 ॥

सोऽपि विप्रस्तया पत्न्या साकं बन्धुसमन्वितः।
आजगाम गृहे तस्थौ सुखेन कतिवत्सरान् ॥ 12 ॥

---

1. सी – ख।
2. तस्मात् – ख, ग।
3. आत्मिया – क, आत्मेया – ख।

एवं प्रभावस्तुलसीदासोऽभूद्भक्तसत्तमः[1]।
न वेद[2] स किमप्यन्यत् श्रीरामचरणाम्बुजात्॥ 13॥

तस्य प्रभावं श्रुत्वैवं दिल्लीशो द्रष्टुमानसः।
सत्कारेण समानिन्ये स्वगृहे संस्कृतस्थले॥ 14॥

स तं तत्रागतं ज्ञात्वा स्वयमागत्य भूपतिः।
प्रणम्य स्वासनादग्रे दिल्लीशश्चोपवेशयत्॥ 15॥

अथाहं तुलसीदासं भूपतिर्दैवयोगतः।
श्रूयते तव सामर्थ्यमलौकिकमिहास्ति भोः॥ 16॥

तद्दर्शय चमत्कारं विदधस्व महामते।
इति श्रुत्वा स तुलसीदासस्तं प्राह सस्मितम्॥ 17॥

न मे सामर्थ्यमस्तीह न च तत्कारवाण्यम्।
राममेकं तु जानामि सत्यमेतद्ब्रवीमि ते॥ 18॥

इति तस्य वचः श्रुत्वा दिल्लीशश्चापि कोपतः।
भृत्यानुवाच नीत्त्वेमं निरुध्य[3] स्थापय क्वचित्॥ 19॥

यावदेतस्य रामो मे चमत्कारं न दर्शयेत्।
तावन्नायं बहिकार्य्यो भवद्भिर्मम शासनात्॥ 20॥

इति श्रुत्वा तु तुलसीदासं ते राजसेवकाः।
नीत्वा निरोधयामासुरेकान्तभवने खलाः॥ 21॥

ततः स तुलसीदासः सस्मार रघुनन्दनम्।
हनूमन्तं तत्पुरस्तात् तुष्टाव भक्तरक्षकम्॥ 22॥

धनुर्बाणधरो वीरः सीतालक्ष्मणसंयुतः।
रामचन्द्रः सहायो मे किं करिष्यत्ययं मम॥ 23॥

हनूमन्नञ्जनीसूनो वायुपुत्र महाबल।
सर्वसङ्कष्टहरण विपत्तौ शरणं भव॥ 24॥

सीताशोकार्त्तिशमन समुद्रोल्लङ्घनक्षमः।
लङ्काविध्वंसनकर विपत्तौ शरणं भव॥ 25॥

---

1. वत्सलः – ख, ग।
2. जाने – ख।
3. मतिरुध्यस्थाय – क।

महालाङ्गलविक्षेप निहताखिलराक्षस।
सिंहनाद हतामित्र विपत्तौ शरणं भव॥ 26॥

अक्षवक्षो विनिश्छेदकुलिशाग्रनखाञ्चितः।
श्रीरामहृदयानन्द विपतौ शरणं भव॥ 27॥

लक्ष्मणे निहते भूमौ नीत्वा द्रोणाचलं द्रु तम्।
ययोज्जीवितवानद्य तां शक्तिं प्रकटीकुरु॥ 28॥

येन सङ्केश्वरो वीरो निःशङ्कं विजितास्त्वया।
दुर्निरीक्ष्योऽपि देवानां तद्बलं दर्शयाधुना॥ 29॥

यया लङ्कां प्रविश्य त्वं ज्ञातवान् जानकीं स्वयम्।
रावणान्तःपुरेऽत्युग्रे तां बुद्धिं प्रकटीकुरु॥ 30॥

रुद्रावतार भक्तार्तिविमोचन महाभुज।
कपिराज प्रपन्नस्त्वां शरणं भव रक्ष माम्॥ 31॥

इत्यष्टकं हनुमतो यः पठेत् श्रद्धयान्वितः।
सर्वकष्टविनिर्मुक्तो लभते वाञ्छितं फलम्॥ 32॥

एवं स्तुवति तुलसीदासेन श्रीहनुमान् स्वयम्।
कोटिशो[1] वानरान्नीत्वा दिल्लीग्राममुपागतः॥ 33॥

आज्ञापयच्च तान्सर्वान्वारयस्व पुरीमिमाम्।
कुदर्थो कुरुताद्यैव राजानं राजविर्ततम्॥ 34॥

इति तद्वचनं श्रुत्वा वानरा दुद्रुवुस्तदा।
इन्द्रप्रस्थे महाग्रामे समुत्प्लुत्य गृहे गृहे॥ 35॥

मुष्टिभिश्चैव लाङ्गूलैर्दन्तैः पादतलैरपि।
ताडयित्वा जनान्सर्वानवभञ्जुस्ते[2] गृहानपि॥ 36॥

इष्टकाभिश्च पाषाणैर्दण्डैर्धूलिभिरेव च।
उपहत्य नृपावासमाजग्मु राजमन्दिरम्॥ 37॥

दृष्ट्वा दिल्लीश्वरो राजा सहसैवोत्थितो भयात्।
किमिदं किमिदं चेति भाषमाणो निजान् जनान्[3]॥ 38॥

1. लक्ष्मणे – क।
2. भुंजु – ख।
3. तान् – क।

अथ भृत्याः समायाता रक्षितुं तं नृपं बलात्।
एकैकस्य[1] तु भृत्यस्य शतशो वानरास्तदा॥ 39॥

लग्ना देहे विनिष्कास्य दन्तानतिभयङ्करान्।
धृत्वा हस्तौ क्षिपन्ति स्म केचिद्भृत्यान् धरातले[2]॥ 40॥

कस्यचित्करतः खड्गं नीत्वा वामेन पाणिना।
धृत्वा तं ताडयामास च पेटाभिर्मुखे कपिः॥ 41॥

एवं गृहीत्वा कतिधा भ्रामयित्वा ममस्तले।
चिक्षेप राजनिकटे दूरे कोऽपि च वानरः॥ 42॥

एवं क्षणार्द्धतः कृत्वा भृत्यान्सर्वान्मृतानिव।
दिल्लीश्वरं सपत्नीकं जगृहुस्तेऽथ वानराः॥ 43॥

गृहीत्वा पाणिना पाणिं भ्रामयन् परितो निजम्।
संस्थाप्य कतिचित्कालं पुनर्नर्तयति स्म तम्॥ 44॥

केचित्कर्णौ मृशन्ति स्म हनुंश्मश्रु च केचन।
मुष्टिं बध्वातिवेगेनहं तु मायावी कश्चन॥ 45॥

दृष्ट्वैवं दुर्दशां भूपो मर्त्तुकाम इवाभवत्।
परन्तु न मृतः कोऽपि तस्मिन्नपि महाभये॥ 46॥

प्रायस्तु तुलसीदासे [3]अभूद्भक्तिर्महीपतेः।
पश्चाद्दुर्विनयं ज्ञात्वा भयं शिक्षामदात्प्रभुः॥ 47॥

तत्रापि परमाश्चर्यं सीतारामेति वादिनः।
निजघ्नुर्नैतान्सर्वे वानरा अतिविभीषणाः॥ 48॥

एवं दिल्लीश्वरं ज्ञात्वा मृतकल्पं तु मन्त्रिणः।
रामेत्युच्चैर्वदन्तस्ते नृपसन्निधिमागताः॥ 49॥

तमुचुर्भूपते रक्ष राज्यमात्मानमेव च।
श्रुत्वास्माकं वचः पश्य कुरु सर्वं हितं विभो॥ 50॥

अयं यस्तुलसीदासो धृतः कारागृहे त्वया।
तस्य यो रामचन्द्रोऽस्ति स्वामी च जगदीश्वरः॥ 51॥

तस्य दूतोऽस्ति हनुमान् तस्येयं वानरी चमूः।
भक्तापमानादत्रेत्थं कदर्थयति नः प्रभोः॥ 52॥

---

1. काथ–ख। 2. ख मध्ये लुप्तपाठः।
3. दासोदासीद् – क, ख ।

तस्माद्गले कुठारं तु बध्वा रामेति चासकृत्।
वदन्नत्र[1] प्रयाहि त्वं प्रणिपत्य प्रसादय॥ 53॥

इत्युक्तः स तु तत्कालं सपत्नीकोऽतिविह्वलः।
बध्वा कुठारं रामेति वदन् तत्र गतो नृपः॥ 54॥

नत्वा स तुलसीदासं कृताञ्जलिपुटो नृपः।
क्षमस्वेति मुहुः प्राह ततस्तमपि सोऽब्रवीत्॥ 55॥

राजन्पश्य चमत्कारं रामस्यैव न संशयः।
न मे किञ्चिदिदं सत्यं तवाग्रे कथयाम्यहम्॥ 56॥

इत्युक्तः स पुनः पादौ सपत्नीको निपत्य च।
प्रसाद्य तुलसीदासं [2]तत्पश्चात्स न्यवर्तत॥ 57॥

ततः स तुलसीदासो दृष्ट्वा वानरवाहिनीम्।
हर्षान्ननर्त तुष्टाव ननाम च मुहुर्मुहुः॥ 58॥

ततो ध्यात्वा हनूमन्तं परिवारसमन्वितम्।
सम्पूज्य विससर्जासौ[3] ततस्ते वानराद्भुतम्॥ 59॥

प्रासादाद्ग्रामतो गेहान्निर्गत्य बहिरागताः।
उत्प्लुप्लुत्य जग्मुस्ते दिशोदश यदृच्छया॥ 60॥

ततः स तुलसीदासश्चलितो निजमन्दिरम्।
दिल्लीश्वरः समागत्य पादयोः पतितो भुवि॥ 61॥

धनं दत्त्वाब्रवीद्वाक्यं क्षमस्वाविनयं मम।
किं कुर्वन्नत्र वत्स्यामि कथं तत्कृपया वद॥ 62॥

इति श्रुत्वा स तुलसीदासश्चातिदयान्वितः।
गेहमध्ये क्वचित्स्थानं कल्पयित्वा प्रभोर्मम॥ 63॥

साधुसेवासमायुक्तो वस भूप सुखी भव।
इत्युक्त्वा तुलसीदासो न जग्राहाथ तद्धनम्॥ 64॥

वृन्दावनं दिदृक्षः सन्नायातस्तेन मार्गतः।
गत्वा वृन्दावने तत्र नाभादासं ददर्श ह॥ 65॥

---

1. भक्तायमानायदत्रेत्थं – ख।
2. तत्पृष्टेमन्यलोयत् – ख, तत्पृष्टे संत्यलीयत् – क।
3. जीणौ – ख।

भक्तोऽयमिति मत्वा तान्न मच्चक्रे पुरा स्वयम्।
नाभादासः ततो ज्ञात्वा दम्भाहङ्कारवर्जितम्॥ 66॥

प्रणम्य तुलसीदासं तुष्टावातिमुदान्वितः।
अथागत्य च तत्रैव वैष्णवास्तु दिदृक्षवः॥ 67॥

तमूचुस्तुलसीदासं पश्येह मुरलीधरम्।
श्रुत्वैवमुत्थितः सोऽपि वदन् कुत्रास्ति मे प्रभुः॥ 68॥

अथ तं मन्दिरे नीत्वा गताः सर्वे तु वैष्णवाः।
तन्मध्ये कोऽप्युवाचोच्चैर्जिघृक्षुस्तत्परीक्षणम्॥ 69॥

[1]स्वपूज्यदेवं परित्यज्य योऽन्यदेवं नमस्यति।
लभते सोऽत्यघं[2] मूर्खो योषव्यभिचारिणी॥ 70॥

इति श्रुत्वा स तुलसीदासस्तत् कालमुक्तवान्।
दृष्ट्वा गोपालमूर्तिं तं संस्मृत्वा रघुनन्दनम्॥ 71॥

अहो सम्यगिदं रूपं विधायात्र विराजते।
धनुर्बाणधरश्चेत्स्याः तदैव तुलसी नमेत्॥ 72॥

इति श्रुत्वा तदैवाभूत्वंशीबाणस्वरूपिणी।
वेत्रं चापि धनुर्जातमद्भुतं पश्यतां नृणाम्॥ 73॥

तदा सर्वेऽति सन्तुष्टाः साधुसाध्वितिवादिनः।
तुष्टुवुस्तुलसीदासं प्रणेमुस्तं मुहुर्मुहुः॥ 74॥

पुनः कोऽप्याह तत्रैकः कृष्णस्तु भगवान्स्वयम्।
रामादयो हरेरंशाः श्रुत्वैतत्तुलसी मुदा॥ 75॥

ननर्ताहो महद्भाग्यं महद्भाग्यं न संशयः।
यदेष पूर्णो भक्तानां कृपया शोभते हृदि॥ 76॥

एवं दृष्ट्वा दृढां भक्तिं सर्वे ते वैष्णवा जनाः।
नमन्तस्तुलसीदासं तुष्टुवुर्परया मुदा॥ 77॥

एवं स तुलसीदासो लोकोद्धारणहेतवे।
ज्ञातो वाल्मीकिरेवासौ पुनरस्मिन्महीतले॥ 78॥

---

1. स्वं पृदेनं – ख, स्वं वृंदेव – क। 2. राघवं – क, ख।

मन्ये वाल्मीकिरेवासौ[1] पुनर्जातो महीतले।
श्रीरामचरितं गायन्नतृप्तोऽभूत्[2] पुरा मुनिः ॥ 79 ॥

अतो विस्तरतः कृत्वा भाषयाम्येत्य भूतले।
रामायणस्य नद्यां स जीवमात्रमतारवत् ॥ 80 ॥

तस्माच्चैतादृशो भक्तो न भूतो न भविष्यति।
नमस्करोम्यहं तस्मै प्रसन्नोऽस्तु सदा मम ॥ 81 ॥

इति श्रीभगवद्भक्तिमाहात्म्ये तुलसीदासचरितं नाम
चतुस्त्रिंशदधिकशततमः सर्गः ॥ 134 ॥

❊ ❊ ❊

पञ्चत्रिंशदधिकशततमः सर्गः

॥ भक्तसमुदायकथनम् ॥

मानदासो महाभक्तः श्रीरामचरितं स्वयम्।
अनुकुर्वन् ययौ धाम श्रीरामस्य महामनाः ॥ 1 ॥

वल्लभाचार्यपुत्रस्य विट्ठलस्वामिनः सुताः।
सप्तपूर्वोदितास्तत्र समस्थाननिवासिनः ॥ 2 ॥

श्रीमद्गोकुलनाथस्य कथां वक्ष्यामि भक्तिदाम्।
महाभागवतः सोऽभूत्प्रसिद्धोऽद्यापि भूतले ॥ 3 ॥

नाथद्वारेति विख्याता पुरी परमपावनी।
तत्रासीन्नाथनामा तत्पूजया भक्तसत्तम ॥ 4 ॥

तत्र श्रीनाथमूर्तिं तु मन्दिराद्बाह्यतो जनाः।
जहसुर्न च [3]तत्रासीत्किमपि व्यवधायकम् ॥ 5 ॥

अथैकस्तत्र चाण्डालः कांधाख्यो मलशोधकः।
बाह्याद्ददर्श तां मूर्तिं प्रातरारार्तिकक्षणे ॥ 6 ॥

दृष्ट्वा विमोहितस्तस्थौ मूर्तिं [4]पश्यन् चिराय सः।
न चचाल स्वयं केनाप्याहूतो निर्ययौ ततः ॥ 7 ॥

---

1. मीकेवासौ – क, ख।
2. तृसोव – ख।
3. तत्र श्रीनाथ – ख, ग।
4. प्रातरारार्तिकक्षणे – ख।

परन्तु संस्मरन्मूर्तिं गृहकर्म चकार सः।
एवं प्रत्यहमुत्थाय प्रातरारार्तिकक्षणे॥ 8॥

गत्वा तत्र तु तां नाथमूर्तिं पश्यन् स्थितोऽभवत्।
एवं बहुदिने याते दृष्टः केनापि साधुना॥ 9॥

श्रीमद्गोकुलनाथाख्य स्वामिने कथितं तु तत्।
भित्तिर्देयान्तरा नोचेच्चाण्डालोऽपि निरीक्षते[1]॥ 10॥

इत्युक्तः सोऽपि तं प्राह कारयाद्यैवमाचिरम्।
ततो भृत्यानुपाहूय निर्म्ममे भित्तिमुत्तमाम्॥ 11॥

अथ प्रातः समागत्य चाण्डालो नैव दृष्टवान्।
महाशोकार्णवे मग्नो दुःखी भूमौ निविष्टवान्॥ 12॥

ददर्श पुनरुत्थाय नापश्यत् संस्थितस्तदा।
एवं स दुःखितो भूत्वा त्यक्त्वा कर्म निजं पुनः॥ 13॥

[2]कार्यक्रियावियोगेन कृपणस्तु धनक्षये।
तस्य पुत्रोऽपि तत्याज तथा दुःखमवाप्तवान्॥ 14॥

आगत्य स्वगृहं सोऽथ शिश्ये रोगार्त्तवत्क्वचित्।
न भुक्तवान् दिवारात्रौ मूर्तिविश्लेषदुःखितः॥ 15॥

ततः स भगवान् देवः स्वप्ने प्राह दयान्वितः।
श्रीमद्गोकुलनाथं तां भित्तिं परिहर द्रुतम्॥ 16॥

योऽसौ कान्धाख्य चाण्डालः सोऽतीव मम च प्रियः।
मद्दर्शनं विना सोऽद्य मरणे कृतनिश्चयः॥ 17॥

तस्माद्यथा स पश्येन्मां तथा कुरु मदाज्ञया।
इत्युक्त्वा तत्र तं कान्धं प्राह वैष्णवरूपधृक्॥ 18॥

अहो भित्तिस्तु पतिता गत्वा पश्य हरिं मुदा।
इति दृष्ट्वा तदोत्थाय कान्धस्तत्रागतो निशि॥ 19॥

सम्मुखे संस्थितस्तस्थौ पूजकः स्वाम्यपि स्वयम्।
निपात्य[3] भित्तिं तत्कालं दूरी चक्रेऽतिविस्मितः॥ 20॥

---

1. निरीक्ष्यते – क, ख।
2. काम प्रिया – ख।
3. उत्थाय – क, ख।

अथ प्रातरभूद् द्वारकपाटोद्घाटने कृते।
कान्थं सम्मुखतो दृष्ट्वा किं करोष्य मां वद ॥ 21 ॥

इति श्रुत्वा ततः कान्धाः सर्वं स्वाचरितं जगौ।
श्रुत्वा स्मृत्वा स्वप्नवृत्तं तस्यां परितुतोष सः ॥ 22 ॥

प्राह त्वं त्यज स्वां वृतिं भोजनं ते ददाम्यहम्।
द्वारसम्मार्जनं त्वेकं कुर्वन्नत्र सुखी भव ॥ 23 ॥

इत्युक्तः सोऽपि कान्धाख्यः तं प्रणम्य मुहुर्मुहुः।
त्यक्त्वा गृहादिकं तत्र स्थितो भक्तरोऽभवत् ॥ 24 ॥

वनमाली बभूवैवं भक्तः सर्वसुहृत्तमः।
मिश्रोपनामकश्चैव तथा नारायणोऽभवत् ॥ 25 ॥

एवं राघवदासोऽभूद्गुरुः कृष्णैकरूपधृक्।
योगानन्दस्य शिष्येषु वामनोऽतिविरक्तिमान् ॥ 26 ॥

लषी जाङ्गलदेशेऽभूत्परशुरामोऽतिभक्तिमान्।
श्रीभटकहरिव्यासौ यथानुसरणक्षमौ ॥ 27 ॥

विरक्तो हृदि बाह्यं तु [1]सुराज्यसुखमन्वभूत्।
शिविका हस्ति वाज्यन्न धनं नृत्यादि सम्भवम् ॥ 28 ॥

एवमेक दिने कोऽपि तं परीक्षितुमागतः।
परशुराममुवाचासौ किमेवं कुरुषे वृथा ॥ 29 ॥

त्यक्त्वा सर्वं समुतिष्ठ समागच्छ मया सह।
एतावदेव श्रुत्वा स तत्कालं चोत्थितोऽभवत् ॥ 30 ॥

त्यक्त्वा वस्त्राण्यलङ्कारं तेन साकं ययौ[2] मुदा।
शिष्यास्तु चलिताः साकं[3] तान्निरुध्य स्वयं गतः ॥ 31 ॥

अथ गत्वा कियद्दूरे क्वचित्पर्वतसानुनि।
उपविष्टः परशुरामस्तद्धूर्त[4] निकटे सुखी ॥ 32 ॥

अथान्तरे समायातो वैश्यो धनसमृद्धिमान्।
दृष्ट्वा तं परशुरामं तु प्रणम्य तौ तु भक्तितः ॥ 33 ॥

---

1. सुराजभं मुखम – ख।
2. पपौ – ख।
3. शकं – ख।
4. स्तथा – ख, ग।

शय्यामागत्य ज्यानि तेनानाय्य च तत्कुटीम्।
दत्त्वोवाचात्र देह्याज्ञां गृहं निर्माय याम्यहम्॥ 34॥

इति श्रुत्वा परशुरामदासस्तं वैश्यमब्रवीत्।
इमं पृच्छ महाभक्तं यस्याधीनोऽस्म्यहं वणिक्॥ 35॥

इति श्रुत्वा स वै धूर्तः परशुरामपदाम्बुजम्।
निपत्य प्राञ्जलिर्भूत्वा समस्तौषीत्क्षमापयन्॥ 36॥

पुनः स्वधाम चागत्य परशुरामस्तु पूर्ववत्।
चित्ते हरिमयो भूत्वा वाळ्य कर्म चकार सः॥ 37॥

इति श्रीभगवद्भक्तिमाहात्म्ये भक्तसमुदायकथनं नाम पञ्चत्रिंशदधिकशततमः सर्गः॥ 135॥

❊ ❊ ❊

षट्त्रिंशदधिकशततमः सर्गः

॥ गदाधरदासचरितम्॥

आन्ध्रप्रदेशे बभूवैको गदाधर इति श्रुतः।
भट्टोपनामको जात्या तैलङ्गश्चातिभक्तिमान्॥ 1॥

स स्वगेहे स्थितो नित्यं राधाकृष्णौ भजन् द्विजः।
श्रीमद्भागवतं नित्यं ददर्शैकान्तसंस्थितः॥ 2॥

एकदा स द्विजः किञ्चिद्भाषया निर्ममे पदम्।
श्यामरागेण रक्तोऽहमित्यर्थकमनुत्तमम्॥ 3॥

तत्पदं समुपागत्य कश्चिद्वृन्दावने जगौ।
जीवगोस्वामिनिकटे श्रुतं तेन महात्मना॥ 4॥

कस्येदमिति पप्रच्छ गायकं सोऽब्रवीच्च तम्।
आन्ध्रदेशेऽस्ति तैलङ्गो गदाधर इति द्विजः॥ 5॥

तेनेदं निर्मितं पद्यं महाभक्तिमता सता।
इति श्रुत्वा तदा तेन जीवगोस्वामिना पुनः॥ 6॥

मथुरां रञ्जनस्थलीमनागत्य कथं पुनः।
श्यामरागेण रक्तोऽभूदित्यर्थकपदं शुभम्॥ 7॥

निर्माय शिष्यद्वितयं प्रेषयामास तं प्रति।
श्रीगदाधरभट्टाख्यं गत्वा शिष्यद्वयं ततः ॥ 8 ॥

ग्रामाद्बाह्ये स्थितः कूपनिकटे स गदाधरः।
पप्रच्छतुस्तमेवासौ [1]क्वास्ते भट्टो गदाधरः ॥ 9 ॥

ततो गदाधरः प्राह कोऽसि कस्मादिहागतः।
इति श्रुत्वा वचस्तस्य प्राहतुस्तौ कृताञ्जली ॥ 10 ॥

जीवस्वामि [2]सकाशाच्छ्रीमद्वृन्दावनादुभौ।
पत्रं दातुमिहायातौ श्रीगदाधरशर्मणे ॥ 11 ॥

श्रुत्वैतद्वचनं भट्टः कूपप्रान्ते पपात ह।
मूर्च्छामवाप घटिकाद्वयं तस्थौ ततः स्वयम् ॥ 12 ॥

उत्थाय पत्रं तद्धस्तान्नीत्वा शिरसि चार्पयत्।
प्रतस्थे सहसा ताभ्यां तत्कालं मथुरां प्रति ॥ 13 ॥

महानन्दे निमग्नः स समायातोऽतिहर्षितः।
प्राप्य वृन्दावनं भक्त्या जीवगोस्वामिकादिकान् ॥ 14 ॥

नमस्कृत्य ततस्तैश्च सहैवास निरन्तरम्।
पुराणकथया नित्यं दिवारात्रमतन्द्रितः[3] ॥ 15 ॥

एकदा [4]धूर्तराजो यस्तद्ग्रामनिकटे स्थितः।
तत्र कल्याणसिंहेति नाम्ना क्षत्रियवंशजः ॥ 16 ॥

गृहस्थो भक्तिमानासीत्समागत्य निरन्तरम्।
श्रीगदाधरभट्टस्य पुराणं यः शृणोति सः ॥ 17 ॥

शृण्वन् भागवतं दिव्यं कथामस्यावधार्य[5] यः।
भूत्वा विरक्तः संसारं न वेद सुखदुःखदम् ॥ 18 ॥

पत्नी तस्य गृहे साध्वी युवती कामपीडिता।
न तां भजते कल्याणसिंहश्चित्ते विरक्तिमान् ॥ 19 ॥

---

1. मुक्तासि भट्टो – क।
2. संकाशा तु श्री – क, ख।
3. नित्ये दिवारात्रमतंद्रितः – ख।
4. धौह – क, ख ।
5. थ सभूयः – ख।

एकदा सा तु कल्याणसिंहपत्नी विचक्षणा।
ददर्श गर्भिणीं काञ्चिदनाथां भिक्षुकीं स्वयम्॥ 20॥

एकान्ते तां समाहूय दत्त्वा मुद्राश्च विंशतीः।
प्राह वृन्दावने गत्वा श्रीगदाधरभट्टकम्॥ 21॥

ब्रूहि स्वोक्त्या पुराणस्य समये भयवर्जिता।
अहो तवायं गर्भो मे नोचेत्कस्येति तद्वद॥ 22॥

तथैव गत्वा सा तत्र भट्टं प्रोवाच भिक्षुकी।
तवैव गर्भो मेऽस्तीति नोचेत्कस्येति तद्वद॥ 23॥

इति श्रुत्वा तदा सर्वे तस्थौ तूष्णीमधोमुखाः।
श्रीगदाधरभट्टस्तु प्रहृष्टे नैव चेतसा॥ 24॥

तामाह मातरागच्छ तिष्ठात्र कथयाम्यहम्।
अध्यायान्ते न सन्देहः त्वामप्यत्र भजाम्यहम्॥ 25॥

अथ सर्वे तदा तां तु हन्तुं कृतधियोऽभवन्।
स्त्रियं ज्ञात्वा ततः सर्वे स्वयं मर्तुं व्यवस्थिताः॥ 26॥

एतावानस्य महतः कलङ्कोऽभूद्वयं पुनः।
कथं जीवाम इत्येवं भाषमाणाः परस्परम्॥ 27॥

राधावल्लभनामासीत्तन्मध्ये कोऽपि वैष्णवः।
स उत्थाय द्रुतं तां तु भर्त्सयन्निदमब्रवीत्॥ 28॥

गृहीत्वा तु महादण्डं दण्डे सत्यं वदाधुना।
एवं वदसि केनोक्ता नोचेत्त्वां हन्मि पश्यताम्॥ 29॥

इत्युक्त्वा दण्डमुद्यम्य[1] गतस्तस्याः[2] समीपतः।
सा भयादाह तत्सर्वं कल्याणस्त्रीकृतं त्विदम्॥ 30॥

पश्येमां विंशतिं मुद्रां दत्त्वोवाचाथ मां प्रति।
श्रीगदाधरभट्टं त्वमेवं वद ममाज्ञया॥ 31॥

एवं श्रुत्वा तु ते सर्वे हर्षिता अभवंस्तदा।
कल्याणः स्वस्त्रियं हन्तुं धृतासिर्हृद्यतिष्ठत॥ 32॥

---

1. उद्यस्य – ख। 2. तत्स – ख, क।

श्रीगदाधरभट्टस्तं वारयामास यत्नतः।
अन्यामुवाच तस्यास्तु[1] वचनं न भविष्यति॥ 33॥

एवं तु मनोजयस्तस्य यदेतावति चागते।
कलङ्के न मनः किञ्चिच्चचालास्य महात्मनः॥ 34॥

एकदा बहुभिः शिष्यैः सहितः कोऽपि वैष्णवः।
कथायामागतः श्रोतुं तदा तस्याश्रुनापतत्॥ 35॥

अन्येषां नेत्रतोऽश्रूणि निपेतुर्भक्तिभावतः।
तदा तेनापि भक्तेन द्वितीयदिवसे पुनः॥ 36॥

आगत्य मारिचं चूर्णं नीत्वा नेत्रे ददौ स्वयम्।
तदाश्रु पातयामासेत्येवं दृष्ट्वा तु कश्चन॥ 37॥

तस्मिन्समुत्थिते भट्टं प्राह श्रुत्वा तु तत्क्षणात्।
जहसुर्वैष्णवाः सर्वे भट्टस्तत्राब्रवीच्च तान्॥ 38॥

न भवन्तो हसन्त्वत्र भक्तोऽयं नात्र संशयः।
ममापि प्रेमजाश्रूणि निपतंत्विति वाञ्छति॥ 39॥

एवं [2]हास्यास्पदेतस्य न हासस्तोकमप्यभूत्।
तानेवं वैष्णवान् सम्यक् बोधयामास यत्नतः॥ 40॥

एकदा तस्य भवने निशि चौरः समागतः।
गृहस्थं सकलं वस्तु बद्धोत्थापयितुं त्वरन्॥ 41॥

नोत्तस्थो[3] स महाभारो दृष्ट्वा श्रीमद्गदाधरः।
आगत्योत्थाप्य शिरसि चौरस्य धृतवान् स्वयम्[4]॥ 42॥

चौरस्य हृदये जातं मदीयोऽयमिति स्फुटम्।
प्राह कोऽसीति शनकैः श्रुत्वा भट्टोऽब्रवीद्वचः॥ 43॥

कोऽप्यहं तु भवानेतद् गृहीत्वा गच्छतु द्रुतम्।
प्रातः काल इवाभाति दृष्ट्वान्यानप्यधर्पयत्॥ 44॥

इति श्रुत्वा वचश्चौरो ज्ञात्वा भट्टं गदाधरम्।
धनं त्यक्त्वा पपातास्य पादयोरतिभक्तितः॥ 45॥

---

1. किंचास्या – ख, ग।
2. हासा – ख।
3. जस्थौ – ख।
4. स्वप्नम् – ख।

त्यक्त्वा चौर्य्यं तस्य शिष्यो भूत्वा भक्तो बभूव सः।
अत्रापि नैव लोभोऽभूद्धनाय हरणक्षणे[1] ॥ 46 ॥

एकदा कोऽपि धनिको धनं दातुमुपागतः।
स्वयं तु भगवद्गेहे भूमिं लिंपन् स्थितास्तदा ॥ 47 ॥

आहैकस्तु तदा शिष्यो दृष्ट्वा तं धनिकं तथा[2]।
त्यक्त्वोपविश शय्यायां द्रष्टुमायाति कश्चन ॥ 48 ॥

श्रुत्वा स तमुवाचाथ किं वदस्यतिमूर्खवत्।
यस्य दासोऽस्मि तद्दास्यं करोम्यत्र हितं निजम् ॥ 49 ॥

इत्युक्त्वा स तथैवासीद् धनिकश्च समागतः।
दत्त्वा धनं प्रणम्याह लिम्पन्तं महाशयम् ॥ 50 ॥

अहं लिम्पामि नाथस्त्वं त्यजेति च निशम्य[3] सः।
प्रोवाच सत्यमेवैतत्किन्तु मद्वचनं शृणु ॥ 51 ॥

त्वल्लेपनेन किं मे स्यादहं दासोऽस्मि यस्य सः।
मद्दास्यं मनुते किं स्यात्तव लेपनतो वद ॥ 52 ॥

यो भक्तः कुरुते भक्तिं पूजोपकरणादिकम्।
सम्पादयति शिष्येण भृत्यैर्वान्यैश्च सोऽधमः ॥ 53 ॥

इति श्रुत्वा ततः सोऽपि परितुष्टो ययौ गृहम्।
श्रीगदाधरभट्टस्तु तस्थावानन्दपूर्वकम् ॥ 54 ॥

अत्रापि तस्य नैवाभूत्सङ्कोचो हृदये नृणाम्।
प्रतिष्ठा वा जिघृक्षा वा दम्भो वा नास्पृशच्च तम् ॥ 55 ॥

इति श्रीभगवद्भक्तिमाहात्म्ये गदाधरदासचरितं नाम
षट्त्रिंशदधिकशततमः सर्गः ॥ 136 ॥

❊ ❊ ❊

---

1. क्षये – क।
2. जनम् – ख, ग।
3. विरराम सः – ख।

सप्तत्रिंशदधिकशततमः सर्गः

॥ नारायणगदाधरचरितम् ॥

एवं चतुर्मुखो भक्तश्चामुण्डश्च तथापरः ।
चण्डदासो बभूवान्यो महाभक्ता इमे भुवि ॥ 1 ॥

करमानन्दनामैकः शालग्रामशिलां वहन् ।
गले बध्वा चचारोर्वीं वृन्दावनमुपागतः ॥ 2 ॥

वेत्रं[1] त्रिपादिकां नीत्वा सर्वत्र पर्यटन् स्थितः ।
यत्र स्थातुं मनश्चक्रे तत्र तस्योपरि प्रभुम् ॥ 3 ॥

शालग्रामं स्थापयित्वा स्वयं तस्थौ निरन्तरम् ।
एकत्र त्रिपादिकां तां विस्मृत्यान्यत्र चागतः ॥ 4 ॥

तत्र स्थातुं मनश्चक्रे तामदृष्ट्वाथ चिन्तितः[2] ।
चलितः पुनरुत्थाय यत एवागतस्ततः ॥ 5 ॥

अथान्तरे तु भगवान् सोऽयं वैष्णवरूपधृक् ।
तां त्रिपादीं समानीय[3] ददौ तस्मै स हर्षितः ॥ 6 ॥

उपवेश्य प्रभुं पश्चात्स्वयं तत्रोपविष्टवान् ।
नोचेदतिश्रमात्साधुर्म्रियेतात्र न संशयः ॥ 7 ॥

एवं कोल्हस्तथाल्हश्च भ्रातरौ पश्चिमे स्थितौ ।
कायस्थकुलसम्भूतौ तयोर्वक्ष्ये कथां शुभाम् ॥ 8 ॥

ज्येष्ठो भक्तः स्थितः साधुसेवायां निरतः सदा ।
कनिष्ठो मद्यमांसादिभोक्ता भ्रातुश्च भक्तिमान् ॥ 9 ॥

कोल्हो द्वारवतीं यातः कनिष्ठोऽपि ययौ सह ।
गत्वा तत्र हरेरग्रे रणच्छोरस्य च प्रभोः ॥ 10 ॥

[4]जगौ स्वकृतपद्यानि ज्येष्ठो भक्तिसमन्वितः ।
ततोऽल्होऽपि च जगौ स्वकृतं [5]भक्तिसंयुतः ॥ 11 ॥

---

1. नेत्रं – क।
2. चिन्तय – ख।
3. समादाय – ख, ग।
4. ययौ – ख।
5. किञ्चित्स्वकृतंत्र पयान्वितः – ख, क।

रणच्छोरस्ततस्तुष्टो मालां स्वगलतस्तदा[1]।
अल्हस्य च गलेऽकस्मात्प्रददौ [2]वायुचालिताम्॥ 12 ॥

अल्हो नत्वा हरिं भक्त्या प्राहायमग्रजो[3] मम।
तव भक्तो महाराज प्रसीदास्योपरि प्रभो॥ 13 ॥

इति दृष्ट्वापमानं स कोल्हश्चातीव लज्जितः।
निर्मज्य वारिधौ मर्तुं चलितः क्रोधमूर्च्छितः॥ 14 ॥

अहोऽस्मै पापिने दत्ता माला मेनैव किञ्चन।
तस्मान्मरणमेवात्र वरमेव मना ययौ॥ 15 ॥

सर्वत्र जानुं दघ्नं तु जलमासीन्महोदधेः।
न मग्नो लक्षितस्तं तु दुःखितं भगवान्हरिः॥ 16 ॥

भक्तरूपः समादाय निनाय निजमन्दिरे।
सन्तोष्य बहुभिर्मन्नैर्भोजनाय न्यवेशयत्॥ 17 ॥

तत्र भोक्तुं ददौ पत्रं द्वितीयं भक्तरूपधृक्।
कोल्हः पप्रच्छ कस्येदमल्हस्येत्यब्रवीत्स तम्॥ 18 ॥

पुनः सुदुःखितः प्राह नाहं भोक्ष्ये ततो हरिः।
भक्तरूपधरः प्राह कोल्हमल्हस्य चेष्टितम्॥ 19 ॥

अयं पुरा जरोः पुत्रस्त्यक्त्वा सर्वं वने गतः।
मां स्मरन् विजहौ प्राणांस्तस्मादेष प्रियो मम॥ 20 ॥

नैतेनेर्ष्या प्रकर्त्तव्या त्वया कोल्ह ममाज्ञया।
इत्युक्तः स तु कोल्होऽपि निर्भत्सरतरोऽभवत्॥ 21 ॥

दत्त्वान्नं[4] साधुरूपः स कोल्हं प्राह किमिच्छसि।
स आह यामि भवनमिति श्रुत्वा तदा हरिः॥ 22 ॥

तत्कालं प्रापयामास तं [5]स्ववेश्माथ मायया।
एवं स्वप्नसमं सर्वमनुभूय स कोल्हकः॥ 23 ॥

---

1. मत्तदा – ख।
2. धाय – क।
3. मनुजो – ख।
4. त्वं – क।
5. तन्स्ववेश्माथ – क।

अल्हदर्शनकामः स सस्मार भ्रातरं मुहुः।
एवं गतेषु कालेषु शुश्रावाल्हं समागतम्॥ 24॥

प्रेम्णा कोल्होऽग्रतो गत्वा मिलित्वा प्रेमपूर्वकम्।
त्यक्त्वा[1] सर्वमुभौ पश्चाज्जग्मतुर्वनमुत्तमम्॥ 25॥

एवं माधवदासोऽभूज्जीवानन्दस्तथापरः[2]।
उभावपि जगत्सर्वं हरिं मत्वापतुर्गतिम्॥ 26॥

एवं नारायणो नाम्नाऽकस्माद्भक्तोत्तमोऽभवत्।
तस्य ज्येष्ठः स्थितो भ्राता तत्पत्नी च गृहे स तु॥ 27॥

न किञ्चिदकरोत्कार्यं ज्येष्ठ एव धनार्ज्जकः।
एकस्मिन् दिवसे भ्रातृपत्नी पर्य्युषितं ददौ॥ 28॥

भोक्तुं न बुभुजे भ्रातृपत्नीं प्राहातिकोपतः।
नाहं पर्युषितं भोक्ष्ये तप्तं देह्योदनं मम॥ 29॥

इति श्रुत्वा भ्रातृपत्नी प्राह तं देवरं क्रुधा।
एतच्चापि कुतोऽभ्येतीत्येवं चित्ते विचार्य सा॥ 30॥

किमेवं भाषसे व्यर्थमहङ्कारान्न लज्जसे।
भोक्तुमिच्छसि चेद्भुङ्क्ष्व नोचेद्गच्छ यथासुखम्॥ 31॥

श्रुत्वैतद्वचनं तस्या वज्रपातसमं क्रुधा।
जाज्वल्यमानो निर्यातो गृहाद्वृन्दावनं शुभम्॥ 32॥

राधाकृष्णेति तत्रासौ महामन्त्रं जपन् द्विजः।
[3]तस्थावेकत्र कुञ्जे स निनाय कति वासरान्॥ 33॥

अनाहारस्ततो राधा तत्कालकृतमोदनम्।
ददौ सर्वरसैर्युक्तं स्वयं वेषान्तरेण सा॥ 34॥

एवं नारायणो नाम्ना नामस्मरणमात्रतः।
कृतकृत्यो बभूवातो मनस्तादृगपेक्षितम्॥ 35॥

एवं बीकानिरग्रामे[4] मरुदेशेतिविश्रुतः।
पृथ्वीराजेति नाम्नाभूद् भूपालो[5] भक्तसत्तमः॥ 36॥

---

1. सक्ता – क। 2. तथैव च – ख।
3. तस्थै चैकत्र – ख, ग। 4. निरस्यामे – क। 5. दयालो – क।

तस्य गेहे हरेर्मूर्त्तिस्तां भक्त्यार्च्चयति स्म सः।
क्वचिदन्यत्र चेद्यातस्तदापि मनसा स्मरन्॥ 37 ॥

तां मूर्तिं पूजयामासेत्येवं तस्य व्रतं दृढम्।
एकदा स नृपः क्वापि ययौ देशान्तरं स्वयम्॥ 38 ॥

सस्मार तत्र तां मूर्तिं न ददर्श हृदा यदा।
तत्स्थाने चापि तां मूर्तिं ततश्चिन्तामवाप सः॥ 39 ॥

कुतो न दृश्यते मूर्त्तिस्तत्स्थानं चापि वा मया।
प्रेषितं भृत्ययुगलं दृष्ट्वा गच्छात्र वै द्रुतम्॥ 40 ॥

पुत्राय पत्रं प्रददौ मूर्तिरस्ति गृहे न वा।
तत्प्रेषय लिखित्वा त्वमेतदर्थं प्रबोधकम्॥ 41 ॥

अथ चारद्वयं तत्र गतं पत्रं ददौ द्रुतम्।
ददर्श च हरेः स्थानं कुरुते नूतनं पुनः॥ 42 ॥

पृथ्वीराजसुतः पत्रं[1] ददौ चारद्वयं पुनः।
ज्ञात्वा विपत्तिषु स्थानं क्रियते नूतनं पुनः॥ 43 ॥

अतः सा मूर्त्तिरन्यत्र स्थापिता पूज्यते मया।
जाते स्थाने यथापूर्वं स्थापयिष्याम्यहं तु ताम्॥ 44 ॥

दृष्ट्वेदं पुत्र लिखितं पृथ्वीराजस्तुतोष ह।
स्वयं चापि समागत्य पूजयामास पूर्ववत्॥ 45 ॥

एकदा प्रतिजज्ञे स पृथ्वीराजोऽतिभक्तिमान्।
मथुरायां मरिष्येऽहमिति दिल्लीश्वरान्तिके॥ 46 ॥

सोऽपि ज्ञात्वा विपत्कालं पृथ्वीराजमुवाच ह।
त्वं गच्छ काबिले राज्ये युध्वा करमिहानय॥ 47 ॥

इति दिल्लीशवचनं पृथ्वीराजो निशम्य ह।
उद्विग्नः प्रययौ तत्र केशवं संस्मरन् हृदि॥ 48 ॥

तत्र गत्वा नृपं जित्वा जग्राह करमुत्तमम्।
रात्रौ स्वप्नेऽब्रवीत्तस्मै मृत्युकालं स केशवः॥ 49 ॥

---

1. पुत्रं – ख।

ततः प्रातः समुत्थाय भूपाय प्रेष्य तं करम्।
स्वयमुष्ट्रं समारुह्य जगाम मथुरां द्रुतम्॥ 50॥

तत्रागत्य च सुस्नातस्तीर्थकृत्यं विधाय सः।
द्वितीये दिवसे राजा ययौ श्रीहरिमन्दिरम्॥ 51॥

श्रुत्वा दिल्लीश्वरः सर्वं पश्चात्तापेन दुःखितः।
तुष्टाव तं महाराजं पृथ्वीराजं हरेः प्रियम्॥ 52॥

इति श्रीभगवद्भक्तिमाहात्म्ये नारायणगदाधरचरितं नाम सप्तत्रिंशदधिकशततमः सर्गः॥ 137॥

❊ ❊ ❊

अष्टत्रिंशदधिकशततमः सर्गः

॥ महासागरचरितम्॥

जात्या [1]कायस्थ इति ख्यातः सीवा तस्य सुतो ह्यभूत्।
सागरश्चेति नाम्ना स साधुसेवापरायणः॥ 1॥

द्वारकायां समायातानन्नवस्त्रादिभिर्जनान्।
तोषयामास भक्त्यासौ द्वारकावासिनोऽपि च[2]॥ 2॥

एकदा महदाश्चर्य्यमपनेतेति नामतः।
तुरुष्क एक आयातो लुण्ठितुं द्वारकां पुरीम्॥ 3॥

आगत्य नगरीमध्यं दीपयामास वह्निना।
ततः पलायिताः सर्वेः दिशोदश भयातुराः॥ 4॥

ततः स सागरो[3] गत्वा रणच्छोरसमीपतः।
स्तुत्वा गीतेन तं प्राह त्वदीयां नगरीं हरे॥ 5॥

त्वयि तिष्ठति म्लेच्छोऽयं भस्मसात्कुरुतेऽधुना।
त्राहि त्राहि जगन्नाथ स्वभक्ताञ्छरणागतान्॥ 6॥

अथैकस्मिन्क्षणेऽकस्मात्सैन्यमेकमुपागतम्।
हत्वा तुरुष्कसैन्यं तत् समुद्रे चान्वपातयत्॥ 7॥

---

1. कायेति – क, ख।
2. नपि तुष्टये – ख, ग।
3. सागजो – क।

वह्निं[1] निवारयित्वा तत्सैन्यं चापि पुनर्ययौ।
कस्येदं कुत आयातमिति नो वेद कश्चन॥ 8॥

भगवत्कृपया सर्वा निर्विघ्नाभूत्पुरी तदा।
स गतोऽपि हरिं तु रक्षितारममन्यत॥ 9॥

इति श्रीभगवद्भक्तिमाहात्म्ये महासागरचरितं नामाष्टत्रिंशदधिकशततमः सर्गः॥ 138॥

❊ ❊ ❊

ऊनचत्वारिंशदधिकशततमः सर्गः

॥ रत्नावतीचरितम्॥

मानसिंहस्य भ्राताभूत्[2] कनिष्ठो नातिभक्तिमान्।
नाम्ना माधवसिंहेति तस्य रत्नावती प्रिया॥ 1॥

तस्याः पुत्रो बभूवैकः प्रेमसिंहेति नामतः।
सोऽतिवीरो महाभक्तः समर्थो रणकर्म्मणि[3]॥ 2॥

एकदा निशि शय्यायां सुप्ता रत्नावती स्थिता।
जागृती तत्पदद्वन्द्वं दासी काचिन्ममार्ज ह॥ 3॥

श्रीमन्नन्दकिशोरेति राधाकृष्णेति चासकृत्।
वदन्ती शनकैर्दासी तत्पादौ चाप्यसेवयत्॥ 4॥

तदा राज्ञा श्रुतं[4] नाम दासी हर्षाश्रुमालिनी।
दृष्टा पृष्टा पुनः सा तु किमिदं तव चेष्टितम्॥ 5॥

अहेतुरेष चानन्दो विक्षिप्तेव च जल्पसि।
सत्यं कथय मे दासि मा भयं कुरु कस्यचित्॥ 6॥

इति श्रुत्वा वचस्तस्याः स्वामिन्याः साब्रवीद्वचः।
भुंक्ष्व भोगान्महाराज्ञि किं पृच्छसि वृथा मम॥ 7॥

इति ब्रुवन्तीं तां प्राह मुहुः रत्नावती सती।
वद त्वं नास्ति ते भीतिरिति श्रुत्वाब्रवीच्च सा॥ 8॥

---

1. चन्द्रि – क।
2. भूत्वा – क।
3. वर्त्मनि – ख।
4. सुतं – क, ख।

स्वामिन्यहं तु सततं राधाकृष्णौ भजे हृदि।
स्मराम्येवं[1] तु तन्नाम साधुना शिक्षितास्म्यहम्॥ 9॥

इत्येवं भाषमाणां तां [2]सेवालग्नां न्यवारयत्।
स्वयं चापि तु जग्राह नाम श्रीराधिकापतेः॥ 10॥

एवं जपन्ती सा राज्ञी महाभक्ता बभूव ह।
द्रष्टुं चित्ते चकारासौ श्रीमन्मदनमोहनम्॥ 11॥

साधुसेवासमासक्ता शुश्राव भगवत्कथाम्।
इन्द्रनीलमणेः कृष्णप्रतिमां प्रविधाय सा॥ 12॥

पूजयामास विभवैर्महाभक्तिसमन्विता।
निर्माय तत्र प्रासादं तत्र श्रीभगवत्प्रियान्॥ 13॥

पूजयन्ती महाभक्त्या गवाक्षाद्वा मार्गतः।
पश्यन्ती साधुवृन्दं सा हरिं बुध्या महासती॥ 14॥

एवमेकदिने कोऽपि महाभक्तः समागतः।
नित्यं[3] जगौ हरेरग्रे समलोष्टाश्म काचनः॥ 15॥

रत्नावती तु तं दृष्ट्वा स्वयमेवागता सती।
निवारिता तदा दास्यानामन्यत कथञ्चन॥ 16॥

तत्रागत्य स्वयं कृत्वा भोज्यं तस्मै ददौ मुदा।
ताम्बूलादि ततो दत्त्वा प्रणम्य स्वयमागता॥ 17॥

एवं दृष्ट्वा महाश्चर्य्यं मन्त्री राज्ञे लिलेख[4] ह।
राज्ञी रत्नावती मार्गं त्यक्त्वा साधुजनैः सहः॥ 18॥

गायत्यत्र हरेरग्रे शिक्षितापि न मन्यते।
दृष्ट्वेदं लिखितं राजा क्रोधाज्ज्वलितमानसः॥ 19॥

तूष्णीं तस्थौ तदायातः प्रेमसिंहो नृपान्तिके।
तमाह राजा क्रोधेन रण्डासुत समेहि भोः॥ 20॥

इत्युक्त्वा मन्त्रिलिखितं दत्त्वा पुत्राय भूपतिः।
जगाम शयनागारं पुत्रः पत्रं व्यलोकयत्॥ 21॥

---

1. वदाम्येवं – ख, ग।
2. स्वप्नेवातो – क, सेवाती – ख।
3. नृत्यं – ख, क।
4. लिलेश – ख, ग।

प्रेमसिंहो मातृभक्तिं ज्ञात्वा मनसि[1] च हर्षितः ।
लिलेख मात्रे पत्रं स प्रेमसिंहोऽतिभक्तितः ॥ 22 ॥

यदारब्धं त्वया मातर्न त्याज्यं सर्वथा पुनः ।
राजापि मां वदत्यत्र रण्डासुतमिति क्रुधा ॥ 23 ॥

दृष्ट्वा पत्रं तदा तस्य माता रत्नावती मुदा[2] ।
लिलेख पत्रं पुत्राय हरिभक्ताय सा स्वयम् ॥ 24 ॥

नाहं पापरता[3] पुत्र न त्यक्ष्यामि व्रतं त्विदम् ।
राधाकृष्णप्रसादेन तव कीर्तिर्भविष्यति ॥ 25 ॥

इति दृष्ट्वा तदा पत्रं प्रेमसिंहोऽतिहर्षितः ।
महोत्सवं गृहे चक्रे श्रुत्वा राजाब्रवीज्जनम् ॥ 26 ॥

किमकाण्डे[4] महोत्साहः क्रियते तेन तद्वद ।
स आह पत्रमायातं महाराज्ञा निरीक्ष्य तत् ॥ 27 ॥

मुहुर्वदति रण्डाया अद्य जातो न संशयः ।
इति श्रुत्वा ततो राजा तं हन्तुं सैन्यमाह्वयत् ॥ 28 ॥

प्रेमसिंहोऽपि सन्नद्ध स्वचैको मन्त्रिसत्तमः ।
उभौ निवारयामास योद्धं युद्धाद्भयाकुलाः ॥ 29 ॥

ततो राजैकदा रात्रौ समायातो गृहे स्वकम्[5] ।
मन्त्रिणं प्राह पश्य त्वं दिल्ला नासा तया मम ॥ 30 ॥

रक्तं वहति तत्त्वेनां हन शीघ्रं ममाज्ञया ।
ततो मन्त्री नृपं प्राह साक्षादस्यास्तु मारणे ॥ 31 ॥

लोके महान्कलङ्कः स्यात् साधुरीत्या निहन्म्यहम् ।
अयं यो वर्तते ते व्याघ्रः पिञ्जरे कालसन्निभः ॥ 32 ॥

तद्‌गृहद्वारि तं त्यक्त्वा मारयिष्यामि तेन ताम् ।
इति श्रुत्वा नृपः प्राह प्रातरेव कुरुष्व तत् ॥ 33 ॥

---

1. जीव च – ख।
2. शुभा – क।
3. पर – ख।
4. कण्डि – क।
5. ख – मध्ये लुप्तपाठः।

अथ प्रातः समुत्थाय मन्त्री तं व्याघ्रपिञ्जरम्।
निनाय तद्गृहद्वारि व्याघ्रं निष्कास्य चात्यजत्॥ 34॥

अथ व्याघ्रो ययौ शीघ्रं रत्नावत्या गृहे स[1] तु।
लेलिहानो महाजिह्वो [2]व्याकृतास्यो भयानकः॥ 35॥

दृष्ट्वा दासी महाव्याघ्रं स्वामिनीं प्राह बिभ्यती।
स्वामिन्येष समायातं सिंहं पश्य गृहे व्रज॥ 36॥

इति रत्नावती श्रुत्वा पूजयन्ती हरिं मुदा।
दृष्ट्वा व्याघ्रमहोभाग्यमहो भाग्यमिदं मुहुः॥ 37॥

जल्पन्ती शीघ्रमुत्थाय पूजोपकरणानि च।
गृहीत्वाङ्गणदेशे सा व्याघ्रसन्निधिमागता॥ 38॥

नृसिंहोऽयं समायातो दासी पश्य कृपानिधिः।
अनेन भक्तरक्षार्थं हिरण्यकश्यपुर्हतः॥ 39॥

इत्युक्त्वा तस्य पादेषु पाद्यं दत्त्वा मनस्विनी।
कुकुंमं चन्दनं भाले दत्त्वा माल्यं गले ददौ॥ 40॥

धूपदीपादि दत्त्वा तं भोजयामास मोदकम्।
एवं समर्च्य तं राज्ञी प्रणनामातिभक्तितः॥ 41॥

[3]व्याघ्रो गौरिव तां पूजां प्रति जग्राह हर्षितः।
एवं समर्च्चनं तस्या राजा मन्त्री ददर्श ह॥ 42॥

अथागत्य बहिर्व्याघ्री मालातिलकभूषितः।
हत्वा तं मंत्रिणं दुष्टानन्यान्भक्षितवान्द्रुतम्॥ 43॥

दृष्ट्वा राजातिभीतः स पत्नी गृहमुपागतः।
दृष्ट्वा समुत्थिता साध्वी कुर्वन्ती हरिपूजनम्॥ 44॥

राजा नमश्चकाराह दासी पश्य नमत्यसौ।
राज्ञी प्राहातिमुदिता राधाकृष्णौ नमत्ययम्॥ 45॥

मम तु प्राणनाथोऽयं द्वितीयः श्रीहरेस्तनुः[4]।
तदा राजापि मनेस्या भक्तिरस्ति दृढेति सः॥ 46॥

---

1. द्रुतम् – क।
2. चिक्कता – क, ग।
3. आघ्रो – ख।
4. प्रभु – क।

एवमेकदिने मानसिंहो माधवसिंहयुक्।
यमुनायां स्थितो नाविमज्जती वचनौरभूत्॥ 47॥

कैवर्तस्तु ततः प्राह राजन्नौरिह मज्जति।
स्मरन्तु हरिभक्तान्वै स्वकुले वापि ये स्थिताः॥ 48॥

ततः पारं प्रयात्येषा नान्यथा भो गमिष्यति।
इति श्रुत्वा मानसिंहो दध्यौ भ्रातृवधूं च ताम्॥ 49॥

ततोऽर्द्धमग्ना सा नौका यमुनातीरमागता।
आगत्य मानसिंहोऽपि प्रशशंस मुदान्वितः॥ 50॥

ग्रामान् ददावन्नदानसिध्यर्थं परमादरात्।
एवं रत्नावतीभक्तिः प्रसिद्धाद्यापि भूतले॥ 51॥

इति श्रीभगवद्भक्तिमाहात्म्ये रत्नावतीचरितं नामोनचत्वारिंशदधिकशततमः सर्गः॥ 139॥

※ ※ ※

चत्वारिंशदधिकशततमः सर्गः

॥ रामदासचतुरस्वामीचरितम्॥

वर्द्धमानस्य शिष्योऽभूद्रामदाससुतो द्विजः।
नाम्ना स मथुरादासो हरिभक्तिरतः सदा॥ 1॥

एकदा तस्य नगरे साधुरेकः समागतः।
चमत्कारीन्द्रजालादि ज्ञात्वा लोको विमोहतः॥ 2॥

शालग्रामं[1] तु सम्पूज्य धृत्वा सिंहासने स्वयम्।
ननर्त च तदा देवः शालग्रामोऽप्यनर्तत॥ 3॥

श्रुत्वेदं परमाश्चर्य्यं मथुरादासमाह तम्।
महासिद्धोऽयमित्येवं मत्वा तं तुष्टुवुश्च तम्॥ 4॥

मथुरादास शिष्योऽपि तत्रैकः समुपागतः।
दृष्ट्वा तत्परमाश्चर्यं मथुरादासमाह तम्॥ 5॥

---

1. सालग्राम – ख, ग।

गुरो समागतः साधु शालग्रामं च नर्तयन्।
स्वयं च नृत्यति त्वं भो गत्वा पश्य तदद्भुतम्॥ 6॥

इति श्रुत्वा वचस्तस्य मथुरादास आह तम्।
को वेद साधुचरितं न गन्तव्यं तदन्तिके॥ 7॥

पुनः प्रसाद्य तं शिष्यो नित्ये तद्वैष्णवान्तिकम्।
तस्मिन् गते तु मथुरादासेन तेजसा पुनः॥ 8॥

स ननर्त तदा ज्ञातं[1] तेन धूर्तेन चेतसा।
अयमागत्य मद्विधामन्तस्तम्भितवान् ध्रुवम्॥ 9॥

एवं विचिन्त्य मथुरादासे कृत्यां चकार सः।
सा कृत्या तद्भयादेत्य कर्त्तारमग्रसीद् द्रुतम्॥ 10॥

ततः स मूर्च्छितो भूत्वा निःपपात धरातले।
आगत्य मथुरादासस्तमुत्थापयति भक्तितः॥ 11॥

[2]पस्पर्श पाणिना नेत्रे बोधयित्वा प्रयत्नतः।
निष्काम भक्तिः कर्त्तव्या वैष्णवेन विशेषतः॥ 12॥

ततो न विघ्नैर्बाध्येत तथा कुरु महामते।
त्यज लोकप्रतिष्ठां भो भज निःकपटं प्रभुम्॥ 13॥

इति संशिक्ष्य तं साधुं स्वयमागत्य मन्दिरे।
राधाकृष्णौ स्मरन् चित्ते महानन्दमवाप्तवान्॥ 14॥

अभून्नारायणो दासः श्रीहरेरतिभक्तिमान्।
तस्यैवं नियमो गायन् ननर्त श्रीहरेः पुरः॥ 15॥

परन्तु तादृशं नृत्यं गानं चापि सुदुर्लभम्।
तस्य नैव श्रमः क्वापि सदा तीर्थाटने रतः॥ 16॥

गत्वा साधुसमाजे स शिष्यैश्च बहुभिर्युतः।
नृत्यं कृत्वा दिनं स्थित्वा पुनरन्यत्र चागतम्॥ 17॥

एवमेकदिनं भक्तः काशीं गच्छन्पथि स्थितः।
प्रयागात्पूर्वतो ग्रामे हडि आख्येति विश्रुते॥ 18॥

---

1. जानं – ख। 2. यः स्पर्श – क, ख।

तत्र म्लेच्छो नृपः कश्चित् शुश्राव तमुपागतम्।
भृत्यैर्ग्रामजनैश्चापि नृत्यार्थं भक्तमाह्वयत्॥ 19॥

अयं तु सन्दिहानोऽभूत्किं कर्तव्यमतः[1] परम्।
अदृष्ट्वा मम नृत्यं स गन्तुं दास्यति नैव हि॥ 20॥

अतो नृत्यं विधास्यामि परं तु भगवान्कथम्[2]।
नेतव्यस्तद्गृहे यास्ति तुलसीमालिका त्वियम्॥ 21॥

तां संस्थाप्य तद्गृहेऽहं नर्तिष्यामि न संशयः।
इति निश्चित्य तां [3]मालामुच्चस्थाने निधाय सः॥ 22॥

तत्सम्मुखो ननर्ताऽसौ म्लेच्छभूपोऽपि पश्यति।
अथ तुष्टः स भूपालो धनं दातुं समुत्थितः॥ 23॥

तदा मदनगोपालं सस्माराातिमुदान्वितः।
मुमूर्च्छ च मृतप्रायस्तं शिष्या निन्युरन्यतः॥ 24॥

प्राप्य चैतन्यमाहाथ प्रयागे नय मां द्रुतम्।
आगत्य तत्र सम्भेदे गङ्गायमुनयोः शुभे॥ 25॥

राधाकृष्णौ स्मरन्भक्तो ममार ज्ञानपूर्वकम्।
एवं नारायणो दासो भक्तोऽभूदतिविश्रुतः॥ 26॥

[4]वोहथोयशमन्तश्च गोपालश्च गदाधरः।
शीलस्वामी च गोविन्दो हरिनाथस्तथैव च॥ 27॥

दीनादासो रामदासस्त्वनन्तानन्दकन्धरौ।
नारदः श्यामदासश्च हरिनारायणस्तथा॥ 28॥

उद्धवो रामरेणुश्च कृष्णजीवन एव च[5]।
[6]परशुरामः कृष्णदासो गङ्गादासस्तथैव च॥ 29॥

गोपालो जयदेवश्च श्रीमन्माधवदासकः।
एते जाता महाभक्ताः प्रसिद्धाः पावनाः कलौ॥ 30॥

विदुरो नाम भक्तोऽभूद्द्वितीयो विदुरो यथा।
हीथरग्रामवासी स कृषिं कृत्वातिभक्तितः॥ 31॥

---

1. भृतः – क।
2. कथा – क।
3. माला उच्च – ख।
4. वोहथोजसमंश्च – ख, ग।
5. सः – ख।
6. पिस्थविरो यथा – ख।

अन्नदानञ्च साधुभ्यः कुर्वन् चित्ते हरिं स्मरन्।
तस्थावानन्दपूर्वं स दरिद्रो धनवानिव ॥ 32 ॥

अनावृष्टिवशादेकवत्सरे तस्य वै कृषिः।
स गर्भा शुष्कृतां याता दृष्ट्वा चिन्तामवाप सः ॥ 33 ॥

अन्यत्र गन्तुकामोऽभूद्रात्रौ स्वप्नेऽब्रवीद्धरिः।
भक्तरूपं समादाय क्षेत्रं छित्वा खले कुरु ॥ 34 ॥

दमयत्वं ततस्तेऽत्रान्नं सम्वत्सराधिकम्।
भविष्यति न सन्देहो मा गच्छान्यत्र कुत्रचित् ॥ 35 ॥

अथ प्रातः समुत्थाय विदुरोऽतीव हर्षितः ॥ 36 ॥

हसितौ वै स लौकैश्च न विश्वासं जहौ हृदि।
तदा चतुर्गुणं धान्यम् अन्यवर्षाद् बभूव ह ॥ 37 ॥

दृष्ट्वा सर्वे महाश्चर्यं मत्वा भक्तिविचेष्टितम्।
तुष्टुवुस्तं जना भक्तं विदुरं चातिहर्षिताः ॥ 38 ॥

एवं दयालुदासोऽभूद्भक्तो दामोदरस्तथा।
मोहनः परमानन्दश्चेत्युभौ भक्तसत्तमौ ॥ 39 ॥

बभूव चतुरस्वामी भक्त एकोऽतिविश्रुतः।
पत्नीं पुत्रं गृहं त्यक्त्वा वृन्दावनमुपागतः ॥ 40 ॥

तस्यैवं नियमो नित्यं प्रातर्गोविन्ददर्शनम्।
मध्याह्ने नन्दनागारे केशवस्य च दर्शनम् ॥ 41 ॥

राधाकुण्डे ततो गत्वा स्वस्थनात् गमनं [1]ततः।
एवं नित्यव्रतं तस्य चतुरस्वामिनोऽभवत् ॥ 42 ॥

जाते दिनत्रये तस्मै क्षुत्पिपासार्दिताय वै।
कृष्णः साधुस्वरूपेण मार्गे दुग्धं ददौ बहु ॥ 43 ॥

पीत्वा दुग्धं पुनर्वारि याचते स्म स तं पुनः।
स आह नात्र पानीयमित्युक्त्वा प्रययौ क्वचित् ॥ 44 ॥

पयो ब्रवीति विख्यातो मथुरायां बभूव सः।
कदाचिद्बालवद्गोपीं याचतेऽसौ पयोऽद्भुतम् ॥ 45 ॥

---

1. तथा – ख।

एवं च परमानन्दो विट्ठलो माथुरोपरः ।
प्रेमपण्डेति विख्यातो गुनौरो[1] वीधरस्तथा ॥ 46 ॥

एते साधुकरीं भिक्षां गृहीत्वा वैष्णवा जनाः ।
तर्प्पयामासुरमलाः प्रख्याताः भक्तसत्तमाः ॥ 47 ॥

इति श्रीभगवद्भक्तिमाहात्म्ये रामदासचतुरस्वामीचरितं नाम चत्वाङ्क्षरशदधिकशततमः सर्गः ॥ 140 ॥

❊ ❊ ❊

1. गुतौ रेचोधरः – ख, ग।

एकचत्वारिंशदधिकशततमः सर्गः

॥ समुदायभक्तिचरितम् ॥

माडदेशे सीथराख्योग्रामश्चातीव[1] विश्रुतः।
तत्राभूत्कुम्भकारस्तु कुवादासेति नामतः ॥ 1 ॥

तस्य चैवं व्रतं नित्यं सर्वदातिथितर्पणम्।
पात्रं विक्रीय नीत्वान्नं साधुभ्यः प्रददौ मुदा ॥ 2 ॥

एकदा साधवस्तत्र बहवस्तु समागताः।
तान् दृष्ट्वा हर्षिताश्चित्ते किं कर्तव्यमिति स्मरन् ॥ 3 ॥

तद्ग्रामनृपतेरग्रे गत्वा प्रार्थितवानथ।
अहो मयास्ति चेत्कार्यं तद्धि कारय भूपते[2] ॥ 4 ॥

तद्वेतनमिदानीं मे देहि कार्य्यं ममास्ति [3]यत्।
इति श्रुत्वा नृपः प्राह कूपं खन ददामि ते ॥ 5 ॥

धनमित्थं वचः श्रुत्वा स्वीकृत्य धमाददे।
नीत्वान्नं भोजयामास साधून्सर्वान्मुदान्वितः ॥ 6 ॥

भोजयित्वा गतो ग्रामाधीशाग्रे तमुवाच सः।
[4]क्व कूपं खानयाम्यत्र स्थलं दर्शय मेऽधुना ॥ 7 ॥

ततो ग्रामे स निर्द्दिष्टे चखान कूपमुत्तमम्।
कियद्दूरे गतस्तत्र बालुका निःसृतास्तदा ॥ 8 ॥

पपात मृत्तिका तत्र कूवादासस्य चोपरि।
अथान्ये ये स्थितास्तत्र रुदन्तो गृहमागताः ॥ 9 ॥

मत्वाशक्यं शरीरस्य निःकाशनमतो जनाः।
न तत्र विविशुः पत्नी चक्रे तस्योद्ध्र्वं देहिकम् ॥ 10 ॥

ततो मासोत्तरं कश्चित्साधुस्तत्र समागतः।
शुश्राव रामरामेति कूवादासोक्तवत् [5]स्फुटम् ॥ 11 ॥

---

1. वातीव – ख, ग।
2. भूतले – क, ख।
3. भोः – क, ख।
4. कृ – ख।
5. ख मध्ये लुप्तपाठः।

स ग्रामेशमुवाचाशु सोऽपि भृत्यैः समागतः।
[1]खानयित्वाथ राजापि शुश्राव राम [2]नाम तत्॥ 12 ॥

कियद्दूरे ततो गत्वा कूवादासो परिस्थितम्।
ददर्श मृत्तिका पुञ्जं महीमिव विनिर्मितम्॥ 13 ॥

भक्त्या तमपि निःकाश्य राजाग्रे निन्युरादरात्।
महीमध्येऽन्नपानीयपूर्णपात्रमिमेजनाः॥ 14 ॥

कूवाग्रे दहशुः सर्वे महाश्चर्य्यं गतास्तदा।
राज्ञापि सत्कृतः सोऽथ सर्वे तं द्रष्टुमागताः॥ 15 ॥

दर्शनीयं ददुस्ते [3]यत्तैः सर्वैः शोभनं मठम्।
निर्मापयामास हरेः कूवादासोऽतिभक्तितः॥ 16 ॥

अथ श्रीभगवन्मूर्तिं तत्र स्थापयितुं मनः।
कूवादासश्चकाराथ जाते कतिपये दिने॥ 17 ॥

साधवश्चागतास्तत्र कृष्णमूर्तिं मनोरमाम्।
नयन्तो द्वारवत्यास्ते स्थापनायाथ तां पुनः॥ 18 ॥

कूवाभक्तो मठे पीठादन्यत्र[4] न्यस्य भक्तितः।
भोजयित्वातिमिष्टान्नमाग्तास्तत्र[5] वैष्णवान्॥ 19 ॥

मूर्तिं पीठे समायोक्तुं प्रातः सर्वैः स्थिरीकृतम्।
अथ कूवा समागत्य दृष्ट्वा मूर्तिं स्थितां तथा॥ 20 ॥

मनसा कामयामास यत्रैव संस्थिता भवेत्।
महाभाग्यं तदा किन्तु कथमेतान् वदेच्च कः॥ 21 ॥

अथ प्रातः समुत्थाय ते सर्वे चलिता द्रुतम्।
मूर्तिमुत्थापयन्स्तु नोत्तस्थौ तत्र संस्थिता॥ 22 ॥

कूवादासं तदा सर्वे प्राहुर्नायं गमिष्यति।
[6]अयमेवाग्रहस्तस्य हृष्टं त्वद्भक्तितोऽभवत्॥ 23 ॥

---

1. स्नान – क।
2. नामतः – क।
3. मठी – क।
4. तस्मिन् वासयामास – ख, ग।
5. ततस्ते – ख।
6. इममेवागृह – ख, ग।

इत्युक्तः प्राह हर्षेण ज्ञातवानेष मे मनः।
अतोऽस्य ज्ञानराजेति नाम लोके मया कृतम्॥ 24॥

ततस्तान्वैष्णवान्सर्वान् तोषयित्वा प्रयत्नतः।
विससर्ज मुदा तत्र मठे तं च हरिं पुनः॥ 25॥

कृतकृत्योऽच्चर्यामास वैष्णवैः सह सर्वदा।
एवं भक्तिवशस्तस्य मठे तस्थौ निरन्तरम्॥ 26॥

एकदा शङ्खचक्राब्जगदाश्च ग्रहणाय सः।
चलितो द्वारिकां साधुस्वरूपेण हरिर्निशि॥ 27॥

स्वप्ने प्रोवाच मा गच्छ गृहे सर्वं भविष्यति।
इति श्रुत्वा निवृत्तोऽभूदागत्य भवने स्थितः॥ 28॥

एकदा स्वप्न एवासौ गतो द्वारवतीं पुरीम्।
शङ्खचक्रादि[1]क्रयार्थं रणच्छोरस्य दर्शने॥ 29॥

स्वप्नं दृष्ट्वा समुत्थाय सत्यमङ्गे ददर्श तत्।
दृष्ट्वान्योऽपि तदङ्गे च महाश्चर्यममन्यत॥ 30॥

समुद्रगोमती तीर्थसङ्गमे चैकदा जनाः।
स्नातुं ययुस्तदा तेषामेकस्मै वैष्णवाय सः॥ 31॥

करमालां ददौ साधो इमां संस्नापयिष्यसि।
स गृहीत्वा गतो मालां गोमतीसङ्गमे पुनः॥ 32॥

स्नापयंस्तां पपाताथ सा माला सङ्गमे करात्।
बहुप्रयासतश्चापि न सा प्राप्ताथ केनचित्॥ 33॥

कूवादासस्तु तां मालां स्वग्रामस्य जलाशये।
प्राप्तः स्नानं प्रकुर्वाणः कालेऽस्मिन्सः[2] समागतः॥ 34॥

साधुर्दृष्ट्वा तु तां मालां महाश्चर्यममन्यत।
कूवां प्राह करात्माला सङ्गमे पतिता श्रियम्[3]॥ 35॥

दृश्यते महदाश्चर्य्यं तव हस्तगताधुना।
इति श्रुत्वा ततः सोऽपि तूष्णीं तस्थौ हरिं स्मरन्॥ 36॥

---

1. द्यकरणं – ख, क।
2. सोऽपि – ख, ग।
3. तथा – क, ख।

एवं प्रयागदासोऽभूज्जङ्गीदासस्तथैव च।
विनोदी पूरणश्चैव वनमाली दिवाकरः ॥ 37 ॥

नृसिंहो भगवांश्चैव किशोरः खेम[1] एव च।
जगन्नाथो द्वौ च टीलालाहाख्यौ भक्तसत्तमौ ॥ 38 ॥

वरमानन्दनामान्यः खेमाख्यो[2] लोहकारकः।
कन्धरो मधुपुर्यां[3] स महोत्सवविधायकः ॥ 39 ॥

पाद्यताम्बूलदानान्तं स्वहस्तेनैव सर्वदा।
सर्वेषां कृष्णबुध्या च चकारातीव हर्षितः ॥ 40 ॥

भगवानिति नाम्नाभूद्वक्ष्ये तस्य कथां शुभाम्।
तस्यैव नियमः साधोः प्रतिवर्षं महोत्सवम् ॥ 41 ॥

आगत्य मथुरां चक्रे साधून्सन्तर्प्पयन् धनैः।
माथुरेभ्यश्च यत्किञ्चिद्धनं वस्त्रादिकं तथा ॥ 42 ॥

अतस्तेन तथा दुष्टा बभूवुर्माथुरा द्विजाः।
एवं गतेषु कालेषु भगवानिति नामकः ॥ 43 ॥

बभूवातिदरिद्रः स समायातो महोत्सवे।
गत्वा तु मथुरायां वै यथाधनमहोत्सवः ॥ 44 ॥

कर्त्तव्य इति निश्चित्य माथुरामागतः स वै।
ज्ञात्वैवं माथुराः सर्वे पूर्वकोपेन दुर्जनाः ॥ 45 ॥

देहि देहीति जल्पन्तः कुवाक्यमपि ते पुनः।
आहुर्द्वारि स्थितांस्तांस्तु समानीय स्वकं गृहम्[4] ॥ 46 ॥

द्रव्यमन्नं तथा वासः सर्वेभ्यश्च ददौ मुदा।
पश्चादुवाच भो विप्रा मदुक्तं श्रृणुताधुना ॥ 47 ॥

एतावदेव सर्वस्वं मे भवभ्क्ष्योऽर्प्पितं मया।
अनेनैव महोत्साहं कुरुध्वं वा यथेच्छया ॥ 48 ॥

इति श्रुत्वा ततो विप्रा भगवानाख्यसाधवे।
ददुः सर्वे गृहीतं यद्ग्रहीष्यामो न ते वयम् ॥ 49 ॥

---

1. षेम – ख, ग।
2. षेमाख्यो।
3. पुंमां – क।
4. गृहे – क।

तत: स भगवान्भक्तो धृत्वा सर्वं गृहे पुन:।
चिन्तया परमायुक्तस्तस्थौ[1] चित्ते हरिं स्मरन्॥ 50॥

अथ श्रीभगवान्छीघ्रं भक्तरूपधरो हरि:।
आययौ तद्गृहे तं तु प्राह किं खिद्यसे वृथा॥ 51॥

महोत्साहं कुरुष्वाद्य सर्वानाहूय यत्नत:।
अनेनैव तु सर्वं ते भविष्यति न संशय:॥ 52॥

इति साधुवच: श्रुत्वा भगवानुत्थितस्तदा।
आनीय सर्वान्वै साधून् माथुरानतिभक्तित:॥ 53॥

धनान्यन्नानि वासांसि ददावतिमुदान्वित:।
पूर्व संवत्सरात्सर्वं ददौ दशगुणं मुदा॥ 54॥

तथापि तद्गृहे तावत्स्थितं सर्वं तथाविधम्।
द्रौपदी वस्त्रवत्सर्वमभूद्धरिकृपावशात्॥ 55॥

जयमल्लस्य वंशेऽभूद्वसमन्तोऽतिभक्तिमान्।
स तु वृन्दावनं गत्वा साधुसेवापरोऽभवत्॥ 56॥

काशी समीपवास्येको[2] हरिदासेति विश्रुत:।
वैशे वृन्दावने तस्य गुरुदासीन्महाशय:॥ 57॥

प्रतियज्ञे स वैश्यस्तु सर्वेषामग्रत: स्वयम्।
व्रजभूमौ मरिष्येऽहमिति कालान्तरे स तु॥ 58॥

दु:खित: शिष्यमाहासौ नय वृन्दावने द्रुतम्।
तत: शिष्यगणा निन्युस्ते वैश्यमुग्रनाडिकम्॥ 59॥

अथ मार्गे [3]ममारासौ स्वयं तत्कालमेव हि।
वृन्दावनमुपागत्य प्रणनाम गुरुं स्वकम्॥ 60॥

अन्यानपि यथायोग्यं सत्कृत्य यमुनां गत:।
पुनर्दृष्टो न केनापि तृतीये दिवसेत्वथ॥ 61॥

हरिदासस्य शिष्या वै समायाता गुरोर्गृहे।
ऊचु रुदन्तो भो: स्वामी[4] हरिदासो मृत: पथि॥ 62॥

---

1. वारया भक्त – ख।
2. को हवि – ख।
3. मार्गमुमाराज्ञौ – ख।
4. स्वामिन् – क, ख।

[1]वयमप्यागताश्चेति श्रुत्वा सर्वेऽपि विस्मिताः।
अहो तृतीयदिवसे मध्याह्नेऽत्र समागतः ॥ 63 ॥

सर्वैर्दृष्टो न सन्देहः प्रायो जीवो हि तस्य वै।
हरिदासं महाभक्तं गुरुं सस्मार वै मुहुः ॥ 64 ॥

इति श्रीभगवद्भक्तिमाहात्म्ये समुदायभक्तिचरितं नामैकचत्वाङ्करशदधिकशततमः सर्गः ॥ 141 ॥

※ ※ ※

द्विचत्वारिंशदधिकशततमः सर्गः

॥ समुदायभक्तिचरितम् ॥

दक्षिणस्यां तु गोपालविष्णुदासावुभावपि।
दाक्षिणात्यौ महाभक्तौ साधुसेवापरायणौ ॥ 1 ॥

यत्र यत्र व्रजतस्तौ निमन्त्रणवशादुभौ।
सामग्रीं शकटे[2] कृत्वा तत्र तत्र प्रजग्मतुः ॥ 2 ॥

एकदा स्वगुरुं भक्त्या प्राहस्तुत्वा कृताञ्जली।
साधून्भोजय सामग्री त्वावाभ्यां क्रियते गुरोः ॥ 3 ॥

प्रत्युत्तरं[3] गुरुः प्राह भोजयेतां प्रयत्नतः।
तदा जलं चतुर्दिक्षु विक्षिप्तं गुरुणा स्वयम् ॥ 4 ॥

जाता निमन्त्रिताः सर्वे साधवश्चलितास्तदा।
गुरुस्तावाह चायान्ति साधवो नात्र संशयः ॥ 5 ॥

यथेष्टं च युवां साधून् मुदा भोजयतां द्रुतम्[4]।
[5]यावत्पञ्चदिनान्येतान् भोजयामासतुस्तदा ॥ 6 ॥

प्रदक्षिणां चक्रतुस्तौ गुरोराज्ञां प्रगृह्य तु।
नामदेवो कबीरादीन् दृष्ट्वा सम्भाष्य चागतान् ॥ 7 ॥

---

1. अहमद्यावच्चेति – क, ख।
2. सकटे – ख, ग।
3. प्रति श्रुत्वा – क, ख।
4. मुभौ – ख।
5. अथागतान् पंच दिनं – क, ख।

ततो गुरुस्तु तान्सर्वान् यथायोग्यं ददौ मुदा।
विसर्ज्जयामास पुनर्निजं दोषं क्षमापयन्॥ 8 ॥

चतुरदासः श्रीलदास आखुकर्णो लषास्तथा।
दामोदरो[1] देवनाथो भट्टो रसिकदासकः ॥ 9 ॥

एवमद्भुतरायश्च कील्हशिष्याः हरिप्रियाः।
श्रीमन्नारायणो भट्टो जीवगोस्वामिसेवकः ॥ 10 ॥

शेषावतेति नामाभूत् षण्डेलायां नृपोत्तमः।
तत्पुरोधाः परशुरामः कन्यैका तस्य चाभवत्॥ 11 ॥

करमौतीति नाम्ना वै महाभक्ता हरिप्रिया।
विषये ह्यनभिज्ञा सा वयसा तु युवत्यपि॥ 12 ॥

राधाकृष्णैकहृदया पतिस्तस्याः समागतः।
नेतुं स्वमन्दिरे तां तु श्रुत्वा सातीव दुःखिता॥ 13 ॥

अतः परन्तु संसारगर्ते मां पातयिष्यति।
अयं पतिरयं तात इयं तु जननी मम॥ 14 ॥

विहाय नश्वरे कृष्णं पतिं नित्यसुखास्पदम्।
करिष्याम्यथ भर्त्ताहं किमनेन विनश्यता॥ 15 ॥

इति निश्चित्य सा बाला कृष्णैकशरणा निशि।
निः ससार गृहाद् दूरमुषःकालं विलोक्य सा॥ 16 ॥

उष्ट्रास्थिपञ्जरं दृष्ट्वा निलीय तत्र संस्थिता।
महादुर्गं धनं वित्तं प्रियं मेऽतो गृहाद्धि सा॥ 17 ॥

अथ प्रातस्तदीयास्तामन्वेष्टुं सर्वतो गताः।
उष्ट्रास्थि[2] निकटे गत्वा मुद्रयित्वातिगन्धतः ॥ 18 ॥

प्रपलाप्य[3] ययुः सर्वे सा तूष्णीं तत्र संस्थिता।
एवं दिनद्वये जाते परावृत्यागता जनाः ॥ 19 ॥

सापि निर्गत्य गङ्गायां गत्वा स्नात्वातिभक्तितः।
अलङ्कारं स्वजातिभ्यो दत्त्वा वृन्दावनं ययौ॥ 20 ॥

---

1. देवदामादरो नाथ – ख।
2. ति – ख।
3. प्रपलोप्य – ख।

अथ तत्र गता वापि[1] माथुरो ब्राह्मणस्तदा।
आगत्य परशुरामं तं प्राह पुत्री विचेष्टितम्॥ 21॥

परशुरामद्विजश्रेष्ठ मथुरायां सुता तव।
अस्ति सूर्य्यसुतातीरे स्मरन्ती श्रीहरिं सती॥ 22॥

श्रुत्वैवं परशुरामस्तु पुत्रीसंन्निधिमागतः।
रुदन्नुवाच तां पुत्रीं नासाच्छेदः कृतस्त्वया॥ 23॥

यदायाता[2] गृहं त्यक्त्वा श्वशुरस्य गृहं व्रज[3]।
भक्षयिष्यन्ति विपिने व्याघ्राः पुत्रि न संशयः॥ 24॥

इति श्रुत्वा पितुर्वाक्यं सा तं प्राहातिभक्तितः[4]।
भक्तिरेव नृणां नासा यस्य सा नैव वर्तते॥ 25॥

स्वतः संच्छिन्ननासोऽस्ति यदुक्तं श्वशुरगृहे।
व्रजेति तच्च तु पतिः परित्यक्तो मयाधुना॥ 26॥

तदा कः श्वशुरो मे स्याद् व्याघ्राद्भीतिस्त्वयोदिता।
शरीरं भक्ष्यते व्याघ्रैर्न मेऽर्थोऽस्ति[5] मनागपि॥ 27॥

त्वं विचारय भो तात गृहकूपे पतन्नपि।
न विजानासि चात्मानमुन्मत्त इव दृश्यते॥ 28॥

कस्ते पुत्रश्च का पत्नी कस्ते बन्धुर्धनं तु किम्।
अन्ते किमपि नैवास्ति सहायस्तव भावय॥ 29॥

पञ्चाशदाब्दिको जातः चर्वितस्येव चर्वणम्।
नित्यं करोषि विषयं सेवमानो विमोहितः॥ 30॥

इति श्रुत्वा सुतावाक्यं सुप्तोत्थित इवाभवत्।
आगत्य स्वगृहे कृष्णमूर्तिं संस्थाप्य भक्तितः॥ 31॥

पूजयामास तां प्रेम्णा परशुरामो निरन्तरम्।
तत्याज्य राजसेवादि सर्वं लौकिकबन्धनम्॥ 32॥

अथैकदिवसे राजा सस्मार स्वपुरोहितम्।
परशुरामस्तु नायाति कुतः कतिपयाद् दिनात्॥ 33॥

---

1. काले – क।
2. गत्वा – क।
3. व्रत – ख।
4. हर्षिता – क।
5. क, ख मध्ये लुप्तपाठः।

इति श्रुत्वा गतश्चैकः परशुरामं समीपतः।
उवाच परशुरामं[1] तं राजा त्वां द्रष्टुमिच्छति॥ 34॥

इति श्रुत्वा परशुरामोऽब्रवीत्तं दूतमादरात्।
मद्वाक्यान्नृपतिर्वाच्यो नाहं तव न मे भवान्॥ 35॥

राजराजेश्वरश्चान्यो मिलितो भाग्यतो मम।
तस्यैव सेवनं कुर्वे भवद्भिः क्षम्यतां मम॥ 36॥

इति श्रुत्वा वचस्तस्य दूतो राज्ञे न्यवेदयत्।
राजराजेश्वरोऽपि मिलितो भाग्यतो मम॥ 37॥

तस्यैव सेवनं कुर्वे भवद्भिः क्षम्यतामिति।
राजा ज्ञात्वा विरक्तं तं [2]तत्रायातस्त्वयं पुनः॥ 38॥

तन्मुखात्तनया वाक्यं श्रुत्वा राजाब्रवीच्च तम्।
अहं ते तनयामत्र समानेतुं व्रजामि भोः॥ 39॥

इत्युक्त्वा नृपतिस्तत्र ययौ यत्र स्थिता सुता।
दृष्ट्वा कलिन्दजातीरे राजा वह्निशिखामिव॥ 40॥

जाज्वल्यमानं तेजोभिर्न्न किञ्चिद्भाषितुं क्षमः।
तथापि दूरतो नत्वा[3] प्राञ्जलिः किञ्चिदब्रवीत्॥ 41॥

ब्रह्मचारिणि तातस्ते विरक्तोऽभूत्त्वया विना।
अतस्ते गमनं तत्र युक्तमद्य न संशयः॥ 42॥

इति श्रुत्वा वचो राज्ञः क्व तातः[4] प्राह तं नृपम्।
राजन् पिताखिलान्भोगान् भुक्त्वाभवदनुग्रहात्॥ 43॥

विरक्तश्चेदभूदद्य तदा धन्यतमस्तु सः।
त्वं तु केन बलेनाद्य महाभ्रान्त इवासि भोः॥ 44॥

प्रायो राज्यमिदं नीत्वा सहैव च गमिष्यसि।
पित्रा पितामहेनापि नेतुं शक्यमभून्नयत्॥ 45॥

इति श्रुत्वा वचो राजा गृहमागत्य सत्वरम्।
राज्यं समर्प्य पुत्राय स्वयं वृन्दावनं गतः॥ 46॥

---

1. रामः तु – ख।
2. जातः – क, ख।
3. भूत्वा – क।
4. मातः – क, ग।

स्थित्वा तत्र तपोदानैस्तोषयन् विप्रसज्जनान्।
अन्ते जगाम वैकुण्ठे हरिभक्ति प्रसादतः ॥ 47 ॥

खड्गसेनो ग्वालिपुरे महाभक्तो बभूव ह।
कृष्णलीलानुसारी सन्नृत्यं कुर्वन् ममार ह ॥ 48 ॥

गङ्गादासस्तथैवाभूद्वैष्णवो भक्तभक्तिमान्।
गोपालो व्रजवास्येवं महाभक्तो बभूव ह ॥ 49 ॥

व्रजवासो वनं तस्य श्रीकृष्णाग्रे तु नर्तनम्[1]।
नान्यत्र गमनं क्वापि भिक्षामादाय भोजनम् ॥ 50 ॥

इन्द्रप्रस्थादेकदा तु राजा तत्र समागतः।
श्रुत्वा गानं च नृत्यं च राजातीव विमोहितः ॥ 51 ॥

बलात्कारेण[2] तं निन्ये दिल्यां भक्तं स दुर्जनः।
तत्याजान्नं च पानीयं व्रज विश्लेषतः स तु ॥ 52 ॥

अथ राजा निशि स्वप्नं ददर्शातिभयङ्करम्।
व्रजे प्रापय गोपालं नोचेद्वध्यो न संशयः ॥ 53 ॥

इति दृष्ट्वा नृपः स्वप्नं तत्कालं परमादरात्।
गोपालं प्रेषयामास व्रजे सोऽप्यतिहर्षितः ॥ 54 ॥

सन्तनामाबभूवैको शिष्यो [3]नरहरेः सुतः[4]।
लालदासोऽपि सत्कृत्य साधूनन्ते गतो हरिम् ॥ 55 ॥

एवं माधवदासोऽभूत्सर्वभूतसुहृत्तमः।
अग्रशिष्यः प्रयागाख्यो गुरुं हरिममन्यत् ॥ 56 ॥

स रासनृत्यसमये गायन् हरिकथामृतम्।
त्यक्त्वा कलेवरं प्राप वैकुण्ठभवनं महत् ॥ 57 ॥

इति श्रीभगवद्भक्तिमाहात्म्ये समुदायभक्तिचरितं नाम द्विचत्वाङ्करशदधिकशततमः सर्गः ॥ 142 ॥

❊ ❊ ❊

---

1. भजनं – क।
2. बालात्करिण – क।
3. वद – ख, ग।
4. स तु – क।

त्रिचत्वारिंशदधिकशततमः सर्गः

॥ आशुकर्णादिचरितम् ॥

आगरायामभूदेको नाम्ना प्रेमनिधिर्द्विजः ।
पौराणिको महाभक्तः सदाचाररतः सदा ॥ 1 ॥

एकदा भाद्रमासे[1] स पर्जन्ये चातिवर्षति ।
ब्राह्मे मुहूर्ते पानीयं नेतुं स्नातुं समुत्थितः ॥ 2 ॥

दिवा चाण्डालसंस्पर्शाद्गतो रात्रे समुत्थितः ।
दृष्ट्वा महान्धकारं स कथं यामीति चिन्तयन् ॥ 3 ॥

तदैको दीपिकां हस्तं कृत्वाग्रे यमुनां व्रजन् ।
दृष्टः पश्चात्प्रमुदितो जगामाति निराकुलः ॥ 4 ॥

तत्र स्नात्वा जलं नीत्वा चलितः स्वगृहं प्रति ।
पुनर्दीपकमादाय[2] सोऽप्यग्रे चलितोऽभवत् ॥ 5 ॥

आगत्य स गृहद्वारि घटं धृत्वा स्थितः स्वयम् ।
ज्ञातुं प्रदीपहस्तं तं तद्रूपेणातिमोहितः ॥ 6 ॥

स ततोऽन्यत्र चागत्य कियद्दूरेऽति सत्वरम् ।
निर्वाप्य तं प्रदीपं तु स्वयमन्तर्दधेऽचिरात् ॥ 7 ॥

दृष्ट्वा प्रेमनिधिस्तत्र विस्मितो गृहमाययौ ।
तदारभ्य स तत्याज पानीयाहरणं निशि ॥ 8 ॥

मत्वा तं भगवद्रूपं स्वसहायार्थमागतम् ।
तस्य प्रेमनिधेर्गेहं कथायां पुरुषाः स्त्रियः ॥ 9 ॥

[3]बालवृद्धा युवतयः समागत्य च शुश्रुवुः ।
एकदा कोऽपि दुष्टात्मा दिल्लीशनिकटे गतः ॥ 10 ॥

प्राहं तं प्रेमनिधिना क्रियतेऽतीव पातकम् ।
आगरायां तु सर्वेषां स्त्रिय आगत्य वेश्मनि ॥ 11 ॥

पुराणव्याजतस्ताभि रमतेऽर्थं च बिभ्रति ।
इति श्रुत्वा ततो राजा पदातीन् चतुरो द्रुतम् ॥ 12 ॥

---

1. मासि – ख, ग।
2. दीपिका – क।
3. वृल – ख।

प्रेषयामास तानुक्त्वा कोपेन नृपतिः स्वयम्।
द्रुतमानयत प्रेमनिधिं पौराणिकं द्विजम्॥ 13 ॥

इत्युक्तास्ते समागत्य दृष्ट्वा प्रेमनिधिं द्विजम्।
धृत्वा निन्युर्नृपद्वारि स तु कृष्णमपूजयत्॥ 14 ॥

भोजयित्वा जलं दातुं चलितस्तैर्धृतस्तदा।
दृष्ट्वा प्रेमनिधिं राजा क्रोधेनोवाच भर्त्सयन्॥ 15 ॥

अहो क्व भक्ति [1]क्वान्य स्त्रीसमुदायनिषेवणम्।
इति राजवचः श्रुत्वा प्राह प्रेमनिधिर्द्विजः॥ 16 ॥

अहं श्रीकृष्णचरितं कथयामि निजे गृहे।
तत्रायान्ति न सन्देहः पुरुषाश्च स्त्रियोऽपि च ॥ 17 ॥

श्रोतुमेतत्तु जानामि सर्वा मे मातरो नृप।
इति श्रुत्वा नृपः क्रुद्धः सत्यं सत्यमिति ब्रुवन्॥ 18 ॥

भृत्यानाह निरुद्धायं स्थापनीयः क्वचिद्गृहे।
ततस्तैरोधितो गेहे सस्मार श्रीहरिं हृदि॥ 19 ॥

श्रोतारोऽनशनाः कृष्णं सस्मरुर्दुःखिता भृशम्।
ततो राजा निशि स्वप्नं ददर्श निजदेवताम्॥ 20 ॥

[2]अरे पिपासितोऽहं तु पानीयं देहि सत्वरम्।
कुतश्चैव पिपासेति[3] राजोक्ते पुनरब्रवीत्॥ 21 ॥

महापिपासितो यस्य हस्तात्पातुं समुद्यतः।
विनापराधं तं त्वं तत्परोधीर्दुष्ट वाक्यतः॥ 22 ॥

इति दृष्ट्वा भ्रमश्चायमिति मत्वा स्वपन् पुनः।
ततः पुनः समागत्य तं देवो वक्षसि क्रुधा॥ 23 ॥

पादेन ताडयामास न पाययसि मां जलम्।
तत उत्थाय नृपतिः स्वयं तत्र समागतः॥ 24 ॥

प्रणम्य प्रार्थयामास स्वापराधं क्षमापयन्।
ददौ ग्रामादिकं चापि न जग्राह स वै द्विजः॥ 25 ॥

---

1. कान्येषां – ख, ग।
2. अहो – ख।
3. नैव पिस्वेति – ख, ग।

शिविकायां समारोप्य प्रापयामास तं गृहम्।
सोऽपि स्नात्वा जलं दत्त्वा हरये श्रोतृभिः सह ॥ 26 ॥

द्वितीयदिवसे देवं सम्पूज्य बुभुजे स्वयम्।
एवं भजनदासोऽभूद्वाह्ये दीनतरोऽभवत् ॥ 27 ॥

महाभक्तो हरिं चित्ते साक्षाच्चक्र मनोबलात्।
बरेलीग्रामवास्येवं हरिनारायणोऽभवत् ॥ 28 ॥

हंसगावादयश्चासन्नुद्ध्ववो भक्तभक्तिमान्।
भेलसायान्तु तुलसीरामः साधूत्तमोऽभवत् ॥ 29 ॥

कल्याणरामदासौ द्वौ परमानन्द संज्ञितः।
अथ स्त्रियो महाभक्ता दमा वार्द्धरमा तथा ॥ 30 ॥

मीरा हीरा मणि लाली नीरालक्षा च पार्वती।
षोचनीः केशिका धाना गोमती यमुना तथा ॥ 31 ॥

[1]गङ्गाबाई तथा जीवा हर्षा राजकुमारिका।
एताः स्त्रियो महाभक्ताः कन्धरः केशवस्तथा ॥ 32 ॥

एवं केवलरामोऽभूत्सर्वभूतसुहृत्तमः।
गृहे गृहे स सर्वासां याचते स्मातिदीनवत् ॥ 33 ॥

श्रीकृष्णं भज कृष्णेति नामोच्चारणतत्परः।
दण्डेन वृषभं कश्चित् ताडयामास निर्दयः ॥ 34 ॥

दृष्ट्वा केवलरामस्तु[2] हा हा कृत्वापतद्भुवि।
यथा वृषस्य पृष्ठेऽभूद्दण्डघातक्षतं तथा ॥ 35 ॥

केवलस्यापि पृष्ठेऽभूत्सर्वैर्दृष्टं महाद्भुतम्।
एवं नरवरग्रामे पृथ्वीराजकुलोद्भवः[3] ॥ 36 ॥

आशुकर्णेति नाम्नाभूद् भीमपुत्रोऽतिभक्तिमान्।
कील्हशिष्यो महाराजस्तस्येदं तु व्रतं सदा[4] ॥ 37 ॥

प्रातराभ्य सायान्तं पूजास्थानान्ननिर्गमः।
न चान्य भाषणं [5]तत्र केवलराधनं हरेः ॥ 38 ॥

---

1. वादं – क।
2. दामास्तु – क।
3. स्तु निर्भयः – ख।
4. ख मध्ये लप्तपाठः।
5. तच्च – ख।

तावन्मध्ये किमप्यस्तु शुभं वाशुभमेव वा।
कदाचिन्नृपतिस्तत्र समायातोऽतिकोपनः ॥ 39 ॥

ग्राममध्येनाशुकर्णगृहे[1] तत्रागतः स्वयम्।
अथ तस्यागतो मृत्यो न तं प्राह किमप्यसौ ॥ 40 ॥

पूजयन्नेव तूष्णीं स हरेरग्रे स्थितो मुदा।
अथागतः स्वयं राजा भृत्यवाक्येन कोपितः ॥ 41 ॥

खड्गमादाय तद्भक्तिपरीक्षार्थं स निष्ठुरः।
तावत्सम्पूज्य स रामं द्वारमाच्छाद्य यत्नतः ॥ 42 ॥

बहिरेत्य पपातोर्व्यां दण्डवत्तं स्मरन् हृदि।
राजा गत्वा तथा दृष्ट्वा निश्चेष्टन्तं मृतं तथा ॥ 43 ॥

खड्गाग्रेणैव चरणे चिच्छेद स्वयमेव हि।
आशुकर्णो [2]नाविदच्चैतच्छिन्नं वा शोणितं स्तुतम् ॥ 44 ॥

उत्थाय चलितो गेहे तदा भूपं ददर्श ह।
नमस्कृत्वाञ्जलिं बध्वा अहो भाग्यमिति ब्रुवन् ॥ 45 ॥

तस्थौ तदग्रे राजापि जगर्हात्मानमात्मना।
वृथा छिन्नं पादतलमित्येवं विलपन् हृदि ॥ 46 ॥

तद्राज्यस्य करं तस्मै ददौ राजातिभक्तिमान्।
अथ कालेनाशुकर्णो ममार श्रीहरिं भजन् ॥ 47 ॥

श्रुत्वा दिल्लीश्वरो राजा महाशोकाकुलोऽभवत्।
आशुकर्णस्य यः पूज्यो रामतस्यार्चनाय सः ॥ 48 ॥

विप्रं नियुक्तवान् ग्रामं दत्त्वा तस्मै महोत्तमम्।
हरिवंशश्च कल्याणः श्रीरङ्गो विट्ठलस्तथा ॥ 49 ॥

सदानन्दः श्यामदासो अनुरागालषाभिधः।
सारुकल्याणनामानौ वंशीनारायणस्तथा ॥ 50 ॥

[3]चेलादासस्तु गोपालस्तथा गोपालशङ्करः।
महाभक्ता इमे ख्याताः कीर्तिता हरिभक्तिदाः ॥ 51 ॥

---

1. कर्णगृहात् – ख, ग।
2. चैवैतत् – ख, क।
3. वेना – क।

मथुरायां स्थिताः केचिन्[1]मथुराप्रान्तभूमिजाः ॥ 52 ॥

इति श्रीभगवद्भक्तिमाहात्म्ये आशुकर्णादिचरितं नाम
त्रिचत्वारिंशदधिकशततमः सर्गः ॥ 143 ॥

❊ ❊ ❊

चतुश्चत्वारिंशदधिकशततमः सर्गः

॥ समुदायभक्तिचरितम् ॥

तुम्बुरुक्षत्रियकुले हरिदासोऽतिभक्तिचरितमान्।
राजातिवैष्णवः प्रेम श्रीकृष्णे यस्य सर्वदा ॥ 1 ॥

शरणागतरक्षायां शिबिभूपसमः स वै।
प्रह्लाद इव भक्तेषु श्रीमद्भागवतेषु च ॥ 2 ॥

[2]जगदेवोऽल्पभूमीशः श्रीकृष्णार्च्चनतत्परः।
एकदा तु नटी काचिदागता तस्य नर्तितुम् ॥ 4 ॥

देवतानुगृहीता सा नृत्यगानविशारदा।
नृत्यन्ती जगदेवोऽथ[3] दृष्ट्वा तुष्टो बभूव ह ॥ 5 ॥

दत्त्वा धनान्यतृप्तःसन् शिरो दातुं समुद्यतः।
नटी दक्षेण हस्तेन गृहीत्वा पुनरब्रवीत् ॥ 6 ॥

राजन् गृहीतमेतत्ते शिरो दक्षेण पाणिना।
नानेनाहं ग्रहीष्यामि कस्मादपि न संशयः ॥ 7 ॥

[4]तावदेतच्छिरो राजन् त्वयि तिष्ठतु मामकम्।
इति श्रुत्वा नटीवाक्यं राजाछेतं न्यवर्तत ॥ 8 ॥

नर्तकी चापि तद्ग्रामादन्यत्र प्रययौ शुभा।
तत्रत्य भूपस्तां श्रुत्वा सर्वनृत्यकलावतीम् ॥ 9 ॥

नर्तयामास सदसि दृष्ट्वा नृत्यं तुतोष ह।
धनं दातुं समुद्युक्तः सापि तत्र च नर्तकी ॥ 10 ॥

---

1. केचन – ख, ग।
2. हरिदासः ख, क।
3. तां हरिदासो – क, ख।
4. तव एतच्छिरो – ख।

वामं प्रसारयामास करं दानजिघृक्षया[1]।
[2]तदा निवृत्तो नृपतिर्नटीं प्राहातिकोपनः ॥ 11 ॥

किमेवमपमानं मे मूर्खे कर्तुमिहेच्छसि।
श्रुत्वैवं सा नटी प्राह नाहं कुर्वे तथा नृप ॥ 12 ॥

दत्तोऽयं दक्षिणो हस्तो जगदेवाय वै मया।
अनेन तु गृहीतं यन्न तत्कोप्यर्प्पयिष्यति ॥ 13 ॥

अतोऽहं नैव गृह्णामि दक्षहस्तेन भूपते।
इति श्रुत्वा नृपः प्राह किं तद्वद ददाम्यहम् ॥ 14 ॥

इत्युक्ता सा नटी भूपं प्राहागत्य न याम्यहम्।
इत्युक्त्वा सा तु तत्कालं जगदेवसमीपगा ॥ 15 ॥

मदीयं वस्तु देहीति श्रुत्वा राजा ददौ शिरः।
ततः सा नर्त्तकी राजदेहं संस्थाप्य चाद्भुतम् ॥ 16 ॥

राजन्निदं गृहीतं भो दक्षहस्तेन वै मया।
दृष्ट्वा राजा [3]मुमूर्छाथ नमश्चक्रे नटीं तु [4]ताम् ॥ 17 ॥

अथ सा नर्तकी [5]मुण्डं जगदेवशरीरके।
योजयामास शक्त्या वै सोप्युत्तस्थौ नृपः स्वयम् ॥ 18 ॥

एवं भूतो जगदेव इति श्रुत्वा तु कस्यचित्।
राज्ञः पुत्री स्वजनकं प्राह निश्चितमानसा ॥ 19 ॥

जगदेवः पतिश्चेत्स्यात् तदा पाणिग्रहो मम।
इति श्रुत्वा पिता तस्याः जगदेवमुपागमत् ॥ 20 ॥

उवाच तनयामेनां[6] गृहाण विधिना मम।
जगदेवो न[7] स्वीचक्रे प्रार्थितोऽपि मुहुर्मुहुः ॥ 21 ॥

प्रतियज्ञेऽहं मृतोऽपि न तां द्रक्ष्यामि कन्यकाम्।
ततः कन्यापिता क्रुद्धो जगदेवस्य वै शिरः ॥ 22 ॥

---

1. ध्रक्षयात् – क।
2. दान – क।
3. मुर्च्छाथि – क, ख।
4. तत् – क।
5. मुण्डां – क।
6. मेतां – क।
7. न स्वीचक्रे जगदेवः – क, ख।

छित्वा तत्सम्मुखीकृत्य कन्याग्रे धारितं क्रुधा।
अथ तन्मस्तकं तत्र विपरीतमुखं त्वभूत्॥ 23॥

न कन्यायाः सम्मुखे वै स्थितमेतन्महाद्भुतम्।
अथ तं तु मृतं ज्ञात्वा पश्चात्तापो महानभूत्॥ 24॥

सर्वाः प्रजाश्च दुःखार्ता शोकोऽन्येषां महानभूत्।
राजादीनां तु सर्वेषामेतस्मिन्नन्तरे नटी॥ 25॥

सैवागता ददर्शाथ जगदेवं तु तादृशम्।
स्वशक्त्या योजयामास शिरो देहेन तत्क्षणात्॥ 26॥

जगदेवः समुत्तस्थौ नीत्वा तं नर्तकी ययौ।
एवं निश्चितबुद्धिः स हरिदासोऽतिवैष्णवः॥ 27॥

तस्यैका कन्यका ह्यासीत् पूजावस्तुविधायिनी।
एवमेकः स्थितो गेहे वैष्णवातियुवा स वै॥ 28॥

राज्ञः पूजार्थं पुष्पादि समानयनकारकः।
परन्तु विषयज्ञानरहितौ तावुभावपि॥ 29॥

एकदा स तु वै साधुग्रीष्मे प्रासादमस्तके।
अट्टालिकायां [1]सुष्वाप राजकन्यापि सा ययौ॥ 30॥

शिष्ये तत्रैव धर्म्मार्ता निर्विकारेण चेतसा।
हरिदासोऽप्यथ[2] प्रातर्गतस्तत्र ददर्श तौ॥ 31॥

शयानावेकशय्ययामाश्लिष्टौ निद्रितावुभौ।
दृष्ट्वा स्वीयाम्बरं ताभ्यां ददावुपरि च स्वयम्॥ 32॥

आगत्याधो न चुक्रोध राजकार्य्यपरोऽभवत्।
अथ तावुत्थितौ दृष्ट्वा राजवस्त्रं तु शङ्कितौ॥ 33॥

दृष्ट्वामीदृशौ[3] राजा किं ज्ञास्यति हृदि स्वयम्।
इत्येवं चिन्तयन्साधुश्चलितोऽन्यत्र दुःखितः॥ 34॥

अथ राजा तमेकान्ते बोधयामास मा व्रज।
जगति त्वं कलङ्की स्यात्पुत्री तुभ्यं ददाम्यहम्[4]॥ 35॥

---

1. सुप्तः स – क, ख।
2. अथ प्रातर्हरिदासो – क, ख।
3. वां सृदशौ – ख।
4. ख मध्ये लुप्तपाठः।

इत्युक्त्वा विधिना कन्यां ददौ तस्मै स्वजातये।
धनं ग्रामान्प्रदायास्मै नृपं तुल्यं चकार तम्॥ 36 ॥

यूनोरप्युभयोश्चित्ते न विकारो[1] बभूव यत्।
हरिदासोऽपि तं दृष्ट्वा न चुकोपाति सोऽधुना॥ 37 ॥

कृष्णदासो बभूवैको महाभक्तो हरेः पुरः।
नृत्यतस्तस्य चैकस्माच्चरणान्नूपुरं[2] च्युतम्॥ 38 ॥

स चैकचित्तो नावैक्षत्तदैकः कोऽपि बालकः।
दिव्यं तु नूपुरं दत्त्वा गतः पत्न्या निरीक्षितः॥ 39 ॥

नृत्यान्ते तत्स्वयं दृष्ट्वादिव्यमेकं तु नूपुरम्।
कस्मादिदमभूत्पत्नीं प्राह साप्यब्रवीच्च तम्॥ 40 ॥

एकस्ते बालकः पादे नृत्यतो नूपुरं ददौ।
इति दृष्टं मया स्वामिन् श्रुत्वैतत्प्रणनाम ताम्॥ 41 ॥

अथ संन्यासिनो भक्ताः कीर्त्यन्ते नामतो मया।
श्रीदामोदरतीर्थाख्यो माधवस्वामि संज्ञकः॥ 42 ॥

रामभद्रस्वामिनामा तथा श्रीमधुसूदनः।
सरस्वत्युपनामासौ गीताव्याख्याकरो महान्॥ 43 ॥

अपरो जगदानन्दः प्रबोधानन्द इत्यपि।
[3]कृष्णचैतन्यशिष्योऽयं वृन्दावननिवास[4]कृत्॥ 44 ॥

कील्हशिष्यो बभूवैको द्वारकादास संज्ञकः।
एवं पूरणदासोऽभूत्तथा लक्ष्मणभट्टकः॥ 45 ॥

कृष्णदासस्तु यः पूर्वमुक्तः स तु वने गतः।
पयोव्रती तत्र चैकः सायङ्काले समागतः॥ 46 ॥

क्षुधार्दितो व्याघ्र एकः कृष्णदासस्य सन्निधौ।
तूष्णीं तस्थौ ततः कृष्णदासोऽतीव दयान्वितः॥ 47 ॥

उत्थायाग्रे तृणं दत्त्वा विशात्रैत्याब्रवीद्वचः।
भक्षयेदं शरीरं मे इत्युक्त्वा तत्समीपगः॥ 48 ॥

---

1. किकारो – ख।
2. कस्मिन् चरणे – ख, क।
3. कृत्वा – ख।
4. चाम – ख।

श्रुत्वा व्याघ्रस्तृणे तस्मिन्नुपविष्टः क्षुधार्दितः ।
शशाक नैव किञ्चित्स कर्तुं त्यक्तुं च भक्षितुम् ॥ 49 ॥

ज्ञात्वैतत्कृष्णदासस्तु जङ्घामांसं विभिद्य सः ।
ददौ व्याघ्राय मुदितो बुभजे सोऽतिहर्षितः ॥ 50 ॥

किञ्चित्पत्रे परित्यज्य सोत्थितः प्रययौ क्वचित् ।
पुनश्छेत्स्यत्यं जङ्घमिति ज्ञात्वाऽत्यजत् कियत् ॥ 51 ॥

अथान्तरे तु भगवान्स्वयं वैष्णवरूपधृक् ।
समागत्य च पस्पर्श ददौ तत्रौषधं किमु ॥ 52 ॥

निर्व्यथं[1] पूर्ववत्सद्यो जातं [2]जङ्घस्थलं शुभम् ।
एवमातिथ्यकृत्साधुः कृष्णदासोऽतिवैष्णवः ॥ 53 ॥

इति श्रीभगवद्भक्तिमाहात्म्ये [3]समुदायभक्तिवर्णनं नाम
चतुश्चत्वाङ्करशदधिकशततमः सर्गः ॥ 144 ॥

❊ ❊ ❊

पञ्चचत्वारिंशदधिकशततमः सर्गः

॥ भगवान्दासचरितम् ॥

दक्षिणे विष्णुभक्तोऽभूत् श्रीगदाधरदासकः ।
स [4]पठानपुरग्रामे एकदागत्य संस्थितः ॥ 1 ॥

ग्रामाद्बाह्येऽतिवृष्टिस्तदाभूदथ तत्स्थलात् ।
न [5]चोत्तस्थौ स्थितस्तत्र काष्ठपाषाणवन्मुदा ॥ 2 ॥

अथ तत्रागतश्चैको वणिक् श्रीकृष्णभक्तिमान् ।
स तस्मै प्रददौ तत्र कृष्णमन्दिरमुत्तमम् ॥ 3 ॥

तत्र मूर्तिं हरेर्धृत्वा भक्तानापूजयंस्थितः ।
तस्य चेदं व्रतं नित्यं महाभक्तस्य चाद्भुतम् ॥ 4 ॥

न किञ्चिन्मन्दिरे स्थाप्य दातव्यं सर्वमेव हि ।
एकस्मिन् दिवसे किञ्चित् शिष्येणैकेन रक्षितम् ॥ 5 ॥

---

1. धं – ख।
2. तंघ्रा – ख।
3. नर्तकी – ख।
4. वुपन – ख।
5. समु – क, ख।

प्रातरर्थं तदप्याशु दापयामास वै स्वयम्।
शिष्यमाह पुनः प्रातर्भविष्यति न संशयः ॥ 6 ॥

अथ [1]जातं दिनं तत्र द्वितीये दिवसे गृहे।
भोक्तुं नैवागतं किञ्चित् शिष्यः स पीडितः[2] क्षुधा ॥ 7 ॥

चकार मनसा चिन्तां[3] कदा यास्याम्यहं सुखम्।
भोक्ष्ये गत्वान्यभवने इति दुःखादचिन्तयत् ॥ 8 ॥

दृष्ट्वा क्षुधार्तं तं शिष्यं गुरुश्चातीव चिन्तितः।
अथान्तरे तु भगवान् नीत्वा मुद्राशतद्वयम् ॥ 19 ॥

श्रीगदाधरदासाय ददौ वैश्यस्वरूपधृक्।
स तु शिष्यं समाहूय गृहीत्वेदं व्रजाधुना ॥ 10 ॥

कदा यास्यामि चेत्येवं [4]सफलस्त्वन्मनोरथः।
इति श्रुत्वा स शिष्यस्तु लज्जितस्तं क्षमापयन् ॥ 11 ॥

तस्थौ सेवानुकूलः स गुरुस्तस्मात्समुत्थितः।
वृन्दावनमथागत्य यावज्जीवमुवास सः ॥ 12 ॥

अथ नारायणो दासो बदरीनाथस्य दर्शनम्।
कृत्वाथ तीर्थयात्रायां मथुरां समुपागतः ॥ 13 ॥

श्रीमत्केशवदेवस्य द्वारि वासं चकार ह।
दृष्ट्वैकं तत्र वृत्तान्तं सोऽतिदुःखममन्यत ॥ 14 ॥

देवं दिदृक्षवः सर्वे द्वारि त्यक्त्वाह्युपानहौ।
अन्तर्गत्वा हरिं दृष्ट्वा उपानच्चौर्यशङ्कया ॥ 15 ॥

शीघ्रमागत्य जगृहुः स्वे स्वेऽपि उपानहौ।
इति ज्ञात्वा स भक्तस्तु तान्सर्वानेकदाब्रवीत् ॥ 16 ॥

भवन्तो यान्तु निःशङ्कं दर्शनार्थं न संशयः।
अहं पश्यामि भवतामुपानह इमाः पुनः ॥ 17 ॥

तदादि सर्वे निःशङ्कं ददृशुः केशवं जनाः।
एवमेकदिने कोऽपि दुष्ट एकः समागतः ॥ 18 ॥

---

1. यातं – क।
2. परितः – ख, ग।
3. चित्ते – क।
4. फलेऽस्मान्मनोरथः– ख।

[1]कृत्वैकं भारवाहीकं निन्ये तस्माद्बहिः क्वचित्।
वस्तुपोटलिकां बध्वा ददौ तन्मस्तकोपरि॥ 19॥

नीत्वा भारं सुखी सोऽपि ययौ दुष्टमनुव्रजन्।
अथ यातः कियद्दूरं तत्रैको मिलितः पथि॥ 20॥

दृष्ट्वा नारायणं दासं नमस्कृत्याब्रवीच्च तम्।
दृष्टं किमेतत्ते कर्म्म महानर्थ प्रदायकम्॥ 21॥

अयं जगद्गुरुः साक्षाद्भगवन्तं न[2] पश्यति।
धृत्वा तं भृत्यवद्भारं वाहयस्याति[3] निर्भ्रमम्॥ 22॥

इति श्रुत्वा स दुष्टोऽपि प्रणनाम क्षमापयन्।
स तु नारायणो दासो न चुकोप यथा स्थितः॥ 23॥

दुष्टोऽपि तं सेवमानो महाभक्तो बभूव ह।
भगवद्भक्तसंसर्गात्सापराधोऽपि वै तथा॥ 24॥

भगवानिति नाम्नाभूद्भक्तो वै मथुरापुरि।
एकदा यवनः कोऽपि प्रभुस्तत्र समागतः॥ 25॥

आज्ञां ददौ महादुष्टो मालां मुद्रां च यः पुमान्।
धारयिष्यति तं चाहं हनिष्यामि न संशयः॥ 26॥

ज्ञात्वैवं माथुराः सर्वे मालां मुद्रां च तत्यजुः।
दुष्टप्रभुभयात्तत्र भगवान्नजहौ पुनः॥ 27॥

श्रुत्वा तं दुष्टनृपतिर्भगवन्तं समानयत्।
उवाच [4]तं ममाज्ञां भोः कुतो न कृतवानसि॥ 28॥

तवाज्ञोल्लङ्घने राजन्मृत्युरेवेति वै श्रुतम्।
मालामुद्रापरित्यागान्मृत्युरेव प्रियो मम॥ 29॥

इति श्रुत्वा ततो राजा चाण्डालाय समर्प्पयत्।
नीत्वेमं ग्रामतो बाह्ये जहीत्युक्त्वा रहः पुनः॥ 30॥

उवाच तत्र किन्त्वेष भीतो वक्ष्यति तत्क्षणे।
मदग्रे कथय त्वं भो इति श्रुत्वा जगाम सः॥ 31॥

---

1. धृत्वा – क, ख।
2. हि – ख, ग।
3. व्यषि – ख।
4. ख मध्ये लुप्तपाठः।

नीत्वा तं भगवद्दासं चाण्डालः प्राह तं पुनः।
सर्वैस्त्यक्ता[1] [2]भयान्माला जीवन्ति सुखिनस्त्विह ॥ 32 ॥

त्वं कुतो न त्यजस्येनां[3] त्यक्त्वा जीव सुखी भव।
इति श्रुत्वाब्रवीत्तं तु चाण्डालं चातिहर्षितः ॥ 33 ॥

प्राणत्यागं वरं मन्ये मालात्यागान्न संशयः।
तस्माद्यथोक्तं कर्त्तव्यं त्वया चाण्डाल सत्वरम् ॥ 34 ॥

इति श्रुत्वा वचस्तस्य चाण्डालोऽप्यतिहर्षितः[4]।
समागत्याब्रवीत्सर्वं भगवद्दासभाषितम् ॥ 35 ॥

राजा श्रुत्वा स्वयं तत्र गत्वा [5]बद्धाञ्जलिस्तदा।
निपत्यपादयोर्भक्तं प्राह दोषं क्षमापयन् ॥ 36 ॥

धन्योऽसि भक्तराज त्वं[6] तव भक्तिर्दृढा हरौ[7]।
न त्वया सदृशः कोऽपि दृष्टो भक्तः श्रुतोऽपि वा ॥ 37 ॥

यत्त्वयाद्य परित्यक्ताः प्राणा भक्तिस्तु रक्षिता।
अतः परं गृहाण त्वं यदिच्छसि धनादिकम् ॥ 38 ॥

इति श्रुत्वा तु भगवान् न किञ्चिद्धनमैच्छत।
राज्ञे प्रसन्नहृदयो दत्त्वाशिषमथो ययौ ॥ 39 ॥

एवं कल्याणदासोऽभून्महोदारस्तु[8] वैष्णवः।
[9]कन्धरस्य च शिष्योऽन्य आत्मारामस्तथैव च ॥ 40 ॥

गोविन्ददास इत्येवमाद्या भक्तास्तथा परे।
एषां तु स्मरणं नृणां हरिभक्तिप्रदायकम् ॥ 41 ॥

इति श्रीभगवद्भक्तिमाहात्म्ये भगवान्दासचरितं नाम
पञ्चचत्वारिंशदधिकशततमः सर्गः ॥ 145 ॥

❊ ❊ ❊

---

1. त्युक्त्वा – ख, ग।
2. भवा – क।
3. ख मध्ये लुप्तपाठः।
4. राजसन्निधि – क।
5. वध्वा – ख, ग।
6. तव – क।
7. ईदाहादि – ख।
8. सदोदरस्तु – क, ख।
9. गं – ख।

षट्चत्वारिंशदधिकशततमः सर्गः

॥ समुदायभक्तिचरितम् ॥

वासवकुमारनामाभूद्राजा चातीव वैष्णवः ।
स कृष्णमूर्तिं सर्वत्र नीत्वा वव्राज सर्वदा ॥ 1 ॥

दास्यकर्म तु तन्मूर्तेश्चक्रे तस्य त्विदं व्रतम् ।
इन्द्रप्रस्थं कदाचित्स समायातो नृपाज्ञया ॥ 2 ॥

तत्र पूजार्थमुदकं यमुनातः समानयन् ।
जयसिंहेन दृष्टः सन्संस्तुतः परमादरात् ॥ 3 ॥

धन्योऽसि त्वं महाराज तत्रैव जन्मसार्थकम् ।
यस्त्वमेवं हरेर्भक्तिं कुरुषेदं भवर्जितः ॥ 4 ॥

इति श्रुत्वा स नृपतिं जयसिंहमुवाच ह ।
का मे भक्तिर्महाराज भक्ता ते भगिनी परा ॥ 5 ॥

नाम्ना दीपकुमारीति न तद्भक्तिकलापि मे ।
यया साकं हरिः साक्षात्स्वयं वसति सर्वदा ॥ 6 ॥

श्रुत्वेदं तस्य वचनं जयसिंहोऽतिहर्षितः ।
त्यक्त्वा क्रोधं भगिन्यै स द्रुतं ग्रामं ययौ पुनः ॥ 7 ॥

सापि साध्वी महाभक्ता हरिपूजनतत्परा ।
ग्रामोत्पन्नै[1]र्धनैस्साधून् तोषयामास भक्तितः ॥ 8 ॥

गिरिधरेति नामेको[2] गोपोऽभूद्वैष्णवोत्तमः ।
साधुपादोदकं भक्त्या पपौ तस्य दृढं व्रतम् ॥ 9 ॥

एकदा कतिचिद्धूर्ता[3] एकत्रीभूय चागताः ।
गृहीत्वा साधुमृतकमाहुरग्रे निधाय तम् ॥ 10 ॥

अहोऽयं वैष्णवः साधो गृह्यतां चरणोदकम्[4] ।
इति श्रुत्वा गिरिधर तत्कालं परया मुदा ॥ 11 ॥

प्रक्षाल्य चरणौ तस्य जग्राह चरणोदकम् ।
ततस्तत्कालमेवासौ जिजीव स शवोऽद्भुतम् ॥ 12 ॥

---

1. त्यत्रै – ख, ग ।
2. नामैको – ख ।
3. वती – ख ।
4. ख मध्ये लुप्तपाठः ।

दृष्ट्वा सर्वेऽपि ते धूर्ताः प्रशंसन्तः पलयिताः।
भयात्तदग्रे न स्थातुं शेकुस्ते दुष्टचारिणः॥ 13॥

गोपाली नामतः काचिद्गोपी भक्तिमती त्वभूत्।
बालगोविन्दरूपं सा ध्यायती मातृवत्सदा॥ 14॥

यशोदाया[1] गतिं प्राप बालगोपालसेवनात्।
रामदासो बभूवैको मथुरायां तु भक्तिमान्॥ 15॥

वसन् वत्सवने सोऽथ साधुसेवां चकार ह।
एकदा तस्य कन्याया विवाह समयो ह्यभूत्॥ 16॥

कृत्वा पक्वान्नमखिलं माता[2] संस्थाप्य वै गृहे[3]।
पुत्र्या[4] सह गता क्वापि निमन्त्रणवशेन वै॥ 17॥

अथागता बुभुक्षार्ताः साधवो राममन्दिरे।
कुत्रास्ति रामदासश्चेत्यूचुः श्रुत्वा सुतागता॥ 18॥

पादप्रक्षालनं कृत्वा पक्वान्नं ह्यखिलं ददौ।
भोजयित्वा गृहद्वारं कपाटेन पिधाय च॥ 19॥

तूष्णीं तस्थौ बहिर्गत्वा समायाता ततस्तु सा।
सायं गृहेऽनु मातास्याः दीपं दातुं समागता॥ 20॥

ददर्श नैव पक्वान्नं पुत्रीं प्राहातिदुःखिता।
साऽपि भीत्यातिदुःखार्त्ता मातृवत्तममन्यत॥ 21॥

तस्मिन्नेव क्षणे तस्यावरो द्वारि समागतः।
बन्धुभिर्बहुभिः सार्द्धं तं दृष्ट्वातीव चिन्तिता[5]॥ 22॥

रामदासोऽपि ते सर्वे वैष्णवाः अपि चिन्तिताः।
तन्मध्ये कोऽपि चायातो मिष्टान्नं द्रष्टुमुत्सुकः॥ 23॥

तदैव भक्तिमाहात्म्यात्कृपया श्रीहरेरपि।
मिष्टान्नं पर्वताकारं दृष्ट्वा सोऽतीव हर्षितः॥ 24॥

---

1. यसोदवे – ख।
2. गृहे – ख, क।
3. तत्सुता – क, ख।
4. मात्रा – क, ख।
5. हर्षितः – क।

दर्शयामास तान्सर्वान् ततस्तेऽतीव हर्षिता:।
भोजयामासुरादाय गृहान्मिष्टान्नमुत्सवे ॥ 25 ॥

मत्वा हरिकृपां पूर्णां बभूवुस्तं गतव्यथा:।
एवं सारस्वतो विप्रो रामदासो[1] बभूव च ॥ 26 ॥

महाभक्त: साधुसेवी वृन्दावननिवासकृत्।
सूजा नृपतिमन्त्री तु भगवन्तेति विश्रुत: ॥ 27 ॥

वृन्दावननिवासिभ्य: साधुभ्योऽर्थं ददौ मुदा।
एकदा चलितस्तस्य गुरुर्वृन्दावनात्स्वयम् ॥ 28 ॥

भगवन्ताख्य निकटे श्रुत्वा सोऽतीव हर्षित:।
पत्नीं प्राह प्रियेऽभ्येति गुरुस्तस्मै ददामि किम् ॥ 29 ॥

श्रुत्वा सापि मुदा प्राह सर्वस्वं गुरवेऽर्प्पय।
वल्कलं परिधायावां स्थास्यावोऽस्माद् गृहाद्बहि: ॥ 30 ॥

इति श्रुत्वा स मुदित: पत्नीं तां प्रशशंस ह।
एवं मनोरथं ज्ञात्वा गुरुर्मार्गान्न्यवर्त्तत ॥ 31 ॥

भूत्वातीव स चोद्विग्न: पादौ द्रक्ष्याम्यहं कदा[2]।
इति चिन्तापरो वित्तान्यादाय स्वयमागत: ॥ 32 ॥

भक्त्या समर्प्य गुरवे साधुभ्य: प्रददौ धनम्।
स्थित्वा कियद्दिनं तत्र गत: स भगवान् पुन: ॥ 33 ॥

भुक्त्वा तत्राखिलान् भोगानन्ते रोगसमन्वित:।
वृन्दावनाय गेहात्तु चलितो बन्धुभिर्यदा ॥ 34 ॥

गतोऽन्तिके तदा बन्धून् पप्रच्छ नयथ क्व भो:।
ऊचुर्वृन्दावनं याम:[3] श्रुत्वा तान्स न्यवारयत् ॥ 35 ॥

अहोऽत्रैव तु रक्ष्योऽहं गत्वा तत्र गमिष्यति।
नैव मलमयं देहं तत्र धक्ष्यथ वै मम ॥ 36 ॥

दह्यमानाद्यदस्मात्तु दुर्गन्ध: प्रभविष्यति।
साधूनां च प्रभोश्चैव चेतोऽनुत्साहकारक: ॥ 37 ॥

---

1. राजा – ख।
2. ख मध्ये लुप्तपाठ:।
3. ग्रामा: – क।

इत्युक्त्वा स मृतस्तत्र तस्मिन्नेव क्षणे पुनः।
सर्वैः वृन्दावने दृष्ट एकाकी कुञ्जमध्यगः॥ 38॥

पुनर्नैव च केनापि दृष्टः कुत्रापि सोऽद्भुतम्।
एवं लालमतीबाई राधाकृष्णप्रियाभवत्॥ 39॥

वंशीवटे तथा कुञ्जे कालिन्दीपुलिने तथा।
गोवर्द्धने तथाख्ये कृष्णभक्तिपरायणा॥ 40॥

अन्वेषयन्ती तौ प्रेम्णा यत्र यत्र [1]जनोऽब्रवीत्।
तत्र तत्र तु विश्वासाद् द्रष्टुं याता तदैव सा॥ 41॥

एवं भ्रमन्तीं विश्वासात्क्वचित्कुञ्जे ददर्श वै।
विकल्परहिता साध्वी सर्वभावेषु सत्यताम्॥ 42॥

वहन्ती प्राप तौ भक्त्या राधाकृष्णौ तपस्विनी॥ 43॥

इति श्रीभगवद्भक्तिमाहात्म्ये [2]समुदाय भक्तिचरितं नाम षट्चत्वाङ्करशदधिकशततमः सर्गः॥ 146॥

❊ ❊ ❊

सप्तचत्वारिंशदधिकशततमः सर्गः

॥ जगन्नाथ-मनीराम-गोविन्दठक्कुरचरितम्॥

अन्तर्वेदे बभूवैकः चिलौलीग्रामसंम्भवः।
द्विवेदस्तु जगन्नाथो नानाशास्त्रधनैर्युतः॥ 1॥

एकदा वाजपेयेन यष्टुं चक्रे मनो द्विजः।
ग्रामे तु चन्दनपुरे सम्भारान् बहुशोऽकरोत्[3]॥ 2॥

अध्वर्य्यवोऽश्वार्त्विजश्च होतारश्च तथैव ह।
उद्गातारः समायाता वाराणस्यां निमन्त्रिताः॥ 3॥

अन्येप्यामन्त्रितास्तेन ये चान्तर्वेदवासिनः।
आगताः[4] ब्राह्मणाः सर्वे राजानः सपुरोहिताः॥ 4॥

---

1. जलो – ख।
2. लालामती – ख।
3. कृत् – क।
4. आगत्य – ख, ग।

तत्र कूपोदकं चासीत्समुदायो महानभूत्।
सर्वे सशङ्कितास्तत्र विना वारि तु किं भवेत्॥ 5॥

जगन्नाथस्तु गङ्गाया भक्तो वार्घ्यवस्थितः[1]।
गङ्गापूजां प्रकुर्वाणो गङ्गानाम जपन्प्रियम्॥ 6॥

गव्यूत्युपरि गङ्गापि प्रवहन्ती स्थिता तदा।
गङ्गां तां तु जगन्नाथो गत्वा स्तुत्वा न्यमन्त्रयत्॥ 7॥

विष्णुपादार्धसम्भूते गङ्गे त्रैलोक्यतारिणि।
निमन्त्रयामि त्वां देवि तत्र याहि कृपां कुरु॥ 8॥

इति सम्प्रार्थ्य गङ्गां स समायातो गृहं द्विजः।
सुष्वाप[2] रात्रौ सर्वेषां शिष्टाचारं विधाय च॥ 9॥

अथ रात्रौ समायाता गङ्गा तद्ग्रामसन्निधौ।
जलकल्लोलनिर्घोषैर्बोधिता किल मानवाः॥ 10॥

आगत्य तज्जलं मार्गान्तरेण च ययौ पुनः।
गङ्गायामेव तावत्तु सुस्थिरं च बभूव[3] तत्॥ 11॥

अथोत्थितास्तु कल्लोलनिर्घोषाद्ग्रामवासिनः।
निमन्त्रिता अपि जना जगन्नाथोऽपि तैः सह॥ 12॥

गङ्गाया अग्रतो गत्वा[4] पूजयामास भक्तितः।
स्तुत्वा सर्वे जना गङ्गां जगन्नाथं च तुष्टुवुः॥ 13॥

प्रातरारभ्य ते सर्वे स्नानपानावगाहनैः[5]।
क्रीडन्तो जाह्नवीतोये जाताः सर्वेऽतिहर्षिताः॥ 14॥

ततो जाते वाजपेये सुवर्णानि च दक्षिणाः।
दत्त्वा विसर्जयामास[6] ब्राह्मणानतिभक्तितः॥ 15॥

गतेषु सर्वविप्रेषु तुष्टे सामाजिके जने।
जगन्नाथस्तु सम्भारान् दातुं गङ्गातटे ययौ॥ 16॥

---

1. ल्पावधि संस्थितः – ख।
2. सुष्वाप – क, ख।
3. श्चलान्तरमिवाभवत्।
4. भूत्वा – ख।
5. स्नात्वायानावगाहनैः – ख, ग।
6. परमासु – क।

सप्रार्थ्य जाह्नवीं देवीं ते देवा च कृताञ्जलिः।
मातर्गङ्गे नमस्तेऽस्तु क्षमस्व दुर्नयं मम॥ 17॥

तिष्ठात्र वा सदा देवि व्रज तत्र निजेच्छया।
कृतकृत्योहमभवं त्वत्प्रसादान्न संशयः॥ 18॥

अथ स्थित्वा कियत्कालं ययौ गङ्गा निजस्थलम्।
तदारभ्य द्विवेदोऽपि वाजपेयी बभूव ह॥ 19॥

एवं भक्तेस्तु माहात्म्यं यद्गङ्गा समुपागता।
अद्यापि वर्षासमये तत्रायाति च जाह्नवी॥ 20॥

प्रसिद्धमेतत्सर्वत्र कान्यकुब्जेषु वै नृषु[1]।
तस्यापि सन्ततिर्देशे बभूवातिप्रतिष्ठिता॥ 21॥

मनीराम इति ख्यातो वाजपेयी वटेश्वरे।
सोऽतिभक्तो दयायुक्त एकपुत्रो बभूव ह॥ 22॥

एकदा तस्य पुत्रस्तु ममार दैवयोगतः।
मनीरामस्तु शोकार्तो गृहीत्वा तनयं स्वयम्॥ 23॥

उपविष्टो हरिं ध्यायन् तुष्टा वेशं कृतैः पदैः।
जाते शततमे[2] पद्ये उत्तस्थौ स मृतः शिशुः॥ 24॥

दृष्ट्वा सर्वे महाश्चर्यं मनीरामं प्रतुष्टुवुः।
एवं भक्तिवशः कृष्णो जीवयामास बालकम्॥ 25॥

मैथिलः श्रोत्रियश्चैको विप्रो गोविन्दठक्कुरः।
वेदशास्त्रार्थतत्त्वज्ञो गोपालार्च्चनतत्परः॥ 26॥

काव्यप्रदीपकर्तासौ देवीपूजनपद्धतिम्।
चकार मन्त्रशास्त्रं स साधकानां च सिद्धिदम्॥ 27॥

नवनीतं च तुलसीपत्रं दत्त्वार्चने[3] हरेः।
श्रीकृष्णाय समर्प्यान्नं[4] बुभुजे स च नान्यथा॥ 28॥

---

1. नृणाम् – क, ख।
2. संत – ख।
3. पूजने – क, ख।
4. दैवान्नं – क, ख।

यद्दिने न मिलत्येतत्तद्दिने जलमप्यहम्।
न पिबामीति सकल्पस्तस्य नित्यो महात्मन: ॥ 29 ॥

एकदा स तु काश्मीरे ययौ मम्मटपण्डितम्।
काव्यप्रकाशकर्त्तारं द्रष्टुं यात्रां समाचरन्॥ 30 ॥

उव्वटो मम्मटश्चैव कैयटश्चेति ते त्रय: ।
कैयटो भाष्यटीका कृदुव्वटो वेदभाष्य कृत्॥ 31 ॥

तद्गृहद्वारि गत्वा स स्थित्वा पप्रच्छ तत्स्त्रियम्।
कुत्रास्ते मम्मटश्चापि द्रष्टुमिच्छाम्यहं तु तम्॥ 32 ॥

इत्युक्ता साब्रवीत्तं तु तिष्ठात्रैवागमिष्यति।
एष कूपोऽस्ति चात्र त्वं तावत्स्नानं समाचर॥ 33 ॥

इत्युक्त्वा सा गता गेहे सोऽपि गोविन्दठक्कुर: ।
कूपे[1] दूरतटं वारि चाप्राप्यायं तथाविशत्॥ 34 ॥

एवं गते मुहूर्ते तु मम्मटोऽपि समागत: ।
श्मश्रुकेशधर: चर्म्मकञ्चुकं पादयोर्दधन्॥ 35 ॥

तं दृष्ट्वा याञ्चकारं[2] श्रीमद्गोविन्दठक्कुर: ।
शङ्कितो मम्मटस्तं तु नमश्चक्रेऽतिभक्तिमान्॥ 36 ॥

आहाहं[3] मम्मटो ब्रह्मन् भवान्कस्मादिहागत: ।
सोऽप्युवाचातिसंदिग्धो रूपं दृष्ट्वा च मम्मटम्॥ 37 ॥

जाते परस्परालापे मम्मट: प्राह मैथिलम्।
स्नानं कुतो नैव कृतमपराह्ण: समागत: ॥ 38 ॥

इत्युक्त: सोऽब्रवीत्तं तु जलमत्रास्ति दूरत: ।
विना तादृग्गुणेनात्र कथं स्नानं करोम्यहम्॥ 39 ॥

इति श्रुत्वा वचस्तस्य मम्मटस्त्वरितं गृहे।
गत्वा पात्रं समानीय स्नानोपकरणं[4] तथा॥ 40 ॥

---

1. पूजये – क।
2. यचनाकारं – क, ख।
3. आर्हहम् – ख, ग।
4. स्नान च करणं – ख।

आगत्य कूपनिकटे जलमादाय पाणिना।
अभिमन्त्र्य जलं कूपे चिक्षेप तत्प्रभावतः ॥ 41 ॥

आकृष्टं चाभवत्तत्र जलं कूपमुखावधि।
गोविन्दठक्कुरं प्राह कुरु स्नानमिहागतः ॥ 42 ॥

इत्युक्त्वा जलपात्रेण करेणादाय तज्जलम्।
सस्नौ स्वयं ददर्शैतत् श्रीमद्गोविन्दठक्कुरः ॥ 43 ॥

मत्वाश्चर्यं ततः सोऽपि स्नानं चक्रे मुदान्वितः।
सम्पूज्य पक्वा भुक्त्वा च तस्थौ गोविन्दठक्कुरः ॥ 44 ॥

मम्मटोऽपि समायातो भ्रातृभ्यां सह तत्र ह।
अथ काव्यप्रकाशं तं दर्शयामास मम्मटः ॥ 45 ॥

गोविन्दठक्कुरो दृष्ट्वा ग्रन्थं मम्मटनिर्मितम्।
काव्यप्रदीपस्वकृतं दर्शयामास तान्स्वयम् ॥ 46 ॥

दृष्ट्वा तेऽप्यतिसन्तुष्टाः प्रतिलिख्य[1] जहुश्च तम्।
गोविन्दठक्कुरः काव्यप्रकाशं जगृहे स्वयम् ॥ 47 ॥

एवं परस्परस्नेहे जाते गोविन्दठक्कुरः।
प्रतस्थे मिथिलाप्रान्तं दासेन सहितो मुदा ॥ 48 ॥

एकस्मिन् दिवसे मार्गे न प्राप्तं तुलसीदलम्।
अनशनस्तदा तस्थौ द्वितीयदिवसे पुनः ॥ 49 ॥

मार्गच्युतो महारण्ये सम्प्राप्तोऽतिपिपासितः।
बुभुक्षितस्तरुतले[2] तस्थौ गन्तुमशक्तवत् ॥ 50 ॥

दासमाह न चाहं तु गन्तुं शक्तोस्म्यतः परम्।
इत्युक्तः स तु दासो वै रुदन्नत्र समुत्थितः ॥ 51 ॥

कियद्दूरे ययौ मार्गमन्वेष्टुं गां ददर्श ह।
गोपालबालमेकं तु श्यामं द्वादशवार्षिकम् ॥ 52 ॥

[3]पद्माक्षं कुण्डलं [4]कर्णे वहन्तं नवनीतकम्।
गाश्चारयन्तं तत्रैव तडागं च ददर्श ह ॥ 53 ॥

---

1. विलिखाप्य – क, ख।
2. तद्भूतले – क।
3. ययाक्षं – ख।
4. मध्ये – क, ख।

तत्तीरे तुलसीवृक्षं दृष्ट्वा हृष्टो बभूव सः ।
गोपालं तं तु पप्रच्छ नवनीतं भवद्गृहे ॥ 54 ॥

मिलिष्यति वदास्ति क्व भवनं तव याम्यहम् ।
दिनद्वयमनाहाराद् द्वितीये मृतवत्स्थितः ॥ 55 ॥

अदत्त्वा तुलसीपत्रं नवनीतं च विष्णवे[1] ।
विक्रीणाति न कोप्यत्र किञ्चेदं तुलसीदलम् ॥ 56 ॥

गृहीत्वा गच्छ त्वरितं मद्वचः ठक्कुरं वदन् ।
नेदं समुचितं विप्र व्रतं प्राणविनाशनम् ॥ 57 ॥

भक्त्यैव भगवाञ्च्छीघ्रं सुलभो वर्तते नृणाम् ।
इति श्रुत्वा स दासस्तु गृहीत्वा नवनीतकम् ॥ 58 ॥

नीत्वा च तुलसीपत्रं त्वरितस्तत्र चागतः ।
उवाच स्वामिने लब्धं द्वयमस्ति वने मया ॥ 59 ॥

समीपेऽत्र तडागोऽस्ति याम्यानेतुं जलं त्वहम् ।
इत्युक्त्वा पात्रमादाय शीघ्रमानी वाञ्जलम् ॥ 60 ॥

स्नापयित्वा पूजयित्वा भोजयित्वातिहर्षितः ।
स्वयं च बुभुजे दासः स्वामिभुक्तावशेषितम् ॥ 61 ॥

ततस्तं दासमाहेदं वचो गोविन्दठक्कुरः ।
कुत्रास्ति सुत गोपालस्तडागश्चापि कुत्र सः ॥ 62 ॥

दृष्ट्वा तौ तु ततो मार्गे ज्ञात्वा यास्याम्यरण्यतः ।
इति श्रुत्वा स दासस्तु गृहीत्वा स्वं च वस्तु वै ॥ 63 ॥

चलितः स्वामिना साकं तत्रागत्य स्थितोऽभवत् ।
ददर्श सर्वं तद्वत्स तत्र गत्वा न गाश्च तम् ॥ 64 ॥

गोपालं तुलसीं नैव ततो दासोऽब्रवीत् पुनः ।
स्वामिन्नत्रैव सर्वं दृष्टं नैवात्र संशयः ॥ 65 ॥

अयं वृक्षस्तडागस्य तीरे हृष्टो मया तदा ।
अत्रैव तुलसीं दृष्ट्वा गोपालस्तत्र संस्थितः ॥ 66 ॥

---

1. मिदं त्वया – ख ।

इति श्रुत्वा ततः सोऽपि वनाद्बहिरथागतः।
क्वचिद्ग्रामे तु पप्रच्छ जनानस्मिन् वने महान्॥ 67॥

जलाशयोभवद्भिस्तु ज्ञायते वर्तते न वा।
इति श्रुत्वा जनाः प्राहुर्वने नैव जलाशयः॥ 68॥

अस्ति क्वापीति जानीहि मिथ्यादासो वदत्ययम्।
पुनः पप्रच्छ तं दासं गोपालः कीदृशस्त्वया॥ 69॥

दृष्टो ब्रूहीति श्रुत्वा स उवाचातीव हर्षितः।
श्यामः कमलपत्राक्षः कुण्डलेन च [1]भूषितः॥ 70॥

द्वादशाब्दवयः पीतवासा दृष्टो गवानुगः।
इति श्रुत्वाथ गोविन्दठक्कुरस्तं ननाम ह॥ 71॥

धन्योऽसि त्वं तु देवं हि दृष्टवानसि वै प्रभुम्।
इति श्रुत्वा वचस्तस्य दासश्चकितमब्रवीत्॥ 72॥

स एव भगवान्सत्यमित्युक्त्वा चापतद्भुवि।
ब्रह्माण्डं प्रास्फुटत्तस्य[2] गतोऽसौ हरिमन्दिरम्॥ 73॥

सोऽपि दासशवस्याग्रे विललपातिदुःखितः।
दाहयित्वा शवं तस्य रात्रौ तत्रैव संस्थितः॥ 74॥

स्वप्ने ददर्श कोऽप्याह मा शोकं कुरु भो द्विज।
तस्येदं चरमं जन्म त्वत्सर्गाच्च मां [3]पुनः॥ 75॥

दृष्ट्वा मामेव सम्प्राप्तः कर्मणा दासतां पुनः।
त्वमपि श्रद्धया मां हि सम्पूज्य च निरन्तरम्॥ 76॥

मामेवैष्यसि सत्यं ते कथयामि न संशयः।
एवं दृष्ट्वा तु स्वप्नं स प्रातरुत्थाय धैर्य्यवान्॥ 77॥

ततश्चचाल कतिभिर्दिनैरागतवान् गृहम्।
तत्रोवाच जनान्सर्वान् तद्वृत्तं भक्तिपूर्वकम्॥ 78॥

श्रुत्वातिविस्मितास्सर्वे प्रशशंसुश्च[4] तं मुदा।
इत्येतत् सकलं ख्यातं मिथिलायां गृहे गृहे॥ 79॥

---

1. पुण्डरीक दलेक्षणः – क, ख।
2. मस्यप्रस्थोद – क, ख।
3. मी भयः – ख, मी भयं – क।
4. प्रसशंश – ख, क।

तस्माद्भक्त्या[1] न चासाध्यं किञ्चिच्चैवास्ति वै नृणाम् ॥ 80 ॥

इति श्रीभगवद्भक्तिमाहात्म्ये जगन्नाथमनीराम - गोविन्दठक्कुरचरितं नाम सप्तचत्वङ्करशदधिकशततमः सर्गः ॥ 147 ॥

❊ ❊ ❊

अष्टचत्वारिंशदधिकशततमः सर्गः

॥ रामप्रसादचरितम् ॥

रामप्रसादनाम्नैवायोध्यायामभूद्द्विजः[2] ।
त्यक्त्वा सर्वमभूत्सोऽथ रामभक्तोऽतिवैष्णवः ॥ 1 ॥

सदागतानां सर्वेषां साधूनां भोजनं ददौ ।
यावद्यस्यास्ति निष्ठा वै स तावच्चात्र तिष्ठतु ॥ 2 ॥

[3]इत्याज्ञा तस्य भक्तस्य जीविका नैव कापि वै ।
कुतश्चिदागतं वित्तं तस्मात्तेऽस्यास्ति जीवनम्[4] ॥ 3 ॥

एवं बहुदिने काले गते चैकदिने पुनः ।
वणिग्ददौ न सामग्रीं भोजनार्थं सतां तदा ॥ 4 ॥

श्रुत्वा स तूष्णीं स्वगृहे तस्थौ चिन्तापरायणः ।
अथ रामप्रसादस्य रूपं धृत्वा [5]रघूत्तमः ॥ 5 ॥

गृहीत्वा तावती मुद्रा ययौ तद्वणिजो गृहे ।
वणिग्दृष्ट्वा तु तं भक्त्या कृताञ्जलिपुरोऽब्रवीत् ॥ 6 ॥

किमर्थमागतः स्वामिन्स्वयमेवेति चासकृत् ।
ब्रुवन्तं तमाह[6] रामप्रसादस्य स्वरूपधृक् ॥ 7 ॥

नात्र दोषो गृहाणेदं धनं देहि च भोजनम् ।
साधुभ्योऽहं तु गच्छामीत्युक्त्वा स निर्ययौ ततः ॥ 8 ॥

अथ याते कियत्काले वणिक् तस्य तु मन्दिरे ।
रामप्रसादस्याग्रे तु कृताञ्जलिरुषा च तम् ॥ 9 ॥

---

1. भक्तेन –ख, ग।
2. द्विजः स्थितः – क।
3. इत्युक्त्वा – ख, ग।
4. जीविका – क, ख।
5. रकृतमः – क।
6. प्राह तं – क।

स्वामिन्नाज्ञाप्यतां शिष्यो गृहीत्वा मद्‌गृहाद्भुताम्।
अखिलां भोज्यसामग्रीं भोजयत्वथ वैष्णवान्॥ 10 ॥

इति श्रुत्वाब्रवीद्रामप्रसादो वणिजं तु तम्।
सहस्रावधि ते जातमृणमद्य वणिग्च्छृणु॥ 11 ॥

[1]तद्दत्त्वा भोज्य सामग्रीमानयिष्यामि ते पुनः।
इति श्रुत्वा वचस्तस्य वणिगाहातिभक्तितः॥ 12 ॥

इदानीमेव सर्वं मे दत्त्वा त्वं पुनरागतः।
किमिदं भाषसे नाथ दत्तं सर्वधनं त्वया॥ 13 ॥

स्वयं गत्वा गृहे मेऽद्येत्युक्त्वा स वणिक्तदा।
आगत्य भवने नीत्वा ता मुद्रास्तत्र चागतः॥ 14 ॥

दर्शयामास सर्वान्वै सर्वे दृष्ट्वातिविस्मिताः।
रामप्रसादभक्तस्तु तं ननामातिभक्तितः॥ 15 ॥

हर्षाश्रुपरिपूर्णाक्षस्तुष्टावातिमुदान्वितः।
एवं हि परमाश्चर्यं ज्ञात्वा वैश्योऽपि तत्क्षणात्॥ 16 ॥

बभूव तस्य शिष्यो वै परित्यज्य गृहादिकम्।
स च रामप्रसादस्तु तेन वैश्येन सङ्गतः॥ 17 ॥

अन्यैश्च बहुभिः शिष्यैर्जगाम मिथिलापुरीम्।
तत्र दृष्ट्वा जगद्धात्रीं सीतां जनकमन्दिरे॥ 18 ॥

सम्पूजितो[2] नृपतिना तत्रत्येन तदा स तु।
रामधाम[3] व्रजन्मार्गे मम ग्रामे समागतः॥ 19 ॥

तत्र दृष्टः स पित्रा मे पितृव्येनातिभक्तितः।
तन्मुखात्तु मया सर्वमेतत् वृत्तं श्रुतं पुनः॥ 20 ॥

अत्यल्पेऽस्मिन्नपि दिने भगवान्भक्तवत्सलः।
प्रादुर्बभूव तद्रूपः सत्यमेतन्न संशयः॥ 21 ॥

अथ रामप्रसादस्तु स्थित्वा तत्र कियद्दिनम्।
मार्गशीर्षे समायाते शुक्लपक्षस्य पञ्चमी[4]॥ 22 ॥

---

1. तं दत्वा – क, ग।
2. पूज्यतो – ख।
3. ग्रामं – क।
4. सत्यत्कापि – ख।

यदागता तदा सीता विवाहस्य महोत्सवम्।
चक्रे राज्ञा समं भक्त्या श्रीमद्रामप्रसादकः ॥ 23 ॥

तदा सा मिथिला सर्वा तादृगानन्दवत्यभूत्।
एवं रामप्रसादोऽभूत् भगवद्भक्तसत्तमः ॥ 24 ॥

तद्द्रष्टारश्च पुरुषाः [1]सन्त्यद्यापि महीतले।
क्वौ जीपण्ढरपुरे विठ्ठलभक्तो[2] बभूव ह ॥ 25 ॥

येन साकं हरिः साक्षाच्चक्रे सम्भाषणं मुहुः।
यस्यान्तसमये देहो गतः पश्यत्सु वै नृषु ॥ 26 ॥

कथाविस्तरतोऽन्यत्र वर्ततेऽतो न लिष्यते।
तथैव रामदासोऽभूद्दक्षिणे रामसेवकः ॥ 27 ॥

तस्य पुच्छमभूदेद्ज्ञात्वा सर्वैर्दृढीकृतम्।
मारुतेरवतारोऽयं चमत्कारोऽति तादृशः ॥ 28 ॥

दामाजीपन्त नगरेऽन्यो बभूवातिवैष्णवः।
दुर्विज्ञेयस्तु राजान्नं भोजयामास भिक्षुकान्॥ 29 ॥

पाचमाने नृपेऽन्ने तु तन्मूल्यं लक्षसम्मितम्।
दामाजी भृत्य चाण्डालवेषेण श्रीहरिः स्वयम्॥ 30 ॥

[3]राज्ञे मूल्यं ददौ सर्वं राजा चातीवहर्षितः।
दामाजीशर्मणे पत्रं प्रेषयामास भूपतिः ॥ 31 ॥

स तु दृष्ट्वाद्भुतं मेने श्रीहरेर्वै विचेष्टितम्॥ 32 ॥

इति श्रीभगवद्भक्तिमाहात्म्ये रामप्रसादचरितं
नामाष्टचत्वाङ्करशदधिकशततमः सर्गः ॥ 148 ॥

❊ ❊ ❊

---

1. सत्यत्कापि – ख।
2. शूद्रो – ख, ग।
3. राज्ये – क।

ऊनपञ्चाशदधिकशततमः सर्गः

॥ स्वानुभवकथनम् ॥

इत्येतद् भगवद्भक्तिमाहात्म्यं कथितं मया।
सन्देहो नात्र कर्तव्यः सर्वं सत्यं न संशयः ॥ 1 ॥

यस्य भक्तिर्दृढायाता धर्मो येन च रक्षितः।
विश्वासो यस्य हृदये शास्त्रं तस्यैव सिद्धिदम् ॥ 2 ॥

इदानीमपि पश्यन्तु सन्दिहानं महाद्भुतम्।
मिथ्याभिशप्तः पुरुषो दिव्यं कुर्वन् हि शुध्यति ॥ 3 ॥

लौहं [1]तप्तं करे कृत्वा शुद्धो नैव हि दह्यते।
अशुद्धः तत्क्षणादेव दग्धपाणिः प्रजायते ॥ 4 ॥

जले मग्नश्चिरं तत्र शुद्धस्तिष्ठति गेहवत्।
अशुद्धस्तत्क्षणादेव उन्मज्जति निमज्जति ॥ 5 ॥

एवं सप्पो[2]धृतः शुद्धो नैवाशुद्धो हि धार्यते[3]।
अशुद्धं तत्क्षणादेव [4]दह्यते त्वद्भुतं महत् ॥ 6 ॥

एवं शास्त्रोदितं धाममाहात्म्यं दृश्यते यथा।
अद्यापि भक्तिमाहात्म्यं तादृशं दृश्यते जनैः ॥ 7 ॥

अन्यत्र द्विजसंस्पृष्टं भोक्तुं नो जायते मनः।
जगन्नाथपुरेऽश्नाति सर्वश्रेष्ठ द्विजोऽपि वै ॥ 8 ॥

तस्मान्मनो हि सर्वत्र सर्वेषां फलदं नृणाम्।
तत्सन्दिग्धे[5] फलं तद्वत्सन्दिहानं भवत्यहो[6] ॥ 9 ॥

ममैवानुभवो जातो यथा तत्कथयाम्यहम्।
यथैतत्ग्रन्थनिर्म्माणे मम बुद्धिरभूत्तथा ॥ 10 ॥

अहं तु मैथिलो वेणीरामशर्मा पिता मम।
तारादेवी तु जननी मदेकतनया तु सा ॥ 11 ॥

---

1. तमं – ख।
2. सर्वोधृतः – क।
3. किन्चिदसत्य हो – क, ख।
4. दृश्यती – क, ख।
5. तस्मिन् द्वे द्वे – क, ख।
6. फलं तथा – ख, ग।

मात्रायं चन्द्रमाराध्य लब्धोऽहं तनयस्तया।
चन्द्रदत्तेति मे नाम कृतमात्मजनोदितम्॥ 12॥

मज्जन्म [1]दिवसाद्वर्षमध्योता दिवं गता।
पिता पुनर्विवाहं न स्वीचक्रे मां सुतं स्मरन्॥ 13॥

अथाहं निजगेहे तु जातः षोडशहायनः।
लालितः स्वजनैः सर्वैरधीयानो यथामति॥ 14॥

तदा तत्रागतः कश्चिद् दुर्जनो राजकार्यकृत्।
जीवनेति च नाम्ना स प्रेरितो म्लेच्छभूभुजा॥ 15॥

मिथिलायां स सर्वेषां जीविकामाच्छिदद्बलात्[2]।
तदा पलायिताः सर्वे ब्राह्मणा भयविह्वलाः॥ 16॥

ममाप्याम्रवनं ग्रामे कियद्राज्ञार्पितं स्थितम्।
तदर्थं तस्य भृत्यैस्तु गच्छन्मार्गे धृतो ह्यहम्॥ 17॥

श्रुत्वा मां तु धृतं मोहान्मत्पितृव्यः समागतः।
श्रीमद्राघवशर्म्माथ तदा तद्भवने स्थितः॥ 18॥

तं च मां च दुष्टात्मा शृङ्खलाभ्यां बबन्ध ह।
[3]बध्वा सन्ताडयामास कशाभिर्निर्दयैर्जनः॥ 19॥

गृहे ते वर्तते भूरि धनं मे सर्वमर्प्पय।
विद्धद्वधेनैव पापमित्युच्चैः सोऽब्रवीद्वचः॥ 20॥

मस्तरामाभिधः साधुरेको ग्रामपतिः स्थितः।
सोऽपि बद्धः कशाघातैः प्राणांस्तत्याज तत्क्षणात्॥ 21॥

एवं सन्ताड्य मां तं च निन्युः कारागृहे जनाः।
तत्र[4] मां मत्पितृव्यस्तु समुवाच दयान्वितः॥ 22॥

आपदुद्धारणं नाम मन्त्रमापदि त्वं स्मर[5]।
इत्युक्तोऽहं तु तत्कालमारभ्याविरतं स्मरन्॥ 23॥

स्थितो बद्धस्तु तत्रैव गतमेव दिनद्वयम्।
तृतीये दिवसे सुप्तो जीवनो निश्यवैक्षत॥ 24॥

---

1. वृ – ख, ग।
2. उपह्रित्वा बलात् – क, ख।
3. बंध्या – क।
4. ताड्य – क।
5. मन्त्र वेदायाति तदास्मरन् – क।

एको दण्डधरोऽभ्येत्य द्रुतं गालिं ददन् पुमान्।
बद्धानिमान् विमुच्चरेः सर्वनाशस्तु ते ह्यभूत्॥ 25॥

त्वमपि प्रातरेवात्र विपद्ग्रस्तोऽसि निश्चितम्[1]।
इत्यर्द्धरात्रे दृष्ट्वा स स्वप्नं तत्कालमुत्थितः॥ 26॥

भृत्यानाहातिकोपेन कश्चिदत्रागतो न वा।
द्वारदेशे कपाटस्तु लापितो वर्तते न वा॥ 27॥

इत्युक्त्वा स पुनर्दण्डद्वयान्ते चोत्थितो गृहात्।
भृत्यानाहूय संत्रस्तः स्वप्न वृत्तमुवाच तान्॥ 28॥

भ्रमोऽयमिति ते सर्वे उक्त्वा तूष्णीं स्थिता भयात्।
तेषां मध्ये ह्यथैकस्तु स्वप्नवृत्तमुवाच तान्॥ 29॥

दिनत्रयं निराहारं स्थितयोस्ताह्य मानयोः।
आवयोरपि विश्वासाज्जातमन्तर्बलं तदा॥ 30॥

प्रातः काले चतुर्थेऽह्नि तत्र जीवनवेश्मनः।
समायातं वज्रपातसमं दृष्ट्वा स मूर्च्छितः॥ 31॥

तस्यैक तनयो गेहे [2]सुप्तः पत्न्या सह स्थितः।
अकस्मात्तत्र वह्निस्तु लग्नस्तत्रमृतः सुतः॥ 32॥

सपत्नीको धनं सर्वं भस्मसादभवत्क्षणात्।
ज्ञात्वैवं सत्यवृत्तान्तं लुण्ठति स्म धरातले॥ 33॥

दृष्ट्वा तूष्णीं स्थितौ चावामथ[3] दण्डद्वयान्तरे।
तत्र स्थानेऽन्यपुरुषं प्रेषयामास भूपतिः॥ 34॥

कायस्थं नीतिकुशलं नाम्ना इन्द्रबहादुरम्।
स तु पश्चात्स्थितस्तस्य भृत्यास्तत्कालमागताः॥ 35॥

रुदन्तं जीवनं कोपाश्चक्रुशुः [4]स्वासनात्ततः।
बध्वा संस्थाप्य तं पश्चादावयोः शृङ्खलेऽद्भुतम्॥ 36॥

छेदयित्वाथ सत्कृत्य मुमुचुर्नौ हि बन्धनात्।
अथावां स्वगृहे गत्वा यथापूर्वं स्थितो सुखम्॥ 37॥

---

1. विपतिग्राश्वसिध्रुवम् – क, ख।
2. सुप्त्या – ख, या।,
3. वाचामथ – क।
4. श्वास – क, ख।

एवं मयैवानुभूतं भक्तिमाहात्म्यमुत्तमम्।
अतिभक्तिस्समुत्पन्ना सद्यः प्रत्ययकारिणी॥ 38॥

तस्मिन् क्षणे किमप्यन्यन्न ज्ञातं हि धरातले।
एकाग्रचेतसा देवः स्मृतः सङ्कष्टनाशनः॥ 39॥

एवं कतिपये ज्योतिर्विदस्तत्र समागताः।
मज्जन्मपत्रिकां दृष्ट्वा मह्यमुक्तं फलं तत्॥ 40॥

त्रिंशत्तमेऽब्दे मृत्युस्ते भविष्यति न संशयः।
तदारभ्य तु सन्देहात्सर्वान् ज्योतिर्विदस्त्वहम्॥ 41॥

प्रादर्शयं जन्मपत्रं सर्वैरुक्तं तदेव हि।
तदा निश्चित्य मरणमुदासीनः स्थितो गृहे॥ 42॥

सप्तविंशत्तमेऽब्दे तु ममैको मिलितो द्विजः।
सिद्धासीदुत्तमा विद्या[1] तस्य कर्णपिशाचिनी॥ 43॥

तमपृच्छमहं भक्त्या कियदायुर्वदास्ति मे।
स तु ध्यात्वा कियत्कालं मामुवाचेति निश्चितम्॥ 44॥

त्रिंशत्तमेऽब्दे[2] कष्टं ते मृत्युतुल्यं भविष्यति।
परन्तु वैष्णवो मन्त्रो यस्त्वायाति तं यदि॥ 45॥

स्मरिष्यसि तदा तर्हि न ते मृत्युर्भविष्यति।
कोऽसौ मन्त्रः स वक्तव्य इति पृष्टो मया पुनः॥ 46॥

अब्रवीदथ तन्मन्त्रं श्रुत्वा [3]विश्वासवानहम्।
यातो विप्रो ययौ गेहं स्वगृहं चापि तत्क्षणात्॥ 47॥

भुञ्जानः पर्य्यटन् तिष्ठन् स्वपन् व्यहरन्नपि।
[4]अस्मार्षीस्तमहं मन्त्रं भक्त्या मृत्युभयेन च॥ 48॥

अथ तस्मिन्वत्सरेऽहं पितृराज्ञां प्रगृह्य सः।
काश्यां स्नातुं समायातौ ग्रहणे चन्द्रसूर्ययोः॥ 49॥

आगत्य न्यवसं तत्र पित्रोक्तं विहितन्मया[5]।
मया विचारितं काश्यां मृत्युश्चेत्सर्वतो वरम्॥ 50॥

1. काचित्तस्य – ख, ग।
2. ख मध्ये लुप्तापाठः।
3. स च वाहनम् – ख।
4. अस्मार्षिवतं वै – क, ख।
5. मया – क, ख।

वर्षद्वयं तत्र [1]यातं वसतो जपन् तत्र[2] हि।
ज्ञातं पित्रापि तत्सर्वं स्नेहात्स स्वयमागतः ॥ 51 ॥

आगत्य दृष्ट्वा मां हृष्टः पञ्चसप्ततिवार्षिकः।
पिता मे कृतवान् काश्यां यात्रां सर्वां मया सह ॥ 52 ॥

तत एक दिने हृष्टः पिता मामब्रवीद्वचः।
तवारिष्टदिनं चातःपरमस्ति कियद्वद ॥ 53 ॥

इति श्रुत्वा मयाप्युक्तमयं मासस्तु कार्तिकः।
मकरांशद्वितीयान्तो वर्षोऽयं गर्हितो मम ॥ 54 ॥

इति श्रुत्वा पुनः प्राह स मां मद्वचनं शृणु।
जनन्यां ते मृतायां तु विवाहर्थमहं पुनः ॥ 55 ॥

प्रार्थितो बन्धुभिस्सर्वैर्मया न स्वीकृतो हृदि।
विचारितमयं पुत्रः सर्वं मम[3] करिष्यति ॥ 56 ॥

यदि विश्वेश्वरस्तन्मे सत्यमद्य करिष्यति।
तदा त्वमपि मां जीवन् जीवन्तं द्रक्ष्यसि ध्रुवम् ॥ 57 ॥

नोचेदत्रैव वसतो यद्भविष्यति तद्वरम्।
अहं तु नात्र वत्स्यामि याम्यद्यैव निजालयम् ॥ 58 ॥

इत्युक्त्वा साश्रुनयनः प्रतस्थे तत्क्षणात्पिता।
अन्येऽपि मैथिलाः सर्वे शोकार्ता अनुवव्रजुः ॥ 59 ॥

अहं तु वरुणातीरपर्यन्तामगतो रुदन्।
ततो मां दक्षिणे तीरे संस्थाप्य चोत्ततार सः ॥ 60 ॥

परमानुरागतो मां तु दृष्ट्वा मोहात्पपात ह।
ततोऽहं द्रुतमागत्य जलं नीत्वा ददौ पुनः ॥ 61 ॥

तत उत्थाय मामाह त्वं मा काश्याद्बहिर्व्रज।
तावद्दिने [4]व्यतीते तु शीघ्रमेहि ममान्तिकम् ॥ 62 ॥

ममापि चायुषोन्तस्तु अग्रिमाब्दे भविष्यति।
इत्युक्त्वा प्रस्थितो धैर्यं कृत्वाहमपि चागतः ॥ 63 ॥

---

1. वर्षेत्यत्र द्वये जाते – क, ख।
2. तत्परैः – ख।
3. तं मे – क।
4. वितीते – ख।

संस्मरन् तं मनुं चित्ते वैष्णवं विप्रभाषितम्।
अथ तस्यां तु रात्र्यां वै अपश्यं स्वप्नमद्भुतम्॥ 64 ॥

मृतोऽहं दग्धुमायाता मम देहं जनास्तदा।
निवारितास्ते शिशुभिरल्पदण्डधरैस्तदा॥ 65 ॥

पुनरपश्यमहं दक्षकोणे दण्डं महाद्भुतम्।
नक्षत्रस्पर्शिनं स्थूलं प्रलयाम्बुदसन्निभम्॥ 66 ॥

कालदण्डोऽयमुदितो वेति[1] तं चाब्रवन् जनाः।
तदाहमतिथिनार्तस्तं मन्त्रमस्मरं हृदि॥ 67 ॥

तस्मिन्क्षणे पुनर्दृष्टाश्चत्वारो वैष्णवा मया।
वहन्तस्तुलसीपत्रमालां तिलकभूषिताः[2] ॥ 68 ॥

आगत्य तेऽब्रुवन्मां तु त्वदर्थं वयमागताः।
इमं महाप्रसादं ते ददौ द्वारवतीपतिः॥ 69 ॥

त्वं भुंक्ष्वेति च श्रुत्वाहं भुक्तवान् तत्कराच्च तम्।
न तादृशी सितानापि द्राक्षा नैव सितोपला॥ 70 ॥

तानपृच्छमिदं तस्य जायते भोज्यमद्भुतम्।
तेऽब्रुवन् तत्र नैवेद्यं श्रीकृष्णस्येदमेव हि॥ 71 ॥

यस्मै ददाति सन्तुष्ट इदं श्रीकृष्णपूजकः।
स दीर्घायुः सुखीलोके जायते नात्र संशयः॥ 72 ॥

त्वमप्यकालमरणं न प्राप्यसि यतस्त्वया।
भुक्तो महाप्रसादो यमेतदर्थं वयं त्विह॥ 73 ॥

प्रेषितास्तेन यामाऽद्येत्युक्त्वा [3]जग्मुः यदृच्छया।
अहमप्युत्थितः स्वप्नात्प्रातः कालो बभूव ह॥ 74 ॥

महाप्रसादमाधुर्य्यं जाग्रद्वाप्यनुभूतवान्।
अथैको वैष्णवः प्रातः समागत्याब्रवीच्च माम्॥ 75 ॥

भक्तमालास्ति भाषायां त्वमेतां संस्कृतां कुरु।
इति श्रुत्वा तु तेनाहं सह विश्वेश्वरान्तिके॥ 76 ॥

---

1. इति – क।
2. भूषिणः – ख।
3. यग्मुर्य – ख।

गत्वा स्थापितवान् पत्रद्वयं विधिनिषेधकम्।
विधिपत्रं तु बालेन तदा दत्तं तु मत्करे॥ 77॥
तदारभ्यातिचिन्ताभूत्कथं ज्ञास्यामि[1] तत्कथाः।
अथ लब्धा न कुत्रापि कथा तस्थौ मनस्तथा॥ 78॥
एवं काश्यां स्थितोऽकस्माज्जातोऽहमति[2]दुःखितः।
सर्वैर्ज्ञातं स्वचित्ते तु न जीविष्यत्ययन्त्विति॥ 79॥
एवं भूतोऽप्यहं दैवादेवं सञ्जीवितः पुनः।
गते तस्मिन् वत्सरे तु जातोऽहं नीरुजः सुखी॥ 80॥
तदैव फाल्गुने मासि गतोऽहं निजमन्दिरम्।
तत्र दृष्ट्वा तु मां सर्वे मृतं पुनरिवागतम्॥ 81॥
आनन्दाश्रूणि मुमुचुराश्लिष्यन्ति स्म मां मुदा।
ततस्तस्मिन्वत्सरे तु पिता दिविगतो मम॥ 82॥
कृत्वोर्द्धदेहिकं तस्य प्रवृत्तोऽहं धनार्जने[3]।
संसारयात्रां सततं कुर्वतो मे गताः समाः॥ 83॥
एवमेकदिने स्नातुमर्द्धोदयदिनेत्वहम्।
ब्रह्मावर्तेतु गङ्गायां गतः स्नात्वा तु तत्र वै॥ 84॥
वाल्मीकेराश्रमं द्रष्टुं गतस्तत्र स्थितः क्षणम्।
दृष्ट्वा भ्रान्त्या समायातः स्वस्थाने तत्र वै निशि॥ 85॥
कुरु त्वं भक्तमालां भो कथा चात्रैव तिष्ठति।
इति श्रुत्वा समुत्थाय प्रातरेव तु वैष्णवान्॥ 86॥
आपृच्छ्याहं तदारम्भं कृतवानातिभक्तितः।
भक्तानां कृपया ह्येतत् परिपूर्णमभूद्द्रुतम्॥ 87॥
एवं मयानुभूतं च रहस्यमुदितं त्विह।
तस्माद्भक्तेस्तुमाहात्म्यं सर्वं सत्यं न संशयः॥ 88॥

इति श्रीभगवद्भक्तिमाहात्म्ये स्वानुभवकथनं
नामोनपञ्चाशदधिकशततमः सर्गः॥ 149॥

❊ ❊ ❊

1. ज्ञास्यसि – ख, ग।
2. तातो – ख।
3. जनार्जने – क।

॥भक्तमालनाम॥

[1]इत्येवं भक्तिमाहात्म्यं कथितं भक्तितो मया।
सर्वागमहितं सर्वं यथाशास्त्रं यथामति॥ 1॥

अथ मे कथिता भक्तास्तेषां मध्ये तु केचन।
निवसन्ति हरेः पार्श्वे केचित्तल्लोकवासिनः॥ 2॥

केचित्सेवापरा नित्यं वैकुण्ठे चापि सन्ति वै।
किन्तु प्रिया हरेश्चैते तेषामुक्तं करोति [2]यः॥ 3॥

इति विज्ञाय तेषां तु नामतो गुणतो मया।
कृतं हि कीर्तनं तेषां प्रसीदेत्कोऽपि चेन्मयि॥ 4॥

यथा राजगृहे गन्तुमक्षमो राजसेविनाम्।
कुर्वन् हि सेवनं मर्त्यो लभते वाञ्छितं ध्रुवम्॥ 5॥

तथामहपि भक्तानां कृतवानस्मि कीर्तनम्।
असमर्थोऽन्यसेवायां वाङ्मात्रेणापि सेवये॥ 6॥

सर्वे भक्तवशाः प्रायो विशेषेण तु देवताः।
तत्रापि दुर्गागणय वृषाकपि [3]मुराद्विषः॥ 7॥

एते कुर्वन्ति भक्तानां प्रार्थितं ह्यविचारितम्।
भक्त्या स्वकीयभक्तानां प्रार्थयन्ति हितं ध्रुवम्॥ 8॥

अतोऽस्य श्रवणं पुण्यप्रदं कामार्थसाधकम्।
यत्कथा भक्तिजननी ततो मोक्षप्रदायकम्॥ 9॥

किमत्र बहुनोक्तेन एक एव हि मारुतिः।
ददात्यत्र स्मृतो भक्त्या पुरुषार्थचतुष्टयम्॥ 10॥

अतो ग्रन्थस्य माहात्म्यं यत्किञ्चित्कथितं मया।
सन्तः श्रुत्वाभिनन्दन्तु ग्रन्थे कुर्वत्वनुग्रहम्॥ 11॥

पुराणश्रवणं देशकालाचारव्यवस्थितम्।
अभीष्टफलदं नृणामन्यथा न तथार्थदम्॥ 12॥

एतस्य श्रवणेऽवश्यं नियमो [4]नाप्यपेक्षितः।
श्रुतमात्रस्तु फलदो नृणां सावरमन्त्रवत्॥ 13॥

---

1. भगवद् – क, ग।
2. सः – क, ख।
3. चतुष्टयम् – क, ख।
4. ग्रन्थितः – क।

किञ्च [1]प्रौढे कलौ धर्म्मो न स्थास्यति कथञ्चन।
तदा पुराणश्रवणं कुत्र वा नियमः क्व वा॥ 14॥

यथाद्य वेदमार्गस्तु तिरोऽभूतः कलेर्बलात्।
पुराणमपि सर्वत्र सर्वं नैवास्ति तादृशम्॥ 15॥

अग्रे त्वेतदपि प्रायो न स्थास्यन्ति मुनेर्वचः।
तदेतदपि लोकानां हिताय प्रभविष्यति॥ 16॥

तस्मादेतन्तु माहात्म्यं श्रोतव्यं साधुभिर्जनैः।
तेषां हि भक्तिः सर्वस्वं सैव चात्रास्ति वर्णिता॥ 17॥

अन्योऽपि शृणु चाद्यस्तु सोऽपि भक्तिमवाप्नुयात्।
यतो हि भक्तसंसर्गः श्रवणादत्र जायते॥ 18॥

अभिसंधाय यः कामान् शृणुयात्[2] कीर्तनं सताम्।
तस्यै कामान्ददात्येष भगवान्भक्तवत्सलः॥ 19॥

यथा माता पिता प्रेम कुरुते पुत्रसेविताः।
ददात्यभिमतञ्चापि तथा प्रीतो भवेद्धरिः॥ 20॥

एकादश्यामुपवसन् कुर्वन् जागरणं निशि।
श्रुत्वैतद्भक्तिमाहात्म्यं सर्वान्कामानवाप्नुयात्॥ 21॥

अपुत्रो लभते पुत्रं निर्द्धनो धनमाप्नुयात्।
मूर्खो भवति मेधावी श्रुत्वेमां सत्कथां शुभाम्॥ 22॥

हनुमच्चरितं श्रुत्वा लभते सर्ववाञ्छितम्।
विभीषणस्य चरितं श्रुत्वा पूज्यो भवेन्नरः॥ 23॥

शबरीचरितं श्रुत्वा दृढभक्तिर्भवेन्नरः।
अजामिलस्य चरितं श्रुत्वा [3]पापात्प्रमुच्यते॥ 24॥

जटायुचरितं श्रुत्वा जायते रामभक्तिमान्।
अम्बरीषस्य चरितं श्रुत्वा पापाद्विमुच्यते॥ 25॥

विदुरस्त्रीकृतां भक्तिं श्रुत्वा प्रेम हरौ भवेत्।
सुदामचरितं श्रुत्वा दरिद्रो धनमाप्नुयात्॥ 26॥

---

1. पाठे – क।
2. शृणोति – ख, ग।
3. पूज्यो भवेन्नरः – ख, ग।

चन्द्रहासस्य च शिवेः रन्तिदेवस्य कीर्तनात्।
न शत्रुभयमाप्नोति लभते वाञ्छितं फलम्॥ 27॥

पाञ्चालीभक्तिमाहात्म्यं सर्वसङ्कटनाशनम्।
वाल्मीकिमुनिमाहात्म्यं महापातकनाशनम्॥ 28॥

रुक्माङ्गदस्य चरितं मयूरध्वजभूपतेः।
कीर्तनं सर्वपापघ्नं हरिभक्तिप्रदायकम्॥ 29॥

प्रह्लादचरितं श्रुत्वा मुच्यते सर्वसङ्कटात्।
हरिभक्तिं च सदृढां लभेज्जन्मनि जन्मनि॥ 30॥

एवमन्ये तु ये चाग्रे भक्तास्तेषां तु कीर्तनात्।
हरिभक्तिमवाप्नोति ततः प्राप्नोति वाञ्छितम्॥ 31॥

इति श्रीभगवद्भक्तिमाहात्म्यं कथितं मया।
प्रीत्येक भूर्या भगवतः श्रीकृष्णस्य दयानिधेः॥ 32॥

भूत्वा प्रसन्नो भगवान्निजभक्तानुकीर्तनात्।
ददात्यभिमतं नृणां श्रोतृणां वाचकस्य[1] च॥ 33॥

प्रसीदतु हरिः श्रीमान्भगवान्भक्तवत्सलः।
तद्भक्ता मे प्रसीदन्तु तस्मै तेभ्यो नमो नमः॥ 34॥

[2]षट्साहस्रमिताः श्लोकाः उक्ता सप्तशताधिकाः।
[3]एवं पञ्चाशदधिकं सर्गाणां च शतं शुभम्॥ 35॥

इति श्रीभगवद्भक्तिमाहात्म्ये श्रीचन्द्रदत्तकृत संस्कृतभाषायां भक्तमालनाम पञ्चाशदधिकशततमसर्गात्मकं काव्यं सम्पूर्णम्॥ 150॥

सन् - 18//27 चैत्रकृष्णपक्षनवम्यां बुधवासरे॥
शुभमस्तु पाठकलेखकयोः शुभमस्तु सर्वजगतम्॥

❊ ❊ ❊

---

1. सर्व सिद्धिदः - ख, ग।
2. मिह - ख।
3. उन - क, ख।

परिशिष्टम्

(i) विशिष्टपौराणिकनामावलिः

1. अक्षकुमारः — रावणस्य पुत्रः (3/18)
2. अगस्त्यः — कुम्भोत्पन्नः, ऋषिविशेषः (1/61)
3. अङ्गिरा — ऋषिविशेषः (1/62)
4. अजामिलः — व्याधाचरणशीलः कश्चिद् ब्राह्मणः (1/65)
5. अत्रि — ब्रह्मणः पुत्रः, ऋषिविशेषः (1/61)
6. अम्बरीषः — सूर्यवंशी राजर्षिः प्रशुश्रकस्य पुत्रः अयोध्याधिपतिः (1/54)
7. अयोध्या — वर्तमानोत्तरप्रदेशराज्ये नगरी विशेषा यत्र रामोऽजनि (7/1)
8. अर्जुनः — महाभारतस्य योद्धाविशेषः, पाण्डुपुत्रः (14/7)
9. अश्वत्थामा — द्रोणाचार्यस्य पुत्रः (14/6)
10. आशुतोषः — शङ्करस्य नाम (121/14)
11. एकादशी — तिथिविशेषा (1/26)
12. कर्दमा — कपिलस्य पिता, देवहुत्याः पतिः ब्रह्मण-पुत्रः (1/61)
13. कलिः — कश्चिद् युगप्रवर्तकदेवः (1/6)
14. कल्किः — विष्णोरवतारविशेषः (20/35)
15. कश्यपः — ब्रह्मणः पुत्रः, ऋषिविशेषः (1/63)
16. काकभुशुण्डकः — कश्चिद् ब्राह्मणः, यो हि लोमषस्य शापात् काको बभूव (1/57)
17. कालिन्दी — यमुना (45/20)
18. काली — एकस्याः मातृकादेव्याः नाम, दशमहाविद्यासु प्रथमा (119/46)
19. काशीपुरी — वाराणसी (21/11)

20. कुञ्जबिहारी — कृष्णस्य नामविशेषः (108/21)
21. कुन्ती — युधिष्ठिरस्य माता (1/66)
22. कूर्मः — विष्णोः द्वितीयकच्छपावतारः (2/35)
23. कृष्णः — वसुदेवस्य पुत्रः, विष्णोरवतारः (14/11)
24. केशवः — विष्णोर्नाम (39/55)
25. कैकेयी — दशरथस्य द्वितीया पत्नी, भरतस्य माता (7/4)
26. कौन्तेय — कुन्तिपुत्रः (1/15)
27. कौशल्या — भगवतो रामस्य माता, दशरथस्य प्रथमा पत्नी (51/20)
28. गन्धमादनः — पर्वतविशेषः (3/35)
29. गर्गः — उतथ्यस्य पुत्रः, ऋषिविशेषः (1/62)
30. गरुडः — विष्णोः वाहनः, पक्षीविशेषः (1/57)
31. गोकुलम् — स्थानविशेषः यत्र कृष्णः बाल्ये उवास (62/49)
32. गौतमः — ऋषिविशेषः (1/62)
33. चित्रकेतुः — कश्चिद् विष्णुभक्तः (1/58)
34. चित्रगुप्तः — चतुर्दशयमराजेषु अन्यतमः (79/31)
35. जगन्नाथपुरी — नगरीविशेषः (39/2)
36. जटायुः — प्रसिद्धगृध्रः, यः रामभक्तः सीतायै रावणेन सह युद्धं कुर्वन् हतः (1/57)
37. जडभरतः — राज्ञः ऋषभस्य पुत्रः विष्णुभक्तः (17/40)
38. जनकः — राजर्षिः, मिथिलाधिपतिः (1/53)
39. जनकात्मजा — सीता (3/42)
40. जनार्दनः — विष्णुः (3/25)
41. जानकी — जनकस्य पुत्री, सीता (51/21)
42. जाम्बवान् — विष्णुभक्तः ऋक्षविशेषः (1/57)
43. जाह्नवी — गङ्गा (41/69)

44. तुलसी — वृक्षविशेषः, यः पूर्वजन्मनि शङ्खचूड-राक्षसस्य पत्नी विन्दा नाम्नी आसीत् (79/54)

45. त्रिपथगा — गङ्गा (6/61)

46. त्रिवेणी — गङ्गायमुना सरस्वतीनां सङ्गमः (110/28)

47. दण्डकारण्यम् — अरण्यविशेषः (5/2)

48. दधीचिः — ऋषिविशेषः, यस्यास्थिभ्यो वज्रस्य निर्माणं जातम् (1/54)

49. दशरथः — अयोध्याधिपतिः (1/56)

50. दिलीपः — रघुवंशी राजा (1/55)

51. दुर्योधनः — धृतराष्ट्रस्य ज्येष्ठः पुत्रः (10/16)

52. दुर्वासाः — ऋषिविशेषः (1/63)

53. देवकी — वसुदेवस्य पत्नी, कृष्णस्य जननी (119/47)

54. द्रुपदजा — द्रौपदी, पाण्डवानां पत्नी (15/22)

55. द्वारिका — कृष्णस्य राजधानी, नगरीविशेषा (3/22)

56. धृतराष्ट्रः — दुर्योधनस्य पिता (10/16)

57. ध्रुवः — उत्तानपादस्य पुत्रः, विष्णुभक्तः (1/58)

58. नरसिंहः — भगवतः विष्णोरवतारविशेषः, येन हिरण्यकशिपुः मारितः (20/25)

59. नर्मदा — नदीविशेषः (44/35)

60. नहुषः — कश्चिद् राजा, यो हि इन्द्रपदं प्राप्य ऐश्वर्यमदमत्तः सन् पश्चादजगरो बभूव (1/53)

61. नारदः — ऋषिविशेषः, मानसः पुत्रः (1/44)

62. नारायणः — अजामिलस्य पुत्रः (6/30)

63. पञ्चवटी — दण्डकारण्ये गोदावर्य्यास्तटे एकं प्रसिद्धं स्थानम् (7/6)

64. पराशरः — ऋषिविशेषः (1/63)

65. परीक्षिद् — राजाविशेषः (1/59)

66. पार्वती — हिमालयस्य पुत्री, शिवस्य पत्नी (143/31)
67. पुरुरवः — राज्ञः इलायाः पुत्रः, राजाविशेषः (1/52)
68. पुलस्त्यः — ब्रह्मणः मानसः पुत्रः, ऋषिविशेषः, रावणस्य पितामहः (1/61)
69. पृथुः — त्रिशङ्कोः पिता, राजाविशेषः (1/52)
70. पौराणिकी — पुराणसम्बन्धिनी (15/46)
71. पौराणिकः — ऋषेः सुतस्य नामविशेषः, पुराणकथावाचकश्च (125/17)
72. पौलस्त्यः — रावणस्य नाम (4/2)
73. प्रह्लादः — हिरण्यकशिपोः पुत्रः, विष्णुभक्तः (1/48)
74. प्रद्युम्नः — कृष्णस्य पुत्रः, रुक्मिणीगर्भजः (3/30)
75. प्रयागः — तीर्थराजाधुना इलाहाबादनाम्नः प्रसिद्धः नगरविशेषः (110/25)
76. ब्रह्मवर्तम् — स्थानविशेषः (74/2)
77. ब्रह्मा — त्रिदेवेषु अन्यतमः, सृष्टिकर्त्ता (1/11)
78. भगीरथः — सूर्यवंशी राजा, येन गङ्गा पृथिव्यामवतारिता (1/54)
79. भरतः — रामानुजः, कैकेयीपुत्रः (1/54)
80. भरद्वाजः — ऋषिविशेषः (1/60)
81. भस्मासुरः — असुरविशेषः (1/42)
82. भागवतः — भगवद्भक्तः (33/2)
83. भागीरथी — गङ्गा (81/3)
84. भीमसेनः — कुन्त्या वायोश्च पुत्रः (14/7)
85. भीमा — नदीविशेषा (33/8)
86. भीष्मः — शान्तनोः पुत्रः (1/56)
87. मतङ्गः — ऋषिविशेषः (5/3)
88. मत्स्यः — विष्णोरवतारविशेषः (20/35)

89. मथुरा — नगरीविशेषा (27/1)
90. मथुरा — सप्तपुण्यपुरीषु अन्यतमा (1/67)
91. मयूरध्वजः — कश्चिद् नृपः (18/1)
92. मार्कण्डेयः — मृकण्डऋषेः पुत्रः, अष्टचिरञ्जीविषु अन्यतमः (1/64)
93. मारुतिः — हनुमान् (3/51)
94. मारीचः — रावणस्य मातुलः, राक्षसविशेषः (7/24)
95. मीनः — विष्णोर्मत्स्यावतारः (36/39)
96. यक्षः — देवयोनिविशेषः (1/12)
97. यमः — यमराजः (1/45)
98. जमदग्निः — ऋषिविशेषः, सत्यवत्याः ऋचीकस्यच पुत्रः (1/63)
99. यमुना — नदीविशेषा (119/47)
100. ययातिः — राजर्षिः, नहुषस्य पुत्रः, शुक्राचार्यस्य जामाता (1/55)
101. याज्ञवल्क्यः — वैशम्पायनस्य शिष्यः (1/60)
102. रघुः — रामचन्द्रस्य पूर्वजः (1/53)
103. रन्तिदेवः — महायशसः संकृतेश्च पुत्रः, राजाविशेषः (1/55)
104. रहूगणः — कश्चिद् नृपः (1/53)
105. रामः — दशरथस्य ज्येष्ठः पुत्रः (36/39)
106. रामायणम् — वाल्मीकिकृतः रामचन्द्रकथापूर्णः ग्रन्थविशेषः (4/14)
107. रावणः — प्रसिद्धराक्षसः (7/51)
108. रुक्माङ्गदः — विष्णुभक्तः, कश्चन नृपः (1/54)
109. रुक्मिणी — विदर्भनरेशभीष्मकस्य पुत्री, (3/41)
110. लक्ष्मणः — दशरथस्य पुत्रः (51/21)
111. लङ्का — नगरीविशेषा (3/18)
112. लोमशः — ऋषिविशेषः (1/62)
113. वराहः — विष्णोरवतारः (36/39)

114. बलिः — पातालाधिपतिः, प्रह्लादस्य पौत्रः (1/48)
115. वसिष्ठः — ऋषिविशेषः, रामस्य कुलगुरुः (51/21)
116. वामदेवः — ऋषिविशेषः (33/3)
117. वामनः — विष्णोरवतारः (52/36)
118. वाराहः — विष्णोरवतारः (20/35)
119. वाल्मीकिः — रामायणरचयिता, ऋषिविशेषः (1/60)
120. विदुरः — विष्णुभक्तः (1/64)
121. विट्ठलः — भगवतः विष्णोः विग्रहविशेषः (36/5)
122. विट्ठलाचार्यः — कश्चिद् विष्णुभक्तः (117/35)
123. विभीषणः — रावणस्यानुजः विष्णुभक्तः (1/48)
124. विश्वामित्रः — ऋषिविशेषः, येन तपोबलात् ब्राह्मणत्वमाप्तम् (1/63)
125. वैकुण्ठम् — विष्णोः निवासस्थानम् (8/25)
126. वैशम्पायनः — ऋषिविशेषः, कृष्णयजुर्वेदस्य प्रवर्त्तकः (1/62)
127. व्यासः — पुराणकर्त्ता (1/62)
128. शत्रुघ्नः — दशरथस्य कनिष्ठपुत्रः (51/21)
129. शम्भुः — शिवः (1/11)
130. शबरी — विष्णुभक्ता (1/66)
131. शिबि — कश्चिद्दानी नृपः (13/2)
132. शुकः — व्यासपुत्रः (1/60)
133. शुक्राचार्यः — दैत्यगुरुः (19/6)
134. शृङ्गी — ऋषिविशेषः, शमीकस्य पुत्रः (1/63)
135. सगरः — कश्चिद् नृपः, षठ्चक्रवर्तिषु अन्यतमः (1/54)
136. सत्यभामा — कृष्णस्य पत्नी (119/46)
137. सनकः — ब्रह्मणः मानसपुत्रः (1/44)
138. सञ्जयः — धृतराष्ट्रस्य मन्त्री (1/65)
139. सीता — रामस्य पत्नी (3/17)

140. सुग्रीवः — राममित्रम् (1/57)
141. सुदामा — कृष्णसखा (1/64)
142. सुमित्रा — दशरथस्य तृतीया पत्नी (51/20)
143. सूतः — ऋषिविशेषः (1/60)
144. शूर्पनखा — रावणस्य भगिनी, राक्षसी (7/7)
145. सेतुबन्धः — समुद्रोपरि रामेण निर्मितः सेतुविशेषः (3/2)
146. हनुमान् — रामभक्तः, अञ्जनीपुत्रः (1/57)
147. हरिवंशम् — पुराणविशेषः (112/1)
148. हरिः — विष्णुः (1/11)
149. हरिश्चन्द्रः — सत्यवादी, राजाविशेषः (1/54)
150. हस्तिनापुरम् — पाण्डवाणां राजधानी, नगरीविशेषः (10/15)
151. हिरण्यकशिपुः — दैत्यराट्, प्रह्लादस्य पिता (19/5)

❊ ❊ ❊

(ii) विशिष्टनामावलिः

1. अग्रदासः — कृष्णदासस्य शिष्यः (27/35)
2. अल्हः — कश्चिद् भक्तः (137/13)
3. अङ्गदः — राजसेनपुरनिवासी कश्चिद्विष्णुभक्तः (124/10)
4. अम्भोधिः — समुद्रः (47/56)
5. आखुकर्णः — दाक्षिणात्यः, कश्चिद्विष्णुभक्तः (142/9)
6. आगरा — स्थानविशेषः (143/1)
7. आन्ध्रप्रदेशः — राज्यविशेषः (136/1)
8. आमेरकोठ — स्थानविशेषः (127/1)
9. आशुकर्णः — भीमपुत्रः (143/37)
10. इन्द्रप्रस्थम् — स्थानविशेषम् (146/2)
11. उदयनाचार्यः — मैथिलविद्वान्, विष्णुभक्तः (31/1)
12. उज्जयिनी — नगरी विशेषा (11/11)
13. कच्छवाहः — क्षत्रियवंश विशेषः (127/1)
14. कपूरी — विष्णुभक्तविशेषः (117/36)
15. कमलादेवी — काचित् विष्णुभक्ता (119/47)
16. कमला — नदीविशेषा (47/14)
17. करमानन्दः — विष्णुभक्तः (137/2)
18. करोली — ग्रामविशेषः (125/1)
19. कर्णपिशाचिनी — सिद्धिविशेषा (149/43)
20. कर्णाट — स्थानविशेषम् (41/44)
21. कर्मा — काचिद् ब्राह्मणी, विष्णुभक्ता (54/44)
22. कलावती — विष्णुभक्ता (119/46)
23. कल्याणसिंहः — दाक्षिणात्यः कश्चिन्नृपः, विष्णुभक्तः (136/19)

24. कात्यायनीदासः — विष्णुभक्तः (130/1)
25. कान्यकुब्जः — देशविशेषः (6/2)
26. कामध्वजः — कश्चिन्नृपः (63/5)
27. काशी — वाराणसी (42/67)
28. काश्मीरम् — स्थानविशेषम् (106/4)
29. किन्दुबिल्वः — ग्रामविशेषः (39/2)
30. किरणावली — प्रशस्तपादभाष्यस्य काचित् टीका (31/3)
31. कील्हिः — कृष्णदासस्य शिष्यः (2/5)
32. कुलशेखरः — सीतारामभक्तः कश्चिद् राजा कश्चिद् (50/24)
33. कुल्हदेशः — स्थानविशेषः (26/7)
34. कूवादासः — कश्चिद् भक्तः (141/11)
35. कृपणः — दरिद्रः (135/14)
36. कृष्णदासः — मानसिंह राज्ञः गुरुः (2/3)
37. कृष्णा — काचिन्नदी (43/13)
38. खड्गसेनः — कश्चिन्नृपः (142/48)
39. खोजी — कश्चिद् गुरुभक्तः (116/1)
40. गदाधरः — आन्ध्रप्रदेशीयः, कश्चिद् भक्तः (136/1)
41. गढचित्तौरम् — स्थानविशेषः (61/2)
42. गलता — जयपुरे स्थानविशेषः (2/4)
43. गङ्गा — नदीविशेषा (23/6)
44. गङ्गारामः — कश्चिद्भक्तः (117/52)
45. गङ्गाबाई — काचिद् भक्ता (143/32)
46. गाढा — स्थानविशेषः (124/3)
47. गालवः — ऋषिः (26/5)
48. गुञ्जामाली — लाहौरनिवासी, कश्चिद् विष्णुभक्तः (119/1)
49. गोकुलनाथः — नाथद्वारनिवासी, कश्चित् श्रीनाथभक्तः (135/3)

50.	गौड	—	देशविशेषः (102/1)
51.	गोड्यन	—	देशविशेषः (129/2)
52.	गोदावरी	—	काचिन्नदी (7/6)
53.	गोपीनाथः	—	कश्चिद् भक्तः (118/40)
54.	गोमती	—	काचिद् भक्ता (143/31)
55.	गौरीदासः	—	कश्चिद् भक्तः (120/13)
56.	गौडब्राह्मणः	—	ब्राह्मणविशेषः (70/1)
57.	ग्वालिपुरम्	—	स्थानविशेषः (142/48)
58.	चण्डदासः	—	विष्णुभक्तः (137/1)
59.	चतुरदासः	—	कश्चिद् विष्णुभक्तः (142/9)
60.	चणकक्षेत्रम्	—	स्थानविशेषः (129/23)
61.	चन्द्रदत्तः	—	प्रस्तुत ग्रन्थकर्त्ता (149/12)
62.	चन्दनपुरः	—	स्थानविशेषः (147/2)
63.	चन्द्रहासः	—	देव्युपासकः कश्चिद् (1/58)
64.	चर्म्मकारः	—	विष्णुभक्तः कश्चिद् (130/12)
65.	चित्रकूटम्	—	पर्वतविशेषः (132/41)
66.	चिलौली	—	ग्रामविशेषः (147/1)
67.	चेलादासः	—	कश्चन् विष्णुभक्तः (143/51)
68.	जयमल्लः	—	मरुदेशाधिपतिः (64/2)
69.	जसूश्यामः	—	कश्चिद् दरिद्रो, विष्णुभक्तः (72/1)
70.	जामाता	—	रामानुजाचार्यशिष्यः (22/1)
71.	जीवगोस्वामी	—	कश्चिद् विष्णुभक्तः (126/68)
72.	जीवा	—	विष्णुभक्ता (143/31)
73.	ज्ञानदेवः	—	कश्चिद् भक्तः (48/33)
74.	डुण्डुः	—	कश्चिद् विष्णुभक्तः (117/35)
75.	टोडलः	—	अकबरराज्ञः मन्त्री (129/60)

76. डाकोरे — स्थानविशेषः (71/2)

77. तत्त्वाजीवौ — क्षत्रियौ विष्णुभक्तौ, (96/1)

78. तारादेवी — चन्द्रदत्तस्य मातुर्नाम, 149/11

79. तुङ्गभद्रा — नदीविशेषा, 28/2

80. तुम्बुरु — क्षत्रियकुलम्, 144/1

81. तुलसीदासः — रामभक्तः, रामचरितमानसस्य रचयिता, 131/1

82. तैलङ्गः — काचिज्जातिः, 136/1

83. त्रिलोकः — कश्चन् विष्णुभक्तः, स्वर्णकारः, 126/26

84. त्रिलोचनः — विष्णुभक्तः, 49/1

85. दाक्षिणात्यः — दक्षिणदेशोत्पन्नः, 24/2

86. दामाजी — विष्णुभक्तः, 148/29

87. दिल्लीश्वरः — दिल्लीनगरस्याधिपतिः, 114/52

88. दीनादासः — विष्णुभक्तः, 140/28

89. दीपकुमारी — विष्णुभक्ता, 146/6

90. देवशर्मा — विष्णुभक्तः, 39/13

91. देवाजी — कश्चिद् विष्णुभक्तः, 62/3

92. देवानन्दः — कश्चिद् विष्णुभक्तः, 117/36

93. द्रविडः — दक्षिणदेशविशेषः, 58/2

94. द्राविडः — देशविशेषः, 28/12

95. द्वारकादासः — विष्णुभक्तः, 117/37

96. धन्ना — कश्चिद् विष्णुभक्तः, येन विष्णुप्रतिमाऽपि भोजनं कारिता, 39/2

97. धौसा — स्थानविशेषः, 25/1

98. ध्रुवः — विष्णुभक्तः, उत्तानपादस्य पुत्रः, 32/57

99. नन्ददासः — विष्णुभक्तः, 124/1

100. नरवरः — ग्रामः कश्चित्, 143/46

101. नरसी — कश्चिद् भक्तः, 121/1
102. नरहरिः — विष्णुभक्तः, 94/1
103. नाभा — प्रसिद्धोऽयं विष्णुभक्तः, भक्तमालरचयिता (2/15)
104. नामदेवः — वामदेवस्य दौहित्रः, विष्णुभक्तः (33/2)
105. नारायणः — कश्चिद् विष्णुभक्तः (137/27)
106. नित्यानन्दः — कश्चिद् विष्णुभक्तः (102/1)
107. निम्बादित्यः — विष्णुभक्तः (48/2)
108. नीरा — विष्णुभक्ता (143/31)
109. नैमिषारण्यम् — अरण्यविशेषः, तीर्थम् (73/2)
110. पठरपुरम् — स्थानविशेषः (33/1)
111. पठानपुरः — ग्रामः कश्चित् (145/1)
112. पण्डरपुरम् — दक्षिणे कश्चिद् ग्रामः (248/25)
113. पतिरामः — कश्चिद् भक्तः (115/51)
114. पद्मः — कबीरस्य कुश्चन् शिष्यः (95/1)
115. पद्मावती — जयदेवस्य पत्नी (39/35)
116. परशुरामः — विष्णोरवतारः (135/32)
117. पाञ्चालः — देशविशेषः (56/2)
118. पिल्लः — विष्णुभक्ता, काचिद् बालिका (55/7)
119. पीपा — देवीभक्तः, कश्चिन्नृपः (85/1)
120. पुण्डरीकः — विष्णुभक्तः (32/53)
121. पुण्डरीकपुरम् — नगर विशेषः (116/19)
122. पुष्करः — तीर्थ विशेषः (57/2)
123. पूरणदासः — विष्णुभक्तः (144/45)
124. पृथ्वीराजः — भक्तः, कश्चिन्नृपः (137/45)
125. प्रियव्रतः — उत्तानपादस्य पुत्रः (1/52)
126. प्रेमसिंहः — मानसिंहनृपस्य भ्रातृव्यः (139/2)

127. बिल्वमङ्गलः — विष्णुभक्तः, ब्राह्मणः (43/8)
128. वैद्यनाथः — कश्चिद् विष्णुभक्तः (127/23)
129. भक्तमाला — नाभादासविरचितग्रन्थविशेषः (149/76)
130. भक्तिरत्नावली — ग्रन्थविशेषः (47/44)
131. भरतयोगी — विष्णुभक्तः, कश्चिद् योगी (102/15)
132. भागीरथी — गङ्गानदी (23/2)
133. भीमदासः — कश्चिद् भक्तः (117/33)
134. भोला — विष्णुभक्तः (117/35)
135. मथुरादासः — विष्णुभक्तः (140/2)
136. मदनमोहनः — कश्चिद् कृष्णभक्तः (129/37)
137. मरुदेशः — स्थानविशेषः (29/24)
138. माडदेशः — मारवाडदेशः (141/1)
139. माडौरम् — स्थानविशेषः (120/14)
140. माधवदासः — कश्चिद् विष्णुभक्तः (97/1)
141. माध्वाचार्यः — माध्वसम्प्रदायप्रवर्तकः (48/1)
142. मानदासः — विष्णुभक्तः (135/1)
143. मानवती — विष्णुभक्ता (119/46)
144. मानसिंहः — कश्चिन्नृपः (2/2)
145. मायानन्दः — विष्णुभक्तः (120/12)
146. मारवाडः — देशविशेषः (126/1)
147. मीरा — कृष्णभक्ता (143/31)
148. मुकुन्दः — कश्चिद् विष्णुभक्तः (117/34)
149. मधुकरः — मथुराधिपतिः (128/11)
150. मृगा — विष्णुभक्ता (119/47)
151. मेरठ — स्थानविशेषः (126/1)
152. मोहनः — विष्णुभक्तः (120/14)

153. रघुनाथः — उत्कलदेशस्य राजकुमारः (101/2)
154. रतिमती — विष्णुभक्ता (2/2)
155. रत्नावती — माधवसिंहस्य पत्नी (139/1)
156. रसिकदासः — विष्णुभक्तः (142/9)
157. राघवानन्दः — विष्णुभक्तः (79/2)
158. राजसेनपुरम् — स्थानविशेषः (124/10)
159. राजकुमारी — विष्णुभक्ता, नारी (143/32)
160. राणा — उदयपुरस्य नृपः (126/5)
161. रामपुरम् — स्थानविशेषः (124/1)
162. रामप्रसादः — रामभक्तः, अयोध्यानिवासी ब्राह्मणः (148/1)
163. रामदासः — विष्णुभक्तः (71/3)
164. रामानन्दः — कबीरदासस्य गुरुः (82/13)
165. रामानुजः — रामानन्दस्य गुरुः, सम्प्रदायप्रवर्तकः (79/1)
166. रूपसनातनौ — गौडदेशीयौ विष्णुभक्तौ (111/1)
167. रैवतः — पर्वतविशेषः (121/3)
168. लड्डू — विष्णुभक्तः (116/48)
169. लषा — विष्णुभक्तः (120/41)
170. लाक्षागृहम् — पाण्डवान् मारयितुं दुर्योधननिर्मितं जतुमयं गृहम् (15/24)
171. लाहाउर — स्थानविशेषः (119/1)
172. वङ्गदेशः — सम्प्रति बङ्गालप्रदेशः (124/2)
173. बद्रीनाथः — विष्णुभक्तः (117/39)
174. वरुणा — वाराणस्यां काचित् नदी (149/60)
175. वरेली — स्थानविशेषः (73/2)
176. वल्लभाचार्य्यः — सम्प्रदायप्रवर्तकः विष्णुभक्तः (107/1)
177. वासवकुमारः — विष्णुभक्तः (146/1)
178. विन्दुमाधवः — विष्णुप्रतिमा (42/53)

179. विमलानन्दः — कश्चिद्भक्तः (115/50)
180. विलन्दा — ग्रामविशेषः (130/2)
181. विष्णुस्वामी — कश्चिद् विष्णुभक्तः (26/1)
182. विष्णुपुरी — काचिन्नगरी (47/11)
183. विष्णुशर्मा — विष्णुभक्तः (47/2)
184. वृन्दावनम् — अरण्यविशेषः (104/3)
185. वेणीरामः — चन्द्रदत्तस्य पिता (149/11)
186. वैकुण्ठम् — विष्णुनिवासस्थानम् (104/6)
187. शङ्कराचार्यः — अद्वैतवेदान्तस्य प्रतिष्ठापकः संन्यासी (28/1)
188. शरविन्दुः — ह्रदविशेषः (30/3)
189. शिल्लः — विष्णुभक्ता, कन्या (55/7)
190. शिलानाथः — भगवतः शिवस्य प्रतिमाविशेषः (47/13)
191. शिबिः — शरणागतवत्सलः नृपः (144/2)
192. शुकः — कश्चिद् ऋषिः (125/23)
193. शूरसेनः — कश्चिन्नृपः (87/1)
194. श्यामदासः — विष्णुभक्तः (143/50)
195. श्रीधरः — भागवतस्य टीकाकर्ता विष्णुभक्तः (66/5)
196. श्रीमण्डनशर्मा — मैथिलः, विष्णुभक्तः (30/4)
197. श्रीमार्गः — कृष्णभक्तः (23/1)
198. श्रीरङ्गः — विष्णुप्रतिमा (58/2)
199. श्रीलदासः — विष्णुभक्तः (142/9)
200. श्रुतिदेवः — विष्णुभक्तः (1/65)
201. षेमा — विष्णुभक्तः (128/42)
202. सदना — विष्णुभक्तः, म्लेच्छकुलोद्भवः (115/1)
203. सदानन्दः — विष्णुभक्तः (143/50)
204. सरयू — नदीविशेषः (131/22)

205. सरबिन्दुः	—	तडागविशेषः (47/18)
206. सारिका	—	पक्षिविशेषः (125/23)
207. सिकन्दरः	—	म्लेच्छः, नृपविशेषः (83/25)
208. सीथग्रामः	—	ग्रामविशेषः (141/1)
209. सीवा	—	कायस्थ जातीयः, भगवद्भक्तः (138/1)
210. सुखानन्दः	—	विष्णुभक्तः (91/2)
211. सुनन्दः	—	विष्णुभक्तः (1/45)
212. सुमन्त्रः	—	दशरथस्य मन्त्री (51/21)
213. सूरदासः	—	कृष्णभक्तः (104/1)
214. सुरदहा	—	ग्रामविशेषः (69/2)
215. सुरानन्दः	—	विष्णुभक्तः (92/1)
216. सूर्यसुता	—	यमुना (142/22)
217. सोमदासः	—	विष्णुभक्तः (117/33)
218. सोमपथः	—	ग्रामविशेषः (120/15)
219. सेना	—	बुन्देलखण्डाधिपतिः, रामस्य नापितः (90/4)
220. सौराष्ट्रम्	—	देशविशेषः (121/2)
221. हरिपालः	—	विष्णुभक्तः (66/2)
222. हरिरामः	—	विष्णुभक्तः (110/1)
223. हर्षा	—	विष्णुभक्तः (143/32)
224. हर्य्यानन्दः	—	विष्णुभक्तः (79/2)
225. हस्तिनापुरम्	—	पाण्डवस्य राजधानी (83/24)
226. हिमालयः	—	पर्वतविशेषः (60/50)
227. हीरा	—	भगवद्भक्ता (119/47)

❊ ❊ ❊

(iii) विशिष्टशब्दावलिः

1.	अग्निः	—	वह्निः (42/3)
2.	अट्टालिका	—	हर्म्या (144/30)
3.	अतिथिः	—	न तिथिर्यस्य सातिथिः, अभ्यागतः (32/54)
4.	अध्वर्य्युः	—	होमकर्त्ता (147/3)
5.	अपराधः	—	आगस् (145/24)
6.	अप्सरा	—	स्वर्गवेश्या (17/31)
7.	अपात्रः	—	न पात्रः अपात्रः, अनधिकारी (125/6)
8.	अभिनन्दनम्	—	स्वागतम् (150/11)
9.	अमानुष्	—	अमानवीय (81/1)
10.	अर्भकः	—	बालकः (18/11)
11.	अस्थि	—	सिक्थ (131/12)
12.	आचारः	—	कुलपरम्परा (16/42)
13.	आमीर	—	गोपः, ग्वाल इत्यर्थः (89/2)
14.	आरामः	—	वाटिका (1/30)
15.	उद्गाता	—	सामवेदगायकः (147/3)
16.	उपवासः	—	व्रतम्, अनशनमित्यर्थः (42/37)
17.	उपनीतः	—	समीपो नीत इत्यर्थः (104/33)
18.	उपानत्करणम्	—	पादत्राणसाधनम् (79/48)
19.	उर्वीम्	—	पृथ्वीम् (137/2)
20.	इन्द्रजालः	—	माया (140/2)
21.	ऋक्	—	वेदमन्त्रः (38/50)
22.	ऋत्विजः	—	ऋग्वेदपाठकाः (147/3)
23.	ऐश्वर्यम्	—	भगादि षट् सम्पतिः (31/68)

24.	कर्म	— क्रिया (23/12)
25.	कर्तव्यम्	— करणीयकार्यम् (18/48)
26.	कलङ्कः	— चिह्नः (126/22)
27.	कलेवरम्	— शरीरम् (127/22)
28.	कविः	— सूर्यः, शुक्राचार्यः, काव्यकर्ता (40/72)
29.	कायस्थः	— जातिविशेषः (137/8)
30.	किन्नरः	— देवयोनिविशेषः, गुह्यकः (1/12)
31.	कीर्तिः	— यशः (16/42)
32.	कुलाचारः	— वंशपरम्परा (126/34)
33.	क्रतवः	— यज्ञाः (16/42)
34.	क्रोधः	— कोपः (86/60)
35.	क्षत्रियः	— वर्णविशेषः (80/1)
36.	खदिर	— काष्ठविशेषः (129/14)
37.	गणिका	— वेश्या (45/37)
38.	गन्धर्वः	— देवयोनिविशेषः (28/14)
39.	गव्यूतिः	— क्रोशद्वयपरिमाणम् (147/7)
40.	गुरुः	— गृणाति = नाशयति अज्ञानमिति गुरुः, उपदेशकः (78/13)
41.	गृहस्थः	— आश्रमविशेषः (60/6)
42.	गौः	— धेनुः (36/11)
43.	चतुर्भुजः	— चत्वारः भुजाः यस्य सः, विष्णुरित्यर्थः (125/1)
44.	चतुर्वर्गः	— धर्मार्थकाममोक्षः (13/26)
45.	चर्म्मकारः	— जातिविशेषः (79/33)
46.	चाण्डालः	— अस्पृश्यजातिविशेषः (143/3)
47.	जातिः	— वर्णः (36/33)
48.	जैनाचारः	— जैनपरम्परा (28/13)

49.	ज्योतिर्विद:	—	ज्योतिष्क:, दैवज्ञ इत्यर्थ: (149/40)
50.	तन्तुवाय:	—	पटनिर्माणकर्ता (82/13)
51.	तडाग:	—	सरोवर: (124/51)
52.	तरु:	—	वृक्ष: (37/11)
53.	तीर्थम्	—	तरन्ति पितरो यत्र तत्तीर्थम्, प्रयागादिकं पवित्रस्थानम् (30/3)
54.	दानम्	—	दीयते इति दानम् (115/2)
55.	दावाग्नि:	—	वनवह्नि: (102/10)
56.	दिवम्	—	आकाश:, (149/13)
57.	दु:खम्	—	प्रतिकूलानुभव: (93/14)
58.	दुर्जन:	—	दुष्ट: (83/35)
59.	दुराचार:	—	नीचकर्म (103/12)
60.	द्वादशी	—	तिथिविशेषा (8/11)
61.	द्विज:	—	ब्राह्मण: (1/12)
62.	धरणी	—	पृथिवी (126/84)
63.	धर्म:	—	धारयति लोकं य: स धर्म:, दयादानादिकम्, (16/42)
64.	धूर्त:	—	वञ्चक: (36/20)
65.	नटीम्	—	नर्तकीम् (144/17)
66.	नरकम्	—	लोकविशेष: (132/11)
67.	नन्दनन्दन:	—	कृष्ण: (1/1)
68.	नाद:	—	शब्द: (41/14)
69.	निन्दा	—	परदोषकथनम् (47/11)
70.	नि:किञ्चन:	—	वराक: (68/14)
71.	नूपुरम्	—	आभूषणविशेष: (144/39)
72.	न्यायम्	—	शास्त्रविशेष: (30/35)
73.	पञ्चगव्यम्	—	गोदुग्ध, गोदधि, गोघृत, गोमयं, गोमूत्रं च सम्मिलितम्

(115/16)

74. परीक्षा — परितः ईक्षणम् (40/9)
75. पर्जन्यः — मेघः (143/2)
76. पर्वतः — नगः (1/44)
77. पाषाणम् — प्रस्तरः (145/2)
78. पितामहः — पितुः पिता (128/41)
79. पिशाचाः — देवयोनिविशेषः (1/12)
80. पुत्रः — पुन्नामकात् नरकात् त्रायते पितरं यः सः पुत्रः (32/36)
81. पुरुषार्थः — धर्मार्थकाममोक्षः (150/10)
82. पुरोहितः — पुरोधः (147/4)
83. पुरोधः — पुरोहितः (8/13)
84. पूर्वजन्म — प्राक्तनजन्म (126/3)
85. पृथिवी — धरणी (29/53)
86. पृथुकम् — चिपटान्नम् (11/21)
87. प्रतिज्ञा — दृढनिश्चयः (129/12)
88. प्रभावः — प्रतापः (127/25)
89. ब्रह्महत्या — ब्राह्मणवधः (133/1)
90. ब्रह्ममुहूर्तः — सूर्योदयात् पूर्व प्रहरैकम्, कालविशेषः (143/8)
91. ब्रह्मचारी — व्रती (79/8)
92. ब्राह्मणः — वर्णविशेषः (80/1)
93. भक्तिः — भज् धातोः क्तिन् प्रत्यये सति निष्पद्यतेऽयं शब्दः, (1/3)
94. भाण्डीर — वृक्षविशेषः (100/33)
95. भिक्षा — याञ्चा (79/12)
96. भिक्षुकाः — याचकाः (21/34)
97. भूमिः — पृथिवी (109/33)
98. मर्त्यलोकः — पृथिवीलोकः (81/29)

99. मनुष्यः — मनोः वंशजः मानव इत्यर्थः (128/15)
100. मन्त्रः — ऋक् (16/30)
101. मन्दिरम् — गृहम् (34/19)
102. मठः — गृहम् (35/18)
103. मणिः — रत्नम् (124/34)
104. महामहिमा — प्रतापशाली (79/2)
105. मीमांसा — शास्त्रविशेषः (30/35)
106. मूर्च्छा — चैतन्यहीनता (42/42)
107. मूर्तिः — प्रतिमा, विग्रहः (34/33)
108. मृदङ्गः — वाद्यविशेषः (36/38)
109. मेधावी — प्रतिभाशाली (150/22)
110. मैथिलः — मिथिलायामुत्पन्नः (1/2)
111. म्लेच्छः — यवनः (36/29)
112. यज्ञः — अध्वरः (28/13)
113. यवनः — म्लेच्छः (145/25)
114. यशः — कीर्तिः (123/33)
115. यूनः — युवकस्य (144/35)
116. योगी — चित्तवृत्तिनिरोधकः (76/25)
117. रागः — आसक्तिः (1/39)
118. रागदिजा — भक्तिविशेषः (1/9)
119. रामायणम् — ग्रन्थविशेषः (13/35)
120. रामनवमी — रामजन्मतिथिः (130/15)
121. लाजा — भर्जितधान्यम् (60/67)
122. वपुः — शरीरम् (126/56)
123. वर्णः — जातिः (46/40)
124. वंशीवट — स्थानविशेषः (146/40)

125. वापी — लघुतडागः (57/42)
126. वायुः — पवनः (37/2)
127. विपिनम् — वनम् (131/10)
128. विप्रः — ब्राह्मणः (16/23)
129. विमानम् — यानविशेषः (130/16)
130. विशः — वर्णविशेषः (79/1)
131. वेदः — श्रुतिः (124/63)
132. वेदाङ्गम् — व्याकरणादि षट्शास्त्रम् (42/2)
133. वैधी — भक्तिविशेषाः (1/8)
134. वैश्यः — जातिविशेष (24/2)
135. वैष्णवः — विष्णुभक्तः (1/33)
136. वाजपेयः — यज्ञविशेषः (147/2)
137. व्रतम् — नियमः (115/3)
138. व्यादितास्यं — विस्फारितमुखम् (18/21)
139. शिखा — शिरसि केशपुञ्जम् (47/6)
140. शिवलिङ्गम् — महादेवमूर्तिः (47/32)
141. शिविका — वाहनविशेषः (12/32)
142. शिष्यः — अन्तेवासि (78/11)
143. शूद्रः — वर्णविशेषः (80/1)
144. शौचम् — पवित्रता (131/46)
145. श्रद्धा — गुरुवाक्येषु विश्वासः (16/42)
146. श्राद्ध — पितॄनुद्दिश्य श्रद्धया यद् दीयते तच्छ्राद्धम् (43/9)
147. श्रुतिः — वेदः (1/13)
148. सदाचारः — सुकर्म (24/12)
149. सचिवः — मन्त्री (128/28)
150. सङ्गतिः — सज्जनसामीप्यम् (44/1)

151. सनातनम् — प्राचीनम् (47/24)
152. सन्तः — साधुपुरुषः (150/11)
153. संवत्सरः — वर्षम् (141/54)
154. संसर्गः — सम्पर्कः (41/66)
155. संस्कारः — वासना (82/8)
156. सविधिः — विधिपूर्वकम् (16/37)
157. साम — वेदभागविशेषः (38/50)
158. सारङ्गः — मृगः, भ्रमरो वा पक्षी वा (106/3)
159. सुखम् — अनुकूलानुभवः (93/14)
160. स्मृतिः — पूर्वानुभवस्य स्मरणम् (1/12)
161. होतारः — यज्ञकर्तारः (147/3)

❊ ❊ ❊